Accountable, *a.* परानुयोगाधीनः -ना -नं, अनुसन्धेयः -या -यं, अनुसन्धानायत्तः -त्ता -त्तं, आह्वानाधीनः -ना -नं, यो निक्षेपं or न्यासं प्रतिपादयितुम् अर्हति.

Accountant, *s.* गणकः, लेखकः, लिपिकारः, मसिपण्यः.

Account-book, *s.* गणनापुस्तकं.

To Accoutre, *v. a.* नह् (c. 4. -नह्यति -ते -नद्धुं), सन्नह्, पिनह्, सज्जीकृ (c. 8. -करोति -कर्त्तुं)

Accoutred, सन्नद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, सज्जः -ज्जा -ज्जं, सज्जितः -ता -तं.

Accoutrement, *s.* सन्नाहः, सज्जा, परिधानं, अलङ्कारः.

To accrue, *v. n.* (To be added) प्रतिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), मिल् (c. 1. मिलति, मेलितुं), प्राप् in pass. (-आप्यते).—(To arise as profit) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), सञ्जन्.

To accumulate, *v. a.* चि (c. 5. चिनोति, चेतुं), सञ्चि, समाचि, प्रचि, राशीकृ, एकत्र कृ.

To accumulate, *v. n.* उपचि in pass. (-चीयते), वृध् (c. 1. वर्धते, वर्धितुं), राशीभू.

Accumulated, *p. p.* उपचितः -ता -तं, सञ्चितः -ता -तं, समाचितः -ता -तं. राशीकृतः -ता -तं, वर्द्धितः -ता -तं.

Accumulation, *s.* सञ्चयः, समुदायः, सम्पत्तिः *f.*, सङ्घातः, सञ्चयः, ओघः, राशीकरणं.

Accuracy, *s.* याथार्थ्यं, तथ्यं, याथातथ्यं, सम्यक्त्वं, शुद्धत्वं, समता.—(Nicety) सूक्ष्मत्वं.

Accurate, *a.* यथार्थः -र्था -र्थं, सत्यः -त्या -त्यं, तथ्यः -थ्या -थ्यं, ऋतः -ता -तं, समञ्जसः -सा -सं, याथार्थिकः -की -कं.

Accurately, *adv.* यथार्थं, सम्यक्, ऋतं, सत्यं, अञ्जसा, सूक्ष्मत्वेन.

Accursed, *p. p.* अभिशप्तः -प्ता -प्तं, शापग्रस्तः -स्ता -स्तं, आक्रुष्टः -ष्टा -ष्टं, आक्रोशनीयः -या -यं, अवगर्हितः -ता -तं.

Accusation, *s.* अभियोगः, दोषकल्पनं, अपवादः.—(False) अभिशंसनं, अभिशापः.

Accusative, *a.* (Case) कर्म्म *n.* (न्), द्वितीया विभक्तिः.

To accuse, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), अभियोगं कृ, अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अपवद् (c. 1. -वदति -वदितुं), दोषकल्पनं कृ, परिशप् (c. 1. -शपति -शप्तुं), अभिशप्.—(To be accused), अभियुज् in pass. (-युज्यते).

Accused, अभियुक्तः -क्ता -क्तं, अभिशप्तः -प्ता -प्तं, अभिशस्तः -स्ता -स्तं.

Accuser, *s.* अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अपवादकः, परिवादकः.

To accustom, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासं or व्यवहारं कृ, शिक्ष् in caus. (शिक्षयति -यितुं).—(To be accustomed) अभ्यस्तः -स्ता -स्तं भू.

Accustomary, *a.* आचारिकः -की -कं, आचरितः -ता -तं, व्यावहारिकः -की -कं, व्यवहारानुरूपः -पा -पं, स्वाभाविकः -की -कं

Accustomed, *p. p.* अभ्यस्तः -स्ता -स्तं, शिक्षितः -ता -तं.

Ace, *s.* (On cards or dice) मुद्राविशेषः.—(Within an ace, all but) प्रायम्, यत्किञ्चित् न्यूनं, ईषदूनं.—'All but dead,' मृतकल्पः.

Acerbity, *s.* कटुता, अम्लता, शुक्तता.—(Sharpness of temper) स्वभावकटुता, अरुन्तुदत्वं.

Ache, *s.* वेदनं -ना, पीडा, व्यथा.—(Headache) शिरोवेदना.—(Tooth-ache) दन्तवेदना.

To ache, *v. n.* पीड् in pass. (पीड्यते), व्य[illegible] (c. 1. व्यथते, व्यथितुं).

To achieve, *v. a.* (To perform, finish) समाप् in caus. (-आपयति -यितुं), सम्पद् in caus. (-पादयति -यितुं), सिध् in caus. (साधयति -यितुं).—(To obtain) प्राप् (c. 5. -आप्नोति -आप्तुं), समाप्, सम्प्राप्.

Achievement, *s.* (A noble exploit) प्रशंसनीयकर्म्म *n.* (न्), चेष्टितं, चरित्रं.—(In heraldry) पदचिह्नं.

Acid, *a.* अम्लः -म्ला -म्लं, शुक्तः -क्ता -क्तं, शौक्तः -क्ती -क्तं, शौक्तिकः -की -कं.

Acid, *s.* अम्लः, शुक्तं.

Acidity, *s.* अम्लता -त्वं, अम्लभावः, शुक्तता.—(Of stomach) अम्लपित्तः.

To acidulate, *v. a.* अम्लीकृ, अम्लय् (nom. अम्लयति -यितुं).

Acidulated, *p. p.* अम्लाक्तः -क्ता -क्तं, अम्लीकृतः -ता -तं.

To acknowledge, *v. a.* अभिज्ञा (c. 1. -जानाति -नीते -ज्ञातुं), प्रत्यभिज्ञा, समभिज्ञा, प्रतिज्ञा; स्वीकृ, अङ्गीकृ, अनुभाष् (c. 1. -भाषते -भाषितुं).

Acknowledgment, *s.* स्वीकारः, अङ्गीकारः, प्रत्यभिज्ञानं.—(Of a fault) स्वपापस्वीकारः.

Acorn, *s.* प्रसिद्धवृक्षस्य फलं.

To acquaint, *v. a.* ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा; बुध् in caus. (बोधयति -यितुं), प्रबुध्, प्रतिबुध्, अवबुध्, निविद् in caus. (-वेदयति -यितुं).

Acquaintance, *s.* परिचयः.—(Knowledge) ज्ञानं, परिज्ञानं.—(An acquaintance, friend) मित्रं, संसर्गी *m.* (न्), विभावः.—(Familiarity) संसर्गः, संस्तवः.

Acquainted, परिचितः -ता -तं, संस्तुतः -ता -तं.—(Known) ज्ञातः -ता -तं.

To acquiesce, *v. n.* तुष् (c. 4. तुष्यति तोष्टुं), सन्तुष् with inst. or loc.—(In an opinion) सम्मतिं कृ.—(To assent) अनुमन् (c. 4. -मन्यते -मन्तुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं).

Acquiescence, *s.* तुष्टिः *f.*, परितोषः, सन्तोषः, सम्मतिः *f.*, अनुमतिः *f.*, क्षान्तिः *f.*—(Submission) क्षान्तिः *f.*

Acquirable, *a.* प्राप्यः -प्या -प्यं, लभ्यः -भ्या -भ्यं.

To acquire, *v. a.* अर्ज् (c. 1. अर्जति अर्जितुं), उपार्ज्, लभ् (c. 1. लभते लब्धुं), उपलभ्, प्राप् (c. 5. -आप्नोति -आप्तुं), अवाप्; प्रतिपद् (c. 4. -पद्यते -पत्तुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्; आविश् (c. 6. -विशति -वेष्टुं), समाविश्.

Acquired, *p. p.* प्राप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, आपन्नः -न्ना -न्नं, अर्जितः -ता -तं, उपार्जितः -ता -तं.

Acquisition or acquirement, *s.* लाभः, लब्धिः *f.*, अर्जनं, प्राप्तिः *f.*, अवाप्तिः *f.*, सम्प्राप्तिः *f.*, प्रतिपत्तिः *f.*, ग्रहणं.—(The thing gained) आगमः.—(Acquirement of knowledge) विद्याप्राप्तिः *f.*, विद्यार्जनं, विद्यागमः.—(Acquisition of property) धनार्जनं.—(Various acquirement) विप्रतिपत्तिः *f.*

To acquit, *v. a.* पापात् मुच् (c. 6. मुञ्चति, मोक्तुं), विमुच्, or in caus. (मोचयति -यितुं), शुध् in caus. (शोधयति -यितुं), निस्तृ in caus. (-तारयति -यितुं).

Acquittal, *s.* शुद्धिः *f.*, शोधनं, मुक्तिः *f.*, मोक्षः.

Acquittance, *s.* निस्तारः, आनृण्यं, निष्कृतिः *f.*

Acquitted, *p. p.* शुद्धः -द्धा -द्धं, मुक्तः -क्ता -क्तं.

Acrid, acrimonious, *a.* कटुः -टुः or -ट्वी -टु, उग्रः -ग्रा -ग्रं, अरुन्तुदः -दा -दं, प्रखरः -रा -रं.

Acrimony, *s.* कटुता, उग्रत्वं, प्राखर्य्यं.—(Of temper) स्वभावकटुता.

Across, *adv.* (To the other side) पारं, तीरान्तरं; as, 'across the sea,' समुद्रपारं.—(Transversely) व्यत्यस्तं.—(With hands across) व्यत्यस्तपाणिना.

Acrostic, *s.* श्लोकविशेषः.

To act, *v. n.* चेष्ट् (c. 1. चेष्टते, चेष्टितुं), विचेष्ट्, संचेष्ट्, कृ (c. 8. करोति, कुरुते, कर्त्तुं), विधा (c. 3. -दधाति -धातुं).—(To conduct one's self) व्यवहृ (c. 1. -हरति -ते -हर्त्तुं), आचर् (c. 1. -चरति -चरितुं).—(As a stage-player) नट् (c. 1. नटति [illegible]).

To act, *v. a.* (To feign by action) नट् (c. 10. नाटयति -यितुं), as, 'Acting the sentiment of love,' शृङ्गारभावं नाटयन्ती; रूप् (c. 10. रूपयति -यितुं), अभिनयं कृ.—The sense of acting a part may be expressed by nominal verbs; as, 'he acts the king,' राजायते.—(To assume disguise) छद्मवेशं कृ.

Act, *s.* (A deed) कर्म्म *n.* (न्), कार्य्यं, चरित्रं, क्रिया, कृतं, कृत्यं, विचेष्टितं.—(Of a play) अङ्कः, अङ्कं.—(A decree) व्यवस्था.

Action, *s.* कर्म्म *n.* (न्), क्रिया, कृत्या, चेष्टा, विचेष्टितं, प्रवृत्तिः *f.*, विधानं.—(Agency, operation) कारणं.—(The action of the wind) वाताहतिः *f.*—(Gesticulation) इङ्गितं, अङ्गहारः, अङ्गविक्षेपः.—(An action in law) अभियोगः, अर्थः.—(Fight, battle) युद्धं, सङ्ग्रामः, समरः, संयुगः.

Actionable, *a.* (In law) अभियोज्यः -ज्या -ज्यं, व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहर्त्तव्यः -व्या -व्यं.

Active, *a.* (Engaged in action) उद्योगी -गिनी -गि (न्), प्रयत्नवान् -वती -वत् (त्), उद्युक्तः -क्ता -क्तं, कर्म्मोद्युक्तः -क्ता -क्तं, अनलसः -सा -सं, सयत्नः -त्ना -त्नं, व्यवसायी -यिनी -यि (न्), कर्म्मी -र्म्मिणी -र्म्मि (न्), सोत्साहः -हा -हं, सोद्योगः -गा -गं, कर्म्मनिष्ठः -ष्ठा -ष्ठं.—(Nimble) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), आशुकारी -रिणी -रि (न्), लघुः -घुः -घु, त्वरितः -ता -तं, त्वरः -रा -रं, अतन्द्रः -न्द्रा -न्द्रं.—(Having motion) गत्वरः -रा -रं.—(Active voice) परस्मैपदं, कर्त्तृवाच्यः.—(A verb in the active voice) कर्त्तरि वाच्यं, सकर्म्मकक्रिया.—(Fond of manly exercise) व्यायामशीलः -ला -लं, व्यायामी -मिनी -मि (न्).

ACTIVITY, *s.* कर्म्मोद्योगः, प्रयत्नता, व्यवसायः, प्रवृत्तिः *f.*, प्रवर्त्तनं.—(Manly exercise) व्यायामः.—(Active life) प्रवृत्तिः *f.*—(With activity) प्रयत्नतस् *ind.*

ACTOR, *s.* (Stage-player) नटः, नर्त्तकः, कुशीलवः, चारणः, रङ्गजीवकः, रङ्गाजीवः, अभिनेता *m.* (तृ), शैलाली *m.* (न्), कृशाश्वी *m.* (न्).—(He that acts or does) कारी *m.* (न्), कारकः, कारः.

ACTRESS, *s.* नर्त्तकी, नटी, चारणदाराः *pl.*

ACTUAL, *a.* (True, real) तथ्यः -थ्या -थ्यं, वास्तवः -वी -वं, वास्तविकः -की -कं, सत्यः -त्या -त्यं, विद्यमानः -ना -नं.

ACTUALLY, *adv.* वस्तुतस् *ind.*, अर्थतस् *ind.*, कार्य्यतस् *ind.*, कार्य्यवत्.

ACTUARY, *s.* लेखकः, व्यवस्थारचकः.

ACUMEN, *s.* (Quickness of intellect) बुद्धिसूक्ष्मता, मतिप्रकर्षः, विदग्धता, कुशाग्रीयमतित्वं.

ACUMINATED, तीक्ष्णाग्रः -ग्रा -ग्रं, अंशुमान् -मती -मत् (त्).

ACUTE, *a.* (In intellect) सूक्ष्मबुद्धिः -द्धिः -द्धि, विदग्धः -ग्धा -ग्धं, कुशाग्रीयमतिः -तिः -ति.—(Not blunt) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं.—(Acute pain) तीव्रवेदना.

ACUTELY, *adv.* तीव्रं, तीक्ष्णं, सूक्ष्मतया.

ACUTENESS, *s.* (Of intellect) बुद्धिसूक्ष्मता, विदग्धता, वैदग्ध्यं.—(Sharpness) तैक्ष्ण्यं, तेजः *n.* (स्), तीव्रता.

ADAGE, *s.* सूत्रं, वचनं, प्राचीनपुरुषवचनं.

ADAGIO, *adv.* शनैः शनैः, मन्दं मन्दं.

ADAGIO, *s.* स्वरमान्द्यं.

ADAMANT, *s.* वज्रः or -ज्रं, अभेद्यप्रस्तरः.—(Diamond) हीरकः, हीरं, सूचिकं, वराटकं.

ADAMANTINE, *a.* वज्रमयः -यी -यं, वज्रः -ज्रा -ज्रं.

To ADAPT, *v. a.* युज् in caus. (योजयति -यितुं), सन्धा (c. 3. -धत्ते -धातुं).—(To be adapted) युज् in pass. (युज्यते).

ADAPTABLE, *a.* योग्यः -ग्या -ग्यं, योक्तव्यः -व्या -व्यं, संयोजनीयः -या -यं.

ADAPTED, *p. p.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, पर्य्याप्तः -प्ता -प्तं, सम्भाव्यः -व्या -व्यं.

To ADD, *v. a.* (One thing to another) अन्यद् अन्येन संयुज् (c. 10. -योजयति -यितुं) or समायुज्; धा (c. 3. दधाति धातुं), समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपर्य्युपरि धा, समाचि (c. 5. -चिनोति -चेतुं).—(To add together, cast up) परिसङ्ख्या (c. 2. -ख्याति -ख्यातुं), परिगण् (c. 10. -गणयति -यितुं).

ADDER, *s.* सर्पविशेषः.

To ADDICT, *v. a.* (One's self to any thing) आसञ्ज् in pass. (-सज्यते or -सज्जते -संक्तुं) with loc.; भज् (c. 1. भजति -ते, भक्तुं), आसेव् (c. 1. -सेवते, -सेवितुं), निविश् in caus. (-वेशयति -यितुं), निरतः -ता -तं or आसक्तः -क्ता -क्तं भू.

ADDICTED, *p. p.* सक्तः -क्ता -क्तं, आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, निविष्टः -ष्टा -ष्टं, प्रजुष्टः -ष्टा -ष्टं, प्रगुणः -णा -णं.

ADDICTION, सक्तिः *f.*, आसक्तिः *f.*, रक्तिः *f.*, उपसेवनं, निवेशः.

ADDITION, *s.* संयोजनं, समायोगः, समाक्षेपः.—(The state of being additional) आधिक्यं.—(In arithmetic) सङ्कलितं, परिसंख्या, परिगणनं.—(The thing added) अनुबन्धः.

ADDITIONAL, *a.* अधिकः -का -कं, अधिकतरः -रा -रं.

ADDLE, *a.* असम्पूर्णः -र्णा -र्णं, नष्टः -ष्टा -ष्टं, दुष्टः -ष्टा -ष्टं.

To ADDRESS, *v. a.* (By words) आमन्त्र् (c. 10. -मन्त्रयते -यितुं), समामन्त्र्, अभिभाष् (c. 1. -भाषते -भाषितुं), आभाष्, सम्भाष्, प्रतिभाष्, अभिवद् (c. 1. -वदति -ते -वदितुं, c. 10. -वादयति -ते -यितुं), अभिवच् (c. 2. -वक्ति -वक्तुं), आलप् (c. 1. -लपति -लपितुं), निगद् (c. 1. -गदति -गदितुं).—(By name) सम्बोधनं कृ, नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(To address a letter, &c., to any one) पत्रसंज्ञां कृ.

ADDRESS, *s.* सम्बोधनं, अभिवादः, वाक्यं, वचनं, वाक्यारम्भः.—(By name) नामग्रहः.—(Courtship) भावकरणं.—(Dexterity) नैपुण्यं चतुरता.—(Direction of a letter) पत्रसंज्ञा, पत्रादेशः.

ADDRESSED, *p. p.* सम्बोधितः -ता -तं, अभिहितः -ता -तं, सम्भाषितः -ता -तं.

To ADDUCE, उपन्यस् (c. 4. -अस्यति -असितुं), उपनी (c. 1. -नयति -नेतुं), आनी, साक्षात् कृ.

ADDUCED, *p. p.* उपन्यस्तः -स्ता -स्तं, उपनीतः -ता -तं, आनीतः -ता -तं.

ADEPT, *s.* अभिज्ञः, पटुः, निपुणः, प्रवीणः.

ADEQUACY, *s.* सामर्थ्यं, पर्य्याप्तिः *f.*, क्षमता, योग्यत्वं.

ADEQUATE, *a.* पर्य्याप्तः -प्ता -प्तं, क्षमः -मा -मं, समर्थः -र्था -र्थं, प्रतिबलः -ला -लं, तुल्यः -ल्या -ल्यं, समानः -ना -नं, योग्यः -ग्या -ग्यं.

To ADHERE, *v. n.* सञ्ज् in pass. (सज्यते or सज्जते) अनुसंज्, आसंज्, प्रसंज्, संसंज् with loc.; संलग्नः -ग्ना -ग्नं, or अनुलग्नः -ग्ना -ग्नं, or संयुक्तः -क्ता -क्तं, or अवलम्बी -म्बिनी -म्बि, or दृढावलम्बी -म्बिनी -म्बि अस्; अनु[illegible] (c. 9. -बध्नाति -बन्द्धुं) in pass. (-बध्यते), ली (c. 4. लीयते लेतुं), [illegible] caus. (धारयति -यितुं).—'He adheres to his promise.' प्रति[illegible] पालयति.

ADHERENCE, *s.* आस[illegible] अनुषङ्गः, आसक्तिः *f.*, प्रसक्तिः *f.*, निषेवनं.—(To a pursuit) [illegible] त्परायणं.

ADHERENT, *s.* अनु[illegible] *m.* (न्), अनुगतः, अनुगामी *m.* (न्), सहायः, सहचरः.—(Follower of the same party) एकपक्षः, पक्षकः, सपक्षः, पार्श्विकः.

ADHESION, *s.* अनुलग्नता, संलग्नत्वं, संसक्तिः *f.*

ADHESIVE, *a.* अनुलग्नशीलः -ला -लं, संलग्नशीलः -ला -लं, आनुषङ्गिकः -की -कं.

ADIEU, *s.* आमन्त्रणं, आप्रच्छनं, प्रस्थानकाले आमन्त्रणं.—(To bid adieu) आप्रच्छ् (c. 6. -पृच्छते -प्रष्टुं), आमन्त्र् (c. 10. -मन्त्रयते -यितुं) अनुमन्त्र्.

ADJACENT, *a.* समीपः -पा -पं, आसन्नः -न्ना -न्नं, निकटः -टा -टं, सन्नद्धः -द्धा -द्धं, सन्निकृष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, पार्श्वस्थः -स्था -स्थं.

ADJECTIVE, *s.* गुणवाचकः, शब्दविशेषणं.

To ADJOIN, *v. a.* आयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) समायुज् संयुज्.

To ADJOIN, *v. n.* समीपः -पा -पं स्था (c. 1. तिष्ठति स्थातुं), निकटे स्था, समीपवर्त्ती -र्त्तिनी -र्त्ति अस्.

ADJOINING. *See* ADJACENT.

To ADJOURN, *v. a.* निरूपितकालपर्य्यन्तं कार्य्यं त्यज् (c. 1. त्यजति त्यक्तुं).

ADJOURNMENT, *s.* निरूपितकालपर्य्यन्तं कार्य्यत्यागः.

ADIPOUS, *a.* मेदस्वी -स्विनी -स्वि (न्), वसायुक्तः -क्ता -क्तं.

To ADJUDGE, *v. a.* (To cause one of the parties to give up the thing controverted) दा in caus. (दापयति -यितुं).—(To decree judicially) तीर् (c. 10. तीरयति -यितुं), निर्णीतं -तां -तं कृ, निष्पन्नं -न्नां -न्नं कृ, विचारं कृ, पार् (c. 10. पारयति -यितुं).

ADJUDGED, *p. p.* दापितः -ता -तं, तीरितः -ता -तं, विचारितः -ता -तं.

ADJUDICATION, *s.* दापनं, तीरणं, विचारणं.

ADJUNCT, *a.* संयुक्तः -क्ता -क्तं, सहितः -ता -तं, सम्मिलितः -ता -तं.

ADJUNCT *s.* (An indicatory affix to verbs) अनुबन्धः.

ADJUNCTION, (The act of adjoining) संयोजनं, सम्मिलनं.

ADJURATION, *s.* (The act of proffering an oath) शापनं.—(The form of oath proffered) शपथव्यवस्था.

To ADJURE, *v. a.* (To put upon oath) शप् in caus. (शापयति, -यितुं).—(To charge earnestly) शपथेन समादिश् (c. 6. -दिशति -देष्टुं).

To ADJUST, *v. a.* समाधा (c. 3. -दधाति -धातुं), सन्धा, संविधा; आयुज् (c. 7. -युनक्ति -योक्तुं or in caus. -योजयति -यितुं), समायुज्; प्रतिसाध् in caus. (-साधयति -यितुं) तुल्यं -ल्यां -ल्यं कृ.

ADJUSTED, *p. p.* समाहितः -ता -तं, विहितः -ता -तं, आयोजितः -ता -तं.

ADJUSTMENT, *s.* समाधानं, सन्धानं, विधानं, समायोगः.

ADJUTANT, *s.* (A helper) सहायः, उपकारकः, सहकारी *m.* (न्), साहाय्यकारी *m.* (न्).—(In the army) सैन्यपदविशेषः.

ADMENSURATION, *s.* परिमाणं, मापनं, परिमाणविद्या.

To ADMINISTER, *v. a.* (Give, afford, supply) दा (c. 3. ददाति दातुं), उपपद् in caus. (-पादयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं).—(To conduct) निर्वह् in caus. (-वाहयति -यितुं), निर्वृत् in caus. (-वर्त्तयति -यितुं), प्रवृत्; आवस् (c. 1. -वसति -वस्तुं).—(Justice punishment, &c.) प्रणी (c. 1. -नयति -नेतुं), सम्प्रणी; प्रवृत् in caus. (-वर्त्तयति -यितुं).

ADMINISTERED, *p. p.* (As justice) प्रवर्त्तितः -ता -तं, प्रणीतः -ता -तं.

ADMINISTRATION, *s.* (The act of administering an office) प्रणयनं, कर्म्मनिर्वाहः, राज्यधुरा.—(Those to whom the care of public affairs is committed) सचिवाः *pl.*; 'ministers of action,' कर्म्मसचिवाः *pl.*; 'ministers of counsel,' धीसचिवाः *pl.*—(The ministerial office) साचिव्यं, मन्त्रित्वं.—(Act of administering medicine, &c.) भेषजप्रयोगः.

ADMINISTRATOR, *s.* (One entrusted with the care of the effects of a deceased man) मृतद्रव्यनिरूपणाधिकृतः, प्रेतजनद्रव्यरक्षकः.—(One that conducts any thing) प्रणेता *m.* (तृ), सम्प्रणेता *m.* (तृ), प्रवर्त्तयिता *m.* (तृ), प्रवर्त्तकः.

ADMIRABLE, *a.* श्लाघ्यः -घ्या -घ्यं, प्रशंसनीयः -या -यं, अद्भुतः -ता -तं, अनुपमः -मा -मं, सुन्दरः -रा -री -रं.

ADMIRABLY, *adv.* श्लाघ्यप्रकारेण, प्रशंसनीयप्रकारेण, अद्भुतं.

ADMIRAL, *s.* जलयोधाधिपतिः, वृहन्नौसमूहाधिपतिः, जलयोधाध्यक्षः.

ADMIRALSHIP, *s.* वृहन्नौसमूहाधिपत्यं, जलयोधाधिपतित्वं.

ADMIRALTY, *s.* (The officers appointed to administer naval affairs) सामुद्रकार्य्याधिकृतः सचिवसमाजः, जलयुद्धव्यवस्थानिरूपणे नियुक्तः समाजः.

ADMIRATION, *s.* प्रशंसा, श्लाघा.—(Wonder) विस्मयः, आश्चर्य्यं, चमत्कारः.

To ADMIRE, *v. a.* प्रशंस् (c. 1. -शंसति -शंसितुं), श्लाघ् (c. 1. श्लाघते श्लाघितुं).—(To regard with wonder) विस्मयेन दृश् (c. 1. पश्यति द्रष्टुं) or अपेक्ष् (c. 1. -ईक्षते -ईक्षितुं).—(To regard with love) स्नेहेन or अनुरागेण अवेक्ष्.

ADMIRER, *s.* (The person who admires) विस्मयी *m.* (न्), श्लाघकः, प्रशंसकः.—(A lover) कामी *m.* (न्), अनुरागवान् *m.* (त्), प्रणयी *m.* (न्), स्नेही *m.* (न्).

ADMISSIBLE, *a.* ग्राह्यः -ह्या -ह्यं, आदेयः -या -यं, उपादेयः -या -यं, प्रगृह्यः -ह्या -ह्यं, स्वीकरणीयः -या -यं.

ADMISSION, *s.* (The act of admitting) प्रवेशनं.—(Admittance, entry) प्रवेशः.—(Allowing an argument) वाक्यग्रहणं, स्वीकारः, अनुज्ञा, अङ्गीकरणं.

To ADMIT, *v. a.* प्रविश् in caus. (-वेशयति -यितुं), निविश्, आविश्.—(Allow, approve of) ग्रह् (c. 9. गृह्णाति -ह्णीते ग्रहीतुं), अनुग्रह्, स्वीकारं कृ, अङ्गीकृ.

ADMITTANCE, *s.* (Entry) प्रवेशः.—(Allowance) वाक्यस्वीकारः, ग्रहणं.

ADMITTED, *p. p.* प्रवेशितः -ता -तं, निवेशितः -ता -तं.

To ADMIX, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), विमिश्र्, सम्मिश्रं -श्रां -श्रं कृ, मिश्रणं कृ, संयोगं कृ.

ADMIXED, *p. p.* मिश्रितः -ता -तं, सम्मिश्रितः -ता -तं.

ADMIXTION, *s.* मिश्रणं, सम्पर्कः, साङ्कर्य्यं.

To ADMONISH, *v. a.* प्रदिश् in caus. (-देशयति -यितुं), उपदिश् (c. 6. -दिशति -देष्टुं), प्रत्यादिश्, प्रबुध् or सम्बुध् in caus. (-बोधयति -यितुं), समाविद् in caus. (-वेदयति-यितुं), शिक्ष् in caus. (शिक्षयति -यितुं), विज्ञा in caus. (-ज्ञापयति -यितुं), मन्त्र् (c. 10. मन्त्रयति -यितुं), निदृश् in caus. (-दर्शयति -यितुं), अनुयोगं कृ.

ADMONISHED, *p. p.* प्रत्यादिष्टः -ष्टा -ष्टं, उपदिष्टः -ष्टा -ष्टं, बोधितः -ता -तं.

ADMONISHER, *s.* उपदेशकः, प्रत्यादेशकः, प्रबोधकः, अनुयोगकारी *m.* (न्), अनुयोजकः, शिक्षादाता *m.* (तृ), शिक्षकः.

ADMONITION, *s.* उपदेशः, प्रत्यादेशः, मन्त्रणं, प्रबोधनं, प्रबोधः, शिक्षा, अनुयोगः.

ADMONITORY, *a.* उपदेशकः -का -कं, शिक्षकः -का -कं, बोधकारः -री -रं, अनुज्ञापकः -का -कं.

ADO, *s.* (Trouble) दुःखं, कष्टं, श्रमः.—(Bustle, tumult) तुमुलं, कलहः, कोलाहलः.

ADOLESCENCE OR ADOLESCENCY, *s.* यौवनं, कौमारं, यौवनावस्था.

To ADOPT, *v. a.* (As a child) कृत्रिमपुत्रं कृ, पोष्यपुत्रं कृ.—(To assume) ग्रह् (c. 9. गृह्णाति -ह्णीते ग्रहीतुं), आत्मसात्कृ.

ADOPTED, *p. p.* गृहीतः -ता -तं, आत्मसात्कृतः -ता -तं: 'an adopted son,' पोष्यपुत्रः, कृत्रिमपुत्रः, दत्तकपुत्रः, दत्त्रिमपुत्रः.—(Not natural) कृत्रिमः -मा -मं कृतकः -का -कं.

ADOPTER, *s.* (Of a child) कृत्रिमपुत्रकर्त्ता, पोष्यपुत्रकारी *m.* (न्).

ADOPTION, *s.* (Of a child) कृत्रिमपुत्रकरणं, पोष्यपुत्रकरणं.—(Assumption) ग्रहणं, आत्मसात्करणं.

ADORABLE, *a.* पूज्यः -ज्या -ज्यं, अर्चनीयः -या -यं, भगवान् -वती -वत् (त्).

ADORATION, *s.* पूजा, अर्चा, अभ्यर्चनं, भजनं, नमस्कारः, नमस्या.

To ADORE, *v. a.* नमस्य् (nom. नमस्यति -स्यितुं), पूज् (c. 10. पूजयति -यितुं), अर्च् (c. 1. अर्चति, अर्चितुं), अभ्यर्च्, समर्च्, नमस्कृ (c. 8. -करोति -कुरुते -कर्तुं), सभाज् (c. 10. सभाजयति -यितुं), वरिवस्य् (nom. वरिवस्यति -स्यितुं).

ADORED, *p. p.* पूजितः -ता -तं, नमस्कृतः -ता -तं, अर्चितः -ता -तं.

ADORER, *s.* पूजकः, अर्चकः, भक्तः, नमस्कर्त्ता *m.* (र्तृ).

To ADORN, *v. a.* भूष् (c. 1. भूषति, भूषितुं, c. 10. भूषयति -यितुं), विभूष्, अलङ्कृ (c. 8. -करोति -कुरुते -कर्तुं), परिष्कृ, समलङ्कृ; शुभ् in caus. (शोभयति -यितुं), उपशुभ्; मण्ड् (c. 10. मण्डयति -यितुं).

ADORNED, *p. p.* अलङ्कृतः -ता -तं, भूषितः -ता -तं, उपशोभितः -ता -तं, मण्डितः -ता -तं.

ADORNING, *s.* अलङ्कारः, अलङ्क्रिया, भूषणं.

ADRIFT, *adv.* इतस्ततः प्रवमानः -ना -नं.

ADROIT, *a.* निपुणः -णा -णं, दक्षः -क्षा -क्षं, चतुरः -रा -रं, लघुः -घुः -घु.

ADROITLY, *adv.* सदाक्ष्यं, चतुरं, नैपुण्येन.

ADROITNESS, *s.* नैपुण्यं, दाक्ष्यं, चातुर्य्यं, लाघवं.

ADRY, *a.* शुष्कः -ष्का -ष्कं, तृषितः -ता -तं, तृषार्त्तः -र्त्ता -र्त्तं.

ADULATION, *s.* अतिप्रशंसा, मिथ्याप्रशंसा, चाटुकारः, चाटूक्तिः *f.*, श्लाघा, अनुनयः, स्तुतिः *f.*

Adulatory, *s.* अतिप्रशंसकः -का -कं, अतिप्रशंसायुक्तः -क्ता -क्तं, श्लाघान्वितः -ता -तं, अनुनयी -यिनी -यि (न्).

Adult, *s.* प्रौढः -ढा -ढं, प्रवृद्धः -द्धा -द्धं, उन्नतः -ता -तं, मानुष्यप्राप्तः -प्ता -प्तं, दृहितः -ता -तं.

To adulterate, *v. a.* दुष् in caus. (दूषयति -यितुं), मिश्र् (c. 10. मिश्रयति -यितुं), अशुद्धीकृ, अपवित्रीकृ.

Adulterate or adulterated, *p. p.* दूषितः -ता -तं, अशुद्धीकृतः -ता -तं, मिश्रः -श्रा -श्रं, संसृष्टरूपः -पी -पं.

Adulteration, *s.* दूषणं, अशुद्धीकरणं, मिश्रणं.

Adulterer, *s.* पारदारिकः, परदारगामी *m.* (न्), व्यभिचारी *m.* (न्), पारजायिकः.

Adulteress, *s.* बन्धकी *f.*, व्यभिचारिणी, अभिसारिका *f.*

Adulterine, *s.* जारजः.

Adulterous, *s.* व्यभिचारी -रिणी -रि (न्).—(Corrupt) दुष्टः -ष्टा -ष्टं, अशुद्धः -द्धा -द्धं.

Adultery, *s.* पारदार्य्यं, परदारगमनं, परकलत्राभिगमनं, भार्य्यातिक्रमः, व्यभिचारः.—(To commit adultery) व्युच्चर् (c. 1. -चरति -चरितुं), परस्त्रिया सह रम् (c. 1. रमते रन्तुं).

To adumbrate, *v. a.* पाण्डुलेख्यं कृ, पाण्डुलिपिं कृ, प्रतिछायां कृ, चित्रारम्भं कृ.

Adumbration, *s.* प्रतिछाया, प्रतिविम्बं.—(The act of adumbrating) प्रतिछायाकरणं, पाण्डुलेख्यकरणं.—(Sketch) पाण्डुलेख्यं, पाण्डुलिपिः *f.*, चित्रारम्भः.

Aduncity, *s.* वक्रता, जैह्म्यं, विजिह्मता, अनृजुता.

To advance, *v. n.* प्रया (c. 2. -याति -यातुं), प्रगम् (c. 1. -गच्छति -गन्तुं), प्रस्था (c. 1. -तिष्ठति -ते -स्थातुं), चल् (c. 1. चलति चलितुं), प्रचल्, प्रसृ (c. 1. -सरति -सर्त्तुं), प्रसृप् (c. 1. -सर्पति -सर्प्तुं or -सर्पितुं), क्रम् (c. 1. क्रमते, क्रमितुं).—(To improve) वृध् (c. 1. वर्धते वर्धितुं).

To advance, *v. a.* आनी (c. 1. -नयति -नेतुं), प्रणी, अग्रे नी, पुरस्कृ; 'to advance an army,' बलं पुरस्कर्त्तुं.—(To aggrandize) वृध् in caus. (वर्धयति -यितुं).—(To accelerate) त्वर् in caus. (त्वरयति -यितुं).—(To pay beforehand) प्राग् विहितकालात् मूल्यं दा.

Advance, *s.* प्रगमनं, प्रयाणं, अग्रगमनं, अग्रसरणं.—(Improvement) आगमः, वर्द्धनं, क्रमशो वृद्धिः *f.*, उत्तरोत्तरवर्द्धनं.

Advanced, *p. p.* (Brought forward) आनीतः -ता -तं, वर्धितः -ता -तं.—(In knowledge) कृतागमः -मा -मं.—(In life) गतायुः -युः -युः (स् or ष्), प्रवयाः -याः -यः (स्).

Advancement, *s.* प्रगमनं.—(Promotion) वर्द्धनं, समुन्नतिः *f.*, उन्नतिः *f.*, उच्चपदप्राप्तिः *f.*—(In knowledge) विद्यागमः.

Advantage, *s.* (Gain, profit) फलं, लाभः, अर्थः.—(Superiority over) प्राधान्यं, आधिक्यं.—(Opportunity) अवसरः, अवकाशः; 'for one's own advantage,' आत्मविवृद्धये dat. c.; 'dressed to advantage,' सुवेशी -शिनी -शि (न्).

To advantage, *v. a.* उपकृ (c. 8. -करोति -कर्त्तुं), उपचर् (c. 1. -चरति -चरितुं), उपग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), फलं or लाभं दा (c. 3. ददाति दातुं).

Advantageous, *a.* फली -लिनी -लि (न्), फलदः -दा -दं, सफलः -ला -लं, अर्थशीलः -ला -लं, अर्थयुक्तः -क्ता -क्तं, अर्थकरः -रा or -री -रं, लभनीयः -या -यं.

Advantageously, *adv.* (Profitably) लाभेन, सफलं, सलाभं, सार्थं.—(Conveniently) सावकाशं.

Advantageousness, *s.* सफलत्वं, लभ्यता, फलित्वं.

Advent, *s.* आगमनं.—(Of Christ) खृष्टागमनं.

Adventitious, *a.* आगन्तुकः -का or -की -कं, आहार्य्यः -र्य्या -र्य्यं; 'adventitious beauty,' आहार्य्यशोभा.

Adventure, *s.* चरित्रं, वृत्तान्तः, चेष्टितं, चरितं, घटनं, दैवघटनं.

To Adventure, *v. n.* (To try the chance) सन्दिग्धकर्म्म दैवायत्तं or दैवाधीनं कृ.—(To attempt with daring) साहसेन व्यवसो (c. 4. -स्यति -सातुं).

Adventurer, *s.* सन्दिग्धकर्म्मरतः, सन्दिग्धकार्य्यप्रवृत्तः, कठिनकर्म्मव्यवसायी *m.* (न्).

Adventurous, *a.* (Inclined to adventure) साहसिकः -की -कं, निर्भयः -या -यं, प्रगल्भः -ल्भा -ल्भं.—(Dangerous) भययुक्तः -क्ता -क्तं, भयावहः -हा -हं, सन्दिग्धः -ग्धा -ग्धं, अदृष्टः -ष्टा -ष्टं.

Adventurously, *adv.* साहसेन, धृष्टं, प्रगल्भं, निर्भयं.

Adverb, *s.* क्रियाविशेषणं, अव्ययशब्दः.

Adverbial, *a.* क्रियाविशेषकः -का -कं, अव्ययः -या -यं, क्रियाविशेषणसम्बन्धी -न्धिनी -न्धि (न्).

Adverbially, *adv.* क्रियाविशेषणवत्, अव्ययभावे.

Adversary, *s.* वैरी *m.* (न्), शत्रुः *m.*, अरिः *m.*, विपक्षः, सपत्नः.

Adverse, *a.* प्रतिकूलः -ला -लं, विरुद्धः -द्धा -द्धं, वैरी -रिणी -रि (न्), प्रतिघः -घा -घं, प्रतियाती -तिनी -ति (न्), विपक्षः -क्षा -क्षं.

Adversity, *s.* विपत् *f.* (-द्), आपत् *f.* (-द्), विपत्तिः *f.*, विपत्कालः अपचयः.

To advert, *v. n.* (To attend to, regard) मनः समाधा (c. 3. -धत्ते -धातुं), मनो युज् (c. 7. युनक्ति योक्तुं, c. 10. योजयति -यितुं), आलक्ष् (c. 10. -लक्षयति -यितुं), समीक्ष् (c. 1. -ईक्षते -ईक्षितुं), अवेक्ष्; अनुदृश् (c. 1. -पश्यति -द्रष्टुं), अवधानं or मनोयोगं कृ.

Advertence, *s.* अवधानं, मनोयोगः, अवेक्षा.

To advertise, *v. a.* (To inform) ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा, निविद् in caus. (-वेदयति -यितुं), समाविद्; बुध् in caus. (बोधयति -यितुं); सूच् (c. 10. सूचयति -यितुं).—(Give notice, publish) प्रकाश् in caus. (-काशयति -यितुं), विकाश्; विघुष् in caus. (-घोषयति -यितुं); संवादपत्रेण प्रकाश्.

Advertisement, *s.* (Instruction) सूचनं, बोधनं, प्रबोधनं, उपदेशः.—(Intelligence) संवादः, समाचारः.—(By public paper) संवादपत्रं

Advertiser, *s.* (He that gives intelligence) संवादकः, ज्ञापकः प्रकाशकः.—(The paper in which advertisements are published) समाचारपत्रं.

Advice, *s.* उपदेशः or -शनं, मन्त्रः, आदेशः, मन्त्रणं -णा, आमर्शः प्रत्यवमर्शः, बोधनं.—(Intelligence) संवादः, समाचारः.

Advice-boat, *s.* संवादवाहिनी नौः or नौका.

Advisable, *a.* (Prudent) उचितः -ता -तं, योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं.—(Open to advice) उपदेष्टव्यः -व्या -व्यं, उपदेशग्राही -हिणी -हि (न्).

To advise, *v. a.* (To give counsel) उपदिश् (c. 6. -दिशति -देष्टुं), शिक्ष् in caus. (शिक्षयति -यितुं), अनुशास् (c. 2. -शास्ति -शासितुं).—(To inform) ज्ञा in caus. (ज्ञापयति -यितुं), निविद् in caus. (-वेदयति -यितुं), बुध् in caus. (बोधयति -यितुं).

To advise, *v. n.* (To consult) मन्त्र् (c. 10. मन्त्रयते -यितुं).—(To deliberate) विचर् in caus. (-चारयति -यितुं).

Advised, उपदिष्टः -ष्टा -ष्टं.—(Informed) ज्ञापितः -ता -तं, निवेदितः -ता -तं.

ADVISEDLY, *adv.* (Prudently) मन्त्रतस् *ind.*, अवधानतस् *ind.*, अवधानपुरःसरं, सावधानं.—(Purposely) ज्ञानतस् *ind.*, अभिप्रायेण.

ADVISER, *s.* उपदेशकः, उपदेश *m.* (ष्टृ), उपदेशी *m.* (न्), आदेशी *m.* (न्), मन्त्री *m.* (-न्).—(Counsellor) अमात्यः, सचिवः, मन्ता *m.* (न्).

ADVOCATE, *s.* (A pleader in law) उत्तरवादी *m.* (न्), परार्थं प्रतिवादी *m.* (न्), प्रतिनिधिः *m.*—(Any defender) प्रतिपालकः, रक्षकः, आश्रयः.

To ADVOCATE, *v. a.* परार्थं वद् (c. 1. वदति वदितुं); प्रतिनिधिः अस्; रक्ष् (c. 1. रक्षति रक्षितुं), परिरक्ष्, अभिरक्ष्; प्रतिपाल् (c. 10. -पालयति -यितुं).

ADVOWEE, *s.* (He that has the right of advowson) धर्म्माध्यापने यो ऽन्यं नियोक्तुम् अर्हति.

ADVOWSON, *s.* (A right to present to a benefice) धर्म्माध्यापने नियोजनाधिकारः.

ADZE, *s.* तक्षणी, कुठारिका, वासिः *m.* -सी *f.*

AERIAL, *a.* (Belonging to the air) आकाशीयः -या -यं, वायवः -वी -वं, वैहायसः -सी -सं.—(Produced in the air) आकाशजः -जा -जं, वायुजः -जा -जं.—(Inhabiting the air) वायुगः -गा -गं, आकाशस्थः -स्था -स्थं, खेचरः -रा -रं, नभःस्थः -स्था -स्थं.—(Lofty) उच्चः -च्चा -च्चं.

AERIE, *s.* (A hawk's nest) श्येननीडः, शकुनिनीडः.

AEROLOGY, *s.* आकाशविद्या, वायुविद्या.

AERONAUT, *s.* आकाशगामी *m.* (न्), आकाशचरः.

ÆTHER, *s.* आकाशः, वायुः *m.*, नभः *n.* (स्), विहायः *n.* (स्).

AFAR, *adv.* (At a great distance) दूरं, दूरे, अतिदूरं, दूरतस् *ind.*—(To a great distance) दूरपर्य्यन्तं.—(From afar) दूरतस्, दूरात्.—(Afar off) दूरस्थः -स्था -स्थं.

AFFABILITY, *a.* मृदुशीलत्वं, सुशीलत्वं, अभिगम्यता, चाटूक्तिः *f.*, कोमलत्वं, मृदुता.

AFFABLE, *a.* मृदुशीलः -ला -लं, कोमलस्वभावः -वा -वं, सुशीलः -ला -लं, अभिगम्यः -म्या -म्यं, मृदुः -द्वी -दु, मृदुवादी -दिनी -दि (न्), प्रियवादी -दिनी -दि (न्).

AFFABLY, *adv.* मृदु, मृदुवचनेन, चाटूक्त्या, [illegible]नयत्.

AFFAIR, *s.* कार्य्यं, कर्म्म *n.* (न्), व्यापारः, [illegible].

To AFFECT, *v. a.* (Aim at) सेव् (c. 1. सेवते [illegible]), उपसेव्, निषेव्; समाचर् (c. 1. -चरति -चरितुं); भज् (c. 1. भजति [illegible]).—(Operate upon) विकृ (c. 8. -करोति -कर्त्तुं); उपहन् (c. 2. -हन्ति -हन्तुं); चल् in caus. (चालयति -यितुं).—(To move with grief, &c.) शोकोपहतं -तां -तं कृ; 'to affect with joy,' हर्षाकुलं -लां -लं कृ.—(To pretend) छद्म or छलं कृ; मिथ्या वद्; 'to affect to befriend a person,' मिथ्योपचारं कृ.—(To think one's self) मन् (c. 10. मानयते); 'one who affects learning,' पण्डितम्मन्यः.

AFFECTATION, *s.* अहङ्कारः, वैलक्ष्यं, मानित्वं; महापण्डितो ऽहम् इति अतिसुन्दरी अहम् इति बुद्धिर् व्यवहारो वा; 'affectation of learning,' पण्डितम्मन्यत्वं.—(A branch of feminine action) अवहित्थं, -त्था, विलासः, हावः.—(False pretence) उपधा, छलं, छद्म *n.* (न्).

AFFECTED, *part. a.* (Pretended) कृत्रिमः -मा -मं; मिथ्या prefixed, as, मिथ्योपचारः, 'affected kindness.'—(Full of affectation) सवैलक्ष्यः -क्ष्या -क्ष्यं, अहङ्कारी -रिणी -रि (न्), मानी -निनी -नि (न्), विलासवान् -वती -वत्.—(Affected by, disturbed by) उपहतः -ता -तं, आकुलः -ला -लं, ग्रस्तः -स्ता -स्तं, रञ्जितः -ता -तं.

AFFECTEDLY, *adv.* वैलक्ष्येण, साहङ्कारं, अहङ्कारेण.

AFFECTING, *a.* हृदयङ्गमः -मा -मं, मर्म्मभेदी -दिनी -दि (न्).

AFFECTION, *s.* स्नेहः *m.*, प्रियता *f.*, अनुरक्तिः *f.*, अनुरागः, प्रणयः, प्रेमा *m.* or -म *n.* (-मन्), हार्द्दं, प्रश्रयः.—(Passion of any kind) रागः, भावः, रसः.—(Of the mind) मनसो भावः.—(Of the body) शरीरस्य भावः.—(Parental) वात्सल्यं; 'I have great affection for him' तेन सह मम महान् स्नेहः or तस्मिन् अनुरागवान् अस्मि.

AFFECTIONATE, *a.* स्नेही -हिनी -हि (न्), स्निग्धः -ग्धा -ग्धं, स्नेहशीलः -ला -लं, सुहृत्तमः -मा -मं, अनुरागी -गिणी -गि (न्), प्रीतिमान् -मती -मत् (त्), वत्सलः -ला -लं, हितः -ता -तं, प्रणयी -यिणी -यि (न्), सप्रणयः -या -यं, जातहार्द्दः -र्द्दा -र्द्दं.

AFFECTIONATELY, *adv.* स्नेहेन, प्रीत्या, प्रीतिपूर्व्वं, स्नेहपुरःसरं, सानुरागं.

AFFIANCE, *s.* (A marriage-contract) वाग्दानं, विवाहसम्बन्धः.—(Trust, confidence) विश्वासः, प्रत्ययः, श्रद्धा, आस्था.

To AFFIANCE, *v. a.* (To betroth) वाग्दानं कृ, विवाहनियमं कृ.—(To confide) विश्वस् (c. 2. -श्वसिति -श्वसितुं).

AFFIANCED, *p. p.* वाग्दत्तः -त्ता -त्तं.

AFFIDAVIT, *s.* शपथपत्रं.—(To make affidavit) तथेति or नेति शपथेन ब्रू (c. 2. ब्रवीति वक्तुं), शपथं शप् (c. 1. शपति शप्तुं).

AFFILIATION, *s.* कृत्रिमपुत्रकरणं, पोष्यपुत्रग्रहणं.

AFFINITY, *s.* सम्बन्धः, सम्पर्कः, योगः, ज्ञातित्वं, बन्धुता.

To AFFIRM, *v. n.* (Opposed to deny) तथेति ब्रू (c. 2. ब्रवीति, ब्रूते वक्तुं).—(Maintain, declare positively) दार्ढ्येन वद् (c. 1. वदति वदितुं).—(Ratify) स्थिरीकृ, दृढीकृ, निश्चितं -तां -तं कृ, संस्तम्भ् (c. 5. -स्तभ्नोति, c. 9. -स्तभ्नाति -स्तम्भितुं), प्रमाणीकृ.

AFFIRMATION, *s.* (Declaring positively) दृढोक्तिः *f.*, वचनं, दृढवचनं.—(Argumentative statement) पक्षः.—(Confirmation) प्रमाणीकरणं, निश्चयः, दृढीकरणं, स्थिरीकरणं.—(False) विप्रलापः.

AFFIRMATIVE, *a.* (That which affirms) [illegible] -दिनी -दि (न्), निश्चायकः -का -कं.—(Favourable to the argument) पक्षानुकूलः -ला -लं.

To AFFIX, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), निबन्ध्, सम्बन्ध्, संयुज् (c. 7. -युनक्ति, c. 10. -योजयति -यितुं), आयुज्, उपयुज्.

AFFIX, *s.* (Grammatical) अनुबन्धः, प्रयोगः, आशीक्तिः *f.*

To AFFLICT, *v. a.* क्लिश् (c. 9. क्लिश्नाति क्लेशितुं or क्लेष्टुं), पीड् (c. 10. पीडयति -यितुं), अभिपीड्, उपपीड्, परिपीड्; व्यथ् in caus. (व्यथयति -यितुं), आयस् in caus. (-यासयति -यितुं).—(To be afflicted with disease) रोगेण पीड् in pass. (पीड्यते) or बाध् in pass.

AFFLICTED, *p. p.* व्यसनार्त्तः -र्त्ता -र्त्तं, दुर्गतः -ता -तं, आपद्ग्रस्तः -स्ता -स्तं, आपन्नः -न्ना -न्नं.—(Afflicted with) पीडितः -ता -तं, आतुरः -रा -रं, आर्त्तः in composition; 'afflicted with disease,' रोगपीडितः -ता -तं.

AFFLICTION, *s.* क्लेशः, शोकः, दुःखं, कष्टं, व्यथा, पीडा, विडम्बना.

AFFLICTIVE, *a.* क्लेशकः -का -कं, क्लेशी -शिनी -शि (न्), दुःखकरः -री -रं, व्यथाकरः -री -रं.

AFFLUENCE or -ENCY, *s.* धनबाहुल्यं, धनसम्पत्तिः, धनित्वं, समृद्धिः *f.*, समृद्धता.—(The act of flowing to any one place) एकस्थानं प्रति प्रवाहः.

AFFLUENT, *a.* महाधनः -ना -नं, बहुधनः -ना -नं, धनी -निनी -नि (न्), धनवान् -वती -वत् (त्), समृद्धः -द्धा -द्धं, वसुमान् -मती -मत् (त्), धनाढ्यः -ढ्या -ढ्यं.—(Flowing to any one place) एकस्थानं प्रति प्रवाहकः -का -कं.

AFFLUX or AFFLUXION, *s.* एकस्थानं प्रति स्रोतसां प्रवाहः.

To AFFORD *v. a.* (Give) दा (c. 3. ददाति, c. 1. यच्छति दातुं), प्रदा, अभिदा, प्रदा; उपपद् in caus. (-पादयति -यितुं).—(To be able to

bear expenses) व्ययं कर्तुं समर्थः -र्था -र्थं अस् or शक् (c. 8. शक्नोति शक्तुं), or व्ययाय उपकॢप् (c. 1. -कल्पते -कल्पितुं or -कल्प्तुं).

To AFFRANCHISE, *v. a.* मुच् (c. 10. मोचयति -यितुं, c. 6. मुञ्चति मोक्तुं), विमुच्; मोक्ष् (c. 10. मोक्षयति -यितुं), विमुक्ष्.

AFFRAY, *s.* सङ्ग्रामः, समरः, संयुगः, युद्धं, कलहः, डिम्बः, डमरः, डामरः.

To AFFRIGHT, *v. a.* त्रस् in caus. (त्रासयति -यितुं), वित्रस्; भी in caus. (भाययति or भीषयति -ते -यितुं), उद्विज् in caus. (-वेजयति -यितुं).

AFFRIGHT, *s.* त्रासः, सन्त्रासः, साध्वसं, भयं.

AFFRIGHTEDLY, *adv.* सत्रासं, सभयं, सन्त्रासेन.

AFFRONT, *s.* अपमानं, विप्रियं, क्षेपः, अवज्ञानं, धर्षणं, तिरस्कारः.

To AFFRONT, *v. a.* (Offer open insult) साक्षात्, or सम्मुखं, or प्रतिमुखं, or मुखामुखि, or प्रत्यक्षं अवमन् (c. 4. -मन्यते -मन्तुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ (c. 8. -करोति -कर्तुं), आधृष् in caus. (-धर्षयति -यितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवक्षिप्, परिक्षिप्.

AFFRONTED, *p. p.* अपमानितः -ता -तं, अवज्ञातः -ता -तं, तिरस्कृतः -ता -तं, अधिक्षिप्तः -प्ता -प्तं.

AFFRONTER, *s.* साक्षात् or प्रतिमुखम् अपमानकः, अवज्ञानकर्त्ता *m.* (र्त्तृ).

AFFRONTIVE, *a.* अपमानकः -का -कं, अपमानोपेतः -ता -तं, अवज्ञानयुक्तः -क्ता -क्तं.

AFFUSION, *s.* आसेकः, आसेचनं, अभिषेकः.

To AFFY, *v. a.* (Betroth) वाग्दानं कृ, प्रतिज्ञापत्रेण विवाहसम्बन्धं कृ, नियमपत्रेण विवाहप्रतिज्ञां कृ.

AFLOAT, *adv.* (Floating) प्लवमानः -ना -नं, प्लवः -वा -वं.

AFOOT, *adv.* (On foot) पादेन, पदेन.—(Going on foot) पादगः -गा -गं.—(In action, or use) प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचरितः -ता -तं.—(Set on foot) आरब्धः -ब्धा -ब्धं, उद्यतः -ता -तं.

AFORE, *prep.* (In front) प्रतिमुखं, अभिमुखं, सम्मुखं, अग्रे, पुरस्, पुरतस्, साक्षात्.—(In former time) पूर्व्वकाले, गतकाले, पूर्व्वं, पूर्व्वसमये, पुरा.

AFORESAID, *p. p.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

AFORETIME, *adv.* पूर्व्वकाले, गतकाले, पुरा, पूर्व्वं.

AFRAID, *a.* भीतः -ता -तं, भयान्वितः -ता -तं, शङ्कान्वितः -ता -तं; 'to be afraid of,' भी (c. 3. बिभेति भेतुं), with abl. or gen.; as, 'he is afraid of the dog,' कुक्कुरात् or कुक्कुरस्य बिभेति. So also त्रस् (c. 4. त्रस्यति त्रसितं), उद्विज् (c. 6. -विजते -विजितं).

AFRESH, *adv.* पुनर्, पुनरपि, नूतनं, अभिनवं, प्रतिनवं.

AFT, *s.* (The part of a ship towards the stern) नावः पश्चिमभागः.

AFT, *adv.* (Towards the stern of a ship) नावः पश्चिमभागं प्रति, नावः पश्चाद्भागं प्रति.

AFTER, *prep.* अनु or पश्चात् prefixed: as, 'to go after,' अनुगन्तुं; 'to run after,' पश्चाद् धावितुं.—(Of time) पश्चात्, परं, अनन्तरं, ऊर्द्ध्वं, अर्व्वाक with abl.—(According to) अनु, अनुरूपं, अनुसारतस्, अनुरूपेण, अनुसारेण; 'after that,' तदनन्तरे, or तदनन्तरं, or तस्मात् परं, or अत ऊर्द्ध्वं; 'after one another,' अनुपूर्व्वशस्; 'a century after,' वर्षशते गते; 'after eating,' भोजनानन्तरं or भोजनात् परं; 'after the rising of the sun,' सूर्य्योदयात् ऊर्द्ध्वं; 'after a few days,' दिनेषु गच्छत्सु. Sometimes 'after' is expressed by the indec. part.; as, 'after ascending the tree the nests were destroyed,' वृक्षम् आरुह्य नीडा भग्नाः, or even by पूर्व्वकं: as, 'after laying down a stake,' पणस्थापनपूर्व्वकं; or by repeating the word in such phrases as, 'he waters tree after tree,' वृक्षं वृक्षं सिञ्चति.

AFTER, *adv.* (In after time) परं, परकाले, आगामिकाले, उत्तरकाले.—(Following after another) पश्चात्.—(Subsequently) परस्तात्, उत्तरत्र, उत्तरतस् *ind.*

AFTER-AGES, *s.* उत्तरकालः, परकालः, आगामिकालः, भाविकालः.—(Descendants) पुत्रपौत्राः *m. pl.*

AFTER ALL, अन्ततस् *ind.*, अन्ते, परं, शेषे, अवशेषे.

AFTER-BIRTH, *s.* गर्भपरिस्रवः.

AFTER-COMER, *s.* उत्तरागामी *m.* (न्), परम् उपतिष्ठति यः, उत्तरकाले जीवति यः.

AFTER-CROP, *s.* शस्यस्य द्वितीयसङ्ग्रहः or द्वितीयोत्पत्तिः *f.*, फलस्य द्वितीयसङ्ग्रहः.

AFTER-DINNER, *s.* भोजनानन्तरं, भोजनात् परं, भोजनोत्तरं.

AFTER-ENDEAVOUR, *s.* उत्तरोद्योगः, द्वितीययत्नः.

AFTER-GAME, *s.* उत्तरोपायः.

AFTER-GRASS or AFTER-MATH, *s.* द्वितीयतृणं, द्वितीयतृणोत्पत्तिः *f.*

AFTER-INQUIRY, *s.* उत्तरानुसन्धानं, उत्तरजिज्ञासा.

AFTER-LIFE, *s.* जीवनावशेषः.

AFTERNOON, *s.* अपराह्णः, पराह्णः, वैकालः, विकालः.—(Relating to the afternoon) आपराह्णिकः -की -कं, वैकालिकः -की -कं.

AFTER-PAINS, *s.* अनुतापः, उत्तरव्यथा.—(At childbirth) प्रसवानन्तरं वेदना.

AFTER-STATE, *s.* परावस्था, उत्तरावस्था, भाव्यवस्था.

AFTER-TASTE, *s.* उत्तरस्वादः, अनुस्वादः.

AFTER-THOUGHT, *s.* अनुबोधः, उत्तरचिन्ता, कार्य्यानन्तरं विचारणं.

AFTER-TIMES, *s.* उत्तरकालः, परकालः, आगामिकालः.—(Descendants) पुत्रपौत्राः *m. pl.*

AFTERWARDS, *s.* पश्चात् *ind.*, तत्पश्चात्, तदनन्तरं, अनन्तरं, ततः परं, परं *ind.*, अपरं, परस्तात्, उत्तरतस्, ततस्.

AGAIN, *adv.* पुनर्, पुनरपि, भूयस् *ind.*—(Moreover) अन्यच्च, किञ्च, इतरम् *indec.*—(On the other hand) अन्यपक्षे, पुनर्.—(Repeatedly) मुहुस्, पुनःपुनर्, असकृत्, भूयो भूयस्, वारंवारं.—(Further, in argument) अपरं.—(As much again) द्विगुणः -णा -णं.—(Back again, as [redacted] or Latin) प्रति.—(In return for) प्रति.

AGAINST, *prep*[redacted]—(Opposed to) विरुद्धः -द्धा -द्धं, प्रतिकूलः -ला -लं, विपक्षः -क्षा -क्षं.—(Over against) अभिमुखं, प्रतिमुखं, सम्मुखं; 'against the wind,' प्रतिवातं, वाताभिमुखं; 'against the stream,' प्रतिस्रोतस् *ind.* 'Against' may be expressed by अर्थं or अर्थे, in such phrases as 'one should store up money against misfortune,' आपदर्थे धनं रक्षेत्.

AGAPE, *adv.* जृम्भमाणः -णा -णं, विस्मयोत्फुल्लनयनः -ना -नं, फुल्ललोचनः -ना -नं.

AGARIC, *s.* वृक्षरुहः छत्राकविशेषः, तरुरोही, औषधीयछत्राकविशेषः.

AGASTYA, *s.* (A celebrated Saint, son of Mitra and Varuna and regent of the star Canopus) अगस्त्यः, मैत्रावारुणिः.

AGATE, *s.* रत्नविशेषः, नानावर्णः प्रस्तरविशेषः, नानाछायान्वितः प्रस्तरविशेषः.

AGE, *s.* (Period) युगं, कालः, समयः.—(Life) आयुः *n.* (स्), जीवितकालः, वयः *n.* (स्).—(Age of the world) कल्पः.—(Old age) वृद्धत्वं, वार्द्धकं, वृद्धभावः; 'a youth who has come of age,' व्यवहारप्राप्तः, व्यवहारज्ञः; 'a son twenty years of age,' विंशतिवर्षीयः पुत्रः; 'of the same age,' समानवयस्कः -स्का -स्कं.

AGED, *a.* वृद्धः -द्धा -द्धं, जीर्णः -र्णा -र्णं, प्राचीनः -ना -नं, वयोगतः -ता -तं, आयुषः -षी -षं.

Agency, *s.* (State of an agent) कर्तृत्वं, कर्तृकत्वं.—(Operation) कारणत्वं, हेतुता, कारणं; 'human agency,' पौरुषेयत्वं.—(Office of a deputy) नियोगिपदं, नियोगित्वं.

Agent, *s.* (Doer) कर्त्ता *m.* (र्तृ), कर्तृकः, कारः, कारकः, करः in comp.—(A deputy) नियोगी *m.* (न्), प्रतिपुरुषः, कार्य्याधीशः, प्रतिनिधिः *m.*—(That which has the power of operating) हेतुकः, हेतुः *m.*, कारणं, साधनं.

To agglomerate, *v. a.* सञ्चि (c. 5. -चिनोति -चेतुं), समाचि, उपचि; समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं); राशीकृ; पुञ्जं कृ, एकत्र कृ.

Agglomerated, *p. p.* सञ्चितः -ता -तं, उपचितः -ता -तं, राशीकृतः -ता -तं.

To agglutinate, *v. n.* संश्लिष् in caus. (-श्लेषयति -यितुं), संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), संहन् (c. 2. -हन्ति -हन्तुं), संलग्नं -ग्नां -ग्नं कृ.

To aggrandise, *v. a.* वृध् in caus. (वर्धयति -यितुं), संवृध्, ऋध् in caus. (ऋधयति -यितुं), प्याय् (caus. -प्याययति -यितुं), स्फाय् in caus. स्फावयति -यितुं), प्रचुरीकृ, स्फीतीकृ, तन् (c. 8. तनोति तनितुं).

Aggrandisement, *s.* वृद्धिः *f.*, वर्द्धनं, विवृद्धिः *f.*, उन्नतिः *f.*, समुन्नतिः *f.* उपचयः, स्फातिः *f.*, अभ्युदयः; 'for one's own aggrandisement,' आत्मविवृद्धये *dat. c.* or आत्मोदयाय *dat. c.*

To aggravate, *v. a.* (To increase) वृध् in caus. (वर्धयति -यितुं), अधिकं -कां -कं कृ, अतिरिक्तं -क्तां -क्तं कृ, गरय (nom. गरयति).—(To irritate, provoke) प्रकुप् in caus. (-कोपयति -यितुं), प्रपीड् (c. 10. -पीडयति -यितुं).

Aggravated, *p. p.* (Increased) वर्धितः -ता -तं.—(Provoked) प्रकोपितः -ता -तं.

Aggravation, *s.* (Act of irritating) प्रकोपणं, पीडनं, पीडाकरणं. (Act of increasing) संवर्द्धनं, वर्द्धनं, उद्दीपनं.—(Aggravating circumstance) अनुपशयः, आधिक्यं.

Aggregate, *s.* समूहः, सञ्चयः, सन्निपातः, समवायः, सङ्ग्रहः, राशिः *m.*, पुञ्जः.

To aggregate, *v. a.* समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), सञ्चि (c. 5. -चिनोति -चेतुं), समाचि, उपचि; समूहं कृ, राशीकृ, एकत्र कृ.

Aggregated, *p. p.* सञ्चितः -ता -तं, उप[illegible] राशीकृतः -ता -तं. समवायी -यिनी -यि (न्).

Aggregation, *s.* (The act of aggregating) समाहारः -हरणं, राशीकरणं, सञ्चयनं, सङ्ग्रहणं.—(A sum, collection) समूहः, सन्निपातः, सङ्ग्रहः.

To aggress, *v. a.* आक्रम् (c. 1. -क्रामति c. 4. -क्राम्यति -क्रमितुं), अतिक्रम्; लङ्घ् (c. 10. लङ्घयति -यितुं).—(To be the first to injure) हिंसारम्भं or लङ्घनारम्भं कृ.

Aggression, *s.* आक्रमः -मणं, अतिक्रमः, लङ्घनं.—(The first act of injury) हिंसारम्भः, अपकारारम्भः, प्रथमापकारः, आक्रमारम्भः.

Aggressor, *s.* आक्रामकः, अतिक्रामकः, द्रोही *m.* (न्), प्रथमापकारकरः, प्रथमां हिंसां करोति यः.

Aggrievance, *s.* (Wrong endured) हिंसा, अपकारः, द्रोहः, क्लेशः, दुःखं, व्यथा.

To aggrieve, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), शुच् in caus. (शोचयति -यितुं), क्लिश् (c. 9. क्लिश्नाति क्लेष्टुं), व्यथ् in caus. (व्यथयति -यितुं), अर्द् in caus. (अर्दयति -यितुं), समर्द्, हिंस् (c. 1. हिंसति, c. 7. हिनस्ति, हिंसितुं).

Aghast, *a. a.* विस्मयाकुलः -ला -लं, भयव्याकुलः -ला -लं, भयमोहितः -ता -तं, साध्वसोपहतः -ता -तं.

Agile, *a.* लघुः -घुः -घु, त्वरितः -ता -तं, चञ्चलः -ला -लं, द्रुतस्वभावः -वा -वं, लघुशरीरः -रा -रं.

Agility, *s.* लघुता, द्रुतत्वं, चञ्चलत्वं, लघुशरीरता.

Agillochum, *s.* (Aloe-wood) अगुरुः *m.*, -रु *n.*, अगुरुकाष्ठं.

Agistment, *s.* निरूपितमूल्येन सर्व्वसामान्यक्षेत्रे पश्वादिप्रतिपालनं.—(Embankment) सेतुः *m.*

Agitable, *a.* क्षोभणीयः -या -यं, मन्थनीयः -या -यं, चालनीयः -या -यं.

To agitate, *v. a.* क्षुभ् in caus. (क्षोभयति -यितुं), विक्षुभ्; धू (c. 5. धूनोति, c. 9. धुनाति धवितुं or धोतुं), आधू; मन्थ् (c. 1. मन्थति, c. 9. मथ्नाति मन्थितुं), प्रमन्थ्; ह्वल् in caus. (ह्वलयति or ह्वालयति -यितुं); गाह् (c. 1. गाहते गाहितुं or गाढुं); लुड् (c. 1. लोडति लोडितुं or caus. लोडयति), आलुड्, समालुड्, परिलुड्, विलुड्, संलुड्.—(To be agitated) क्षुभ् (c. 4. क्षुभ्यति क्षोभितुं); विह्वल् (c. 1. -ह्वलति -ह्वलितुं).

Agitated, *p. p.* क्षुब्धः -ब्धा -ब्धं, धूतः -ता -तं, आकुलितः -ता -तं, प्रमथितः -ता -तं, उद्भ्रान्तः -न्ता -न्तं, सम्भ्रान्तः -न्ता -न्तं, विह्वलः -ला -लं, विधुरः -रा -रं, लुलितः -ता -तं, कातरः -रा -रं, पारिप्लवः -वा -वं, विक्लवः -वा -वं.

Agitation, *s.* क्षोभः, मन्थनं, उन्मन्थनं, आलोडनं, विधुवनं, दवथुः.—(Of mind, &c.) व्याकुलत्वं, उत्कम्पः.—(Discussion) वादानुवादः, विचारणं.

Agitator, *s.* (He who agitates) क्षोभकः, उन्मन्थकः, मथनकारी *m.* (न्).—(Manager of affairs) कार्य्याधीशः, कार्य्याधिष्ठाता *m.* (तृ), नायकः.

Agnail, *s.* नखरोगः, चिप्यं, नखम्पचः.

Agnate, *a.* (Allied to) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्कीयः -या -यं.

Agnation, *s.* (Relationship) ज्ञातित्वं, बन्धुत्वं, सम्बन्धः, सम्पर्कः.

Ago, agone, *adv.* पुरा, पूर्व्वं, पूर्व्वकाले, गतकाले, पुरस्तात्.

Agog, *adv.* कुतूहली -लिनी -लि (न्), कौतुकाकुलः -ला -लं, अन्यथावृत्तिः -त्तिः -त्ति.

Agoing, *part.* चलः -ला -लं, प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचरितः -ता -तं.

To agonise, *v. n.* व्यथ् (c. 1. व्यथते व्यथितुं), परितप in pass. (-तप्यते), सन्तप्.

Agony, *s.* तीव्रवेदना, अतिव्यथा, व्यथा, सन्तापः, विबाधा, दुःखदुःखं, यत्नं.

Agrarian, *a.* क्षेत्रविषयकः -का -कं, क्षैत्रिकः -की -कं, भूमिविषयकः -का -कं.

To agree, *v. n.* (Be in concord) सम्मन् (c. 4. -मन्यते -मन्तुं), सम्मतः -ता -तं भू.—(Assent to) स्वीकृ, अङ्गीकृ, अनुमन् (c. 4. -मन्यते -मन्तुं), अभिमन्; अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुवद् (c. 1. -वदति -वदितुं), ग्रह् (c. 9. गृह्णाति ग्रहीतुं), उपगम् (c. 1. -गच्छति -गन्तुं).—(Settle by stipulation) सन्धा (c. 3. -धत्ते -धातुं), संविदा निष्पन्नं -न्नां -न्नं कृ.—(Be of the same mind) एकचित्तीभू, एकमतः -ता -तं भू.—(Be consistent or suitable) युज् in pass. (युज्यते).

To agree, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), सम्मतं -तां -तं or संविदितं -तां -तं कृ.

Agreeable, *a.* (Pleasant) रम्यः -म्या -म्यं, काम्यः -म्या -म्यं, सुभगः -गा -गं, अभिमतः -ता -तं, मनोज्ञः -ज्ञा -ज्ञं, सन्तोषकः -का -कं, तुष्टिकरः -री -रं.—(Suitable, comfortable) अनुरूपः -पा -पं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, सदृशः -शी -शं, तुल्यः -ल्या -ल्यं.—(To be agreeable, please) रुच् (c. 1. रोचते, रोचितुं).

Agreeableness, *s.* (Consistency with) योग्यता, उपयुक्तता, अनुरूपता, सादृश्यं.—(The quality of pleasing) रम्यत्वं, काम्यत्वं, अभिमतता.—(Resemblance) तुल्यता, सदृशता.

Agreeably, *adv.* सुखं, अभिमतं, सुभगं, यथाभिमतं, यथासुखं.—(According to) अनुरूपं, अनुसारतस् *ind.*, योगतस् *ind.*—(Agreeably to one's nature) स्वभावानुरूपं.

Agreed, *p. p.* संविदितः -ता -तं, सम्मतः -ता -तं, उपगतः -ता -तं, अभ्युपेतः -ता -तं, अभ्युपगतः -ता -तं, स्वीकृतः -ता -तं, अनुज्ञातः -ता -तं; 'he has agreed to a separation,' भेदम् उपगतः.

Agreement, *s.* (Compact) संविद् *f.*, प्रतिज्ञानं, नियमः, संस्कारः, अङ्गीकारः, उपगमः, समयः, अभ्युपगमः, सङ्केतः, संवादः, व्यवस्था.—(Making an agreement) समयकारः.—(Breaking an agreement) समयभेदः.—(Concord) सम्मतिः *f.*, एकचित्तता, अनुवादः, ऐक्यं.—(Resemblance) सदृशता, अनुरूपता, सादृश्यं, तुल्यत्वं.

Agriculture, *s.* कृषिः *f.*, कर्षणं, हलभृतिः *f.*, वैश्यक्रिया, वैश्यवृत्तिः *f.* (The science) कृषिविद्या.

Agriculturist, *s.* कर्षकः, क्षेत्राजीवः, कृषकः, क्षेत्रिकः, क्षेत्री *m.* (न्), कृषिविद्याज्ञः.—(A man of the third class) वैश्यः, विट् (श्).

Aground, *adv.* उत्तीरम् *ind.*, तटस्थः -स्था -स्थं, सैकतस्थः -स्था -स्थं, पुलिनस्थः -स्था -स्थं.

Ague, *s.* कम्पज्वरः.—(A tertian ague) तृतीयकः, तृतीयकज्वरः.—(A quartan) चातुर्थकः.

Ague-fit, *s.* कम्पज्वराक्रमः.

Aguish, *a.* कम्पज्वरशीलः -ला -लं, कम्पज्वरस्वभावः -वा -वं.

Ah, *interj.* आ, आस्, हन्त, हा, अहो, अहह.

Ahead, *adv.* अग्रे, अग्रतस् *ind.*, पुरस् *ind.*, पुरतस् *ind.*—(Headlong) अधोमुखं.

Ajar, *adv.* अर्द्धविवृतः -ता -तं, अर्द्धोद्घाटितः -ता -तं.

Aid, *s.* साहाय्यं, उपकारः, उपकृतं, साहित्यं, शरणं, उपग्रहः.—(An assistant) सहायः, उपकारकः, उत्तरसाधकः.

To **aid**, *v. a.* उपकृ (c. 8. -करोति -कर्त्तुं), उपचर् (c. 1. -चरति -चरितुं), उपग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), साहाय्यं कृ, अभिरक्ष् (c. 1. -रक्षति -रक्षितुं).

Aided, *p. p.* उपकृतः -ता -तं, कृतोपकारः -रा -रं.

Aide-de-camp, *s.* परिधिस्थः, सेनापतिसहायः, सेनापत्याज्ञावहः.

Aider, *s.* सहायः, साहाय्यकर्त्ता *m.* (र्तृ), उपकारकः.

Aidless, *a.* साहाय्यरहितः -ता -तं, उपकारहीनः -ना -नं, असहायः -या -यं.

To **ail**, *v. a.* (To give pain) पीड् (c. 10. पीडयति -यितुं).—(To be ailing) ईषद्रोगेण or क्षुद्ररोगेण, पीड् in pass. (पीड्यते).

Ail or **ailment**, *s.* ईषद्रोगः, ईषद्व्याधिः *m.*, क्षुद्ररोगः, क्षुद्रव्याधिः *m.*

Ailing, *a.* रोगी -गिणी -गि (न्), क्षुद्ररोगपीडितः -ता -तं, व्याधितः -ता -तं.

To **aim**, *v. a.* and *n.* (As at a mark) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं) with acc.; as, 'aiming at him,' तमुद्दिश्य; लक्षीकृ.—(Endeavour after) आप् in des. (ईप्सति ईप्सितुं), अभ्याप; सेव् (c. 1. सेवते सेवितुं), उपसेव्, निषेव्; समाचर् (c. 1. -चरति -चरितुं); काङ्क्ष् (c. 1. काङ्क्षति काङ्क्षितुं), आकाङ्क्ष्, अनुकाङ्क्ष्.—(To direct the weapon) अभिसन्धा, लक्ष्यं प्रति अस्त्रं क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

Aim, *s.* (The point to which a missive weapon is thrown) लक्षं, लक्ष्यं, वाणलक्ष्यं, शरव्यं.—(The direction of the weapon) सन्धानं.—(A purpose, design) अभिप्रायः, चिकीर्षितं, आशयः, काङ्क्षा, वाञ्छा.—(Conjecture) अनुमानं.

Aimless, *a.* असन्धानः -ना -नं, सन्धानरहितः -ता -तं, अलक्ष्यः -क्ष्या -क्ष्यं.

Air, *s.* आकाशः, वायुः *m.*, नभः *n.* (स्), विहायः *n.* (स्), समीरणः, समिरः.—(Air in motion) वायुः, वातः, समीरणः.—(In music) तालः, मूर्च्छना, निशारुकं.—(Appearance) रूपं, आकारः, आकृतिः *f.*—(Gesture, mien) गतिः *f.*, वदनं, रीतिः *f.*—(Manner) विधिः *m.*, प्रकारः, रूपं.—(Scent, vapour) वासः, बाष्पः, गन्धः; 'aloft in air,' विहायसा *ind.*; 'to build castles in the air,' गगनकुसुमानि कृ.

To **air**, *v. a.* (To expose to the air) वायुव्याप्यं -प्यां -प्यं कृ.—(To dry) शुष् in caus. (शोषयति -यितुं), शुष्कीकृ, निर्मलं -लां -लं कृ.

Air-balloon, *s.* आकाशयानं, व्योमयानं, आकाशवर्त्मना गमनार्थं विमानं.

Air-bladder, *s.* (Any cuticle filled with air) वायुकोषः, अनिलपूरिता नाडिः

Air-born, *a.* वायुजः -जा -जं, आकाशजः -जा -जं.

Air-gun, *s.* शरादिप्रासनार्थं वायुपूरितं यन्त्रं.

Air-hole, *s.* वातायनं, गवाक्षः, जालं, वायुच्छिद्रं, वायुपथः.

Airing, *s.* वायुसेवनं, विहारः, वायुहेतोः परिक्रमः.

Air-pump, *s.* वायुप्रक्षेपको नालः.

Air-shaft, *s.* आकरे वायुगमनार्थं पथः or छिद्रं.

Airy, *a.* (Composed of air) वायुमयः -यी -यं, आकाशीयः -या -यं, वैहायसः -सी -सं.—(Open to the air) वायुव्याप्यः -प्या -प्यं.—(Wanting reality, vain, empty) शून्यः -न्या -न्यं, लघुः -घुः -घ्वी -घु, अवास्तवः -वी -वं, असारः -रा -रं, चपलः -ला -लं, वायुसमः -मा -मं.

Aisle, *s.* (A path in a church) पूजाशालाभ्यन्तरे पथः.

Akin, *a.* (Allied by blood, used of persons) सगोत्रजः -जा -जं, सजातीयः -या -यं.—(Used of things) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्कीयः -या -यं.

Alabaster, *s.* श्वेतप्रस्तरविशेषः.

Alack, *interj.* (Alas!) कष्टं, आस्, हा, हन्त, अहह, हाहा, हाहो.

Alacrity, *s.* लाघवं, चञ्चलत्वं, सोद्यमत्वं, शीघ्रत्वं, अविलम्बत्वं, क्षिप्रता.

Alamode, *adv.* व्यवहारानुरूपं, रीत्यनुसारेण.

Alarm, *s.* (Fright) त्रासः, भयं, साध्वसं, शङ्का, भयप्रस्तावः.—(A cry by which soldiers are summoned to arms) साबहनिकं, युद्धाय योधाह्वानं.—(Alarm-cry in general) भयध्वनिः *m.*

To **alarm**, *v. a.* भी in caus. (भाययति -यितुं or भीषयति -ते), त्रस् in caus. (त्रासयति -यितुं), वित्रस्, सन्त्रस् in caus.

Alarmed, *p. p.* भीतः -ता -तं, भयार्त्तः -र्त्ता -र्त्तं, चकितः -ता -तं, शङ्कितः -ता -तं, भीषितः -ता -तं.

Alarm-bell, *s.* भयसूचका घण्टा, शत्रोर् आगमनसमये वाद्यते या घण्टा.

Alarming, *a.* भयङ्करः -रा -रं, भयानकः -का -कं, त्रासजनकः -का -कं, भयदः -दा -दं.

Alarmist, *s.* भयोत्पादकः, भयकारकः.

Alarm-post, *s.* भयसमये सैन्यसमागमार्थं निरूपितस्थानं.

Alarum, *s.* साबहनिकं, भयध्वनिः *m.*, निरूपितसमये निद्रालसं प्रबोधयति या घटी.

Alas, *interj.* कष्टं, आ, आस्, हा, हन्त, अहह, अहोबत.

Alb, *s.* (A white garment worn by priests) धर्म्माध्यापकैर् भृतः श्वेतवस्त्रविशेषः.

Albatross, *s.* सामुद्रीयपक्षिविशेषः, दक्षिणसमुद्रसेवी पक्षी.

Albeit, *adv.* तथापि, यद्यपि.

Albion, *s.* श्वेतद्वीपः.

Albugineous, *a.* अण्डशुक्लांशोपमः -मा -मं.

Albugo, *s.* शुक्लं, चक्षूरोगः, शुक्लमण्डलरोगः.

Album, *s.* विशिष्टश्लोकरक्षार्थं पुस्तकं.

Alchymical, *a.* रसायनविद्याविषयकः -का -कं, रसायनजः -जा -जं.

Alchymist, *s.* रसज्ञः, रसायनविद्याज्ञः, रससिद्धः.

Alchymy, *s.* रसायनविद्या, रसायनं, रससिद्धिः *f.*

ALCOHOL, *s.* मद्यसारः.—(Impalpable powder) सूक्ष्मभस्म *n.* (न्).

ALCOVE, *s.* कुञ्जः, कुञ्जकुटीरः, पर्णशाला, पल्लवशाला, निभृतस्थानं.

ALDER, *s.* वृक्षविशेषः.

ALDERMAN, *s.* पुराध्यक्षः, नगरस्य प्रधानपुरुषः, मान्यपदस्थः, पौरजनः, वृद्धः, वृद्धजनः, गुरुजनः.

ALDERMANLY, *adv.* वृद्धजनवत् *ind.*, गुरुजनवत् *ind.*, गुरुजनप्रकारेण.

ALE, *s.* यवसुरं, यवनिर्म्मितो मद्यविशेषः.

ALE-HOUSE, *s.* यवसुरालयः, यवसुरस्थानं.

ALE-HOUSE-KEEPER, *s.* यवसुरविक्रयी *m.* (न्), शौण्डिकः.

ALEMBIC, *s.* वकः, वकयन्त्रं, काचवकयन्त्रं, मुषा, द्रवद्रव्यसारनिर्हारार्थं मुषा.

ALERT, *a.* त्वरितः -ता -तं, क्षिप्रः -प्रा -प्रं, उद्यमी -मिनी -मि (न्), उद्योगी -गिनी -गि (न्), अवहितः -ता -तं, अतन्द्रः -न्द्रा -न्द्रं.

To BEDABBLE or BEDASH, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्, संसिच्, अवकॄ (c. 6. -किरति -करितुं -करीतुं), प्रोक्ष् (c. 1. -उक्षति -उक्षितुं).

To BEDAGGLE or BEDASH, *v. a.* कर्द्दमेन or पङ्केन or मलेन लिप् (c. 6. लिम्पति, लेप्तुं) or दुष् in caus. (दूषयति -यितुं), मलिन (nom. मलिनयति -यितुं).

To BEDAUB, *v. v.* लिप् (c. 6. लिम्पति, लेप्तुं), आलिप्, उपलिप्, अञ्ज् (c. 7. अनक्ति, अङ्क्तुं) or in caus. (अञ्जयति -यितुं).

To BEDAZZLE, *v. a.* अतिशयतेजसा दृष्टिम् उपहन् (c. 2. -हन्ति -हन्तुं).

BEDCHAMBER, *s.* शयनागारः, शयनगृहं, स्वप्ननिकेतनं, निद्राशाला, विश्रामशाला, वासगृहं, वासागारं.

BEDCLOTHES, *s. pl.* शय्यास्तरणं, शय्यावरणं, खट्वासम्बन्धि वस्त्रादिद्रव्यं, उत्तरप्रच्छदः, मसूरा.

BEDDING, *s.* शय्या, शय्योपकरणं, आस्तरणं, चोरपट्टी, खट्वासामग्री.

To BEDECK, *v. a.* भूष् (c. 10. भूषयति -यितुं), विभूष्, मण्ड् (c. 10. मण्डयति -यितुं), अलङ्कृ, परिष्कृ, शुभ् in caus. (शोभयति -यितुं).

BEDECKED, *p. p.* भूषितः -ता -तं, अलङ्कृतः -ता -तं, मण्डितः -ता -तं.

To BEDEW, *v. a.* शिशिरेण or नीहारेण क्लिद् in caus. (क्लेदयति -यितुं) or अवसिच् (c. 6. -सिञ्चति -सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -उक्षितुं) or आर्द्रीकृ.

BEDEWED, *p. p.* क्लिन्नः -न्ना -न्नं, आर्द्रः -र्द्रा -र्द्रं, प्रोक्षितः -ता -तं, तिमितः -ता -तं.

BEDFELLOW, *s.* सहशायी *m.* -यिनी *f.* (न्), एकखट्वाशायी *m.* -यिनी *f.* (न्).

BED-HANGINGS, *s.* मशहरी, चतुष्की, शय्यातिरस्करिणी.

To BEDIM, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, मलिनीकृ.

To BEDIZEN, *v. a.* भूष् (c. 10. भूषयति -यितुं), विभूष्, परिभूष्, अलङ्कृ, परिष्कृ.

BEDIZENED, *p. p.* भूषितः -ता -तं, अलङ्कृतः -ता -तं, शोभितः -ता -तं.

BEDLAM, *s.* उन्मत्तानाम् आरोग्यशाला, वातुलागारं, वातुललोकालयः.

BEDLAM, *a.* उन्मत्तः -त्ता -त्तं, उन्मादः -दा -दं, वातुलः -ला -लं.

BEDLAMITE, *s.* उन्मत्तः, उन्मादी *m.* (न्), वातुलः, मत्तः.

BED-MAKER, *s.* राजविद्यालये या स्त्री or यो जनो ऽन्तेवासिनां शय्यास्तरणं करोति; शयनकल्पिका, शय्यां कल्पयति या परिचारिका.

BEDPOST, *s.* खट्वास्तम्भः, खट्वादण्डः, शयनस्थूणा.

BEDRID or BEDRIDDEN, *a.* शयनाद् उत्थातुम् अक्षमः; अतिजीर्णः -र्णा -र्णं, अतिवृद्धः -द्धा -द्धं.

BEDROOM, *s.* शयनगृहं, स्वप्ननिकेतनं, शयनागारः, निद्राशाला, विश्रामशाला.

BEDSIDE, *s.* शय्यापार्श्वः, खट्वापार्श्वः, शयनोपान्तं, खट्वासमीपं.

BEDSTEAD, *s.* पर्य्यङ्कः, खट्वा, मञ्चः, मञ्चकः, पल्यङ्कः, तल्पः.

BEDTIME, *s.* शयनकालः, स्वप्नकालः, निद्राकालः, शय्यागमनसमयः, विश्रामकालः.

BEE, *s.* मधुकरः -कारी *m.* (न्), अलिः *m.*, मधुकृत् *m.*, मधुपायी *m.* (न्), मधुपः, मधुमक्षिका, मधुलिट् *m.* (ह्), भृङ्गः, पुष्पन्धयः, पुष्पलिट् *m.* (ह्), षट्पदः, द्विरेफः, भ्रमरः, मधुव्रतः, सरघा.

BEECH, *s.* भूर्जजातीयो वन्यवृक्षभेदः.

BEECHEN, *a.* पूर्वोक्तवृक्षकाष्ठमयः -यी -यं.

BEE-EATER, *s.* मधुमक्षिकाखादकः पक्षिभेदः.

BEEF, *s.* गोमांसं; 'roast beef,' शूल्यगोमांसं; 'boiled beef,' शृतगोमांसं.

BEEF-EATER, *s.* राजपरिचरः -परिचारकः, राजोपासकः.

BEE-GARDEN, *s.* मधुमक्षिकापालनस्थानं, मधुकरपालनोद्यानं.

BEE-HIVE, *s.* मधुकोषः, करण्डः, छत्रकः, मधुमक्षिकाधारः.

BEE-MASTER, *s.* मधुमक्षिकापालकः, मधुकररक्षकः.

BEESWAX, *s.* मधूच्छिष्टं, मधुजं, शिक्थं, सिक्थकं.

BEER, *s.* यवसुरं, यवमद्यं, यवरसः, यवनिर्म्मितं पानीयं.

BEER-HOUSE, *s.* यवसुराविक्रयस्थानं, यवसुरगृहं, आपानं, पानगोष्ठिका.

BEET, *s.* (A plant) पालङ्क्यः, पालङ्क्यशाकः.

BEETLE, *s.* भ्रमरभेदः, भृङ्गप्रभेदः, परोष्णी, पिङ्गकपिशा.—(A mallet) मुद्गरः.

To BEETLE, *v. n.* बहिर् लम्ब् (c. 1. लम्बते, लम्बितुं), प्रलम्ब्.

BEETLE-BROWED, *a.* ललाटाभोगविशिष्टः -ष्टा -ष्टं, प्रलम्बललाटः -टा -टं.

BEEVES, *s.* (Oxen) गावः *m. pl.*, गोकुलं.

To BEFALL, *v. n.* घट् (c. 1. घटते, घटितुं), निपत् (c. 1. -पतति -पतितुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), सम्पद् (c. 4. -पद्यते -पत्तुं), उपपद्, सम्भू (c. 1. -भवति -भवितुं).

BEFALLEN, *p. p.* आपतितः -ता -तं, उपस्थितः -ता -तं, समुपस्थितः -ता -तं, समापन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, घटितः -ता -तं, वृत्तः -त्ता -त्तं.

To BEFIT, *v. a.* युज् in pass. (युज्यते), उपपद् (c. 4. -पद्यते -पत्तुं) with loc.

BEFITTING, *a.* योग्यः -ग्या -ग्यं, यथायोग्यः -ग्या -ग्यं, यथोचितः -ता -तं.

To BEFOOL, *v. a.* मुह् in caus. (-मोहयति -यितुं), व्यामुह्, विप्रमुह्, भ्रम् in caus. (भ्रमयति -यितुं), वञ्च् in caus. (वञ्चयति -ते -यितुं).

BEFORE, *prep.* and *adv.* प्र, अभि prefixed.—(In the front of, not behind) अग्रे, अग्रतस्, पुरस्, पुरतस्, पुरस्तात्, अभितस्, प्रतिमुखं, अभिमुखं; 'going before,' पुरोगः -गा -गं, अग्रेसरः -रा -रं; 'before the fire,' अभ्यग्नि.—(In the presence of) साक्षात्, प्रत्यक्षे, अग्रे, समक्षं, प्रतिमुखं; 'he took them before the king,' तान् राजसमीपम् आनीतवान्.—(In the sight of, before the face) समक्षं, प्रत्यक्षं, प्रत्यक्षतस्, साक्षात्, सम्मुखं; 'before many persons,' बहुजनसमक्षं.—(Earlier in time, sooner than) प्राक्, पूर्व्वं, with the abl. c.; अग्रे; 'before offering the cakes,' पिण्डदानात् पूर्व्वं; 'before the appointed time,' निरूपितसमयात् पूर्व्वं or प्राग् विहितकालात्; 'he knows your necessities before you ask,' यत् तव प्रयोजनं तद् याच्ञातः पूर्व्वं जानाति; 'before dinner,' भोजनात् पूर्व्वं; 'before the event,' प्राग् घटनात्; 'before me,' मदग्रे.—(In time past) पुरा, पूर्व्वं, पूर्व्वकाले.—(As yet, hitherto) अद्य यावत्, अद्यपर्य्यन्तं, एतत् कालं यावत्, अद्यापि.—(Already) तत्पूर्व्वं, प्राग् वर्त्तमानकालात्; 'before mentioned,' पूर्व्वोक्तः -क्ता -क्तं, प्रागुक्तः -क्ता -क्तं, पूर्व्वचोदितः -ता -तं; 'the day before yesterday,' अपरेद्युस्; 'before and after,' पूर्व्वापरं.

BEFORE-HAND, *adv.* पूर्व्वं, अग्रे, पूर्व्वं, अग्रतस्, पूर्व्वतस्; 'determining beforehand,' अग्रनिरूपणं; 'to taste beforehand,' पूर्व्वस्वादनं कृ.

BEFORE-TIME, *adv.* पुरा, पूर्व्वं, पूर्व्वकाले, गतकाले.

To BEFOUL, *v. a.* मलिन (nom. मलिनयति -यितुं), दुष् in caus. (दूषयति -यितुं), कलुष (nom. कलुषयति -यितुं), आविल (nom. आविलयति -यितुं), समलं -लां -लं कृ.

To BEFRIEND, *v. a.* मित्र (nom. मित्रीयते -यितुं), उपकृ (c. 8. -करोति -कुरुते -कर्त्तुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), साहाय्यं कृ.

BEFRIENDED, *p. p.* कृतोपकारः -रा -रं, उपकृतः -ता -तं, अनुगृहीतः -ता -तं.

To BEG, *v. a.* (To ask) अर्थ् (c. 10. अर्थयते -यितुं), अभ्यर्थ्, प्रार्थ्, सम्प्रार्थ्, याच् (c. 1. याचति -ते, याचितुं), अभियाच्, प्रयाच्, सम्प्रयाच्, संयाच्.—(To ask alms) भिक्ष् (c. 1. भिक्षते, भिक्षितुं).—(To beg as a favour) वृ (c. 9. वृणीते, वरितुं, वरीतुं) or in caus. (वारयति -यितुं) with 2 acc., प्रसद् in caus. (-सादयते -यितुं).—(To beg for pardon) क्षम् in caus. (क्षमयति -यितुं) with acc. of the pers.

To BEG, *v. n.* भिक्ष् (c. 1. भिक्षते, भिक्षितुं), भैक्ष्यं चर् (c. 1. चरति, चरितुं), भिक्षाटनं कृ.

To BEGET, *v. a.* जन् in caus. (जनयति -यितुं), विजन्, सञ्जन्, प्रसु (c. 2. -सूते, c. 4. -सूयते -सोतुं).—(To produce, cause) उत्पद् in caus. (-पादयति -यितुं).—(To create) सृज् (c. 6. सृजति, स्रष्टुं).

BEGETTER, *s.* जनकः, जननः, जनयिता *m.* (तृ), जनिता *m.* (तृ), जन्मदः, सुतो *m.* (त्), उत्पादकः.

BEGGAR, *s.* (One who lives on alms) भिक्षुः *m.*, भिक्षुकः -की *f.*, भिक्षोपजीवी *m.* (न्), भिक्षाचरः, दरिद्रः.—(A petitioner) प्रार्थकः, अर्थी *m.* (न्) -र्थिनी *f.*, प्रार्थयिता *m.* (तृ), याचकः, याचनकः, मार्गणः -णकः, वनीयकः.—(In ragged garments) कर्पटी *m.* (न्).

To BEGGAR, *v. a.* दरिद्रीकृ, सर्व्वस्वं हृ (c. 1. हरति, हर्त्तुं), धनाद् भ्रंश् in caus. (भ्रंशयति -यितुं).

BEGGARED, *a.* दरिद्रितः -ता -तं, धनच्युतः -ता -तं, हृतसर्व्वस्वः -स्वा -स्वं, परिक्षीणः -णा -णं, गतवित्तः -त्ता -त्तं, नष्टार्थः -र्था -र्थं, गतविभवः -वा -वं, गतलक्ष्मीकः -का -कं, गतश्रीकः -का -कं; 'he is beggared,' अवसादयते.

BEGGARLY, *a.* (Indigent) दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, दुर्गतः -ता -तं, कृपणः -णा -णं, दीनः -ना -नं.—(Mean) तुच्छः -च्छा -च्छं, नीचः -चा -चं, अपकृष्टः -ष्टा -ष्टं.

BEGGARLY, *adv.* कृपणं, कार्पण्येन, दैन्यं, नीचप्रकारेण.

BEGGARY, *s.* (Indigence) दरिद्रता, दारिद्र्यं -द्र्यं, निर्धनता, परिक्षीणता, कार्पण्यं, अर्थिता, दीनता.

BEGGED, *p. p.* प्रार्थितः -ता -तं, याचितः -ता -तं, भिक्षितः -ता -तं.

BEGGING, (Act of) *s.* भिक्षा, भिक्षाटनं, भैक्ष्यचर्य्या, अर्थना, अभ्यर्थना, याचना, याच्ञा, प्रार्थनं -ना, अर्हणा, अभिशस्तिः *f.*

To BEGIN, *v. a.* and *n.* आरभ् (c. 1. -रभते -रब्धुं), अभ्यारभ्, प्रारभ्, समारभ्, प्रक्रम् (c. 1. -क्रमते -क्रमितुं), उपक्रम्, समुपक्रम्, प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं); प्रकृ, सम्प्रकृ; प्रस्तु (c. 2. -स्तौति -स्तोतुं); 'he began to cut,' छेत्तुं प्रवृत्तः.

BEGINNER, *s.* (One who begins) आरब्धा *m.* (ब्धृ), आरम्भकः, उपक्रन्ता *m.* (न्तृ), उपक्रमिता *m.* (तृ), उपक्रमकारी *m.* (न्).—(A novice) नवच्छात्रः, नूतनशिष्यः, प्राथमकल्पिकः.

BEGINNING, *s.* आरम्भः, प्रारम्भः, समारम्भः, प्रारब्धिः *f.*, आदिः *m.* उपक्रमः, प्रक्रमः, उद्घातः, उपोद्घातः, अभ्यादानं.—(Origin, source) मूलं, योनिः *m.f.*, उद्भवः, प्रभवः, गर्भः, जन्म *n.* (न्).—(Rudiments) आरम्भः.—(Elementary property) कारणगुणः; 'without beginning,' अनाद्यः -द्या -द्यं; 'from beginning to end,' आद्यन्तं, आप्रथमात् शेषं यावत्; 'beginning, middle, and end,' आदिमध्यावसानं; 'beginning with,' आदि, आद्य affixed.

To BEGIRD, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

BEGIRT, *p. p.* परिवेष्टितः -ता -तं, परिगतः -ता -तं, वलयितः -ता -तं, आवृतः -ता -तं; 'begirt with the sea,' समुद्रमेखलः -ला -लं.

BEGONE, *interj.* अपैहि, अपसर, दूरम् अपसर.

BEGOTTEN, *p. p.* जनितः -ता -तं, उत्पादितः -ता -तं, प्रसूतः -ता -तं.

To BEGREASE, *v. a.* वसया or स्नेहेन or तैलेन or घृतेन लिप् (c. 6. लिम्पति -लेप्तुं), स्निग्धीकृ.

To BEGRIME, *v. a.* मलेन दुष् in caus. (दूषयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

BEGRIMED, *p. p.* मलदूषितः -ता -तं, कलुषितः -ता -तं, कलङ्कितः -ता -तं.

To BEGRUDGE, *v. a.* स्पृह् (c. 10. स्पृहयति -यितुं), असूय (nom. असूयति -यितुं).

To BEGUILE, *v. a.* मुह् in caus. (मोहयति -यितुं), विप्रमुह्, व्यामुह्, वञ्च् in caus. (वञ्चयते -यितुं), परिवञ्च्, प्रवञ्च्, भ्रम् in caus. (भ्रमयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, आकृष् (c. 1. -कर्षति -क्रष्टुं -कर्ष्टुं).—(To beguile the time) विनुद् in caus. (-नोदयति -यितुं).

BEGUILED, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, विमूढः -ढा -ढं, प्रवञ्चितः -ता -तं, प्रलोभितः -ता -तं, विलोभितः -ता -तं, प्रतारितः -ता -तं.

BEGUN, *p. p.* आरब्धः -ब्धा -ब्धं, प्रारब्धः -ब्धा -ब्धं, उपक्रान्तः -न्ता -न्तं.

BEHALF, *s.* (In behalf of) अर्थं, अर्थे, हेतोः, हेतौ, कारणात्, निमित्ते, कृते, generally affixed to the crude of a noun; 'on my behalf,' मत्कृते or मदर्थे; 'on behalf of (his) son,' पुत्रहेतोः.—(Favour) अनुग्रहः, प्रसादः.

To BEHAVE, *v. n.* चर् (c. 1. चरति, चरितुं), आचर्, समाचर्, वृत् (c. 1.

वर्त्तते, वर्त्तितुं); sometimes वृत्तिं is added; as, 'in whatever way you behave towards them,' यां वृत्तिं तेषु वर्त्तसे. वृत्तिम् अनुष्ठा (c. 1. -तिष्ठति -स्थातुं), व्यवहृ (c. 1. -हरति -हर्त्तुं).—Well-behaved) सदाचारयुक्तः -क्ता -क्तं, सदाचारवान् -वती -वत् (त्).

BEHAVIOUR, s. वृत्तिः f., वृत्तं, आचारः, रीतिः f., व्यवहारः, चरित्रं, चरितं, आचरणं, गतिः f., चेष्टितं, स्थितिः f.

To BEHEAD, v. a. शिरः or मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं), विमस्तक (nom. विमस्तकयति -यितुं).

BEHEADED, p. p. विमस्तकितः -ता -तं, छिन्नमस्तः -स्ता -स्तं, -मस्तकः -का -कं.

BEHEADING (act of) s. शीर्षच्छेदः.—(Worthy of) शीर्षच्छेद्यः -द्या -द्यं.

BEHELD, p. p. आलोकितः -ता -तं, दृष्टः -ष्टा -ष्टं, आलोचितः -ता -तं, ईक्षितः -ता -तं, ईक्ष्यमाणः -णा -णं.

BEHEST, s. आज्ञा, आदेशः, निर्देशः, निदेशः, शासनं, वशं.

BEHIND, *prep.* or *adv.* पश्चात्, अनु prefixed.—(Behind the back, at the back of) पृष्ठतस्; 'following behind,' अनुगामी -मिनी -मि (न्).—(Below, inferior) अधस्तात्, अवरस्तात्.—(Posterior) अवरतस्, अवरस्तात्.—(At a distance) दूरतस्, दूरे.—(The hinder part) पृष्ठदेशः, पश्चाद्देशः, पृष्ठं, नितम्बः.

BEHINDHAND, *adv.* अतीतकालः -ला -लं, विलम्बी -म्बिनी -म्बि (न्), दीर्घकालीनः -ना -नं.—(Surpassed by another) अतिक्रान्तः -न्ता -न्तं.

To BEHOLD, v. a. दृश् (c. 1. पश्यति, द्रष्टुं), अभिदृश्, विदृश्, अनुदृश्; ईक्ष् (c. 1. ईक्षते, ईक्षितुं), समीक्ष्, वीक्ष्, अभिवीक्ष्, प्रेक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, उदीक्ष्, अवेक्ष्, अन्वीक्ष्, अवलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -लोकितुं), आलोक्, समालोक्, विलोक्, लक्ष् (c. 10. लक्षयति -ते -यितुं), आलक्ष्, समालक्ष्, उपलक्ष्, संलक्ष्; आलोच् (c. 10. -लोचयति -यितुं).

BEHOLD, *interj.* पश्य, प्रेक्षस्व.

To be BEHOLDEN, v. n. कृतोपकारत्वाद्येन पराधीनः -ना -नं or परायत्तः -त्ता -त्तं भू, प्राप्तोपकारहेतोर् बद्धः -द्धा -द्धं or निबद्धः -द्धा -द्धं भू or अस्, कृतोपकारं ज्ञा (c. 9. जानाति, ज्ञातुं), प्रत्युपकारः करणीय इति ज्ञा, आत्मानोपकारमोक्षाय परवशं ज्ञा.

BEHOLDER, s. प्रेक्षकः, द्रष्टा m. (ष्टृ), प्रेक्षमाणः, दर्शी m. (न्), पश्यन् m. (त्).

BEHOOF, s. अर्थः, फलं, लाभः, वृद्धिः f., विवृद्धिः f., फलोदयः.

BEHOVEFUL, a. यथोचितः -ता -तं, योग्यः -ग्या -ग्यं, अर्थकरः -री -रं.

It BEHOVES, v. *imp.* Expressed by the future passive participle; as, 'it behoves you to marry the damsel,' त्वया कन्या वोढव्या; or by the potential mood, as, त्वं कन्यां वहेः; or by the use of the verb अर्ह् (c. 1. अर्हति), as त्वं कन्यां वोढुम् अर्हसि; 'to act as it behoves one,' यथोचितं कृ.

BEING, s. (A being) भूतं, सत्त्वः.—(A sentient being) प्राणी m. (न्), प्राणभृत् m. f. n., शरीरी m. (न्), देही m. (न्), जन्तुः m., जन्युः m., चेतनः, चर्मी m. (न्).—(Existence) भावः, सत्ता, वर्त्तनं, विद्यमानता, अस्तित्वं, सम्भवः, अस्ति ind., वृत्तिः f., सत्त्वं.—(Particular state) भावः, अवस्था, दशा, वृत्तिः f.—(Supreme Being) परमेश्वरः.—(Pres. part.) सन् सती सत् (त्), वर्त्तमानः -ना -नं.

BEING THAT, *conj.* (Since) यतस्, यस्मात्, येन, इति हेतोः, यद्धेतोः. 'Being,' is often expressed by the loc. c. of सत्, as, 'the man being gone,' पुरुषे गते सति; 'it being so,' एवं सति, तथापि, इत्थम्भूते. 'Being' may also be expressed by the abl. c. of the abstract noun in such phrases as 'he being a good man,' सज्जनत्वात्.

BE IT SO, तथास्तु, एवमस्तु, भवतु, भवतेवं.

To BELABOUR, v. a. तड् (c. 10. ताडयति -यितुं), हन् (c. 2. हन्ति, हन्तुं), अभिहन्, अभ्याहन्, समाहन्; प्रहृ (c. 1. -हरति -हर्त्तुं).—(With a stick) दण्डाघातं कृ.

To BELAY, v. a. (Block up) प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), उपरुध्.

To BELCH, v. a. उद्वम् (c. 1. -वमति -वमितुं), उद्गॄ (c. 6. -गिरति -गरितुं -गरीतुं).

BELCH, BELCHING, s. उद्वमः, उद्वमनं, उद्गारः, उद्गिरणं.

BELDAM, s. वृद्धा स्त्री, जरती, जरापरिणता स्त्री, कुट्टिनी, कुरूपी.

To BELEAGUER, v. a. (To besiege) रुध् (c. 7. रुणद्धि, रोद्धुं), अवरुध्, उपरुध्; परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं).

BELEAGUERED, p. p. परिवेष्टितः -ता -तं, उपरुद्धः -द्धा -द्धं, बाधितः -ता -तं.

BELFOUNDER, s. घण्टाकारी m. (न्), घण्टानिर्म्माणकर्त्ता m. (र्त्तृ), कांस्यकारः.

BELFRY, s. घण्टाताडनयोग्यं प्रासादशृङ्गं, घण्टास्थानं, घण्टाशाला.

To BELIE, v. a. (To counterfeit, imitate) छल् (c. 10. छलयति -यितुं), छद्म or छद्मवेशं कृ, अनुकृ (c. 8. -करोति -कर्त्तुं).—(To charge any one with falsehood, to argue) अनृतं or असत्यं or मिथ्यावादं कस्मैचिद् आरुह् in caus. (-रोपयति -यितुं), पिशुन (nom. पिशुनयति -यितुं).—(To calumniate) परिवद् (c. 1. -वदति -वदितुं), अपवद्, कलङ्कं कृ, मिथ्याभियोगं कृ.

BELIEF, s. (Credence) प्रत्ययः, विश्वासः, विश्रम्भः, प्रमाणं.—(Religious belief) श्रद्धा, भक्तिः f., विश्वासः.—(Opinion) मतिः f., बुद्धिः f., बोधः.—(The thing believed in, tenet) मतं, 'my belief is' मन्ये.

BELIEVABLE, a. विश्वास्यः -स्या -स्यं, श्रद्धेयः -या -यं, विश्वासयोग्यः -ग्या -ग्यं.

To BELIEVE, v. a. (To give credit to) प्रती (c. 2. प्रत्येति, प्रत्येतुं), प्रत्ययीकृ.—(To have religious belief in) विश्वस् (c. 2. -श्वसिति -श्वसितुं) with loc. c.

To BELIEVE, v. n. (To exercise religious faith) श्रद्धा (c. 3. -दधाति -धातुं), विश्वासं कृ, प्रत्ययं कृ.—(To believe in, hold as an object of faith) विश्वस् (c. 2. -श्वसिति -श्वसितुं) with loc. c.—(To think) मन् (c. 4. मन्यते, मन्तुं).

BELIEVED, p. p. विश्वसितः -ता -तं, विश्वस्तः -स्ता -स्तं, प्रतीतः -ता -तं.

BELIEVER, s. श्रद्धान्वितः, आस्तिकः, प्रत्ययी m. (न्), विश्वासी m. (न्).

BELIEVING, a. श्रद्दधानः -ना -नं, श्रद्धालुः -लुः -लु, श्राद्धः -द्धा -द्धं, श्रद्धावान् -वती -वत् (त्), जातविश्वासः -सा -सं, विश्वासी -सिनी -सि (न्), प्रत्ययी -यिनी -यि (न्)

BELIKE, *adv.* अपिनाम, किंस्वित्, किल, स्यात्.

BELL, s. घण्टा, घण्टिका, घनं.—(Tinkling ornaments) किङ्किणी. 'to ring a bell,' घण्टां हन् (c. 2. हन्ति, हन्तुं) or तड् (c. 10. ताडयति -यितुं) or वद् in caus. (वादयति -यितुं), 'bell-shaped,' घण्टाकारः -रा -रं.

BELL-CLAPPER, s. घण्टावादकः, घण्टाकोणः, घण्टाभ्यन्तरे लम्बमान इतस्ततो दोलायमानस् तद्वादनयोग्यो लघुकाकारः कोणः, घण्टाभ्यन्तरे लग्नः स्थूलशिरस्को मुसलाकार आयसकीलो येन इतस्ततो लोलमाना घण्टा वाद्यते.

BELLE, s. सुन्दरी f., सुरूपी f., रूपवती f., सुवेशिनी f., प्रमदा.

BELLES-LETTRES, s. अलङ्कारविद्या, रसविद्या, रसिका विद्या, वाङ्मयं.

BELLIGERENT, a. युध्यमानः -ना -नं, रणशीलः -ला -लं, युयुत्सुः -त्सुः -त्सु.

BELLIPOTENT, a. रणवीरः -रा -रं, विक्रमी -मिणी -मि (न्), महावीर्य्यः -र्य्या -र्य्यं.

BELL-METAL, s. कांस्यं, घण्टाशब्दं, घोषः, ताम्रार्द्धं, वीरपुष्पः, पीतलोहं

To BELLOW, v. n. गर्ज् (c. 1. गर्जति, गर्जितुं), नर्द् (c. 1. नर्दति, नर्दितुं), विनर्द्, रस् (c. 1. रसति, रसितुं), रु (c. 2. रौति, रवितुं), विरु, संरु, रट् (c. 1. रटति, रटितुं), गण्ज् (c. 1. गञ्जति, गञ्जितुं), हम्भ (nom. हम्भायते -यितुं).

Bellowed, *p. p.* गर्जितः -ता -तं, नर्दितः -ता -तं, प्रणर्दितः -ता -तं.

Bellowing, *s.* गर्जनं, नादः, रुतं, नर्दनं नर्दितं.

Bellows, *s.* भस्त्रा *f.*, भस्त्री, भस्त्रका, चर्म्मप्रसेवकः -विका, धमनं, शुषिः *f.*

Bell-ringer, *s.* घण्टाताडः -डकः, घण्टावादकः, घण्टावादयिता *m.* (तृ).

Belluine, *a.* पाशवः -वी -वं, पशुशीलः -ला -लं, पश्वानुपः -पी -पं.

Belly, *s.* उदरं, जठरं -रा, कुक्षिः *m.*, पिचिण्डः, पिचण्डः, तुन्दं, तुन्दि *n.*

To belly or belly-out, *v. n.* (To swell out, bulge out) उदरवत् or उदरकंपेण लंब (c. 1. लबते, लम्बितुं) or पृ in pass. (पूर्य्यते).

Belly-ache, *s.* उदरवेदना, उदरामयः.

Belly-band, *s.* उदरत्राणं, उदरदाम *n.* (न्), अवसक्तिका.

Belly-bound, *a.* आनद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, बद्धोदरः -रा -रं.

Belly-full, *s.* उदरपूरणं, पिचिण्डपूरणं, जठरपूरणं.

Belly-god, *s.* उदरम्भरिः *m.*, कुक्षिम्भरिः *m.*, औदरिकः, उदरकामुकः, आत्मम्भरिः *m.*

Belly-worms, *s. pl.* उदरावेष्टः, कीटः, कृमिः *m.*, क्रिमिः *m.*

Bellman, *s.* घोषकः, घण्टाधरः, घण्टाताडनपूर्व्वकं घोषणाकर्त्ता *m.*, वैबोधिकः.

To belong, *v. n.* (To be one's own property) आत्मीयः -या -यं or स्वकीयः -या -यं or स्वाधीनः -ना -नं अस्. But the sense of 'belonging' is more usually expressed by the use of the roots अस् or भू or विद् with the gen. c., as, 'money belongs to me,' मम धनं विद्यते or अस्ति.—(To have relation to) सम्बन्ध् in pass. (-बध्यते).—(To be fit, or becoming) युज् in pass. (युज्यते); 'this belongs to me,' *i.e.* 'this is my business,' मम अयं व्यापारः

Belonging, *part.* सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं.

Beloved, *a.* प्रियः -या -यं, सुप्रियः -या -यं, दयितः -ता -तं, इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, इष्टतमः -मा -मं, प्रेष्ठः -ष्ठा -ष्ठं, प्रीतः -ता -तं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, अभीप्सितः -ता -तं.—(Dear as one's life) असुसमः -मा -मं, प्राणेभ्य गरीयान् -यसी -यः (स्).

Below, *prep.* (Under in place) अधस्, अधस्तात्, तले, नीचे, अधो-धस्; 'below the bed,' खट्वातले or खट्वाधः.—(Inferior, beneath) अवरः -रा -रं, अधःस्थः -स्था -स्थं, अवरतस्, अवरस्तात्, अधरेण, अधरात्, अधरतस्, अधरस्तात्.—(Unworthy of) अयोग्यः -ग्या -ग्यं, अनर्हः -र्हा -र्हं.—(Subject to) अधीनः -ना -नं.—(Less than) ऊनः -ना -नं; 'below two years of age,' ऊनद्विवार्षिकः or अप्राप्तद्वितीयवर्षः.

Below, *adv.* अधस्, नीचे, नीचकैस्, अधःस्थाने, अधोभागे, अधःस्थः -स्था -स्थं.—(On earth, as opposed to heaven) इहलोके, इह.—(In hell) अधोलोके, अधोभुवने.

Belrope, *s.* घण्टारज्जुः *m.*, घण्टासूत्रं, अधुनातनगृहेषु घण्टावादने प्रयुक्तं सूत्रं

Belt, *s.* मेखला, काञ्ची, कटिसूत्रं, शृङ्खलं -ला, रशना.

To belt, *v. a.* मेखलारूपेण परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं).

Bellwether, *s.* यो मेषश्च चरन् चरन् कण्ठलग्नां घण्टां नादयति स्वकर्म्मकारेण च मेषयूथम् एकत्र करोति सः; मेषयूथाग्रगः, मेषयूथपः.

To bemangle, *v. a.* ग्रन्थ (c. 6. गृह्णाति, ग्रथितुं, ग्रहुं), प्रमथ्, खण्डशः कृ, खण्डं खण्डं कृ, शकलीकृ, व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं).

To bemire, *v. a.* मलिन nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), पङ्केन or मलेन दुष् in caus. (दूषयति -यितुं).

Bemired, *p. p.* मलदूषितः -ता -तं, मलपङ्की -ङ्किनी -ङ्कि (न्).

To bemoan, *v. a.* विलप (c. 1. -लपति -लपितुं), अनुशुच् (c. 1. -शोचति -शोचितुं), परिदेव् (c. 1. -देवते देवितुं), लप् in freq. (लालप्यते).

Bemoaning, *s.* विलपनं, विलापः, परिदेवनं, क्रन्दितं, अनुशोचनं, रोदनं.

Bench, *s.* दीर्घासनं, दीर्घपीठं, आसनं, फलकः -कं; 'carpenter's bench,' उद्घनः.—(Seat of justice) धर्म्मासनं, विचारासनं.

Bencher, *s.* विचारकर्तॄणां संसर्गे प्रवेशः or व्यवहारपदप्राप्तः, सभ्यः, सभासद् *m.*—(Judge) प्राड्विवाकः.

To bend, *v. a.* (To bow, inflect) नम् in caus. (नामयति -यितुं), अवनम्, आनम्; नम्रीकृ.—(To make crooked) वक्रीकृ, जिह्म (nom. जिह्मयति -यितुं), अञ्च् (c. 1. अञ्चति, अञ्चितुं).—(To direct towards) आवृज् in caus. (-वर्जयति -यितुं).—(To bend a bow) धनुस् विस्फुर् in caus. (-स्फारयति -यितुं) or आयम् (c. 1. -यच्छति -यन्तुं).—(To bend the brow) भ्रूभङ्गं कृ.—(To bend the mind) मनः प्रविश् in caus. (-वेशयति -यितुं).—(To subdue) वशीकृ.

To bend, *v. n.* (To be incurvated) नम् (c. 1. नमति, नन्तुं), अवनम्, आनम्; नम्रीभू, वक्रीभू.—(To jut over) प्रलम्बः -म्बा -म्बं अस्; प्रलम्ब् (c. 1. -लम्बते -लम्बितुं).—(To be bent or resolved on) कृतनिश्चयः -या -यं or दृढनिश्चयः -या -यं or सुनिश्चितः -ता -तं अस्.—(To be submissive) आनतः -ता -तं or वश्यः -श्या -श्यं भू.

Bend, *s.* (Incurvation) नतिः *f.*, वक्रता, जिह्मता, वक्रिमा *m.* (न्), कुञ्चनं, अवकुञ्चनं, भङ्गी.—(Bend of a river) वक्रं, वङ्कः, पुटभेदः, भङ्गुरः.

Beneath, *prep.* (Lower in place) अधस्, अधस्तात्, तले, नीचे, अधो-धस्, अधरस्तात्, अधरतस्, अधरात्; 'beneath the tree,' वृक्षतले or वृक्षस्याधस्तात्; 'the water beneath the earth,' धरण्या अधःस्थं तोयं.—(Inferior) अवरः -रा -रं, अवरतस्, अवरस्तात्.—(Unbeseeming) अयोग्यः -ग्या -ग्यं, अनर्हः -र्हा -र्हं.

Beneath, *adv.* अधस्, नीचे, अधःस्थाने, नीचस्थाने, अधःस्थः -स्था -स्थं; 'the earth beneath,' नीचस्था पृथिवी.

Benediction, *s.* आशीः *f.* (स्), आशीर्वचनं, आशीर्वादः, स्वस्ति *ind.* धन्यवादः.—(Praise) स्तवः, स्तुतिः *f.*—(The advantage conferred) मङ्गलं, कल्याणं, वरः.

Benedictory, *a.* स्वस्तिकः -की -कं, स्वस्तिमान् -मती -मत् (त्), माङ्गलिकः -की -कं.

Benefaction, *s.* उपकारः, उपकृतं, उपकारकार्यं, हितं, प्रसादः.

Benefactor, *s.* हितकरः, उपकर्त्ता *m.* (र्तृ), उपकारकः, उपकारी *m.* (न्), उपकारकरः, कृतोपकारः, प्रियकृत्, हितकारः, सत्कारकारकः.

Benefactress, *s.* हितकारी, उपकारिणी, उपकर्त्री, प्रियकारी.

Benefice, *s.* धर्म्माध्यापकवृत्तिः *f.*, धर्म्मशिक्षकवृत्तिः *f.*, धर्म्माध्यापकसम्पत्तिः *f.*

Beneficence, *s.* परोपकारकार्यं, परोपकारः, उपकारशीलता, दानशीलता, दया, कृपा, स्थूललक्षत्वं, त्यागशीलता, त्यागिता.

Beneficent, *a.* परोपकारकः -का -कं, परोपकारी -रिणी -रि (न्), उपकारशीलः -ला -लं, उपकारपरः -रा -रं, हितकरः -री -रं, दानशीलः -ला -लं, त्यागशीलः -ला -लं, स्थूललक्षः -क्षा -क्षं, प्रियकारः -री -रं, प्रियङ्करः -री -रं, दयाकरः -रा -रं.

Beneficently, *adv.* हितकारवत्, प्रियकारवत्, उपकारवत्, स्थूललक्षतया, दयापूर्वं.

Beneficial, *a.* हितः -ता -तं, फलवान् -वती -वत् (त्), सार्थकः -का -कं, सोपकारः -रा -रं, हितवान् -वती -वत् (त्), अर्थकरः -री -रं, उपकारकः -का -कं, उपकारी -रिणी -रि (न्), लाभवान् -वती -वत् (त्), लाभजनकः -का -कं, अर्थजनकः -का -कं.—(Medicinally wholesome) पथ्यः -थ्या -थ्यं, औषधीयः -या -यं.

Beneficially, *adv.* सोपकारं, सफलं, सार्थकं, हितं, [illegible]

Beneficiary, *a.* पराधीनः -ना -नं, पराश्रितः -ता -तं, [illegible]—(One who holds a benefice) [illegible] *m.* (न्).

BENEFIT, s. (Favour conferred) हितं, उपकारः, उपकृतं, उपकारकत्वं -ता, अनुग्रहः, प्रसादः, अनुकूलं.—(Advantage, profit) फलं, लाभः, अर्थः; 'for the public benefit' प्रजार्थं.

To BENEFIT, v. a. उपकृ (c. 8. -करोति -कुरुते -कर्त्तुं) with loc. or acc. c., हितं कृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), उपचर् (c. 1. -चरति -चरितुं), फलं or लाभं दा (c. 3. ददाति, दातुं).

To BENEFIT, v. n. उपकारं or फलं or लाभं or हितं आप् (c. 5. -आप्नोति -आप्तुं).

BENEFITED, p. p. उपकृतः -ता -तं, कृतोपकारः -रा -रं, कृतलाभः -भा -भं.

BENEVOLENCE, s. परहितेच्छा, हितेच्छा, प्रेम n. (न्), दयालुत्वं, परोपकारशीलता, हितकाम्या, सौजन्यं, परवाञ्छापूरणं, दया, कृपा.

BENEVOLENT, a. हितकामः -मा -मं, परहितैषी -षिणी -षि (न्), परोपकारशीलः -ला -लं, हितप्रेप्सुः -प्सुः -प्सु, प्रियैषी -षिणी -षि (न्), परहितः -ता -तं, उपकारपरः -रा -रं, दयालुः -लुः -लु, सुशीलः -ला -लं, सुहृदयः -या -यं.

BENEVOLENTLY, adv. सुशीलत्वात्, प्रेम्णा, प्रियं, दयापूर्व्वं, सद्भावात्, कृपया.

BENGAL, s. (The country) वङ्गः.—(Belonging to it) वाङ्गः -ङ्गी -ङ्गं.

To BENIGHT, v. a. तिमिर (nom. तिमिरयति -यितुं), तमसा प्रच्छद् in caus. (-च्छादयति -यितुं).

BENIGHTED, p. p. निशाक्रान्तः -न्ता -न्तं, रात्रिग्रस्तः -स्ता -स्तं, तमोवृतः -ता -तं, तमोभूतः -ता -तं, तमोग्रस्तः -स्ता -स्तं, तमसाच्छन्नः -न्ना -न्नं.

BENIGN, BENIGNANT, a. प्रियः -या -यं, हितः -ता -तं, प्रीतः -ता -तं, दयाशीलः -ला -लं, दयालुः -लुः -लु, सुशीलः -ला -लं, कृपालुः -लुः -लु. मृदुः -द्वी -दु, प्रेमपरः -रा -रं.

BENIGNITY, s. प्रियता, प्रेम n. (न्), प्रीतिः f., स्नेहः, दया, कृपा, कृपालुत्वं, मृदुता, मार्द्दवं, दयालुत्वं, अनुग्रहः.—(Wholesomeness) पथ्यता.

BENIGNLY, adv. प्रियं, प्रीत्या, दयापूर्व्वं, कृपया, सद्भावात्, प्रसादात्.

BENISON, s. आशीः f. (स्), आशीर्वचनं, स्वस्ति ind., स्वस्तिवादः.

BENJAMIN, s. काष्ठागुरुसारो, शैलनिर्य्यासः, शिलारसः, शिलार्त्तं, गन्धाश्मी.

BENT, s. (Curvature) नतिः f., वक्रता, नम्रत्वं, निम्नता, वक्रिमा m. (न्), कुञ्चनं.—(Declivity) प्रवणः, सानुः.—(Inclination) शीलः, भावः, स्वभावः, प्रवृत्तिः f., वासना, इच्छा.—(Determination) निश्चयः.—(Purpose) चिकीर्षितं, अभिप्रायः.—(Application of mind) मनःप्रवेशः.—(A kind of grass) कुशः, शकुलादनः.

BENT, p. p. नतः -ता -तं, नामितः -ता -तं, आनतः -ता -तं, प्रणतः -ता -तं, नम्रः -म्रा -म्रं, परिणतः -ता -तं, कुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, विभुग्नः -ग्ना -ग्नं, रुग्णः -ग्णा -ग्णं, वक्रितः -ता -तं, प्रवणः -णा -णं, वक्रः -क्रा -क्रं, कुञ्चितः -ता -तं, आकुञ्चितः -ता -तं, अपावृतः -ता -तं.

To BENUMB, v. a. जडीकृ, मुह् in caus. (मोहयति -यितुं), स्तम्भ् (c. 5. स्तभ्नोति, c. 9. स्तभ्नाति, स्तम्भितुं).

BENUMBED, p. p. हृतेन्द्रियकः -का -कं, जडीकृतः -ता -तं, जडीभूतः -ता -तं, स्तम्भितः -ता -तं, सुप्तत्वक् m. f. n. (च्).

BENZOIN, s. काष्ठागुरुसारो, श्लेष्मपुष्पं, शीतशिवं, पूर्वं, शैलं, गन्धाश्मी, शिलार्त्तं, शिलाजतु, शैलनिर्य्यासः.

To BEPAINT, v. a. चित्र् (c. 10. चित्रयति -यितुं), रञ्ज् in caus. (रञ्जयति [illegible] -यितुं).

To BEPISS, v. a. अवमूत्र् (c. 10. -मूत्रयति -यितुं).

To BEQUEATH, v. a. दा, मरणात् or मरणात् पूर्व्वं or व्यवहारे [illegible]काले पितृमरणोत्तरकाले दायादाधीनः प्रदा (c. 1. -यच्छति -दातुं) [illegible] in caus. (-पादयति -यितुं) or ऋज् in caus. (-अर्पयति -यितुं).

BEQUEATHED, p. p. पितृमरणोत्तरे प्रदत्तः -त्ता -त्तं or दत्तः -त्ता -त्तं or अपितृनिर्दिष्टः -ष्टा -ष्टं.

BEQUEST, s. कुलक्रमं, दायाद्यं, दायाद्यं मरणकाले दायादाधि[illegible]दायादं.

To BEREAVE, v. a. वियुज् in caus. (-योजयति -यितुं), विप्रयुज् with abl. or inst. c., अपहृ (c. 1. -हरति -हर्त्तुं), अपनी (c. 1. -नयति -नेतुं), भ्रंश् in caus. (भ्रंशयति -यितुं).—(To be bereaved) हा in pass. (हीयते), परिहा in pass. with inst. c., भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) with abl. c., वियुज् in pass. (-युज्यते).

BEREAVED OF BEREFT, a. हीनः -ना -नं, रहितः -ता -तं, वर्जितः -ता -तं, हृतः -ता -तं, अपहृतः -ता -तं, परित्यक्तः -क्ता -क्तं, वियुक्तः -क्ता -क्तं; 'bereft of money,' धनहीनः -ना -नं; 'bereft of one's all,' हृतसर्व्वस्वः; 'bereft of life,' हतजीवितः -ता -तं. Often expressed by गत in the first member of a compound; as, 'bereft of feeling,' गतचेतनः -ना -नं.

BEREAVEMENT, s. हानिः f., वियोगः, विप्रयोगः, अपहारः, अपचयः.

BERGAMOT, s. फलभेदः, सुगन्धविशिष्टो निम्बुकविशेषः.

To BERHYME, v. a. उपगीतं -तां -तं कृ, कवि (nom. काव्यति).

BERRY, s. बीजपूर्णं गुटिकाकारं क्षुद्रफलं, गुटिका, गुलीं.

BERYL, s. गोमेदः, गोमेदकः -कं.

To BESCATTER, v. a. अवकॄ (c. 6. -किरति -करितुं, करीतुं), पर्य्यवकॄ.

To BESEECH, v. a. प्रार्थ् (c. 10. -अर्थयते -यितुं), अभ्यर्थ्, समभ्यर्थ्; विनयेन प्रार्थ्, विनी (c. 1. -नयति -नेतुं), याच् (c. 1. याचति -ते, याचितुं), अभियाच्, प्रयाच्, सम्प्रयाच्; प्रसद् in caus. (-सादयते -यितुं).

BESEECHED, p. p. विनयेन प्रार्थितः -ता -तं, अभ्यर्थितः -ता -तं, याचितः -ता -तं.

BESEECHER, s. प्रार्थकः, प्रार्थयिता m. (तृ), अर्थी m. (न्), याचकः.

To BESEEM, v. a. युज् in pass. (युज्यते), उपपद् (c. 4. -पद्यते -पत्तुं) with loc. c.

BESEEMLY, a. युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, यथोचितः -ता -तं.

To BESET, v. a. (To besiege) रुध् (c. 7. रुणद्धि, रोद्धुं), उपरुध्, आक्रम् (c. 1. -क्रामति -क्रमितुं).—(To surround) परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), उपवेष्ट्, संवेष्ट्; परिष्ठा (c. 1. -तिष्ठति -ते -स्थातुं), पर्य्युपास्.—(To embarrass) आकुलीकृ, बाध् (c. 1. बाधते, बाधितुं), परिक्लिश् (c. 9. -क्लिश्नाति -क्लेशितुं).

BESET, p. p. रुद्धः -द्धा -द्धं, उपरुद्धः -द्धा -द्धं, वेष्टितः -ता -तं, परिवेष्टितः -ता -तं, आक्रान्तः -न्ता -न्तं, परिगतः -ता -तं, अभिपरिप्लुतः -ता -तं, बाधितः -ता -तं, वृतः -ता -तं, अभिवृतः -ता -तं.

To BESHREW, v. a. दुर्भाग्यं or अमङ्गलं प्रार्थ् (c. 10. -अर्थयते -यितुं), धिक्कृ.

BESIDE OR BESIDES, prep. (At the side of) पार्श्वे, पार्श्वतस्, निकटे, समीपे, सन्निधाने, अभितस्; 'beside the river,' नदीतीरे, नदीसमीपे.—(Over and above) अधिकं, अतिरिक्तं, अन्तरेण, मुक्त्वा.—(Except) ऋते with abl. or acc., विना with inst. or acc.—(Beside one's self) हतज्ञानः -ना -नं, उपहतबुद्धिः -द्धिः -द्धि, उन्मत्तः -त्ता -त्तं.

BESIDE OR BESIDES, adv. अपरञ्च, अपरं, अन्यच्च, अपिच, किञ्च, अधिकन्तु, अधिकं; 'are there any here besides?' किम् अत्र अपरे सन्ति.

To BESIEGE, v. a. रुध् (c. 7. रुणद्धि, रोद्धुं), अवरुध्, उपरुध्, परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), बाध् (c. 1. बाधते, बाधितुं).

BESIEGED, part. a. रुद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, बाधितः -ता -तं.

BESIEGER, s. अवरोधकः, रोधी m. (न्), उपरोधी m. (न्), वेष्टकः, बाधकः.

To BESLAVE, v. a. वशीकृ, दासीकृ, अस्वतन्त्रीकृ, दम् in caus. (दमयति -यितुं).

To BESMEAR, v. a. लिप् (c. 6. लिम्पति -ते -लेप्तुं), आलिप्, समालिप्, उपलिप्, अञ्ज् (c. 7. अनक्ति, अञ्जितुं), or caus. (अञ्जयति -यितुं), दिह् (c. 2. देग्धि, देग्धुं), प्रदिह्.

BESMEARED, p. p. लिप्तः -प्ता -प्तं, विलिप्तः -प्ता -प्तं, उपलिप्तः -प्ता -प्तं, अभ्यक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं; 'besmeared with blood,' रक्ताक्तः -क्ता -क्तं, शोणिताक्तः -क्ता -क्तं, शोणितोपलिप्तः -प्ता -प्तं.

Besom, *s.* मार्जनी, सम्मार्जनी, शोधनी, विमार्गः, अहनी, समूहनी.

To besort, *v. a.* युज् in pass. (युज्यते) उपपद् (c. 4. -पद्यते -पत्तुं).

To besot, *v. a.* मुह् in caus. (मोहयति -यितुं), जडीकृ, मूढीकृ.

Besotted, *p. p.* मूढचेताः -ताः -तः (स्), मूढबुद्धिः -द्धिः -द्धि, मूढात्मा -त्मा -त्म (न्), प्रमूढसंज्ञः -ज्ञा -ज्ञं, मोहितः -ता -तं, जडीकृतः -ता -तं.

Besottedness, *s.* मोहः, सम्मोहः, मूढता, जडता, जडिमा *m.* (न्).

To bespangle, *v. a.* सहस्राकारैर् भूषणैर् अनुबन्ध् (c 4. -बिध्यति -बद्धुं) or क्षुभ् in caus. (क्षोभयति -यितुं), उपक्षुभ्.

To bespatter, *v. a.* पङ्केन or मलेन सिच् (c. 6. सिञ्चति -ते, सेक्तुं), अवसिच् or अवकॄ (c 6. किरति करितुं -करीतुं), अभ्यवकॄ or उक्ष् (c. 1. उक्षति उक्षितुं), प्रोक्ष्, मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

Bespattered, *p. p.* मलदूषितः -ता -तं, कलङ्कितः -ता -तं, कलुषितः -ता -तं.

To bespeak, *v. a.* (To order beforehand) प्रख्या (c. 2. -ख्याति -ख्यातुं), पूर्वादेशं कृ, अग्रनिवेदनं कृ; मम पूर्वेभुक्तिः स्यादिति वद् (c. 1. वदति, वदितुं).—(To betoken, indicate) सूच् (c 10. सूचयति -यितुं), प्रदिश् (c. 6. -दिशति -देष्टुं).—(To forebode) अग्रनिवेदनं कृ, प्रदृश् in caus. (-दर्शयति -यितुं).

To bespeckle, *v. a.* चित्र (c. 10. चित्रयति -यितुं), शबलीकृ, कर्बुरीकृ.

To bespit, *v. a.* निष्ठीव् (c. 1. ष्ठीवति -ष्ठेवितुं), अवनिष्ठीव्.

Bespoken, *p. p.* प्रख्यातः -ता -तं, पूर्वादिष्टः -ष्टा -ष्टं, अग्रनिवेदितः -ता -तं.—(Any commodity bespoken) प्रख्यातभाण्डं.

Bespread, *p. p.* आस्तीर्णः -र्णा -र्णं, आवृतः -ता -तं, परिच्छन्नः -न्ना -न्नं.

To besprinkle, *v. a.* सिच् (c. 6. सिञ्चति -ते, सेक्तुं), अवसिच्, निषिच्, संसिच्, अवकॄ (c. 6. किरति -करितुं करीतुं), अभ्यवकॄ, पर्यवकॄ, समवकॄ, उक्ष् (c. 1. उक्षति, उक्षितुं), अभ्युक्ष्, प्रोक्ष्, क्लिद् in caus. (क्लेदयति -यितुं).

Besprinkled, *p. p.* सिक्तः -क्ता -क्तं, उक्षितः -ता -तं, प्रोक्षितः -ता -तं.

Best (superl. of good), *a.* सर्वोत्तमः -मा -मं, उत्तमः -मा -मं, अनुत्तमः -मा -मं, सत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, सर्वश्रेष्ठः -ष्ठा -ष्ठं, परमः -मा -मं, परः -रा -रं, भद्रतमः -मा -मं, अर्हत्तमः -मा -मं, प्रवरः -रा -रं, प्रशस्तः -स्ता -स्तं, अग्रिमः -मा -मं, परार्द्ध्यः -र्द्ध्या -र्द्ध्यं, 'which is the best of these?' एतेषां को भद्रतमः, 'best beloved,' इष्टतमः -मा -मं. Any thing the best of its kind may sometimes be expressed by रत्नं.

Best (superl. of well), *adv.* उत्तमं, श्रेष्ठं, सत्तमं, श्रेष्ठतम्.

Bestained, *p. p.* कलङ्कितः -ता -तं, दूषितः -ता -तं, परिमलितः -ता -तं.

To bestead, *v. a.* (To profit) फलाय or लाभाय भू or अस्.

Bestial, *a.* पाशवः -वी -वं, पशुशीलः -ला -लं, पशुव्यवहारः -रा -रं, पशुसदृशः -शी -शं, अमानुषः -षी -षं, क्रूराचारः -रा -रं.

Bestiality, *s.* पशुता -त्वं, पशुशीलता, अमनुष्यता, क्रूराचारत्वं, पशुगमनं.

To bestialize, *v. a.* पशूकृ, पशुसदृशं -शीं -शं कृ.

Bestially, *adv.* पशुवत्, पशुकल्पेन, पशुव्यवहारानुसारात्, मानुषाचारविरुद्धं.

To bestir one's self, *v. r.* चेष्ट् (c. 1. चेष्टते, चेष्टितुं), विचेष्ट्, आत्मानं चेष्ट् in caus. (चेष्टयति -यितुं), यत् (c. 1. यतते, यतितुं), प्रयत्, घट् (c. 1. घटते घटितुं), व्यवसो (c. 1. -स्यति -सातुं), उद्यमं or उत्साहं कृ.

To bestow, *v. a.* (To give) दा (c. 3. ददाति, c. 1. यच्छति, दातुं), प्रदा, अभिदा, अनुदा, वितॄ (c. 1. -तरति -तरितुं -तरीतुं), प्रतिपद् in caus. (-पादयति -यितुं) उपपद्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपाकृ.—(To apply, lay out) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), उपयुज्; निधा (c. 3. दधाति धातुं).—(To give in marriage) कन्यां प्रदा.

To bestow one's self, *v. r.* (Attend to) सेव् (c. 1. सेवते, सेवितुं), उपसेव्, समास्था (c. 1. -तिष्ठति -स्थातुं), मनो निविश् in caus. (-वेश-यति -यितुं).

Bestowed, *p. p.* दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, निहितः -ता -तं, विश्राणितः -ता -तं, प्रतिपादितः -ता -तं, निक्षिप्तः -प्ता -प्तं, वितीर्णः -र्णा -र्णं.

Bestower, *s.* दाता *m.* (तृ), प्रदाता *m.* (तृ), प्रदः or दः in comp.

Bestraught, *p. p.* चिन्ताकुलः -ला -लं, व्यग्रः -ग्रा -ग्रं, उपहतबुद्धिः -द्धिः -द्धि.

To bestrew, *v. a.* आस्तॄ (c. 5. -स्तृणोति -स्तरितुं -स्तरीतुं).

To bestride, *v. a.* (A horse) पादौ or जङ्घे पृथक्कृत्वा अश्वम् आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अश्वारुह्; अधिक्रम् (c. 1. -क्रामति -क्रमितुं), "'bestriding a horse,' अश्वारूढः.

To bestud, *v. a.* गजादिरूपचित्रैर् अनुबन्ध् (c. 4. -बिध्यति -बद्धुं) or खच् (c. 10. खचयति -यितुं).

Bestudded, *p. p.* अनुविद्धः -द्धा -द्धं, खचितः -ता -तं, प्रत्युप्तः -प्ता -प्तं.

Bet, *s.* (Wager) पणः, प्रतिज्ञा, व्याजिकपणः.

To bet, *v. n.* पण् (c. 1. पणते, पणितुं), विपण्; दिव् (c. 4. दीव्यति, देवितुं).

To betake one's self, *v. r.* आश्रि (c. 1. -श्रयति -ते -श्रयितुं), अभिश्रि, उपाश्रि, संश्रि, समुपाश्रि.

Betel, *s.* (Nut) ताम्बूलं, पूगं, उद्वेगं, पूगफलं.—(The plant) ताम्बूली, ताम्बूलवल्ली, नागवल्ली.—(A seller of it) ताम्बूलिकः.—(Relating to it) ताम्बूली -लिनी -लि (न्).—(Betel box) पूगपात्रं, ताम्बूलपेटिका.—(Betel-bearer) ताम्बूलवाहकः, ताम्बूलदः, वाग्गुलिः *m.*

To bethink one's self, *v. r.* अनुचिन्त् (c. 10. -चिन्तयति -यितुं), संचिन्त्, अनुध्यै (c 1. -ध्यायति -ध्यातुं), विमृश् (c. 6. -मृशति -मर्ष्टुं -म्रष्टुं), अनुबुध् (c. 4. -बुध्यते -बोद्धुं), अनुस्मृ (c. 1. -स्मरति -स्मर्तुं).

To bethump, *v. a.* तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्तुं).

To betide, *v. n.* सम्भू (c. 1. -भवति -भवितुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), निपत् (c. 1. -पतति -पतितुं), सम्पद् (c. 4. -पद्यते -पत्तुं), घट् (c. 1. घटते, घटितुं); 'may good betide you,' भद्रं ते भूयात्, 'woe betide you,' अपायस्ते or अजीवनिस्ते or अकरणिस्ते भूयात्.

Betimes, *adv.* प्रभाते, सकालं, प्रातर् बुधे, प्रत्यूषे, समया, समये, उपयुक्तसमये, वेलायां.

To betoken, *v. a.* सूच् (c. 10. सूचयति -यितुं), प्रदिश् (c. 6. -दिशति -देष्टुं), सन्दिश्; अभिदृश् in caus. (-दर्शयति -यितुं).—(To foreshew) प्रदृश् in caus.; 'betokening,' सूचकः -का -कं, वाचकः -का -कं.

To betoss, *v. a.* क्षुभ् in caus. (क्षोभयति -यितुं), क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

To betray, *v. a.* परहस्तेषु or शत्रुकरेषु or शत्रुपाणिषु or अन्येषां करेषु सम् in caus. (-अर्पयति -यितुं), परादा (c. 3. -ददाति -दातुं), प्रदा, वञ्च् (c. 10. वञ्चयते -यितुं), विश्वासघातं or विश्वासभङ्गं कृ, छद् (c. 10. छादयति -यितुं), द्रोहाचरणं -णं कृ.—(To shew, discover) सूच् (c. 10. सूचयति -यितुं); दृश् in [illegible] (दर्शयति -यितुं), पिशुन (nom. पिशुनयति -यितुं), व्यक्तीकृ, प्रकटी[illegible]—(To betray secrets) गोप्यानि प्रकाश् in caus. (-काशयति -यि[illegible]), मन्त्रभेदं कृ.

Betrayed, *p. p.* शत्रुहस्तार्पितः -ता [illegible], वञ्चितः -ता -तं, परादत्तः -त्ता -त्तं.

Be[illegible]r, *s.* परहस्तार्पकः, वञ्चकः [illegible] विश्वासघातकः, प्रदाता *m.* (तृ).

To [illegible]im, *v. a.* भूष् (c. 10. भूषय[illegible] -यितुं), अलङ्कृ, परिष्कृ.

To [illegible]oth, *v. a.* वाग्दानं कृ, [illegible] विवाहप्रतिज्ञां कृ, प्रतिज्ञापत्रेण [illegible] सम्बन्धं कृ.

Betrothed, *p. p.* वाग्दत्तः -त्ता -[illegible] -त्ता -त्तं, प्रत्तः -त्ता -त्तं, प्रतिज्ञाविवाहितः -ता -तं.—(Wom[illegible]) वाग्दत्ता, प्रत्ता.

Betro[illegible], *s.* वाग्दानं, कन्या[illegible]नं.

To bet[illegible] *v. a.* परिदा (c. 3. -ददाति -दातुं), नियुज् in caus. (-योजयति

-पितुं), अर्प् in caus. (-अर्पयति -यितुं).

BETTER, (compar. of good) *a.* भद्रतरः -रा -रं, श्रेयान् -यसी -यः (स्), श्रेष्ठः -ष्ठा -ष्ठं, गरीयान् -यसी -यः (स्), प्रशस्तः -स्ता -स्तं, अर्हत्तरः -रा -रं, साधीयान् -यसी -यः (स्), ज्यायान् -यसी -यः (स्).

BETTER (compar. of well) *adv.* वरं, प्रशस्तं, श्रेयस्, भद्रतरं, भद्रतरप्रकारेण, श्रेष्ठं.—(More) अधिकं, अधिकतरं, अतिरिक्तं.—(The better, the superiority) श्रेष्ठता, श्रेयस्त्वं, प्रधानता, प्रमुखत्वं.—(To get the better) अभिभू, अतिरिच् in pass. (-रिच्यते).

To BETTER, *v. a.* भद्रतरं -रां -रं कृ, श्रेयांसं -यसीं -यः कृ.—(To advance) वृध् in caus. (वर्धयति -यितुं), संवृध्, परिवृध्, ऋध् in caus. (ऋधयति -यितुं), समेध्.—(To surpass) अतिरिच् in pass. (-रिच्यते), अभिभू.

BETTERS, *s. pl.* (Superiors) श्रेष्ठाः *m. pl.*, प्रधानपुरुषाः *m. pl.*, उत्तमपुरुषाः *m. pl.*

BETTING, *s.* पणनं, पणाकरणं, पणार्पणं, आक्षिकपणाकरणं, प्रतिज्ञानं.

BETTOR, *s.* पणकर्त्ता *m.* (र्त्तृ), पणकः, पणार्पकः.

BETTY, *s.* द्वारकपाटादिभञ्जने सन्धिचौरैः प्रयुक्तं लोहयन्त्रं.

BETWEEN or BETWIXT, *prep.* मध्ये, अभ्यन्तरे, अन्तरेण, अन्तरे, अन्तर्, अन्तरा, मध्यतस्, मध्यस्थाने; 'the mediator between God and man,' ईश्वरस्य मानुषाणाञ्च मध्ये मध्यस्थः. Between is sometimes expressed by the gen. or inst. c.; as, 'there is a great difference between a master and a servant,' सेव्यसेवकयोर् महदन्तरं; 'great is the difference between thee and the ocean,' त्वया समुद्रेण च महदन्तरं; 'I will put enmity between thee and the woman,' त्वया नार्य्या च वैरितां जनिष्यामि; 'I am in a strait betwixt two,' उभाभ्यां सङ्कुचितो ऽस्मि; 'they parted the paternal inheritance between them,' दायं पित्र्यं परस्परं व्यभजन्.

BEVER, *s.* माध्यन्दिनभोजनानन्तरं प्रायाधिभोजनात् तत्कालान्तरे लघ्वाहारः or अल्पाशनं.

BEVERAGE, *s.* पानीयं, पेयं, पानं, पयः *n.* (स्).—(Of the gods) अमृतं.

BEVY, *s.* गणः, सङ्घः, समवायः, यूथं, कुलं; 'a bevy of young lasses,' तरुणीगणः.

To BEWAIL, *v. a.* and *n.* विलप् (c. 1. -लपति -लपितुं), शुच् (c. 1. शोचति, शोचितुं), अनुशुच्, परिदेव् (c. 1. -देवति -ते -देवितुं); 'to grieve exceedingly,' शुच् in freq. (शोशुच्यते), परिशुच् in freq., लप् in freq. (लालप्यते).

BEWAILABLE, *a.* शोच्यः -च्या -च्यं, शोचनीयः -या -यं, विलपनीयः -या -यं.

BEWAILING, *s.* विलपनं, विलापः, परिदेवनं, अनुशोचनं, क्रन्दनं.

To BEWARE, *v. n.* अवधा (c. 3. -धत्ते -धातुं), सावधानः -ना -नं भू, अवधानं कृ.—(Abstain from, avoid) परिहृ (c. 1. -हरति -हर्त्तुं), वृज् in caus. (वर्जयति -यितुं), विवृज्, परिवृज्; 'beware of men,' मानुषेभ्यो ऽवधत्त; 'beware of too great avarice,' अतिलोभात् सावधानो भव; 'beware lest any one deceive you,' सावधाना भवत को ऽपि युष्मान् न भ्रमयेत्.

To BEWEEP, *v. a.* रुद् (c. 2. रोदिति, रोदितुं), अनुशुच् (c. 1. -शोचति, -शोचितुं).

To BEWET, *v. a.* क्लिद् in caus. (क्लेदयति -यितुं), सिच् (c. 6. सिञ्चति, सेक्तुं).

To BEWILDER, *v. a.* मुह् in caus. (मोहयति -यितुं), व्यामुह्, परिमुह्, विमुह्; आकुलीकृ, व्याकुलीकृ, भ्रम् in caus. (-भ्रमयति -यितुं), सम्भ्रम्.

BEWILDERED, *p. p.* आकुलः -ला -लं, व्याकुलः -ला -लं, [illegible] -ता -तं, व्याकुलीकृतः -ता -तं, सम्भ्रान्तः -न्ता -न्तं, कातरः -रा -रं, [illegible] -या -यं.

मोहितः -ता -तं, मुग्धः -ग्धा -ग्धं, विमूढः -ढा -ढं, विमुग्धः -ग्धा -ग्धं, व्यस्तः -स्ता -स्तं, परिविह्वलः -ला -लं.

BEWILDERMENT, *s.* व्याकुलता, आकुलत्वं, व्यग्रता, वैक्लव्यं, सम्भ्रमः, कातरता.

To BEWITCH, *v. a.* मन्त्रद्वारा वशीकृ or मुह् in caus. (मोहयति -यितुं), मोहं कृ, अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं).—(To captivate) मनो हृ (c. 1. हरति, हर्त्तुं).

BEWITCHED, *p. p.* मोहितः -ता -तं, वशीकृतः -ता -तं, अभिमन्त्रितः -ता -तं.

BEWITCHER, *s.* मोहकः, मोहनः, मायी *m.* (न्), वशीकर्त्ता *m.* (र्त्तृ), मायाकृत्.

BEWITCHMENT, *s.* वशीक्रिया, वशिः *m.*, वशिता, वशीकरणं, मोहनं, परिमोहनं, विमोहनं, सम्मोहः, मोहः, माया, कार्म्मणत्वं.

BEWITCHING, *a.* मोही -हिनी -हि (न्), मोहनः -नी -नं, मनोहारी -रिणी -रि (न्), मनोहरः -रा -रं, प्रलोभकः -का -कं, आकर्षकः -की -कं, मायी -यिनी -यि (न्).

BEWITCHINGLY, *adv.* यथा मनो ह्रियते or वशीक्रियते तथा, मनोहरप्रकारेण, यथा मोहो जायते तथा, मायया, प्रलोभनाय.

To BEWRAY, *v. a.* (To betray) परादा (c. 3 -ददाति -दातुं), प्रदा; शत्रुहस्तेषु अर्प् in caus. (-अर्पयति -यितुं).—(To indicate) सूच् (c. 10. (सूचयति -यितुं), पिशुन (nom. पिशुनयति -यितुं).

BEYOND, *prep.* and *adv.* अति prefixed.—(On the farther side) पारं, पारे; 'beyond the sea,' समुद्रपारं; 'from beyond,' परात; 'to go beyond,' अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर (c. 1. -चरति -चरितुं).—(In front) अग्रे.—(Superior to) अतिरेकी -किणी -कि (न्), विशिष्टः -ष्टा -ष्टं.—(More than) अधिकं, or expressed by अति prefixed; as, 'beyond mortal strength,' अतिमानुषः -षी -षं; 'beyond's one's power,' अतिशक्ति, 'beyond measure,' अतिमात्रं, अतीव; 'passed beyond the range of sight,' चक्षुर्विषयम् अतिक्रान्तः.—(At a distance) दूरे

BEZIL or BEZEL, *s.* रत्नाधारयोग्यो ऽङ्गुरीयकभागः, अङ्गुरीयकस्य यत्स्थाने मणिः बध्यते or प्रतिबध्यते तत्.

BHAVÁNÍ, *s.* (The wife of the god Śiva, and the goddess of destruction; called Bhavání in her amiable form) भवानी, उमा, महादेवी, देवी.—(The pure one) गौरी.—(As terrible in form and irascible in temper) दुर्गा, काली, चण्डी, चण्डिका.—(As daughter of Himálá, the sovereign of the snowy mountains) पार्वती, हैमवती.—(As wife of Śiva) शिवा, ईश्वरी, रुद्राणी, शर्वाणी, मृडानी.—(The all-auspicious) सर्वमङ्गला. (The mother) अम्बिका.—(As the performer of austerities) कात्यायनी, अपर्णा.

BIANGULATED, *a.* द्विकोणः -णा -णं, द्वयस्रकः -का -कं, कोणद्वयविशिष्टः -ष्टा -ष्टं.

BIAS, *s.* (Inclination) भावः, शीलः, शीलत्वं, वाञ्छा, स्वभावः, इच्छा, अभिलाषः, सङ्कल्पः, छन्दं, चिकीर्षा, स्पृहा, अभिप्रायः.—(Inclination to go on one side) पार्श्वे गमनेच्छा.—(Partiality) पक्षपातः, पक्षपातिता, आत्मीकृतं.—(That which biasses, or induces to act) प्रवर्त्तकः, प्रचोदः, प्रोत्साहः -हकः, प्रयोजकः.

To BIAS, *v. a.* प्रवृत् in caus. (-वर्त्तयति -यितुं), आवृज् in caus. (-वर्जयति -यितुं); आत्मीकृ; प्रणुद् (c. 6. -णुदति -णोत्तुं), आकृष् (c. 1. -कर्षति -कर्ष्टुं), चेष्ट् in caus. (चेष्टयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं), आकृ in caus. (-कारयति -यितुं), पक्षपातीकृ.

BIASSED, *p. p.* प्रवर्त्तितः -ता -तं, प्रोत्साहितः -ता -तं, प्रणोदितः -ता -तं, आत्मीकृतः -ता -तं, आकृष्टः -ष्टा -ष्टं.—(In favour of a side) पक्षग्राही *m.* (न्).

Bib, *s.* बालकस्य वक्षस्थलछादनयोग्यं क्षौमीनिर्मितं उत्तरीयवस्त्रं.

Bibber, *s.* सुरापी *m.* (न्), सुरापः, मद्यपायी *m.* (न्), पानपरः, मद्यपः *m.*

Bible, *s.* धर्म्मपुस्तकं, ईश्वरवाक्यप्रकाशको ग्रन्थः.

Biblical, *a.* धर्म्मपुस्तकविषयः -या -यं, धर्म्मपुस्तकसम्बन्धकः -का -कं.

Bibliography, *s.* ग्रन्थविद्या, ग्रन्थविद्यानुसेवनं.

Bibliomania, *s.* प्राचीनपुस्तकप्राप्त्यै व्यग्रता, दुर्लभग्रन्थान्वेषणे व्यग्रता.

Bibliotheke, *s.* पाठार्थं सुरक्षितो ग्रन्थसमूहः, विद्यानुसेवनार्थं ग्रन्थकुटी.

Bibulous, *a.* जलशोषकः -का -कं, जलनिपानशीलः -ला -लं.

Bicapsular, *a.* बीजकोशो द्वैधीकृतो यस्य, द्विधाभूतबीजकोशः -शा -शं.

Bicipital, *a.* द्विमूर्द्धः -र्द्धा -र्द्धं, द्विशीर्षकः -का -कं, द्विशिराः -राः -रः (स्).

To Bicker, *v. n.* (To skirmish) डिम्बाहवं कृ, कलह (nom. कलहायते -यितुं), कलहं कृ.—(To wrangle) विवद् (c. 1. -वदते -वदितुं), वाग्युद्धं कृ.—(To quiver) स्फुर् (c. 6. स्फुरति, स्फुरितुं).

Bickering, *s.* कलहः, विप्रलापः, विवादः, द्वन्द्वं, वाग्युद्धं.—(Petty warfare) डिम्बः, डिम्बाहवः.

Bickern, *s.* सृण्याकारद्वययुक्तः धूर्म्मिभागः, कर्म्मकारसेवितं लोहयन्त्रं.

Bicorne, *a.* द्विशृङ्गः -ङ्गा -ङ्गं, शृङ्गद्वयविशिष्टः -ष्टा -ष्टं.

To Bid, *v. a.* (To invite) निमन्त्र् (c. 10. -मन्त्रयति -ते -यितुं), आह्वे (c. 1. -ह्वयति -ह्वातुं).—(To command) आज्ञा in caus. (आज्ञापयति -यितुं), प्रेर् (c. 10. प्रेरयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), समादिश्.—(To offer a price) अमुकमूल्यं दित्सामीति or दातुमिच्छामीति वद् (c. 1. वदति, वदितुं) or क्री in caus. (क्रापयति -यितुं) or घुष् (c. 10. घोषयति -यितुं) or अभिधा (c. 3. -दधाति -धातुं).—(To bid welcome) स्वागतमिति वद्.—(To bid adieu) आमन्त्र् (c. 10. मन्त्रयते -यितुं), अनुमन्त्र्, आप्रच्छ् (c. 6. -पृच्छते -प्रष्टुं).—(To bid defiance) आह्वे, समाह्वे.

Bidden, *p. p.* (Commanded) आज्ञप्तः -प्ता -प्तं, प्रेरितः -ता -तं, चोदितः -ता -तं, देशितः -ता -तं, आदिष्टः -ष्टा -ष्टं.—(Invited) निमन्त्रितः -ता -तं, केतितः -ता -तं, आहूतः -ता -तं.

Bidder, *s.* क्रेता *m.* (तृ), क्रायकः, मूल्यदित्सुः *m.*, प्रकाशक्रयसमये अमुकमूल्यं दित्सामीति or दास्यामीति क्रापयति यो जनः.

Bidding, *s.* (Command) आज्ञा, प्रेरणं, आदेशः, निर्देशः, शासनं.—(Offer of a price) मूल्यदित्साक्रापनं, अमुकमूल्यं दित्सामीति क्रापनं, मूल्यदित्सा.

To Bide, *v. a.* and *n.* (To remain) स्था (c. 1. तिष्ठति -ते, स्थातुं), वृत् (c. 1. वर्त्तते, वर्त्तितुं), वस् (c. 1. वसति, वस्तुं).—(To expect) प्रतीक्ष् (c. 1. -ईक्षते -ईक्षितुं), उद्दृश् (c. 1. -पश्यति -द्रष्टुं).—(To endure) सह् (c. 1. सहते, सोढुं), मृष् (c. 4. मृष्यति, मर्षितुं).

Bidental, *a.* द्विदन् -दती -दत् (त्), द्विदन्तः -न्ती -न्तं, द्विरदः -दा -दं.

Biennial, *a.* द्वैवर्षिकः -की -कं, द्विवर्षः -र्षी -र्षं, द्विवर्षीयः -या -यं, द्विवर्षमात्रव्यापी -पिनी -पि (न्), वत्सरद्वयमात्रजीवी *m.* (न्).

Bier, *s.* शिबिका, शववाहनं, शवयानं, कटः, खट्टिः *m.*, खाटः, वारुढः, प्रेतवाहनसाधनं खट्वादि.

Biestings, *s.* पेयूषः -षं, पीयूषः -षं, प्रसवानन्तरं प्रथमगोदुग्धं.

Bifid, Bifidated, *a.* द्विखण्डीकृतः -ता -तं, द्वैधीकृतः -ता -तं.

Bifold, *a.* द्विगुणः -णा -णं, द्वेधः -धी -धं, द्विःप्रकारः -रा -रं.

Biformed, *a.* द्विरूपः -पा -पी -पं, द्विमूर्त्तिमान् -मती -मत् (त्).

Bifurcated, *s.* द्वयः -या -यं, अग्रद्वयविशिष्टः -ष्टा -ष्टं.

Big, *a.* स्थूलः -ला -लं, बृहन् -हती -हत् (त्), विपुलः -ला -लं.—(Big-bodied) बृहत्कायः -या -यं, महाकायः -या -यं, महाङ्गः -ङ्गी -ङ्गं.—(A pregnant woman) गर्भिणी, गर्भवती.—(Bombastic) गर्व्वितः -ता -तं.—(Teeming with) सङ्कुलः -ला -लं, सङ्कीर्णः -र्णा -र्णं, आकीर्णः -र्णा -र्णं, पूर्णः -र्णा -र्णं.—(As big as) परिमाण or परिमित, or मात्र affixed; as, 'as big as an egg,' अण्डपरिमाणः -णा -णं; 'as big as a grain of mustard,' सर्षपपरिमितः -ता -तं; 'as big as a man,' पुरुषमात्रः -त्रा -त्रं.

Bigamist, *s.* द्विभार्य्यः, द्विपत्नीस्वामी *m.* (न्), एककाले विवाहद्वयकर्त्ता *m.* (तृ).

Bigamy, *s.* एककाले द्विविवाहकरणं, द्विपत्नीकारित्वं.

Big-bellied, *a.* पृथूदरः -रा -रं, स्थूलोदरः -रा -रं, लम्बोदरः -रा -रं, बृहत्कुक्षिः -क्षिः -क्षि, पिचण्डिलः -ला -लं, बृहन्नाभिः -भिः -भि, तुन्दवान् -वती -वत् (त्).

Big-boned, *a.* बृहदस्थिमान् -मती -मत् (त्), बृहदङ्गः -ङ्गी -ङ्गं.

Biggin, *s.* बालकयोग्यं शिरोवेष्टनं, बालशिरस्कं.—(A pot) पात्रं, आधारः.

Bigness, *s.* स्थूलता, स्थौल्यं, बृहत्त्वं, विपुलता.—(Size, comparative bulk) परिमाणं, 'of the bigness of an egg,' अण्डपरिमाणः -णा -णं.

Bignonia, *s.* पाटलिः *m. f.* -ला, अमोघा, काचस्थाली, फलेरुहा, कुवेराक्षी.

Bigot, *s.* स्वमतधारणे व्यग्रः, विचारणां विना or अविचार्य्य पक्षपाती *m.* (न्), निर्बन्धशीलः, व्यग्रचित्तः.

Bigoted, *a.* अविचार्य्य स्वमते स्थितः -ता -तं, स्वमतधारणे व्यग्रः -ग्रा -ग्रं, स्वमतेनिष्ठितः -ता -तं, साग्रहीकृतः -ता -तं, स्वमतरक्षी -क्षिणी -क्षि (न्).

Bigotry, *s.* विचारणां विना स्वमते व्यवस्थितिः *f.* or अभिनिवेशः or अतिनिर्बन्धः, साग्रहीकृतं.

Big-swoln, *a.* अतिस्फीतः -ता -तं, उच्छूनः -ना -नं, प्रवृद्धः -द्धा -द्धं.

Big-uddered, *a.* पीनोध्नी *f.*, पीवरस्तनी *f.*, पीनस्तनधारिणी *f.*

Bilbo, *s.* कृपाणः, खड्गः, निस्त्रिंशः, असिः *m.*

Bile, *s.* पित्तं, मायुः *m.*, भ्राजकं, पलाग्निः *m.*

Bile, *s.* (A boil) स्फोटः, स्फोटकः, विस्फोटः.

To Bilge, *v. n.* (To spring a leak) नौकातले or नौकापार्श्वे दारुस्फोटनप्रयुक्तं जलं गृहीत्वा मस्ज् (c. 6. मज्जति, मङ्क्तुं).

Biliary, *a.* पैत्तः -त्ती -त्तं, पित्तसम्बन्धी -न्धिनी -न्धि (न्).

Bilinguous, *a.* द्विजिह्वः -ह्वा -ह्वं, द्विभाषावादी -दिनी -दि (न्).

Bilious, *a.* पित्तलः -ला -लं, पैत्तः -त्ती -त्तं, पैत्तिकः -की -कं.

To Bilk, *v. a.* वञ्च् in caus. (वञ्चयति -ते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्.

Bill, *s.* (Beak of a bird) चञ्चुः *f.*, तुण्डः, तुण्डिः *m.*, सृक्कः.—(A kind of hatchet) दात्रं, खनित्रः.—(An act of parliament) व्यवस्था.—(A written paper of any kind) पत्रं, लेखः -खा, लेख्यं.—(An account of money) विक्रयपत्रं.—(An advertisement) घोषणापत्रं.—(In law) भाषापादः, पूर्व्वपक्षपादः, अभियोगपत्रं.

To Bill, *v. n.* (To kiss, embrace) चुम्ब् (c. 1. चुम्बति, चुम्बितुं), निंस् (c. 2. निंस्ते, निंसितुं), आलिङ्ग् (c. 1. -लिङ्गति -लिङ्गितुं), परिरम्भं कृ.

Billet, *s.* (A note) पत्रं, लेखः, लेख्यं.—(A ticket) निदर्शनपत्रं, चिह्नं.—(A log of wood) काष्ठखण्डं, काष्ठं.

To Billet, *v. a.* निदर्शनपत्रेण सैन्यानाम् आवासस्थानं प्रक्लृप् (c. 10. -कल्पयति -यितुं); सैन्यान् वस् in caus. (वासयति -यितुं).

Billiards, *s. pl.* इदानीन्तनजनैः सेविता गुलिकाक्रीडा.

Billion, *s.* खर्व्वः.—(A million millions) नियुतनियुतानि, शङ्कुः.

Billow, *s.* ऊर्म्मिः *m. f.*, महोर्म्मिः *m. f.*, भङ्गः, तरङ्गः, उल्लोलः, पयोराशिः *f.*, वारिराशिः *f.*, कल्लोलः, अर्गलः.

To Billow, *v. n.* तरङ्ग (nom. तरङ्गायते), तरङ्गवेगेन प्रलुठ् (c. 1. -लोठति -लोठितुं), महावेगेन प्रवृध् (c. 1. -वर्धते -वर्धितुं).

Billow-beaten, *a.* तरङ्गोत्क्षिप्तः -प्ता -प्तं, तरङ्गाघातः -ता -तं, उत्तरङ्गः -ङ्गा -ङ्गं.

Billowy, *a.* ऊर्म्मिमान् -मती -मत् (त्), तरङ्गितः -ता -तं, महावेलः -ला -लं, महातरङ्गः -ङ्गा -ङ्गं, प्रलोठितः -ता -तं.

Bill-sticker, *s.* घोषणापत्राणि राजमार्गादिषु जनसङ्कीर्णस्थानेषु स्थापयति यः.

Bin, *s.* धान्यकोष्ठकं, कुशूलः, पिढः.

Binary, *a.* द्वैधः -धी -धं, द्विगुणः -णा -णं.

To broil, *v. a.* भ्रस्ज् (c. 6. भृज्जति, भर्ष्टुं), भृज् (c. 1. भर्जते, भर्जितुं), चर्च्च (c. 1. चर्च्चते, चर्च्चितुं).

To broil, *v. n.* (To be hot) तप् in pass. (तप्यते), पच् in pass. (पच्यते).

Broiled, *p. p.* भर्जितः -ता -तं, भृष्टः -ष्टा -ष्टं, पक्वः -क्वा -क्वं.

To broke, *v. n.* पण्यं or परकार्य्यादि सम्पद् in caus. (-पादयति -यितुं) or सिध् in caus. (साधयति -यितुं); पण्यार्थं पण् (c. 1. पणते, पणितुं or पणायति -यितुं).

Broken, *p. p.* भग्नः -ग्ना -ग्नं, भिन्नः -न्ना -न्नं, खण्डितः -ता -तं, रुग्णः -ग्णा -ग्णं, विदीर्णः -र्णा -र्णं, शकलीकृतः -ता -तं, विघटितः -ता -तं, त्रुटितः -ता -तं.—(Trained) विनीतः -ता -तं, दमितः -ता -तं.

Broken-hearted, *a.* भग्नहृदयः -या -यं, दलद्धृदयः -या -यं, विदीर्णहृदयः -या -यं, भग्नाशाः अशयः -या -यं, शोकाकुलः -ला -लं, भग्नाशः -शा -शं.

Broken-kneed, *a.* भग्नजानुः -नुः -नु, भिन्नजानुः -नुः -नु.

Broken-winded, *a.* श्वासार्त्तः -र्त्ता -र्त्तं, श्वासरोगी -गिणी -गि, यक्ष्मातः -ता -तं.

Broker, *s.* निष्क्रयपणजीवी or निष्क्रयार्थं परार्थं क्रेता विक्रेता वा or परार्थं व्यवसायी -यिनी (न्) or परकार्य्यनिर्वाहकः or परकार्य्यनिर्वाहकः or परकार्य्यसम्पादकः, वणिक्.—(A dealer in old things) जीर्णद्रव्यक्रयविक्रयिकः, जीर्णपरिच्छदक्रयविक्रयी *m.* (न्).

Brokerage, *s.* *See* Brocage.

Bronchial, *a.* कण्ठ्यः -ण्ठ्या -ण्ठ्यं, कण्ठनालसम्बन्धीयः -या -यं, ग्रैवेयः -यी -यं.

Bronze, *s.* कांस्यं, पित्तलं, ताम्रं, रीतिः *f.*, रीती, आरकूटः.

To bronze, *v. a.* पित्तलीकृ, ताम्रवत्कृ, पित्तलवर्णीकृ, कठिनीकृ.

Bronzed, *p. p.* ताम्रवर्णाकृतः -ता -तं, रीतः -ता -तं, कांस्यवर्णः -र्णा -र्णं.

Brooch, *s.* (A kind of ornament) वक्षोऽलङ्कारविशेषः यो वक्षस्थले धृतः सुवर्णकीलः, क्वचित् कीलितः सूक्ष्मसुवर्णमुक्तादिमयालङ्कारो वक्षसि वा वस्त्राञ्चलबन्धं संकरीकृत्य धार्यते, वक्षोभूषणं.

To **brood**, *v. n.* (To sit on eggs) कुलायनिलायं or नीडनिलायं कृ, कुलायं निली (c. 4. -लीयते -लेतुं), अण्डप्रसवानन्तरम् आपक्षिशावकोद्भेदात् नीडे निली; अण्डानाम् उपरि उपविश् (c. 6. -विशति -वेष्टुं).

To **brood-over**, *v. a.* चिन्ताकुलीभू, चिन्ताव्यग्रः -ग्रा -ग्रं भू, अपसरेण मनसा चिन्त् (c. 10. चिन्तयति -यितुं), यथा मद्गुरः शावके तथा सुचिरं चिन्त्.

Brood, *s.* (A hatch) शावकगणः, यः शावकगण एककाले डिम्बाद् जायते. —(Offspring) प्रजा, अपत्यं, सन्तानः.

Brooding, *s.* (The act of sitting on eggs) कुलायनिलायः.

Broody, *a.* कुलायनिलायी -यिनी -यि (न्).

Brook, *s.* अल्पनदी, अल्पसरित् *f.*, कुसरित् *f.*, क्षुद्रसरित् *f.*, अल्पस्रोतः *n.* (स्).

To **brook**, *v. a.* and *v. n.* सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), सङ्क्षम्, तिज् in des. (तितिक्षते -क्षितुं), मृष् (c. 4. मृष्यति -ते, मर्षितुं, c. 10. मर्षयति -यितुं).

Brooklime, *s.* नदीकूलजातः or जलरुहो नीलपुष्पविशिष्ट ओषधिभेदः.

Broom, *s.* (For cleaning) मार्जनी, सम्मार्जनी, शोधनी *f.*, विमार्गः, जहनी, समूहनी.—(A shrub) गुल्मभेदस् तस्य च क्षुद्रविटपा मार्जनीनिर्म्माणे कदापि प्रयुज्यन्ते.

Broomstaff, *s.* मार्जनीदण्डः, शोधनीदण्डः, विमार्गयष्टिः *m.*

Broth, *s.* जूषं, यूषं, यूषः, निष्क्वाथः.

Brothel, *s.* वेश्याजनसमाश्रयः, गणिकागृहं, वेश्याश्रयः, वेश्यागृहं, वेश्यालयः, वेश्यावेश्म *n.* (न्), केलिगृहं.

Brother, *s.* भ्राता *m.* (तृ).—(Of whole blood) सोदरः, सहोदरः, सोदर्य्यः, समानोदर्य्यः, सगर्भ्यः, सगर्भः, सनाभिः *m.*, सयोनिः *m.*, सहजः. —(Of half blood) विसोदरः.—(Half-brother, step-mother's son) वैमात्रेयः, विमातृजः.—(Brother in law, husband's brother) देवा *m.* (वृ), देवरः.—(Wife's brother) श्यालः.—(Brother's wife) भ्रातृजाया, प्रजावती.—(Brother and sister) भ्रातृभगिन्यौ *m. du.*, भ्रातरौ *m. du.*—(Any one closely united) बन्धुः *m.*, बान्धवः, सजातिः *m.*, समानधर्म्मः, सहायः, सहचारी *m.* (न्), संसर्गी *m.* (न्); 'a brother in arms,' सहयुध्वा *m.* (न्).

Brotherhood, *s.* भ्रातृत्वं, सौभ्रात्रं.—(Association) संसर्गित्वं, समाजिता, सहकारिता, साहचर्य्यं, साहित्यं, बन्धुता, संसर्गः.

Brotherlike, *a.* भ्रातृतुल्यः -ल्या -ल्यं, भ्रातृसदृशः -शी -शं.

Brotherly, *a.* भ्रातृकः -का -कं, भ्रात्रीयः -या -यं, भ्रातृवत्सलः -ला -लं.

Brotherly, *adv.* भ्रातृवत्, सोदरवत्, भ्रातृस्नेहेन, भ्रातृसमप्रकारेण.

Brought, *p. p.* नीतः -ता -तं, आनीतः -ता -तं, उपानीतः -ता -तं, आहृतः -ता -तं.—(Brought forth) प्रसूतः -ता -तं, जातः -ता -तं, जनयितः -ता -तं, [illegible] -का -कं.—(Brought up) गृहीतविद्यः -द्या -द्यं, [illegible] -ता -तं, विनीतः -ता -तं, वर्द्धितः -ता -तं.

Brow, *s.* (The forehead) ललाटं, भ्रूमध्यं *m.* (न्), गोधिः *m.*—(The countenance) वदनं, मुखं, आननं.—(The arch of hair over the eye) भ्रूः *f.*, भ्रूलता.—(The edge of any high place) [illegible], गिरिमूर्द्धा *m.* (न्), सानुः, शिखरः, गिरिपृष्ठं.

To **browbeat**, *v. a.* भ्रूभङ्गेन or भ्रूभङ्गं or भ्रुकुटीमुखं or कटाक्षेण or [illegible] निरीक्ष् (c. 1. -ईक्षते -ईक्षितुं); 'brow-beaten,' कटाक्षितः -ता -तं.

Browbound, *a.* किरीटी -टिनी -टि (न्), किरीटधारी -रिणी -रि (न्).

Brown, *a.* श्यावः -वा -वं, कपिशः -शा -शं, कपिलः -ला -लं, पिङ्गलः -ला -लं, पिशङ्गः -ङ्गा -ङ्गं, ताम्रः -म्री -म्रं, ताम्रवर्णः -र्णा -र्णं.— (Browned, made brown) कपिशितः -ता -तं.

Brownish, *a.* ईषत्पिङ्गलः -ला -लं, ईषत्पिङ्गलः -ला -लं, [illegible] -णी -णि.

Brownness, *s.* कपिशत्वं, कपिलवर्णः, पिङ्गलता, श्यावः, ताम्रवर्णः.

Brownstudy, *s.* समाधानं, ध्यानमग्नता, अन्यमनस्कत्वं, चिन्ताव्यग्रभावः, चिन्ताकुलता.

Browse, *s.* किसलः -लं, किसलयं, पल्लवं, पत्रं, गवादनं, छागादनं, छागादिभक्षणीयं नवशाखाग्रादि.

To **browse**, *v. n.* छागादिवत् किसलयशाखादि भक्ष् (c. 1. भक्षति, भक्षितुं) or खाद् (c. 1. खादति, खादितुं), चर् (c. 1. चरति, चरितुं).

Browsick, *a.* विषण्णवदनः -ना -नं, अधोमुखः -खी -खं, नतमूर्द्धा -र्द्धा -र्द्ध (न्).

Browsing, *s.* नवकिसलयं, नवपल्लवं, नवाङ्कुरं, पल्लवः, शाड्वलं, पत्रयौवनं, मृगभोजनीयं नवाङ्कुरलतादि.

Bruise, *s.* क्षतं, परिक्षतं, नीलिका, प्रहारक्षतं, प्रहारोत्थितिः *f.*; प्रहारः, आघातः.

To **bruise**, *v. a.* (Hurt by a blow) प्रहारेण हिंस् (c. 7. हिनस्ति, हिंसितुं) or क्षतं कृ, or क्षण् (c. 8. क्षणोति, क्षणितुं), नीलिकां कृ.—(Reduce to powder, crush) चूर्ण् (c. 10. चूर्णयति -यितुं), मृद् (c. 9. मृद्नाति, मर्द्दितुं), अवमृद्, विमृद्, चूर्णीकृ.

Bruised, *p. p.* प्रहारार्त्तः -र्त्ता -र्त्तं, क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, मर्द्दितः -ता -तं.

Bruiser, *s.* (Boxer) मल्लः, मल्लयोधः, पाणिघातः, बाहुप्रहरणः, बाहुयोधी *m.* (न्)

Bruit, *s.* (Noise) शब्दः, ध्वनिः *m.*—(Rumour) प्रवादः, जनप्रवादः समाचारः, संवादः, किंवदन्ती, वार्त्ता.

To **bruit**, *v. a.* घुष् in caus. (घोषयति -यितुं), आघुष्, विघुष्, ख्या in caus. (ख्यापयति -यितुं), आख्या, प्रकाश् in caus. (-काशयति -यितुं)

Brumal, *a.* हैमनः -नी -नं, -शैशिरः -री -रं, शीतकालीनः -ना -नं.

Brunette, *s.* श्यामा, श्यामला, श्यामाङ्गी, श्यामवर्णी, कपिशमुखी

Brunt, *s.* (Attack) आक्रमः, अभिक्रमः, प्रयत्नक्रमः, सङ्घट्टः, अभिमर्द्दः बलात्कारः.—(Blow) आघातः, प्रहारः, समाघातः.

Brush, *s.* आघर्षणी, निर्घर्षणकः, मार्जनी, शूकरलोममयी मार्जनी, शोधनी विमार्गः, कूर्चः, कूर्चकं.—(Painter's brush) ईषिका, तूलिका वर्त्तिका, लेख्यतूलिका.—(Tail of a fox) लोमशलाङ्गूलः —(A rude encounter) सङ्घट्टः, समाघातः, बलात्कारः.

To **brush**, *v. a.* (To rub or clean with a brush) मृज् (c. 2. मार्ष्टि, मार्ष्टुं, c. 1. मार्जति, मार्जितुं), अपमृज्, प्रमृज्, परिमृज्, अवमृज् सम्मृज्, आमृष् (c. 1. -मर्षति -मर्षितुं), आघर्षणीद्वारेण शुध् in caus. (शोधयति -यितुं), प्रक्षल् (c. 10. -क्षालयति -यितुं).—(To strike lightly) घृष् लघु or लाघवेन तड् (c. 10. ताडयति -यितुं).

To **brush**, *v. n.* (To brush by, pass hastily by) लघुगत्या अतिक्रम्य परवक्षं घृष् (c. 1. -घर्षति -घर्षितुं).—(To brush off, hasten off) अपधाव् (c. 1. -धावति -धावितुं).—(To skim lightly, glide) विसृप् (c. 1. सर्पति -सर्प्तुं -स्रप्तुं).

Brushed, *p. p.* आघर्षितः -ता -तं, मार्जितः -ता -तं, आघट्टितः -ता -तं.

Brusher, *s.* मार्जनकृत्, आघर्षणकृत्, प्रक्षालकः, मार्जनीद्वारा शोधनकृत्

Brush-maker, *s.* मार्जनीकारः, आघर्षणीकारः.

Brushwood, *s.* झुण्डः, गुल्मः, झाटः -टं, कुटजः, प्रस्तारः, इन्धनं.

Brushy, *a.* लोमशः -शा -शं, दृढलोमा -मा -म (न्), स्तब्धरोमा -मा -म (न्)

Brutal, *a.* (Like a brute) श्वापदः -दी -दं, पशुशीलः -ला -लं पशुव्यवहारः -रा -रं, पशुसदृशः -शी -शं, अमानुषः -षी -षं.—(Cruel) निर्दयः -या -यं, क्रूरः -रा -रं, क्रूराचारः -रा -रं, निष्ठुरः -रा -रं.

Brutality, *s.* पशुत्वं -ता, तिर्य्यक्त्वं, पशुशीलता, अमनुष्यता, क्रूराचारता

To **brutalize**, *v. a.* पशूकृ, पशुशीलं -लां -लं कृ, श्वापदीकृ.

Brutally, *adv.* पशुवत्, पशुरूपेण, पशुव्यवहारानुसारेण, जातिक्रौर्येण, निर्दयं.

Brute, *s.* पशुः *m.*, जन्तुः *m.*, तिर्य्यक् (ञ्च्) प्राणी *m.* (न्).—(A savage) पुरुषपशुः *m.*, दुराचारः, दुर्वृत्तः, क्रूराचारः, असभ्यजनः.

Brute, *a.* (Irrational) अज्ञानी -निनी -नि (न्), अप्राज्ञः -ज्ञा -ज्ञं.—(Savage) क्रूरकर्म्मशाली -लिनी -लि (न्), असभ्यः -भ्या -भ्यं.—(Senseless) विचेतनः -ना -नं, विमूढात्मा -त्मा -त्म (न्).—(Bestial) शौवापदः -दी -दं, पाशवः -वी -वं.

Brutish, *a.* पशुसदृशः -शी -शं, जडः -डा -डं, मूढः -ढा -ढं. *See* Brutal.

Brutishly, *adv.* पशुवत्, जडवत्, मूढवत्. *See* Brutally.

Brutishness, *s.* पशुत्वं, जडता, मूढता, क्रौर्य्यं, दुराचारता, नैष्ठुर्य्यं.

Bryony, *s.* तुण्डिकेरी, रक्तफला, बिम्बिका, पीलुपर्णी.

Bubble, *s.* बुद्बुदः, जलबुद्बुदः, डिम्बिका, स्थासकः, गण्डः, फेनाग्रं.—(Any thing unreal, a trifle) अवस्तु *n.*, असारवस्तु *n.*, स्वल्पविषयः.—(A cheat) वञ्चकः, कपटी *m.* (न्).

To bubble, *v. n.* बुद्बुद (nom. बुद्बुदायते -यितुं), फेन (nom. फेनायते -यितुं), उत्सेचनं कृ.

To bubble, *v. a.* (To cheat) वञ्च् in caus. (वञ्चयते -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

Bubby, *s.* स्तनः, स्तनकुड्मलं, कुचः, वक्षोजं, उरसिजः.

Bubo, *s.* वृध्नः, उपदंशः, स्फोटः, विस्फोटः.

Buccanier or buccaneer, *s.* आमेरिकादेशीयः समुद्रयायी दस्युविशेषः.

Buck, *s.* (Male of the deer) पुम्मृगः; 'male of the rabbit,' पुंशशकः; 'male of the goat,' पुंश्छागः. (Liquor in which clothes are washed) वस्त्रधावनार्थं जलं.—(Clothes washed in that liquor) पूर्व्वोक्तजलधावितं वस्त्रं.—(A fop) दर्शनीयमानी *m.* (न्), सुवेशी *m.* (न्), रूपगर्व्वितः.

To buck, *v. a.* (To wash clothes) वस्त्राणि धाव् (c. 1. धावति, धावितुं) or प्रक्षल् (c. 10. -क्षालयति -यितुं).

Buck-basket, *s.* तरिः *f.*, पेटः, पेटकः, पेडा, पिटकः.

Bucket, *s.* सेक्तृं, पात्रं, द्रोणी, सेकपात्रं, सेचनं -नी.—(Bucket of a well) नीरोत्तोलनपात्रं, उद्घाटनं, घटीयन्त्रं.

Buckle, *s.* द्रव्यद्वयसंलग्नीकरणार्थं कीलयुक्तं धातुमयचक्रं, वस्त्राञ्चलपादुकाबन्धनादिसङ्ग्रहणार्थं मध्यस्थकीलविशिष्टं कुडुपविशेषः, उपानद्बन्धनकुडुपः, कुडुपः, निदर्शनमुद्रा. (A curl, crisp) अलकः, कर्कारालः.

To buckle, *v. a.* पूर्व्वोक्तकुडुपद्वारेण बन्ध् (c. 9. बध्नाति, बन्धुं) or संलग्नीकृ.

To buckle to, *v. n.* (To a business) आस्था (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा, सेव् (c. 1. सेवते, सेवितुं) परायणः -णा -णं or आसक्तः -क्ता -क्तं भू. (To engage in close fight) नियुद्धं कृ, बाहुयुद्धं कृ.

Buckler, *s.* चर्म्म *n.* (न्), फलकः -कं.—(Armed with) फलकपाणिः, फलकी *m.* (न्).

Buckram, *s.* दृढवस्त्रविशेषः, स्तब्धक्षौमपटविशेषः, स्तब्धीकृतवस्त्रं, स्थूलपट्टं, स्थूलशाटिः *m.* पटी.—(Stiff, formal) कठिनः -ना -नं, दृढः -ढा -ढं.

Buckskin, *a.* मृगाजिनमयः -यी -यं, मृगचर्म्मनिर्म्मितः -ता -तं.

Buckthorn, *s.* रेचकफलदायी वृक्षप्रभेदः.

Buckwheat, *s.* शस्यजातीय ओषधिप्रभेदः.

Bucolics, *s. pl.* गोरक्षणादिविषयं गीतं, पशुपालनादिविषयकं काव्यं.

Bud, *s.* मुकुलः -लं, कुड्मलः -लं, कुड्मलः, जालकं, क्षारकः, कलिका, प्ररोहः, अङ्कुरः, पल्लवः -वं, कोषः, कोरकः -कं, मुकुलोद्गमः.

To bud, *v. n.* स्फुट् (c. 6. स्फुटति, स्फुटितुं), फुल्ल् (c. 1. फुल्लति, फुल्लितुं), विकस् (c. 1. कसति -कसितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).

Budded, *p. p.* स्फुटितः -ता -तं, विकसितः -ता -तं, व्याकोशः -शा -शं,

कुड्मलितः -ता -तं, अङ्कुरितः -ता -तं, प्रस्फुटः -टा -टं, फुल्लवान् -वती -वत् (त्).

Budding, *a.* उद्भिज्जः -ज्जा -ज्जं, प्ररोही -हिणी -हि (न्), फुल्लवान् -वती -वत् (त्).

Buddha, *s.* (The name applied to the ninth incarnation of Vishńu, and to the founder of the Buddhist religion) बुद्धः, शाक्यमुनिः *m.*, शाक्यसिंहः, गौतमः, मुनिः *m.*, मुनीन्द्रः, शास्ता *m.* (स्तृ), श्रीघनः, सर्व्वार्थसिद्धः, शौद्धोदनिः *m.*, अर्कबन्धुः *m.*, मायादेवीसुतः.

To budge, *v. n.* चल् (c. 1. चलति, चलितुं), प्रचल्; अपसृ (c. 1. -सरति -सर्त्तुं).

Budget, *s.* (Bag) शाणपुटः, पुटः, कोषः, दृतिः *f.*, आधारः, स्यूतः.—(Stock, store) कोषः, सामग्र्यं, सङ्ग्रहः, सञ्चयः.—(The statement made by the chancellor of the exchequer) कोशाधीशेन प्रजाप्रतिनिधिसभायाम् आगामिसंवत्सरं प्रति आयव्ययोर् ज्ञापनपत्रं.

Buff, *s.* (Leather made of the skin of the buffalo) महिषचर्म्म *n.* (न्), महिषाजिनं.—(A light yellow colour) ईषत्पीतः, पाण्डुवर्णः.

Buffalo, *s.* महिषः -षी *f.*, कासरः, गवलः, लुलापः, वाहद्विषन् *m.* (त्), सैरिभः.

Buffet, *s.* (A blow) मुष्ट्याघातः, मुष्टिघातः, कराघातः, पाण्याघातः, बाहुप्रहरणं, चपेटाघातः, चपेटिका.—(A cupboard) कुशूलः, कोष्ठः.

To buffet, *v. a.* मुष्टिना or पाणिना or चपेटेन हन् (c. 2. हन्ति, हन्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं) or तड् (c. 10. ताडयति -यितुं).

Buffeter, *s.* प्रहर्त्ता *m.* (र्त्तृ), पाण्याघातः, बाहुप्रहरणः, कराघातकृत्.

Buffoon, *s.* भण्डः, वैहासिकः, विदूषकः, परिहासवेदी *m.* (न्), नर्म्मसचिवः.

Buffoonery, *s.* भाण्डं, वैहासिककर्म्म *n.* (न्), विहासः, हास्यं, परिहासः, नर्म्म *n.* (न्).

Bug, *s.* मत्कुणः, उद्दंशः, उत्कुणः, कोलकः, उद्दंशः, किटिभः, तल्पकीटः

Bugbear, *s.* भयानकं or सन्त्रासजनकं यत्किञ्चित्, भयहेतु *n.*, त्रासदायी -यिनी -यि (न्), त्रासकरः -री -रं.

Buggy, *a.* (Full of bugs) मत्कुणपूर्णः -र्णा -र्णं, समत्कुणः -णा -णं.

Bugle, *s.* शृङ्गः -ङ्गं, मृगव्यशृङ्गः, व्याधवादितं शृङ्गं or विषाणं.

Bugloss, *s.* खिलरुह ओषधिप्रभेदः, गोजिह्वा.

To build, *v. a.* निर्म्मा (c. 2. -माति -मातुं or in caus. -मापयति -यितुं or c. 4. -मीयते), निचि (c. 5. -चिनोति -चेतुं), कृ in caus. (कारयति -यितुं); 'to build castles in the air,' गगनकुसुमानि कृ.

To build upon, *v. a.* (To rely upon) अवलम्ब् (c. 1. -लम्बते -लम्बितुं), समालम्ब्, संश्रि (c. 1. -श्रयति -ते -श्रयितुं), समाश्रि, उपाश्रि.

Builder, *s.* निर्म्माता *m.* (तृ), निर्म्माणकर्त्ता *m.* (र्त्तृ), कारकः, निचेता *m.* (तृ), विधायकः.—(Of houses) स्थपतिः *m.* गृहकारकः, गृहकारी *m.* (न्).

Building, *s.* (The act of building) निर्म्माणं, निर्म्मापणं, निचयनं, गृहकरणं.—(The fabric built) प्रासादः, गृहं, भवनं, हर्म्म्यं.

Built, *p. p.* निर्म्मितः -ता -तं, कारितः -ता -तं, निचितः -ता -तं.

Bulb, *s.* कन्दः -न्दं, गोलमूलं, स्थूलकन्दः, वृहत्कन्दः.

Bulbous, *a.* कन्दी -न्दिनी -न्दि (न्), गोलमूलविशिष्टः -ष्टा -ष्टं, कन्दाकृतिः -तिः -ति.

To bulge, *v. n.* (To founder) दारुस्फोटनात् पोतपार्श्वे जलं गृहीत्वा मज्ज् (c. 6. मज्जति, मङ्क्तुं).—(To bag down, jut out) पुटरूपेण लम्ब् (c. 1. लम्बते लम्बितुं), बहिर्लम्ब्.

Bulk, *s.* (Bigness) स्थूलता, स्थौल्यं, वृहत्त्वं, परिणाहः, स्थूलाकारता.—(The greatest part of a thing) प्रधानभागः, अधिकभागः, बहुतरभागः.—(Part of a building jutting out) बहिर्लम्बो हर्म्म्यभागः.

Bulkhead, *s.* नौकाभ्यन्तरे पार्श्वात्पार्श्वं स्थापिता काष्ठमयी भित्तिः.

Bulkiness, *s.* स्थूलता, वृहत्त्वं, स्थूलकायता. *See* Bulk.

Bulky, *a.* स्थूलः -ला -लं, वृहन् -हती -हत् (त्), महाकायः -या -यं, महाङ्गः -ङ्गी -ङ्गं, स्थूलकायः -यी -यं, वृहदङ्गः -ङ्गी -ङ्गं, स्थूलाकारः -रा -रं.

Bull, *s.* वृषभः, वृषः, पुङ्गवः, ऋषभः, गौः *m.* (गो), बलीवर्दः, उक्षा *m.* (न्), सौरभेयः, गोनाथः, अनुड्वान् (ह्), अनड्वान् *m.* (-डुह्), भद्रः; 'a cow which is fit for the bull,' काल्या, उपसर्या; 'one which has gone to the bull,' वृषभेण आक्रान्ता, सन्धिनी; 'one which is bulling,' सन्धिनी, वृषस्यन्ती.—(A letter published by the pope) महाधर्म्माध्यक्षेण प्रकाशितम् आज्ञापत्रं.—(A blunder) स्खलितं, प्रमादः, वाग्दोषः.

Bullace, *s.* अम्लरसविशिष्टः फलप्रभेदः.

Bull-baiting, *s.* कुक्कुरवृषभयोर् युद्धं यत्र मनुष्याः क्रीडार्थं वृषभम् आक्रमितुं कुक्कुरान् प्रचोदयन्ति.

Bull-dog, *s.* वृषभाक्रमणाय शिक्षितो ऽतिशयक्रूरस्वभावो बृहन्मुखः कुक्कुरभेदः.

Bullet, *s.* अधुनातनयोद्धृभिः सेविता सीसकगुलिका या ऽग्निबलेन नाडिच्छिद्राद् अतिदूरे निःसार्य्यते, दूरवेधिनी गुलिका, सीसकगुलिका.

Bulletin, *s.* राजाज्ञया प्रचारितं समाचारपत्रं, राजकीयचिकित्सकैः प्रकाशितं रोगार्त्तमहीपतेः शरीरस्थितिज्ञापनपत्रं.

Bull-finch, *s.* वागनुकरणशीलः क्षुद्रपक्षिभेदः.

Bull-head, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, दुर्बुद्धिः *m.*, मूढः, मूर्खः, जडः.

Bullion, *s.* हिरण्यं, रूप्यं, अमुद्रितं सुवर्णं रूप्यं वा, कोशः.

Bullition, *s.* (The act or state of boiling) क्वथनं, क्वाथः, उत्क्षेपणं.

Bullock, *s.* जातोक्षः, वृषभः, वृषः, पुङ्गवः, अभिनववयस्को वृषभः.

Bull's eye, *s.* (A kind of window) गवाक्षः.

Bully, *s.* (A blustering coward) शूरम्मन्यः, दम्भी *m.* (न्), दाम्भिकः, कुम्भः, षिङ्गः, पिण्डीशूरः, भर्त्सनकारी *m.* (न्), तर्जनकृत्, कलहकारः.

To **bully**, *v. a.* भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), तर्ज् (c. 1. तर्जति, तर्जितुं), तिरस्कृ, मुखरीकृ.

Bulrush, *s.* पर्व्वहीनो दूर्व्वाप्रभेदः, नलः, शरः.

Bulwark, *s.* वप्रः, प्राकारः, प्राचीरं, दुर्गं, परिकूटं.—(Shelter, protection) आश्रयः, संश्रयः, शरणं, आलम्बः, उपस्तम्भः.

Bum, *s.* नितम्बः, स्फिची *f. du.*, कटिप्रोथः.

Bumbailiff, *s.* ग्राहकः, आसेद्धा *m.* (द्धृ), आसेधकर्त्ता *m.* (र्त्तृ), राजपुरुषः.

Bumbard, *s.* *See* **Bomb**, **bombard**.

Bumble-bee, *s.* वनमोदी *m.* (न्).

Bump, *s.* (A swelling) स्फोटः, विस्फोटः, श्वयथुः *m.*, शोफः, शोथः, गण्डः, गण्डिका, आभोगः.

To **bump**, *v. a.* (To strike) तड् (c. 10. ताडयति -यितुं), तुद् (c. 6. तुदति, तोत्तुं), हन् (c. 2. हन्ति, हन्तुं), प्रहृ (c. 1. -हरति -हर्त्तुं).

To **bump**, *v. n.* (To swell) श्वि (c. 1. श्वयति, श्वयितुं).—(To make a noise) आस्फोटनं कृ.

Bumper, *s.* आकर्णं or धारपर्य्यन्तं पूरितं पात्रं, अतिपूर्णं भाजनं.

Bumpkin, *s.* ग्राम्यजनः, ग्रामिकः, ग्रामवासी *m.* (न्), वृषलः, जानपदः, प्राकृतजनः.

Bunch, *s.* (A hard lump) पिण्डः -ण्डं, गण्डः, गण्डिका.—(A cluster) गुच्छः, गुच्छकः, स्तवकः; 'a bunch of grapes,' द्राक्षास्तवकः.—(A number of things tied together) कूर्चः, पोट्टली.—(A knot, a tuft) ग्रन्थिः *m.*, चूडा, शेखरः.

To **bunch out**, *v. n.* पिण्डीभू, पिण्डाकारः -रा -रं अस्, प्रलम्ब् (c. 1. -लम्बते -लम्बितुं).

Bunchy, *a.* पिण्डाकारः -रा -रं, स्तवकमयः -यी -यं, गुच्छाकारः -रा -रं.

Bundle, *s.* कूर्चः, कूर्चं, भारः, कृतकूर्चः, गुच्छः, गुच्छकः, पोटलिका, पोट्टली, वीटिका; 'a bundle of goods,' भाण्डकं; 'bundle off,' [illegible] कूर्चीकृ.

To **bundle up**, *v. a.* कूर्चं कृ, कूर्चीकृ, गुच्छीकृ, पोटलिकां कृ.

Bundled up, *p. p.* कृतकूर्चकः -का -कं, कृतपोटलिकः -का -कं, कृतगुच्छः -च्छा -च्छं.

Bung, *s.* पात्रमध्ये छिद्रप्रतिबन्धकं तरलवस्तुनिर्गमप्रतिबन्धकं द्रव्यं, मद्यसुराभाजने छिद्रापरोधनार्थं काष्ठखण्डं, भाण्डछिद्रस्तम्भनकाष्ठं, पात्रछिद्रपिधानं.

To **bung**, *v. n.* छिद्रं or रन्ध्रं or द्वारं पिधा (c. 3. -दधाति -धातुं) or प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं) or स्तम्भ् in caus. (स्तम्भयति -यितुं).

Bung-hole, *s.* पात्रछिद्रं, पात्ररन्ध्रं, पात्रधारा, भाण्डसुषिरं, मद्यसुराभाजनछिद्रं.

To **bungle**, *v. n.* प्रमादतस् or अदक्षप्रकारेण or अनाप्तं किञ्चित् कार्य्यं निर्व्वह् in caus. (-वाहयति -यितुं), प्रमद् (c. 4. -माद्यति -मदितुं), स्खल् (c. 1. स्खलति, स्खलितुं), भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), दोषं कृ.

Bungle, *s.* प्रमादः, दोषः, भ्रमः, दुर्णयः, छिद्रं, स्खलनं, स्खलितं.

Bungled, *p. p.* दुर्णीतः -ता -तं, दुश्चेष्टितः -ता -तं, दूषितः -ता -तं.

Bungler, *s.* अकृती *m.* (न्), अनाप्तः, अनिपुणः, अदक्षः, अपटुः *m.*, प्रमादी *m.* (न्), स्खलन्मतिः *m.*

Bunglingly, *adv.* प्रमादतस्, प्रमादेन, अनाप्तं, अदक्षतया, सदोषं, स्खलनेन

Bunn, *s.* मिष्टापूपः, पिष्टकः, पिण्डः, गोधूमचूर्णमिष्टान्नादिनिर्म्मितः पिष्टकः.

Bunt, *s.* पुटः, पुटकं, क्रमशो विस्तीर्य्यमाणं रन्ध्रं, क्रमशो विवरः.

Bunter, *s.* कुत्सितकर्म्मजीविनी, वृषली, बन्धकी, दुष्टा.

Bunting, *s.* पताकानिर्म्माणयोग्यो or ध्वजवसनकरणयोग्यो विरलपटविशेषः, ध्वजपटः, केतुवसनः.

Buoy, *s.* समुद्रगामिनां पथदर्शनार्थं or प्रच्छन्नसैकतशिलादिभयस्थानसूचनार्थं जलोपरि प्लवमानं काष्ठखण्डं.—(For mooring vessels) कूपकः.

To **buoy up**, *v. a.* (To keep afloat) उन्मज्ज् in caus. (-मज्जयति -यितुं), प्लु in caus. (प्लावयति -यितुं), उत्पत् in caus. (-पातयति -यितुं).—(To bear up, support) भृ in caus. (धारयति -यितुं), अवष्टभ्, अभिधृ, स्तम्भ् in caus. (स्तम्भयति -यितुं), उपस्तम्भ्, संस्तम्भ्, आलम्ब् (c. 1. -लम्बते -लम्बितुं).

Buoyancy, *s.* प्लवनशीलता, उत्पतिष्णुता, लघुता, लाघवं, लघिमा *m.* (न्).

Buoyant, *a.* प्लवनशीलः -ला -लं, तरणशीलः -ला -लं, लघुः -घुः -घु, उत्पतिष्णुः -ष्णुः -ष्णु.

Bur, *s.* अङ्कुशाकारलोमविशिष्टो वस्त्रानुबन्धनशीलो वनस्पतिः क्षुद्रगुल्मसम्बन्धी दलपिण्डः.

Burden, *s.* भारः, धुरा, धूः (धुर्) *f.*—(Something grievous) पीडाकरः -रा -रं; 'burden-bearing,' भारवाहनः -ना -नं, धुरन्धरः -रा -रं, भारसहः -हा -हं, धुर्व्वहः -हा -हं, भारहरः -रा -रं.—(Beast of burden) भारवाहनः, धुरीणः, धुरीयः, धुर्य्यः, धौरेयः -यी -यं.—(Of a song) ध्रुवका, कथितपदं, आवर्त्तनीयश्लोकः, परिवर्त्तकश्लोकः.

To **burden**, *v. a.* भारं न्यस् (c. 4. -अस्यति -असितुं) with loc. c. or दा (c. 3. ददाति, दातुं); 'to lay a burden on the shoulder,' भारं स्कन्धे न्यस् or निविश् in caus. (-वेशयति -यितुं) or समृ in caus. (-अर्पयति -यितुं).

Burdened, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), धुरीणः -णा -णं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, भारयुक्तः -क्ता -क्तं.

Burdensome, *a.* (Troublesome to be borne) दुर्भरः -रा -रं, दुःसहः -हा -हं, दुर्व्वहः -हा -हं, दुरुद्वहः -हा -हं.—(Grievous, oppressive) पीडाकरः -रा -रं, कष्टकरः -रा -रं, दुःखी -खिनी -खि (न्).

Burdock, *s.* पूर्व्वोक्तदलपिण्डविशिष्टः क्षुद्रगुल्मप्रभेदः.

Bureau, *s.* (A chest, receptacle) आगारं, आधारः, निधानं, गोपनस्थानं, भाण्डागारं.—(An office for writing, &c.) लेखस्थानं, ग्रन्थकुटी.

Burg or burgh, *s.* महासभायां प्रतिनिधिप्रेरणाधिकारयुक्ता नगरी, कर्व्वटः -टं, नगरं -री, पुरं -री.

Burgess, *s.* (A citizen) पौरजनः, नगरजनः, पौरः, नगरस्थः.—(A representative of a city) नगरप्रतिनिधिः *m.*, नगरप्रतिभूः *m.*, नगरजनप्रतिनिधिः *m.*, प्रजाप्रतिनिधिः *m.*

Burgher, *s.* नगरजनाधिकारभोगी *m.* (न्), प्रधाननगरजनः, मुख्यपौरजनः, नगरसभासद् *m.*

Burghership, *s.* नगरजनाधिकारः, नगरजनपदं, नगरसभासदधिकारः.

Burglar, *s.* भित्तिचौरः, कुड्यच्छेदी *m.* (न्), कपाटघ्नः, गृहभङ्गकृत्, गृहरन्ध्रकृत्, सन्धिचौरः, कारुचौरः, सन्धिचौरः, बन्दीकारः, बन्दिग्राहः, खानिलः, कुम्भिलः, सुरुङ्गाहिः *m.*, सुरुङ्गाकृत्.

Burglary, *s.* गृहभङ्गः, गृहभङ्गापराधः, कुड्यच्छेदः, भित्तिचौर्य्यं.

Burgomaster, *s.* नगराधिष्ठाता *m.* (तृ), नगराध्यक्षः, पुराध्यक्षः, प्रधाननगरजनः, मुख्यपौरजनः, नगरव्यवहारेषु नियुक्तः, नगराधिपतिः, पुराधिकारी *m.* (न्).

Burial, *s.* भूमिखननं, निखननं, भूमौ निखननं, श्मशाने स्थापनं, श्मशाननयापनं, भूमिसमर्पणं, प्रेतनिर्हारः.—(Funeral rites) प्रेतकर्म्म *n.* (न्), प्रेतकार्य्यं, मृतकसत्कर्म्म *n.* (न्), सत्क्रिया.

Burial-ground, *s.* श्मशानं, प्रेतवनं, पितृवनं, प्रेतगृहं, मृतशरीरस्थानं.

Buried, *p. p.* निखातः -ता -तं, भूमिनिखातः -ता -तं, श्मशानशायी -यिनी -यि (न्), श्मशानस्थापितः -ता -तं, श्मशानसमर्पितः -ता -तं.

Burier, *s.* प्रेतनिर्हारकः, प्रेतहारः, मृतपाः *m.*, शववाहकः.

Burine, *s.* तक्षणयन्त्रं, तक्षणी, टङ्कः, वेधनः, शैलभित् *f.*

To burl, *v. a.* लोहसन्दंशद्वारा or छुरीद्वारा निष्पाषाणपटं श्लक्ष्णीकृ.

Burlesque, *a.* परिहासकरः -रा -रं, हास्यः -स्या -स्यं, हास्यजनकः -का -कं, प्रहासी -सिनी -सि (न्), अपहास्यः -स्या -स्यं, हासोत्पादकः -का -कं, नर्म्मदः -दा -दं.

Burlesque, *s.* भाण्डं, परिहासः, परीहासः, प्रहासः, प्रहसितं, उपहासः, अपहासः, नर्म्म *n.* (न्), ठट्ठरी, परिहासवाक्यं, उत्प्रासनं.

To burlesque, *v. a.* अपहस् (c. 1. -हसति -हसितुं), अपहस्, प्रहस्, उपहस्, उपहासास्पदं कृ.

Burliness, *s.* स्थूलता, स्थौल्यं, बृहत्त्वं, स्थूलशरीरता, बृहदङ्गत्वं.

Burly, *a.* स्थूलः -ला -लं, स्थूलशरीरः -रा -रं, बृहत्कायः -यी -यं, महाङ्गः -ङ्गी -ङ्गं, बृहदङ्गः -ङ्गी -ङ्गं.

Burn, *s.* अग्निकृतं क्षतं, अग्निक्षतं, सन्तापः, संज्वरः, दाहः, अग्निदाहः.

To burn, *v. a.* दह् (c. 1. दहति, दग्धुं), अनुदह्, आदह्, निदह्, निर्दह्, परिदह्, प्रदह्, सम्प्रदह्; तप् (c. 1. तपति, तप्तुं) or in caus. (तापयति -यितुं), सन्तप् in caus., उष् (c. 1. ओषति, ओषितुं), दीप् in caus. (दीपयति -यितुं), आदीप्, उद्दीप्, उपदीप्, प्रदीप्, सन्दीप्; सन्धुक्ष् in caus. (-धुक्षयति -यितुं); ज्वल् in caus. (ज्वालयति -यितुं), प्रज्वल्, प्लुष् (c. 1. प्लोषति, प्लोषितुं).

To burn, *v. n.* दह् (c. 4. दह्यति, दग्धुं or in pass. दह्यते), सम्परिदह्, दीप् (c. 4. दीप्यते, दीपितुं), आदीप्, प्रदीप्, सम्प्रदीप्, विदीप्, सन्दीप्, तप् in pass. (तप्यते or c. 1. तपति, तप्तुं), प्रतप्, ज्वल् (c. 1. ज्वलति, ज्वलितुं), प्रज्वल्, सन्धुक्ष् (c. 1. -धुक्षते -धुक्षितुं); 'to be inflamed with passion, &c.,' दह् in pass. (दह्यते); 'with anger,' कोपदीप्तः -प्ता -प्तं भू; 'to burn after,' उत्कण्ठ् (c. 1. -कण्ठते -कण्ठितुं), अभिकाङ्क्ष् (c. 1. -काङ्क्षति -काङ्क्षितुं).

Burnable, *a.* दहनीयः -या -यं, दाह्यः -ह्या -ह्यं, दग्धव्यः -व्या -व्यं, ज्वलनीयः -या -यं, दीपनीयः -या -यं, तपनीयः -या -यं.

Burner, *s.* दाहकः, दग्धा *m.* (ग्धृ), दाहनकृत्, अग्निदः, तापकः, दीपकः.

Burnet, *s.* अनुपमेयबहुः कुसुमगुल्मभेदः.

Burning, *s.* दाहः, दाहनं, ज्वलनं, दीपनं, तापः, ओषः, प्लोषः.

Burning, *a.* दाहकः -का -कं, तापकः -का -कं, दीपनः -ना -नं, नैदाघः -घी -घं, ज्वाली -लिनी -लि (न्).—(That is on fire) दह्यमानः -ना -नं, दहन् -हन्ती -हत् (त्), ज्वलन् -लन्ती -लत् (त्), दाहवान् -वती -वत् (त्).—(Vehement) तैक्ष्णः -क्ष्णी -क्ष्णं, चण्डः -ण्डा -ण्डं.

Burning-glass, *s.* सूर्य्यतेजःसंपर्द्धनार्थं तदंशुसङ्ग्रहणयोग्य काचपत्रं, दीप्तोपलः, अर्काश्मा *m.* (न्).

To burnish, *v. a.* तिज् in caus. (तेजयति -यितुं), निशस् in caus. (निशापयति -यितुं), कान्तिं दा (c. 3. ददाति, दातुं), परिष्कृ, निशो (c. 4 -श्यति -शातुं).

Burnished, *part.* तेजितः -ता -तं, तैजसः -सी -सं, सुनिशः -शा -शं, निर्धौतः -ता -तं, प्रमृष्टः -ष्टा -ष्टं, निशातः -ता -तं, निशितः -ता -तं, परिष्कृतः -ता -तं.

Burnisher, *s.* तेजकः, धावकः, मार्ज्जनकृत्, कान्तिदायकः.

Burnishing, *s.* तेजनं, मार्ज्जनं, परिष्कारः, धावनं.

Burnt, *a.* and *part.* दग्धः -ग्धा -ग्धं, अग्निदग्धः -ग्धा -ग्धं, प्लुष्टः -ष्टा -ष्टं, विप्लुष्टः -ष्टा -ष्टं, प्लुष्टः -ष्टा -ष्टं, ज्वलितः -ता -तं, तप्तः -प्ता -प्तं, क्षामः -मा -मं, उषितः -ता -तं; 'burnt up,' क्षामः -मा -मं; 'burnt as a sacrifice,' वषट्कृतः -ता -तं; 'burnt brick,' पक्वेष्टका.

Burnt-offering, *s.* होमः, वषट्कारः, वैतानिकं, वैतानं.

Burr, *s.* (Lobe of the ear) कर्णलतिका, पालिका, कर्णपालिका.

Burrow, *s.* (Hole) गर्त्तः, विवरं, बिलं, खातं, श्वभ्रं.

To burrow, *v. n.* गर्त्ते or विवरं कृ, गर्त्ते वस् (c. 1. वसति, वस्तुं).

Burrowing, *a.* बिलवासी -सिनी -सि (न्), गर्त्तवासी -सिनी -सि (न्).

Bursar, *s.* विद्यालये धनाधिकारी *m.* (न्), धनाध्यक्षः, कोषाध्यक्षः.

Bursarship, *s.* अर्थाधिकारः, धनाधिकारः, धनाध्यक्षाधिकारः, कोषाध्यक्षपदं.

Bursary, *s.* विद्यालये धनगृहं, धनागारः, कोषः, धनकोष्ठकं.

Burse, *s.* वणिक्समागमचत्वरं, श्रेष्ठिचत्वरं, पण्यशाला, निगमस्थानं.

To burst, *v. a.* भिद् (c. 7. भिनत्ति, भेत्तुं or caus. भेदयति -यितुं), विभिद्, निर्भिद्, भञ्ज् (c. 7. भनक्ति, भंक्तुं), प्रभञ्ज्, विभञ्ज्, खण्ड् (c. 10. खण्डयति -यितुं), स्फुट् (c. 10. स्फोटयति -यितुं), दॄ in caus. (दारयति -यितुं), विदॄ, अवदॄ, शकलीकृ, खण्डशः कृ, विदल् in caus. (-दलयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), अवलुप्.

To burst, *v. n.* भिद् in pass. (भिद्यते), विभिद्, निर्भिद्; भञ्ज् in pass. (भज्यते), प्रभञ्ज्, विभञ्ज्, स्फुट् (c. 6. स्फुटति, स्फुटितुं, c. 1. स्फोटते, स्फोटितुं), दॄ in pass. (-दीर्य्यते), अवदॄ, विदल् (c. 1. -दलति -दलितुं), विशॄ in pass. (-शीर्य्यते), परिशॄ.—(To burst in pieces) शकलीभू, खण्डशो भिद् in pass. or भञ्ज् in pass.—(To burst forth, break out) प्रसृ (c. 1. -सरति -सर्तुं).—(As seeds) प्ररुह्.

Burst, *s.* (Sudden rending) स्फोटनं, स्फुटनं, अकस्मात् भङ्गः, भङ्गः, विभङ्गः, भेदनं, भेदः.—(Of laughter) प्रहसनं, प्रहसितं, अतिहसितं, अट्टहासः.—(Of light) ज्वाला.

Burst, *p. p.* स्फुटः -टा -टं, स्फुटितः -ता -तं, रफुटितः -ता -तं, रुग्णः -ग्णा -ग्णं, विघटितः -ता -तं, विदलितः -ता -तं, भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं.—(Diseased with hernia) अन्त्रवृद्धिपीडितः -ता -तं.

Burthen, *s.* भारः, धुरः. *See* Burden.

To bury, *v. a.* श्मशाने or भूमौ स्था in caus. (स्थापयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or निखन् (c. 1. -खनति -खनितुं or -खातुं), निर्हृ (c. 1. -हरति -ते -हर्तुं).

Burying, *s.* भूमिखननं, निखननं, श्मशाने स्थापनं, भूमिसमर्पणं, प्रेतनिर्हारः.

Burying-ground, s. श्मशानं, प्रेतवनं, प्रेतगृहं, पितृवनं, मृतकादिस्थानं.

Bush, s. गुल्मः, क्षुपः, स्तम्बः, कुपः, गुच्छः, विटः m.—(A bough of a tree fixed at the door of a tavern) अत्र सुरादि विक्रीयते इति बोधनार्थं द्वारोपरि स्थापिता तरुशाखा; सुराध्वजः.—(Tail of a fox) लोमशापुच्छं.

Bushel, s. (A measure) द्रोणः -णं, आढकः.

Bushy, a. (Full of bushes) गुल्मी -ल्मिनी -ल्मि (न्), तरुगुल्मावृतः -ता -तं.—(Thick) घनः -ना -नं, निबिडः -डा -डं, अविरलः -ला -लं.—(Formed like a bush) गुल्माकारः -रा -रं.

Busiless, s. कार्य्यरहितः -ता -तं, शून्यः -न्या -न्यं, निष्कर्म्मा -र्म्मा -र्म्म (न्).

Busily, adv. अनलसं, अतन्द्रितं, मनःप्रवेशेन, अभिनिवेशेन, औत्सुक्येन.—(Inquisitively) चर्च्चया.

Business, s. (Affair) कर्म्म n. (न्), कार्य्यं, अर्थः.—(Employment) व्यापारः, व्यवसायः, व्यवहारः, कार्य्योद्योगः, नियोगः, प्रवृत्तिः f., प्रवर्त्तनं, चरितं, सम्बन्धः.—(Something to be done) कृत्यं, कर्त्तव्यं, कार्य्यं.—(Object) विषयः, अर्थः, प्रयोजनं.—(A point, case) अर्थः, पदं.—(Means of livelihood, profession) वृत्तिः f., वर्त्तनं, जीविका, आजीवनार्थं.—(Point, matter of discussion) स्थलं; 'a man of business, one who knows the proper ways of acting,' क्रियाविधिज्ञः, कार्य्ये कुशलः, दृष्टकर्म्मा m. (न्); 'what business have I with that?' कोऽर्थो मे तेन.

Busk, s. चोलिकास्तब्धीकरणे स्त्रीभिः प्रयुक्तः शृङ्गलोहादिनिर्म्मितः फलकविशेषः.

Buskin, s. (A half-boot) अर्द्धजङ्घापरिमाणः पादुकाविशेषः, पनद्धा, अनुपदीना, उपानत् f. (ह्).—(A high-heeled shoe worn by ancient actors) उच्चपार्ष्णियुक्तो गौरवसूचकः पूर्व्वकालीननटैर् भृतः पादुकाविशेषः.

Buskined, p. p. पूर्व्वोक्तपादुकारूढः -ढा -ढं, सपादुकः -का -कं.

Buss, s. चुम्बनं, परिचुम्बनं, निंसनं.

To buss, v. a. चुम्ब् (c. 1. चुम्बति, चुम्बितुं), निंस् (c. 2. निंस्ते, निंसितुं).

Bust, s. मस्तकाद्यारभ्य वक्षःस्थलपर्य्यन्तम् अर्द्धशरीरप्रतिमा, अर्द्धकायप्रतिमा.

Bustard, s. चारटक्यपक्षिप्रभेदः.

To bustle, v. n. चेष्ट् (c. 1. चेष्टते, चेष्टितुं), आत्मानं चेष्ट् in caus. (चेष्टयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), कार्य्यव्यग्रत्वाद् इतस्ततो धाव् (c. 1. धावति, धावितुं).

Bustle, s. (Hurry, confusion) सम्भ्रमः, वैक्लव्यं, विभ्रमः, त्वरा, व्यग्रता, व्याकुलत्वं, आकुलता.—(Tumult) तुमुलं, कोलाहलः.

Bustler, s. व्यवसायी m. (न्), चेष्टाशीलः, सचेष्टः, तीक्ष्णकर्म्मा m. (न्).

Busy, a. व्यापारी -रिणी -रि (न्), व्यापृतः -ता -तं, व्यवसायी -यिनी -यि (न्), कर्म्मी -र्म्मिणी -र्म्मि (न्), कर्म्मोद्युक्तः -क्ता -क्तं, कार्य्योद्युक्तः -क्ता -क्तं, कार्य्याभिनिविष्टः -ष्टा -ष्टं, कर्म्मनिष्ठः -ष्ठा -ष्ठं, कार्य्यी -र्य्यिणी -र्य्यि (न्), कार्य्यवान् -वती -वत् (त्), सचेष्टः -ष्टा -ष्टं, प्रयत्नवान् -वती -वत् (त्), सोत्साहः -हा -हं, सोद्योगः -गा -गं, प्रवृत्तः -त्ता -त्तं, अतन्द्रितः -ता -तं, अनलसः -सा -सं, कार्य्यनिमग्नः -ग्ना -ग्नं.—(Meddling) परकार्य्यचर्च्चाशीलः -ला -लं.

To busy, v. a. (To employ) व्यापृ in caus. (व्यापारयति -यितुं), कार्य्ये नियुज् in caus. (-योजयति -यितुं, c. 7. -युनक्ति -योक्तुं) or अधिकृ.

Busybody, s. परकार्य्यचर्चकः, पराधिकारचर्चकः, छिद्रान्वेषी m. (न्).

But, conj. (As an adversative) किन्तु, तु, परन्तु, पुनर्, अथवा.—(Except) ऋते with abl., विना with acc. or inst., अन्यः with abl.; as, 'any one but the father,' पितुर् अन्यः.—(But for, without) व्यतिरेकेण, अन्तरेण, विना; as, 'but for sin every thing flourishes,' पापं विना सर्व्वं फलति.—(But yet, howbeit) तथापि.—(Only) केवलं, मात्रं.—(All but) अल्पोनः -ना -नं, ईषदूनः -ना -नं; 'next but one,' एकान्तरः -रा -रं.—(If it were not, unless) यदि न.—(Moreover) किञ्च, अपरञ्च, अधिकन्तु.—(On the other hand) पुनर्.—(Otherwise than) अन्यथा with abl. 'But' may often be omitted in Sanskrit, or expressed by another form of sentence; as, 'he will not gain his end but by doing that,' तद् अकृत्वा प्राप्तार्थो न भविष्यति; 'I do not doubt but I am to blame,' सापराधो ऽस्मि इति न संशयः; 'but a short time since,' न चिरात्; 'there is none but fears him,' सर्व्वे तस्माद् बिभ्यति; 'she does nothing but grieve,' सा निरन्तरं शोचति; "who but a child weeps," को रोदित्य् अबालिशः.

Butcher, s. (Seller of meat) मांसविक्रयी m. (न्), मांसिकः, शौनिकः, सौनिकः, शूनावान् m. (त्), सूनी m. (न्), पशुमारणपूर्व्वकं मांसविक्रयजीवी m. (न्), प्राणिहिंसापरः.—(Butcher's meat) सौनं, घातस्थानभवं मांसं.

To butcher, v. a. हन् (c. 2. हन्ति, हन्तुं), निहन्, or in caus. (घातयति -यितुं), मृ in caus. (मारयति -यितुं), वध् (defective, usually found in the 3d pret. अवधीत् and fut. वधिष्यति -ते), विशस् (c. 1. -शसति -शसितुं), निसूद् in caus. (-सूदयति -यितुं), अभिसूद्, विनिसूद्.

Butchery, s. वधः, हननं, निहननं, घातनं, निषूदनं, विशसनं.—(The place where animals are killed) शूना, सूना, वधस्थानं, वधस्थली, वध्यभूमिः f., घातस्थानं, पशुमारणस्थानं.

Butea, s. (A plant) किंशुकः, पलाशः, वातपोथः, पर्णः.

But-end, s. घनाग्रं, स्थूलाग्रं, अतीक्ष्णाग्रं.—(Hilt) त्सरुः m.

Butler, s. पानपात्रवाहकः, मद्यरक्षकः, मद्यागाराधिकृतः.

Butment, s. उभयतस् तोरणमूलावलम्बकः सेतुहर्म्यादिस्तम्भः.

Butt, s. (For shooting at) लक्षं, लक्ष्यं, शरव्यं, वेध्यं, व्यधः, प्रतिकायः, दृष्टिगुणः.—(Aim, end) अभिप्रायः, आशयः, उद्देशः, चिकीर्षितं.—(Object of jest) उपहासस्थानं, परिहासास्पदं, हास्यभूमिः f.—(A cask) पात्रं, भाण्डं, सुराभाजनं.

To butt, v. n. (To strike with the head like horned animals) शृङ्गिवत् or मेषादिवत् शिरसा आहन् (c. 2. -हन्ति -हन्तुं).

Butter, s. नवनीतं, क्षीरसारः, दधिजं, दधिसारः, किलाटः -टी, मन्थजं, नवोद्धृतं.—(Clarified butter or ghee) घृतं, हविः n. (स्), सर्पिः n. (स्), पुरोडाशः, आज्यं.—(Of yesterday's milk) हैयङ्गवीनं.

To butter, v. a. नवनीतेन लिप् (c. 6. लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं).

Butter-bump, s. क्रौञ्चजातीयः पक्षिभेदः, क्रौञ्चः, बकप्रभेदः.

Butter-cup, butter-flower, s. पीतपुष्पप्रभेदः स च वसन्तसमये यवसमध्ये प्ररोहति.

Buttered, p. p. नवनीताक्तः -क्ता -क्तं, घृताक्तः -क्ता -क्तं, घृताभ्यक्तः -क्ता -क्तं.

Butterfly, s. चित्रपतङ्गः, चित्राङ्गः पतङ्गभेदः, व्यापन्नपक्षः कीटभेदः, कीटोद्भवश् चित्रपतङ्गः, सपक्षः कीटः.

Butteris, s. (An instrument for paring the hoof of a horse) अश्वखुरतक्षणयोग्या कर्त्तरिका, तुरगशफकर्त्तनार्थं यन्त्रविशेषः.

Butter-knife, s. कुमालिका, घृतकुमालिका, नवनीतकर्त्तरिका.

Butter-man, s. नवनीतविक्रयी m. (न्), नवनीतविक्रयजीवी m. (न्), घृतविक्रेता m. (तृ).

Butter-milk, s. दण्डाहतं, तक्रं, प्रमथितं, अरिष्टं, कालशेयं, गोरसः, कट्वरं.

BUTTER-PRINT, s. नवनीताङ्कनयोग्या काष्ठमयी मुद्रा.

BUTTER-TEETH, s. मुखाग्रभागे वृहद्दन्तद्वयं, सम्मुखस्थौ छेदकदन्तौ.

BUTTERY, a. नवनीतगुणविशिष्टः -ष्टा -ष्टं, घृतमयः -यी -यं.

BUTTERY, s. (The room where provisions are laid up) खाद्यद्रव्यागारं, विद्यालये घृतनवनीतयवसुरादिकोष्ठकं, कुशूलः, अन्नकोष्ठकं.

BUTTOCK, s. स्फिचौ f. du. (स्फिच्), नितम्बः, कटिप्रोथः.

BUTTON, s. (Catch by which clothes are fastened) गण्डः, पुंसो वस्त्राञ्चलद्वयसङ्ग्रहणार्थं गुलिका.—(Bud) मुकुलं, कुड्मलं, पल्लवः.

To BUTTON, v. a. (To dress) संव्ये (c. 1. -व्ययति -व्यातुं), वेष्ट् (c. 1. वेष्टते, वेष्टितुं).—(To fasten with buttons) पूर्व्वोक्तगण्डेन सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or संलग्नीकृ or बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To BUTTON, v. n. (To bud) गण्डाकारमुकुलवत् स्फुट् (c. 6. स्फुटति, स्फुटितुं).

BUTTON-HOLE, s. गण्डाधारः, गण्डच्छिद्रं, गुलिकाग्रहणयोग्यं छिद्रं, शिक्यं.

BUTTON-MAKER, s. गण्डकृत्, गण्डकारी m. (न्), गुलिकाकारः.

BUTTRESS, s. वप्रः, भवनस्य वहिरालम्बः, भित्त्युपष्टम्भनार्थं वप्रः or प्राकारः.—(Prop, support) उपस्तम्भः, आलम्बः, उपघ्नः, आश्रयः, आधारः.

To BUTTRESS, v. a. (To prop) पूर्व्वोक्तवप्रेण उत्तम्भ् (c. 9. उत्तभ्नाति, उत्तम्भितुं).

BUXOM, a. (Gay, lively) हृष्टः -ष्टा -ष्टं, प्रहसितवदनः -ना -नं, प्रहासी -सिनी -सि (न्), प्रफुल्लवदनः -ना -नं, आनन्दी -न्दिनी -न्दि (न्), सरसः -सा -सं.—(Wanton) ललितः -ता -तं, विलासी -सिनी -सि (न्).

BUXOMLY, adv. सानन्दं, सहर्षं, सललितं, सविलासं, सरसं.

BUXOMNESS, s. (Wantonness) लालित्यं, सविलासता, सरसता, लीला.

To BUY, v. a. क्री (c. 9. क्रीणाति -णीते, क्रेतुं), उपक्री, सङ्क्री, मूल्यं दत्त्वा लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति, -आप्तुं).

BUYER, s. क्रेता m. (तृ), क्रयी m. (न्), क्रायकः, क्रयिकः.—(Buyer and seller) क्रयविक्रयी m. (न्).

BUYING, s. क्रयः.—(Buying and selling) क्रयविक्रयः.

To BUZZ, v. n. रु (c. 2. रौति, रवितुं), गुञ्ज् (c. 1. गुञ्जति, गुञ्जितुं), रण् (c. 1. रणति, रणितुं), रणरणं कृ.

BUZZ, BUZZING, s. गुञ्जनं, गुञ्जितं, कलः, कलकलः, मर्म्मरः, झाङ्कारः, कलरवः, कलस्वरं; part. गुञ्जन् -ञ्जन्ती -ञ्जत् (त्), रणन् -णन्ती -णत् (त्).

BUZZARD, s. अपकृष्टजातिः श्येनभेदः, श्येनकः.—(A blockhead) स्थूलधीः m., मन्दमतिः m., मूर्खः.

BY, prep. (By the side of) expressed by उप prefixed; as, 'he sits by me,' माम् उपास्ते; 'a tank by a well,' उपकूपजलाशयः.—(Beside, denoting passage) expressed by अति prefixed; as, 'he passes by me,' माम् अत्येति.—(Denoting the agent, instrument, cause, means or manner) expressed by the instr. case; as, 'by him,' 'by that,' 'on that account,' 'by that means,' 'in that manner,' may all be expressed by तेन. In modern Sanskrit the instrument and agent are often expressed by द्वारा or द्वारेण and कर्तृक; as, 'to hit with a stick,' काष्ठद्वारा or काष्ठद्वारेण तड्; 'sacrifices by sages,' ऋषिकर्तृकयज्ञाः. 'By,' in some of these senses, may often be expressed by the indec. part.; 'a man may be happy by doing penance,' तपस् तप्त्वा सुखी भवेत्.—(According to) अनुरूपं, अनुसारेण; 'by rule,' विधिवत्, विधितस्, यथाविधि.—(As soon as, not later than) मध्ये; as, 'by next year,' आगामिवत्सरमध्ये.—(The quantity at one time) expressed by the affix शस्; as, 'by thousands,' सहस्रशस्; 'by twos and threes,' द्विशस् त्रिशस्; 'by companies,' पंक्तिभिः.—(Successive action) expressed by प्रति or अनु, or by repeating the word; as, 'man by man,' प्रतिपुरुषं; 'day by day,' प्रतिदिवसं or अनुदिवसं or दिवसे दिवसे.—(By himself, alone) एकान्ततस्, निभृतं, रहसि, रहोभूतः -ता -तं.—(In swearing or adjuring) expressed by the instr. c.; as, 'swear not at all, neither by heaven, nor by earth,' कमपि शपथं मा कार्ष्ट स्वर्गेण न पृथिव्या न; 'by name,' नाम्ना, नामतस्, नामधेयतस्; 'by force,' बलात्, बलात्कारेण, प्रसह्य; 'by chance,' दैवात्; 'by day,' दिवा.

BY, adv. (Near) निकटे, समीपे, अन्तिके, अभितस्, आरात्.—(By the side) पार्श्वतस्, पार्श्वे.—(Passing by) expressed by the prep. अति; as, 'he passes by,' अतिक्रामति.—(In presence) सन्निधाने, साक्षात्, अग्रे, समक्षं, सम्मुखे.

BY, s. (Something not the direct object of regard) expressed when in composition, by उप; as, 'a duty by the by,' i. e. 'a secondary duty,' उपधर्म्मः.

BY AND BY, adv. अनन्तरं, क्षणान्तरे, न चिरेण, अचिरेण, अचिरात्.

BY THE BY, OR BY THE WAY, adv. (Exclusively of the subject in hand) प्रस्तुतम् अन्तरेण, प्रस्तुतविषयव्यतिरेकेण.—(Besides, moreover) किञ्च, अपरञ्च, अन्यच्च.—(In reference to that) तदुद्दिश्य.

BY-DEGREES, adv. क्रमशस्, क्रमे क्रमे, पदे पदे, प्रतिपदं.

BY-CONCERNMENT, s. उपविषयः, अप्रधानकार्य्यं.

BY-END, s. स[illegible]र्थं, स्वार्थः, आत्मविवृद्धिः f., आत्मोदयः.

BY-GONE, a. अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, गतः -ता -तं, पुरातीतः -ता -तं.

BY-LANE, BY-STREET, BY-ROAD, s. उपमार्गः, उपपथः, उपरथ्या, उपप्रतोली, गूढमार्गः.

BY-LAW, s. उपधर्म्मः, उपव्यवस्था, उपविधिः m., अनुव्यवस्था.

BY-NAME, s. उपाधिः m., उपनाम n. (न्).

BY-PATH, s. उपमार्गः, उपपथः, उत्पथः, गूढपथः.

BY-ROOM, s. उपरोधकं, उपशाला, उपकोष्ठः, अन्तर्गृहं, कक्षान्तरं.

BYSTANDER, s. पार्श्वस्थः, समीपस्थः, निकटस्थः, तटस्थः, समीपवर्त्ती m. (न्), उपस्थायी m. (न्).—(At a sacrifice) सदस्यः, विधिदर्शी m. (न्).

BY-WEST, a. (Westward, to the west of) पश्चिमदिश्यः -श्या -श्यं.

BY-WORD, s. उपकथा, उपवाक्यं.—(Subject of scorn) तिरस्कारविषयः, उपकथनविषयः, अपवादविषयः, उपहासस्थानं, उपहासास्पदं, अवहासभूमिः f.

C.

CABAL, s. (An union of a few persons in some secret design) गोपनीयकार्य्यसाधनार्थं कतिपयजनसंसर्गः or पंक्तिः f.—(Intrigue) कुमन्त्रणा, कुविचारणा, कुपरामर्शः, कुयुक्तिः f., कुसंसर्गः.

To CABAL, v. n. गोपनीयकर्म्मसम्पादनार्थं सुनिभृतं सम्मिल् (c. 6. -मिलति -मेलितुं) or सह गम् (c. 1. गच्छति, गन्तुं) or संयुज् in pass. (-युज्यते) or सङ्घट्ट् (c. 1. -घट्टते -घट्टितुं) or संसर्गं कृ.

CABALA, s. (A secret science) निगूढविद्या, निगूढशास्त्रं, गूढशास्त्रं, गुह्यविद्या, परमगहनविद्या.

CABALIST, s. (One skilled in occult sciences) निगूढविद्याज्ञः, निगूढशास्त्रज्ञः.

CABALISTICAL, a. (Having an occult meaning) निगूढार्थः -र्था -र्थं, अतिगुह्यार्थः -र्था -र्थं, परमगहनः -ना -नं, गूढः -ढा -ढं, गुह्यः -ह्या -ह्यं, रहस्यः -स्या -स्यं.

CABALISTICALLY, adv. अतिगुह्यं, निगूढं, सरहस्यं, परमगहनप्रकारेण.

CABALLER, s. कुमन्त्रणाकृत्, कुमन्त्री m. (न्), भेत्ता m. (तृ), भेदकरः,

राजद्रोही *m.* (न्).

CABBAGE, *s.* (A pot-herb) शाकप्रभेदः, शाकं, हरितकं, शूरणं, शिग्रुः *m.* —(Any thing stolen) मूषितं, मुष्टं, अपहारः, लोप्त्रं, होढं.

To CABBAGE, *v. n.* (To steal in cutting clothes) सूचिकवत् पटखण्डम् अपच्छिद्य चुर् (c. 10. चोरयति -यितुं) or मुष् (c. 9. मुष्णाति, मोषितुं).

CABBAGE-TREE, *s.* (A species of palm) तालजातीयो वृक्षप्रभेदः, उच्चतरुः *m.*

CABIN, *s.* (A small room) कुटिः *f.*, कुटी, कोष्ठः, शालिका, शाला, स्थलं.—(A chamber in a ship) नौकाभ्यन्तरे कुटिः or कोष्ठः or कक्षः or वेश्म *n.* (न्).—(A cottage) कुटीरः, वेश्म *n.* (न्), कुट्टिमः, पर्णशाला.—(A tent) पटकुटिः *f.*, पटवेश्म *n.* (न्), मण्डपः.

To CABIN, *v. n.* (To live in a cabin) कुटीरे वस् (c. 1. वसति, वस्तुं).

CABIN-BOY, *s.* नौकारूढानां परिचारकः or सेवकः or प्रेष्यः.

CABINET, *s.* (Private room) कक्षः, उपरोधकं, कक्षान्तरं, अन्तःशाला. —(Private council of the state) प्रधानमन्त्रिणां गूढसभा, धीसचिवानां सभा, शिष्टसभा, गूढमन्त्रणं, गूढभाषितं; 'a cabinet-minister,' मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*, गूढमन्त्री *m.*—(A place in which rare things are kept) विशिष्टाधारः, दुर्लभद्रव्याधारः, रत्नकोषः, रत्नाधारः, रत्नपात्रं, रत्नभाण्डं.—(A kind of box) समुद्गः, समुद्गकः, सम्पुटः.

CABINET-MAKER, *s.* रत्नाधारकृत्, रत्नभाण्डकृत्, समुद्गकारः, सम्पुटकृत्.

CABLE, *s.* नौरज्जुः *m.*, नौबन्धनरज्जुः *m.*, शाणरज्जुः, नौबन्धनार्थं स्थूलरज्जुः or महारज्जुः, नौकाया महागुणः or बृहद्गुणः.

CABLED, *a.* रज्जुना or गुणेन बद्धः -द्धा -द्धं, रज्जुबद्धः -द्धा -द्धं.

CABRIOLET, *s.* चक्रद्वययुक्तः सपिधानो रथविशेषः, कर्णीरथः, हयनं.

CACHECTICAL, *a.* दोषत्रयपीडितः -ता -तं, दुष्टशरीरः -रा -रं, अस्वस्थः -स्था -स्थं.

CACHEXY, *s.* शरीरदोषः, रक्तदूषणं, दोषत्रयं, शरीरस्य अस्वास्थ्यं.

CACHINNATION, *s.* अट्टहासः, आच्छुरितं, अवच्छुरितं, प्रहासः, प्रहसनं.

CACKLE or CACKLING, *s.* कूजनं, हंसनादः, हंसरुतं, कुक्कुटीशब्दः.—(Making a cackle) हंसनादी -दिनी -दि (न्).—(Idle talk) जल्पनं, आलस्यवचनं, वृथाकथा, असद्वादः.

To CACKLE, *v. n.* कूज् (c. 1. कूजति, कूजितुं), हंसनादं कृ, हंसवत् or कुक्कुटीवत् शब्दं कृ.

CACKLER, *s.* हंसरूपेण नादी *m.* (न्), कूजकः, कूजनकृत्.—(A telltale) जल्पकः, वाचालः, रहस्यभेदकः.

CACOCHYMY, *s.* शरीरविकारः, रक्तविकारः, शरीरदोषः, दोषत्रयं.

CACODÆMON, *s.* अपदेवता, पिशाचः, वेतालः, भूतः, दैत्यः.

CACOPHONY, *s.* विस्वरपदं, अपरवः, अपशब्दः, कष्टपदं, कटुश्रुतिः *f.*

CADAVEROUS, *a.* मृतशरीरोपमः -मा -मं, शवसवर्णः -र्णा -र्णं.

CADE, *s.* (A barrel) दीर्घगोलाकारः काष्ठमयो भाण्डविशेषः.

CADE, *a.* कोमलः -ला -लं, सुकुमारः -री -रं, गृह्यकः -का -कं.

To CADE, *v. a.* कोमलतया or कोमलप्रकारेण पुष् (c. 9. पुष्णाति, c. 1. पोषति, पोषितुं) or संवृध् in caus. (-वर्धयति -यितुं).

CADENCE, *s.* (Fall, state of sinking) पातः, पतनं, अवपातः, च्युतिः *f.* —(Modulation of the voice, tone) स्वरः, कलः, स्वनः, निःस्वनः, निह्रादः, विरावः, क्वणः, विरिब्धः, छन्दः *n.* (स्).

CADENT, *a.* (Falling down) पातुकः -का -कं, पतयालुः -लुः -लु.

CADET, *s.* अनुजः, अवरजः, जघन्यजः, कनिष्ठः.—(A young volunteer) युद्धकर्मशिक्षार्थं वेतनं विना क्षत्रियधर्मम् आचरति यो कुलीनयुवा.

CADGER, *s.* विपणी *m.* (न्), प्रापणिकः, आपणिकः, अण्डनवनीतादिविक्रयिकः.

CADI, *s.* तर्कीयदेशे प्राड्विवाकः, धर्माध्यक्षः, दण्डनायकः, न्यायाधिपतिः.

CADUCITY, *s.* पातुकता, पतयालुत्वं, पतनशीलता, सद्यःपातित्वं, अस्थिरता.

CÆSURA, *s.* विच्छित्तिः *f.*, विच्छेदः, अवच्छेदः, विरामः.

CAG, *s.* (A barrel) दीर्घगोलाकृतिः काष्ठनिर्मितः पात्रविशेषः.

CAGE, *s.* पञ्जरं, पिञ्जरं, वीतंसः, कुलायिका, पक्षिशाला, शालारं.—(A prison) कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनगृहं.

To CAGE, *v. a.* पञ्जरे or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or अवरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To CAJOLE, *v. a.* (To flatter, wheedle) शान्त्व् or सान्त्व् (c. 10. शान्त्वयति, सान्त्वयति -यितुं), लल् in caus. (लालयति -यितुं).—(With intent to overreach) वञ्च् in caus. (वञ्चयते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

CAJOLED, *p. p.* लालितः -ता -तं, मधुरैर्वचोभिः संलापितः -ता -तं, वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

CAJOLER, *s.* (Coaxer) लालनकृत् *m.*, चाटुकारः.—(Deceiver) वञ्चकः, प्रतारकः, कूटकः, कूटकारः, कपटिकः.

CAJOLERY, *s.* (Coaxing) लालनं, चाटूक्तिः *f.*—(Overreaching) छलं, वञ्चनं, प्रतारणं, कूटता, कपटः, व्याजः.

CAITIFF, *s.* दुर्वृत्तः, दुरात्मा *m.* (न्), नराधमः, खलः, धूर्त्तः, शठः.

CAITIFF, *a.* दुर्वृत्तः -त्ता -त्तं, खलः -ला -लं, शठः -ठा -ठं, अधमः -मा -मं.

CAIRN, *s.* प्रस्तरचितिः *f.*, पाषाणचितिः *f.*, शिलाराशिः *m.*, पाषाणोत्करः.

CAKE, *s.* पूपः, अपूपः, पिष्टकः, पोलिका, करम्भः.—(A mass of any thing) पिण्डः.

To CAKE, *v. n.* पिण्डीभू, पिण्ड (nom. पिण्डायते), पिष्टकरूपेण घनीभू.

CAKED, *p. p.* पिण्डितः -ता -तं, पिण्डीभूतः -ता -तं, घनीकृतः -ता -तं.

CALABASH, *s.* बृहदलाबूप्रभेदः, अलाबूः *f.*, विम्बिका.

CALAMANCO, *s.* ऊर्णानिर्म्मितः पटविशेषः, ऊर्णामयवस्त्रं.

CALAMINE, *s.* शिलाजतुस्वभावो भूमिविशेषो यत्संसर्गात् ताम्रं पित्तलं सम्पद्यते.

CALAMITOUS, *a.* व्यसनी -निनी -नि (न्), आत्ययिकः -की -कं, विपन्नः -न्ना -न्नं, विपद्युक्तः -क्ता -क्तं, आपद्ग्रस्तः -स्ता -स्तं, दुर्गतः -ता -तं, विधुरः -रा -रं, दैवोपहतः -ता -तं, उपाकृतः -ता -तं, दुःखी -खिनी -खि (न्), क्लेशी -शिनी -शि (न्), औत्पातिकः -की -कं, शोकपूर्णः -र्णा -र्णं, व्यथाकरः -रा -रं.

CALAMITY, *s.* विपद् *f.*, आपद् *f.*, विपत्तिः *f.*, व्यसनं, व्यापद् *f.*, विप्लवः, उपप्लवः, दुर्घटना, दौर्गत्यं, दुर्दैवं, दौर्भाग्यं, दुःखं, क्लेशः.—(From heaven) विनिपातः, उत्पातः, विनिहतः.

CALAMUS, *s.* सुगन्धिवेतसप्रभेदः, वेत्रः, वेणुः *m.*, वंशः, नडः, नलः.

CALASH, *s.* (A pleasure-carriage) क्रीडारथः, पुष्परथः, केलिरथः.

CALCAREOUS, *a.* शार्करिकः -का -कं, शार्करीयः -यी -यं, शार्करावान् -वती -वत् (त्).

CALCEATED, *p. p.* सपादुकः -का -कं, पादुकारूढः -ढा -ढं, उपानद्युक्तः -क्ता -क्तं.

CALCEDONY, *s.* (A kind of opal) शिवधातुः *m.*, गोमेदसन्निभः.

To CALCINATE or CALCINE, *v. a.* भस्मीकृ, आतप्तनं कृ, प्रतीवापं कृ.

CALCINATION, *s.* भस्मीकरणं, आतप्तनं, प्रतीवापः.—(Apparatus for) पातालः.

CALCINED, *p. p.* भस्मीकृतः -ता -तं, भस्मीभूतः -ता -तं.

CALCULABLE, *a.* गणनीयः -या -यं, विगण्यः -ण्या -ण्यं, संख्येयः -या -यं.

To CALCULATE, *v. n.* गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्, संख्या (c. 2. -ख्याति -ते -ख्यातुं), परिसंख्या, सम्परिख्या, कल् (c. 10. कलयति -यितुं), सङ्कल्.

CALCULATED, *p. p.* गणितः -ता -तं, विगणितः -ता -तं, परिगणितः -ता -तं, राशिगतः -ता -तं, विसङ्कलितः -ता -तं.—(Adapted, suited) युक्तः -क्ता

-क्तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उचितः -ता -तं, पर्य्याप्तः -प्ता -प्तं.

CALCULATION, *s.* (The act) गणनं *n.* -ना, विगणनं, सङ्ख्यानं, परिसङ्ख्यानं, गुणनं.—(The result) गणितं.

CALCULATOR, *s.* गणकः, विगणकः, गणनकृत्, गुणकः, गुणकारः, सङ्ख्याकृत्.

CALCULOUS, *a.* शार्करः -री -रं, आश्मिकः -की -कं, अश्मरः -रा -रं, आश्मनः -नी -नं, अश्ममयः -यी -यं, शिलामयः -यी -यं.

CALCULUS, *s.* (Stone in the bladder) अश्मरी, अश्मीरः, शर्करा, मूत्रकृच्छ्रं.

CALDRON, *s.* पिठरः, उखा, स्थाली, उदस्थाली, पिष्टपचनं, कन्दुः *m.*, कटाहः.

CALECHE, *s.* क्रीडारथः, पुष्परथः, केलिरथः.

CALEFACTION, *s.* तपनं, तापनं, प्रतापनं, दाहनं, सिद्धकरणं.

CALEFACTORY, *a.* तापकः -का -कं, तापनः -नी -नं, तापकरः -री -रं.

To CALEFY, *v. n.* (To be heated) तप् (c. 1. तपति, तप्तुं), प्रतप्.

CALENDAR, *s.* (Almanack) पङ्क्तिः *f.*, पञ्जी, पञ्जिका, तिथिपत्रपत्रं.

CALENDER, *s.* (A hot-press) वस्त्रस्निग्धीकरणार्थं or पटश्लक्ष्णीकरणार्थं or वस्त्रमार्जनार्थं चक्रयन्त्रं.

To CALENDER, *v. a.* (To dress cloth) पृष्ठोक्तयन्त्रेण वस्त्रं or पटं स्निग्धीकृ or श्लक्ष्णीकृ or मृज् (c. 2. मार्ष्टि, मार्ष्टुं), प्रमृज्.

CALENDS, *s.* मासस्य प्रथमदिनं, शुक्लपक्षस्य प्रथमदिवसः, अक्षुणदिनं, प्रतिपद् *f.*, पक्षतिः *f.*

CALENTURE, *s.* समुद्रयायिनां व्याधिप्रभेदस् तद्रोगग्रस्तः पोतवाहः शस्यक्षेत्रम् इति बुद्ध्या समुद्रमध्ये आत्मानं प्रक्षिपति.

CALF, *s.* गोवत्सः, वत्सः, वत्सकः, शकृत्करिः *m.* -री *f.*, तर्णकः.—(Newborn) तर्णः, तर्णकः.—(A herd of calves) वात्सकं.—(The thick part of the leg) जङ्घायाः स्थूलभागः or मांसलभागः, जङ्घापिण्डः, जङ्घामध्यं, मांसपिण्डाङ्गं.—(A dolt) स्थूलबुद्धिः, जडः.

CALIBRE, *s.* (Bore of a gun, &c.) छिद्रं, यन्त्रछिद्रं, सुषिरं, शुषिरं, व्यासं, छिद्रव्यासं, विस्तारः, छिद्रविस्तृतिः *f.*—(Size, measure) परिमाणं, मात्रा.—(Sort, kind) प्रकारः.

CALICE, *s.* कंसः, पात्रं, भाजनं, पुटकं.

CALICO, *s.* कार्पासं, नानावर्णमूर्त्तिमुद्रितः कार्पासपटः, चित्रितकार्पासं.

CALID, *a.* उष्णः -ष्णा -ष्णं, तप्तः -प्ता -प्तं, नैदाघः -घी -घं.

CALIDITY, *s.* तापः, उष्णता, घर्म्मः, निदाघः, अशिशिरता.

CALIGATION, *s.* अन्धकारः, तिमिरं, तमः *n.* (स्), तमिस्रं, मेघतिमिरं.

CALIGINOUS, *a.* तमस्वी -स्विनी -स्वि (न्), अन्धकारयुक्तः -क्ता -क्तं, तमोवृतः -ता -तं.

CALIGRAPHY, *s.* चारुलेखनं, शुभलेखनं, सुलेखनं, चारुलेखनशिल्पं.

CALIX, *s.* पुष्पगर्भः, पुष्पकोषः, पुष्पाधारः, कुसुमपुटः, उपदलं, पुष्पसन्धौ दलमयो वहिःकोषः or पुटः, पुष्पधारको दलपुटः.

To CALK, *v. a.* नौकातलं दारुस्फोटनप्रयुक्तानि छिद्राणि शणसूत्रादिना निरुध् (c. 7. -रुणद्धि -रोद्धुं) or पिधा (c. 3. -दधाति -धातुं).

CALKER, *s.* नौकातलं शणसूत्रादिना छिद्रावरोधी *m.* (न्) or छिद्रप्रतिबन्धकः.

CALL, *s.* (Summon) आह्वानं, आहूतिः *f.*, आह्वयः, आकरणं.—(Invitation) निमन्त्रणं.—(Address by name) सम्बोधनं, नामग्रहः.—(Impulse) वेगः.—(Divine vocation) प्रत्यादेशः, आकाशवाणी, ईश्वराह्वानं.—(Requisition, obligation) प्रयोजनं, अवश्यकता.—(Claim, demand) अभियोगः.—(Authority) अधिकारः.—(A visit) अभिगमः, अभ्यागमः, समायः.—(Challenge) आहूतिः *f.*—(A calling over the names of the members of parliament) महासभायां प्रत्यक्षाप्रत्यक्षनिर्णयनार्थम् एकैकशः प्रतिनिधिनामव्याहरणं.

To CLACK, *v. n.* अतिशयेन जल्प् (c. 1. जल्पति -ल्पितुं), पेषणीघण्टारूपेण शब्दं कृ, चटचटशब्दं कृ.

CLAD, *a.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, वस्त्रवेष्टितः -ता -तं, वस्त्रान्वितः -ता -तं, परिहितः -ता -तं, प्रावृतः -ता -तं, आवृतः -ता -तं, परिच्छन्नः -न्ना -न्नं, पिनद्धः -द्धा -द्धं, संवीतः -ता -तं, अनग्नः -ग्ना -ग्नं, सवासाः -साः -सः (स्), सचेलः -ला -लं; 'lightly clad,' लघुवासाः -साः -सः (स्).

To CLAIM, *v. a.* स्वीकृ, अङ्गीकृ, याच् (c. 1. याचति -चितुं), प्रार्थ् (c. 10. प्रार्थयति -ते -यितुं), ममेति उक्त्वा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), मह्यं दातव्यमिति ज्ञापयित्वा ग्रह्; अभिमानं कृ; as, 'to claim money,' धनाभिमानं कृ; ममेति वद् (c. 1. वदति -दितुं), मदीयमिति or स्वीयमिति वद्, स्वाधिकारं or स्वस्वत्वं ज्ञा in caus. (ज्ञापयति -यितुं).—(To set up a claim) स्वत्वीकृ.—(To have a claim to) अर्हं (c. 1. अर्हति -ते -र्हितुं).

CLAIM, *s.* अधिकारः, अभियोगः, अभिमानं, याच्ञा, अभ्यर्थना, प्रार्थना; 'false claim,' मिथ्याभियोगः; 'claim laid to learning,' विद्याभिमानं.

CLAIMABLE, *a.* अभियोक्तव्यः -व्या -व्यं, याचनीयः -या -यं, प्रार्थनीयः -या -यं.

CLAIMANT, *s.* अभियोक्ता *m.* (क्), अर्थी *m.* (न्), अधिकारी *m.* (न्), याचिता *m.* (तृ), प्रार्थयिता *m.* (तृ).

CLAIMED, *p. p.* अधिकृतः -ता -तं, याचितः -ता -तं, प्रार्थितः -ता -तं, अभियुक्तः -क्ता -क्तं, प्रख्यातः -ता -तं, मार्गितः -ता -तं.

CLAIR-OBSCURE, *s.* चित्रकर्म्मणि नानाछायाविन्यासविद्या.

To CLAM, *v. a.* (To clog with glutinous matter) श्यै in caus. (श्यापयति -यितुं), श्यानीकृ, सान्द्रीकृ.

To CLAMBER, *v. a.* पाणिपादेन or करचरणाभ्यां दुरारोहस्थानम् आयासेन आरुह् (c. 1. -रोहति -रोढुं) or अध्यारुह्.

CLAMBERING, *s.* पाणिपादेन विषमस्थानारोहणं, आयासेनारोहणं.

CLAMMINESS, *s.* श्यानता, श्लीनता, सान्द्रता, घनत्वं, अनुलग्नशीलत्वं.

CLAMMY, *a.* श्यानः -ना -नं, श्लीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, घनः -ना -नं, अनुलग्नशीलः -ला -लं, संलग्नशीलः -ला -लं, आर्द्रः -र्द्रा -र्द्रं.

CLAMOUR, *s.* घोषणं -णा, उत्क्रोशः, उत्कुष्टं, संहूतिः *f.*, जनरवः, उच्चैर्घुष्टं,

उच्चैःस्वरः, रावः, बहुभिः कृता संहूतिः, प्रक्ष्वेडनं.

To CLAMOUR, *v. n.* उच्चैर् घुष् (c. 10. घोषयति -यितुं), उद्घुष्, उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्ष्विड् (c. 1. -क्ष्वेडति -डितुं).

CLAMOUROUS, *a.* घोषकरः -री -रं, घोषणः -णा -णं, उच्चैःस्वरकारी -रिणी -रि (न्), तुमुलकारी &c., मुखरः -रा -रं, महास्वनः -ना -नं, बहुघोषः -षा -षं, अनल्पघोषः -षा -षं, प्रक्ष्वेडितः -ता -तं, प्रक्ष्वेडितवान् -वती -वत् (त्).

CLAMP, *s.* (A piece of iron for joining stones) शिलाद्वयसम्बन्धनार्थं कीलः.—(A quantity of brick) इष्टकाराशिः *f.*

To CLAMP, *v. a.* पाषाणद्वयं or काष्ठद्वयं कीलेन सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं).

CLAN, *s.* कुलं, वंशः, गोत्रं, सन्तानः, वर्णः, वर्गः, जातिः *f.*, कुटुम्बः, पंक्तिः *f.*, मण्डलं, सङ्घः, संसर्गः, शाखा.

CLANDESTINE, *a.* निभृतः -ता -तं, गुप्तः -प्ता -प्तं, गूढः -ढा -ढं, रहस्यः -स्या -स्यं, छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, निह्नुतः -ता -तं, अप्रकाशः -शा -शं, छलेन कृतः -ता -तं; 'a clandestine marriage,' चौरिकाविवाहः.

CLANDESTINELY, *adv.* निभृतं, रहः (स्), रहसि, रहस्यं, गुप्तं, छलेन, प्रच्छन्नं, निह्नवेन, अप्रकाशं.

CLANG OF CLANGOUR, *s.* घुष्टं, तुमुलं, झम्झा, झः.—(Of arms) शस्त्रघोषः.

To CLANG, *v. n.* शिञ्ज् (c. 2. शिंक्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), ध्वन् (c. 1. ध्वनति -नितुं), प्रक्ष्वेड् (c. 1. -क्ष्वेडति -डितुं), झम्झा (nom. झम्झायते).

CLANGOUS, *a.* घोषणः -णा -णं, तुमुलकरः -री -रं, शस्त्रघुष्टकरः -री -रं.

CLANK, *s.* शिञ्जितं, क्वणितं, घुष्टं, झम्झनं, झम्झा, प्रक्ष्वेडनं.

To CLAP, *v. a.* (Strike together suddenly) अकस्मात् संहन् (c. 2. -हन्ति -हन्तुं) or सङ्घट्ट् (c. 10. -घट्टयति -यितुं), आस्फल् in caus. (-स्फालयति -यितुं).—(The hands, arms) तालं कृ, करतालं कृ, आस्फुट् (c. 10. -स्फोटयति -यितुं).—(The wings) पक्षौ उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(To applaud) करतालेन प्रशंस् (c. 1. -शंसति -शंसितुं).—(To apply suddenly) अकस्मात् प्रविश् in caus. (-वेशयति -यितुं) or ऋ in caus. (अर्पयति -यितुं) or न्यस् (c. 4. -अस्यति -असितुं).

CLAP, *s.* स्तनितं, आस्फोटनं, ध्वनितं, क्वणितं, सङ्घट्टशब्दः.—(Of thunder) मेघनादः, मेघस्तनितं, वज्रनिर्घोषः, वज्रनिष्पेषः, स्फूर्ज्जथुः *m.*—(Of the hand) तालः.—(Applause) करतालेन प्रशंसा, प्रशंसाशब्दः, अनुरागजः शब्दः.

CLAPPER, *s.* (Of a bell) घण्टालोला, घण्टावादकः, नादनः.—(Applauder) करतालेन प्रवादकारी *m.* (न्).

CLARET, *s.* प्रसन्नवर्णा, प्रसन्नेरा, रक्तवर्णः स्वच्छमद्यविशेषः.

CLARIFICATION, *s.* प्रसादनं, विशोधनं, पावनं, पवित्रीकरणं, मलापकर्षणं.

To CLARIFY, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, विशुध्, संशुध्, पृ (c. 9. पुनाति -नीते, पवितुं), परिपू, विपू; पवित्रीकृ, विमल (nom. विमलयति -यितुं).

To CLARIFY, *v. n.* प्रसद् (c. 6. -सीदति -सत्तुं), पवित्रीभू, विमलीभू.

CLARINET, *s.* वेणुः *m.*, वंशः, विवरनालिका, उदात्तस्वरो वेणुभेदः.

CLARION, *s.* शुषिरवाद्यविशेषः, तूर्य्यं, शङ्खः.

CLARITY, *s.* प्रसन्नता, स्वच्छता, कान्तिः *f.*, द्युतिः *f.*, दीप्तिः *f.*

To CLASH, *v. n.* सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), परस्परसमाघातं कृ, परस्परसङ्घट्टप्रयुक्तं झम्झाशब्दं कृ or झम्झा (nom. झम्झायते).—(To contradict, disagree) विवद् (c. 1. -वदते -दितुं), विप्रवद्, विसंवद्, परस्परम् विरुध् (c. 7. -रुणद्धि -रोद्धुं).

CLASH, *s.* समाघातः, सङ्घट्टः, ट्टनं, सङ्घर्षः, झः, झम्झनं, क्वणितं, घर्घरः.—(Contradiction) वचनविरोधः, प्रतीपवचनं, विसंवादः.

CLASHING, *a.* (Contradictory) परस्परपराहतः -ता -तं, परस्परविरोधी -धिनी -धि (न्), विवदमानः -ना -नं, विरुद्धार्थः -र्था -र्थं.

CLASP, *s.* (Embrace) आलिङ्गनं -ङ्गितं, परिष्वङ्गः, आश्लेषः, संश्लेषः, परिरम्भः, उपगूढं, अङ्कः, अङ्कपाली.—(Hook, buckle) कुडुपः.

To CLASP, *v. a.* (Shut with a clasp) कुडुपेन बन्ध् (c. 9. बध्नाति, बन्द्धुं) or पिनह् (c. 4. -नह्यति -नद्धुं).—(Embrace) आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्; आश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), संश्लिष्, पीड् (c. 10. पीडयति -यितुं), स्वञ्ज् (c. 1. स्वजते, स्वंक्तुं), परिष्वञ्ज्, सम्परिष्वञ्ज्, उपगुह् (c. 1. -गूहति -गूहितुं), परिरभ् (c. 1. -रभते -रब्धुं), क्रोडीकृ.—(Enclose round) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं).—(Clasp the hands) हस्तौ बन्ध् or संहन् (c. 2. -हन्ति -हन्तुं), अञ्जलिं बन्ध् or संश्लिष्.

CLASPED, *p. p.* आलिङ्गितः -ता -तं, श्लिष्टः -ष्टा -ष्टं, आश्लिष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, परिरब्धः -ब्धा -ब्धं, परिष्वक्तः -क्ता -क्तं, परिगूढः -ढा -ढं, उपगूढः -ढा -ढं, पीडितः -ता -तं, पिष्टः -ष्टा -ष्टं, क्रोडीकृतः -ता -तं; 'with hands clasped,' बद्धाञ्जलिः -लिः -लि, कृताञ्जलिः -लिः -लि.—(Clasped in the arms) भुजापीडितः -ता -तं.

CLASPER, *s.* लताभृत्नः, वृक्षादिपरिवेष्टनशीलः लताविटपः.

CLASP-KNIFE, *s.* धारकमध्ये निवेशयितुं शक्या छुरिका.

CLASS, *s.* (A rank or order of persons) वर्णः, वर्गः, पदं, आश्रमः, जातिः *f.*—(A set of things or beings) गणः, पंक्तिः *f.*, श्रेणी, संसर्गः, समूहः, गोत्रं; 'class of verbs,' गणः.—(A number of scholars) महाध्यायिनां पंक्तिः, छात्रसमूहः; 'the lower classes,' अवरवर्णाः *m. pl.*, अन्त्यजातीयाः *m. pl.*

To CLASS OF CLASSIFY, *v. a.* वर्णक्रमेण or यथावर्गं विरच् (c. 10. -रचयति -यितुं), or व्यस् (c. 4. -अस्यति -असितुं) or ग्रन्थ् (c. 1. ग्रन्थति ग्रन्थितुं), गणीकृ, वर्गीकृ.

CLASSED OF CLASSIFIED, *p. p.* गणीभूतः -ता -तं, वर्गीभूतः -ता -तं, वर्गीयः -या -यं, ग्रथितः -ता -तं, वर्गक्रमेण विन्यस्तः -स्ता -स्तं or व्यूढः -ढा -ढं.

CLASSICAL, *a.* (Refined) संस्कृतः -ता -तं, साधुः -धुः -ध्वी -धु.—(Of the first rank) प्रथमवर्गीयः -या -यं, श्रेष्ठः -ष्ठा -ष्ठं, प्रथमपदस्थः -स्था -स्थं.—(Relating to ancient books) पूर्व्वकालीनग्रन्थसम्बन्धी -न्धिनी -न्धि (न्).

CLASSIFICATION, *s.* गणीकरणं, गणना, वर्गक्रमेण विन्यासः, प्रतिविधानं.

CLASSIFIER, *s.* गणकारः, व्यासः; 'of words,' पदसङ्घातः.

CLASSICK, *s.* ग्रन्थकर्तॄणां मध्ये श्रेष्ठः, पूर्व्वकालीनग्रन्थकारः.

To CLATTER, *v. n.* क्वण् (c. 1. क्वणति -णितुं), ध्वन् (c. 1. ध्वनति -नितुं), झम्झनं कृ, झम्झा (nom. झम्झायते), चटचट (nom. चटचटायते).—(To talk idly) जल्प् (c. 1. जल्पति -ल्पितुं).

CLATTER, *s.* क्वणितं, स्तनितं, ध्वनितं, तुमुलं, झः, झम्झनं, चटचट *ind.*

CLAVATED, *a.* ग्रन्थिलः -ला -लं, पिण्डी -ण्डिनी -ण्डि (न्), गण्डवान् -वती -वत् (त्).

CLAUDICATION, *s.* (Lameness) पङ्गुता, खञ्जत्वं, गतिवैकल्यं.

CLAVICLE, *s.* जत्रु *n.*, ग्रीवास्थि *n.*, कण्ठास्थि *n.*

CLAUSE, *s.* (Division of a subject) पदं, स्थानं, मार्गः, अधिकरणं, अङ्गं, शाखा.—(Sentence) वाक्यं.—(Particular stipulation) नियमपत्राङ्गं, नियमः.

CLAUSTRAL, *a.* मठसम्बन्धी -न्धिनी -न्धि (न्), विहारसम्बन्धी &c.

CLAW, *s.* नखः, नखरः, करजः, कररुहः, पाणिः *m.*, अङ्घ्रिनखः, कर्कटः.

To CLAW, *v. a.* नखेन दॄ (c. 10. दारयति -यितुं) or आहन् (c. 2. -हन्ति -हन्तुं) or लिख् (c. 6. लिखति, लेखितुं), नखाघातं कृ.

CLAWED, *a.* नखी -खिनी -खि (न्), नखवान् -वती -वत् (त्).

CLAY, *s.* पङ्कः, कर्दमः, कर्दः, मृत् *f.* (द्), मृत्तिका, कवालः, क्षादः.

निषद्वरः, शिलीन्ध्री.

To CLAY, *v. a.* पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं); 'clayed sugar,' शार्करः -करः, शुक्ला, सिताखण्डः, सिता, श्वेता.

CLAYEY, CLAYISH, *a.* पङ्की -ङ्किनी -ङ्कि (न्), पङ्किलः -ला -लं, सजम्बालः -ला -लं, मार्त्तिकः -की -कं, कार्द्दमः -मी -मं, मृन्मयः -यी -यं.

CLEAN, *a.* (Free from dirt) विमलः -ला -लं, निर्म्मलः -ला -लं, अमलिनः -ना -नं, पवित्रः -त्रा -त्रं, शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, परिष्कृतः -ता -तं, अकल्कः -ल्का -ल्कं, अकल्मषः -षा -षं, वीध्रः -ध्रा -ध्रं; 'having a clean face,' शुचिमुखः -खी -खं; 'having clean clothes,' शुद्धवासाः -साः -सः (स्); 'ceremonially clean,' स्पृश्यः -श्या -श्यं.—(Guiltless, innocent) शुचिः -चिः -चि, शुद्धमतिः -तिः -ति, अनघः -घा -घं, विमलात्मा -त्मा -त्म (न्).—(Neat, smooth) सुश्लक्ष्णः -क्ष्णा -क्ष्णं; 'having a clean figure,' तनुमध्यमः -मा -मं.

CLEAN, *adv.* अशेषतस्, अखिलेन, साकल्येन, सम्यक्, आमूलं.

To CLEAN, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, पू (c. 9. पुनाति, पवितुं), पवित्रीकृ, धाव् (c. 10. धावयति -यितुं), प्रक्षल् (c. 10. -क्षालयति -यितुं), मृज् (c. 2. मार्ष्टि, मार्ष्टुं), शुचीकृ, परिष्कृ; 'to clean the teeth,' दन्तान् धाव् or शुध्.

CLEANED, *p. p.* शोधितः -ता -तं, पवित्रीकृतः -ता -तं, पूतः -ता -तं, क्षालितः -ता -तं, प्रक्षालितः -ता -तं, विगतकल्मषः -षा -षं.

CLEANING, *s.* शोधनं, प्रक्षालनं, मार्जनं, पवनः, निष्पावः, पावनं, विशोधितं, मार्ष्टिः *f.*, मृजा, मार्जना *f.*—(Cleaning the teeth) दन्तशुद्धिः *f.*, दन्तधावनं.

CLEANLINESS, *s.* शुद्धता, शुद्धिः *f.*, पवित्रत्वं, शुचिता, शौचं, परिष्कृतिः *f.*, मार्ष्टिः *f.*; 'neatness,' विनीतता.

CLEANLY, *a.* पवित्रशरीरः -रा -रं or शुचिशरीरः, शुद्धदेहः -हा -हं, मृष्टकायः -या -यं, निर्म्मलः -ला -लं, विनीतः -ता -तं; 'in dress,' शुद्धवासाः -साः -सः (स्).

CLEANLY, *adv.* शुचि, पवित्रं, निर्म्मलं, विनीतं, शुद्धप्रकारेण.

CLEANNESS, *s.* शुचिता, शौचं, निर्म्मलत्वं, वैमल्यं, शुद्धत्वं, शुद्धिः *f.*, विशुद्धिः *f.*, परिष्कारः, वैशद्यं, अकल्कता.—(Innocence) शुद्धिः *f.*

To CLEANSE, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, विशुध्, संशुध्, पू (c. 9. पुनाति -नीते, पवितुं), परिपू, विपू, प्रक्षल् (c. 10. -क्षालयति -यितुं), धाव् in caus. (धावयति -यितुं), प्रधाव्, निर्णिज् (c. 3. -नेनेक्ति -नेक्तुं), मृज् (c. 1. मार्जति, c. 2. मार्ष्टि, मार्ष्टुं), सम्मृज्, पवित्रीकृ, शुचीकृ, परिष्कृ.—(From dust) नीरजीकृ.

CLEANSED, *p. p.* पूतः -ता -तं, पवित्रः -त्रा -त्रं, पवित्रितः -ता -तं, शोधितः -ता -तं, मार्जितः -ता -तं, प्रक्षालितः -ता -तं, निर्णिक्तः -क्ता -क्तं, मृष्टः -ष्टा -ष्टं, परिष्कृतः -ता -तं, अनवस्करः -रा -रं, धौतः -ता -तं, निर्धौतः -ता -तं, शुचीकृतः -ता -तं, पवित्रीकृतः -ता -तं, निःशोध्यः -ध्या -ध्यं.

CLEANSER, *s.* प्रक्षालकः, निर्णेजकः, शोधकः, सम्मार्जकः, पावकः.

CLEANSING, *s.* शोधनं, शुद्धिः *f.*, पावनं, मार्ष्टिः *f.*, मार्जनं, प्रक्षालनं, निर्णेकः, मलापकर्षणं.

CLEAR, *a.* (Bright, transparent) प्रसन्नः -न्ना -न्नं, विशदः -दा -दं, विमलः -ला -लं, निर्म्मलः -ला -लं, अमलः -ला -लं -लिनः -ना -नं, अच्छः -च्छा -च्छं, स्वच्छः -च्छा -च्छं, शुद्धः -द्धा -द्धं or विशुद्धः, स्फटिकाभः -भा -भं, दीप्तः -प्ता -प्तं.—(Serene, as the sky) वितिमिरः -रा -रं, अनभ्रः -भ्रा -भ्रं, निरभ्रः -भ्रा -भ्रं, व्यभ्रः -भ्रा -भ्रं, गततोयदः -दा -दं; 'as the mind,' प्रसन्नः -न्ना -न्नं.—(Indubitable) निःसन्देहः -हा -हं.—(Evident) व्यक्तः -क्ता -क्तं or प्रव्यक्तः or अभिव्यक्तः, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, प्रत्यक्षः -क्षा -क्षं, सुप्रकाशः -शा -शं.—(Intelligible, perspicuous) स्पष्टार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, सुगम्यः -म्या -म्यं, सुग्राह्यः -ह्या -ह्यं.—(A clear understanding) विशुद्धबुद्धिः, शुद्धधीः.—(Innocent) शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, अदृष्टदोषः -षा -षं.—(Out of debt) अनृणः -णा -णं.—(Sounding distinctly) पटुस्वरः -रा -रं, उच्चैःस्वरः -रा -रं.—(Open, free from trees, &c.) तरुगुल्मविविक्तः -क्ता -क्तं, निष्कण्टकः -का -कं, निर्वनः -ना -नं; 'a clear space,' विविक्तता.—(Entire, free from deductions) अशेषः -षा -षं, निरवशेषः -षा -षं, अभग्नः -ग्ना -ग्नं, निरन्तरः -रा -रं.—(Unobstructed) असम्बाधः -धा -धं, निर्विघ्नः -घ्ना -घ्नं.

To CLEAR, *v. a.* (Make bright or clean) शुध् in caus. (शोधयति -यितुं), प्रसद् in caus. (-सादयति -यितुं), प्रसन्नीकृ, निर्म्मलीकृ, विमल (nom. विमलयति -यितुं), मृज् (c. 2. मार्ष्टि, मार्ष्टुं).—(Explain) व्याख्या (c. 2. -ख्याति -ख्यातुं), स्पष्टीकृ, व्यक्तीकृ, प्रत्यक्षीकृ, सम्बुध् in caus. (-बोधयति -यितुं), परिशुध् in caus.—(Liquidate) शुध् in caus., संशुध्, अपाकृ, विनी (c. 1. -नयते -ति -नेतुं).—(Clear a doubt) संशयम् अपनी.—(Free from incumbrances, &c.) विशुध् in caus., मुच् (c. 6. मुञ्चति, मोक्तुं), विघ्नान् विनी or हृ (c. 1. हरति, हर्त्तुं) or नश् in caus. (नाशयति -यितुं), निर्विघ्नं -घ्नां -घ्नं कृ, निष्कण्टकं -कां -कं कृ.—(Gain) निरवशेषं लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति -आप्तुं).—(Justify) परिशुध् in caus., विशुध् in caus.; 'he clears himself,' आत्मानं निर्दोषं करोति.—(Clear the throat) उत्कासनं कृ.—(Purge) रिच् (c. 7. रिणक्ति, रेक्तुं), विरिच्.

To CLEAR, *v. n.* (Grow bright) विमलीभू, शुचि (nom. शुचीयते); 'as the weather,' निरभ्रीभू, गततोयदीभू.

CLEARANCE or CLEARING, *s.* शुद्धिः *f.*, विशुद्धिः *f.*, शोधनं, विशोधितं; 'clearance of a debt,' ऋणशोधनं, ऋणापाकरणं; 'of a grudge,' वैरशोधनं.—(Certificate from the custom-house) शुल्कशालासकाशात् शोधनपत्रं.

CLEARED, *p. p.* शोधितः -ता -तं, प्रसादितः -ता -तं, निर्म्मलीकृतः -ता -तं, रेचितः -ता -तं; 'as the weather,' गततोयदः -दा -दं.

CLEARER, *s.* शोधकः, प्रसादनः; 'of obstacles,' विघ्ननाशकः, विघ्नविनायकः.

CLEARLY, *adv.* (Plainly, evidently) व्यक्तं, सुव्यक्तं, स्पष्टं, प्रत्यक्षतस्, प्रत्यक्षेण, स्फुटं, स्पष्टरूपेण.—(Intelligibly) स्पष्टार्थं, भिन्नार्थं.—(Brightly) विमलं, प्रसन्नं, विशदं.—(Candidly) सरलं, दाक्षिण्येन.

CLEARNESS, *s.* (Brightness, transparency) प्रसादः, प्रसन्नता, निर्म्मलत्वं, निर्म्मलता, वैमल्यं, नैर्मल्यं, शुद्धत्वं, शुद्धिः *f.*, स्वच्छता, वैशद्यं, दीप्तिः *f.*, प्रभा.—(Distinctness, plainness) स्पष्टता, व्यक्तत्वं, प्रत्यक्षत्वं, स्फुटता, भिन्नार्थत्वं.

CLEAR-SIGHTED, *a.* विवेकदृष्वा -श्वा -श्व (न्), शुद्धदृष्टिः -ष्टिः -ष्टि, शुद्धधीः -धीः -धि, तीक्ष्णदृष्टिः -ष्टिः -ष्टि, दूरदर्शी -र्शिनी -र्शि (न्), अभिज्ञः -ज्ञा -ज्ञं.

CLEAR-SIGHTEDNESS, *s.* शुद्धदृष्टिः *f.*, विवेकदृश्वत्वं, तीक्ष्णदृष्टिः *f.*, दूरदृष्टिः.

To CLEAR-STARCH, *v. a.* गोधूमसम्भवादिसान्द्रद्रव्यप्रक्षेपेण वस्त्रादि धावयित्वा स्तब्धीकृ or दृढीकृ.

CLEAR-STARCHER, *s.* गोधूमसम्भवादिसान्द्रद्रव्यप्रक्षेपेण वस्त्रधावकः.

CLEAR-STARCHING, *s.* पूर्व्वोक्तसान्द्रद्रव्यप्रक्षेपेण वस्त्रधावनं.

To CLEAVE, *v. n.* (To adhere) सञ्ज् in pass. (सज्यते or सज्जते), अनुषञ्ज्, आसञ्ज्, संसञ्ज्, अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), संयुज् in pass. (-युज्यते), संलग्नीभू, अनुलग्नीभू.—(Divide in two parts) स्फुट् (c. 1. स्फोटति, c. 6. स्फुटति -टितुं), दल् (c. 1. दलति -लितुं), विदल्; विद् in pass. (-दीर्य्यते), भिद् in pass. (भिद्यते), फल् (c. 1. फलति -लितुं).

To CLEAVE, *v. a.* (To divide with violence) भिद् (c. 7. भिनत्ति,

भिन्ते, भेत्तुं), विभिद्, निर्भिद्, or in caus. (भेदयति -यितुं), पट् (c. 10. पाटयति -यितुं), विपट्, दॄ (c. 9. दृणाति, दरितुं -रीतुं or in caus. दारयति -यितुं), विदॄ, अवदॄ, दल् in caus. (दालयति, दलयति -यितुं), विदल्, विदलीकृ.

Cleaver, s. (One who cleaves) भेत्ता m. (त्तृ), भेदकः, दारकः.—(A chopping-knife) मांसच्छेदनार्थं छुरिका, मांसभेदी m. (न्), मांसभिद् f., छिदिः f.

Clef, s. (In music) गन्धर्व्वविद्यायां वादीसूचनार्थं चिह्नं.

Cleft, s. दरी -रा, टङ्कः, सन्धिः m., भेदः, विदीर्णं.

Cleft or cloven, a. भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, विदलितः -ता -तं, विदलः -ला -लं -लीकृतः -ता -तं, दलितः -ता -तं.

Clemency, s. कृपा, दया, क्षमा, कारुण्यं, अनुकम्पा, अनुक्रोशः, घृणा, प्रसादः, दयालुता.

Clement, a दयालुः -लुः -लु, कृपालुः -लुः -लु, दयाशीलः -ला -लं, वत्सलः -ला -लं, मृदुः -द्वी -दु, कारुणिकः -की -कं, सानुकम्पः -म्पा -म्पं, करुणार्द्रः -र्द्रा -र्द्रं, हृदयालुः -लुः -लु.

Clench. *See* Clinch.

Clergy, s. पौरोहित्यं, पुरोहितवर्गः, पुरोहितसमूहः, धर्म्माध्यापकानां समवायः.

Clergyman, s. पुरोहितः, धर्म्माध्यापकः, धर्म्मोपदेशकः, धर्म्मप्रचारकः, धर्म्मप्रदर्शकः, धर्म्मप्रवक्ता m. (क्तृ), याजकः.

Clerical, a. पौरोहितः -ती -तं, याजकीयः -या -यं, धर्म्मोपदेशविषयः -या -यं, पौरोहित्यसम्बन्धी -न्धिनी -न्धि (न्).

Clerk, s. (Man employed as a writer) कायस्थः, लेखकः, लिपिकरः, मसिपण्यः.—(Accountant) गणनाध्यक्षः.—(Scholar) विद्वान् m. (स्), पण्डितः, कृतविद्यः, ज्ञानी m. (न्).—(Clergyman) पुरोहितः, धर्म्माध्यापकः.—(Assistant of a clergyman) उपपुरोहितः, पुरोहितसहायः.

Clerkship, s. कायस्थता, कायस्थ्यं, कायस्थकर्म्म n. (न्).—(Scholarship) पाण्डित्यं.

Clever, a. चतुरः -रा -रं, पटुः -टुः -ट्वी -टु, दक्षः -क्षा -क्षं, अभिज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं, निपुणः -णा -णं, निपुणमतिः -तिः -ति, कुशलः -ला -लं, वैज्ञानिकः -की -कं, सुप्रयोगवान् -वती -वत् (त्), योग्यः -ग्या -ग्यं, दक्षः -क्षा -क्षं, विशारदः -दा -दं, पेशलः -ला -लं, विपश्चित् m. f. n., पण्डितः -ता -तं, कृती -तिनी -ति (न्), विदग्धः -ग्धा -ग्धं, प्रवीणः -णा -णं, कल्याणबुद्धिः -द्धिः -द्धि.

Cleverly, adv. चतुरं, चातुर्य्येण, सपाटवं, निपुणं, दाक्ष्येण.

Cleverness, s. चातुर्य्यं, चतुरता, नैपुण्यं, कुशलता, कौशल्यं पटुत्वं, पाटवं, दाक्ष्यं, दाक्षिण्यं, प्रवीणता, प्रावीण्यं, सुप्रयोगता, वैचक्षण्यं, विदग्धता, वैदग्ध्यं, योग्यता, मतिप्रकर्षः, निर्देष्टा m. (ष्टृ), उद्देशकः.

Clew or clue, s. (A ball of thread) सूत्रकोषः -षं.—(A guide) सूत्रं, गहनमार्गनिर्गमोपायः, दर्शकः.

To clew, v. a. रज्जुद्वारेण नौकावसनम् उन्नम् (c. 1. -नमति -नन्तुं, c. 10. -नामयति -यितुं) यदनन्तरं वसनसंवरणं कर्त्तुं शक्यते.

To click, v. n. टं टं पट् पट् कट् कट् चित् चित् इत्यादिशब्दान् कृ, पटपट (nom. पटपटायते).

Client, s. (Dependent) आश्रितः, संश्रितः, अधीनः, आयत्तः, उपजीवी m. (न्), भाक्तिकः, अनुगतः, प्रत्याशी m. (न्).—(One who applies to an advocate for counsel) स्वार्थनिर्वाहणहेतोर् व्यवहारसचिवसंश्रितः

Clientship, s. अधीनता, आयत्तत्वं, व्यवहारसचिवसंश्रितस्य दशा.

Cliff, s. प्रपातः, दरद् f., पातुकः, विषमं, अतटः, भृगुः m., समुद्रवेलायां पातुकभूमिः.

Climacter or climacteric, s. शरीरविकारपरिणामो विशेषवत्सरपर्य्यायः, शरीरविकाराणां वर्षचक्रं.

Climate or clime, s. (A region) देशः, प्रदेशः, दिक् f. (श्), राष्ट्रं, आशा.—(Temperature) जलवायुः, जलाकाशः, व्योम n. (न्), आकाशः, वायुगुणः.

Climax, s. सारं, क्रमशो वृद्धिः f., ऊर्द्ध्वगमनं, उत्तरोत्तरवृद्धिः f.

To climb, v. a. आयासेन आरुह् (c. 1. -रोहति -रोढुं), अध्यारुह्, अभिरुह्; अधिक्रम् (c. 1. -क्रामति -क्रमितुं) or अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं).

To climb, v. n. ऊर्द्ध्वं or उच्चैः or उपरि गम् (c. 1. -गच्छति -गन्तुं).

Climber, s. आरोही m. (न्), अधिरोही m. (न्), आरोढा m. (ढृ).—(Plant) वल्लिः f.

Clime, s. (Region) देशः, प्रदेशः.—(Temperature) जलवायुः m., जलाकाशः.

To clinch or clench, v. a. (Grasp) दृढमुष्टिना सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं), मुष्टिसङ्ग्राहेण पीड् (c. 10. पीडयति -यितुं); 'to clinch the fist,' मुष्टिं बन्ध् (c. 9. बध्नाति, बन्द्धुं), मुष्टिबन्धं or -सङ्ग्राहं कृ.—(Confirm) दृढीकृ, स्थिरीकृ, दृढप्रमाणं दा (c. 3. ददाति, दातुं).—(Fix the point of a nail on the other side) कीलाग्रं पराग् आवर्त्त्य विपरीतभागे निखन् (c. 1. -खनति -नितुं).

Clinch, s. (A pun) द्व्यर्थवाक्यं, श्लेषवाक्यं, श्लेषः.

Clincher, s. (A hold-fast) बन्धनकीलः, कीलकः, बन्धनी -नं.

To cling, v. n. अवलस्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, संलग्नीभू, अनुलग्नीभू, अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं or in pass. -बध्यते), सञ्ज् in pass. (सज्यते or सज्जते), अनुषञ्ज्, आसञ्ज्, प्रसञ्ज्, संसञ्ज्, ली (c. 4. लीयते, लेतुं); 'clinging to the neck,' कण्ठलग्नः -ग्ना -ग्नं.

Clingy, a. अनुलग्नशीलः -ला -लं, संलग्नशीलः -ला -लं, अनुषङ्गिकः -की -कं.

Clinic or clinical, a. अचिकित्स्यरोगोपहतत्वात् शयनात् समुत्थातुम् अक्षमः, शय्यागतः; 'clinical lecture,' दुश्चिकित्स्यव्याधिग्रस्तस्य शयनोपान्ते चिकित्साविद्यार्थिनां रोगोपचारोपदेशः.

To clink, v. n. शिञ्ज् (c. 2. शिङ्क्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), किङ्किण (nom. किङ्किणायते), विरु (c. 2. -रौति -रवितुं).

Clink, s. शिञ्जितं, आशिञ्जितं, क्वणितं, किङ्किणिशब्दः, घर्घरारवः.

Clinquant, a. हेमरत्नभूषितः -ता -तं, अलङ्कारिष्णुः -ष्णुः -ष्णु.

To clip, v. a. (Embrace, hug) गाढम् आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), बाहुभ्यां परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं) or उपगुह् (c. 1. -गूहति -गूहितुं).—(Shear) आवप् in caus. (-वापयति -यितुं), परिवप्, मुण्ड् (c. 1. मुण्डति -ण्डितुं).—(Cut off) छिद् (c. 7. छिनत्ति, छेत्तुं), लू (c. 9. लुनाति, लवितुं), निकृत् (c. 6. -कृन्तति -कर्त्तितुं).—(Shorten) ह्रस् in caus. (ह्रासयति -यितुं), संहृ (c. 1. -हरति -हर्त्तुं).

Clipped, p. p. छिन्नः -न्ना -न्नं, लूनः -ना -नं, कृत्तः -त्ता -त्तं, तष्टः -ष्टा -ष्टं, परिवापितः -ता -तं, कृतवापः -पा -पं, यमितः -ता -तं.

Clipper, s. (Debaser of coin) वञ्चकः.—(Barber) मुण्डी m. (न्).

Clipping, s. विदलं, छिन्नं, भिन्नं, लूनं, खण्डं.

Clitoris, s. योनिलिङ्गं, भगाङ्कुरः, स्मरच्छत्रं.

Cloak, s. प्रावारः -रकः, आवारः, पिधानं, प्रच्छदपटः, नीशारः. *See* Cloke.

To cloak, v. a. प्रावृ (c. 5. -वृणोति -वरितुं -रीतुं), छद् (c. 10. छादयति -यितुं).

Cloak-bag, s. प्रावारादिगात्रीयवस्त्रवाहनार्थं कोषः, वस्त्रकोषः.

Clock, s. घटी, यन्त्रः, यामघोषा, यामनाली.—(Of a stocking) पादाच्छादनपार्श्वयोः सूचिकर्म्म n. (न्).

Clockmaker, s. घटीकारी m. (रिन्), घटीकारः, यन्त्रकृत्, यन्त्रविक्रेता m. (तृ).

CLOCKMAKING, *s.* घटीनिर्म्माणं, इन्द्रकरणं, घटीनिर्म्माणशिल्पं.

CLOCKWORK, *s.* घटीकर्म्म *n.* (न्), घटीक्रिया, स्ववहितकर्म्म, स्वसञ्चारितकर्म्म.

CLOD, *s.* (A lump of earth) लोष्टः -ष्टं -ष्टुः *m.*, मृल्लोष्टं, लेष्टुः *m.*, क्षितिखण्डः, दलनी, दलिः *m.* -ली; 'clod-crusher,' लोष्टमर्द्दी *m.* (न्).—(A lump of any thing) पिण्डः -ण्डं.

CLODDY, *a.* लोष्टमयः -यी -यं, लोष्टपूर्णः -र्णा -र्णं, मार्त्तिकः -की -कं.

CLODPATE, or **CLODPOLL**, or **CLODHOPPER**, *s.* जडः, स्थूलबुद्धिः *m.*, मूढः.

To **CLOG**, *v. a.* (To shackle) शृङ्खलया or निगडेन बन्ध् (c. 9. बध्नाति बन्द्धुं), शृङ्खल (nom. शृङ्खलयति -यितुं), पाश (nom. पाशयति -यितुं), पाशीकृ, योक्त्र (nom. योक्त्रयति -यितुं).—(To hinder) संयम् (c. 1. -यच्छति -यन्तुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), विघ्न (nom. विघ्नयति -यितुं), रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, अवरुध्; प्रतिबन्ध्.

CLOG, *s.* (A shackle) शृङ्खला, पादपाशी, पाशः, निगडः, बन्धनं, अनुबन्धः.—(Any hindrance) विघ्नः, अन्तरायः, व्याघातः, प्रतिबन्धः, विष्टम्भः, बाधा, प्रतिरोधः.—(A wooden shoe) काष्ठपादुका, उपरपादुका.

CLOGGED, *p. p.* संयमितचरणः -णा -णं, शृङ्खलितः -ता -तं, सशृङ्खलः -ला -लं, निगडितः -ता -तं, शृङ्खलाबद्धः -द्धा -द्धं, प्रतिरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं.

CLOGGY, *a.* प्रतिबन्धकः -का -कं, प्रतिरोधी -धिनी -धि (न्), विघ्नकरः -री -रं.

CLOISTER, *s.* मठः, विहारः, सन्न्यासिनां मठः, मुनिस्थानं, मुनिशाला, मौनिगृहं.—(Piazza) एकपार्श्वे वायुव्याप्यो विहारयोग्यश् छन्नपथः.

To **CLOISTER**, *v. a.* सन्न्यासिनां मठे or मुनिशालायां प्रविश् in caus. (-वेशयति -यितुं).

CLOISTERAL, *a.* मठसम्बन्धी -न्धिनी -न्धि (न्), विविक्तसेवी -विनी -वि (न्).

CLOISTERED, *a.* मठप्रवेशितः -ता -तं, पृष्ठोत्कछत्रपथधारी -रिणी -रि (न्).

CLOISTERER, *s.* सन्न्यासी *m.* (न्), वानप्रस्थः, मठवासी *m.* (न्), मुनिः *m.* मौनी *m.* (न्).

CLOISTERESS, *s.* धर्म्मभगिनी, सन्न्यासिनी, धर्म्मचारिणी, मठवासिनी.

CLOKE, *s.* प्रावारः, उत्तरीयं, गात्रीयवस्त्रं, आच्छादनवस्त्रं. *See* CLOAK.

To **CLOSE**, *v. a.* (Shut) पिधा (c. 3. -दधाति -धातुं), अपिधा, तिरोधा; संहृ (c. 1. -हरति -हर्तुं); 'they closed the doors,' द्वाराणि पिदधुः.—(Shut up) निरुध् (c. 7. -रुणद्धि -रोद्धुं).—(Finish) समाप् in caus. (-आपयति -यितुं), अवसो (c. 4. -स्यति -सातुं), निर्वृत् in caus. (-वर्त्तयति -यितुं), साध् (c. 10. साधयति -यितुं), निष्पद् in caus. (-पादयति -यितुं), सम्पद्.—(Close in) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं).—(Close the eyes) मील् (c. 1. मीलति -लितुं), निमील्, or in caus. (मीलयति -यितुं), निमिष् (c. 6. -मिषति -मेषितुं).—(Close the mouth) मुखं पिधा.—(Close the hands) हस्तौ बन्ध् (c. 9. बध्नाति, बन्द्धुं) or संहन् (c. 2. -हन्ति -हन्तुं), हस्तपुटितं कृ.—(Close a book) पुस्तकं बन्ध्.

To **CLOSE**, *v. n.* (Coalesce) मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, संयुज् in pass. (-युज्यते), संश्लिष् in pass. (-श्लिष्यते), सङ्गम् (c. 1. -गच्छति -गन्तुं).—(Close with in fight) बाहूबाहवि or हस्ताहस्ति युध् (c. 4. युध्यते, योद्धुं), बाहुयुद्धे सङ्गम्.—(Close with, come to an agreement) सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), संविदम् उपगम्, संविदा निष्पन्नं कृ, सन्धा (c. 3. -धत्ते -धातुं).—(Come to an end) समाप् in pass. (-आप्यते), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमते -रन्तुं), निष्पद् in pass. (-पद्यते), विगम् (c. 1. -गच्छति -गन्तुं).

CLOSE, *s.* (Place enclosed) वाटः -टिका, वृतिः *f.*—(Conclusion) अवसानं, अवसायः, अन्तः, क्षयः, अन्तं, पर्यन्तं, शेषः, निर्वृत्तिः *f.*, समाप्तिः *f.*, पर्यवसानं, निष्पत्तिः *f.*, अत्ययः, निधनं, सातिः *f.*, विरामः, उपरमः, उपसंहारः; 'close of day,' दिवसात्ययः, दिवावसानं, सन्ध्याकालः, दिनान्तसमयः, सूर्य्यास्तकालः, सायाह्नः.

CLOSE, *a.* (Shut fast) संवृतः -ता -तं, बद्धः -द्धा -द्धं, दृढबद्धः -द्धा -द्धं.—(Confined, contracted) सङ्कटः -टा -टं, सम्बाधः -धा -धं, सङ्कुचितः -ता -तं, अविस्तृतः -ता -तं, श्लिष्टः -ष्टा -ष्टं.—(Firm) गाढः -ढा -ढं, दृढः -ढा -ढं.—(Solid, dense, without interstices) घनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, अविरलः -ला -लं, निरन्तरः -रा -रं -रालः -ला -लं, अनन्तरः -रा -रं, निबिडः -डा -डं, दृढसन्धिः -न्धिः -न्धि, निर्विवरः -रा -रं.—(Concise) संक्षिप्तः -प्ता -प्तं, साङ्क्षेपिकः -की -कं.—(Contiguous) समीपः -पा -पं, निकटः -टा -टं, सन्निकृष्टः -ष्टा -ष्टं, आसन्नः -न्ना -न्नं, पार्श्वगतः -ता -तं, पार्श्वस्थः -स्था -स्थं, उपस्थः -स्था -स्थं, उपान्तः -न्ता -न्तं; 'close to the ear,' कर्णान्तिकः -का -कं, उपकर्णं.—(Intimate, on terms of close friendship) दृढसौहृदः -दी -दं, परिचितः -ता -तं.—(Reserved) वाग्यतः -ता -तं.—(Retired) विविक्तः -क्ता -क्तं.—(Attentive) निविष्टः -ष्टा -ष्टं or अभिनिविष्टः, आसक्तः -क्ता -क्तं, एकाग्रः -ग्रा -ग्रं.—(Without air) निर्वातः -ता -तं.—(Secret) गुप्तः -प्ता -प्तं.—(Niggardly) स्वल्पव्ययी -यिनी -यि (न्), कृपणः -णा -णं; 'close attendance,' सान्निध्यं; 'close proximity,' अनन्तरं; 'close fight,' नियुद्धं, बाहुयुद्धं, रणसङ्कुलं, तुमुलं; 'close study,' निरन्तराभ्यासः, अभिनिवेशः.

CLOSED, *p. p.* (Shut) बद्धः -द्धा -द्धं, संवृतः -ता -तं, पिहितः -ता -तं, पिधानवान् -वती -वत् (त्), सपिधानः -ना -नं, मुद्रितः -ता -तं.—(As a bud) मुकुलीकृतः -ता -तं, अविकचः -चा -चं.—(As the eye) निमीलितः -ता -तं; 'with closed eye,' निमीलितनयनः.—(Settled, finished) निष्पन्नः -न्ना -न्नं, समाप्तः -प्ता -प्तं; 'with closed hands,' बद्धाञ्जलिः, संश्लिष्टाभ्यां पाणिभ्यां.

CLOSE-FISTED or **CLOSE-HANDED**, *a.* दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः -ष्टिः -ष्टि, बद्धमुष्टिः -ष्टिः -ष्टि, अमुक्तहस्तः -स्ता -स्तं.

CLOSELY, *adv.* (Secretly) निभृतं, गुप्तं, सुनिभृतं, सुगुप्तं, रहसि.—(Nearly) निरन्तरं, अनन्तरं, सन्निकृष्टं, उपान्ते.—(Attentively) मनःप्रवेशेन, प्रयत्नात्.—(Firmly) गाढं, दृढं; 'closely attentive,' निविष्टः -ष्टा -ष्टं, आसक्तः -क्ता -क्तं, एकाग्रः -ग्रा -ग्रं, एकायनः -ना -नं, अनन्यवृत्तिः -त्तिः -त्ति, एकतानः -ना -नं.

CLOSENESS, *s.* (Nearness) समीपता, आनन्तर्य्यं, सान्निध्यं, उपस्थानं, नैकट्यं, सन्निकर्षः, अभ्यासत्वं.—(Secrecy) रहः *n.* (स्), गुप्तिः *f.*, सुगुप्तिः *f.*, गुप्तता, गूढत्वं.—(Compactness) घनता, सान्द्रता, नैबिड्यं, नैरन्तर्य्यं.—(Parsimony) स्वल्पव्ययः, कार्पण्यं.—(Want of air) निर्वातता.

CLOSE-STOOL, *s.* शयनीयान्ते विण्मूत्राधारः, शयनपार्श्वस्थं मूत्रपुरीषभाजनं.

CLOSET, *s.* कुटिः, कुटी, आगारं, कोष्ठः, निभृतागारं, गोपनागारं.

To **CLOSET**, *v. a.* कुट्यां निविश् in caus. (-वेशयति -यितुं) or गुप् (c. 1. गोपायति, गोप्तुं).

CLOSURE, *s.* पिधानं, वेष्टनं, आवेष्टनं, प्रावरणं, प्रावृतिः *f.*

CLOT, *s.* गुल्मः, पिण्डः -ण्डं, घनता; 'clot of blood,' रक्तगुल्मः, घनलोहितं; 'of hair,' जटा.

To **CLOT**, *v. n.* सान्द्रीभू, घनीभू.—(As hair) जट् (c. 1. जटति -टितुं), श्यै (c. 1. श्यायते, श्यातुं), पिण्डीभू.

CLOTH, *s.* पटः, वस्त्रं, वासः, वासः *n.* (स्), वसनं, चेलः -लं, चैलं, अंशुकं, मृगरोमजम् आच्छादनं, प्रोतं; 'fine cloth,' सुचेलकः, अंशुकं; 'coarse cloth,' स्थूलशाटकः, वराशिः *m.*; 'tattered cloth,' कर्पटः.—(Made of cloth) वास्त्रः -स्त्री -स्त्रं, वस्त्रमयः -यी -यं.—(Table-cloth) भोजनाधारपटः, फलकाच्छादनं.

To **CLOTHE**, *v. a.* वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, प्रवेष्ट्; आच्छद् (c. 10.

-छादयति -यितुं), वस् in caus. (वासयति), विवस्, प्रतिवस्, परिधा in caus. (-धापयति -यितुं), प्रवृ (c. 5. वृणोति -वरितुं -रीतुं), संव्ये (c. 1. -व्ययति -व्यातुं), वस्त्र (nom. वस्त्रयति -यितुं); 'to clothe one's self,' वस् (c. 2. वस्ते वसितुं), प्रवस्, विवस्; परिधा (c. 2. -धत्ते -धातुं); 'in armour,' सन्नह् (c. 4. -नह्यते -नद्धुं).

Clothed, *p. p.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, प्रावृतः -ता -तं, संवीतः -ता -तं, परिहितः -ता -तं, वेष्टितः -ता -तं, पिनद्धः -द्धा -द्धं, आमुक्तः -क्ता -क्तं, प्रतिमुक्तः -क्ता -क्तं, वासी -सिनी -सि (न्), वेशी -शिनी -शि (न्), वस्त्रान्वितः -ता -तं, सवासाः -साः -सः (स्), सचेलः -ला -लं, सनग्नः -ग्ना -ग्नं.

Clothes, *s. pl.* वस्त्रं, वासः *n.* (स्), वेशः, वसनं, प्रसाधनं, परिधानं, अम्बरं, संव्यानं, आच्छादः -दनं, सिचयः; 'a suit of clothes,' वस्त्रयुग्मं; 'old clothes,' जीर्णवस्त्रं, चीरं, प्रोथः; 'relating to clothes,' वास्त्रिकः -की -कं; 'clothes basket,' तरिः *f.*; 'bed-clothes,' शय्यास्तरणं: 'to put on one's clothes,' वस्त्राणि आछद् (c. 10. -छादयति -यितुं) or प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं) or परिधा (c. 3. -धत्ते -धातुं) or प्रसाध् (c. 10. -साधयति -यितुं) or आमुच् (c. 6. -मुञ्चति -मोक्तुं); 'to take off one's clothes,' वस्त्राणि अवतॄ in caus. (-तारयति -यितुं) or अवमुच् or उच्छद् or विहा (c. 3. -जहाति -हातुं); 'to change one's clothes,' अन्यवस्त्रं परिधा, निवस् (c.2.-वस्ते-वसितुं).

Clothier, *s.* पटकारः, वस्त्रकृत्, पटनिर्म्माणकृत्, पटनिर्म्माणोपजीवी *m.* (न्).

Clothing, *s.* परिधानं, प्रवारः, प्रच्छादनं, आच्छादनं, परिच्छदः; 'under-clothing,' अधोवसनं, अन्तर्वासः *n.* (स्), अन्तरीयं.

Clotpoll, *s.* जडः, मूढः, स्थूलबुद्धिः *m.*, मूर्खः, बर्ब्बरः.

Clotted or clotty, *a.* पिण्डीभूतः -ता -तं, पिण्डितः -ता -तं, गुल्मी -ल्मिनी -ल्मि (न्), घनीभूतः -ता -तं, श्यानः -ना -नं: 'blood,' घनलोहितं, रक्तगुल्मः; 'clotted hair,' जटिः, जुटकं, जूटः.

Cloud, *s.* अभ्रं, मेघः, घनः, पर्ज्जन्यः, वलाहकः, जीमूतः, वृष्टिमान् *m.* (त्), जलधरः, तोयधरः, पयोधरः, धाराधरः, नीरधरः, जलदः, पयोदः, वारिदः, नीरदः, पाथोदः, अम्बोदः, जलवाहः, वारिवाहः -हनः, तोयवाहः, अम्बुवाहः, अम्बुभृत्, शक्रवाहनः, वारितस्करः, पयोजन्मा *m.* (न्), जलमुक् *m.* (च्), वारिमुक् *m.* (च्) or वार्म्मुक्, पयोमुक् *m.* (च्), वारिरः, पर्व्वताशयः, तडित्वान् *m.* (त्), स्तनयित्नुः *m.*, धूमयोनिः *m.*, व्योमधूमः, नभोधूमः, जलमसिः *m.*, वारिमसिः *m.*, नीलाभ्रः, खचरः, नभश्चरः, गगणध्वजः, नभोरुहः, नभोगजः, देवः, पारगः, वासवः, मुदिरः, दर्द्दुरः, उरणकः, नभाट् *m.* (ज्); 'a black cloud,' नीलाभ्रः *m.*, असिताभ्रं, कालिका; 'a gathering of clouds,' घनजालं, जलदसंहतिः *f.*, घनौघः; 'a succession of clouds,' मेघमाला, कादम्बिनी; 'a cloud of dust,' रजोमेघः, धूलीपटलः.

To cloud, *v. a.* अभ्रं कृ, मेघं कृ, तिमिर (nom. तिमिरयति -यितुं), प्रच्छद् (c. 10. -छादयति -यितुं), तिमिरीकृ, मलिनीकृ.

To cloud, *v. n.* मेघावृतः -ता -तं भू, मेघाच्छन्नः -न्ना -न्नं भू, अभ्र (nom. अभ्रायते), मेघ (nom. मेघायते).

Clouded, *p. p.* मेघच्छन्नः -न्ना -न्नं, घनोपरुद्धः -द्धा -द्धं, दुर्द्दिनग्रस्तः -स्ता -स्तं, सन्तमसः -सा -सं, तमोवृतः -ता -तं, मलिनः -ना -नं, मलिनप्रभः -भा -भं.

Cloud-capt, *a.* अभ्रशेखरः -रा -रं, असिताभ्रशेखरः -रा -रं, अभ्रंलिहः -हा -हं, नभोलिट् (ह्).

Cloudily, *adv.* साभ्रं, समेघं, तिमिरं, सान्धकारं, निगूढार्थं.

Cloudiness, *s.* साभ्रता, मेघाकीर्णता, मेघतिमिरं, जलदसंहतिः *f.*, दुर्द्दिनं.

Cloudless, *a.* अनभ्रः -भ्रा -भ्रं, व्यभ्रः -भ्रा -भ्रं, निरभ्रः -भ्रा -भ्रं, अमेघः -घा -घं, गततोयदः -दा -दं, वितिमिरः -रा -रं.

Cloudy, *a.* साभ्रः -भ्रा -भ्रं, अभ्रियः -या -यं, मेघाकीर्णः -र्णा -र्णं, नीरदी -दिनी -दि (न्), समेघः -घा -घं, सघनः -ना -नं, दार्द्दुरः -री -रं; 'cloudy weather,' दुर्द्दिनं.—(Dark, obscure) तिमिरः -रा -रं, तमस्वी -स्विनी -स्वि (न्), तमोवृतः -ता -तं, तामसः -सी -सं, अन्धकारयुक्तः -क्ता -क्तं.

Clough, *s.* (Cleft of a hill) दरी -रिः *f.*, दरद्, कन्दरः -री -रं.—(An allowance of two in every hundred) शते शते पञ्चाशत्तमभागदानं.

Clove, *s.* (The spice) लवङ्गं, तीक्ष्णपुष्पं, मादनं, देवकुसुमं, दिव्यगन्धं, वाःपुष्पं, श्रीः, श्रीसंज्ञं, सुपुष्पं, भृङ्गारं, वश्यं, शृङ्गारं, चन्दकपुष्पं.—(The clove tree) लवङ्गः, तोयधिप्रियः.—(Of garlic) रसुनमूलं.

Cloven, *a.* भिन्नः -न्ना -न्नं, भेदितः -ता -तं, विभिन्नः -न्ना -न्नं, छिन्नः -न्ना -न्नं, दलितः -ता -तं, विदलितः -ता -तं -लीकृतः -ता -तं, पृथक्कृतः -ता -तं; 'cloven tongued,' द्विखण्डजिह्वः -ह्वा -ह्वं, द्विजिह्वः -ह्वा -ह्वं.

Cloven-footed or cloven-hoofed, *a.* द्विशफः -फा -फं, द्विखण्डशफः -फा -फं.

Clover, *s.* (Trefoil) त्रिपर्णः -र्णी -र्णं, त्रिपत्रः -त्रा -त्रं; 'to live in clover,' महता विलासेन जीव् (c. 1. जीवति -वितुं), महासुखेन जीव्.

Clovered, *a.* त्रिपर्णाचितः -ता -तं, त्रिपत्राकीर्णः -र्णा -र्णं, सत्रिपत्रः -त्रा -त्रं.

Clout, *s.* (A cloth for any mean use) चीरं, कर्पटः, वस्त्रखण्डं.—(A patch) कन्था.—(An iron plate over an axle-tree) अक्षायसफलकं.

To clout, *v. a.* (To patch) कन्था (nom. कन्थायति -यितुं), जीर्णवस्त्राणि समाधा (c. 3. -दधाति -धत्ते -धातुं) चीरं चीरेण सन्धा.

Clouted, *a.* श्यानः -ना -नं, संश्यानः -ना -नं, घनीभूतः -ता -तं.

Clouterly, *a.* (Clumsy) अदक्षः -क्षा -क्षं, अकृती -तिनी -ति (न्).

Clown, *s.* ग्राम्यजनः, ग्रामिकः, ग्रामी *m.* (न्), ग्रामवासः, ग्रामेवासी *m.* (न्), वृषलः, जानपदः, प्राकृतजनः, असभ्यजनः, पृथग्जनः, मूढः.

Clownish, *a.* ग्राम्यः -म्या -म्यं -मीयः -या -यं -मीणः -णा -णं -मेयः -यी -यं -मिकः -की -कं, असभ्यः -भ्या -भ्यं, अशिष्टः -ष्टा -ष्टं, असत्कृतः -ता -तं, ग्राम्यबुद्धिः -द्धिः -द्धि.

Clownishly, *adv.* ग्राम्यजनवत्, वृषलवत्, ग्रामीयप्रकारेण, असभ्यं.

Clownishness, *s.* ग्राम्यता, ग्रामीयत्वं, असभ्यता, अशिष्टता, ग्राम्यबुद्धित्वं.

To cloy, *v. a.* अतिसौहित्यं or अतितृप्तिं जन् in caus. (जनयति -यितुं) or कृ, अतिशयेन or एकान्ततस् or अतिरिक्तं तृप् in caus. (तर्पयति -यितुं), or सन्तुष् in caus. (-तोषयति -यितुं).

Cloyed, *p. p.* अतितृप्तः -प्ता -प्तं, अतिसुहितः -ता -तं, अतिसन्तोषितः -ता -तं.

Club, *s.* यष्टिः *m.*, लगुडः, गदा, परिघः, उड्डालः, तोमरः -रा -रं, घनः, द्रुघणः; 'armed with a club,' याष्टीकः, लगुडहस्तः, यष्टिग्रहः, यष्टिहेतिकः.—(An assembly of companions) पंक्तिः *f.*, गणः, संसर्गः, सहभोजिनां संसर्गः, समांशिता; 'club-dinner,' गणचक्रकं, गणान्नं.—(Share of a reckoning) भागः, अंशः, उद्धारः, समांशः.

To club, *v. n.* (Contribute to a common expense) सर्व्वसाधारणव्यये स्वं स्वम् अंशं दा (c. 3. ददाति दातुं), or किञ्चित् किञ्चिद् दा.

Club-fo[illegible], *s.* क्षीपदं, स्थूलचरणं, कुब्जचरणं, गडुपादः, वक्रपादः.

Club-footed, *a.* क्षीपदी -दिनी -दि (न्), बृहत्पादः -दी -दं, स्थूलचरणः -णा -णं.

Clubheaded, *a.* स्थूलशिरस्कः -स्का -स्कं, बृहन्मस्तकः -का -कं.

Clubroom, *s.* एकपंक्तिसामान्यशाला, साधारणशाला, इन्द्रकं.

To cluck, *v. n.* कुक्कुटीवत् शावकाह्वानार्थकं शब्दं कृ, कद् कद् शब्दं कृ.

Clucking, *s.* शावकाह्वानसमये कुक्कुटीरावः, कद् कद् शब्दः

Clue, *s.* सूत्रकोषं, सूत्रं. *See* Clew.

Clump, *s.* (Of grass) गुल्मः, स्तम्बः, गुच्छः, गुत्सः, काण्डः, विततिः *f.*, पिण्डः -ण्डं; 'a clump of reeds,' शरस्तम्बः, वंशविततिः *f.*—(A shapeless mass of wood) स्थूलकाष्ठं.

CLUMSILY, *adv.* अदक्षं, अनाज्ञं, अकृतिवत्, दाक्ष्यं विना, अपटु, आदाक्ष्येण.

CLUMSINESS, *s.* आचातुर्यं, आदाक्ष्यं, अनैपुण्यं, अपाटवं, अकृतित्वं.

CLUMSY, *a.* स्थूलः -ला -लं, अदक्षः -क्षा -क्षं, अनिपुणः -णा -णं, अकुशलः -ला -लं, अकृती -तिनी -ति (न्), अनाज्ञः -ज्ञा -ज्ञं, अविज्ञः -ज्ञा -ज्ञं, अपटुः, टुः -टु.

CLUSTER, *s.* (A bunch) गुच्छः, गुच्छकः, स्तबकः, स्तबः, सान्द्रं, गुत्सः -त्सकः, गुलुच्छः, विततिः *f.*, 'a number of beings,' सङ्घः, ओघः, समूहः, गणः, सङ्घातः, वृन्दं, निवहः; 'cluster of four houses,' चतुःशालं, सञ्जवनं; 'of reeds,' शरस्तम्बः, वंशविततिः *f.*; 'of people,' जनौघं, जनसमूहः; 'of grapes,' द्राक्षास्तबकः; 'in clusters,' सङ्घशस्, गुल्मशस्.

To CLUSTER, *v. a.* गुल्मीकृ, पिण्डीकृ, एकीकृ, सचि (c. 5. -चिनोति -चेतुं).

To CLUSTER, *v. n.* गुल्मीभू, पिण्डीभू, एकीभू, वृन्दीभू, स्तबकरूपेण रुह् (c. 1. रोहति, रोढुं)

CLUSTERING, *a.* गुल्मी -ल्मिनी -ल्मि (न्), आलीनः -ना -नं, सस्तबकः -का -कं, स्तबकान्वितः -ता -तं, प्रलीनः -ना -नं, प्रलीनः -ना -नं, गुच्छाकारः -रा -रं.

To CLUTCH, *v. a.* (To grasp) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), सङ्ग्रह्, धृ (c. 1. धरति धर्तुं).—(To double the hand) मुष्टिं बन्ध् (c. 9. बध्नाति बन्द्धुं) or सङ्ग्रह्.

CLUTCH, *s.* सङ्ग्राहः, मुष्टिसङ्ग्राहः, ग्रहणं, मुष्टिबन्धः.—(Claw, hand) नखः -खं, पाणिः *m.*, हस्तः; 'to rescue from the clutches of the enemy,' शत्रुवशात् परित्रातुं.

CLUTCHED, *p. p.* गृहीतः -ता -तं, धृतः -ता -तं, मुष्टिसङ्ग्राहपीडितः -ता -तं.

CLUTTER, *s.* कोलाहलः, हलहलाशब्दः, तुमुलं, कालकीलः.

To CLUTTER, *v. n.* कोलाहलं कृ, हलहलाशब्दं कृ.

CLYSTER, *s.* वस्तिः *m. f.*, वस्तिकर्म्म *n.* (न्), वस्तिद्वारेण अन्तर्निवेशितम् औषधीयद्रव्यं.

CLYSTER-PIPE, *s.* नेत्रं, वस्तिशिरः *n.* (स्), वस्तिनाली.

To COACERVATE, *v. a.* सचि (c. 5. -चिनोति -चेतुं), समाचि, समुपचि, राशीकृ, पिण्डीकृ, एकीचयीकृ, पुञ्जीकृ, पूगीकृ.

COACERVATED, *p. p.* राशिगतः -ता -तं, एकीचयभूतः -ता -तं, पुञ्जितः -ता -तं.

COACERVATION, *s.* राशीकरणं, एकीचयीकरणं, सञ्चयनं, एकीचयभावः.

COACH, *s.* रथः, चातुरं, चक्रयानं, यानं, गन्त्री, गन्त्रीरथः, शकटः, प्रवहणं, वाहनं; 'coach and four,' चतुरश्वो रथः; 'riding in a coach,' रथारोही *m.* (न्), रथारूढः, यानारूढः; 'he travels by coach,' रथेन सञ्चरति.

COACH-BOX, *s.* रथोपस्थः, सूतासनं, सारथिस्थानं.

COACH-DRIVING, *s.* रथसारथ्यं, रथवाहनं.

COACHFUL, *s.* पूर्णरथः, चातुरकं, शाकटं, रथपूरणं.

COACH-HORSE, *s.* रथ्यः, प्रवहणवाजी *m.* (न्), रथाश्वः.

COACH-HOUSE, *s.* रथस्थानं, रथशाला, रथागारं, रथाधारः.

COACHMAKER, *s.* रथकारः, रथकृत्, रथनिर्म्माणकृत्, रथशिल्पी *m.* (न्).

COACHMAN, *s.* सूतः, सारथिः *m.*, यन्ता *m.* (न्), नियन्ता *m.* (न्), चातुरिकः, वाहकः, रथवाहकः, प्रवहणवाहकः, प्राजकः, प्राजिता *m.* (न्), क्षत्ता *m.* (न्), हयज्ञः, सादिः *m.*, दक्षिणस्थः, चाक्रिकः, प्रचेता *m* (न्).

COACTION, *s.* बलात्कारः, बलात्कारप्रयोगः, प्रमाथः, नियमनं, निग्रहः.

COACTIVE, *a.* बलात्कारी -रिणी -रि (न्), बलान्वितः -ता -तं, बली -लिनी -लि (न्), सबलः -ला -लं, प्रमाथी -थिनी -थि (न्), नैयमिकः -की -कं, नियामकः -का -कं, आवश्यकः -का -कं.

COADJUTOR, *s.* सहकारी *m.* (न्), सहकृत्, सहकृत्वा *m.* (न्), सहायः, सम्भूयकारी *m.* (न्), प्रतियोगी *m.* (न्).

COADJUVANCY, *s.* सहकारः -रिता, साहाय्यं, सम्प्रतिपत्तिः *f.*, प्रतियोगिता.

COAGMENTATION, *s.* राशीकरणं, एकीकरणं, सञ्चयनं, पिण्डीकरणं, सन्निपातः.

COAGULABLE, *a.* श्यानीयः -या -यं, श्येयः -या -यं, घनीकर्त्तुं शक्यः -क्या -क्यं.

To COAGULATE, *v. a.* श्यै in caus. (श्यापयति -यितुं), श्यानीकृ, घनीकृ.

To COAGULATE, *v. n.* श्यै (c. 1. श्यायते, श्यातुं), घनीभू, श्यानीभू.

COAGULATED, *p. p.* शीनः -ना -नं, श्यानः -ना -नं, आश्यानः -ना -नं, घनीभूतः -ता -तं, संहतः -ता -तं.

COAGULATION, *s.* शीनता, घनता -त्वं, संहतत्वं, घनीभावः.

COAL, *s.* अङ्गारः -रं, आलातं, निधापकः, कृष्णमृत् *f.* -मृत्तिका, कृष्णभूमिः *f.*; 'burning coal,' तप्ताङ्गारः.

To COAL, *v. a.* अङ्गार (nom. अङ्गारयति -यितुं), अङ्गारीकृ.

COAL-BLACK, *a.* अङ्गारसवर्णः -र्णा -र्णं, घनकृष्णः -ष्णा -ष्णं, अञ्जनकालः -ला -लं.

COAL-HOLE OR COAL-HOUSE, *s.* अङ्गारागारं, अङ्गारगुप्तिः *f.*, कृष्णमृत्तिकाधारः.

COAL-MAN, COAL-MERCHANT, *s.* अङ्गारविक्रेता *m.* (तृ), कृष्णभूमिविक्रयी *m.* (न्), अङ्गारविक्रयोपजीवी *m.* (न्).

COAL-MINE, COAL-PIT, *s.* अङ्गाराकरः, अङ्गारखानिः *m.*, अङ्गारोत्पत्तिस्थानं.

To COALESCE, *v. n.* संयुज् in pass. (-युज्यते), सम्मिल् (c. 6. -मिलति -मेलितुं), सङ्गम् (c. 1. -गच्छति -गन्तुं), संसृज् in pass. (-सृज्यते), एकीभू, एकत्र भू or गम्, संश्लिष् in pass. (-श्लिष्यते), संलग्नीभू.

COALITION, *s.* संयोगः, संसृष्टिः *f.*, संसर्गः, सङ्गः -ङ्गमः -ङ्गतिः *f.*, मेलनं, संश्लेषः, संसक्तिः, अनुषङ्गः, संहतिः *f.*, सङ्घातः.

COALY, *a.* अङ्गारमयः -यी -यं, आङ्गारिकः -की -कं, अङ्गारपूर्णः -र्णा -र्णं.

COAPTATION, *s.* समायोगः, संयोजनं, समाधानं, सन्धानं.

To COARCT, *v. a.* सङ्कुच् (c. 1. -कोचति -कोचितुं), संहृ (c. 1. -हरति -हर्त्तुं).

COARCTATION, *s.* सङ्कोचः -चनं, संवारः, संवृतिः, ह्रासः, सङ्क्षेपः, संयमः.

COARSE, *a.* (Not fine) घनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, निबिडः -डा -डं, स्थूलः -ला -लं, निरन्तरः -रा -रं, नीरन्ध्रः -न्ध्रा -न्ध्रं.—(Unpolished) अपरिष्कृतः -ता -तं, असंस्कृतः -ता -तं, अशिष्टः -ष्टा -ष्टं.—(Indelicate, indecent) अवाच्यः -च्या -च्यं, अशुद्धः -द्धा -द्धं. (Vulgar) असभ्यः -भ्या -भ्यं, प्राकृतः -ता -तं, ग्राम्यः -म्या -म्यं, खीलः -ला -लं, अश्लीलः -ला -लं.—(Vile) नीचः -चा -चं, निकृष्टः -ष्टा -ष्टं, कदर्य्यः -र्य्या -र्य्यं, कुत्सितः -ता -तं; 'coarse cloth,' स्थूलपट्टं, स्थूलशाटकः, वराशिः *m.*; 'coarse-minded,' प्राकृतचेताः -ताः -तः (स्); 'coarse fare,' मन्दाहारः; 'coarse abuse,' अश्लीलाक्षेपः; 'coarse language,' अश्लीलं, खलोक्तिः *f.*

COARSELY, *adv.* अशिष्टं, अशुद्धं, निकृष्टं, मन्दं, अश्लीलं, अपरिष्कृतं.

COARSENESS, *s.* (Of substance) घनता, स्थूलता, सान्द्रता, स्थौल्यं, नैबिड्यं, नैरन्तर्य्यं.—(Want of polish, vulgarity) अपरिष्कारः, अशिष्टता, असभ्यता, अशुद्धिः *f.*, नीचता, अश्लीलत्वं.

COAST, *s.* (Sea-coast) समुद्रतीरं, समुद्रतटं, वेला, वेलामूलं, समुद्रान्तं, अब्धितीरं.—(Border, limit) सीमा, समन्तः, सामन्तं.—(Quarter) दिक् *f.* (श्), देशः, प्रदेशः; 'the coast is clear,' गतं भयं, निर्विघ्नः पन्थाः.

To COAST, *v. n.* उपतीरं or उपतटं or वेलानिकटे नावं or पोतं वह् in caus. (वाहयति -यितुं), or नौकया वह् in pass. (उह्यते).

COASTER, *s.* उपतीरं पोतवाहकः, समुद्रवेलावर्त्ती *m.* (न्).

COASTING, *s.* उपतीरं नौकावाहनं, वेलानिकटे वर्त्तनं.

COAT, *s.* (An upper garment) प्रावारः, उत्तरीयं, परिधेयं, निचोलः, वसनं; 'a covering,' पटलं, छादनं, छदनं, आच्छादनं, प्रावरणं, पुटः -टं, आवेष्टनं; 'coat of the eye,' अक्षिपटलं.—(Hair of a beast) रोम *n.* (न्), लोम *n.* (न्); 'coat of a horse,' अश्वरोम *n.* (न्).—(Coat of arms) कुलचिह्नपत्रं.

To COAT, *v. a.* छद् (c. 10. छादयति -यितुं), वेष्ट् in caus. (वेष्टयति -यितुं). —(Inlay) समुद्व्यध् (c. 4. -विध्यति -व्यद्धुं).—(Coat with paint) लिप् (c. 6. लिम्पति, लेप्तुं).

COATED, *p. p.* छन्नः -न्ना -न्नं, आछन्नः -न्ना -न्नं, वेष्टितः -ता -तं, अनुविद्धः -द्धा -द्धं, रूपितः -ता -तं, छुरितः -ता -तं, लिप्तः -प्ता -प्तं.

COATING, *s.* पटलं, पुटः -टी -टं, छादनं.—(Of paint) लेपः.

To COAX, *v. a.* लल (c. 10. लालयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), मधुरैर्वाक्यैः or चाटूक्त्या सान्त्व् or प्रलुभ् in caus. (-लोभयति -यितुं).

COAXED, *p. p.* लालितः -ता -तं, चाटुकारापन्नः -न्ना -न्नं.

COAXER, *s.* लाली *m.* (न्), चाटुवादी *m.* (न्), चाटुकारः, सान्त्ववादः, आश्वासकः.

COAXING, *s.* लालनं, चाटुः *m.* -टु *n.*, चाटूक्तिः *f.*, मधुरवचः *n.* (स्), मधुरवाक्यं, आश्वासनं; 'repeated coaxing,' चाटुशतं.

COB, *s.* (Sea-fowl) समुद्रीयपक्षिभेदः.—(Entire horse) बीजाश्वः, सवृषणोऽश्वः.—(A small compact horse) दृढदेहः क्षुद्रवाजी *m.* (न्).

COBALT, *s.* (Mineral substance) आवर्त्तः, मधुधातुः *m.*, मनःशिलाधातुः.

To COBBLE, *v. a.* (To mend shoes) जीर्णपादुकाः सूच्या समाधा (c. 3. -दधाति -धातुं) or सन्धा.—(To make any thing clumsily) आदाक्ष्येण किञ्चित् कृ or निर्म्मा (c. 2. -माति -मातुं).

COBBLER, *s.* (A mender of old shoes) जीर्णपादुकासन्धाता *m.* (तृ).—(A clumsy workman) अदक्षः शिल्पी *m.* (न्), अनिपुणः, अनभिज्ञः.

COBIRON, *s.* मांससंस्कारे प्रयुक्तः स्थूलाग्रो लोहशूलः.

COBISHOP, *s.* धर्म्माध्यक्षसहायः, धर्म्माधिपतेः सहकारी *m.* (न्).

COBRA CAPELLO, *s.* (Snake) फणाकरः, फणी *m.* (न्), फणवान् *m.* (त्), नागः.

COBWEB, *s.* ऊर्णनाभजालः, जालः -लं, मर्कटवासः, मर्कटजालः, आशाबन्धः, लूतातन्तुवितानं.

COCCIFEROUS, *a.* गुटिकाकारफलविशिष्टः -ष्टा -ष्टं.

COCHINEAL, *s.* (Insect) लाक्षा, जतु *n.* -तुकं, तितिभः, क्रिमिः *m.*

COCHLEARY or COCHLEATED, *a.* आवर्त्ती -र्त्तिनी -र्त्ति (न्), परिवर्त्तकः -का -कं.

COCK, *s.* (The male to the hen) कुक्कुटः, चरणायुधः, नखायुधः, स्वर्णचूडः, ताम्रचूडः, ताम्रशिखी *m.* (न्), शिखी *m.* (न्), शिखण्डी *m.* (न्) -ण्डिकः, कृकवाकुः *m.*, कलविकः, कालज्ञः, उषाकलः, निशावेदी *m.* (न्), रात्रिवेदी *m.* (न्), यामघोषः, रसाखनः, सुपर्णः, पूर्णकः; 'relating to a cock,' कार्कवाकवः -वी -वं; 'cock's comb,' चूडा, शिखा; 'a cock-sparrow,' चटकः.—(Weathercock) प्रासादशृङ्गाग्रे स्थापितं कुक्कुटाकारं वातस्कन्धलक्षणं, वायुलक्षणं, वायुध्वजः, वायुस्कन्धलक्ष्यं.—(Spout to let out water at will) सपिधानं जलनिर्गमरन्ध्रं, प्रणाली, जलनिर्गमः, जलस्रावणयन्त्रं.—(Notch of an arrow) बाणाग्रभागे अवच्छेदः.—(Cock of a gun) आग्नेयनाडिसम्बन्धी सूक्ष्ममुद्गरविशेषो यद्द्वारेण अन्तःस्थचूर्णे संज्वाल्यते.—(A leader) मुख्यः, मुखरः, पुरोगः.—(Heap of hay) शुष्कतृणचितिः *f.*, तृणोत्करः.—(Form of a hat) शिरस्कसंस्कारः, शिरस्त्राकारः; 'cock a hoop,' जयी *m.* (न्), दृप्तः, दर्पध्मातः, गर्वोद्धतः; 'cock and a bull story,' मृषाकथा, शशविषाणधनुर् रूप्य इति मृषार्थकम् आख्यानं.

To COCK, *v. a.* (To set erect) उन्नम् in caus. (-नामयति -नमयति -यितुं), उच्छ्रि (c. 1. -श्रयति -यितुं), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्धन् (c. 2. -हन्ति -हन्तुं); 'to cock the ears,' कर्णौ स्तब्धीकृ; 'the tail,' उत्पुच्छ (nom. उत्पुच्छयते -यितुं).—(To put hay into cocks) शुष्कतृणम् उत्करीकृ.—(To cock a gun) आग्नेयनाडिसम्बन्धिनं पूर्व्वोक्तसूक्ष्ममुद्गरम् उन्नम् in caus. (-नमयति -यितुं).

To COCK, *v. n.* कुक्कुटवत् सलगत्या चल् (c. 1. चलति -लितुं), दृप् (c. 4. दृप्यति).

COCKED, *p. p.* उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, उत्क्षिप्तः -प्ता -प्तं; 'with tail cocked,' समुन्नतलाङ्गूलः -ला -लं.

COCKADE, *s.* राजव्यापृतस्य सेवकेन शिरस्कोपरि भृता चूडा, कुक्कुटचूडाकारो मस्तकालङ्कारः.

COCKATRICE, *s.* अजगरः, वाहसः, कुक्कुटाण्डजः सर्पः or व्यालः.

COCKBOAT, *s.* उपनौका, क्षुद्रनौका, क्षुद्रपोतः, उपतरिः *f.*

COCKCHAFER, *s.* पिङ्गशरीरो ध्वनमोदी भ्रमरभेदः.

COCKCROWING, *s.* कुक्कुटरवः -वणं, चरणायुधशब्दः.—(Morning) प्रभातकालः, प्रातःकालः.

To COCKER, *v. a.* (To fondle) कोमलं or कोमलप्रकारेण पुष् (c. 9. पुष्णाति, c. 1. पोषति -षितुं), or संवृध् in caus. (-वर्धयति -यितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं), क्रोडीकृ.

COCKEREL, *s.* (Young cock) कुक्कुटशावकः, चरणायुधशावकः.

COCKERING, *s.* पोषणं, संवर्धनं, अनुरोधः, छन्दोनुवृत्तं, कोमलता.

COCKET, *s.* शौल्किकमुद्रा, शुल्कस्थाने द्रव्यनिक्षेपानन्तरं शौल्किकसकाशात् प्रत्ययपत्रं.

COCKFIGHT, *s.* प्राणिद्यूतं, समाह्वयः, साह्वयः, कौलीनं.

COCKHORSE, *a.* अश्वारूढः -ढा -ढं, जयी -यिनी -यि (न्), दर्पध्मातः -ता -तं.

COCKLE, *s.* (Shell-fish) दुर्नामा *m.* -म्नी *f.* (न्) दीर्घकोषिका, सितालिका, शुक्तिः *f.*—(Weed growing in corn) कक्षः, शस्यमध्येरुह ओषधिभेदः.

COCKLED, *a.* दुर्नामाकारः -रा -रं, शौक्तिकः -की -कं, आवर्त्ती -र्त्तिनी -र्त्ति (न्).

COCKLOFT, *s.* कूटागारं, सौमः -मं, चूला, चन्द्रशालिका, गृहस्य उपरिस्थः प्रकोष्ठः.

COCKMASTER, *s.* चरणायुधपालकः, युद्धकुक्कुटपोषकः.

COCKMATCH, *s.* कुक्कुटयुद्धं, चरणायुधसमाह्वयः, कौलीनं.

COCKNEY, *s.* नागरजनः, पुरवासी *m.* (न्), नगरवासी *m.*, प्राकृतजनः, पृथग्जनः.

COCKPIT, *s.* (Area where cocks fight) कुक्कुटयुद्धभूमिः.—(In a man of war) युद्धनौकाया अधोभागे कायशल्यादिचिकित्सायोग्या कुटी.

COCKROACH, *s.* परोष्णी, तैलाधारा, तैलपा *f.* -पायिका, चारिका, पिङ्गकपिशा.

COCK'S-COMB, *s.* *See* COXCOMB.

COCKSURE, *a.* सुनिश्चितः -ता -तं, निःसन्देहः -हा -हं, असन्दिग्धः -ग्धा -ग्धं.

COCKSWAIN, *s.* उपनौकाकर्णधारः, क्षुद्रनौकापतिः *m.*

COCOA-NUT, *s.* नारिकेलः, नालिकेरः, नारिकेरः, नाडिकेलः, नारिकेली, पयोधरः, कौशिकफलं, खानोदकः, पुटोदकः, दाक्षिणात्यः.—(The tree) तृणद्रुमः, फलकेशरः, दृढफलः, मुण्डफलः, सदाफलः, शिरःफलः, सदापुष्पः, दृढमूलः, सुतुङ्गः, सुभङ्गः, लाङ्गली.—(The juice) नारिकेलरसः.

COCOON, *s.* (Of the silk worm) कृमिकोषः, कीटकोषः, गुटिका.

COCTION, *s.* निष्क्वाथः, क्वाथः, क्वथनं, पाचनं.

COD or COD-FISH, *s.* स्थूलशिरस्कः समुद्रीयमत्स्यभेदः.

COD, *s.* (Seed-vessel, pod) बीजकोशः, बीजगुप्तिः *f.*, शमी, पुटः.

CODDED, *p. p.* कोशस्थः -स्था -स्थं, कोषगुप्तः -प्ता -प्तं.

To CODDLE, *v. a.* (Parboil) ईषत्क्वथ् (c. 1. -क्वथति -थितुं), शनैः स्थाल्यां पच् (c. 1. पचति, पक्तुं) or तप् in caus. (तापयति -यितुं), कोष्णजलेन कोमलीकृ.—(Breed up tenderly) कोमलतया or सौकुमार्य्येण पुष् (c. 1. पोषति -षितुं).

CODE, *s.* (Of laws) धर्म्मसंहिता, स्मृतिशास्त्रं, धर्म्मशास्त्रं, स्मृतिः *f.*, व्यवहारविधिः *m.*

CODICIL, *s.* मृत्युलेखपत्रस्य अनुबन्धः or उपलेख्यं or उपाङ्गं or उत्तरखण्डं.

CODLING, *s.* भोजनात्पूर्व्वम् ईषत्क्वथनीय आपक्वः काष्ठफलभेदः.

COEFFICACY or COEFFICIENCY, *s.* सहकारित्वम् अनेकहेतुकानां प्रभावः, सहकारिता, संयोगिता, सम्प्रयोगिता, सम्प्रतिपत्तिः *f.*, सम्भूतिः *f.*

Coefficient, *s.* (In arithmetic) वर्णः, प्रकृतिः *f.*, गुणः.

Coemption, *s.* पूर्व्वक्रयः, प्रख्यातभाण्डक्रयः, अवच्छेदावच्छेदक्रयः, समुदयक्रयः.

Cœnobite, *s.* सर्व्वसामान्यो विभवो यस्य सौभ्रात्रमध्याद् एकभ्राता *m.* (तृ).

Coequal, *a.* अन्येन समः -मा -मं or समानः -ना -नं or तुल्यः -ल्या -ल्यं, समानपदस्थः -स्था -स्थं, समानजातीयः -या -यं, समभावः -वी -वं, सहधर्म्मी -र्म्मिणी -र्म्मि (न्), सधर्म्मा -र्म्मा -र्म्म (न्).

Coequality, *s.* अन्येन समता or समानता or तुल्यता, समानावस्था.

To coerce, *v. a.* बलात्कारेण यम् (c. 1. यच्छति, यन्तुं), नियम्, संयम्, विनियम्; or निग्रह् (c. 9. -गृह्णाति -ह्णीते -ग्रहीतुं) or शास् (c. 2. शास्ति, शासितुं), अनुशास्; यन्त्र् (c. 10. यन्त्रयति -यितुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), निषिध् (c. 1. -षेधति -धितुं).

Coerced, *p. p.* बलात्कारेण निगृहीतः -ता -तं, संयतः -ता -तं, निरुद्धः -द्धा -द्धं, संरुद्धः -द्धा -द्धं, यन्त्रितः -ता -तं, प्रत्याहृतः -ता -तं.

Coercible, *a.* निग्रहीतव्यः -व्या -व्यं, नियन्तव्यः -व्या -व्यं, यन्त्रणीयः -या -यं.

Coercion, *s.* संयमः -मनं, नियमनं, निग्रहः -हणं, निगृहीतिः *f.*, यन्त्रणं, प्रत्याहरणं.

Coercive, *a.* बलात्कारी -रिणी -रि (न्), प्रतिरोधी -धिनी -धि (न्), नियामकः -का -कं.

Coessential, *a.* समभावः -वी -वं, सहभावी -विनी -वि (न्).

Coessentiality, *s.* समभावः or भावसमानता, सहभावित्वं.

Coetaneous, *a.* समानवयस्कः -स्का -स्कं. *See* Coeval.

Coeternal, *a.* अन्येन सह नित्यकालस्थायी -यिनी -यि (न्) or अनन्तकालस्थायी or आद्यन्तहीनः -ना -नं or सनातनः -ना -नं.

Coeternity, *s.* समनित्यता, समानानन्तता, समानमनित्यता.

Coeval, *a.* समानवयस्कः -स्का -स्कं, समवयस्कः -स्का -स्कं, समानवयाः -याः -यः (स्) or तुल्यवयाः or सवयाः, समानकालीनः -ना -नं, एककालीनः -ना -नं, समानजन्मा -न्मा -न्म (न्).

Coeval, *s.* वयस्यः, सहभावी *m.* (न्), सवयाः *m.* (स्), तुल्यवयाः.

To coexist, *v. n.* सम्भू (c. 1. -भवति -वितुं), सह or एककाले वृत् (c. 1. वर्त्तते -र्त्तितुं) or स्था (c. 1. तिष्ठति, स्थातुं) or जीव् (c. 1. जीवति -वितुं).

Coexistence, *s.* एककाले वर्त्तनं or जीवनं, सहवर्त्तनं, सहजीवनं.

Coexistent, *a.* सहवर्त्ती -र्त्तिनी -र्त्ति (न्) or एककाले वर्त्ती, सहजीवी -विनी -वि (न्) or एककाले जीवी, सहजः -जा -जं.

To co-extend, *v. n.* अन्येन समं व्याप् (c. 5. -आप्नोति -आप्तुं) or विस्तृ in pass. (-स्तीर्य्यते).

Co-extension, *s.* समव्याप्तिः *f.*, अभिव्याप्तिः *f.*, समविस्तारः, सम्मूर्च्छनं.

Coffee, *s.* यवनदेशीयक्षुद्रफलनिर्म्मितः कृष्णवर्णः पानीयविशेषः, यावनपानं.

Coffee-house, *s.* पूर्व्वोक्तपानीयविक्रयस्थानं, यावनपानशाला.

To CONDUCT, *v. a.* (Lead) नी (c. 1. नयति, नेतुं), आनी, उपानी, समानी, गम् in caus. (गमयति -यितुं), प्राप् in caus. (-आपयति -यितुं).—(Manage) निर्वह् in caus. (-वाहयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रणी, सम्प्रणी, विधा (c. 3. -दधाति -धातुं), घट् (c. 1. घटते -टितुं).—(Accompany, attend) अनुया (c. 2. -याति -तुं), अनुव्रज् (c. 1. -व्रजति -जितुं); परिचर् (c. 1. -चरति -रितुं).—(Shew the way) पथं दृश् in caus. (दर्शयति -यितुं).—(Conduct one's self) व्यवहृ (c. 1. -हरति -हर्त्तुं), चर्, आचर्, समाचर्, वृत् (c. 1. वर्त्तते -र्त्तितुं); 'road conducting to the city,' नगरगामी मार्गः.

CONDUCTED, *p. p.* (Led) नीतः -ता -तं, आनीतः -ता -तं, समानीतः -ता -तं, उपानीतः -ता -तं, गमितः -ता -तं; 'conducted here,' इहागमितः -ता -तं; 'being conducted,' नीयमानः -ना -नं.—(Managed) निर्वाहितः -ता -तं, प्रणीतः -ता -तं, घटितः -ता -तं, प्रवर्त्तितः -ता -तं, वर्त्तितः -ता -तं; 'well-conducted,' सुघटितः -ता -तं; 'difficult to be conducted,' दुर्निर्वाहः -हा -हं.

CONDUCTOR, *s.* (Leader) नायकः, नेता *m.* (तृ), वाहकः, पुरोगः, अग्रगः, पथदर्शकः, प्रचारकः.—(Manager) प्रयोक्ता *m.* (तृ), सम्पादयिता, घटकः, निर्वाहकः, प्रवर्त्तकः.

CONDUCTRESS, *s.* नायिका, नेत्री, पथदर्शिनी, निर्वाहिका, अग्रगामिनी.

CONDUIT, *s.* प्रणालः -ली, जलनिर्गमः, कुल्या, सारणिः, सारणी *f.*, जलनिःसरणं.

CONE, *s.* (Pyramidal figure) शुण्डिः *f.* -ण्डी, शिखरः.—(Solid body, round at the base and pointed at the top) अधस्तात् मण्डलाकारो ऽग्रभागे सूच्याकारो वस्तु.—(Fruit) देवदारुफलं.

To CONFABULATE, *v. n.* संलप् (c. 1. -लपति -पितुं), संवद् (c. 1. -वदति -दितुं), सम्भाष् (c. 1. -भाषते -षितुं), कथोपकथनं कृ, संवद् (c. 1.

-वदति -दितुं).

CONFABULATION, s. संलापः, आलापः, कथोपकथनं, सम्भाषा, विश्रम्भकथा, सम्प्रवदनं, वादः, द्वयोः संवादः.

CONFABULATORY, a. आलापी -पिनी -पि(न्), कथोपकथनयोग्यः -ग्या -ग्यं.

To CONFECT, v. a. उपस्कृ, सन्धा (c. 3. -दधाति -धातुं), मिष्टीकृ.

CONFECTION, s. (A preparation of sugar, &c.) उपस्कारः, मोदकः -कं, मिष्टान्नं, मिष्टं, सन्धितं, खण्डमोदकः.—(A mixture) सन्निपातः.—(Electuary) अवलेहः.

CONFECTIONARY, s. (Where sweetmeats are sold) मिष्टान्नविक्रयस्थानं, मोदकवीथिः f., मोदकशाला.

CONFECTIONER. s. मोदककृत्, मिष्टकर्त्ता m. (र्तृ), मिष्टान्नकृत्, आपूपिकः, खाण्डिकः, खण्डपालः.

CONFEDERACY, s. सन्धिः m., सन्धानं, साहित्यं, सहायता, सङ्घातः, प्रतीहारः, सङ्घट्टनं, संयोगः, सार्थं, ऐक्यं, ऐकमत्यं, एकवाक्यता.

To CONFEDERATE, v. n. सन्धा (c. 3. -धत्ते -धातुं), सन्धिं कृ or विधा (c. 3. -दधाति -धातुं), संयुज् in pass. (-युज्यते), सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं).

To CONFEDERATE, v. a. सन्धा (c. 3. -दधाति -धातुं), सन्धिं कृ in caus. (कारयति -यितुं)

CONFEDERATE, a. सन्धितः -ता -तं, कृतसन्धिः -न्धिः -न्धि, कृतसम्बन्धः -न्धा -न्धं, सङ्घातवान् -वती -वत् (त्), सहितः -ता -तं, संयुक्तः -क्ता -क्तं.

CONFEDERATE, s. सहायः, सहकारी m. (न्), सङ्गी m. (न्), सम्बन्धी m. (न्), परस्परोपकारी m. (न्).

CONFEDERATION, s. सन्धानं, परस्परोपकारार्थकः सन्धिः, सङ्घातः, सङ्गः.

To CONFER, v. n. (Hold conversation) सम्भाष् (c. 1. -भाषते -षितुं). संवद् (c. 1. -वदति -दितुं), संलप् (c. 1. -लपति -पितुं), कथोपकथनं कृ.—(Deliberate with another) अन्येन सह मन्त्र् (c. 10. मन्त्रयते -ति -यितुं) or सम्मन्त्र् or विचर् in caus. (-चारयति -यितुं), सञ्चिन्त् (c. 10. -चिन्तयति -यितुं).

To CONFER, v. a. (Compare) उपमा (c. 2. -माति c. 3. -मिमीते -मातुं), सम्प्रधृ in caus. (-धारयति -यितुं).—(Bestow) दा (c. 3. ददाति, c. 1. यच्छति, दातुं), प्रदा, वितॄ (c. 1. -तरति -रितुं -रीतुं), प्रतिपद् in caus. (-पादयति -यितुं), उपाकृ, उपकृ; 'confer a favour,' अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुग्रहं कृ, प्रसादं कृ, अभ्युपपत्तिं कृ; 'conferring pleasure,' सुखदः -दा -दं, सुखावहः -हा -हं; 'conferring bliss,' अपवर्गदः -दा -दं, आपवर्ग्यः -र्ग्या -र्ग्यं.

CONFERENCE. s. (Conversation) संलापः, सम्भाषा -षणं, सम्प्रवदनं, सङ्कथा, वादः, द्वयोः संवादः.—(Deliberation) मन्त्रणं -णा, सम्मन्त्रणं, सम्प्रधारणा.—(Comparison) उपमितिः f., उपमानं.

CONFERRED, p. p. दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, प्रतिपादितः -ता -तं, वितीर्णः -र्णा -र्णं, विश्राणितः -ता -तं, निहितः -ता -तं.

CONFERRER, s. दाता m. (तृ), प्रदाता m. (तृ), प्रदः or दः in comp.

To CONFESS, v. a. and n. (Own, acknowledge) स्वीकृ, अङ्गीकृ, उरीकृ, उररीकृ, अनुभाष् (c. 1. -भाषते -षितुं), प्रतिपद् (c. 4. -पद्यते -पत्तुं), सम्प्रतिपद्.—(Make a public avowal) ख्या in caus. (ख्यापयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), प्रकाश् in caus. (-काशयति -यितुं), प्रकाशं or व्यक्तं वद् (c. 1. वदति -दितुं).—(Disclose the state of the conscience to a priest) सर्व्वं मनोगतं गुरोर् कर्णे ख्या in caus. or प्रकाश् in caus., आचार्य्यनिकटे पापविवरणं कृ.—(Hear the confession of a penitent) अनुतापिना कर्णे अर्पितं पापस्वीकारं श्रु (c. 5. शृणोति श्रोतुं).—(Prove, show) सूच् in caus. (सूचयति -यितुं).

CONFESSEDLY, adv. निर्विवादं, असंशयं, सुनिश्चितं, प्रकाशं, व्यक्तं.

CONFESSION, s. स्वीकारः, अङ्गीकारः, उरीकारः.—(Of sins) पापस्वीकारः, स्वपापविवरणं, आत्मापराधस्वीकारः, पापानाम् अङ्गीकारः, काम्यकारः.—(Avowal, open declaration) ख्यापनं, प्रकाशनं, प्रतिपत्तिः f., सम्प्रतिपत्तिः f.—(To a priest) आचार्य्यनिकटे मनोगतप्रकाशनं.

CONFESSIONAL, s. अपराधस्वीकारश्रोतुर् आसनं, पापविवरणश्रोतुर् आचार्य्यस्य कुटी.

CONFESSOR, s. (One who makes confession) ख्यापकः, काम्यकारः, स्वीकारकृत्, स्वीकर्त्ता m. (र्तृ), अङ्गीकर्त्ता.—(One who suffers for his faith) स्वधर्म्मार्थं दुःखभागी m. (न्).—(A priest who hears confession) पापस्वीकारश्रोता m. (तृ), कर्णे अर्पितं परपापविवरणं शृणोति य आचार्य्यः.

CONFIDANT, s. (A woman's female friend) सखी, वयस्या, दूती, दूतिका, आलिः f., -ली.—(A man's intimate friend) सखा m. (खि), वयस्यः, समदुःखसुखः.

To CONFIDE, v. n. विश्वस् (c. 2. -श्वसिति -सितुं), परिविश्वस् with loc. or gen.; विश्रम्भ् (c. 1. -श्रम्भते -म्भितुं), प्रती (rt. इ with प्रति, प्रत्येति, प्रत्येतुं), श्रद्धा (c. 3. -दधाति -धातुं), विश्वासं कृ, प्रत्ययं कृ.

To CONFIDE, v. a. (Intrust) न्यस् (c. 4. -अस्यति -असितुं), न्यासीकृ, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), समृ in caus. (-अर्पयति -यितुं).

CONFIDED, p. p. (Trusted in) विश्वस्तः -स्ता -स्तं, विश्रब्धः -ब्धा -ब्धं, प्रतीतः -ता -तं, प्रत्ययितः -ता -तं, समाश्वस्तः -स्ता -स्तं, न्यासीकृतः -ता -तं.—(Intrusted) निक्षिप्तः -प्ता -प्तं, न्यस्तः -स्ता -स्तं, न्यासीकृतः -ता -तं.

CONFIDENCE, s. (Trust, firm belief) विश्वासः, प्रत्ययः, विश्रम्भः -म्भणं, समाश्वासः, दृढप्रत्ययः, असंशयः, असन्देहः, असन्दिग्धता, श्रद्धा -द्धा, आशाबन्धः; 'breach of confidence,' विश्वासभङ्गः; 'an object of confidence,' विश्वासभूमिः f., विश्वासपात्रं; 'worthy of confidence,' विश्वास्यः -स्या -स्यं; 'one whose confidence has been gained,' विश्वासप्रतिपन्नः -न्ना -न्नं; 'to inspire with confidence,' आश्वस् in caus. (-श्वासयति -यितुं) or विश्वस्; 'inspired with confidence,' विश्वासितः -ता -तं.—(Conviction, certainty) निश्चयः, दृढज्ञानं, दृढप्रमाणं.—(Boldness, want of modesty) प्रगल्भता, प्रतिभा -भानं, अविशङ्का, धार्ष्ट्यं, निर्लज्जता.

CONFIDENT, a. (Assured beyond doubt, certain) निश्चितः -ता -तं, कृतनिश्चयः -या -यं, असन्दिग्धः -ग्धा -ग्धं, निःसन्देहः -हा -हं, निःसंशयः -या -यं; 'I am confident of that,' तन् मया निश्चितं.—(Trusting) विश्वासी -सिनी -सि (न्), प्रत्ययी -यिनी -यि (न्), विश्वस्तः -स्ता -स्तं.—(Bold) प्रगल्भः -ल्भा -ल्भं, प्रतिभानवान् -वती -वत् (त्) or प्रतिभावान्, अशङ्कितः -ता -तं, अविशङ्कितः -ता -तं, निर्विशङ्कः -ङ्का -ङ्कं.

CONFIDENTIAL, a. विश्वस्तः -स्ता -स्तं, विश्रब्धः -ब्धा -ब्धं, आप्तः -प्ता -प्तं, प्रत्ययितः -ता -तं, प्रात्ययिकः -की -कं; 'confidential conversation,' विश्रम्भालापः, विश्वासकथाप्रसङ्गः; 'confidential matters,' विश्वासकार्य्यं.

CONFIDENTIALLY, adv. विश्वासेन, विश्रम्भात्, विश्वस्तं, विश्रम्भपूर्व्वकं.

CONFIDENTLY, adv. सविश्वासं, सप्रत्ययं, निश्शङ्कं, निर्विशङ्कं, असंशयं, निःसन्देहं.

CONFIDING, a. विश्वस्तः -स्ता -स्तं, विश्वासी -सिनी -सि (न्), सञ्जातविश्वासः -सा -सं, विश्रब्धः -ब्धा -ब्धं, विश्रम्भप्रवणः -णा -णं, प्रत्ययी -यिनी -यि (न्), जातप्रत्ययः -या -यं, समाश्वस्तः -स्ता -स्तं, श्रद्धवत् -वती -वत् (त्), श्रद्दधानः -ना -नं, अविशङ्कमानः -ना -नं.

CONFIGURATION, s. संस्कारः, आकारः, आकृतिः f., रूपं, मूर्त्तिः f., विग्रहः, विधानं, संस्थानं, भरिमा m. (न्), संधानः.

CONFINE, s. (Border) सीमा, सामन्तः, पर्य्यन्तं, अन्तः -न्तं, प्रान्तः, उपान्तं;

'dwelling on the confines,' सामन्तवासी -सिनी -सि (न्).

To CONFINE, *v. n.* सम्मने or पर्य्यन्ते or निकटे स्था (c. 1. तिष्ठति, स्थातुं), or वृत् (c. 1. वर्त्तते -र्त्तितुं) or वस (c. 1. वसति, वस्तुं); स्पृश् (c. 6. स्पृशति, स्प्रष्टुं). समन्त (nom. समन्तयति -यितुं).

To CONFINE, *v. a.* (Circumscribe) परिमा (c. 2. -माति -मातुं), संहृ (c. 1. -हरति -हर्त्तुं), नियम् (c. 1. -यच्छति -यन्तुं), निबन्ध् (c. 9. -बध्नाति -बन्धुं).—(Imprison) कारायां or कारागारे बन्ध् or निरुध् (c. 7. -रुणद्धि -रोद्धुं) or आसिध् (c. 1. -सेधति -सेद्धुं).—(Restrain) यम्, संयम्, नियम्, परियम्, विनियम्; निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं); निरुध्, अवरुध्; संहृ, निषिध्; 'to be confined in childbed,' प्राप्तप्रसवकाला भू.

CONFINED, *p. p.* (Circumscribed) मितः -ता -तं. परिमितः -ता -तं. नियतः -ता -तं. निबद्धः -द्धा -द्धं.—(Contracted) सबाधः -धा -धं, संहृतः -ता -तं. सङ्कटः -टा -टं, सङ्कुचितः -ता -तं, संवृतः -ता -तं.—(Imprisoned) कारागुप्तः -प्ता -प्तं, कारायां बद्धः -द्धा -द्धं or निरुद्धः -द्धा -द्धं.—(Bound) बद्धः -द्धा -द्धं, कीलितः -ता -तं, अमोचितः -ता -तं.—(Restrained) यतः -ता -तं, संयतः -ता -तं, निगृहीतः -ता -तं, बाधितः -ता -तं, निरुद्धः -द्धा -द्धं, यन्त्रितः ता -तं, प्रत्याहृतः -ता -तं.—(Confined in the bowels) आनद्धः -द्धा -द्धं, बद्धकोष्ठः -ष्ठा -ष्ठं, अवरुद्धमलः -ला -लं.—(In childbed) प्राप्तप्रसवकाला.

CONFINEMENT, *s.* (Restraint) रोधः, निरोधः, संरोधः, यमः, संयमः -मनं, निग्रहः, बन्धनं, अमुक्तिः *f.*, अमोक्षः—(Imprisonment, durance) रोधः, निरोधनं, बन्धनं, प्रतिबन्धनं, स्थानासेधः, सम्प्रतिरोधकः.—(Of the bowels) नाहः, आनाहः, निबन्धः, मलावरोधः, मलावष्टम्भः, गुदग्रहः. —(Childbed) प्रसवकालः, प्रसवावस्था.

To CONFIRM, *v. a.* (Strengthen) दृढीकृ, स्थिरीकृ, दृढ (nom. दृढयति -यितुं), सबलं -लां -लं कृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं or caus. -स्तम्भयति -यितुं).—(Corroborate another's opinion by new evidence) प्रमाणं or दृढप्रमाणं दा (c. 3. ददाति, दातुं), सप्रमाणं -णां -णं कृ, प्रमाणीकृ, अनुवद् (c. 1. -वदति -दितुं), अनुकरणवाक्यं वद्, परवाक्यं दृढीकृ.—(Strengthen in resolution) मनःस्थैर्य्यं कृ, सुस्थिरं -रां -रं कृ, सुस्थ (nom. सुस्थयति -यितुं).—(Ratify, settle) सत्याकृ, सत्यं कृ, स्थिरीकृ, दृढनिश्चयं दा.—(Confirm in the Christian faith by imposition of hands) हस्तार्पणेन ख्रीष्टीयधर्म्मे प्रवृत्तं -त्तां -त्तं कृ.

CONFIRMABLE, *a.* संस्तम्भनीयः -या -यं, दृढीकरणीयः -या -यं, स्थिरीकरणीयः -या -यं.

CONFIRMATION, *s.* दृढीकरणं, स्थिरीकरणं, संस्तम्भः, सत्याकृतिः *f.*, प्रमाणीकरणं, दृढप्रमाणदानं, अनुवादः, दृढोक्तिः *f.*—(Confirming in the Christian faith by imposition of hands) हस्तार्पणेन ख्रीष्टीयधर्म्मे प्रवर्त्तनं.

CONFIRMATORY, *a.* अनुवादकः -का -कं, प्रमाणीकरणः -णा -णं, संस्तम्भकृत्.

CONFIRMED, *p. p.* दृढीकृतः -ता -तं, स्थिरीकृतः -ता -तं, संस्तब्धः -ब्धा -ब्धं, सत्याकृतः -ता -तं, प्रमाणीकृतः -ता -तं, दृढनिश्चयः -या -यं, दृढः -ढा -ढं. —(Radicated) प्ररूढः -ढा -ढं, रूढः -ढा -ढं, संरूढः -ढा -ढं; 'a confirmed fool,' प्रतिनिविष्टमूर्खः; 'confirmed friendship,' रूढसौहृदं.

CONFIRMER, *s.* प्रमाणीकर्त्ता *m.* (र्त्तृ), दृढीकर्त्ता, स्थिरीकर्त्ता, दृढप्रमाणदाता *m.* (तृ), अनुवादी *m.* (न्).

To CONFISCATE, *v. a.* सर्व्वस्वं दण्ड् (c. 10. दण्डयति -यितुं) or हृ (c. 1. हरति, हर्त्तुं) or अपहृ or छिद् (c. 7. छिनत्ति, छेत्तुं) or आच्छिद्, सर्व्वधनं दण्डयित्वा राजाधीनं कृ.

CONFISCATED, *p. p.* राजहृतः -ता -तं, राजापहृतः -ता -तं.—(In all one's property) सर्व्वस्वदण्डः -ण्डा -ण्डं, हृतसर्व्वस्वः -स्वा -स्वं, छिन्नवृत्तिः -त्तिः -त्ति.

CONFISCATION, *s.* सर्व्वस्वदण्डं, सर्व्वस्वहरणं, सर्व्वहारः, सर्व्वस्वापहारः, वृत्तिच्छेदः, अर्थदूषणं.

CONFIT, *s.* मोदकः -कं, मिष्टं, मिष्टान्नं, मधुमस्तकं. *See* COMFIT.

CONFLAGRATION, *s.* (Burning) दाहः -हनं, ज्वलनं, ज्वालः, प्लोषः ओषः, दीपनं.—(Great fire) महाग्निः *m.*; 'in a forest,' दवाग्निः दावानलः.—(Fire that will consume the world) प्रलयाग्निः *m*

CONFLATION, *s.* एककाले बहूनां शुषिरवाद्यानां ध्मानं.—(Casting of metals) सन्धानं.

To CONFLICT, *v. n.* युध् (c. 4. युध्यते, योद्धुं), कलह (nom. कलहायते) विग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Clash) सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं) परस्परं विरुध् (c. 7. -रुणद्धि -रोद्धुं).

CONFLICT, *s.* युद्धं, सङ्ग्रामः, संयुगः, समरः -रं, रणः -णं, विग्रहः, सङ्घट्टः संख्यं, सम्परायः, कलहः, कलिः *m.*, समित् *f.*, सम्प्रहारः.—(Clash) समाघातः, सङ्घट्टः -ट्टनं.

CONFLICTING, *a.* (Clashing) परस्परपराहतः -ता -तं, विप्रतिपन्नः -न्ना -न्नं परस्परविरोधी -धिनी -धि (न्), विरुद्धः -द्धा -द्धं.

CONFLUENCE, *s.* (Of two rivers) सम्भेदः, सङ्गः, सङ्गमः, सम्पातः वेणिः *f.*, निर्व्वाणं.—(Junction) संयोगः, समागमः.—(Concourse of people) जनसमागमः, जनसमूहः, जनसम्मर्द्दः, लोकसङ्घः.

CONFLUENT, *a.* एकस्थानं प्रति प्रवाहकः -का -कं, सम्मेलकः -का -कं.

CONFLUX, *s.* सङ्गमः, समागमः, सम्भेदः, वेणिः *f.*—(Crowd) बहुजनमेलकः

To CONFORM, *v. a.* अनुरूपीकृ, सदृशीकृ, अनुरूपं -पां -पं कृ, सदृशं -शीं -शं कृ, तुल्यीकृ, समीकृ, योग्यं -ग्यां -ग्यं कृ, समान (nom. समानयति -यितुं).

To CONFORM, *v. n.* सादृश्यं or आनुरूप्यं गम् (c. 1. गच्छति, गन्तुं), सदृशः -शी -शं भू.—(Comply with) अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं), अनुविधा (c. 3. -दधाति -धातुं), अनुसृ (c. 1. -सरति -सर्त्तुं), अनुकृ, अनुमन् (c. 4. -मन्यते -मन्तुं), स्वीकृ.—(Be suitable) युज् in pass. (युज्यते).

CONFORMABLE, *a.* अनुरूपः -पा -पं, सदृशः -शी -शं, अनुसारी -रिणी -रि (न्), अनुगुणः -णा -णं, सरूपः -पी -पं, तुल्यरूपः -पा -पी -पं समानः -ना -नं, तुल्यः -ल्या -ल्यं, समानाकारः -रा -रं, एकाकारः -रा -रं —(Compliant) अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), अनुविधायी -यिनी -यि (न्), अनुकूलः -ला -लं, अनुनयी -यिनी -यि (न्), अनुरोधी -धिनी -धि (न्).—(To what has been said) अनुवादकः -का -कं -दी -दिनी -दि (न्).—(Suitable) योग्यः -ग्या -ग्यं, युक्तार्थः -र्था -र्थं, युक्तः -क्ता -क्तं उपयुक्तः -क्ता -क्तं.

CONFORMABLY, *adv.* अनुरूपं, अनुरूपेण, अनुसारतस्, अनुसारेण, अनुसारात्, युक्तं, योगतस्, योग्यं, यथावत्. Often expressed by यथ prefixed; as, 'conformably to rule,' यथाविधि.

CONFORMATION, *s.* संस्कारः, संधानः, आकारः, आकृतिः *f.*, संस्थानं, कर्म

CONFORMIST, *s.* धर्म्मानुसारी *m.* (न्), वृत्तानुसारी, वृत्तानुवर्त्ती *m.* (न्) गतानुगतिकः.

CONFORMITY, *s.* अनुरूपं -पता, आनुरूप्यं, सादृश्यं, सदृशता, अनुसार -रित्वं, समानता, समता, तुल्यत्वं, सरूपता, आनुगुण्यं.—(Compliance) अनुवृत्तिः *f.*, अनुरोधः, अनुकूलता.—(To what has been said) अनुवादत्वं.—(Suitableness) योग्यता, युक्तता, उपयुक्तत्वं; 'conformity to established practice,' वृत्तानुसारः, धर्म्मानुसारः.

To CONFOUND, *v. a.* (Perplex) मुह् in caus. (मोहयति -यितुं), विमुह् व्यामुह्, आकुलीकृ, व्याकुलीकृ, व्याकुल (nom. व्याकुलयति -यितुं)

विक्षिप् in caus. (-क्षेपयति -यितुं).—(Agitate, disturb) क्षुभ् in caus. (क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, विलुप् (c. 6. -लुम्पति -लोप्तुं).—(Mingle, huddle together) सम्मिश्रीकृ, सङ्करीकृ, सम्मिश्र् (c. 10. -मिश्रयति -यितुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अस्तव्यस्तीकृ, सङ्कुलीकृ, भेदं जन् in caus. (जनयति -यितुं).—(Destroy) विनश् in caus. (-नाशयति -यितुं).—(Confound by argument) निरुत्तरं -रीं -रं कृ; 'to be confounded,' मुह् (c. 4. मुह्यति), विमुह्, सम्मुह्; आकुलीभू, व्याकुलीभू.

Confounded, *a.* (Perplexed) मोहितः -ता -तं, विमोहितः -ता -तं, आकुलितः -ता -तं, व्याकुलितः -ता -तं, आकुलः -ला -लं, व्याकुलः -ला -लं, व्याकुलीकृतः -ता -तं, व्यग्रः -ग्रा -ग्रं, सङ्कीर्णः -र्णा -र्णं, व्यस्तः -स्ता -स्तं, विहस्तः -स्ता -स्तं, सम्भ्रान्तः -न्ता -न्तं, विह्वलः -ला -लं, खिन्नः -न्ना -न्नं, विक्षिप्तचित्तः -त्ता -त्तं.—(Agitated) क्षोभितः -ता -तं, विक्षिप्तः -प्ता -प्तं.—(Huddled together) सङ्करीकृतः -ता -तं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, अस्तव्यस्तः -स्ता -स्तं.—(Unfortunate) दैवोपहतः -ता -तं.—(Detestable) गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं.

Confoundedly, *adv.* अद्भुतं, कुत्सितं, अत्यन्तं, गर्हितं, गर्ह्यप्रकारेण.

Confounder, *s.* मोहकः, विमोहनः, मोहनकृत्, विक्षेपकः, विक्षोभकर्त्ता *m.* (र्तृ).

Confraternity, *s.* सौभ्रात्रं, भ्रातृत्वं, सहवासिनां साहित्यं, सगोत्रं.

To confront, *v. a.* (Stand face to face) अभिमुखे or सम्मुखे or सम्मुखासम्मुखि or प्रत्यक्षतः स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), सम्मुखीभू, अभिमुखं गम् (c. 1. गच्छति, गन्तुं), अभिवृत्.—(Compare) उपमा (c. 2. -माति -मातुं), सम्प्रधृ in caus. (-धारयति -यितुं).—(Oppose plaintiff and defendant in court) अर्थिप्रत्यर्थिनौ प्राड्विवाकसाक्षाद् एककाले आनी (c. 1. -नयति -नेतुं).—(Oppose a witness to an accused party) अभियुक्तजनप्रतिमुखे साक्षिणं स्था in caus. (स्थापयति -यितुं).

Confrontation, *s.* (Of witnesses with an accused party) धर्म्मसभायां अभियुक्तजनप्रतिमुखे साक्षिस्थापनं.—(In battle) धाटी.

To confuse, *v. a.* विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संक्षुभ् in caus. (-क्षोभयति -यितुं), विक्षुभ्, सङ्करीकृ, सङ्कॄ (c. 6. -किरति -करितुं -रीतुं), सम्मिश्र् (c. 10. -मिश्रयति -यितुं), अस्तव्यस्तीकृ; 'to be confused,' सङ्कॄ in pass. (-कीर्य्यते). *See To* confound.

Confused, *p. p.* (Crowded irregularly, disordered) सङ्कुलः -ला -लं, सङ्कीर्णः -र्णा -र्णं, आकीर्णः -र्णा -र्णं, विक्षिप्तः -प्ता -प्तं, सङ्करीकृतः -ता -तं, अस्तव्यस्तः -स्ता -स्तं.—(Disturbed in mind) व्यस्तः -स्ता -स्तं, आकुलः -ला -लं, व्याकुलः -ला -लं, विह्वलः -ला -लं, कातरः -रा -रं, पारिप्लवः -वा -वं, व्यग्रः -ग्रा -ग्रं, सम्भ्रान्तः -न्ता -न्तं, विस्मयाकुलः -ला -लं, आकुलचित्तः -त्ता -त्तं, खिन्नः -न्ना -न्नं, अधीरः -रा -रं, विपन्नः -न्ना -न्नं. *See* Confounded.—(Without order) क्रमहीनः -ना -नं.—(Abashed) ह्रीपरिगतः -ता -तं.—(Not clear) अस्पष्टः -ष्टा -ष्टं.

Confusedly, *adv.* (In a mixed manner) सङ्कुलं, सङ्कीर्णं, साङ्कर्य्येण.—(Without order) क्रमं विना, अक्रमेण.—(Not clearly) अस्पष्टं.—(With bewilderment) ससम्भ्रमं, व्यस्तचेतसा, व्याकुलमनसा.

Confusion, *s.* (The act) सङ्करीकरणं.—(Irregular mixture) सङ्करः, साङ्कर्य्यं, सङ्कीर्णत्वं, सङ्क्षोभः, व्यस्तता, व्यतिकरः.—(Bewilderment) आकुलत्वं, व्याकुलत्वं, वैक्लव्यं, कातरता, व्यस्तता, व्यग्रता, सम्भ्रमः, विस्मयः.—(Confusion of an army) समुत्पिञ्जः, पिञ्जलः.—(Want of order) अक्रमः, विसूत्रता, क्रमहीनता.—(Want of clearness) अस्पष्टता.—(Shame) ह्रीः, लज्जा, व्रीडा.—(Destruction) विनाशः; 'Confusion seize thee!' विनाशस् ते भूयात्; 'confusion of ideas,' रोपः, रोपणं.

Confutable, *a.* खण्डनीयः -या -यं, प्रत्याख्येयः -या -यं, निराकरणीयः -या -यं.

Confutation, *s.* खण्डनं, वाक्यखण्डनं, पक्षाघातः, निराकरणं, प्रत्याख्यानं, निरासः, अधरीकरणं, बाधः, बाधा, उपमर्द्दः, अनिश्चयः.

To confute, *v. a.* खण्ड् (c. 10. खण्डयति -यितुं), निरस् (c. 4. -अस्यति -असितुं), परास्; प्रत्याख्या (c. 2. -ख्याति -तुं), संदूष् (c. 10. -दूषयति -यितुं), अधरीकृ, निराकृ, निरुत्तरीकृ.

Confuted, *p. p.* खण्डितः -ता -तं, निरस्तः -स्ता -स्तं, परास्तः -स्ता -स्तं, निराकृतः -ता -तं, अधरीकृतः -ता -तं, प्रत्याख्यातः -ता -तं, बाधितः -ता -तं.

Congé, *s.* (Bow, salutation) प्रणामः, प्रणतिः *f.*, नमस्कारः, अभिवादः -दनं, प्रणिपातः.—(Leave, farewell) अनुज्ञा, अनुमतिः *f.*, आमन्त्रणं.

To congeal, *v. a.* घनीकृ, श्यै in caus. (श्यापयति -यितुं), शीतीकृ, श्यानीकृ, पिण्डीकृ, संहन् (c. 2. -हन्ति -हन्तुं).

To congeal, *v. n.* घनीभू, संहन् in pass. (-हन्यते), श्यै (c. 1. श्यायते, श्यातुं), शीतीभू, शीनीभू, पिण्डीभू.

Congealable, *a.* श्यानीयः -या -यं, श्येयः -या -यं, घनीकरणीयः -या -यं.

Congealed, *p. p.* घनीकृतः -ता -तं, घनीभूतः -ता -तं, शीतः -ता -तं, शीनः -ना -नं, श्यानः -ना -नं, द्रवेतरः -रा -रं.

Congelation, *s.* (The state) शीतीभावः, शीतता, घनत्वं -ता, घनीभावः, संहतत्वं -ता, संहतिः *f.*—(The act) घनीकरणं, शीतीकरणं.

Congenial, *a.* (Of the same disposition) समानशीलः -ला -लं, समानभावः -वा -वं, एकस्वभावः -वा -वं, एकभावः -वा -वं, तुल्यशीलः -ला -लं, स्वाभाविकः -की -कं, सधर्म्मा -र्म्मा -र्म्म (न्).—(Kindred) समानजातीयः -या -यं, सजातिः -तिः -ति.—(Agreeable, suitable) अनुसारी -रिणी -रि (न्), अनुरूपः -पा -पं, अनुगुणः -णा -णं, प्रियकारः -री -रं.

Congeniality, *s.* समानशीलता, तुल्यशीलता, सजातित्वं, एकजातित्वं, सधर्म्मकत्वं, अनुसारित्वं, आनुगुण्यं, आनुरूप्यं.

Congenite, *a.* सहजः -जा -जं, सहजातः -ता -तं, समकालजः -जा -जं, एककाले जातः -ता -तं, एककालोत्पन्नः -न्ना -न्नं.

Conger, *s.* समुद्रव्यालः, जलव्यालः, समुद्रजः कुक्षिकाभेदः or अन्धाहिः *m.*

Congeries, *s.* राशिः *m. f.*, स्तूपः, पिण्डः, सञ्चयः, ओघः, पुञ्जः, पूगः, स्तोमः.

To congest, *v. a.* राशीकृ, पिण्डीकृ, एकौघीकृ, सञ्चि (c. 5. -चिनोति -चेतुं), समाचि, समुपचि, एकपूगीकृ, एकपुञ्जीकृ.

Congestible, *a.* सञ्चयनीयः -या -यं, एकराशीकरणीयः -या -यं.

Congestion, *s.* (Of blood) रक्तावरोधः, रक्तावष्टम्भः.

To conglobate, *v. a.* गोलीकृ, एकमण्डलीकृ, एकपिण्डीकृ, एकौघीकृ, वर्त्तुलीकृ.

Conglobate, *a.* एकपिण्डीभूतः -ता -तं, मण्डलीभूतः -ता -तं, एकमण्डलाकारः -रा -रं.

Conglobation, *s.* (The act) एकमण्डलीकरणं, एकौघीकरणं.—(A mass) एकपिण्डः, एकौघः, एकमण्डलं.

To conglomerate, *v. a.* एकराशीकृ, एकपिण्डीकृ, एकगोलीकृ, एकौघीकृ, एकवृन्दीकृ, सञ्चि (c. 5. -चिनोति -चेतुं), समुपचि, समाचि, सम्भृ (c. 1. -भरति -र्त्तुं), समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), एकत्र कृ, वर्त्तुलीकृ.

Conglomerated, *p. p.* एकराशिभूतः -ता -तं, एकौघभूतः -ता -तं, एकपिण्डीभूतः -ता -तं, एकत्रीभूतः -ता -तं.

Conglomeration, *s.* (The act) एकपिण्डीकरणं, एकराशीकरणं, समुपचयनं.—(A collection, heap) एकराशिः *m. f.*, एकौघः, एकपिण्डः, एकवृन्दं.

To conglutinate, *v. a.* संलग्नीकृ, संश्लिष् in caus. (-श्लेषयति -यितुं), सन्धा (c. 3. -दधाति -धातुं), संयुज् (c. 7. -युनक्ति -योक्तुं).—(Heal

wounds) संरुह् in caus. (-रोपयति -यितुं).

To CONGLUTINATE, *v. n.* संसञ्ज in pass. (-सज्यते), संलग्नीभू, संश्लिष् in pass. (-श्लिष्यते), सन्धा in pass. (-धीयते), संयुज् in pass. (-युज्यते).—(Be healed) संरुह् in caus. pass. (-रोप्यते).

CONGLUTINATION, *s.* (Junction) संसक्तिः *f.*, समासक्तिः, संश्लेषः, संयोगः, सन्धिः *m.*—(The act) संलग्नीकरणं.—(Healing) रोपणं, संरोपणं.

To CONGRATULATE, *v. a.* मङ्गलवचनं or कल्याणवचनं ब्रू (c. 2. ब्रवीति, वक्तुं) or वद (c. 1. वदति -दितुं), कल्यं वद्, परमङ्गलं ज्ञात्वा तेन सह धन्यवादं कृ, or कुशलवादं कृ or उत्सवं कृ; मङ्गलं or कुशलं भूयाद् इति वद्, आमन्त्र (c. 10. -मन्त्रयति -ते -यितुं).

CONGRATULATION, *s.* कल्याणवचनं, कल्यवादः, कल्यं, कल्या, मङ्गलवचनं, कल्याणोक्तिः *f.*, माङ्गल्यवाक्यं, कुल्यं, धन्यवादः, कुशलवादः, आमन्त्रणं, आशीः *f.* (स्), आशीर्वादः.

CONGRATULATORY, *a.* कल्यवादः -दा -दं, मङ्गलवादी -दिनी -दि (न्), कल्योक्तिमयः -यी -यं, मङ्गलसूचकः -का -कं, माङ्गलिकः -की -कं, कल्याणकरः -री -रं, उत्सवकरः -री -रं.

To CONGREGATE, *v. a.* समाचि (c. 5. -चिनोति -चेतुं), समानी (c. 1. -नयति -नेतुं), समाहृ (c. 1. -हरति -हर्तुं), समूह् (c. 1. -ऊहते -हितुं), सङ्गम् in caus. (-गमयति -यितुं), सन्निपत् in caus. (-पातयति -यितुं), एकीकृ, एकत्रकृ, राशीकृ, समूहीकृ, पृथशः कृ, एकयूथीकृ.

To CONGREGATE, *v. n.* समे (सम and आ with root इ, समेति -तुं), समभ्ये, सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्; सम्मिल् (c. 6. -मिलति -मेलितुं), एकत्र मिल्, एकत्र आगम्, पृथशः सम्मिल्; समावृत् (c. 1. -वर्त्तते -र्त्तितुं), सन्निपत् (c. 1. -पतति -तितुं).

CONGREGATED, *a.* समेतः -ता -तं, समागतः -ता -तं, मिलितः -ता -तं, समूढः -ढा -ढं, समूहभूतः -ता -तं, एकस्थः -स्था -स्थं, सन्निपतितः -ता -तं.

CONGREGATION, *s.* (Assembly) सभा, परिषद् *f.*, समाजः, समज्या, समूहः, समागमः, मेलकः, मेलः -ला, संसद् *f.*, मण्डलं, समवायः, निवहः, निकायः.(Collection) सञ्चयः -यनं, समाहारः, सन्निपातः, समुदयः.—(Assembly met to worship God) ईश्वरपूजार्थं समागतो जनसमूहः, ईश्वरपूजकानां परिषद्.

CONGREGATIONAL, *a.* सभ्यः -भ्या -भ्यं, सामाजिकः -की -कं, पारिषदः -दी -दं.

CONGRESS, *s.* सभा, संसद् *f.*, सदः *n.* (स्), सभाजः, मेलकः.—(Shock, collision) सङ्घट्टः -ट्टनं -ट्टना, समाघातः.—(Sexual) स्त्रीपुरुषसङ्गः.

CONGRESSIVE, *a.* साङ्गतिकः -की -कं, सम्मेलकः -का -कं, सङ्घट्टनशीलः -ला -लं.

CONGRUENCE, *s.* आनुरूप्यं, अनुरूपता, सादृश्यं, अनुसारः -रित्वं, आनुगुण्यं, योग्यता, युक्तता, उपयुक्तता, सङ्गतत्वं, साङ्गत्यं.

CONGRUITY, *s.* योग्यता, युक्तता, युक्तिः *f.*, सामञ्जस्यं, अनुसारिता, याथातथ्यं, औचित्यं, उचितता, उपपत्तिः *f.*, सदृशता. *See* CONGRUENCE.

CONGRUOUS, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, सङ्गतः -ता -तं, अविरुद्धः -द्धा -द्धं, समञ्जसः -सा -सं, अनुसारी -रिणी -रि (न्), अनुगुणः -णा -णं, सदृशः -शी -शं, सम्भाव्यः -व्या -व्यं.

CONGRUOUSLY, *adv.* योग्यं, युक्तं, अनुसारेण -रात् -रतस्, अनुरूपं -पेण, अविरुद्धं, समञ्जसं, सङ्गतं, सङ्गतप्रकारेण.

CONIC, CONICAL, *a.* सूच्याकारः -रा -रं, शिखाकृतिः -तिः -ति, शुण्डाकारः -रा -रं.

CONICALLY, *adv.* सूच्याकारेण, शुण्डाकारेण, सूचिरूपेण.

CONICKS, *s.* सूचिच्छेदविषयका रेखागणितविद्यायाः शाखा or अंशः.

CONIFEROUS, *a.* सूच्याकारफलप्रदः -दा -दं, शिखाकृतिफलदान् -वती -वत् (त्).

CONJECTURABLE, *a.* वितर्क्यः -र्क्या -र्क्यं, अनुमेयः -या -यं, ऊहनीयः -या -यं.

CONJECTURAL, *a.* आनुमानिकः -की -कं, वैतर्किकः -की -कं, ऊही -हिनी -हि (न्).

CONJECTURALLY, *adv.* अनुमानेन, वितर्केण, सानुमानं, सवितर्कं, अनुमानपूर्वं.

To CONJECTURE, *v. a.* अनुमा (c. 2. -माति, c. 4. -मायते, c. 3. -मिमीते -मातुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, ऊह् (c. 1. ऊहते -हितुं), अनुभू (c. 1. -भवति -वितुं).

CONJECTURE, *s.* वितर्कः -र्कणं, अनुमानं, अनुमानोक्तिः, ऊहा -हनं, अनुभवः, शङ्का.

CONJECTURED, *p. p.* अनुमितः -ता -तं, वितर्कितः -ता -तं, शङ्कितः -ता -तं.

CONJECTURER, *s.* अनुमाता *m.* (तृ), अनुमानकर्त्ता *m.* (र्तृ), वितर्ककः, वितर्ककृत्.

To CONJOIN, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), समायुज्; सन्धा (c. 3. -दधाति -धातुं), संश्लिष् in caus. (-श्लेषयति -यितुं).

To CONJOIN, *v. n.* संयुज् in pass. (-युज्यते), समायुज्; सन्धा (c. 3. -धत्ते -धातुं or pass. -धीयते), संश्लिष् in pass. (-श्लिष्यते).

CONJOINED, *p. p.* संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं.

CONJOINT, *a.* संयुक्तः -क्ता -क्तं, सहितः -ता -तं, सम्बद्धः -द्धा -द्धं, कृतसम्बन्धः -न्धा -न्धं, संहतः -ता -तं, सन्धितः -ता -तं, सङ्गातवान् -वती -वत् (त्).

CONJOINTLY, *adv.* सहितं, सह, सार्द्धं, योगतस्, समं, साकं, अपृथक्.

CONJUGAL, *a.* वैवाहिकः -की -कं, उद्वाहिकः -का -कं, औद्वाहिकः -की -कं; 'the conjugal state,' पतित्वं, भर्तृत्वं; 'conjugal affection,' दम्पत्योः or भार्य्यापत्योः स्नेहः; 'conjugal fidelity in a woman,' सतीत्वं, पातिव्रत्यं; 'in a man,' एकपत्नीसेवा.

CONJUGALLY, *adv.* दम्पतिवत्, यथा भार्य्यापती तथा महास्नेहेन, वैवाहिकप्रकारेण.

To CONJUGATE, *v. a.* (In grammar) आख्या (c. 2. -ख्याति -ख्यातुं), रूपम् आख्या.

CONJUGATED, *p. p.* आख्यातः -ता -तं.—(Joined) संयुक्तः -क्ता -क्तं.

CONJUGATION, *s.* (In grammar) रूपं, वाच्यता, गणः, रूपकरणं.—(Union, compilation) संयोगः, समाहारः.

CONJUNCT, *a.* संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, सङ्गतः -ता -तं; 'a conjunct consonant,' संयोगः.

CONJUNCTION, *s.* (Union) संयोगः, सम्प्रयोगः, योगः, सन्धिः *m.*, सन्धानं, श्लेषः, संश्लेषः, सङ्गमः, समागमः, सङ्गः, अनुषङ्गः, समासञ्जनं, समासक्तिः *f.*, सम्पर्कः, संसर्गः, मेलः.—(In grammar) समुच्चयः, समुच्चयबोधकः शब्दः.—(Planetary) सङ्गमः; 'of sun and moon,' अर्केन्दुसङ्गमः, उपसर्गः; 'day of lunar conjunction,' अमावास्या; 'in conjunction,' सङ्गतः -ता -तं.

CONJUNCTIVE, *a.* साङ्गतिकः -की -कं, यौक्तिकः -की -कं, यौगिकः -की -कं, अनुषङ्गी -ङ्गिणी -ङ्गि (न्), आनुषङ्गिकः -की -कं.—(United) संयुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं.

CONJUNCTLY, *adv.* योगतस्, सहितं, सह, सार्द्धं, संयुक्तं.

CONJUNCTURE, *s.* योगः, संयोगः, सन्धिः *m.*—(Occasion) समयः, प्रस्तावः, अवकाशः, अवसरः.

CONJURATION, *s.* (Magic) योगः, सम्प्रयोगः, माया, कुहकः, इन्द्रजालं, कुसृतिः *f.*—(Incantation, enchantment) मन्त्रं, अभिचारः, माया.—(Conspiracy) संशापः, संशपनं, सङ्कल्पः, दुष्कर्म्मसाधनार्थं बहुजनानां संसर्गः, ऐकमत्यं, एकवाक्यता.—(Charging earnestly by oath) शपनपूर्व्वकं सम्बोधनं, शपथपुरःसरं प्रत्यादेशः, शापनं.

To CONJURE, *v. a.* (Charge earnestly) शपनपूर्व्वकं or शपथं समादिश् (c. 6. -दिशति -देष्टुं) or प्रत्यादिश् or सम्बुध् in caus. (-बोधयति -यितुं), शप् in caus. (शापयति -यितुं).

To CONJURE, *v. n.* (Use enchantment) मायां कृ, कुहकं कृ, इन्द्रजालं कृ, अभिचर् (c. 1. -चरति -रितुं).—(Conspire) शपथपुरःसरं अन्यैः सह सहायत्वम् कृ, दुष्कर्म्मसम्पादनार्थम् अन्यैः सह शप् (c. 4. शप्यति,

ज्ञप्तुं) or ज्ञपयबद्ध: -द्धा -द्धम् अस्.

CONJURER, *s.* मायी *m.* (न्), मायाकार: -कृत्, मायाजीवी *m.* (न्), कुहककार:, कुहकजीवी *m.* (न्), इन्द्रजालिक:, ऐन्द्रजालिक:, योगी *m.* (न्), सम्प्रयोगी *m.* (न्), कौसृतिक:, अभिचारविद्.

CONNASCENCE, *s.* सहजत्वं, एककाले जन्म *n.* (न्) or उत्पत्ति: *f.*, समकालोत्पत्ति:.

CONNATE, *a.* सहज: -जा -जं, सहजात: -ता -तं, समकालज: -जा -जं, एककाले जात: -ता -तं, एककालोत्पन्न: -न्ना -न्नं, यमज: -जा -जं.

CONNATURAL, *a.* सहज: -जा -जं, स्वाभाविक: -की -कं, स्वभावज: -जा -जं, अन्तर्जात: -ता -तं, एकभाव: -वा -वं, एकस्वभाव: -वा -वं.

To CONNECT, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), अनुबन्ध्, सन्धा (c. 3. -दधाति -धातुं), उपसन्धा, संश्लिष् in caus. (-श्लेषयति -यितुं), संलग्नीकृ, योक्त्र (nom. योक्त्रयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रन्थितुं), पिनह् (c. 4. -नह्यति -नद्धुं), व्यतिषञ्ज् (c. 1. -षजति -षंक्तुं); 'to be connected,' सम्बन्ध् in pass. (-बध्यते).

CONNECTED, *p. p.* (Joined, related) संयुक्त: -क्ता -क्तं, समायुक्त: -क्ता -क्तं, संयुत: -ता -तं, प्रयुक्त: -क्ता -क्तं, यौगिक: -की -कं, सम्बद्ध: -द्धा -द्धं, सम्बन्धी -न्धिनी -न्धि (न्), कृतसम्बन्ध: -न्धा -न्धं, अनुबद्ध: -द्धा -द्धं, अनुसम्बद्ध: -द्धा -द्धं, प्रतिबद्ध: -द्धा -द्धं, अन्वित: -ता -तं, समन्वित: -ता -तं, सान्वय: -या -यं, समित: -ता -तं; 'mutually connected,' व्यतिषक्त: -क्ता -क्तं.—(Continuous) अविच्छिन्न: -न्ना -न्नं, अपरिच्छिन्न: -न्ना -न्नं; 'a connected story,' प्रबन्ध:.

CONNECTEDLY, *adv.* प्रबन्धेन, अविच्छेदेन, अविच्छिन्नं, योगतस्, सम्बद्धं.

CONNEXION, *s.* (Union) संयोग:, सम्प्रयोग:, योग:, सङ्ग:, सङ्गम:, सङ्गतं, समासक्ति: *f.*, प्रसक्ति: *f.*, समासञ्जनं, अनुषङ्ग:, संसर्ग:, सन्धि: *m.*; 'mutual connexion,' व्यतिषङ्ग:.—(Relation) सम्बन्ध: -न्धित्वं, अभिसम्बन्ध:, सम्बन्धी *m.* (न्), अन्वय:, समन्वय:, सम्पर्क:, सन्दर्भ:.—(Family connexion) बान्धव:, बन्धु: *m.*, सम्बन्धी *m.* (न्).—(Connexion of a discourse) प्रबन्ध:; 'to have connexion with,' सङ्गम् (c. 1. -गच्छति -गन्तुं).

CONNEXIVE, *a.* यौगिक: -की -कं, सम्बन्धक: -का -कं, आनुषङ्गिक: -की -कं.

CONNIVANCE, *s.* उपेक्षा, उपेक्षणं, अपह्नव:, ज्ञातापह्नव:, निह्नव:, निह्नुति: *f.*, आकारगुप्ति: *f.*, ज्ञात्वा ज्ञातापह्नव:, दृष्ट्वा दुष्टोपेक्षणं, क्षमा.—(Winking) अक्षिनिकोचनं, अक्षिसङ्कोचनं.

To CONNIVE AT, *v. n.* (Intentionally overlook) ज्ञानपूर्व्वकम् उपेक्ष् (c. 1. -ईक्षते -क्षितुं).—(Conceal knowledge) ज्ञात्वा ज्ञातं निह्नु (c. 2. -ह्नुते -ह्नोतुं) or अपह्नु.—(Bear with) क्षम् (c. 1. क्षमते, क्षन्तुं).—(Wink) अक्षि सङ्कुच् (c. 1. -कोचति -चितुं).

CONNOISSEUR, *s.* विज्ञ:, अभिज्ञ:, गुणज्ञ:, ज्ञानी *m.* (न्), बोद्धा *m.* (द्धृ), ब्रह्मविद् *m.*, परीक्षक:.

CONNUBIAL, *a.* वैवाहिक: -की -कं, उद्वाहिक: -का -कं, औद्वाहिक: -की -कं.

To CONQUER, *v. a.* जि (c. 1. जयति -ते, जेतुं), पराजि, विजि, सञ्जि, अभिभू (c. 1. -भवति -वितुं), पराभू, दम् in caus. (दमयति -यितुं), वशीकृ, धृष् in caus. (धर्षयति -यितुं), प्रधृष्, पर्य्यामृश् (c. 6. -मृशति -म्रष्टुं); 'one who has conquered his passions,' जितेन्द्रिय:.

CONQUERABLE, *a.* जेय: -या -यं, जयनीय: -या -यं, जय्य: -य्या -य्यं, जेतव्य: -व्या -व्यं, दमनीय: -या -यं, अभिभवनीय: -या -यं, पराभवनीय: -या -यं.

CONQUERED, *p. p.* जित: -ता -तं, पराजित: -ता -तं, विजित: -ता -तं, दान्त: -न्ता -न्तं, दमित: -ता -तं, अभिभूत: -ता -तं, पराभूत: -ता -तं, वशीकृत: -ता -तं.

CONQUERER, *s.* जेता *m.* (तृ), विजेता *m.* (तृ), विजयी *m.* (न्), जयी *m.*, परन्तप:.

CONQUEST, *s.* जय:, विजय:, विजयसिद्धि: *f.*, अभिभव:, निग्रह:.—(The act of conquering) जयनं, विजयनं, वशीकरणं; 'foreign conquests,' दिग्विजय:.

CONSANGUINEOUS, *a.* एकशरीर: -रा -रं, सहोदर: -रा -रं, समानोदर्य्य: -र्य्या -र्य्यं, सगर्भ: -र्भा -र्भं, एकपिण्ड: -ण्डा -ण्डं, सपिण्ड: -ण्डा -ण्डं, सगोत्र: -त्रा -त्रं, एकवंशजात: -ता -तं, अन्तरङ्ग: -ङ्गा -ङ्गं; 'consanguineous descent,' एकशरीरान्वय:.

CONSANGUINITY, *s.* एकशरीरता, एकशरीरान्वय:, एकशरीरावयवत्वं, सपिण्डता, एकपिण्डता, समानोदर्य्यता, सगोत्रता, सगर्भत्वं, सम्बन्धित्वं.

CONSCIENCE, *s.* अन्त:करणं, अन्तर्यामी *m.* (न्), अभिमन्ता *m.* (न्तृ), अन्त:संज्ञा, मन: *n.* (स्), अन्त:शरीरं; 'remorse of conscience,' मनस्ताप:, मन:सन्ताप:, पश्चात्ताप:.—(Consciousness) चेतना, वेदनं, अनुभव:.

CONSCIENTIOUS, *a.* शुद्धान्त:करण: -णा -णं, शुद्धमति: -ति: -ति, शुद्धात्मा -त्मा -त्म (न्), पुण्यशील: -ला -लं, पुण्यात्मा -त्मा -त्म (न्), न्यायाचार: -रा -रं, शुचि: -चि: -चि, धर्म्मशील: -ला -लं.

CONSCIENTIOUSLY, *adv.* शुद्धमत्या, शुद्धमनसा, न्यायेन, पुण्यशीलत्वात्, निर्विशङ्कं.

CONSCIENTIOUSNESS, *s.* मतिशुद्धत्वं, अन्त:करणशुद्धि: *f.*, पुण्यशीलता, शुचिता.

CONSCIONABLE, *a.* न्याय्य: -य्या -य्यं, यथान्याय्य: -य्या -य्यं, यथार्थ: -र्था -र्थं.

CONSCIONABLY, *adv.* यथान्याय्यं, यथार्थं, धर्म्मतस्, धर्म्मानुसारात्, यथोचितं.

CONSCIOUS, *a.* चेतन: -ना -नं, सचेतन: -ना -नं, प्रतिपन्नचेतन: -ना -नं, वेदी -दिनी -दि (न्), ज्ञानी -निनी -नि (न्), अनुभावी -विनी -वि (न्), सतर्क: -र्का -र्कं; 'internally conscious,' अन्तश्चैतन्य: -न्या -न्यं.

CONSCIOUSLY, *adv.* ज्ञानतस्, ज्ञानात्, ज्ञानपूर्व्वं, बुद्धिपूर्व्वं, मत्या.

CONSCIOUSNESS, *s.* चेतना, चैतन्यं, वेदनं, अनुभव:, अन्त:संज्ञा, बोध:, अन्तर्बोध:, ज्ञानं, चित्ताभोग:, मनस्कार:, अहङ्कार:, चित्तात्मकं, प्रमा; 'internal consciousness,' अन्तश्चैतन्यं; 'consciousness of pleasure,' सुखानुभव:, सुखवेदनं.

CONSCRIPT, *s.* नवयोद्धा *m.* (द्धृ), नवसैन्य:, सैन्यानां मध्ये अभिलिखितनामा *m.* (न्).

CONSCRIPTION, *s.* सैन्यानां मध्ये नामाभिलेखनं or नामसमारोपणं.

To CONSECRATE, *v. a.* संस्कृ, अभिसंस्कृ, प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयति -ते -यितुं), उपनिमन्त्र्.—(By sprinkling) अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), प्रोक्ष् (c. 1. -उक्षति -क्षितुं).—(Devote to any use) विनियुज् (c. 7. -युनक्ति -योक्तुं), अर्पय; सम् in caus. (-अर्पयति -यितुं).—(Present) उत्सृज् (c. 6. -सृजति -स्रष्टुं), निविद् in caus. (-वेदयति -यितुं).

CONSECRATE OR CONSECRATED, *a.* संस्कृत: -ता -तं, अभिसंस्कृत: -ता -तं, कृतसंस्कार: -रा -रं, अभिमन्त्रित: -ता -तं, प्रतिष्ठित: -ता -तं, सुप्रतिष्ठित: -ता -तं, प्रोक्षित: -ता -तं, सम्प्रोक्षित: -ता -तं, कृताभिषेक: -का -कं, अभिषिक्त: -क्ता -क्तं, प्रणीत: -ता -तं, विनियोजित: -ता -तं, उपकॢप्त: -प्ता -प्तं, समर्पित: -ता -तं, आहित: -ता -तं.

CONSECRATER, *s.* संस्कर्त्ता *m.* (र्त्तृ), प्रतिष्ठापक:, अभिमन्त्रणकृत्, अभिषेचक:, सङ्कल्पकृत्.

CONSECRATION, *s.* संस्कार:, प्रतिष्ठा, सुप्रतिष्ठा, अभिमन्त्रणं, अभिषेक: -षेचनं, सम्प्रोक्षणं, प्रोक्षणं, उत्सर्ग:, सङ्कल्प:; 'of a temple,' प्रासादप्रतिष्ठा; 'of one's self to God,' आत्मनिवेदनं; 'of one's person,' देहविनियोग:.

CONSECUTION, *s.* प्रबन्ध:, पर्य्याय:, क्रम:, अनुक्रम:, विपर्य्यय:, वीप्सा, सन्तति: *f.*, समन्वय:, परम्परा, श्रेणी, माला.

CONSECUTIVE, *a.* निरन्तर: -रा -रं, अविरत: -ता -तं, अनुपूर्व्व: -र्व्वा -र्व्वं, क्रमक: -का -कं, क्रमागत: -ता -तं, अपरिच्छिन्न: -न्ना -न्नं, सम्बन्ध: -न्धा -न्धं, सन्तत: -ता -तं.

CONSECUTIVELY, *adv.* निरन्तरं, प्रबन्धेन, अनुपूर्वशस्, अनुक्रमशस्, क्रमतस्, क्रमानुसारेण, यथाक्रमं, यथापूर्व्वं, अविरतं, अविच्छिन्नं.

CONSECUTIVENESS, *s.* आनन्तर्य्यं, नैरन्तर्य्यं, आनुपूर्व्यं, अविच्छेदः, अविरामः, अनुयायित्वं, अपरिच्छिन्नता, अविच्छिन्नत्वं, सम्बन्धत्वं.

CONSENT, *s.* सम्मतिः *f.*, सम्मतं, अनुमतिः *f.* -तं, अनुज्ञा, स्वीकारः, अनुकूलता, ग्रहणं, प्रतिग्रहः, अनुग्रहः, परिग्रहः, इच्छा.—(Unity of opinion) ऐकमत्यं, ऐक्यं, मतैक्यं, एकचित्तता, अनुवादः; 'mutual consent,' परस्परानुमतिः *f.*; 'with his consent,' तस्य सम्मत्या; 'without his consent,' तस्य अनुमतिव्यतिरेकेण; 'with the consent,' इच्छातस्, इच्छया; 'against consent,' अनिच्छया; 'a writing testifying consent,' सम्मतिपत्रं.

To CONSENT, *v. n.* सम्मन् (c. 4. -मन्यते -ते -मन्तुं), अनुमन्; अनुज्ञा (c. 9. -जानाति -ज्ञातुं), समनुज्ञा, अभ्यनुज्ञा, स्वीकृ, ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रतिग्रह्, परिग्रह्, अनुग्रह्, प्रतीष् (c. 6. -इच्छति -एषितुं), सम्प्रतीष्, अनुमुद् (c. 1. -मोदते -दितुं), उपगम् (c. 1. -गच्छति -गन्तुं), एकचित्तीभू, एकमतीभू.

CONSENTED, *p. p.* सम्मतः -ता -तं, अनुमतः -ता -तं, अनुज्ञातः -ता -तं.

CONSENTANEOUS, *a.* अनुसारी -रिणी -रि (न्), योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, अनुरूपः -पा -पं, सदृशः -शी -शं, अविरुद्धः -द्धा -द्धं, अनुगुणः -णा -णं.

CONSENTANEOUSLY, *adv.* अनुसारतस् -रेण -रात्, अनुरूपं -पेण, योग्यं, अविरुद्धं.

CONSENTIENT, *a.* एकमतः -ता -तं, सम्मतः -ता -तं, एकचित्तः -त्ता -त्तं, एकवाक्यः -क्या -क्यं.

CONSENTINGLY, *adv.* सम्मत्या, अनुमत्या, सम्मतिपूर्व्वं, कामतस्, बुद्धिपूर्व्वं.

CONSEQUENCE, *s.* प्रयोगः, प्रयुक्तिः *f.*, फलं, फलानुसारं, उत्तरं, अनुसारः, अनुषङ्गः, परिणामः, शेषः, अन्वयः, समन्वयः, योगः, उदर्कः, व्युष्टिः *f.* -ष्टं, अर्थः, कार्य्यं, उत्पन्नं, उद्भूतं, सिद्धिः *f.*, प्रतिफलं, अनुभवः, अनुवृत्तं, अनुवर्त्तनं, प्रयोजनं, निमित्तं, प्रत्ययः; 'necessary consequence,' कार्य्यवशः; 'in consequence,' प्रयोगतस्, कार्य्यतस्; 'evil consequences,' मन्दफलं; 'visible consequence,' दृष्टार्थः; 'invisible consequence,' अदृष्टार्थः; 'immediate consequence,' सान्दृष्टिकं; 'happy consequence,' शुभफलं.—(Deduction, inference) अनुमानं, युक्तिः *f.*, ऊहा, अभ्यूहः, अपवाहः.—(Importance) गौरवं, गुरुता, प्रभावः; 'of little consequence,' अल्पप्रभावः; 'consequence or importance of an act,' कार्य्यगुरुता; 'a matter of some consequence,' गुरुकार्य्यं.

CONSEQUENT, *a.* प्रयुक्तः -क्ता -क्तं, प्रयोगी -गिणी -गि (न्), यौक्तिकः -की -कं, अनुषङ्गिकः -की -कं or आनुषङ्गिकः, अनुसारी -रिणी -रि (न्), अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), अनुयायी -यिनी -यि (न्), जनितः -ता -तं; 'consequent upon that,' तत्फलः -ला -लं.

CONSEQUENT, *s.* प्रयोगः, अनुषङ्गः, अनुवृत्तं, फलं, अन्वयः, परिणामः.

CONSEQUENTIAL, *a.* (Full of conceit) गर्व्वी -र्व्विणी -र्व्वि (न्), साटोपः -पा -पं, मानी -निनी -नि (न्).—(Following as effect and cause) प्रयुक्तः -क्ता -क्तं, आनुषङ्गिकः -की -कं.

CONSEQUENTIALLY, *adv.* प्रयोगतस्, प्रयुक्तं.—(Arrogantly) साटोपं, सगर्व्वं.

CONSEQUENTLY, *adv.* प्रयोगतस्, प्रयुक्तं, कार्य्यतस्, कार्य्यवशात्, अनुसारेण, तदनुसारतस्, इति हेतोः, अतस्, अर्थात्, तदर्थं, तस्य हेतोः, तन्निमित्ते, अवश्यं, इति.

CONSEQUENTNESS, *s.* प्रयुक्तत्वं, अनुसारिता, प्रबन्धः, पूर्व्वापरसम्बन्धः.

CONSERVABLE, *a.* संरक्ष्यः -क्ष्या -क्ष्यं, संरक्षणीयः -या -यं, सन्धारणीयः -या -यं.

CONSERVATION, *s.* संरक्षः -क्षणं, रक्षा, रक्षणं, परित्राणं, त्राणं, सन्धारणं, धरणं, गुप्तिः *f.*, पालनं, क्षेमः, भयनिवारणं.

CONSERVATIVE, *a.* संरक्षकः -का -कं, पालकः -का -कं, सन्धारकः -का -कं.

CONSERVATOR, *s.* रक्षकः, संरक्षणशीलः, पालकः, परित्राता *m.* (तृ), गोप्ता *m.* (तृ).

CONSERVATORY, *s.* रक्षास्थानं, गुप्तिः *f.*, धारकः, आधारः.—(For plants, &c.) विदेशीयतृणौषधिवृक्षादीनां रक्षणशाला or रक्षणगृहं.

To CONSERVE, *v. a.* (Preserve) संरक्ष् (c. 1. -रक्षति -क्षितुं), परिरक्ष्; सन्त्रै (c. 1. -त्रायते -त्रातुं), सम्पाल् (c. 10. -पालयति -यितुं), परिपाल्; गुप् (c. 1. गोपायति, गोप्तुं), अभिसङ्गुप्, सन्धृ in caus. (-धारयति -यितुं).—(Preserve or pickle) सन्धा (c. 3. -दधाति -धातुं), उपस्कृ, मिष्टीकृ.

CONSERVE, *s.* मिष्टं, मोदकः -कं, खण्डमोदकः, खण्डः, सन्धितं, सन्धानं, गुडकः.

CONSESSION, *s.* सहासनं, उपासनं, अन्येन सह उपवेशः.

CONSESSOR, *s.* सभासद्, सहासीनः, उपासीनः, उपासिता *m.* (तृ), अन्येन सह आसीनः.

To CONSIDER, *v. a.* (Think upon) चिन्त् (c. 10. चिन्तयति -यितुं), विचिन्त्, सञ्चिन्त्, प्रविचिन्त्; बुध् (c. 1. बोधति -धितुं, c. 4. बुध्यते, बोद्धुं), विमृश् (c. 6. -मृशति -म्रष्टुं), परिमृश्, अनुमृश्; सम्भू in caus. (-भावयति -यितुं), ध्यै (c. 1. ध्यायति, ध्यातुं), सन्ध्यै, अनुध्यै, अवधृ in caus. (-धारयति -यितुं), सम्प्रधृ, उपधृ, समाधा (c. 3. -धत्ते -धातुं).—(Look at attentively) अवेक्ष् (c. 1. -ईक्षते -क्षितुं), समीक्ष्; आलोक् (c. 10. -लोकयति -यितुं), आलोच् (c. 10. -लोचयति -यितुं), दृश् (c. 1. पश्यति, द्रष्टुं), सन्दृश्, परिदृश्, आलक्ष् (c. 10. -लक्षयति -यितुं), उपलक्ष्, अवधा.—(Examine) निरूप् (c. 10. -रूपयति -यितुं), परीक्ष्, विचर् in caus. (-चारयति -यितुं).—(Weigh) विगण् (c. 10. -गणयति -यितुं), विक्लृप् (c. 10. -कल्पयति -यितुं), विचर्, वितर्क् (c. 10. -तर्कयति -यितुं).—(Have regard to) अपेक्ष्, प्रतीक्ष्, अवेक्ष्, निरीक्ष्, अनुदृश्, उद्दिश् (c. 6. -दिशति -देष्टुं).—(Imagine, think) मन् (c. 4. मन्यते, मन्तुं), तर्क् (c. 10. तर्कयति -यितुं).—(Reverence) पूज् (c. 10. पूजयति -यितुं), अर्च् (c. 10. अर्चयति -यितुं), मन् (c. 10. मानयति -यितुं).—(Recompense) प्रत्युपकृ, सन्तुष् in caus. (-तोषयति -यितुं), परितुष्, सम्भू in caus.

To CONSIDER, *v. n.* चिन्त् (c. 10. चिन्तयति -यितुं), बुध् (c. 4. बुध्यते, बोद्धुं), ध्यै (c. 1. ध्यायति, ध्यातुं), समीक्षां कृ, विचारं कृ, परामर्शं कृ, विवेचनं कृ.

CONSIDERABLE, *a.* (Respectable) प्रतीक्ष्यः -क्ष्या -क्ष्यं, मान्यः -न्या -न्यं, आर्य्यः -र्य्या -र्य्यं, आदरणीयः -या -यं.—(Important) गुरुः -र्व्वी -रु, बह्वर्थः -र्था -र्थं.—(Not little) अनल्पः -ल्पा -ल्पं, बहुः -ह्वी -हु, प्रचुरः -रा -रं, महान् -हती -हत् (त्), भूरिः -रिः -रि, महामूल्यः -ल्या -ल्यं, अर्घ्यः -र्घ्या -र्घ्यं.

CONSIDERABLENESS, *s.* गौरवं, गुरुता, मान्यता, आर्य्यत्वं, अर्घ्यता, अनल्पत्वं, प्राचुर्य्यं.

CONSIDERABLY, *adv.* अनल्पं, बहु, गुरु, सु or अति prefixed, भूरि, भृशं, अतिशयं.

CONSIDERATE, *a.* (Prudent) समीक्ष्यकारी -रिणी -रि (न्), विमृश्यकारी -रिणी -रि (न्), कार्य्यचिन्तकः -का -कं, चिन्ताशीलः -ला -लं, परिणामदर्शी -र्शिनी -र्शि (न्), कृतावधानः -ना -नं, मतिमान् -मती -मत् (त्).—(Regardful) आदृतः -ता -तं, सादरः -रा -रं, प्रतीतः -ता -तं.

CONSIDERATELY, *adv.* समीक्ष्य, विमृश्य, अवधानतस्, मतितस्, अपेक्षया, असहसा, अप्रमत्तं, प्रमादं विना.

CONSIDERATENESS, *s.* चिन्ता, कार्य्यचिन्ता, प्रसमीक्षा, मतिः, बुद्धिचारः.

CONSIDERATION, *s.* (Reflection, examination) चिन्ता, सुचिन्ता, सचिन्तनं, विचारः -रणं -रणा, सुविचारः, समीक्षा -क्षणं, प्रसमीक्षा, अपेक्षा, वितर्कः, विवेचनं, विमर्शः, परामर्शः, भावना, सम्प्रधारणा, आलोचनं.

सम्प्रधानं, प्रणिधानं, विगणनं, परीक्षा, आस्था, संख्या.—(Regard for) प्रतीक्षा, अपेक्षा, अवेक्षा, उद्देशः, प्रतीतिः *f.*; 'in consideration of,' अपेक्षया.—(Motive, reason) हेतुः *m.*, निमित्तं, प्रयोजनं, कारणं, प्रयोगः.—(Importance) गौरवं, गुरुता, प्रभावः.—(Estimation, honour) मानं, मान्यत्वं, आदरः, पूजा, पूज्यता, सम्भावना.—(Compensation) पारितोषिकं, परिवर्त्तः, परीवर्त्तः.

CONSIDERED, *p. p.* चिन्तितः -ता -तं, सुचिन्तितः -ता -तं, सञ्चिन्तितः -ता -तं, परामृष्टः -ष्टा -ष्टं, समीक्षितः -ता -तं, आलोचितः -ता -तं, निरूपितः -ता -तं, सुनिरूपितः -ता -तं, प्रतीक्षितः -ता -तं, निरीक्षितः -ता -तं, विचारितः -ता -तं, विगणितः -ता -तं, मतः -ता -तं, स्मृतः -ता -तं.

CONSIDERER, *s.* चिन्तकः, चिन्तापरः, ध्यानपरः, विचारकः, विवेचकः.

CONSIDERING, *part.* अपेक्षया, प्रतीक्ष्य, अवेक्ष्य, उद्दिश्य, प्रतीक्षकः -का -कं.

To CONSIGN, *v. a.* (Intrust) ऋ in caus. (अर्पयति -यितुं), समृ, प्रतिपद् in caus. (-पादयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), न्यासीकृ, परिदा (c. 3. -ददाति -दातुं), आरुह् in caus. (-रोपयति -यितुं), नियुज् (c. 7. -युनक्ति -योक्तुं), प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), विधा.—(Appropriate) प्रयुज्, उपयुज्, विनियुज्.

CONSIGNABLE, *p. p.* अर्पणीयः -या -यं, अर्प्यः -र्प्या -र्प्यं, समर्पणीयः -या -यं, प्रतिपादनीयः -या -यं, आरोपणीयः -या -यं.

CONSIGNED, *p. p.* अर्पितः -ता -तं, समर्पितः -ता -तं, प्रतिपादितः -ता -तं, निक्षिप्तः -प्ता -प्तं, न्यस्तः -स्ता -स्तं, न्यासीकृतः -ता -तं, प्रणिहितः -ता -तं.

CONSIGNMENT, *s.* समर्पणं, अर्पणं, न्यसनं, प्रतिपादनं, आरोपणं, परिदानं, विधायकत्वं.—(In writing) समर्पणपत्रं, चालनपत्रं.

To CONSIST, *v. n.* संस्था (c. 1. -तिष्ठति -स्थातुं), परिसंस्था, अवस्था, विष्ठा, सम्भू, वृत् (c. 1. वर्त्तते -र्त्तितुं), संवृत्.—(Be comprised, be composed) अन्तर्गतः -ता -तं भू. But in this sense आत्मकः -का -त्मिका -कं or रूपः -पा -पं are used; as, 'the army consists of elephants, horses, and infantry,' हस्त्यश्वपादातात्मकं बलं; 'the country consists of valleys and mountains,' दरीपर्वतरूपो विषयः.

CONSISTENCE, *s.* यथापरत्वं.—(Thickness) घनता, सान्द्रता, श्यानता, पीवरत्वं.—(Firmness) दृढता, स्थिरता, यथापरत्वं.—(Suitableness) योग्यता, अविरोधः.

CONSISTENCY, *s.* (Stability) स्थैर्य्यं, धीरत्वं, धृतिः *f.*, यथापरत्वं, अव्यभिचारः.—(Congruity) अनुसारित्वं, अविरोधः, सादृश्यं, आनुरूप्यं.

CONSISTENT, *a.* (Stable) स्थिरः -रा -रं, धीरः -रा -रं, अचपलः -ला -लं, अव्यभिचारी -रिणी -रि (न्), अविगुणः -णा -णं, अविकलः -ला -लं.—(Not opposed, not contradictory) अविरुद्धः -द्धा -द्धं, अविपरीतः -ता -तं, अनुसारी -रिणी -रि (न्), योग्यः -ग्या -ग्यं, सङ्गतः -ता -तं, सदृशः -शी -शं.—(Solid, not fluid) घनः -ना -नं, दृढः -ढा -ढं, पीवरः -रा -रं.

CONSISTENTLY, *adv.* अविरुद्धं, अविपरीतं, योग्यं, अनुसारतस् -रेण, सङ्गतं.

CONSISTING OF, *p.* Expressed by आत्मकः -का -त्मिका -कं or रूपः -पा -पं; as, 'an army consisting of elephants, horses, chariots, and infantry,' हस्त्यश्वरथपादातात्मकं or -रूपं दलं; 'consisting of two,' द्व्यात्मकः -का -कं; 'consisting of troubles,' दुःखात्मकः -पा -पं.—(Made of) मयः -यी -यं affixed.

CONSISTORIAL, *a.* धर्म्माध्यक्षसभासम्बन्धी -न्धिनी -न्धि (न्), पुरोहितसभासम्बन्धी.

CONSISTORY, *s.* धर्म्माध्यक्षसभा, पुरोहितसभा, रोमनगरे महाधर्म्माध्यक्षसमाजः.

CONSOCIATE, *s.* सङ्गी *m.* (न्), अनुषङ्गी *m.* (न्), सहायः, सहचारी *m.* (न्), सहवासी *m.* (न्), बन्धुः *m.*

To CONSOCIATE, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), संश्लिष् in caus. (-श्लेषयति -यितुं), सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं).

To CONSOCIATE, *v. n.* सङ्गम् (c. 1. -गच्छति -गन्तुं), सह गम्, संवस् (c. 1. -वसति -वस्तुं), सह वस्, मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, संयुज् in pass. (-युज्यते).

CONSOCIATED, *p. p.* संयुक्तः -क्ता -क्तं, सहयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, सहितः -ता -तं, सङ्गतवान् -वती -वत् (त्), मिलितः -ता -तं, संसृष्टः -ष्टा -ष्टं, कृतसंसर्गः -र्गा -र्गं, सम्पृक्तः -क्ता -क्तं.

CONSOCIATION, *s.* साहाय्यं, सहायता, साहचर्य्यं, साहित्यं, संयोगः, सङ्गमः, सङ्गतिः *f.*, संसर्गः, सङ्गः, संश्लेषः, सङ्घातः.

CONSOLABLE, *a.* सान्त्वनीयः -या -यं, सन्तोषणीयः -या -यं, सन्तोष्टव्यः -व्या -व्यं, आश्वासनीयः -या -यं, प्रबोधनीयः -या -यं, विनोदनीयः -या -यं.

CONSOLATION, *s.* सान्त्वः -न्त्वं, सान्त्वनं -ना, शान्त्वं, आश्वासनं, समाश्वासनं, उपशान्तिः *f.*, शान्तिः *f.*, सन्तोषणं, शोकापनोदः, शोकापहारः, विनोदः, प्रबोधः.

CONSOLATORY, *a.* सान्त्वदः -दा -दं, सान्त्वनः -ना -नं, शान्तिकः -की -कं, शान्तिदः -दा -दं, शमकः -का -कं, सन्तोषकः -का -कं, आश्वासकः -सिका -कं, शोकापनुदः -दा -दं, क्लेशापहः -हा -हं, शोकापहारकः -का -कं, शोकच्छिद् *m. f. n.*

To CONSOLE, *v. a.* सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्, आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, परिविश्वस्, प्रबुध् in caus. (-बोधयति -यितुं), शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्, शोकम् अपनुद् (c. 6. -नुदति -नोत्तुं) or विनुद् in caus. (-नोदयति -यितुं) or प्रतिकृ; सुस्थ (nom. सुस्थयति -यितुं), सुस्थिरं -रां -रं कृ.

CONSOLE, *s.* (In architecture) नागः, नागदन्तकः, सालारं, निर्व्यूहः.

CONSOLED, *p. p.* आश्वासितः -ता -तं, सन्तोषितः -ता -तं, विनोदितः -ता -तं.

CONSOLER, *s.* सान्त्ववादः, आश्वासकः, विनोदकर्त्ता *m.* (र्तृ), शोकापनुदः.

To CONSOLIDATE, *v. a.* संस्था in caus. (-स्थापयति -यितुं), प्रतिष्ठा, स्थिरीकृ, सुस्थिरं -रां -रं कृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं), दृढीकृ, घनीकृ, संहन् (c. 2. -हन्ति -हन्तुं).

To CONSOLIDATE, *v. n.* संस्था in caus. pass. (-स्थाप्यते), स्थिरीभू, सुस्थिरीभू, दृढीभू, घनीभू, संहन् in pass. (-हन्यते).

CONSOLIDATED, *p. p.* संस्थापितः -ता -तं, संस्तम्भितः -ता -तं, संहतः -ता -तं, स्थिरीकृतः -ता -तं, दृढीभूतः -ता -तं, एकत्रीकृतः -ता -तं.

CONSOLIDATION, *s.* स्थिरीकरणं, दृढीकरणं, संस्तम्भः, संस्थापनं, घनीकरणं, एकीकरणं.

CONSONANCE, *s.* अनुसारः -रिता, आनुरूप्यं, योग्यता, अविरोधः, सादृश्यं.

CONSONANT, *a.* अनुसारी -रिणी -रि (न्), योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, सदृशः -शी -शं, अनुगुणः -णा -णं, अविरुद्धः -द्धा -द्धं, तुल्यः -ल्या -ल्यं.

CONSONANT, *s.* (Letter) व्यञ्जनं; 'conjunct consonant,' संयोगः.

CONSONANTLY, *adv.* अनुसारतस् -रेण, अनुरूपेण, अविरुद्धं, योग्यं, यथा.

CONSONOUS, *a.* एकतालः -ला -लं, सरैक्यकारी -रिणी -रि (न्).

CONSORT, *s.* (Wife) पत्नी, भार्य्या, वधूः.—(Husband) पतिः *m.*, भर्त्ता *m.* (र्तृ).—(Royal consort, queen) राजपत्नी, राजमहिषी.—(Partner) सहवासी *m.* -सिनी *f.* (न्), सहवर्त्ती *m.* (न्), सहभावी *m.* (न्), सङ्गी *m.* (न्).

To CONSORT, *v. n.* (Keep company with) सह वस् (c. 1. वसति, वस्तुं), संवस्; सङ्गम् (c. 1. -गच्छति -गन्तुं), सह गम्, सह चर् (c. 1. चरति -रितुं).

CONSORTED, *p. p.* सङ्गतः -ता -तं, सहगतः -ता -तं, सङ्गतवान् -वती -वत् (त्).

CONSORTION, *s.* साहित्यं, सहायत्वं, साहाय्यं, सङ्गमः, साहचर्य्यं, संसर्गः.

CONSPERSION, *s.* सम्प्रोक्षणं, प्रोक्षणं, निषेकः, सेकः, सेचनं, प्रक्षेपः.

CONSPICUOUS, *a.* (Obvious to the sight) प्रकाशः -शा -शं, सुप्रकाशः -शा -शं, प्रत्यक्षः -क्षा -क्षं, स्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, व्यक्तः -क्ता -क्तं, प्रव्यक्तः -क्ता -क्तं. प्रकाशमानः -ना -नं, प्रकाशितः -ता -तं, दीप्यमानः -ना -नं, देदीप्यमानः -ना -नं, पुरःस्फुरन् -रन्ती -रत् (त्).—(Eminent) प्रमुखः -खा -खं, उत्कृष्टः -ष्टा -ष्टं, प्रकृष्टः -ष्टा -ष्टं, विशिष्टः -ष्टा -ष्टं, सुख्यातः -ता -तं.

CONSPICUOUSLY, *adv.* प्रत्यक्षतस्, प्रकाशं, स्पष्टं, स्फुटं, व्यक्तं.

CONSPICUOUSNESS, *s.* प्रकाशता, सुप्रकाशत्वं, प्रत्यक्षत्वं, व्यक्तत्वं, स्फुटता, स्पष्टता, सुस्पष्टत्वं, प्रादुर्भावः.—(Eminence) प्रकृष्टत्वं, प्रमुखत्वं, विशिष्टता, विख्यातिः *f.*

CONSPIRACY, *s.* दुष्टकर्म्मसम्पादनार्थं बहुजनानां संसर्गः, बहूनां कुसाहित्यं, असत्साहित्यं, कुसंसर्गः, कुसाहाय्यं, कुमन्त्रणा, कपटप्रबन्धः, कुसङ्कल्पः, पणः, ऐकमत्यं, एकवाक्यता.—(Conjunction) संशापः, संशपनं.—(Against the king) द्रोहः, राजद्रोहः.

CONSPIRATOR, *s.* दुष्टकर्म्मसाधनार्थं बहुजनैः सह संसर्गी *m.* (न्) or सङ्गी *m.* (न्) or अनुषङ्गी *m.* (न्).—(Persons bound together by oath) संशप्तकाः *m. pl.*, दिव्यबद्धाः *m. pl.*, शपथबद्धाः *m. pl.*—(Against life) प्राणच्छेदकरः.—(Against the king) राजद्रोही *m.* (न्).—(Traitor) विश्वासघातकः.

To CONSPIRE, *v. n.* दुष्टकर्म्मसाधनार्थं संसर्गं कृ or कुसाहित्यं कृ or कुसाहाय्यं कृ or पणं कृ, द्रोहं कृ.—(Against the life of the king) राजा हन्तव्य इति परस्परं शपथेन बद्धा भूत्वा समयं कृ.—(Agree together, lead to one point) सम्मिल् (c. 6. -मिलति -मेलितुं), एकत्र नी (c. 1. नयति, नेतुं), समानी, अनुकूल (nom. अनुकूलयति -यितुं); 'all things conspire to make him happy,' तस्य सुखार्थं सर्व्वं सम्मिलति.

CONSTABLE, *s.* दण्डपाणिः *m.*, दण्डधरः, गड्वाटः, दड्वटः, यष्टिधरः, राजपुरुषः, कोष्टपालः, ग्राहकः.—(Chief constable) दण्डनायकः.

CONSTANCY, *s.* (Perpetuity) नित्यता -त्वं, अविरामः, नैरन्तर्य्यं, संस्थितिः *f.*, प्रत्यवस्थानं.—(Firmness) स्थिरता, स्थैर्य्यं, धीरत्वं, दार्ढ्यं, दृढता, द्रढिमा *m.* (न्), धृतिः *f.*, स्थेमा *m.* (न्).—(Perseverance) अभिनिवेशः, निर्बन्धः, अतिनिर्बन्धः, व्यवस्थितिः *f.*, ग्रहः.—(Faithfulness, lasting affection) दृढा भक्तिः, दृढं सौहृदं, दृढभक्तित्वं, अनुकूलता.

CONSTANT, *a.* (Perpetual) नित्यः -त्या -त्यं, नैत्यिकः -की -कं, अभीक्ष्णः -क्ष्णा -क्ष्णं, शाश्वतः -ती -तं, अविरतः -ता -तं, निरन्तरः -रा -रं, सनातनः -नी -नं, सर्व्वकालीनः -ना -नं, सार्व्वकालिकः -की -कं, चिरस्थायी -यिनी -यि (न्).—(Firm, steadfast) स्थिरः -रा -रं, दृढः -ढा -ढं, धीरः -रा -रं, व्यवस्थितः -ता -तं, धृतिमान् -मती -मत् (त्), प्रसक्तः -क्ता -क्तं, नियतः -ता -तं.—(Resolute) स्थिरमतिः -तिः -ति, स्थिरचेताः -ताः -तः (स्), स्थितधीः -धीः -धि.—(Constant in friendship) दृढसौहृदः -दी -दं. दृढभक्तिः -क्तिः -क्ति; 'a constant wife,' पतिव्रता, सतीया, दृढाभक्तिः *f.*; 'a constant lover,' अनुकूलः.

CONSTANTLY, *adv.* नित्यं, नित्यशस्, नित्यदा, सततं, अजस्रं, नियतं, निरन्तरं, अविरतं, अनवरतं, अभीक्ष्णं, सर्व्वकालं, शश्वत्, अनिशं, समतं, प्रतिक्षणं, अनुक्षणं, मना, वारं वारं, अश्रान्तं.—(With firmness) स्थिरमत्या, मनःस्थैर्य्येण.

CONSTELLATION, *s.* राशिः *m.*, नक्षत्रं, राशिनक्षत्रं, ऋक्षं, ताराराशिः *m.*, तारासमूहः.

CONSTERNATION, *s.* विस्मयः, सन्त्रासः, साध्वसं, त्रासः, सम्भ्रमः, आकुलत्वं, व्याकुलता, कातरता, भयं, चमत्कारः, अतिक्लान्तत्वं.

To CONSTIPATE, *v. a.* अवरुध् (c. 7. -रुणद्धि -रोद्धुं), बन्ध् (c. 9. -बध्नाति -बन्द्धुं), निबन्ध्, स्तम्भ् (c. 9. स्तभ्नाति, स्तम्भितुं), विष्टम्भ्, अवष्टम्भ्; नह् (c. 4. नह्यति, नद्धुं).—(Crowd) सम्बाध् (c. 1. -बाधते -धितुं).—(Condense) घनीकृ, निविडीकृ.

CONSTIPATED, *p. p.* अवरुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, बद्धकोष्ठः -ष्ठा -ष्ठं, निबद्धः -द्धा -द्धं, विष्टब्धः -ब्धा -ब्धं, अवष्टब्धः -ब्धा -ब्धं.

CONSTIPATION, *s.* मलावरोधः, मलावष्टम्भः, विष्टम्भः, नाहः, आनाहः, विड्ग्रहः, गुदग्रहः, विट्सङ्गः, निबन्धः, विबन्धः, कोष्ठनिबन्धः, बद्धकोष्ठं, आमवातः, वेगरोधः, वेगविधारणं; 'producing constipation,' ग्राही -हिणी -हि (न्), विष्टम्भी -म्भिनी -म्भि (न्).

CONSTITUENT, *a.* (Component, making) साधकः -का -कं, विधायी -यिनी -यि (न्), कल्पकः -का -कं, संस्थापकः -का -कं, निर्म्मायकः -का -कं, रचकः -का -कं.—(Essential) वास्तवः -वी -वं, सारभूतः -ता -तं, स्वाभाविकः -की -कं.

CONSTITUENT, *s.* साधनं, वस्तु *n.*, सारः, भूतं, मूलं, योनिः *m. f.*; 'a constituent part,' अङ्गं; 'of an army,' सेनाङ्गं.—(He who deputes) नियोजकः, प्रेरकः.

To CONSTITUTE, *v. a.* (Form, compose) निर्म्मा (c. 2. -माति, c. 3. -मिमीते -मातुं), विधा (c. 3. -दधाति -धातुं), क्लृप् (c. 10. कल्पयति -यितुं), कृ (c. 8. कुरुते, कर्त्तुं), रच् (c. 10. रचयति -यितुं), साध् in caus. (साधयति -यितुं); संस्था in caus. (-स्थापयति -यितुं).—(Establish) स्था in caus., प्रस्था, संस्था, प्रतिष्ठा.—(Depute) नियुज् (c. 7. -युनक्ति -योक्तुं), प्रतिपद् in caus. (-पादयति -यितुं), समादिश् (c. 6. -दिशति -देष्टुं); 'whatever wealth constitutes the treasury,' यद् धनं कोषभूतं.

CONSTITUTED, *p. p.* (Composed, consisting of) निर्म्मितः -ता -तं, आत्मकः -का -त्मिका -कं in comp., रूपः -पा -पं in comp., मयः -यी -यं in comp.

CONSTITUTION, *s.* (State) भावः, स्वभावः, अवस्था, दशा, स्थितिः *f.*, वृत्तिः *f.*—(Form) रूपं, स्वरूपं.—(Structure) निर्म्मितिः *f.*, निर्म्माणं, संस्थितिः, व्यूहनं, विधानं, रचना, साधनं.—(Temperament) प्रकृतिः *f.*, भावः, स्वभावः, प्रकृतिस्वभावः, देहस्वभावः, शरीरस्थितिः *f.*, जन्मस्वभावः, जातिस्वभावः; 'of a sickly constitution,' जन्मरोगी -गिणी -गि (न्).—(Ordinance) व्यवस्था, विधिः *m.*—(System of government) राज्यरीतिः *f.*, राज्यस्थितिः *f.*, राज्यनीतिः *f.*, राज्यविधिः *m.*, राज्यप्रकृतिः *f.*, देशाचारः.—(Act of establishing) नियोजनं, प्रतिष्ठापनं, व्यवस्थापनं.

CONSTITUTIONAL, *a.* (Relating to the constitution of body) प्राकृतिकः -की -कं, स्वाभाविकः -की -कं.—(To the constitution of the state) राज्यव्यवस्थानुसारी -रिणी -रि (न्).—(Radical) मौलः -ली -लं.

To CONSTRAIN, *v. a.* (Compel an unwilling person to do any thing) बलेन or बलात्कारेण or यत्नेन अनिच्छन्तं जनं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं), or नियुज् in caus. (-योजयति -यितुं) with loc. c., बलात्कारं कृ, बलात्कृष् (c. 1. -कर्षति -क्रष्टुं). The causal form of any verb may be used to express 'constrain'; as, 'to constrain to give,' दा in caus. (दापयति -यितुं).—(Restrain) अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

CONSTRAINABLE, *a.* बलात्कारणीयः -या -यं, अवरोधनीयः -या -यं. Expressed by the fut. pass. part. of the caus. form.

CONSTRAINED, *p. p.* (Constrained to do) बलात्कारेण कारितः -ता -तं.

—(Constrained to give) दापितः -ता -तं.—(Constrained to be silent) वञ्चितवाचः -चा -चं. The pass. part. of the caus. form of any verb may be used in this sense.

CONSTRAINT, s. (Compulsion) बलात्कारः, बलं.—(Necessity) अवश्यकार्य्यता.—(Restraint) अवरोधः; 'by constraint,' बलात्, बलात्कारेण, अवश्यकत्वात्, बलायकर्षं.

To CONSTRICT or CONSTRINGE, v. a. सङ्कुच् (c. 1. -कोचति -चितुं), आकुच् (c. 1. -कुचति -चितुं), संहृ (c. 1. -हरति -हर्त्तुं), संवृ (c. 1. -वरति -रितुं -रीतुं), सन्निकृष् (c. 1. -कर्षति -क्रष्टुं).

CONSTRICTION, s. सङ्कोचः -चनं, संवारः, संवृतिः f., आकुञ्चनं.

To CONSTRUCT, v. a. निर्म्मा (c. 2. -माति, c. 3. -मिमीते, c. 4. -मीयते -मातुं or caus. -मापयति -यितुं), कृ (c. 8. करोति, कर्त्तुं or caus. कारयति -यितुं), कॢप् (c. 10. कल्पयति -यितुं), विरच् (c. 10. -रचयति -यितुं), सञ्जन् in caus. (-जनयति -यितुं), घट् (c. 1. घटते -टितुं), विधा (c. 3. -दधाति -धातुं), निचि (c. 5. -चिनोति -चेतुं).

CONSTRUCTED, p. p. निर्म्मितः -ता -तं, कल्पितः -ता -तं, विरचितः -ता -तं, कारितः -ता -तं, घटितः -ता -तं, मयः -यी -यं in comp.

CONSTRUCTION, s. निर्म्माणं, निर्म्मितिः f., रचना, विरचना, कल्पनं -ना, विधानं, घटनं, सन्धिः m., सन्धानं.—(Of words) समर्थः -र्थता, अन्वयः.—(Meaning) अर्थः, अभिप्रायः, आशयः, विवक्षा.

To CONSTRUE, v. a. (Interpret the meaning) अर्थं व्याख्या (c. 2. -ख्याति -तुं); व्याकृ; व्याहृ (c. 1. -हरति -हर्त्तुं); विब्रू (c. 2. -ब्रवीति -वक्तुं), परिशुध् in caus. (-शोधयति -यितुं), छिन्नं कृ.—(Range words in order) शब्दविन्यासं कृ; 'to construe a sloke,' श्लोकालापनं कृ.

CONSTUPRATION, s. धर्षणं, दूषणं, साहसं, बलात्कारेणाभिगमः, राक्षसं, कन्याहरणं, स्त्रीहरणं, कन्यादूषणं.

CONSUBSTANTIAL, a. एकमूर्त्तिः -र्त्तिः -र्त्ति, समभावः -वा -वं, एकभावः -वा -वं, एकशरीरः -रा -रं, एकयोनिः -निः -नि, सजातीयः -या -यं.

CONSUL, s. पूर्व्वकाले रोमनगरे प्रजाभिर् नियुक्तो दण्डनायकः.—(An officer commissioned in foreign parts to superintend the commercial transactions of his own nation) विदेशे स्वदेशीयवाणिज्यव्यापारनिर्वाहको नियुक्तो जनः.

CONSULATE, CONSULSHIP, s. पूर्व्वोक्तदण्डनायकस्य पदं or अधिकारः.

To CONSULT, v. a. and n. मन्त्र् (c. 10. मन्त्रयते -ति -यितुं), सम्मन्त्र्, विचर् in caus. (-चारयति -यितुं), सम्भाष् (c. 1. -भाषते -षितुं), संवद् (c. 1. -वदति -दितुं or c. 10. -वादयति -यितुं), विमृश् (c. 6. -मृशति -मर्ष्टुं), परामृश्, विनिश्चि (c. 5. -चिनोति -चेतुं), सन्निरूप् (c. 10. -निरूपयति -यितुं), एकत्र परामर्शं कृ.—(Inquire of) निरूप् (c. 10. -रूपयति -यितुं).—(Regard) अपेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रतीक्ष्, समीक्ष्; 'to consult with one's self,' मनसा विचर्.

CONSULTATION, s. मन्त्रः -न्त्रणं -णा, सम्मन्त्रणं, विचारः -रणं, सम्प्रधारणा, सम्भाषा -षणं, मर्शः, आमर्शः, प्रत्यवमर्शः, विमर्शः, परामर्शः, विवेचनं, संवादः, सम्भावनं; 'private consultation,' गूढभाषितं.

To CONSUME, v. a. (Destroy) नश् in caus. (नाशयति -यितुं), विनश्, सद् in caus. (सादयति -यितुं), अवसद्, विध्वंस् in caus. (-ध्वंसयति -यितुं); 'by fire,' दह् (c. 1. दहति, दग्धुं), निर्दह्.—(Spend) उपयुज् (c. 7. -युनक्ति -योक्तुं), व्ययीकृ.—(Exhaust) निःशेषं -षां -षं कृ, निरवशेषीकृ.—(Waste) क्षि (c. 1. क्षयति c. 5. क्षिणोति or caus. क्षपयति -यितुं); 'to consume away,' नश् (c. 4. नश्यति, नशितुं), क्षि in pass. (क्षीयते), सद् (c. 6. सीदति, सत्तुं), अवसद्, परिहा in pass. (-हीयते).

CONSUMED, p. p. नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः -ता -तं, दग्धः -ग्धा -ग्धं, मुष्टः -ष्टा -ष्टं, क्षयीभूतः -ता -तं, क्षयितः -ता -तं, क्षीणः -णा -णं, परिक्षीणः -णा -णं, क्षपितः -ता -तं, आलीढः -ढा -ढं.

CONSUMER, s. नाशकः, विनाशकः, क्षयकरः, क्षयी m. (न्), ध्वंसकारी m. (न्).

To CONSUMMATE, v. a. समाप् in caus. (-आपयति -यितुं), सम्पद् in caus. (-पादयति -यितुं), निष्पद्, साध् in caus. (साधयति -यितुं), संसाध्, सम्पॄ in caus. (-पूरयति -यितुं), निर्वृत् in caus. (-वर्त्तयति -यितुं).

CONSUMMATE, a. सम्पूर्णः -र्णा -र्णं, परिपूर्णः -र्णा -र्णं, सिद्धः -द्धा -द्धं, सम्पन्नः -न्ना -न्नं, समाप्तः -प्ता -प्तं, उत्कृष्टः -ष्टा -ष्टं, परमः -मा -मं.

CONSUMMATION, s. (The state) सिद्धिः f., संसिद्धिः f., निष्पत्तिः f., समाप्तिः f., सम्पूर्णता, परिपूर्णता.—(The act) समापनं, सम्पादनं, निष्पादनं, साधनं, निर्वर्त्तनं.

CONSUMPTION, s. (Pulmonary) क्षयः, शोषः, क्षयरोगः, क्षयथुः m., क्षयकासः, यक्ष्मा m. (क्ष्मन्), यक्ष्मा m. (न्), कफक्षयः, नृपामयः, शरीरपाकः.—(Destruction, waste) क्षयः, परिक्षयः, उपक्षयः, नाशः, विनाशः, व्ययः -यनं, ध्वंसः -सनं, अपचयः.—(Use) उपयोगः, उपभोगः.

CONSUMPTIVE, a. क्षयी -यिणी -यि (न्), शोषी -षिणी -षि (न्), व्ययी -यिनी -यि (न्).—(Diseased with consumption) क्षयरोगी -गिणी -गि (न्), यक्ष्मी -क्ष्मिणी -क्ष्मि (न्).

CONTACT, s. स्पर्शः, संस्पर्शः, स्पृष्टिः f., सम्पर्कः, पृक्तिः f., समासञ्जनं, संसर्गः, आसङ्गः, सङ्गः, व्यतिकरः, उपघातः, संयोगः, परिमर्शः, उपयोगः; 'ascertainment by contact,' त्वाचप्रत्यक्षं; 'bodily contact,' अङ्गाङ्गि.

CONTAGION, s. (Communication of disease) सञ्चारः, स्पर्शसञ्चारः, संस्रवः, रोगाकर्षणं.—(Contagious disease) मारी, मारकः.

CONTAGIOUS, a. स्पर्शसञ्चारी -रिणी -रि (न्), सञ्चारकः -का -कं, सञ्चारी -रिणी -रि (न्), सम्पर्कीयः -या -यं, त्वाचः -ची -चं, संस्पर्शजः -जा -जं.

To CONTAIN, v. a. (Hold) धा (c. 3. दधाति, धत्ते, धातुं), आधा; आदा (c. 3. -ददाति -दत्ते -दातुं), धृ (c. 1. धरति, धर्त्तुं or caus., धारयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्त्तुं).—(Comprise) परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Restrain) यम् (c. 1. यच्छति, यन्तुं), संयम्, नियम्; संहृ (c. 1. -हरति -हर्त्तुं), प्रतिसंहृ.

CONTAINABLE, a. आदेयः -या -यं, धारणीयः -या -यं, परिग्रहणीयः -या -यं.

CONTAINED, p. p. धृतः -ता -तं, धारितः -ता -तं, अन्तर्गतः -ता -तं, अन्तर्गर्भितः -ता -तं, समाविष्टः -ष्टा -ष्टं, परिगृहीतः -ता -तं, आकलितः -ता -तं, गर्भः -र्भा -र्भं in comp., वर्त्ती -र्त्तिनी -र्त्ति (न्); 'contained in the sentence,' वाक्यस्थः -स्था -स्थं.

CONTAINING, p. p. (Holding) आददानः -ना -नं, दधानः -ना -नं, धारकः -का -कं, गर्भः -र्भा -र्भं in comp. आत्मकः -का -कं; 'a box containing powder,' चूर्णगर्भं पात्रं.

To CONTAMINATE, v. a. दुष् in caus. (दूषयति -यितुं), प्रतिदुष्, लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, कलुष (nom. कलुषयति -यितुं), मलिन (nom. मलिनयति -यितुं), मलिनीकृ, कलङ्क (nom. कलङ्कयति -यितुं), दिह् (c. 2. देग्धि -ग्धुं), भ्रष्टीकृ; 'to be contaminated,' दुष् (c. 4. दुष्यति).

CONTAMINATED, p. p. दुष्टः -ष्टा -ष्टं, दूषितः -ता -तं, कलुषितः -ता -तं, मलिनितः -ता -तं, कलङ्कितः -ता -तं, लिप्तः -प्ता -प्तं, भ्रष्टः -ष्टा -ष्टं, अपवित्रः -त्रा -त्रं.

CONTAMINATION, s. दूषणं, कलुषं, मालिन्यं, अशौचं, अशौचत्वं, कलङ्कः, मलं.

To CONTEMN, v. a. अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), तृणाय मन्, अवधीर् (c. 10. -धीरयति -यितुं), परिभू; गर्ह् (c. 1. गर्हते -र्हितुं), निन्द् (c. 1. निन्दति -न्दितुं), गुप् in des. (जुगुप्सते -प्सितुं), कदर्थ् (c. 10. -र्थयते -यितुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं), कुत्स् (c. 10. कुत्सयति -यितुं), लघूकृ, तुच्छीकृ.

CONTEMNED, p. p. अवमतः -ता -तं, अवमानितः -ता -तं, अवज्ञातः -ता -तं,

अवधीरितः -ता -तं, परिभूतः -ता -तं, गर्हितः -ता -तं, निन्दितः -ता -तं, विमानितः -ता -तं, कदर्थितः -ता -तं, अवध्यातः -ता -तं, उपेक्षितः -ता -तं, कुत्सितः -ता -तं.

CONTEMNER, s. अवमन्ता m. (न्तृ), अवज्ञानकृत्, निन्दकः, निन्दाकरः, घृणाकरः.

To CONTEMPLATE, v. a. (Examine attentively) निरूप् (c. 10. -रूपयति -यितुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), सम्प्रेक्ष्, अन्ववेक्ष्, समवेक्ष्; सन्दृश् (c. 1. -पश्यति -द्रष्टुं), अनुदृश्, परिदृश्; आलोक् (c. 10. -लोकयति -यितुं), आलोच् (c. 10. -लोचयति -यितुं), निर्वर्ण् (c. 10. -वर्णयति -यितुं).

To CONTEMPLATE, v. n. ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, सन्ध्यै, प्रध्यै; चिन्त् (c. 10. चिन्तयति -यितुं), विचिन्त्, सञ्चिन्त्, भू in caus. (भावयति -यितुं), सम्भू, मनसा विचर् in caus. (-चारयति -यितुं), विमृश् (c. 6. -मृशति -म्रष्टुं), समाधा (c. 3. -धत्ते -धातुं).

CONTEMPLATED, p. p. ध्यातः -ता -तं, चिन्तितः -ता -तं, भावितः -ता -तं, सम्भावितः -ता -तं, विचारितः -ता -तं, मनोगुप्तः -प्ता -प्तं.

CONTEMPLATION, s. ध्यानं, अभिध्यानं, आध्यानं, अनुध्यानं, समाधिः m., समाधानं, चिन्ता, भावना, सम्भावनं -ना, विचारणा, विमर्शः, ध्यानपरता, ध्याम n. (न्).

CONTEMPLATIVE, a. ध्यानपरः -रा -रं, चिन्तापरः -रा -रं, ध्यानशीलः -ला -लं, चिन्ताशीलः -ला -लं, समाधिमान् -मती -मत् (त्), चिन्तावान् -वती -वत् (त्), भावितात्मा -त्मा -त्म (न्), समाधिस्थः -स्था -स्थं, ध्याननिष्ठः -ष्ठा -ष्ठं, सचिन्तः -न्ता -न्तं.

CONTEMPLATOR, s. ध्यानकर्त्ता m. (र्त्तृ), ध्याता m. (तृ), समाधिकृत्, चिन्तकः विचारी m. (न्).

CONTEMPORARY, a. समकालीनः -ना -नं, एककालीनः -ना -नं, समानकालीनः -ना -नं, समानकालवर्त्ती -र्त्तिनी -र्त्ति (न्), समकालजः -जा -जं, समानवयस्कः -स्का -स्कं, सवयाः -याः -यः (स्); 'a contemporary associate,' वयस्यः.

CONTEMPT, s. अवमानं -नता, अवमतिः f., अवज्ञा -ज्ञानं, परिभवः, परिभूतिः f., परिभावः, गर्हा -र्हणं, अवधीरणं, कुत्सा -त्सनं, उपेक्षा -क्षणं, हेलनं, अवहेला -लं -लनं, घृणा, परीवादः, अपवादः, तिरस्कारः, न्यक्कारः, न्यग्भावनं, निन्दा; 'object of contempt,' तिरस्कारविषयः, परिभवपदं, परिभवास्पदं.

CONTEMPTIBLE, a. अवमान्यः -न्या -न्यं, अवमाननीयः -या -यं, अवमन्तव्यः -व्या -व्यं, अवज्ञेयः -या -यं, अवज्ञातव्यः -व्या -व्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, तुच्छः -च्छा -च्छं, कुत्सितः -ता -तं, निन्दार्हः -र्हा -र्हं, दूष्यः -ष्या -ष्यं, गर्हितः -ता -तं, अवगर्हितः -ता -तं, अवद्यः -द्या -द्यं, नीचः -चा -चं, क्षुद्रः -द्रा -द्रं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं.

CONTEMPTIBLENESS, s. अवमान्यत्वं, गर्ह्यता, तुच्छत्वं, निन्दार्हत्वं, कौत्सितं, नीचत्वं.

CONTEMPTIBLY, adv. कुत्सितं, तुच्छं, अपकृष्टं, नीचतया, अवमान्यप्रकारेण.

CONTEMPTUOUS, a. अवमानी -निनी -नि (न्), अवमन्ता -न्त्री -न्तृ (न्तृ), परिभवी -विनी -वि (न्), परिभावी -विनी -वि (न्), परिभावुकः -का -कं, कुत्सावादी -दिनी -दि (न्), उपेक्षकः -का -कं, घृणी -णिनी -णि (न्).

CONTEMPTUOUSLY, adv. अवमानेन, अवज्ञानेन, सावमानं, परिभवेण, उपेक्षया; 'he treats contemptuously,' अवमन्यते or अवजानाति or उपेक्षते.

CONTEMPTUOUSNESS, s. अवमानिता, अवमानशीलता, परिभावुकत्वं.

To CONTEND, v. n. (Fight) युध् (c. 4. युध्यते, योद्धुं), प्रतियुध्, विग्रह् (c. 9. -गृह्णाति -ग्रहीतुं or in caus. -ग्राहयति -यितुं), कलह (nom. कलहायते), वैर (nom. वैरायते).—(Strive) यत् (c. 1. यतते -तितुं), प्रयत्; चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, व्यायम् (c. 1. -यच्छति -यन्तुं), व्यवसो (c. 4. -स्यति -सातुं), घट् (c. 1. घटते -टितुं).—(Oppose) विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, संरुध्; प्रतिकृ; प्रतीप (nom. प्रतीपायते), प्रतिकूल (nom. प्रतिकूलयति -यितुं).—(Vie) स्पर्द्ध् (c. 1. स्पर्द्धते -र्द्धितुं), विस्पर्द्ध्, संघृष् (c. 1. -घर्षति -र्षितुं).—(In argument) विवद् (c. 1. -वदते -दितुं), वाग्युद्धं कृ, वाक्कलहं कृ.

CONTENDENT, a. प्रतियोद्धा -द्ध्री -द्धृ (द्धृ), विरोधी -धिनी -धि (न्) or प्रतिरोधी, विरुद्धः -द्धा -द्धं, विवदमानः -ना -नं, विपक्षः -क्षा -क्षं, प्रतियोगी -गिनी -गि (न्), विपरीतः -ता -तं, प्रतीपः -पा -पं.

CONTENDER, s. विपक्षः, प्रतिपक्षः, योद्धा m. (द्धृ) or प्रतियोद्धा, वैरी m. (न्), प्रतिरोद्धा m. (द्धृ), विवादी m. (न्).

CONTENT, a. सन्तुष्टः -ष्टा -ष्टं, तृप्तः -प्ता -प्तं, अलुब्धः -ब्धा -ब्धं, अलिप्सुः -प्सुः -प्सु, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, परितुष्टात्मा -त्मा -त्म (न्), निःस्पृहः -हा -हं, निस्पृहः -हा -हं, विस्पृहः -हा -हं, अस्पृहः -हा -हं, वितृष्णः -ष्णा -ष्णं, तृष्णाहीनः -ना -नं, अनाकांक्षी -क्षिणी -क्षि (न्) or निराकांक्षी, सुखी -खिनी -खि (न्), प्रीतः -ता -तं, हृष्टः -ष्टा -ष्टं, प्रशान्तः -न्ता -न्तं, शान्तः -न्ता -न्तं, प्रशान्तकामः -मा -मं, सुहितः -ता -तं, चरितार्थः -र्था -र्थं.

CONTENT, s. (Contentment) सन्तोषः, तृप्तिः f., तुष्टिः f., तोषः, परितोषः, शान्तिः f., कामप्रशान्तिः f., कामनिवृत्तिः f., चित्तप्रशमः, अलोभः, अलुब्धत्वं, अलिप्सा, अस्पृहा, वितृष्णता, वैतृष्ण्यं, धृतिः f., सौहित्यं; 'to the heart's content,' यथातृप्ति -तृप्ति; 'fruit to the heart's content,' प्रकामफलं.—(Contents, that which fills) पूरकः -कं, भरकः -कं; 'that which is contained,' अन्तर्गतं, अन्तर्भूतं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्); 'the contents of a vessel,' भाण्डभरकः; 'contents of a writing,' अर्थः; 'contents of a solid in geometry,' घनफलं.—(Table of contents) अनुक्रमणिका, पत्रपञ्जी.

To CONTENT, v. a. तृप् in caus. (तर्पयति -यितुं), सन्तृप्, तुष् in caus. (तोषयति -यितुं), सन्तुष्, परितुष्; 'to be content,' तृप् (c. 4. तृप्यति -ते), तुष् (c. 4. तुष्यति), सन्तुष्.

CONTENTED, p. p. सन्तुष्टः -ष्टा -ष्टं, सन्तोषितः -ता -तं, तृप्तः -प्ता -प्तं, धृतिमान् -मती -मत् (त्), पूर्णाभिलाषः -षा -षं. *See* CONTENT.

CONTENTEDLY, adv. सन्तोषेण, तृप्त्या, तुष्ट्या, सन्तुष्टं, अलुब्धं, लोभं विना.

CONTENTION, s. (Strife) कलहः -हं, कलिः m., विग्रहः, विरोधः, द्वन्द्वं, युद्धं, विपक्षता, विप्रतिपत्तिः f.—(Dispute, debate) वाक्कलहः -हं, वाग्युद्धं, विवादः, वादानुवादः, वादप्रतिवादः, विप्रलापः, विरोधोक्तिः f., वाक्यविरोधः.—(Emulation) स्पर्द्धा, संघर्षः, जिगीषा.—(Application of mind) मनःप्रवेशः, अभ्यासः.

CONTENTIOUS, a. कलहकारी -रिणी -रि (न्) -कारः -री -रं, कलहप्रियः -या -यं, कलिप्रियः -या -यं, विवादी -दिनी -दि (न्), विरोधी -धिनी -धि (न्), विवादार्थी -र्थिनी -र्थि (न्), विवादशीलः -ला -लं, युयुत्सुः -त्सुः -त्सु.

CONTENTIOUSLY, adv. कलहकारिवत्, विवादार्थिवत्, विवादपूर्व्वकं, विवादशीलत्वात्.

CONTENTIOUSNESS, s. कलहकारित्वं, विवादार्थित्वं, कलहशीलता, कलहेच्छा, कलहप्रवृत्तिः f.

CONTENTLESS, a. असन्तुष्टः -ष्टा -ष्टं, अतृप्तः -प्ता -प्तं, तुष्टिहीनः -ना -नं.

CONTENTMENT, s. सन्तोषः, सन्तुष्टिः f., तुष्टिः f., तृप्तिः f., तुष्टता, सन्तुष्टता, तोषः, परितोषः, अस्पृहा, अलिप्सा, अलोभः, निराकांक्षा, प्रीतिः f. *See* CONTENT.

CONTERMINOUS, a. सीमावासी -सिनी -सि (न्), सीमावर्त्ती -र्त्तिनी -र्त्ति (न्) or समन्तवासी or सन्निकटवासी or निकटवर्त्ती, आसन्नः -न्ना -न्नं, पर्य्यन्तस्थः -स्था -स्थं.

CONTERRANEOUS, a. एकदेशीयः -या -यं, एकदेशजः -जा -जं, स्वदेशजः -जा -जं.

To CONTEST, *v. a.* (Contend) युध् (c. 4. युध्यते, योद्धुं), प्रतियुध्, कलह (nom. कलहायते).—(Oppose) विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्.—(Dispute, litigate) विवद् (c. 1. -वदते -दितुं), विसंवद्, विवादास्पदीकृ.

CONTEST, *s.* (Contention) कलहः -हं, कलिः *m.*, युद्धं, विरोधः, विग्रहः.—(Dispute) विवादः, विप्रलापः, वाग्युद्धं, वाक्कलहं.—(Legal contest) विवादः, व्यवहारः; 'subject of contest,' विवादास्पदं.

CONTESTABLE, *a.* विवदनीयः -या -यं, विवादास्पदीकरणीयः -या -यं.

CONTESTED, *p. p.* वादग्रस्तः -स्ता -स्तं, विवादास्पदीभूतः -ता -तं, विवादानुगतः -ता -तं.

CONTEXT, *s.* अन्वयः, प्रबन्धः, वाक्यप्रबन्धः, प्रसङ्गः, वाक्यप्रसङ्गः.

CONTEXT, *a.* संश्लिष्टः -ष्टा -ष्टं, सन्धितः -ता -तं, दृढसन्धिः -न्धिः -न्धि.

CONTEXTURE, *s.* संभूतिः *f.*, विन्यासः, संस्थितिः *f.*, स्थितिः *f.*, रीतिः *f.*

CONTIGUITY, *s.* समीपता, अन्तिकं -कता, आसन्नता, सन्निधिः *m.*, सान्निध्यं, सन्निधानं, सन्निकर्षः, नैकट्यं, संसर्गः, उपस्थानं, संस्थितिः *f.*, आनन्तर्यं.

CONTIGUOUS, *a.* समीपः -पा -पं, आसन्नः -न्ना -न्नं, प्रत्यासन्नः -न्ना -न्नं, निकटः -टा -टं, उपान्तः -न्ता -न्तं, अन्तिकः -का -कं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), अव्यवधानः -ना -नं, अव्यवहितः -ता -तं, सन्निकृष्टः -ष्टा -ष्टं, सन्निहितः -ता -तं, अविदूरः -रा -रं, अदूरः -रा -रं, प्रसन्नः -न्ना -न्नं, संसक्तः -क्ता -क्तं, अविरलः -ला -लं, अभितःरः -रा -रं, अपटान्तरः -रा -रं; 'contiguous ground,' पर्यन्तभूः, परिसरः.

CONTIGUOUSLY, *adv.* समीपं, सन्निकृष्टं, निकटे, अविरलं, अभितः, अविदूरं, पार्श्वे.

CONTINENCE, *s.* (Self-restraint) संयमः, आत्मसंयमः, आत्मवशः, दमः, धैर्यं.—(Chastity) उपस्थनिग्रहः, उपस्थसंयमः, संयतेन्द्रियता, जितेन्द्रियत्वं, इन्द्रियनिग्रहः, यतेन्द्रियत्वं, नियतविषयवृत्तिता, ब्रह्मचर्यं, अप्रतिषिद्धेष्वपि विषयेष्वनतिप्रसङ्गः.

CONTINENT, *s.* महाद्वीपः, द्वीपः, स्थलं -ली, वर्षः, अविच्छिन्नभूमिः *f.*

CONTINENT, *a.* (Restraining the passions) संयतः -ता -तं, संयतेन्द्रियः -या -यं, जितेन्द्रियः -या -यं, यतेन्द्रियः -या -यं, धैर्यशाली -लिनी -लि (न्).—(Chaste) यतमैथुनः -ना -नं, संयतोपस्थः -स्था -स्थं, अलम्पटः -टा -टं, अव्यभिचारी -रिणी -रि (न्), अव्यसनी -निनी -नि (न्), अकामात्मा -त्मा -त्म (न्).—(Moderate) मितः -ता -तं, परिमितः -ता -तं, अप्रसक्तः -क्ता -क्तं.

CONTINENTAL, *a.* महाद्वीपीयः -या -यं, स्थलीयः -या -यं, वर्षीयः -या -यं.

CONTINGENCY, *s.* दैवं, दैवयोगः, दैवगतिः *f.*, दैवघटना, सङ्गतिः *f.*, आगमनुः *m.*, अविषयः, यदृच्छा.

CONTINGENT, *a.* आगन्तुकः -का -कं, दैवायत्तः -त्ता -त्तं, दैववशः -शा -शं, आकस्मिकः -की -कं, आपतिकः -की -कं, अनिश्चितः -ता -तं; 'contingent upon,' आयत्तः -त्ता -त्तं, अधीनः -ना -नं.

CONTINGENT, *s.* (Share to be supplied) अंशः, भागः, विभागः, उद्धारः.

CONTINGENTLY, *adv.* दैवात्, दैवयोगेन, दैववशात्, अकस्मात्, अनिश्चितं, यदृच्छया.

CONTINUAL, *a.* (Without interruption of space) निरन्तरः -रा -रं.—(Of time) नित्यः -त्या -त्यं, नैत्यिकः -की -कं, शाश्वतः -ती -तं, सनातनः -नी -नं, सर्वकालीनः -ना -नं, अविरतः -ता -तं, अनवरतः -ता -तं, नियतः -ता -तं, अनीक्षतः -क्षा -क्षं, अविसर्गी -र्गिणी -र्गि (न्), अजस्रः -स्रा -स्रं, सततः -ता -तं.—(Lasting) चिरस्थायी -यिनी -यि (न्), ध्रुवः -वा -वं.

CONTINUALLY, *adv.* नित्यं, नित्यदा, नित्यशस्, सदा, सर्वदा, सततं, समन्तं, सन्ततं, अनिशं, अनवरतं, अविरतं, अनारतं, निरन्तरं, शश्वत्, शाश्वतं, अविच्छिन्नं, अजस्रं, अविश्रान्तं, प्रतिक्षणं, अनुक्षणं, अश्रान्तं, नियतं, वारं वारं, पदे पदे, सर्वकालं.

CONTINUANCE, *s.* (Duration, lastingness) स्थायित्वं, चिरस्थायित्वं, स्थिरता, संस्थितिः *f.*, स्थैर्यं, अविश्रान्तिः *f.*, नित्यता, अविरामः, अविरतिः *f.*—(Abode, continuance in a place) स्थितिः *f.*, अवस्थानं, प्रत्यवस्थानं, वसतिः *f.*—(Uninterrupted succession) प्रबन्धः, प्रसङ्गः, अन्वयः, अविच्छेदः, अविच्छिन्नत्वं, सन्ततिः *f.*—(Perseverance) अभिनिवेशः, व्यवस्थितिः *f.*, प्रवृत्तिः *f.*, निर्बन्धः.

CONTINUATION, *s.* (The state) स्थायित्वं, स्थितिः *f.*, नित्यता, अविरतिः *f.*—(The act) प्रवर्त्तनं.—(The remaining part of a thing already begun) उत्तरभागः, उत्तरखण्डः -ण्डं, परिशेषः, परिशिष्टं, परिबृंहणः.—(Series) श्रेणी, पंक्तिः *f.*, अनुक्रमः, पर्यायः.

CONTINUATOR, *s.* प्रवर्त्तकः, निर्वाहकः, परिशेषकर्त्ता *m.* (र्त्तृ), सम्पादकः, उत्तरसाधकः.

To CONTINUE, *v. n.* (Proceed on in an undertaking) प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रारब्धं सम्पद् in caus. (-पादयति -यितुं).—(Last) स्था (c. 1. तिष्ठति -ते, स्थातुं), चिरस्थायी -यिनी -यि भू.—(Persevere) पर्यवस्था, निर्बन्धं कृ, आस्थां कृ.—(Remain in the same state) expressed by आस् (c. 2. आस्ते) with the present or indeclinable part. of another verb; as, 'he continues eating the animals,' पशून् भक्षयन् आस्ते; 'he continues following me,' मम पश्चाद् आगच्छन् आस्ते; 'let him continue besieging the foe,' उपरुध्य अरिम् आसीत.

To CONTINUE, *v. a.* (Carry on) प्रवृत् in caus. (-वर्त्तयति -यितुं), निर्वह् in caus. (-वाहयति -यितुं), सम्पद् in caus. (-पादयति -यितुं).—(Prolong) दीर्घीकृ.—(Extend) तन् (c. 8. तनोति -नितुं), प्रतन्; 'he continued speaking,' पुनराह.

CONTINUING, *a.* स्थायी -यिनी -यि (न्) or चिरस्थायी or दीर्घकालस्थायी, संस्थः -स्था -स्थं, अविसर्गी -र्गिणी -र्गि (न्).

CONTINUITY, *s.* नैरन्तर्यं, आनन्तर्यं, प्रबन्धः, सन्ततिः *f.*, अविरामः, अविरतिः *f.*, अविच्छेदः, अपरिच्छेदः, अविच्छिन्नत्वं, अन्वयः, समन्वयः.

CONTINUOUS, *a.* निरन्तरः -रा -रं, अनन्तरः -रा -रं, अविरतः -ता -तं, अनवरतः -ता -तं, सततः -ता -तं, अविच्छिन्नः -न्ना -न्नं, अपरिच्छिन्नः -न्ना -न्नं, अन्वितः -ता -तं; 'a continuous story,' प्रबन्धः.

CONTINUOUSLY, *adv.* निरन्तरं, अविरतं, अनवरतं, अविच्छिन्नं, प्रबन्धेन.

To CONTORT, *v. a.* आकुञ्च् (c. 1. -कुञ्चति -ञ्चितुं or caus. -कुञ्चयति -यितुं), आकृष् (c. 1. -कर्षति -क्रष्टुं), विकृ, विरूपीकृ, वक्रीकृ, साचीकृ, कुटिलीकृ.

CONTORTED, *p. p.* आकुञ्चितः -ता -तं, आकर्षितः -ता -तं, विरूपीकृतः -ता -तं, विकृताकारः -रा -रं; 'having the features contorted,' विकृतवदनः -ना -नं.

CONTORTION, *s.* आकुञ्चनं, विकारः, वक्रता, तिर्य्यक्त्वं, वैरूप्यं, आवर्त्तः, आकर्षः.

CONTOUR, *s.* (Form) आकारः, आकृतिः *f.*, संस्कारः, रूपं.—(Circumference) परिमाणं, परिधिः *m.*, परीणाहः.—(Outline) वस्तुमात्रं, आरम्भः.

CONTRABAND, *a.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, व्यासिद्धः -द्धा -द्धं, विप्रतिसिद्धः -द्धा -द्धं, वर्जितः -ता -तं, धर्मविरुद्धः -द्धा -द्धं.

CONTRACT, *s.* नियमः, संविद् *f.*, समयः, प्रतिज्ञानं, संस्कारः, पणः, विपणः, उपगमः, अभ्युपगमः, व्यवस्था, अङ्गीकारः, समाधिः *m.*, संश्रयः, वाग् *f.*, उभयसम्मतिः *f.*; 'written contract,' नियमपत्रं, शासनपत्रं, प्रतिज्ञापत्रं; 'contract of sale,' क्रयविक्रयनियमः, क्रयपत्रं, क्रयलेख्यं, पणायेलं, विपणपत्रं; 'breaking a contract,' व्यवस्थातिक्रमः, संविद्व्यतिक्रमः, समयव्यभिचारः; 'marriage contract,' वाग्निश्चयः, विवाहसम्बन्धः, वाग्दानं.

To CONTRACT, *v. a.* (Cause to shrink, draw together) सङ्कुच्

(c. 1. -कोचति -चितुं), कुच् (c. 1. कुचति -चितुं or caus कुचयति -यितुं), आकुच्, संवृ (c. 1. -वरति, c. 5. -वृणोति -वरितुं -रीतुं), सन्निकृष् (c. 1. -कर्षति -क्रष्टुं), आकृष्; संहृ (c. 1. -हरति -हर्तुं), सङ्काच् (c. 1. -बाधते -धितुं), सङ्कुटीकृ; 'contracting the eye,' सङ्कुटाक्षः, 'contracting the brow,' संहतभ्रूः.—(Shorten) संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संह्र, ह्रस in caus. (ह्रासयति -यितुं).—(Make a contract) नियमं कृ, समयाकृ, पणं कृ, पण् (c. 1. पणते -णितुं, पणायति -यितुं), सङ्कट्ट (c. 1. -पट्टते -ट्टितुं), संविदं कृ, संविद् (c. 2. -वेत्ति -वेदितुं).—(Betroth) वाग्दानं कृ; 'to contract a marriage,' विवाहं कृ, विवाहसम्बन्धं कृ, दारपरिग्रहं कृ.—(Contract friendship) सख्यं बन्ध् (c. 9. बध्नाति, बन्द्धुं) or उपगम् (c. 1. -गच्छति -गन्तुं); 'I contracted a friendship with him,' अहं तस्य मित्रत्वम् उपगतः.—(Contract a debt) ऋणं कृ, ऋणग्रस्तः -स्ता -स्तं भू.

To CONTRACT, *v. n.* (Shrink up) सङ्कुच् in pass. (-कुच्यते), सङ्कोचं or कुचनम् इ (c. 2. एति, एतुं) or गम् (c. 1. गच्छति, गन्तुं), संक्षिप् in pass. (-क्षिप्यते), संहृ in pass. (-ह्रियते), कुच् in pass. (कुच्यते), संहन् in pass. (-हन्यते).

CONTRACTED, *p. p.* (Drawn together) सङ्कुचितः -ता -तं, कुञ्चितः -ता -तं, आकुञ्चितः -ता -तं, निकुञ्चितः -ता -तं, संवृतः -ता -तं, निरुद्धः -द्धा -द्धं, पुटितः -ता -तं, संहतः -ता -तं, संश्यानः -ना -नं.—(Abridged) संहृतः -ता -तं, संक्षिप्तः -प्ता -प्तं, समस्तः -स्ता -स्तं.—(Narrow) सम्बाधः -धा -धं, सङ्कटः -टा -टं, निरन्तरालः -ला -लं, निरायतः -ता -तं.—(Agreed) संविदितः -ता -तं.

CONTRACTIBLE, *a.* संक्षेपणीयः -या -यं, सङ्कोचनीयः -या -यं, कुचनशीलः -ला -लं.

CONTRACTIBILITY, *s.* संक्षेपणीयत्वं, सङ्कोचनीयत्वं, संहरणीयत्वं, कुचनशीलता.

CONTRACTION, *s.* सङ्कोचः -चनं, आकुञ्चनं, कुञ्चनं, अवकुञ्चनं, समसनं, संक्षेपः -पणं, संवारः, संवृतिः *f.*, ह्रासः, सङ्कुहः, निरोधः, न्यूनता; 'contraction of the vulva,' योनिसंवृतिः *f.*; 'of the urethra,' मूत्रमार्गनिरोधः; 'contraction of the skin by astringents,' सन्धानं; 'union of letters,' सन्धिः *m.*; 'a contracted letter,' संक्षिप्तवर्णः.

CONTRACTOR, *s.* नियमकृत्, समयकर्त्ता *m.* (र्तृ), पणकर्त्ता, पणापेक्षः.

To CONTRADICT, *v. a.* विपरीतं वद् (c. 1. वदति -ते -दितुं), विवद्, अपवद्, अपवच् (c. 2. -वक्ति -वक्तुं), प्रत्याख्या (c. 2. -ख्याति -तुं), अधरीकृ.—(Oppose) विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. -कूलयति -यितुं), प्रतिकृ, प्रतीप (nom. प्रतीपायते); 'to contradict one's self,' विप्रवद्.

CONTRADICTED, *p. p.* अपवादितः -ता -तं, प्रत्याख्यातः -ता -तं, पराहतः -ता -तं, अधरीकृतः -ता -तं, विरुद्धः -द्धा -द्धं, बाधितः -ता -तं, विप्रतिपन्नः -न्ना -न्नं, विप्रतिकृतः -ता -तं.

CONTRADICTER, *s.* विपरीतवादी *m.* (न्), प्रत्याख्याता *m.* (तृ), अपवादकः, विवादी *m.* (न्), प्रतिवादी.

CONTRADICTION, *s.* (Verbal opposition) वचनविरोधः, प्रतीपवचनं, विपरीतवचनं, विरोधोक्तिः *f.*, विपरीतार्थं वचनं, प्रत्याख्यानं, विगीतिः *f.*—(Disagreement, incongruity) विसंवादः, असङ्गतिः *f.*, विरुद्धता, असंस्थितिः *f.*—(Controversial assertion) वितण्डा, प्रतिवादः, विप्रलापः.—(Opposition) विरोधः -धनं, विपरीतता, विप्रतिपत्तिः *f.*, विपक्षता, प्रतिपक्षता, विप्रतिकारः, पर्यवस्थानं, प्रातिकूल्यं, प्रतिकूलता, प्रतिबन्धिः *m.* -न्धकता, बाधः.

CONTRADICTORILY, *adv.* विरुद्धं, विपरीतं, प्रतीपं, विरोधेन, असङ्गतं.

CONTRADICTORY, *a.* विपरीतः -ता -तं, विरुद्धः -द्धा -द्धं, विरुद्धार्थः -र्था -र्थं, प्रतीपः -पा -पं, विपक्षः -क्षा -क्षं, विपरीतार्थी -र्थी -र्थि, विभिन्नः -न्ना -न्नं, प्रतिकूलः -ला -लं, विगीतः -ता -तं, प्रतिषेधकः -का -कं, क्लिष्टः -ष्टा -ष्टं, बाधितः -ता -तं.—(Inconsistent) परस्परविरोधी -धिनी -धि (न्), परस्परपराहतः -ता -तं, विवदमानः -ना -नं.

CONTRADISTINCTION, *s.* व्यतिरेकः, प्रतिपक्षता, विपक्षता, विरुद्धता, विपरीतता, वैपरीत्यं, प्रातिकूल्यं, वैलक्षण्यं, विपरीतगुणविशिष्टता.

To CONTRADISTINGUISH, *v. a.* विपरीतगुणैः or विरुद्धगुणैर् विशिष् (c. 7. -शिनष्टि -शेष्टुं or caus. -शेषयति -यितुं).

CONTRADISTINGUISHED, *p. p.* विपरीतगुणविशिष्टः -ष्टा -ष्टं, व्यतिरिक्तः -क्ता -क्तं.

CONTRAINDICATED, *p. p.* विलक्षः -क्षा -क्षं, अपथ्यः -थ्या -थ्यं, विहितः -ता -तं.

CONTRAINDICATION, *s.* अपथ्यलक्षणं, अपथ्यौषधलक्षणं, अपथ्यता.

CONTRAPOSITION, *s.* सम्मुखे or प्रतिमुखे स्थापनं or प्रतिष्ठापनं.

CONTRARIETY, *s.* विपर्ययः -र्यासः, पर्ययः, विपरीतता, वैपरीत्यं, विपर्यासः, वैलक्ष्यं -लक्षण्यं, प्रतिकूलता, प्रातिकूल्यं, विरोधः, प्रतिरोधः, विरुद्धता, प्रतिपक्षता, पर्यवस्था, विप्रतिकारः, प्रतिबन्धिता, व्यतिक्रमः, व्यत्ययः, व्यत्यासः, अपकुटारः.

CONTRARILY, *adv.* विपरीतं, विरुद्धं, प्रातिकूल्येन, विपर्ययेण, अभिमुखं.

CONTRARIWISE, *adv.* पुनर्, परन्तु, वरं, विपरीतं, वैपरीत्येन.

CONTRARY, *a.* प्रतिकूलः -ला -लं, विरोधी -धिनी -धि (न्), विरुद्धः -द्धा -द्धं, विपरीतः -ता -तं, प्रतीपः -पा -पं, विप्रतीपः -पा -पं, प्रातीपिकः -की -कं, विलोमः -मी -मं, प्रतिलोमः -मा -मं, विपर्यस्तः -स्ता -स्तं, विपर्यासितः -ता -तं, विभिन्नः -न्ना -न्नं, अपसव्यः -व्या -व्यं, प्रसव्यः -व्या -व्यं, विपक्षः -क्षा -क्षं, प्रतिपक्षः -क्षी -क्षं, द्वन्द्वः -न्द्वा -न्द्वं, अपकटः -टा -टं, अपकुटारः -रा -रं, अभिमुखः -खा -खं, अभिमुखगतः -ता -तं, प्रतिघः -घा -घं.—(Hostile) वैरी -रिणी -रि (न्).—(Acting contrary) विपरीतकारी -रिणी -रि (न्); 'a contrary wind,' सम्मुखागतो वातः. 'Contrary' is sometimes expressed by इतर; as, 'the contrary of moveable,' *i.e.* 'stationary,' जङ्गमेतरः -रा -रं.

CONTRARY, *s.* विपर्ययः -र्यासः, पर्ययः, विपर्यासः, व्यत्ययः, विपरीतं, व्यतिक्रमः.—(Contrary proposition) प्रतिपक्षः, उत्तरपक्षः; 'to the contrary,' विपरीताभिप्रायेण; 'on the contrary,' पुनर्, परन्तु, वरं.

CONTRARY, CONTRARILY, *adv.* पुनर्, वरं, परन्तु, विपरीतवत्, अन्यथा, प्रतिकूलं; 'contrary to that,' तद्विपरीतं; 'contrary to custom,' रीतिव्यत्ययेन; 'contrary to promise,' प्रतिज्ञाविरोधेन.

CONTRAST, *s.* प्रतिपक्षः, प्रतिपक्षता, व्यतिरेकः, विरोधः, विपर्ययः, वैपरीत्यं, व्यत्ययः, वैलक्षण्यं, पृथक्त्वं, भिन्नाभिप्रायः, विभिन्नभावः; 'illustration by contrast,' व्यतिरेकोदाहरणं.

To CONTRAST, *v. a.* विपर्यस् (c. 4. -अस्यति -असितुं), परस्परविपर्ययेण उपमा (c. 2. -माति -मातुं), परस्परविरुद्धं -द्धां -द्धं कृ, व्यतिरेकं कृ, विपर्ययं कृ, पृथक्त्वेन अभिधा (c. 3. -दधाति -धातुं), परस्परवैपरीत्यं कृ.

To CONTRAST, *v. n.* (Be in contrast) विपर्यस् in pass. (-अस्यते), विरुध् in pass. (-रुध्यते), व्यतिरिच् in pass. (-रिच्यते).

CONTRASTED, *p. p.* विपर्यस्तः -स्ता -स्तं, व्यतिरिक्तः -क्ता -क्तं, विरुद्धः -द्धा -द्धं.

CONTRAVALLATION, *s.* परिखा, परिकूटं, प्रतिकूपः, नगरवासिनाभिमुखं परिखाप्राकारादि.

To CONTRAVENE, *v. a.* प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), संरुध्, विरुध्; प्रतिकृ; प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), प्रतिकूल (nom. प्रतिकूलयति -यितुं), विहन् (c. 2. -हन्ति -हन्तुं), आहन्, निषिध् (c. 1. -षेधति -षेद्धुं), प्रतीप (nom. प्रतीपायते), विघ्न (nom. विघ्नयति -यितुं).

CONTRAVENTION, *s.* प्रतिरोधः, विरोधः, प्रतिवादः, विप्रतिकारः, प्रतिबन्धः,

प्रतियोगः, निषेधः, व्याघातः, बाधः, प्रतिबन्धः, प्रतिबन्धकता.

CONTRECTATION, s. संस्पर्शः, स्पर्शः, परिमर्शः, स्पृष्टिः f., सम्पर्कः, परिमार्गः.

CONTRIBUTARY, a. एककराहे करदः -दा -दं, एककराधीनः -ना -नं.

To CONTRIBUTE, v. a. किञ्चित् किञ्चिद् दा (c. 3. ददाति, दातुं) or स्था in caus. (स्थापयति -यितुं), स्वं स्वम् अंशं or भागं or उद्धारं दा.—(Assist, promote) साहाय्यं कृ, उपकृ, प्रवृध् in caus. (-वर्धयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं).

CONTRIBUTION, s. (The act) अंशदानं, उद्धारदानं, करदानं.—(The share contributed) अंशः, भागः, विभागः, उद्धारः, दत्तांशः, करः.

CONTRIBUTOR, s. अंशदाता m. (तृ), उद्धारदाता, अंशदायी m. (न्).—(Assister, promoter) उपकारी m. (न्), साहाय्यकर्त्ता m. (र्त्तृ), प्रवर्धकः, प्रयोजकः, प्रवर्त्तकः, उद्धरसाधकः.

CONTRIBUTORY, a. साहाय्यकारी -रिणी -रि (न्), सम्पादकः -का -कं.

CONTRITE, a. अनुतापी -पिनी -पि (न्), जातानुतापः -पा -पं, कृतपश्चात्तापः -पा -पं, सञ्जातपश्चात्तापः -पा -पं, अनुशोचकः -का -कं, अनुशोकसमन्नः -न्ना -न्नं, दुःखमनाः -नाः -नः (स्), शोकाग्निसमन्नः -न्ना -न्नं.

CONTRITELY, adv. सानुतापं, सन्तापेन, सखेदं, सन्तापपूर्वकं, अनुशोकात्.

CONTRITION, s. पश्चात्तापः, अनुतापः, सन्तापः, अनुशोकः, अनुशोचनं, अनुशयः, खेदः, विसूरितं, आत्मधिक्कारः, विप्रतीसारः.

CONTRIVABLE, a. प्रचिन्तनीयः -या -यं, विधेयः -या -यं, कल्पनीयः -या -यं.

CONTRIVANCE, s. (Act of contriving) उपायचिन्तनं, घटनं, विधानं, कल्पनं -ना, परिकल्पनं, कूटिः f., मन्त्रणा, युक्तिप्रयुक्तिः f.—(Scheme, plan) उपायः, अपदेशः, व्यपदेशः, साधनं, चेष्टा, व्यवसायः, विधः, छलं.

To CONTRIVE, v. a. प्रचिन्त् (c. 10. -चिन्तयति -यितुं), परिचिन्त् or उपायं प्रचिन्त् or चिचि (c. 5. -चिनोति -चेतुं), घट् (c. 1. घटते -टितुं), विधा (c. 3. -दधाति -धातुं), अनुसन्धा, क्लृप् (c. 10. कल्पयति -यितुं), परिक्लृप्, मन्त्र् (c. 10. मन्त्रयति -यितुं), सम्प्रधृ in caus. (-धारयति -यितुं).

To CONTRIVE, v. n. उपायं कृ, उपायचिन्तां कृ, चेष्ट् (c. 1. चेष्टते -ष्टितुं), व्यवसो (c. 4. -स्यति -सातुं).

CONTRIVED, p. p. प्रचिन्तितः -ता -तं, विहितः -ता -तं, घटितः -ता -तं, कल्पितः -ता -तं, परिकल्पितः -ता -तं, चेष्टितः -ता -तं; 'well contrived,' सुघटितः; 'badly contrived,' दुर्घटितः -ता -तं.

CONTRIVER, s. उपेता m. (तृ), उपायज्ञः, उपायचिन्तकः, परिकल्पकः, व्यवसायी m. (न्).

CONTROL, s. (Restraint, check) संयमः, विनियमः, यमः, निग्रहः, निरोधः, संरोधः, दमः, दमनं, दमथः -थं, यन्त्रणं, निवारः -रणं.—(Power, authority) वशं, प्रभुत्वं, अधिकारः, अधीनता; 'under your control,' त्वदधीनः -ना -नं; 'mental control,' मनःसंयमनं, मनोनिग्रहः.—(Counter-reckoning) प्रतिगणितं, प्रतिगणना.

To CONTROL, v. a. वशीकृ or वशे कृ, यम् (c. 1. यच्छति, यन्तुं), नियम्, संयम्, अभियम्, विनियम्; निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, अभिग्रह्; संहृ (c. 1. -हरति -हर्तुं), दम् in caus. (दमयति -यितुं), शास् (c. 2. शास्ति, शासितुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, निषिध् (c. 1. -षेधति -षेद्धुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), नियन्त्र्.—(By a counter-reckoning) प्रतिगणनां कृ.

CONTROLLABLE, a. संयमनीयः -या -यं, दमनीयः -या -यं, वश्यः -श्या -श्यं, नियन्तव्यः -व्या -व्यं, शासनीयः -या -यं, प्रत्याहरणीयः -या -यं.

CONTROLLED, p. p. यतः -ता -तं, संयतः -ता -तं, संयमितः -ता -तं, नियमितः -ता -तं, विनियमितः -ता -तं, वशीकृतः -ता -तं, शासितः -ता -तं, निरुद्धः -द्धा -द्धं, निगृहीतः -ता -तं, प्रत्याहृतः -ता -तं, अधीनः -ना -नं.

CONTROLLER, s. शास्ता m. (स्तृ), अनुशासिता m. (तृ), शासकः, अभिरक्षिता m. (तृ), अधिकारी m. (न्).

CONTROLLERSHIP, s. शासकता -त्वं, अभिरक्षितृत्वं, अनुशासनत्वं.

CONTROVERSIAL, a. विवादी -दिनी -दि (न्), वादानुवादी -दिनी -दि (न्), वितर्की -र्किणी -र्कि (न्), सांवादिकः -की -कं, विसंवादी -दिनी -दि (न्).

CONTROVERSIALIST, s. विवादार्थी m. (न्), विवादी m. (न्), वादी m. (न्), तर्की m. (न्), सांवादिकः.

CONTROVERSY, s. वादानुवादः, वादप्रतिवादः, वितण्डा, वादयुद्धं, विवादः, संवादः, विसंवादः, वादः, वितर्कः, तर्कः, वाक्कलहः, विरोधोक्तिः f., शास्त्रार्थकलहः, विपक्षता, विप्रतिपत्तिः f., विचारः.

To CONTROVERT, v. a. विवद् (c. 1. -वदति -ते -दितुं), विसंवद्; विपरीतं वद्; विचर् in caus. (-चारयति -यितुं), विवादास्पदीकृ, प्रत्याख्या (c. 2. -ख्याति -तुं), अधरीकृ, वादानुवादं कृ, वितण्ड् (c. 1. -तण्डते -ण्डितुं).

CONTROVERTED, p. p. वादग्रस्तः -स्ता -स्तं, विवादास्पदीकृतः -ता -तं, विचारितः -ता -तं, प्रत्याख्यातः -ता -तं.

CONTROVERTIBLE, a. प्रत्याख्येयः -या -यं, विवदनीयः -या -यं, विचारणीयः -या -यं.

CONTROVERTIST, s. शास्त्रविरोधदर्शी m. (न्), विवादी m. (न्), वादप्रतिवादकृत्, नैयायिकः.

CONTUMACIOUS, a. विपरीतकारी -रिणी -रि (न्), प्रतीपः -पा -पं, विप्रतीपः -पा -पं, प्रतिकूलः -ला -लं, धृष्टः -ष्टा -ष्टं, दुर्विनीतः -ता -तं, दुःशीलः -ला -लं, विलोमः -मा -मं.

CONTUMACIOUSLY, adv. प्रतीपं, प्रतिकूलं, सदर्पं, सधर्षं, सधार्ष्ट्यं, धार्ष्ट्येन, दुर्विनीतं.

CONTUMACY, s. प्रतीपता, धार्ष्ट्यं, दर्पः, धर्षः, प्रतिकूलता, दुःशीलता, दुर्विनीतता, विपरीतकारिता, व्यलीकता.

CONTUMELIOUS, a. परुषः -षा -षं, निष्ठुरः -रा -रं, धर्षकः -का -कं, अवमानी -निनी -नि (न्), निन्दकः -का -कं, घृणाकरः -री -रं.

CONTUMELIOUSLY, adv. पारुष्येण, सधर्षणं, सपारुष्यं, सनैष्ठुर्यं, सधिक्कारं, सावमानं.

CONTUMELY, s. पारुष्यं, परुषवचनं, निष्ठुरवचनं, परिभाषणं, परीवादः, अपवादः, धर्षः -र्षणं, अवज्ञा, अवमानं, निष्ठुरता, नैष्ठुर्यं, निन्दा, तिरस्कारः, वाच्यता, वचनीयता, धिक्क्रिया, दुर्वाक्यं, जुगुप्सा, घृणा, गर्हा, उपक्रोशः, निकारः, उपालम्भः.

To CONTUSE, v. a. चूर्ण् (c. 10. चूर्णयति -यितुं), चूर्णीकृ, मृद् (c. 9. मृद्नाति, मर्दितुं), अवमृद्, विमृद्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), क्षण् (c. 8. क्षणोति -णितुं), पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, सम्पिष्, तुद् (c. 6. तुदति, तोत्तुं).

CONTUSED, p. p. क्षुण्णः -ण्णा -ण्णं, क्षतः -ता -तं, चूर्णितः -ता -तं, मर्दितः -ता -तं.

CONTUSION, s. अभिपीडा, नीलिका, क्षतं, मर्दनं, सम्मर्दः, निष्पेषः.

CONUNDRUM, s. प्रवह्लिः f. -ह्लिका, प्रश्नदूती, प्रहेलिका, श्लेषः, श्लेषोक्तिः f.

CONVALESCENCE, s. समुत्थानं, निरामयं, कल्यत्वं, शमः, उपशमः, रोगोपशमः, स्वास्थ्यं.

CONVALESCENT, a. समुत्थितः -ता -तं, वीतरोगः -गा -गं, निरामयः -या -यं, नीरुजः -जा -जं, व्याधिरहितः -ता -तं, कल्यः -ल्या -ल्यं, व्यपगतव्याधिः -धिः -धि, उल्लाघः -घा -घं, प्रोल्लाघितः -ता -तं.

To CONVENE, v. a. आह्वे (c. 1. -ह्वयति -ह्वातुं), समाह्वे, आहूह् (c. 10. -ह्वयति -यितुं), आह्वानपूर्वकं समानी (c. 1. -नयति -नेतुं), एकत्र कृ.

To CONVENE, v. n. सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्; समे (rt. इ with सम्, आ, c. 2. समेति -तुं); सम्मिल् (c. 6. -मिलति -मेलितुं), एकत्र मिल्.

CONVENIENCE, s. (Fitness) युक्तिः f., उपयोगः, उपयोगिता, योग्यता, पात्रत्वं -ता, उपपत्तिः f., याथातथ्यं.—(Commodiousness, comfort) सुस्थता, सुखं, सौख्यं, सोपकारत्वं.—(Fitness of time) अवकाशः, अवसरः; 'when it suits your convenience,' अवकाशं प्राप्य or अवसरं प्राप्य or यथावकाशं.

CONVENIENT, a. योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, युक्तः -क्ता -क्तं, उचितः

-ता-तं, यथायोग्यः-ग्या-ग्यं, उपपन्नः-न्ना-न्नं, समुचितः-ता-तं, यथोचितः -ता-तं, समञ्जसः-सा-सं, सोपकारः-रा-रं.

CONVENIENTLY, *adv.* युक्तं, यथायोग्यं, योग्यं, यथोचितं, उपयुक्तं, साम्प्रतं, स्थाने, यथातथा, अनायासेन, यथावसरं, यथावकाशं.

CONVENT, *s.* मठः, आवसथः, आश्रमः, वीहारः, विहारः, धर्म्मशाला, धर्म्मचारिणां मठः.

CONVENTICLE, *s.* सभा, समाजः, मेलकः, ईश्वरपूजकानां गूढसभा, व्यवहारविरुद्धः समाजः.

CONVENTICLER, *s.* सभासद्, गूढसभासेवी *m.* (न्), व्यवहारविरुद्धसमाजसेवी.

CONVENTION, *s.* (Agreement) समयः, नियमः, संविद् *f.*, उपगमः, संवादः, सङ्केतः.—(Assembly) सभा, समाजः, संसद् *f.*, मेलकः.

CONVENTIONAL, *a.* सामयिकः-की-कं, नैयमिकः-की-कं, नियमितः-ता-तं, सर्व्वसम्मतः-ता-तं, निरूढः-ढा-ढं, रूढः-ढा-ढं.

CONVENTUAL, *a.* मठसम्बन्धी-न्धिनी-न्धि (न्), आश्रमी-मिणी-मि (न्).

To CONVERGE, *v. n.* नानादिग्देशाद् एकस्थानं प्रति गम् (c. 1. गच्छति, गन्तुं) or समागम्; एककेन्द्राभिमुखम् इ (c. 2. एति, एतुं).

CONVERGENCE, *s.* एकस्थानं प्रति गमनशीलता, एककेन्द्राभिमुखता.

CONVERGENT, *a.* एकस्थानं प्रति or एककेन्द्रं प्रति गमनशीलः-ला-लं, एककेन्द्राभिमुखः-खा-खं, केन्द्राभिपिपतिषुः-षुः-षु.

CONVERSABLE, *a.* कथोपकथनयोग्यः-ग्या-ग्यं, आलापी-पिनी-पि (न्), आलापकरणपटुः-टुः-टु.

CONVERSABLENESS, *s.* सभाचातुर्य्यं, आलापकरणे पाटवं.

CONVERSANCE or CONVERSANCY, *s.* पाटवं, परिज्ञानं, परिचयः, नैपुण्यं, व्युत्पत्तिः *f.*, चातुर्य्यं, कुशलता, पाण्डित्यं, विदग्धता, विज्ञता, अभिज्ञता.

CONVERSANT, *a.* विज्ञः-ज्ञा-ज्ञं, अभिज्ञः-ज्ञा-ज्ञं, निपुणः-णा-णं, शिक्षितः-ता-तं, सम्पन्नः-न्ना-न्नं, व्युत्पन्नः-न्ना-न्नं, विप्रतिपन्नः-न्ना-न्नं, चतुरः-रा-रं, पटुः-टुः-टु, कुशलः-ला-लं, अभिनिविष्टः-ष्टा-ष्टं, विचक्षणः-णा-णं, विशारदः-दा-दं, वेत्ता-त्री-त्तृ (त्तृ), पण्डितः-ता-तं, कृती-तिनी-ति (न्), व्यवहर्त्ता-र्त्री-र्त्तृ (र्त्तृ), चतुरः-रा-रं, शीलितः-ता-तं, ज्ञः ज्ञा ज्ञं in comp.; 'well read,' स्वधीतः-ता-तं; 'conversant with law,' स्मृतिज्ञः; 'with the Scriptures,' शास्त्रविद्.

CONVERSATION, *s.* सम्भाषा-षणं, संलापः, आलापः, आभाषणं, सङ्कथा, कथायोगः, सम्प्रवदनं, कथोपकथनं, वादः, विस्रम्भकथा, संवादः, कथावार्त्ता, द्वयोः संवादः, आपृच्छा.—(Criminal) स्त्रीपुरुषसङ्गः.—(Behaviour) वृत्तिः *f.*, रीतिः *f.*, आचारः, व्यवहारः, व्यापारः.

CONVERSE, *s.* आलापः, सम्भाषा, संसर्गः, सङ्क्रमः, सङ्गः, सङ्गतिः *f.*, सम्पर्कः.—(The contrary) विपर्य्ययः.

To CONVERSE, *v. n.* (Hold conversation) सम्भाष् (c. 1. -भाषते -षितुं), संवद् (c. 1. -वदति -ते -दितुं), सम्प्रवद्, संलप् (c. 1. -लपति -पितुं), आलप्, संवच् (c. 2. -वक्ति -वक्तुं), सञ्जल्प् (c. 1. -जल्पति -ल्पितुं).—(Have intercourse) संसर्गं कृ, सङ्गम् (c. 1. -गच्छति -गन्तुं).—(As the sexes) स्त्रीपुरुषवत् सम्भोगं कृ or सङ्गम्.

CONVERSELY, *adv.* विपर्य्ययेण, विपर्य्ययतस्, व्यतिक्रमेण, विपरीततस्.

CONVERSION, *s.* (Change from one state to another) विकारः, विकृतिः *f.*, विक्रिया, परिवर्त्तः, परिणामः, अन्यथाकरणं, अन्यथाभावः, विपर्य्ययः, भावान्तरप्राप्तिः *f.* OBS. Change from one substance to another is often expressed by the affix सात्; as, 'conversion to water,' जलसात्करणं; 'to ashes,' भस्मसात्करणं.—(Moral change) निवर्त्तनं, पापनिवर्त्तनं, विप्रतीसारः.—(To another religion or opinion) परमतग्रहणं, परधर्म्माश्रयः, धर्म्मपरिवर्त्तः, मतिभेदः, असत्यधर्म्मत्यागात् सत्यधर्म्मग्रहणं.

CONVERT, *s.* परधर्म्माश्रितः, परमतग्रहीता *m.* (तृ), स्वधर्म्मत्यागी *m.* (न्), धर्म्मपरिवर्त्तकः.

To CONVERT, *v. a.* (Change) विकृ, अन्यभावं -वां -वं कृ, भिन्नभावं -वां -वं कृ, भावान्तरीकृ, अन्यथा कृ, विकृताकारं -रां -रं कृ, परिवृत् in caus. (-वर्त्तयति -यितुं), परावृत्. OBS. To convert from one substance to another is often expressed by सात्; as, 'to convert to ashes,' भस्मसात् कृ; 'to water,' जलसात् कृ; 'to one's own substance,' आत्मसात् कृ.—(Cause to reform) पापाद् विरम् in caus. (-रमयति -यितुं) or निवृत् in caus. (-वर्त्तयति -यितुं).—(Cause to change from one religion or opinion to another) स्वधर्म्मत्यागानन्तरं परधर्म्मग्रहणे प्रवृत् in caus. (-वर्त्तयति -यितुं) or परधर्म्मं ग्रह् in caus. (ग्राहयति -यितुं).—(Apply to some use) प्रयुज् (c. 7. -युनक्ति -योक्तुं), उपयुज्, विनियुज्.

To CONVERT, *v. n.* (Be converted) विकृ (c. 8. -कुरुते), विकृतीभू, अन्यथाभू, विकृताकारः -रा -रं भू, भावान्तरम् इ (c. 2. एति, एतुं) or प्राप् (c. 5. -आप्नोति -आप्तुं), भावान्तरीभू.—(From sin) पापाद् विरम् (c. 1. -रमति -रन्तुं) or निवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Change one's religion) धर्म्मं परिवृत् in caus. (-वर्त्तयति -यितुं), स्वधर्म्मं त्यज् or अपास्य परधर्म्मं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आश्रि (c. 1. -श्रयति -यितुं).—(Change in mind) अन्यमानसीभू, विमनीभू.

CONVERTIBILITY, *s.* परिवर्त्तनीयता, विकार्य्यता, परिवर्त्तनक्षमता.

CONVERTIBLE, *s.* परिवर्त्तनीयः -या -यं, विकार्य्यः -र्य्या -र्य्यं, परिवर्त्तनयोग्यः -ग्या -ग्यं.

CONVEX, *a.* न्युब्जः -ब्जा -ब्जं, विम्बाकारः -रा -रं, कूर्म्मपृष्ठाकारः -रा -रं, आभोगवान् -वती -वत् (त्), गोलपृष्ठाकृतिः -तिः -ति, गण्डाकारः -रा -रं.

CONVEXITY, *s.* न्युब्जत्वं -ता, विम्बाकारता, गण्डाकारभावः, आभोगः.

CONVEXLY, *adv.* कूर्म्मपृष्ठाकारेण, आभोगरूपेण, न्युब्जतस्.

CONVEXO-CONCAVE, *a.* अर्द्धचन्द्राकृतिः -तिः -ति, अर्द्धचन्द्ररूपः -पा -पं.

To CONVEY, *v. a.* (Carry) वह् (c. 1. वहति -ते, वोढुं), आवह्, उपवह्, संवह्; आनी (c. 1. -नयति -नेतुं), तृ in caus. (तारयति -यितुं), गम् in caus. (गमयति -यितुं), प्राप् in caus. (प्रापयति -यितुं), स्थानान्तरीकृ.—(Transmit) सञ्चर् in caus. (-चारयति -यितुं), चल् in caus. (चालयति -यितुं), अभिवह्.—(Make over to another) परस्मै or परस्मिन् समृ in caus (-अर्पयति -यितुं).

CONVEYANCE, *s.* (Vehicle) वाहनं, यानं, प्रवहणं, वाहः, रथः, चातुरं.—(Act of making over to another) परस्मै समर्पणं.—(Act of conveying) वाहनं, तारणं, आनयनं, अभिवाहः, सञ्चारणं, चालनं.—(Deed of sale or transfer) क्रयलेख्यं, समर्पणपत्रं.

CONVEYANCER, *s.* क्षेत्रद्रव्यादीनां दानपत्रलेखकः, स्थावरास्थावरद्रव्यसमर्पणपत्रलेखकः or क्रयपत्रलेखकः.

CONVEYED, *p. p.* ऊढः -ढा -ढं, भृतः -ता -तं, सञ्चारितः -ता -तं, चालितः -ता -तं, तारितः -ता -तं; 'being borne along,' उह्यमानः -ना -नं, नीयमानः -ना -नं.

CONVEYER, *s.* वाहकः, वाही *m.* (न्), तारकः, तारी *m.* (न्), सञ्चारकः.

To CONVICT, *v. a.* आघृष् (c. 10. -घर्षयति -यितुं, c. 1. -घर्षति -र्षितुं), संघुष् (c. 10. -घुषयति -यितुं), अपराधनिश्चयं कृ, अपराधनिर्णयं कृ, निर्णीतापराधं -धां -धं कृ, दोषप्रमाणं कृ, सदोषं or सापराधं or अपराधिनं -धिनीं -धि ज्ञा (c. 9. जानाति, ज्ञातुं), अभियुक्तजने निश्चयं कृ, असौ सापराध इति निश्चि (c. 5. -चिनोति -चेतुं), दुष्कृतम् आख्या (c. 2. -ख्याति -तुं).

CONVICT or CONVICTED, *p. p.* आपन्नाघः -घा -घं, दुष्टाघः -घा -घं,

दूषापराधः -धा -धं, निश्चितदोषः -षा -षं, निर्णीतदोषः -षा -षं, उपपादितदोषः -षा -षं ; 'of falsehood,' दृष्टवितथवचनः -ना -नं.

CONVICT, *s.* आधर्षितः, दृष्टदोषः, दूषापराधः, दोषनिश्चयात् प्रवासितः or कायक्लेशे बलेन नियोजितः.

CONVICTION, *s.* (Of crime) आधर्षणं, दोषनिश्चयः, दोषनिर्णयः, अपराधनिर्णयः.—(Full persuasion) निश्चयः, निर्णयः, सुनिश्चयः, विश्वासः, प्रत्ययः, संप्रत्ययः, धारणा, परिज्ञानं.

To CONVINCE, *v. a.* (Make to acknowledge) स्वीकारं कृ in caus. (कारयति -यितुं), उररीकारं or अङ्गीकारं कृ in caus., अभिज्ञातुं or उररीकर्त्तुम् आनी (c. 1. -नयति -नेतुं) or अनुनी, निरुत्तरं -रां -रं कृ, निरुत्तरीकृ, अभिज्ञा in caus. (-ज्ञापयति -यितुं), परिज्ञा in caus., ग्रह in caus. (ग्राहयति -यितुं).—(Make to believe, persuade) प्रत्ययं or विश्वासं or निश्चयं कृ in caus. or जन् in caus. (जनयति -यितुं), प्रत्येतुं or विश्वसितुम् आनी or अनुनी.—(Destroy doubt) संशयं or सन्देहं छिद् (c. 7. छिनत्ति, छेत्तुं) or खण्ड् (c. 10. खण्डयति -यितुं).

CONVINCED, *p. p.* कृतनिश्चयः -या -यं, कृतनिर्णयः -या -यं, जातनिश्चयः -या -यं, जातविश्वासः -सा -सं, जातप्रत्ययः -या -यं, निरुत्तरीकृतः -ता -तं, छिन्नसंशयः -या -यं.

CONVINCING *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निश्चयजनकः -का -कं, विश्वासकारी -रिणी -रि (न्), परिज्ञानकृत्, प्रत्ययजनकः -का -कं.

CONVINCINGLY, *adv.* यथा निश्चयो जायते तथा, निःसन्दिग्धं, यथा न संशय इति प्रकारेण.

CONVIVIAL, *a.* औत्सविकः -की -कं, सम्भोजनः -नी -नं, उत्सवसम्बन्धी -न्धिनी -न्धि (न्) ; 'a convivial party,' सम्भोजनं, सहभोजनं, सम्प्रीतिः *f.*

CONVOCATION, *s.* (The act of calling together) समाह्वानं, आह्वानं.—(Assembly) सभा, समाजः, सदः *n.* (स्).—(Assembly of the clergy) पुरोहितसभा, धर्माध्यक्षसमाजः.

To CONVOKE, *v. a.* समाह्वे (c. 1. -ह्वयति -ह्वातुं), आह्वे, सङ्घुष् (c. 10. -घुषयति -यितुं).

To CONVOLVE, *v. a.* समावृत् in caus. (-वर्त्तयति -यितुं), आवृत्, व्यावृत् ; संवृ in caus. (-वारयति -यितुं).

CONVOLVULUS, *s.* क्षीरविदारी, विदारी, महाश्वेता, इक्षुगन्धा, क्षुद्रगन्धिका, क्रोष्ट्री, श्यामा, भूमिकुष्माण्डकः.

To CONVOY, *v. a.* (Attend by way of defence) रक्षार्थम् अनुव्रज् (c. 1. -व्रजति -जितुं) or अनुया (c. 2. -याति -यातुं).—(Guide) चर् in caus. (-चारयति -यितुं).—(Convey) आवह् (c. 1. -वाहयति -यितुं).—(Guard on a journey) अध्वनि रक्ष् (c. 1. रक्षति -क्षितुं).

CONVOY, *s.* (Attendance by way of defence) रक्षार्थम् अनुव्रजनं, अनुव्रज्या.—(Guide) प्रचारकः.—(Guard) रक्षकः.—(A ship for convoy) वाणिज्यपोतरक्षका बृहद्युद्धनौका.

CONVOYED, *p. p.* अनुयातः -ता -तं, सञ्चारितः -ता -तं, अध्वनि रक्षितः -ता -तं.

To CONVULSE, *v. a.* (Agitate greatly) क्षुभ् in caus. (क्षोभयति -यितुं), व्याक्षुभ्, संक्षुभ्, विक्षुभ् ; कम्प् in caus. (कम्पयति -यितुं), प्रकम्प्.—(Contract convulsively) आकृष्, (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं), आक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अपतन् in caus. (-तानयति -यितुं) ; 'to be convulsed,' क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), संक्षुभ्, सम्प्रक्षुभ्.

CONVULSION, *s.* (Spasm) आक्षेपकः, अपतानकः, अपतन्त्रकः, आकर्षः, आक्षेपः, शूलं.—(Commotion) क्षोभः, व्याक्षोभः, कम्पः, कम्पनं, आन्दोलनं.

CONVULSIVE, *a.* आकर्षकः -का -कं, आक्षेपकः -का -कं, आकर्षकः -का -कं, कम्पकरः -री -रं ; 'a convulsive contraction,' आकर्षः, अपतानकः ; 'convulsive utterance,' गद्गदः, गद्गदवाक् *f.* (च्).

CONY, *s.* शशः, शशकः, बिलवासी *m.* (न्), गर्त्तवासी *m.* (न्).

To COO, *v. n.* (As a bird) कु (c. 1. कवते, c. 6. कुवते, c. 2. कौति, कवितुं, कोतुं), कूज् (c. 1. कूजति -जितुं), अनुकूज्, कुकु शब्दं कृ.

COOING, *s.* कूजनं, कूजितं, अनुकूजनं, कुकु शब्दः.

COOK, *s.* सूपकारः, पाचकस्त्री *f.*, पचकः, पाचकः, पचः, पचेलुकः, सूदः, सूदाध्यक्षः, भक्ष्यकारः, अन्नसंस्कर्त्ता *m.* (र्तृ), भक्तकारः, औदनिकः, आन्धसिकः.

To COOK, *v. a.* पच् (c. 1. पचति -ते, पक्तुं), श्रा in caus. (श्रपयति -ते -यितुं), अन्नानि संस्कृ or सन्धा (c. 3. -दधाति -धातुं) or सिद्धीकृ.

COOKED, *p. p.* पक्वः -क्वा -क्वं, श्राणः -णा -णं, शृतः -ता -तं, श्रपितः -ता -तं, सिद्धः -द्धा -द्धं, संस्कृतः -ता -तं, प्रणीतः -ता -तं, उपसम्पन्नः -न्ना -न्नं, राद्धः -द्धा -द्धं.

COOKERY, *s.* (Art of) पाकविद्या.—(Act of cooking) पचनं, पाकः, पचा, पाचा, पाचिका, पाकनिष्पत्तिः *f.*

COOK-MAID, *s.* पाचकस्त्री, पाचिका, अन्नसंस्कर्त्री, भक्ष्यकारी, सूपकारी.

COOK-ROOM, *s.* पाकशाला, पाकस्थानं, पाकागारं, सूदशाला, महानसः -सं.

COOL, *a.* शीतलः -ला -लं, शीतः -ता -तं, शिशिरः -रा -रं, अतप्तः -प्ता -प्तं, अतपः -पा -पं, अघर्म्मः -र्म्मा -र्म्मं, अनुष्णः -ष्णा -ष्णं, शीतलस्पर्शः -र्शा -र्शं, जडः -डा -डं.—(Calm, composed) असम्भ्रमः -मा -मं, अव्यग्रः -ग्रा -ग्रं, शान्तः -न्ता -न्तं, धीरः -रा -रं.—(Without passion) वीतरागः -गा -गं.—(Cool in affection) विरक्तः -क्ता -क्तं ; 'it grows cool,' शीतलायते.

COOL, *s.* शीतलं, शीतं, शीतलता, शीतता, शिशिरः, शैत्यं, अनुष्णता, अघर्म्मः.

To COOL, *v. a.* शीतलीकृ, शीतीकृ, शिशिरीकृ, शीतल (nom. शीतलयति -यितुं).—(Cause an abatement, extinguish) शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्.

To COOL, *v. n.* शीतल (nom. शीतलायते), शीतलीभू, शिशिरीभू, शीतीभू.—(Abate, subside) शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्.

COOLED, *p. p.* शीतीकृतः -ता -तं, शीतलीकृतः -ता -तं, हततापः -पा -पं.

COOLER, *s.* शीतलकारकः.—(For wine, &c.) मद्यादिशीतलीकरणार्थं मृन्मयभाजनं.

COOLING, *a.* शीतलकारी -रिणी -रि (न्), तापहरः -री -रं, सन्तापहरः -रा -रं, घर्म्मनाशकः -का -कं.—(Causing abatement) शमकः -का -कं, शान्तिदः -दा -दं ; 'cooling breeze,' शीतलवातः, मन्दपवनो वायुः.

COOLLY, *adv.* शीतलं, शिशिरं, सशैत्यं.—(Without discomposure) असम्भ्रमं, सम्भ्रमं विना, अव्यग्रं, शान्तं, प्रशान्तं, असहसा.

COOLNESS, *s.* शीतलता, शैत्यं, शीतता, शीतीभावः, शिशिरत्वं, अनुष्णता.—(Of affection) विरागः, विरक्तिः *f.*, निःस्नेहता.

COOM, *s.* (Soot that gathers over an oven's mouth) कन्दुमुखलग्नम् अङ्गारमलं.—(Grease which works out of the nave of a wheel) चक्रनाभिमध्याद् निर्गतः स्नेहः.

COOP, *s.* (Barrel) भाण्डं, भाजनं, काष्ठभाण्डं, काष्ठपात्रं.—(Cage for poultry) ग्राम्यकुक्कुटादिरक्षणार्थं पिञ्जरं or वीतंसः, कुक्कुटपालिका.

To COOP-UP, *v. a.* पिञ्जरे or वीतंसे प्रविश् in caus. (-वेशयति -यितुं).—(Confine in a narrow place) सङ्कटस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं).

COOPER, *s.* काष्ठभाण्डकृत्, काष्ठभाजनकारः, काष्ठपात्रदोहनादीनां तक्षकः.

COOPERAGE, *s.* (Price paid for cooper's work) काष्ठपात्रादितक्षकस्य मूल्यं or भृतिः *f.*—(Cooper's work) काष्ठपात्रादितक्षकस्य कर्म्म *n.* (न्) or व्यापारः.

To CO-OPERATE, *v. n.* अन्येन सह व्यवसो (c. 4. -स्यति -सातुं) or आचर् (c. 1. -चरति -रितुं) or चेष्ट् (c. 1. चेष्टते -ष्टितुं), प्रतियोगं कृ, साहाय्यं

कृ; सहकारी -रिणी -रि भू.

Co-operation, *s.* सहकारः -रिता, साहाय्यं, सहायता, प्रतियोगः, प्रतियोगिता, सम्भूतिपत्तिः *f.*, सङ्गाङ्गिभावः.

Co-operative, *a.* सहकारी -रिणी -रि (न्), सहोद्योगी -गिनी -गि (न्).

Co-operator, *s.* सहकारी *m.* (न्), सहकृत्वा *m.* (न्), प्रतियोगी *m.* (न्), साहाय्यकृत्, सम्भूयकारी *m.* (न्).

Coot, *s.* जलचरः कृष्णवर्णः क्षुद्रपक्षिभेदः.

Coparcenary, *s.* संसृष्टता -त्वं, संसृष्टिता, समांशिता.

Coparcener, *s.* समांशी *m.* (न्), समांशहारी *m.* (न्), अंशहरः, संसृष्टी *m.* (न्), संसृष्टः, रिक्थसंविभागी *m.* (न्), सहाधिकारी *m.* (न्).

Copartner, *s.* समांशी *m.* (न्), समांशहारी *m.* (न्), अंशी *m.* (न्), अंशभागी *m.* (न्), अंशहारी *m.* (न्), सम्भूयकारी *m.* (न्).

Copartnership, *s.* समांशिता, सम्भूयसमुत्थानं, अंशभागिता, अविभक्तत्व.

Cope, *s.* (Covering for the head) मस्तकाभरणं, मस्तकाच्छादनं, शिरस्त्राणं, शिरस्त्रं.—(Sacerdotal cloak) पुरोहितप्रावारः, पुरोहितपरिधेयं.

To CURL, *v. n.* अलककरूपेण कुच् in pass. (कुच्यते) or आकुच् in pass., आवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Rise in waves) तरङ्ग (nom. तरङ्गायते), तरल (nom. तरलायते), बन्धुरीभू, उन्नतानतीभू.

CURL, *s.* अलकः, आवर्त्तः -र्त्तकः, कुरलः, कर्केरालः -लं, खङ्गुरः, काकपक्षः, वक्रेरीकः, चूर्णकुन्तलः, भ्रमरकः; 'row of curls,' अलकसंहतिः *f.*—(Undulation) ऊर्म्मिः *f.*, तरङ्गः.

CURLEW, *s.* क्रौञ्चः, क्रुङ्, कलिकः, कालिकः, कालीकः, अतिजागरः.

CURMUDGEON, *s.* कृपणः, कदर्य्यः, स्वल्पव्ययी *m.* (न्), मत्सरः, गाढमुष्टिः.

CURRANT, *s.* (The tree) अम्लफलविशिष्टः क्षुद्रवृक्षः.—(A small dried grape) शोषितरसा क्षुद्रद्राक्षा.

CURRENCY, *s.* (Circulation, general reception) प्रचारः, प्रचरः, प्रचलनं, चलनं, हस्ताद्धस्तं चलनं, व्यवहारः, सर्व्वसाधारणव्यवहारः, सर्व्वग्रहणं, सर्व्वसम्मानं.—(Continuous flow or course) प्रवाहः, प्रसरः.—(Easiness of utterance) सुखोच्चारणं, सुखोच्चार्य्यता.—(Current coin) प्रचलमुद्रा, प्रचारितमुद्रा.

CURRENT, *a.* (Circulatory, generally received) प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचलन् -लन्ती -लत् (त्), प्रचरितः -ता -तं, प्रचरन् -रन्ती -रत् (त्), चलमानः -ना -नं, परिचालितः -ता -तं, प्रचारितः -ता -तं, सर्व्वसम्मतः -ता -तं, सर्व्वगृहीतः -ता -तं.—(Common, general, popular) सर्व्वसाधारणः -णी -णं, सर्व्वसामान्यः -न्या -न्यं, लोकप्रसिद्धः -द्धा -द्धं, लोकविश्रुतः -ता -तं, व्यावहारिकः -की -कं, आचारिकः -की -कं, लौकिकः -की -कं.—(Received as authority, allowable) प्रचलितः -ता -तं, प्रामाणिकः -की -कं, ग्राह्यः -ह्या -ह्यं.—(What is now passing) वर्त्तमानः -ना -नं, विद्यमानः -ना -नं; 'the current year,' वर्त्तमानवत्सरः; 'current moment,' आपातः; 'current report,' लोकप्रवादः, जनवादः.

CURRENT, *s.* (A running stream) स्रोतः *n.* (स्), स्रवन्ती, स्रोतस्वती, स्रोतस्विनी.—(The flow or course of water) वेला, वेगः, रयः, प्रवाहः, उदकप्रवाहः, धारः -रा, ओघः *n.* (स्), ओघः, प्रवेगः -वणं, संसृतिः *f.*, प्रवृत्तिः *f.*, पायसंस्कारः, अनुपद्धतिः *f.*, पायकन्धारः, रयभाटी, ऊर्म्मी, कूलङ्कषः, पुरोटिः *m.*; 'current of the Ganges,' गाङ्गौघः; 'against the current,' प्रतिस्रोतस्.

CURRENTLY, *adv.* (Generally, popularly) सामान्यतस्, साधारणतस्, लोकतस्, प्रसिद्धं; 'it is currently reported,' इति लोकप्रवादः श्रूयते; 'it is currently known,' लोकप्रसिद्धम् अस्ति.

CURRICLE, *s.* रथः, क्रीडारथः, केलिरथः, अश्वद्वयसंचारितो रथः

Currier, *s.* चर्म्मकारः -री *m.* (न्), चर्म्मच्छेदनकारी *m.*, चर्म्मोपजीवी *m.* (न्), कुरटः.

Currish, *a.* कुक्कुराचारः -रा -रं, खलशीलः -ला -लं, शौवः -वी -वं, दुःशीलः -ला -लं, शौवापदः -दी -दं; 'a currish man,' खलरः.

To curry, *v. a.* (Dress leather) चर्म्म परिष्कृ.—(Beat) तड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं).—(Rub a horse with a curry-comb) अश्वलोम लोहकङ्कतेन मृज् (c. 2. मार्ष्टि, मार्ष्टुं).—(Curry favour) आराध् in caus. (-राधयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), लल् in caus. (लालयति -यितुं).

Curry, *s.* (The dish) व्यञ्जनविशेषो or भक्तेन सह खाद्यो व्यञ्जनविशेषः.

Curry-comb, *s.* अश्वलोममार्जनार्थं लोहकङ्कतः, अश्वमार्जनी.

To curse, *v. a.* शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्, शापं or अभिशापं दा or कृ; अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसते -सितुं); आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), गर्ह् (c. 1. गर्हते -र्हितुं), धिक्कृ, भर्त्स् (c. 10. भर्त्सयति -यितुं).

To curse, *v. n.* शप् (c. 1. शपते, शप्तुं), शपथं or शापं वद् (c. 1. वदति -दितुं) or ब्रू (c. 2. ब्रवीति, वक्तुं); 'to curse and swear,' शपथाभिशापौ कृ.

Curse, *s.* (Malediction) शापः, अभिशापः, शपथः, शपः -पनं, परिशापः, आक्रोशनं, अपक्रोशः, भर्त्सनं, अभिषङ्गः, अभीषङ्गः, गालिः *m.*, मन्दवाच्छा; 'under a curse,' शापग्रस्तः -स्ता -स्तं.—(A pest) कण्टकः, दूषकः, अपकारकः. The following are forms of curses answering to 'confusion seize you,' &c., अजीवनिस्ते भूयात्, अकरणिस्ते अस्तु, निग्राहस्ते भूयात्, अवग्राहस्ते स्यात्, अजननिर् अस्तु तव.

Cursed, *p. p.* शप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, शापार्हः -र्हा -र्हं, गर्हितः -ता -तं, गर्हणीयः -या -यं, घृणार्हः -र्हा -र्हं, धिक्कृतः -ता -तं, अपध्वस्तः -स्ता -स्तं.

Cursedly, *adv.* गर्हितं, गर्हणीयप्रकारेण, दुष्टं, दुष्टु.

Curship, *s.* कुक्कुरत्वं, खलशीलता, दुःशीलता, अधमाचारत्वं.

Cursitor, *s.* महाविचारालयसभासम्बन्धी लेखकविशेषः.

Cursorily, *adv.* ईषदवेक्षया, ईषन्मनोयोगेन, चुम्बकवत्, ईषद्दर्शनेन, सत्वरं, अनवधानेन, अनपेक्षया.

Cursory, *a.* त्वरितः -ता -तं, असावधानः -ना -नं, अनवहितः -ता -तं, अयत्नपूर्व्वः -र्व्वा -र्व्वं, शीघ्रः -घ्रा -घ्रं; 'cursory view,' ईषद्दर्शनं, अर्द्धवीक्षणं.

Curst, *a.* कर्कशः -शा -शं, नृशंसः -सा -सं, दुष्टचेताः -ताः -तः (स्).

Curt, *a.* ह्रस्वः -स्वा -स्वं, खर्व्वः -र्व्वा -र्व्वं, संक्षिप्तः -प्ता -प्तं.

To curtail, *v. a.* ह्रस् in caus. (ह्रासयति -यितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), अवच्छिद्, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संहृ (c. 1. -हरति -हर्त्तुं).

Curtailed, *p. p.* ह्रसितः -ता -तं, छिन्नः -न्ना -न्नं, संक्षिप्तः -प्ता -प्तं, क्षीणः -णा -णं, अवरोपितः -ता -तं, अल्पीकृतः -ता -तं.

Curtain, *s.* तिरस्करिणी, व्यवधानं, आवरणं, तिरोधानं, आवरणपटः, प्रच्छदपटः, अपटी, यवनिका, नीशारः; 'bed-curtain,' चतुष्की, मशहरी.

To curtain, *v. a.* आवरणपटेन परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or प्रच्छद् (c. 10. -छादयति -यितुं).

Curtain-lecture, *s.* रात्रिकाले शय्यागतपतिमुद्दिश्य भार्य्योक्तं निन्दावाक्यं or भर्त्सनवाक्यं or तर्ज्जनं.

Curtsy, *s.* स्त्रीलोकेन कृतः प्रणामः or जानुप्रणामः or नमस्कारः.

Curvated, *a.* नतः -ता -तं, आनतः -ता -तं, प्रणतः -ता -तं, परिणतः -ता -तं, भुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, विभुग्नः -ग्ना -ग्नं, कुञ्चितः -ता -तं, आकुञ्चितः -ता -तं.

Curvation, *s.* वक्रीकरणं, नमीकरणं, कुञ्चनं, आकुञ्चनं, अवकुञ्चनं.

Curvature, *s.* नतिः *f.*, आनतिः *f.*, वक्रता, वक्रिमा *m.* (न्), वक्रीभावः, जिह्मता, कुटिलता, कौटिल्यं, नतत्वं, रुग्णता; 'of the spine,' अध्यनतायामः.

Curve, *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, नतः -ता -तं, कुटिलः -ला -लं, नमः -मा -मं, जिह्मः -ह्मा -ह्मं, भुग्नः -ग्ना -ग्नं, कुञ्चितः -ता -तं.

Curve, *s.* नतिः *f.*, नतं, भुजः, कुटिः *m.*, वक्रता, वक्रिमा *m.* (न्), कुञ्चनं, अवकुञ्चनं; 'a curve line,' धनुर्मार्गः, वक्ररेखा.

To curve, *v. a.* नम् in caus. (नामयति -यितुं), आनम्, अवनम्; नमीकृ; वक्रीकृ; आवृज् in caus. (-वर्जयति -यितुं), कुञ्च् (c. 1. कुञ्चति -ञ्चितुं), कुटिलीकृ, अञ्च् (c. 1. अञ्चति -ञ्चितुं), जिह्म (nom. जिह्मयति -यितुं).

Curved, *p. p.* नतः -ता -तं, नामितः -ता -तं, वक्रीभूतः -ता -तं, कुटिलीकृतः -ता -तं, जिह्मितः -ता -तं, विभुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, सम्भुग्नः -ग्ना -ग्नं, रुग्णः -ग्णा -ग्णं, कुञ्चितः -ता -तं, वृजिनः -ना -नं, प्रवणः -णा -णं.

To curvet, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्.

Curvet, *s.* प्लुतं, प्लवः, वल्गितं, लङ्घनं, उत्फालः, झम्पः.

Curvilinear, *a.* वक्ररेखः -खा -खं, धनुर्मार्गाकारः -रा -रं, वक्रः -क्रा -क्रं.

Curule, *a.* (Chair) पूर्व्वं रोमनगरे विचारकर्तॄणाम् आसनं.

Cushion, *s.* उपधानं -नीयं, पीठोपधानं, बालिशं, विष्टरः, विस्तरः, आस्तरणं, पीठास्तरणं, पीठगद्दुः *m. f.*, उपबर्हः, पीठाजिनं, अजिनं, चर्म्म *n.* (न्).

Cushioned, *a.* उपधानसंविष्टः -ष्टा -ष्टं, अजिनशयानः -ना -नं, बालिशनिषण्णः -ण्णा -ण्णं.

Cusp, *s.* अर्द्धचन्द्रकोणः, अर्द्धेन्दुशिखा, अर्द्धचन्द्राग्रं, कलाग्रं, कलाकोणः.

Cuspated, cuspidated, *a.* सूक्ष्माग्रः -ग्रा -ग्रं, सूच्यग्रः -ग्रा -ग्रं.

Custard, *s.* अण्डक्षीरादिमयं मिष्टलेह्यं.

Custody, *s.* (Imprisonment) रोधः, निरोधनं, बन्धनं, स्थानासेधः, आसेधः, कारागारे निरोधः.—(Care, charge) गुप्तिः *f.*, रक्षा, रक्षणं.—(Defence) रक्षणं, पालनं, त्राणं.

Custom, *s.* (Habit, established manner, fashion) आचारः, व्यवहारः, व्यवहृतिः *f.*, प्रचारः, समाचारः, रीतिः *f.*, नियमः, अभ्यासः, नियतकृतं, धारा, मार्गः, स्थितिः *f.*, अनुसारः, आवृत्तिः *f.*, चर्य्या, चरितं, क्रमः, सम्प्रदायः, व्यापारः, शीलः; 'according to custom,' यथाव्यवहारं.—(Practice of buying of one person) एकपण्यविक्रेतुः सदाक्रयः or नित्यक्रयः.—(Tribute, toll) शुल्कः -ल्कं, करः, राजस्वं, राजग्राह्यभागः, शाल्किकः.

Customable, *a.* व्यावहारिकः -की -कं, आचारिकः -की -कं, लोकसिद्धः -द्धा -द्धं.

Customably, *adv.* व्यवहारानुसारेण, व्यवहारतस्, आचारानुरूपं.

Customarily, *adv.* यथाव्यवहारं, यथारीति, रीत्यनुसारात्, प्रायशस्.

Customary, *a.* आचारिकः -की -कं, व्यावहारिकः -की -कं or व्यवहारिकः, व्यवहारानुसारी -रिणी -रि (न्), आचारानुयायी -यिनी -यि (न्), आचरितः -ता -तं, प्रचरितः -ता -तं, प्रचलः -ला -लं, प्रचलितः -ता -तं, नैयमिकः -की -कं, रीत्यनुसारी &c., यौगिकः -की -कं.—(Habitual) आभ्यासिकः -की -कं, नियतः -ता -तं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, लौकिकः -की -कं, प्रसिद्धः -द्धा -द्धं.

Customer, *s.* क्रेता *m.* (तृ), क्रयी *m.* (न्), नित्यक्रेता *m.*, सदाक्रयी.

Custom-house, *s.* शुल्कग्रहणशाला, शुल्कस्थानं, करसञ्चयगृहं.

Custom-house-officer, *s.* शौल्कः, शौल्किकः, करग्राही *m.* (न्).

To cut, *v. a.* कृत् (c. 6. कृन्तति, कर्त्तितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), संछिद्, लू (c. 9. लुनाति, लवितुं), त्रुट् (c. 6. त्रुटति, त्रुटितुं), दो (c. 4. द्यति, दातुं), दो or दा (c. 4. द्यति, c. 2. दाति -तुं).—(Cut in two) द्विधा छिद् or कृ, द्विखण्डीकृ.—(Divide) भिद् (c. 7. भिनत्ति, भेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं).—(Pierce) व्यध् (c. 4. विध्यति,

चकृ), छिद् (c. 10. छिद्रयति -यितुं), निर्भिद्, खन् (c. 1. खनति -नितुं), छिद्.—(Carve, make by sculpture) तक्ष् (c. 1. तक्षति -क्षितुं).—(Hew) छिद्; विशस् (c. 1. -शसति -सितुं).—(Intersect) परिच्छिद्.—(Scratch) क्षुर् (c. 6. क्षुरति, क्षोरितुं).—(Cut away) अवकृत्, निकृत्, उच्छिद्.—(Cut down) प्रवकृत्, प्रकृत्, अवच्छिद्, अवभञ्ज् (c. 7. -भनक्ति -भंक्तुं), निभञ्ज्, प्रभञ्ज्; अवपत् in caus. (-पातयति -यितुं).—(Cut off) छिद्, अवच्छिद्, निकृत्, अवकृत्, लू; 'destroy,' उच्छिद्, उद्धृ (c. 1. -हरति -हर्तुं), उन्मूल् (c. 10. -मूलयति -यितुं); 'rescind,' लुप् (c. 6. लुम्पति, लोप्तुं); 'take away,' अपनी (c. 1. -नयति -नेतुं), अपहृ; 'intercept,' विच्छिद्, उच्छिद्, अवरुध् (c. 7. -रुणद्धि -रोद्धुं); 'interrupt,' विच्छिद्, खण्ड् (c. 10. खण्डयति -यितुं); 'preclude,' निवृ in caus. (-वारयति -यितुं), निरुध्; 'obviate,' परिच्छिद्; 'cut off a limb,' अङ्गं छिद्.—(Cut out) उत्कृत्, निष्कृत्; 'shape,' क्लृप् (c. 10. कल्पयति -यितुं), परिक्लृप्; 'contrive,' मनसा चिन्त् (c. 10. चिन्तयति -यितुं), परिक्लृप्; 'adapt,' युज् in caus. (योजयति -यितुं); 'outdo,' अतिभू, विशिष् in pass. (-शिष्यते); 'cut off a letter,' लुप्.—(Cut short, abridge) संहृ, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उच्छिद्, लुप्; 'interrupt abruptly,' सहसा विच्छिद्.—(Cut up) व्यवच्छिद्, विनिकृत्, निकृत्; 'eradicate,' उच्छिद्.—(Cut the hair) केशान् छिद् or वापय् in caus. (-वापयति -यितुं) or परिवप्.—(Cut to the heart) मर्म भिद् or छिद् or व्यध्.

To CUT, *v. n.* (Make way by dividing) उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, स्फुट् (c. 6. स्फुटति -टितुं), उत्पद् in pass. (-पद्यते), प्रभू.

CUT, *p. p.* छिन्नः -न्ना -न्नं, कृत्तः -त्ता -त्तं, कर्त्तितः -ता -तं, लूनः -ना -नं, क्षतः -ता -तं, दातः -ता -तं, छितः -ता -तं, दितः -ता -तं, वृक्णः -क्णा -क्णं, खण्डितः -ता -तं, त्रुटितः -ता -तं, कृत्तः -त्ता -त्तं, तष्टः -ष्टा -ष्टं, परिवापितः -ता -तं; 'cut up,' व्यवच्छिन्नः -न्ना -न्नं, छिन्नभिन्नः -न्ना -न्नं, निकृत्तः -त्ता -त्तं; 'cut off,' in grammar, लुप्तः -प्ता -प्तं.

CUT, *s.* (The blow of a sharp instrument) प्रहारः, आघातः; 'a sword-cut,' खड्गप्रहारः, खड्गाघातः; 'cut with a whip,' कशाघातः.—(Impression made by an edge) छेदः, लूनकः, क्षतचिह्नं.—(Channel or canal) खातं, कुल्या, कृत्रिमा सरित्.—(Part cut off from the rest) खण्डः -ण्डं, छेदः, भिन्नं, भित्तिः *f.*, दलं.—(Small particle) लवः, कणः, लेशः.—(A direct road) ऋजुमार्गः, अविमार्गः, अदीर्घपथः.—(Print) मुद्रा, पत्रे मुद्रिता प्रतिमा or प्रतिमूर्त्तिः *f.*—(Fashion, form) रीतिः *f.*, रूपं, आकारः, विधानं, संस्कारः, संस्थानं.

CUTANEOUS, *a.* त्वाचः -ची -चं, चार्म्मिकः -की -कं, चर्म्मी -र्म्मिणी -र्म्मि (न्), त्वक्सम्बन्धी -न्धिनी -न्धि (न्); 'cutaneous disease,' त्वग्रोगः, चर्म्मदूषिका; 'cutaneous eruption,' ददुः *m.*, दद्रूः *m.*

CUTICLE, *s.* अवभासिनी, बाह्यत्वक् *f.* (च्), बाह्यचर्म्म *n.* (न्).

CUTICULAR, *a.* त्वाचः -ची -चं, बाह्यत्वक्सम्बन्धी -न्धिनी -न्धि (न्).

CUTIS, *s.* (The true skin) वेदनी.

CUTLASS, *s.* कर्त्तरिका, खड्गः, कृपाणः, पृथुपत्रः खड्गः.

CUTLER, *s.* छुरिकाकारः, शस्त्रकारः, छुरिकाविक्रेता *m.* (तृ), शस्त्रमार्जः.

CUTLET, *s.* खण्डः -ण्डं, पर्शुका, पार्श्वास्थि *n.*; 'of mutton,' औरभ्रमांसखण्डः.

CUTPURSE, *s.* ग्रन्थिभेदः -दकः, चौरः, अपहारकः, तस्करः.

CUTTER, *s.* (One who cuts) छेत्ता *m.* (तृ), छेदकरः, छिद् in comp.; 'wood-cutter,' वनच्छिद्.—(Cutting instrument) कर्त्तरिका, छुरिका, छिदिरः.—(A nimble boat) लघुनौका.—(Front-teeth) अग्रदन्ताः *m. pl.*, राजदन्ताः *m. pl.*

CUT-THROAT, *s.* घातकः, गुप्तघातकः, प्राणघातकः, आततायी *m.* (न्).

CUT-THROAT, *a.* वधोद्यतः -ता -तं, मारात्मकः -का -कं, क्रूरः -रा -रं.

CUTTING, *s.* (Piece cut off) विदलं, खण्डः -ण्डं, शल्कं, भित्तिः *f.* शकलं, भिन्नं.—(Act of cutting) छेदनं, कर्त्तनं, प्रवृश्चनं, खण्डनं, छिदा, छित्तिः *f.*, लूनिः *f.*, लावः, दातिः *f.*, दानं.

CUTTING, *a.* छिदिरः -रा -रं, छिदुरः -रा -रं.—(Caustic) खरः -रा -रं, अरुन्तुदः -दा -दं, मार्म्मिकः -की -कं, मर्म्मभेदी -दिनी -दि (न्).

CUTTLE, *s.* (A fish, or its bone) फेनः -नकः, समुद्रफेनः, सिन्धुकफः, अब्धिकफः, हिण्डीरः, डिण्डिरः, पिण्डीरः, श्वेतधामा *m.* (न्), सुफेनं, मलं.—(A foul-mouthed fellow) मुखरः, वाग्दुष्टः, दुर्मुखः.

CUVERA, *s.* *See* KUVERA.

CYCLE, *s.* चक्रं, कालचक्रं, आवृत्तिः *f.*, कालावृत्तिः *f.*, कालावर्त्तः, परिवृत्तिः *f.*, परिवर्त्तः, पर्य्यायः, आवलिः *f.*; 'of the seasons,' ऋतुपर्य्यायः.

CYCLOPÆDIA, *s.* ज्ञानचक्रं, विद्याचक्रं, विद्यापर्य्यायः, विद्याहारावलिः *f.*

CYCLOPTIC, CYCLOPEAN, *a.* क्रूराचारः -रा -रं, दारुणः -णा -णं, पशुव्यवहारः -रा -रं, अतिमहान् -हती -हत् (त्).

CYGNET, *s.* हंसशावकः, बालहंसः, युवहंसः, हंसापत्यं.

CYLINDER, *s.* गोलः, नलः, स्तम्भः, शलाका, निघः.

CYLINDRICAL, *a.* वर्त्तुलः -ला -लं, गोलाकारः -रा -रं, स्तम्भाकारः -रा -रं.

CYMBAL, *s.* घनं, झल्लरी, झल्लकं, झिञ्झिः *f.*, झर्झरी, भेरी, करतालं.

CYNEGETICS, *s.* मृगव्यं, मृगया, मृगव्यविद्या, आखेटविद्या.

CYNIC, *s.* (A misanthrope) सर्व्वाभिसन्धकः -न्धी *m.* (न्), पुरुषद्वेषी *m.* (न्).

CYNICAL, *a.* सदावक्रः -क्रा -क्रं, अपरिचयी -यिनी -यि (न्), निरानन्दः -न्दा -न्दं, कुटिलभावः -वा -वं, निन्दाशीलः -ला -लं, चिरदुःखी -खिनी -खि (न्), अनालाप्यः -प्या -प्यं, परश्रीकातरः -रा -रं.

CYNOSURE, *s.* ध्रुवः, नक्षत्रनेमिः *m.*, ध्रुतिकरः, ज्योतीरथः.

CYPHER, *s.* अङ्कः, शून्यं, गुणनिका. *See* CIPHER.

CYPHERING, *s.* अङ्कनं, अङ्कविद्या, गणनविद्या. *See* CIPHERING.

CYPRESS-TREE, *s.* श्मशानरोपितः शोकलक्षणिकस् शिखण्डी वृक्षः.

D.

To DAB, *v. a.* आर्द्रद्रव्यलघ्वाघातेन सिच् (c. 6. सिञ्चति, सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -क्षितुं), सिक्तद्रव्येण लघु आहन् (c. 2. -हन्ति -हन्तुं).

DAB, *s.* (Small lump) क्षुद्रपिण्डः, पिण्डः, क्षुद्रखण्डः.—(Blow with something moist) सिक्तद्रव्येण लघुप्रहारः or लघ्वाघातः, सेचनं, निषेकः.—(Something muddy thrown upon one) मलसेचनं, क्षिप्तपङ्कः.—(A man expert at something) निपुणः, पटुः, कुशलः, दक्षः.

To DABBLE, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्, निषिच्, लिप् (c. 6. लिम्पति, लेप्तुं), उक्ष् (c. 1. उक्षति -क्षितुं), प्रोक्ष्, क्लिद् in caus. (क्लेदयति -यितुं).

To DABBLE, *v. n.* (Play in water) जले or पङ्के क्रीड् (c. 1. क्रीडति -डितुं).—(Dabble in books, read superficially) शास्त्राणि चुष् (c. 1. चुषति -षितुं).

DABBLER, *s.* (One that plays in water or mud) जलक्रीडः, पङ्कक्रीडः.—(Superficial reader) शास्त्रचुषकः, शास्त्रगण्डः, किञ्चिज्ज्ञः, अल्पमात्रविद्.

DACE, *s.* नदीचरः क्षुद्रमत्स्यभेदः.

DACTYL, *s.* चरणः -णं, भगणः, छन्दःशास्त्रेषु असमानपदं.

DAD, DADDY, *s.* बालकभाषायां पितृसमानार्थः शब्दः, बाबा, तातः.

DÆDAL, *a.* चित्रविचित्रः -त्रा -त्रं, नानाप्रकारः -रा -रं, बहुविधः -धा -धं.

DAFFODIL, DAFFODOWNDILLY, *s.* उत्पलजातीयः पुष्पप्रभेदः.

DAGGER, *s.* कट्टारः, कृपाणी, छुरिका, शङ्कुः *m.*, असिपुत्रिका, कर्त्तरी.

To DAGGLE, *v. a.* मलेन or पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं).

To DAGGLE, *v. n.* पङ्के or कर्दमे लुट् (c. 6. लुठति -ठितुं).

DAGGLETAIL, *a.* मलपङ्की -ङ्किनी -ङ्कि (न्), मलदूषितः -ता -तं.

DAILY, *a.* आह्निकः -की -कं, दैनिकः -की -कं, दैनः -नी -नं, दैवसिकः -की -कं, प्रात्यहिकः -की -कं, दिवातनः -नी -नं, अन्वाहिकः -की -कं, नैत्यिकः -की -कं, अवश्यकः -का -कं; 'daily occupation,' आह्निकं, नित्यकृत्यं.

DAILY, *adv.* प्रतिदिनं, प्रतिदिवसं, प्रत्यहं, प्रतिवासरं, अनुदिनं, अन्वहं, दिवसे दिवसे, दिने दिने, अहनि अहनि, अहरहः.

DAINTILY, *adv.* ललितं, सलालित्यं, सलौल्यं, सुकुमारं, कोमलं, विलासेन.

DAINTINESS, *s.* (Delicacy, softness) सौकुमार्य्यं, कोमलता, मृदुता.—(Elegance, nicety) लालित्यं, लौल्यं, लावण्यं, विलासः, सूक्ष्मता, विनीतता.—(Deliciousness) सुस्वादुता, सुरसत्वं, सौरस्यं.

DAINTY, *a.* (Delicious) स्वादुः -दुः -द्वी -दु or सुस्वादुः, सुरसः -सा -सं, रसिकः -का -कं, सरसः -सा -सं, मिष्टः -ष्टा -ष्टं, स्वादुकारः -रा -रं, सुखाद्यः -द्या -द्यं.—(Delicate, nice) सुकुमारः -रा -रं, कोमलः -ला -लं, मृदुः -द्वी -दु, विनीतः -ता -तं, सूक्ष्मः -क्ष्मा -क्ष्मं.—(Over-nice, ceremonious) अतिविनीतः -ता -तं, अतिसभ्यः -भ्या -भ्यं.

DAINTY, *s.* सुग्रासः, स्वाद्वन्नं, स्वादुभोजनं, विशिष्टान्नं, भोजनविशेषः, सुखाद्यं.

DAIRY, *s.* क्षीरमन्थनशाला, दधिमन्थनगृहं, गोदुग्धागारं, पयोरक्षणस्थानं.

DAIRY-MAID, *s.* गोदोहिनी, क्षीरमन्थिनी, गोदुग्धरक्षिका, गोपी, आभीरी.

DAISY, *s.* वसन्तसमये यवसप्ररोही शुक्लदलः क्षुद्रपुष्पभेदः.

DALE, *s.* दरी -रा, दरीभृः *f.*, कन्दरः -री, अद्रिद्रोणी, उपत्यका, प्रान्तरं.

DALLIANCE, *s.* (Act of fondness) कामचेष्टा, हावः, ललितं, लालसा, रमणं, रमण्यं, विलासः, विलसितं.—(Delay) विलम्बः, कालयापः.

To DALLY, *v. n.* (Sport, play, trifle) क्रीड् (c. 1. क्रीडति -डितुं), प्रक्रीड्; रम् (c. 1. रमते, रन्तुं), लल् (c. 1. ललति -लितुं), विलस् (c. 1. -लसति -सितुं), कुड् (c. 6. कुडति -डितुं).—(Caress a woman) स्त्रिया सह रम् or विलस्, कामचेष्टां कृ.—(Delay) विलम्ब् (c. 1. -लम्बते -म्बितुं).

DAM, *s.* (Mother, said of animals) जननी, जनिका, प्रजनिका, प्रजायिनी, प्रसूः *f.*, जनयित्री, अम्बा, माता *f.* (तृ).—(Bank to confine water) सेतुः *m.*, सेतुबन्धः, जलबन्धकः, धरणं, पिण्डनः, आलिः *f.*

To DAM UP, *v. a.* सेतुना जलं बन्ध् (c. 9. बध्नाति, बन्द्धुं) or संस्तम्भ् (c. 9. -स्तभ्नाति -स्तम्भितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

DAMAGE, *s.* क्षतिः *f.*, क्षतं, अपचयः, अपायः, हानिः *f.*, नाशः, दोषः, दूषणं, क्षयः, उपक्षयः, अपकारः, अपकृतं, हिंसा, द्रोहः, ध्वंसः, प्रध्वंसः, भ्रंशः, अनिष्टं.—(Damages in law) क्षतिपूरणं, दण्डः, पारितोषिकं, प्रतिफलं, निष्कृतिः *f.*, प्रायश्चित्तं.

To DAMAGE, *v. a.* हिंस् (c. 7. हिनस्ति c. 1. हिंसति -सितुं), उपहिंस्, विहिंस्, दुष् in caus. (दूषयति -यितुं); अपकृ; अर्द् in caus. (अर्दयति -यितुं); क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्; नश् in caus. (नाशयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं).

DAMAGEABLE, *a.* हिंसनीयः -या -यं, दूष्यः -ष्या -ष्यं, अपचयक्षमः -मा -मं.—(Mischievous) हिंस्रः -स्रा -स्रं, दूषकः -का -कं, अपकारकः -का -कं.

DAMAGED, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, दूषितः -ता -तं, सदोषः -षा -षं, अर्दितः -ता -तं, कृतापकारः -रा -रं, अपकृतः -ता -तं.

DAMASK, *s.* पुष्पादिमूर्त्तिकर्म्मोत्कृतं दमस्कनाम चित्रदुकूलं.

To DAMASK, *v. a.* (Adorn stuffs with flowers) दुकूलं मूर्त्तिकर्म्मद्वारा पुष्पादिना अलङ्कृ.—(Variegate) चित्र् (c. 10. चित्रयति -यितुं), कर्ब्बुरीकृ.

DAMASK-ROSE, *s.* हेमपुष्पं, रक्तपुष्पो जवाप्रभेदः.

DAME, *s.* (Lady) आर्य्या, भाविनी.—(Woman) स्त्री, वधूः, गृहिणी.

To DAMN, *v. a.* (Doom to hell or eternal torments) नरकं गम्या इति शापं वद् (c. 1. वदति -दितुं); अनन्तदण्डं or नरकदण्डं प्राप्या इति ब्रू (c. 2. ब्रवीति, वक्तुं), अनन्तदुःखं or अनन्तयातना ते भूयाद् इति धिक्कृ, स नरकं व्रजतु or अधोऽधो निरये पततु इति शापं कृ, नरकदण्डार्हं ज्ञा (c. 9. जानाति, ज्ञातुं), नरके निपत् in caus. (-पातयति -यितुं).—(Condemn) दण्ड् (c. 10. दण्डयति -यितुं), दण्डार्हं ज्ञा.—(Hiss any public performance) रङ्गे नाटकं प्रेक्ष्य कर्कशशब्देन अप्रसादं सूच् (c. 10. सूचयति -यितुं).

DAMNABLE, *a.* अनन्तदण्डार्हः -र्हा -र्हं, नरकदण्डार्हः -र्हा -र्हं, नरके पतनार्हः -र्हा -र्हं.—(Odious) गर्हितः -ता -तं, गर्हणीयः -या -यं.

DAMNABLY, *adv.* यथा नरकदण्डार्हो भवति तथा, गर्हितं.

DAMNATION, *s.* अनन्तदण्डः, नरकदण्डः, अनन्तयातना, नरकयातना, नरके पतनं, नरकगमनं, अधोगमनं, अभिसम्पातः, ईश्वरकृपावहिष्करणं.

DAMNED, *p. p.* नरकगतः -ता -तं, नरकपतितः -ता -तं, नरकस्थः -स्था -स्थं, नारकी -किणी -कि (न्), नैरयः -यी -यं, नरकप्राप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, गर्हितः -ता -तं, गर्हणीयः -या -यं, घृणार्हः -र्हा -र्हं.

DAMNIFIC, *a.* क्षतिकारकः -का -कं, अपकारी -रिणी -रि (न्), दूषकः -का -कं.

To DAMNIFY, *v. a.* दुष् in caus. (दूषयति -यितुं), अपकृ, क्षतं -तां -तं कृ.

DAMP, DANK, *a.* (Moist) आर्द्रः -र्द्रा -र्द्रं, सार्द्रः -र्द्रा -र्द्रं, जलार्द्रः -र्द्रा -र्द्रं, क्लिन्नः -न्ना -न्नं, तिमितः -ता -तं, स्तिमितः -ता -तं, उन्नः -न्ना -न्नं, समुन्नः -न्ना -न्नं, सरसः -सा -सं, जलसिक्तः -क्ता -क्तं, अनूपः -पा -पं, समुक्षितः -ता -तं, वोदः -दा -दं, उत्तः -त्ता -त्तं.—(Dejected) म्लानः -ना -नं, क्लान्तः -न्ता -न्तं, विषण्णः -ण्णा -ण्णं.

DAMP, *s.* (Moisture) क्लेदं, सङ्क्लेदः, स्तेमः, तेमः -मनं, समुन्दनं, जलावसेकः, चिक्लिदं.—(Fog, vapour) वाष्पः, सवाष्पः, धूमः -मिका, स्वेदः.—(Dejection) विषादः, ग्लानिः *f.*; 'to be damp,' क्लिद् (c. 4. क्लिद्यति) तिम् (c. 4. तिम्यति or तीम्यति).

To DAMP, *v. a.* (Moisten) क्लिद् in caus. (क्लेदयति -यितुं), परिक्लिद्; सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्; उक्ष् (c. 1. उक्षति -क्षितुं), समुक्ष्; उन्द् (c. 7. उनत्ति, उन्दितुं), आर्द्रीकृ.—(Dispirit) मनो खण्ड् (c. 10. खण्डयति -यितुं), खण्डिताशं -शां -शं कृ, भग्नाशं -शां -शं कृ, म्लानाशं -शां -शं, कृ.

DAMPISH, *a.* ईषदार्द्रः -र्द्रा -र्द्रं, ईषत्तिमितः -ता -तं, आक्लिन्नः -न्ना -न्नं.

DAMPNESS, *s.* आर्द्रता, सार्द्रता, जलार्द्रत्वं, क्लिन्नता, जलसिक्तत्वं, अनूपता.

DAMPY, *a.* विषादी -दिनी -दि (न्), अवसन्नः -न्ना -न्नं, उद्विग्नः -ग्ना -ग्नं.

DAMSEL, *s.* कन्या, कुमारी -रिका, कन्यका, युवतिः *f.* -ती, यूनी, बाला -लिका, अविवाहिता स्त्री; 'damsel's child,' कानीनः -नी.

DAMSON, *s.* दाम्सन्नामकः कृष्णवर्णः क्षुद्रफलप्रभेदः.

To DANCE, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), प्रनृत्, उपनृत्, समानृत्, नट् (c. 1. नटति -टितुं), नृत्यं कृ, नर्त्तकवद् हस्तपादादि सचल् in caus. (-चालयति -यितुं); 'to dance attendance,' उपास् (c. 2. -आस्ते -आसितुं).

To DANCE, *v. a.* नृत् in caus. (नर्त्तयति -यितुं), चल् in caus. (चालयति -यितुं).

DANCE, *s.* नृत्यं, नाट्यं, ताण्डवं, लास्यं, चारणत्वं, पादन्यासः, गुल्मिका.

DANCER, *s.* नर्त्तकः -की *f.*, नटः -टी *f.*, कुशीलवः, लासकः -की *f.*, लासिका *f.*, चारणः, चारणदाराः *f. pl.*, शैलाली *m.* (न्), शैलूषः, नाटकः -की *f.*, कृशाश्वी *m.* (न्), नर्त्तनकृत् *m. f.*, नृत्यकुशलः, भरतः, आरटः, जायाजीवः, तालावचरः.

DANCING, *s.* नृत्यं, नर्त्तनं, ताण्डवं, नटनं, प्रनर्त्तनं, लास्यं, लासः, नाट्यं.

कौशीलव्यं, चारणत्वं, गुणनिका, हस्तपादादिसञ्चालनं.

DANCING-MASTER, *s.* नृत्याचार्यः, नृत्यशिक्षकः, नृत्यगुरुः *m.*

DANCING-SCHOOL, *s.* नृत्यशिक्षणशाला, नृत्यशाला, नृत्यशिक्षावेश्म *n.* (न्).

DANDELION, *s.* सिंहपर्णी, सिंहदन्तसदृशपत्रः क्षुद्रौषधिभेदः.

DANDIPRAT OF DAPPERLING, *s.* बालकः, पृथुकः, माणवकः, वामनः.

To DANDLE, *v. a.* अङ्कदेशे बालकं धृत्वा लल् in caus. (लालयति -यितुं).

DANDLED, *p. p.* लालितः -ता -तं, सान्त्वकरणार्थं जानुदेशे धृतः -ता -तं.

DANDRIFF, DANDRUFF, *s.* मज्जा, शिरोमध्ये पिण्डितक्लेदः, शिरोमलं.

DANDY, *s.* सुवेशी *m.* (न्), सुवसनः, दर्शनीयमानी *m.* (न्), छेकः.

DANGER, *s.* भयं, भयहेतुः *m.*, संशयः, शङ्का, सन्देहः, विकल्पः, आतङ्कः, आपद् *f.*, विपद् *f.*, अपायः, विपत्तिः *f.*, उत्पातः, बाधा, व्याघातः; 'any thing exposed to danger,' भयस्थानं, संशयस्थानं, शङ्कास्पदं; 'danger of life,' जीवितसंशयः, प्राणनाशसंशयः, प्राणबाधः; 'we are in danger of being led to justice,' अस्माकं विचारस्थाने आनयनशङ्का विद्यते; 'in danger of punishment,' दण्डयोग्यः -ग्या -ग्यं; 'brought into danger,' संशयितः -ता -तं; 'an act attended with danger,' सन्दिग्धकर्म्म *n.* (न्).

To DANGER, *v. a.* संशयस्थं -स्थां -स्थं कृ, शङ्कास्पदं कृ, सन्देहस्थं -स्थां -स्थं कृ; 'one who dangers his life,' संशयितजीवितः.

DANGEROUS, *a.* भयङ्करः -रा -रं, भयानकः -की -कं, भयहेतुकः -का -कं, सन्दिग्धः -ग्धा -ग्धं, सांशयिकः -की -कं, संशयस्थः -स्था -स्थं, संशयापन्नः -न्ना -न्नं, शङ्काक्रान्तः -न्ता -न्तं, भयाक्रान्तः -न्ता -न्तं, भयजनकः -का -कं, भैरवः -वी -वं, विपज्जनकः -का -कं; 'a dangerous illness,' सन्निपातकः.

DANGEROUSLY, *adv.* यथा संशयः or भयहेतुर् उत्पद्यते तथा, भैरवं, शङ्कापूर्व्वकं, भयानकं, सन्दिग्धं; 'dangerously ill,' सन्निपातकरोगग्रस्तः.

DANGEROUSNESS, *s.* भयानकत्वं, सन्दिग्धता, सांशयिकत्वं, शङ्काक्रान्तत्वं.

To DANGLE, *v. n.* लुठ् (c. 6. लुठति -ठितुं), चञ्च् (c. 1. चञ्चति -ञ्चितुं), लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, लुल् (c. 1. लोलति -ते -लितुं).

DANGLER, *s.* स्त्रीणाम् उपासने or स्त्रीभिः सह विलासकरणे कालक्षेपकः.

DANGLING, *a.* चञ्चन् -ञ्चन्ती -ञ्चत् (त्), लोलः -ला -लं, लोलमानः -ना -नं, लुठन् -ठन्ती -ठत् (त्), लम्बमानः -ना -नं, अवलम्बितः -ता -तं, लुलितः -ता -तं.

DAPPER, *a.* विनीतः -ता -तं, क्षुद्राकारः -रा -रं, ललितरूपः -पा -पं.

To DAPPLE, *v. a.* चित्र् (c. 10. चित्रयति -यितुं), चित्रविचित्रीकृ, कर्व्वुरीकृ.

DAPPLED, *a.* चित्रितः -ता -तं, कर्व्वुरितः -ता -तं, नानावर्णः -र्णा -र्णं.

To DARE, *v. n.* धृष् (c. 5. धृष्णोति, धर्षितुं), साहसं कृ, साहसेन व्यवसो (c. 4. -स्यति -सातुं); 'I dare not ask him,' न तं प्रष्टुं धृष्णोमि.

To DARE, *v. a.* (Challenge) आह्वे (c. 1. -ह्वयति -ह्वातुं), समाह्वे, नियुद्धार्थम् आह्वे, स्पर्ध् (c. 1. स्पर्धते -र्धितुं), आक्रन्द् (c. 1. -क्रन्दति -न्दितुं).

DARE, *s.* आह्वानं, समाह्वानं, योधसंराधः, आक्रन्दितं, अभियहः.

DARED, *p. p.* (Challenged) आहूतः -ता -तं, समाहूतः -ता -तं.

DARING, *s.* साहसं, प्रतिभा, धार्ष्ट्यं; 'act of daring,' आयाहितं.

DARING, *a.* साहसी -सिनी -सि (न्), साहसिकः -की -कं, धृष्टः -ष्टा -ष्टं, धृष्णुः -ष्णुः -ष्णु, प्रगल्भः -ल्भा -ल्भं, धीरः -रा -रं, प्रधीरः -रा -रं, शूरः -रा -रं, निर्भयः -या -यं, अभीतः -ता -तं, निर्विशङ्कः -ङ्का -ङ्कं, अकुतोभयः -या -यं, विक्रान्तः -न्ता -न्तं, पराक्रमी -मिणी -मि (न्), प्रतिभानवान् -वती -वत् (त्), प्रतिभान्वितः -ता -तं.

DARINGLY, *adv.* साहसेन -सात्, साहसपूर्व्वकं, धृष्टं, धृष्टत्वात्, सशौर्य्यं, प्रगल्भं, निर्भयं, निर्विशङ्कं, सविक्रमं, सप्रतिभानं, धीरवत्.

DARINGNESS, *s.* साहसं, साहसिकत्वं, धृष्टता, धृष्णुता, धार्ष्ट्यं, प्रगल्भता, प्रतिभा, प्रतिभानं, निर्भयत्वं, धीरता, शौर्य्यं, धैर्य्यं, विक्रमः.

DARK, *a.* तामसः -सी -सं -सिकः -की -कं, तमस्वी -स्विनी -स्वि (न्), सान्धकारः -रा -रं, अन्धकारयुक्तः -क्ता -क्तं, सतिमिरः -रा -रं, तिमिरयुक्तः -क्ता -क्तं, तमोवृतः -ता -तं, तमोमयः -यी -यं, तमोभूतः -ता -तं, निरालोकः -का -कं, निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, हतज्योतीः -तीः -तिः (स्).—(Obscure) गूढः -ढा -ढं, निगूढः -ढा -ढं, दुर्ज्ञेयः -या -यं, अस्पष्टः -ष्टा -ष्टं, दुर्दर्शः -र्शा -र्शं.—(Dark-coloured) कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, कालेयः -यी -यं, मेचकः -का -कं, नीलः -ला -लं, सितेतरः -रा -रं.—(Opaque) अस्वच्छः -च्छा -च्छं; 'a dark night,' तामसी, तमिस्रा, नष्टचन्द्रा रात्रिः.

DARK, *s.* तमः *n.* (स्), अन्धकारः, तिमिरं, तमिस्रं, अन्धं.

To DARKEN, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, अन्धीकृ.

To DARKEN, *v. n.* तमस्वी -स्विनी -स्वि भू, तिमिरीभू, अन्धीभू.

DARKENED, *p. p.* तमोवृतः -ता -तं, तिमिरीकृतः -ता -तं, समस्तः -सा -सं.

DARKISH, *a.* तमस्कल्पः -ल्पा -ल्पं, ईषत्तामसः -सी -सं.—(In colour) ईषत्कृष्णः -ष्णा -ष्णं, आकालः -ला -लं, आनीलः -ला -लं.

DARKLING, *a.* तमोवर्त्ती -र्त्तिनी -र्त्ति (न्) or अन्धकारवर्त्ती.

DARKLY, *adv.* अस्पष्टं, अप्रकाशं, अव्यक्तं, सान्धकारं, अन्धवत्, अन्धं.

DARKNESS, *s.* अन्धकारः, तमः *n.* (स्), तिमिरं, तमिस्रं, तमसं, ध्वान्तं, निरालोकता, सान्धकारत्वं, निष्प्रभता, अन्धं, शार्वरं, रात्रिवासः *n.* (स्), निशाचर्म्म *n.* (न्), भूच्छाया, स्वलुक् *m.* (ज्); 'slight darkness,' अवतमसं; 'great darkness,' अन्धतमसं, तमस्ततिः *f.*; 'universal darkness,' सन्तमसं,

DARKSOME, *s.* तमस्वी -स्विनी -स्वि (न्), तमस्कल्पः -ल्पा -ल्पं, निष्प्रभः -भा -भं.

DARLING, *s.* प्रियः -या, हृदयप्रियः -या, दयितः -ता, स्नेहपात्रं.

DARLING, *a.* हृदयप्रियः -या -यं, सुप्रियः -या -यं, प्रियतमः -मा -मं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, इष्टः -ष्टा -ष्टं, इष्टतमः -मा -मं.

DARN, *s.* वस्त्रयोन्यनुकृतं जीर्णवस्त्रसीवनं, वस्त्रसन्धिः *m.*

To DARN, *v. a.* जीर्णवस्त्राणि सिव् (c. 4. सीव्यति, सेवितुं) or सूक्ष्मसूचिकर्म्मद्वारा सन्धा (c. 3. -धत्ते -धातुं).

DARNEL, *s.* कक्षः, ग्राम्यधान्यकरः कक्षभेदः.

DART, *s.* शूलः -लं, प्रासः, शल्यं, शङ्कुः *m.*, क्षिपणिः *m.*, पाणिमुक्तं, करमुक्तं, मुक्तकं, बाणः, अस्त्रं, सभिकं, दूरवेधी *m.* (न्).

To DART, *v. a.* अस् (c. 4. अस्यति, असितुं), प्रास्, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), ईर् (c. 10. ईरयति -यितुं), पत् in caus. (पातयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं).

To DART, *v. n.* (As lightning) स्फुर् (c. 6. स्फुरति -रितुं).—(Dart upon one) आपत् (c. 1. -पतति -तितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).

To DASH, *v. a.* (Throw or strike any thing suddenly or forcibly against another) सहसा or प्रसभं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रक्षिप् or अस् (c. 4. अस्यति, असितुं) or प्रास् or पत् in caus. (पातयति -यितुं), or अभिहन् (c. 2. -हन्ति -न्तुं), or अभ्याहन् or प्रतिहन् or प्रहृ (c. 1. -हरति -हर्त्तुं).—(Break by collision, dash in pieces) मृद् (c. 9. मृद्नाति, मर्द्दितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), प्रभञ्ज् (c. 7. -भनक्ति, भंक्तुं), विघट्ट् (c. 10. -घट्टयति -यितुं), भूमौ प्रक्षिप्य खण्डं खण्डं कृ or खण्डशः कृ or लवशः कृ or चूर्ण् (c. 10. चूर्णयति -यितुं).—(Bespatter, besprinkle) अवकॄ (c. 6. -किरति -करितुं -रीतुं), अभ्यवकॄ, समवकॄ; उक्ष् (c. 1. उक्षति -क्षितुं), अभ्युक्ष्, प्रोक्ष्; अवसिच् (c. 6. -सिञ्चति -सेक्तुं).—(Mingle, adulterate) मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, संसृज् (c. 6. -सृजति -स्रष्टुं).—(Confound) मुह् in caus. (मोहयति -यितुं), विनश् in caus. (-नाशयति -यितुं).—(Obliterate) आमृज् (c. 2. -मार्ष्टि -मार्ष्टुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विलुप्

in caus. (-लोपयति -यितुं); 'dash one's hopes,' आशा भञ्ज् or अपह् (c. 10. अपहारयति -यितुं); 'dash out the brains,' मस्तकं निर्भिद्.

To DASH, *v. n.* (Rush against with a violent motion) प्रपत् (c. 1. -पतति -तितुं), प्रोत्पत्, आपत्, प्रस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), उत्प्लु (c. 1. -प्लवते -प्लोतुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).—(Be dashed in pieces), प्रभञ्ज् in pass. (-भज्यते).

DASH, *s.* (Collision) सङ्घट्टः -ट्टनं, समाघातः, प्रतिघातः, अभिघातः, परस्पराघातः, प्रभङ्गः, सम्मर्द्दः, मर्द्दनं, निष्पेषः.—(Infusion, admixture) प्रक्षेपः, मिश्रणं, सम्पर्कः, संसर्गः; 'a dash, a slight quantity,' किञ्चित्, ईषत्.—(A line in writing to denote a pause or omission) लिखने विरामसूचनार्थं or त्यागसूचनार्थं क्षुद्ररेखा.—(Blow) प्रहारः, आघातः, आहतिः *f.*

DASTARD, *s.* कापुरुषः, कुपुरुषः, हतकः, क्लीवः, कातरः, कृपणः, भीरुः.

To DASTARD or DASTARDISE, *v. a.* त्रस् in caus. (त्रासयति -यितुं), सन्त्रस्; भी in caus. (भाययति or भीषयति -यितुं), हीनचेतनं -नां -नं कृ.

DASTARDLY, *a.* अमनुष्यः -ष्या -ष्यं, कातरः -रा -रं, निर्वीरः -रा -रं, क्लीवः -वा -वं, अपौरुषेयः -यी -यं, दीनमनस्कः -स्का -स्कं.

DASTARDY, *s.* कापुरुषत्वं, अमनुष्यता, अपौरुषं, कातर्य्यं, क्लैव्यं, दीनता.

DATA, DATUM, *s.* तत्त्वानि *n. pl.*, सत्यानि *n. pl.*, सद्धान्तमतं तत्त्वं, उपन्यासः.

DATE, *s.* (Time at which a letter, &c. is written) लिखनकालः, लिखनदिवसः, दिवसः, दिनं, तिथिः *m. f.*—(Time at which a thing was done) कालः, कालिकता, तत्कालः.—(Period, term) अवधिः *m.*, कालावधिः *m.*, परिमाणं.—(Fruit) खर्ज्जूरः, काठिनः; 'out of date,' अव्यवहारितः -ता -तं, निरूढः -ढा -ढं.

To DATE, *v. a.* कालं or दिवसं or दिनं or तिथिं लिख् (c. 6. लिखति, लेखितुं).

DATED, *p. p.* कालसम्पन्नः -न्ना -न्नं, सकालः -ला -लं, कृतकालः -ला -लं.

DATE-TREE, *s.* खर्ज्जूरः, तृणद्रुमः, यवनामयः; 'marshy date-tree,' हिन्तालः, हीन्तालः, हिमहासकः.

DATIVE, *a.* (Case) सम्प्रदानं, सम्प्रदानकारकः, चतुर्थी विभक्तिः.

To DAUB, *v. a.* लिप् (c. 6. लिम्पति, लेप्तुं), आलिप्, उपलिप्, समालिप्; अञ्ज् (c. 7. अनक्ति, अंक्तुं or caus. अञ्जयति -यितुं), दिह् (c. 2. देग्धि -ग्धुं), प्रदिह्.—(Cover over) छद् (c. 10. छादयति -यितुं), प्रच्छद्.

DAUB, *s.* लेपः, विलेपः.—(Bad painting) कुचित्रं, कुचित्रलेखा, मन्दचित्रं.

DAUBED, *p. p.* लिप्तः -प्ता -प्तं, उपलिप्तः -प्ता -प्तं, विलिप्तः -प्ता -प्तं, अक्तः -क्ता -क्तं, अभ्यक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं, निर्दिग्धः -ग्धा -ग्धं.

DAUBER, *s.* लेपकः, लेपकरः, प्रलेपकः.—(Coarse painter) अनभिज्ञचित्रकरः, कुचित्रलिख् *m.* (ख्), चित्रकरदेशीयः, चित्रकरपाशः.

DAUBY, *a.* श्यानः -ना -नं, शीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, लेप्यः -प्या -प्यं.

DAUGHTER, *s.* दुहिता *f.* (तृ), पुत्री, पुत्रिका, पुत्रका, सुता, सूनुः -नूः *f.*, आत्मजा, स्वजा, अङ्गजा, कन्या, तनया, कन्यकाजनः, जाता, दारिका, प्रसूतिः *f.*, पितृ *f.* (श्र); 'legitimate daughter,' औरसी, धर्म्मजा; 'daughter in law,' स्नुषा, जनी, पुत्रवधूः *f.*, वधूः *f.*, वधूटी, सुवासी; 'adopted daughter,' करणीसुता, पुत्रिका, पोष्यपुत्री, क्रीतपुत्री; 'daughter's husband,' जामाता *m.* (तृ), दुहितुःपतिः *m.*

To DAUNT, *v. a.* त्रस् in caus. (-त्रासयति -यितुं), सन्त्रस्, भी in caus. (भाययति or भीषयति -यितुं), भयं जन् in caus. (जनयति -यितुं), मनो भञ्ज् (c. 7. भनक्ति, भंक्तुं), मनोहतं -तां -तं कृ.

DAUNTLESS, *a.* निर्भयः -या -यं, अशङ्कः -ङ्का -ङ्कं, विशङ्कः -ङ्का -ङ्कं, अभीतः -ता -तं, अकुतोभयः -या -यं, अपभीः -भीः -भि, निःसाध्वसः -सा -सं.

DAUNTLESSNESS, *s.* निर्भयत्वं, अभीतिः *f.*, अभयं, अभीरुता, विशङ्कता.

DAUPHIN, *s.* युवराजः, ज्येष्ठो राजपुत्रः, राज्ञः पूर्व्वजपुत्रः.

To DAWDLE, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

DAWDLER, *s.* विलम्बी *m.* (न्), कालक्षेपकः, दीर्घसूत्री *m.* (न्).

To DAWN, *v. n.* प्रभा (c. 2. -भाति -तुं), उषस् (nom. उषस्यति), उष् (c. 1. ओषति, ओषितुं), व्युष्, समुष्, प्रभातीभू.

DAWN, *s.* अरुणः, प्रभातं, उषः -षः *n.* (स्), प्रत्युषः -षः *n.* (स्), प्रत्यूषः -षः *n.* (स्), अरुणोदयः, व्युष्टं, विभातं, भातः, उदयः, प्रातःकालः, कल्यं, काल्यं, पूर्व्वसन्ध्या, प्राक्सन्ध्या, सन्ध्या, दिवसमुखं, अहर्मुखं, दिनारम्भः, दिनादिः *m.*, निशावसानं, निशान्तं, क्षपान्तः, रात्रिविगमः, गोसर्गः, प्राबोधिकः; 'at dawn,' प्रभाते, उषा, प्रातःकाले, प्रातर्; 'belonging to the dawn,' उषस्यः -स्या -स्यं, प्रभातीयः -या -यं, प्रातःकालीनः -ना -नं.

DAY, *s.* दिवसः -सं, दिनं, अहः *m.* (न्), वासरः, वारः, द्यु *n.*, घस्रः, वास्रः; 'a lunar day,' तिथिः *m. f.* -थी; 'to day,' अद्य; 'by day,' दिवा, अह्नाय; 'day by day,' प्रतिदिनं, प्रतिदिवसं, प्रतिवासरं, प्रत्यहं, दिवसे दिवसे, अहन्यहनि, अहरहः, दिने दिने; 'day and night,' अहोरात्रं, अहर्निशं, दिवानिशं, दिवारात्रं, अपार्हं, द्युनिशं, द्युनिशौ; 'from day to day,' दिनाद्दिनं, वारं वारं; 'one day,' एकदा; 'a former day,' पूर्व्वेद्युस्; 'a future day,' उत्तरेद्युस्; 'another day,' अन्येद्युस्; 'next day,' परेद्युस्, परेद्यवि; 'the day before yesterday,' अपरेद्युस्; 'the day after to-morrow,' परश्वस्, अधरेद्युस्; 'a night and two days or a day and two nights,' पक्षिणी; 'a day of Brahma,' ब्राह्मः; 'a day of the gods,' दैवतः; 'a rainy day,' दुर्द्दिनं, वार्द्दलं; 'day's hire,' दिनिका, दैनिकी.

DAY-BOOK, *s.* महाजनस्य दैनिकपुस्तकं, वाणिज्यपुस्तकं यस्मिन् दिवसे दिवसे यथायावृत्तान्तो लिख्यते or आरोप्यते.

DAY-BREAK, *s.* अरुणोदयः, उदयकालः, उषः, प्रत्युषः, प्रभातं, प्रभातकालः, दिवसमुखं, अहर्मुखं, दिनारम्भः, दिनादिः *m.*, रात्र्यवसानं, निशान्तं.

DAY-LABOUR, *s.* भ्रातं, दैनिककर्म्म *n.* (न्), आह्निकक्रिया, दिवाकर्म्म *n.*

DAY-LABOURER, *s.* भ्रातीनः, भ्रातकरः, भ्रातव्यापृतः, दैनिककर्म्मकारः.

DAY-LIGHT, *s.* दिनज्योतिः *n.* (स्), सूर्य्यकालः, सूर्य्यरश्मिः *m.*, दिवालोकः, दीप्तिः *f.*

DAY-SPRING, *s.* अरुणोदयः, उदयः, सूर्य्योदयः, दिवसमुखं, दिनारम्भः.

DAY-STAR, *s.* प्रभातनक्षत्रं, प्रभातीयतारा, प्रातरुदयिनी तारा, शुक्रतारा.

DAY-TIME, *s.* दिवसकालः, सूर्य्यकालः, सूर्य्यसमयः, दिनकालः, रविकालः.

DAY-WORK, *s.* दिवसकर्म्म *n.* (न्), दिवाकर्म्म, आह्निकक्रिया, भ्रातं.

To DAZZLE, *v. a.* अतिशयतेजसा दृष्टिं तप् in caus. (-तापयति -यितुं) or उपहन् (c. 2. -हन्ति -न्तुं) or [illegible] (c. 7. [illegible]).

To DAZZLE, *v. n.* अतिदीप्त्युपहतत्वात् [illegible] दृष्टिः -ष्टिः -ष्टि भू.

DAZZLED, *p. p.* उपहतदृष्टिः -ष्टिः -ष्टि or [illegible]दृष्टिः, उपहतनयनः -ना -नं.

DAZZLING, *a.* अतितैजसः -सी -सं, उज्ज्वलः -ला -लं, दृष्टितापकः -का -कं, दुरालोकः -का -कं, दुर्निरीक्ष्यः -क्ष्या -क्ष्यं, दुर्दर्शः -र्शा -र्शं, नयनोपघाती -तिनी -ति (न्).

DEACON, *s.* उपपुरोहितः, उपधर्म्माध्यापकः, पुरोहितसहायः -सहकारी *m.* (न्).

DEACONESS, *s.* पूर्व्वकाले ख्रीष्टीयसमाजे पुरोहितसहकारिणी स्त्री.

DEACONRY, DEACONSHIP, *s.* उपपुरोहित[illegible] or [illegible] or [illegible] *n.* (न्).

DEAD, *a.* and *s.* मृतः -ता -तं, प्रेतः -ता -तं, परेतः -ता -तं, [illegible] -ता -तं, प्रेतीभूतः -ता -तं, अतीतः -ता -तं, [illegible] -ता -तं, [illegible] -ता -तं.

विगतः -ता -तं, अजीवः -वा -वं, निर्जीवः -वा -वं, व्यापन्नः -न्ना -न्नं, विपन्नः -न्ना -न्नं, संस्थितः -ता -तं, मृतः -ता -तं, प्रमीतः -ता -तं, नष्टः -ष्टा -ष्टं, उपरतः -ता -तं, अवसन्नः -न्ना -न्नं, त्यक्तजीवनः -ना -नं, प्रहीणजीवितः -ता -तं, त्यक्तदेहः -हा -हं, गतप्राणः -णा -णं, गतासुः -सुः -सु or उत्क्रान्तासुः, परासुः -सुः -सु, प्राणपञ्चत्वः -त्वा -त्वं, अधियमाणः -णा -णं, नामशेषः -षा -षं, कीर्त्तिशेषः -षा -षं, कथाशेषः -षा -षं, दिष्टगतः -ता -तं, प्रशान्तः -न्ता -न्तं; 'gone to heaven,' स्वर्यातः -ता -तं, ऊर्द्ध्वगतः -ता -तं; 'half-dead,' मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, मुमूर्षुः -र्षुः -र्षु.—(Inanimate) अप्राणी -णिनी -णि (न्), विचेतनः -ना -नं, अचेतनः, असुः -सुः -सु, प्राणहीनः -ना -नं.—(Motionless) निष्पन्दः -न्दा -न्दं, निश्चेष्टः -ष्टा -ष्टं, निश्चलः -ला -लं.—(Empty) शून्यः -न्या -न्यं.—(Dull) मन्दः -न्दा -न्दं, निस्तेजाः -जाः -जः (स्).—(Obtuse) जडः -डा -डं, अतीक्ष्णः -क्ष्णा -क्ष्णं.—(Vapid) विरसः -सा -सं, निस्सत्त्वः -त्त्वा -त्त्वं, निस्सारः -रा -रं, क्लीवः -वा -वं.—(Useless) विफलः -ला -लं.—(Numbed) स्तब्धः -ब्धा -ब्धं, सुप्तः -प्ता -प्तं.—(Dead body) मृतशरीरं, मृतकं, शवः -वं, कुणपः -पं.

Dead, *s.* (Of night) मध्यरात्रः, महारात्रः, महानिशा, अर्द्धरात्रः, अर्द्धनिशा, निशीथः; 'in the dead of night,' रात्रिमध्ये; 'of winter,' शीतकालमध्ये.

To deaden, *v. a.* दुर्बलीकृ, निर्बलीकृ, ग्लानीकृ, शिथिलीकृ, विरसीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं) or उपहन् (c. 2. -हन्ति -न्तुं), शम् in caus. (शमयति -यितुं).

To deaden, *v. n.* ग्लै (c. 1. ग्लायति, ग्लातुं), क्षि in pass. (क्षीयते), शिथिलीभू.

Deadened, *p. p.* हततेजाः -जाः -जः (स्) or ग्लानतेजाः or नष्टतेजाः, क्षीणशक्तिः -क्तिः -क्ति, शिथिलबलः -ला -लं, उपहतशक्तिः -क्तिः -क्ति.

Deadly, *a.* मारात्मकः -का -कं, व्यापादकः -का -कं, आत्ययिकः -की -कं, प्राणान्तिकः -की -कं or प्राणान्तकः or जीवान्तकः, प्राणहारी -रिणी -रि (न्) or प्राणापहारी, प्राणघातकः -का -कं, मृत्युजनकः -का -कं, निधनकारी -रिणी -रि (न्), विषतुल्यः -ल्या -ल्यं, सविषः -षा -षं, कालकल्पः -ल्पा -ल्पं, प्राणनाशकः -का -कं, मर्म्मान्तिकः -की -कं.—(Implacable) अशाम्यः -म्या -म्यं; 'deadly hatred,' बद्धवैरं; 'deadly poison,' मृत्युजनकगरलं.

Deadly, *adv.* (In a manner like the dead) मृतवत्, प्रेतवत्, शववत्.—(Mortally) मारात्मकं, प्राणान्तिकं; 'deadly wounded,' भिन्नमर्म्मा *m.* (न्); 'deadly pale,' शववर्णः -र्णा -र्णं.

Deadness, *s.* (Coldness, want of affection) निःस्नेहता, विरक्तिः *f.*, वैरस्यं.—(Languor, weakness) ग्लानिः *f.*, म्लानिः *f.*, अवसादः, मान्द्यं, निर्बलता, दौर्बल्यं, अशक्तिः *f.*, बलशैथिल्यं, शिथिलता.—(Want of motion) निष्पन्दता, निश्चलता.—(Want of spirit) तेजोहीनता, निस्सत्त्वता, वैरस्यं, जडत्वं.—(Numbness) सुप्तिः *f.*, स्तब्धता.—(Barrenness) वन्ध्यता, वैफल्यं.

Dead-reckoning, *s.* कुत्र समुद्रे नौका वर्त्तते इति जिज्ञासया सूर्य्यताराद्यभावे नाविकैः कृता गणना.

Deaf, *a.* बधिरः -रा -रं, एडः -डा -डं, अकर्णः -र्णा -र्णं, अश्रुतः -ता -तं, शब्दाज्ञः -ज्ञा -ज्ञं, श्रोत्रविकलः -ला -लं, श्रवणेन्द्रियविकलः -ला -लं, श्रवणशक्तिरहितः -ता -तं, श्रुतिवर्जितः -ता -तं; 'deaf and dumb,' एडमूकः -का -कं, अनेडमूकः, कल्पः -ल्पा -ल्पं.

To deafen, *v. a.* बधिरीकृ, बधिर (nom. बधिरयति -यितुं), श्रवणम् उपहन् (c. 2. -हन्ति -न्तुं), श्रवणशक्तिं हृ (c. 1. हरति, हर्त्तुं).

Deafened, *p. p.* उपहतकर्णः -र्णा -र्णं, बधिरीकृतः -ता -तं.

Deafening, *a.* कर्णोपघाती -तिनी -ति (न्), श्रवणशक्तिहारी -रिणी -रि (न्).

Deafish, *a.* ईषद्बधिरः -रा -रं, ईषदेडः -डा -डं, अल्पश्रवणः -णा -णं.

Deafly, *adv.* बधिरवत्, एडवत्, अश्रवणपूर्ब्बं, अस्पष्टं.

Deafness, *s.* बधिरत्वं -ता, एडता, श्रवणत्वं, अश्रवणं, श्रवणहीनता, श्रवणेन्द्रियवैकल्यं, श्रवणाक्षमता.

Deal, *s.* (Quantity) बाहुल्यं, बहुत्वं, प्राचुर्यं, प्रायः; 'a deal of, much,' बहुः -हुः -ह्वी -हु, भूरिः -रिः -रि, प्रचुरः -रा -रं, अनल्पः -ल्पा -ल्पं, अनेकः -का -कं; 'a deal of money,' बहुधनं; 'a good deal,' बहु, भृशं, अतिशयं, निर्भरं, गाढं, आयतं, अनल्पं, अति or सु prefixed; 'a good deal vexed,' सुदुःखितः.—(Fir wood) दारु *n.*, देवदारु, देवकाष्ठं, इन्द्रदारुः *m.*, किलिमं.

To deal, *v. a.* (Distribute) क्लृप् (c. 10. कल्पयति -यितुं), परिक्लृप्, पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं) or विन्यस् (c. 4. -अस्यति -असितुं) or व्यंस् (c. 10. -अंसयति -यितुं) or विधा (c. 3. -दधाति -धातुं), वण्ट् (c. 10. वण्टयति -यितुं).—(Scatter) विकॄ (c. 6. -किरति -करितुं -रीतुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), व्यस्; 'to deal blows,' मुष्टिं or दण्डं पत् in caus. (पातयति -यितुं).

To deal, *v. n.* (Transact business, trade) पण् (c. 1. पणते -णितुं or पणायति -यितुं), पणायां कृ, व्यवहृ (c. 1. -हरति -हर्त्तुं), व्यापृ (c. 6. -प्रियते), क्रयविक्रयं कृ.—(Behave, act) चर् (c. 1. चरति -रितुं), आचर्, समाचर्; वृत् (c. 1. वर्त्तते -र्त्तितुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), विधा (c. 3. -दधाति -धातुं).

To deal with, *v. a.* (Treat in any manner) विधा (c. 3. -दधाति -धातुं), आचर् (c. 1. -चरति -रितुं), समाचर्; व्यवहृ (c. 1. -हरति -हर्त्तुं), 'he deals honourably with me,' मयि यथान्यायं वृत्तिं वर्त्तते.—(Contend with) प्रतिकृ, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं), 'how can one deal with such a monarch?' एवंविधे नृपे कुतो वर्त्तितव्यं. (Manage) प्रणी (c. 1. -णयति -णेतुं), विधा, घट् (c. 1. घटते -टितुं); 'an easy man to deal with,' विधेयः, प्रणेयः, वश्यः, गृह्यकः, अभिगम्यः, विनेयः; 'a hard man to deal with,' दुर्बोधः.

Dealer, *s.* (One who has to do with any thing) व्यापारी *m.* (न्), व्यवसायी *m.* (न्), व्यवहर्त्ता *m.* (र्त्तृ), व्यवहारी *m.* (न्), कर्म्मकारी *m.* (न्).—(Trader) क्रयविक्रयिकः, विपणी *m.* (न्), आपणिकः, प्रापणिकः, पणिकः, वणिक् *m.* (ज्), वाणिजः, विक्रयिकः, विक्रेता *m.* (तृ).

Dealing, *s.* (Practice, mode of treatment) व्यापारः, व्यवहारः, व्यवसायः, कर्म्म *n.* (न्), क्रिया, कार्य्यं, चेष्टा, विचेष्टितं, प्रवृत्तिः *f.*, विधानं, आचारः, आचरणं, चरितं, वृत्तं, कर्म्मविधिः *m.*—(Intercourse) व्यवहारः, सङ्गतिः *f.*, सङ्गः, संसर्गः.—(Traffic) क्रयविक्रयः, विपणः, पणाया, पणः, पणः, वाणिज्यं -ज्या, वणिक्पथं, महाजनकर्म्म *n.* (न्), निगमः, सत्यानृतं.

Dealt with, *p. p.* व्यवहारितः -ता -तं, आचरितः -ता -तं, पणायितः -ता -तं.

Deambulation, *s.* बहिर्गमनं, बहिर्भ्रमणं, परिक्रमः, पर्य्यटनं, भ्रमणं, विहारः.

Dean, *s.* प्रधानधर्म्माध्यक्षाधिकारे द्वितीयपदस्थः, महापूजाशालासम्बन्धीयमठे प्रधानसभासद्, दशपुरोहिताधिपतिः *m.*—(In a college) विद्यालये विनयाध्यक्षः.

Deanery, *s.* (House of a dean) पुरोहिताधिपतेर् गृहं or वेश्म *n.* (न्) or निवासः.

Deanship, *s.* पुरोहिताधिपतेः पदं or अधिकारः or व्यापारः.

Dear, *a.* (Beloved) प्रियः -या -यं, सुप्रियः -या -यं, हृदयप्रियः -या -यं, दयितः -ता -तं, इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, प्रीतः -ता -तं, प्रेष्ठः -ष्ठा -ष्ठं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, अभीप्सितः -ता -तं, सुभगः -गा -गं,

कान्तः -न्ता -न्तं, प्रियतमः -मा -मं, इष्टतमः -मा -मं; 'a dear friend,' प्रियसुहृद् m. 'dear as one's life,' असुसमः -मा -मं, प्राणाधिकः -का -कं. प्राणेभ्यो गरीयान् यसी यः (स्) —(Of high price, costly) दुर्मूल्यः -ल्या -ल्यं, बहुमूल्यः -ल्या -ल्यं, महामूल्यः -ल्या -ल्यं, महार्घः -र्घा -र्घं, दुष्क्रेयः -या -यं, बहुधनव्ययेन क्रेयः -या -यं, गुरुः -र्वी -रु, महार्हः -र्हा -र्हं, अर्घ्यः -र्घ्या -र्घ्यं, उत्कृष्टः -ष्टा -ष्टं.

Dear, s. (Word of endearment) प्रियः -या, दयितः -ता, कान्तः -न्ता, दयितः -ता, वत्सः -त्सा; 'my dear,' प्रिय voc. c. m., प्रिये voc. c. f.

Dear, adv. (Oh dear!) अहो, अहोवत, कष्टं, आः, हा, हन्त, अहह

Dear-bought, a. दुष्क्रीतः -ता -तं, बहुमूल्येन क्रीतः -ता -तं.

Dearly, adv. (With great fondness) प्रियं, सुप्रियं, प्रीत्या, सुप्रीत्या 'dearly beloved,' अतिप्रियः -या -यं, प्रियतमः -मा -मं. (At a high price) बहुमूल्येन, दुर्मूल्येन, महार्घेण, गुरु, गुरुमूल्येन

Dearness, s. (Fondness) प्रियता, इष्टता, अभीष्टता, प्रीतिः f.—(High price) दुर्मूल्यं, बहुमूल्यं, महार्घ्यं, महार्घता, महार्घः, मूल्यगुरुता, गुरुत्वं

Dearth, s. (Famine) दुर्भिक्षं, दुष्कालः, अन्नाकालं, दुर्भक्ष्यं, नीवाकः, प्रयामः, उपद्रवः, 'dearth of provisions,' आहारविरहः —(Want, need) अभावः, अप्राप्तिः f., विरहः, असम्भवः, दौर्लभ्यं, वैरल्यं, 'dearth of money,' धनाभावः.

To Dearticulate, v. a. विसन्धीकृ, सन्धिमोटनं कृ, व्यङ्गीकृ

Dearticulated, p. p. विसन्धितः -ता -तं, त्रुटितसन्धिः -न्धिः -न्धि

Death, s. मृत्युः m., मरणं, निधनं, पञ्चत्वं -ता, अत्ययः, अन्तः, अन्तकालः, अन्तकः, अपगमः, नाशः, विनाशः, प्रलयः, संस्थानं, संस्थितिः f., अवसानं, निःसरणं, उपरतिः f., अपायः, प्रयाणं, जीवनत्यागः, तनुत्यागः, जीवोत्सर्गः, देहक्षयः, प्राणवियोगः, मृतं, मृतिः f., मरिमा m. (न्), महानिद्रा, दीर्घनिद्रा, कालः, कालधर्म्मः, कालदण्डः, कालान्तकः, नरान्तकः, दिष्टान्तः, आपद् f., हान्द्रं, कथाशेषता, कीर्त्तिशेषः, लोकान्तरप्राप्तिः f. —(Murder) वधः, घातः, मारणं.—(Death personified) यमः, कालः, कृतान्तः, 'a violent death,' अपघातः, अपमृत्युः m., 'death by lightning,' वज्रवधः, 'deserving of death,' वध्यः -ध्या -ध्यं, वधार्हः -र्हा -र्हं or प्रयाणार्हः, 'desire for death,' मुमूर्षा, 'desirous of death,' मुमूर्षुः -र्षुः -र्षु, 'at the point of death,' आसन्नमृत्युः, मुमूर्षुः, मृतप्रायः, मृतकल्पः, 'fearing death,' विवशः -शा -शं, अरिष्टदुष्टधीः -धीः -धि, 'put to death,' हतः -ता -तं, व्यापादितः -ता -तं, मारितः -ता -तं, 'to put to death,' हन् (c. 2 हन्ति -न्तुं), प्राणदण्डं कृ, 'angel of death,' यमदूतः, 'death-drum,' वध्यडिण्डिमः, 'hour of death,' मृत्युकालः, प्रयाणकालः, 'voluntary death by fasting,' प्रायः -यणं, 'after death,' प्रेत्य

Death-bed, s. मृत्युशय्या, मरणशय्या, मृत्युशयनं, मुमूर्षुशयनं

Deathful, a. मारात्मकः -का -कं, प्राणान्तिकः -की -कं, मृत्युमयः -यी -यं, मृत्युजनकः -का -कं, प्राणान्तकः -का -कं, अन्तकरः -री -रं, घातुकः -का -कं.

Deathless, a. अमरः -री -रं, मृत्युवर्जितः -ता -तं, अमरणीयः -या -यं, अमर्त्यः -र्त्या -र्त्यं, अनन्तः -न्ता -न्तं, निरपायः -या -यं, अनश्वरः -रा -रं

Deathlike, a. मृत्युसदृशः -शी -शं or कालसदृशः, कालकल्पः -ल्पा -ल्पं.

Death's-door, s. मृत्युद्वारं, यमद्वारं, यमालयद्वारं, यमपुरद्वारं.

Death's-head, s. शवशिरः n. (स्), मृतशरीरमस्तकः, कुणपमस्तकः, कपालः, नृकपालः

Death's-man, s. वध्यपुरुषः, घातुकपुरुषः, वधकर्म्माधिकारी m. (न्), दण्डपाशिकः, मृतपाः m. (पा), घातकजनः.

Death-watch, s. मरणसूचकशब्दकारी कीटविशेषः.

To Deaurate, v. a. रस (c. 10 रसयति -यितुं), सुवर्ण (nom. सुवर्णयति -यितुं).

Deaurate, a. रसितः -ता -तं, सुवर्णान्वितः -ता -तं, सुवर्णीकृतः -ता -तं.

To Debar, v. a. बाध् (c. 1. बाधते -धितुं), निरस् (c. 4. -अस्यति -असितुं), निराकृ, अपाकृ, बहिष्कृ, वृज् in caus. (वर्जयति -यितुं), निषिध् (c. 1. -षेधति -षेद्धुं), वृ in caus. (वारयति -यितुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं); 'is debarred,' परिह्रीयते.

Debarred, p. p. निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, बाधितः -ता -तं, निवारितः -ता -तं, विधितः -ता -तं, रुद्धः -द्धा -द्धं.

To Debark, v. a. उत्तॄ (c. 1. -तरति -रितुं -रीतुं), प्रत्युत्तॄ, नौकाया अवरुह् (c. 1. -रोहति -रोढुं) or अवतॄ.

Debarkation, s. उत्तरणं, प्रत्युत्तरणं, नौकाया अवतरणं or अवरोहणं.

To Debase, v. a. अपकृष् (c. 1. -कर्षति -क्रष्टुं), स्वपदात् पत् in caus. (पातयति -यितुं) or भ्रंश् in caus. (भ्रंशयति -यितुं) or अपध्वंस् in caus. (-ध्वंसयति -यितुं) or च्यु in caus. (-च्यावयति -यितुं), अवसद् in caus. (-सादयति -यितुं), न्यूनीकृ, अधःकृ, ऊन (nom. ऊनयति -यितुं).—(Make despicable) अवमानास्पदं कृ, अलीकृ, लघूकृ, तुच्छीकृ.

Debased, p. p. अपकृष्टः -ष्टा -ष्टं, स्थानभ्रष्टः -ष्टा -ष्टं, पातितः -ता -तं, अधःपातितः -ता -तं, पदच्युतः -ता -तं, अपध्वस्तः -स्ता -स्तं, अवरोपितः -ता -तं, भग्नदर्पः -र्पा -र्पं.

Debasement, s. (Act of) अपकर्षः -र्षणं, पातनं, पदभ्रंशनं, अपध्वंसः, अभिभवः, अवमानना, लघूकरणं, अलीकरणं.—(State of) अपकृष्टता, निकृष्टता, पतितत्वं, पातित्यं, अपमानभावः, न्यूनीभावः, अधोगतिः f., अधोभावः, भ्रष्टता, वृषलत्वं.

Debatable, a. विवदनीयः -या -यं, विचार्यः -र्या -र्यं, वितर्क्यः -र्क्या -र्क्यं, विचारणीयः -या -यं, सन्दिग्धः -ग्धा -ग्धं.

Debate, s. विवादः, वादानुवादः, वादप्रतिवादः, संवादः, विसंवादः, वादः, हेतुवादः, वादयुद्धं, विचारः, विरोधोक्तिः f., वाग्युद्धं, वाक्कलहः, विप्रलापः, विप्रतिपत्तिः f., वितण्डा, वितर्कः, तर्कः, वाक्यविरोधः, वाक्यं, जल्पः, वाक्कलिः m.—(Contest) कलहः, विग्रहः, विरोधः, कलिः m., 'matter of debate,' विवादास्पदं.

To Debate, v. a. and n. विवद् (c. 1. -वदति -ते -दितुं), विसंवद्, विचर् in caus. (-चारयति -यितुं), विवादास्पदीकृ, वादानुवादं कृ, वितर्क् (c. 10 -तर्कयति -यितुं), विप्रलप् (c. 1. -लपति -पितुं), वितण्ड् (c. 1. -तण्डते -ण्डितुं), कलह (nom. कलहायते), वैर (nom. वैरायते), वाक्कलहं कृ, जल्प (c. 1. जल्पति -ल्पितुं).

Debated, p. p. विचारितः -ता -तं, वादग्रस्तः -स्ता -स्तं, जल्पितः -ता -तं.

Debateful, a. विवादी -दिनी -दि (न्), विवादशीलः -ला -लं, विसंवादी -दिनी -दि (न्), कलहकारी -रिणी -रि (न्), वाक्कलहप्रियः -या -यं, वाग्युद्धप्रियः -या -यं, वाक्कलिप्रियः -या -यं, जल्पकः -ल्पका -ल्पकं, विरोधी -धिनी -धि (न्).

Debater, s. विवादी m. (न्), विचारकः, वितण्डकः, तर्की m. (न्), वादी m. (न्), हेतुवादी, वितण्डावादी m. (न्), न्यायी m. (न्), सांवादिकः.

To Debauch, v. a. दुष् in caus. (दूषयति -यितुं), अभिदुष्, प्रतिदुष्, दुर्वृत्तीकृ; भ्रष्टीकृ, व्रात्यीकृ; नश् in caus. (नाशयति -यितुं); अपधर्म्मं -र्म्मां -र्म्मं कृ; धर्म्मभ्रष्टं -ष्टां -ष्टं कृ, धर्म्मच्युतं -तां -तं कृ, विकृ; 'to debauch a maiden,' कन्यां दुष् or धृष् in caus. (धर्षयति -यितुं), कन्याव्यभिचारं कृ.

Debauch, s. मद्यावेशः, कामावेशः, अत्यन्तावेशः, अनीतिः f., असन्नीतिः f., अभ्योजनं, केलिः m. f., अभिमानादिसम्भोगार्थम् उत्सवः.

Debauched, p. p. दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं; 'woman,' दूषिता, भ्रष्टयोनिः.

Debauchee, s. व्यसनी m. (न्), व्यसनीयः, लम्पटः, विषयी m. (न्), सम्भोगी m. (न्), विषयासक्तः, विषयानुरागी m. (न्), कामासक्तः,

भोगासक्तः, दुराचारः, धर्म्मातिरतः, पानरतः, नागरः, विटः.

DEBAUCHER, s. दूषकः, दूषणः, दूषयिता m. (तृ), भ्रंशकारी m. (न्), नाशकः.

DEBAUCHERY, s. लम्पटता, लाम्पट्यं, व्यसनं -निता, इन्द्रियासंयमः, विषयित्वं, विषयासक्तत्वं, अनवस्थितिः f., धर्म्मापेतत्वं, कामासक्तिः f., भोगासक्तिः f., दुष्कर्म्म n. (न्).

DEBAUCHMENT, s. दूषणं, प्रतिदूषणं, भ्रष्टीकरणं, नाशनं.

To DEBELLATE, v. a. युद्धे पराजि (c. 1. -जयति -जेतुं), दम् (c. 10. दमयति -यितुं).

DEBENTURE, s. प्रतिज्ञापत्रकं, लेख्यप्रसङ्गः, लेख्यपत्रं, पत्रलेख्यं, ऋणशोधनप्रतिज्ञापत्रं, ऋणमार्गणपत्रं.

DEBILE, a. दुर्बलः -ला -लं, अल्पबलः -ला -लं, अल्पशक्तिः -क्तिः -क्ति, शिथिलबलः -ला -लं, शिथिलशक्तिः -क्तिः -क्ति, शिथिलः -ला -लं, अल्पवीर्य्यः -र्य्या -र्य्यं, अल्पतेजाः -जाः -जः (स्), अल्पसत्त्वः -त्त्वा -त्त्वं, फल्गुः -ल्गुः -ल्गु, म्लानशक्तिः -क्तिः -क्ति, म्लानः -ना -नं, कृशः -शा -शं, विगलत्तेजाः -जाः -जः (स्), अवसन्नः -न्ना -न्नं, क्षामः -मा -मं, क्लीबः -बा -बं, क्षीणशक्तिः -क्तिः -क्ति.

To DEBILITATE, v. a. दुर्बलीकृ, शिथिलीकृ, अल्पबलीकृ, म्लानीकृ, क्षामीकृ, क्षीणीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), क्लीब् in caus. (क्लीबयति -यितुं), कृश (nom. कृशयति -यितुं), क्षीणं -णां णं कृ.

DEBILITATION, s. दुर्बलीकरणं, शिथिलीकरणं, क्षीणीकरणं, तेजोहरणं, म्लानीकरणं

DEBILITY, s. दौर्बल्यं, बलशैथिल्यं, शिथिलता, शक्तिशैथिल्यं, क्षीणशक्तित्वं, ग्लानिः f., म्लानिः f., अवसादः, अवसन्नता, विस्रंसः -सा, तेजोहीनता, अतेजः n. (स्), वीर्य्यहानिः f., क्षामता, क्लैब्यं, कार्श्यं, सत्त्वहानिः f., मान्द्यं.

DESERTION, *s.* (Abandonment) त्यागः, परित्यागः, उत्सर्गः, विरहः, प्रोज्झनं, उत्सर्ज्जनं, विसर्ज्जनं, विसृष्टिः *f.*, परिवर्त्तः.—(From the army) सेनात्यागः, युद्धत्यागः, युद्धपलायनं, विपलायनं.

DESERTLESS, *a.* निर्गुणः -णा -णं, अनर्हः -र्हा -र्हं, अनुपयुक्तः -क्ता -क्तं.

To DESERVE, *v. a.* and *n.* अर्ह् (c. 1. अर्हति -ते -र्हितुं), अर्हः -र्हा -र्हं or उपयुक्तः -क्ता -क्तं or उचितः -ता -तं or योग्यः -ग्या -ग्यम् अस् or भू; 'he deserves honour,' मानम् अर्हति; 'he deserves punishment,' दण्डम् अर्हति; 'he deserves to drink soma juice,' सोमं पातुम् अर्हति; 'does he deserve so large a salary or not?' किम् उपयुक्तो ऽयम् एतावद् वर्त्तनं गृहीतुम् अनुपयुक्तो वा; 'he deserves death,' वधार्हो ऽस्ति, मरणोचितो ऽस्ति. The future pass. part. may sometimes be used in this sense; as, 'he deserves death,' वध्यो ऽस्ति; 'he deserves honour,' मान्यो ऽस्ति, पूजनीयो ऽस्ति.

DESERVEDLY, *adv.* अर्हं, उपयुक्तं, योग्यं, उचितं, अर्हत्वेन, न्यायतस्.

DESERVER, *s.* अर्हः; 'good deserver,' सत्पात्रं; 'best deserver,' अर्हत्तमः.

DESERVING, *a.* (Worthy of) अर्हः -र्हा -र्हं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, योग्यः -ग्या -ग्यं.—(Meritorious) गुणी -णिनी -णि (न्), गुणान्वितः -ता -तं.

DESERVING, *s.* गुणः, उपयोगः, पुण्यं, अर्हत्वं, धर्म्मः, पात्रता, शस्यं.

DESICCANTS, *a.* व्रणशोषकाः *m. pl.*, क्षतशोषणार्थम् उपनाहः or उपदेहः.

To DESICCATE, *v. a.* शुष् in caus. (शोषयति -यितुं), उच्छुष्, उपशुष्, विशुष्, संशुष्.

To DESICCATE, *v. n.* शुष् (c. 4. शुष्यति, शोष्टुं), विशुष्, खोल् (c. 1. खोलति -लितुं).

DESICCATION, *s.* शोषणं, परिशोषः, उच्छोषणं, शुष्ककरणं, शुष्कत्वं.

DESICCATIVE, *a.* शोषकः -का -कं, उच्छोषणः -णी -णं, शुष्ककृत् *m. f. n.*

To DESIDERATE, *v. a.* अप्रत्यक्षं or अविषयं किञ्चिद्वस्तु इष् (c. 6. इच्छति, एषितुं) or उत्कण्ठ् (c. 1. -कण्ठते -ठितुं) or आप् in des. (-ईप्सति -प्सितुं).

DESIDERATUM, *s.* अविद्यमानं किञ्चिद् अभीष्टं वस्तु, अवर्त्तमानो वाञ्छनीयविषयः.

To DESIGN, *v. a.* (Purpose, intend) कृ in des. (चिकीर्षति -र्षितुं), अभिप्रे (rt. इ with अभि, प्र: अभिप्रैति -तुं), उपलक्ष् (c. 10. -लक्षयति -यितुं); उद्दिश् (c. 6. -दिशति -देष्टुं), अभिसन्धा (c. 3. -दधाति -धातुं), मनः or मतिं or बुद्धिं कृ or प्रकृ with loc. or abl. case; as, 'he designs a crime,' मनः पापे करोति; 'he designs the death of the king,' राज्ञो विनाशाय मतिं करोति.—(Plan, meditate) चिन्त् (c. 10. चिन्तयति -यितुं), प्रचिन्त्, मन्त्र् (c. 10. मन्त्रयति -यितुं), घट् (c. 1. घटते -टितुं), कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, अनुसन्धा (c. 3. -दधाति -धातुं), व्यवसो (c. 4. -स्यति -सातुं).—(Devote to, apply to a particular purpose) प्रयुज् (c. 7. -युंक्ते -योक्तुं), उपयुज्, विनियुज्; as, 'to religious purposes,' धर्म्मार्थेन उपयुज्.—(Draw) आलिख् (c. 6. -लिखति -लेखितुं), सूत्रपातं कृ, संस्कारं कृ, संस्कृ.

DESIGN, *s.* (Intention, purpose) चिकीर्षा -र्षितं, अभिप्रायः, अभिप्रेतं, आशयः, अर्थः, आकूतं, तात्पर्य्यं, आकांक्षा, छन्दः, छन्दः *n.* (स्), सङ्कल्पः, उद्देशः, मतिः *f.*, मतं, कार्य्यं, उपयोगः, प्रयोजनं, उपलक्षितं, अभिसन्धिः *m.*—(Plan, scheme) चिन्ता, उपायः, व्यवसितं, व्यवसायः, प्रक्रान्तं, अनुसन्धानं, कल्पना, घटनं, विधानं.—(Drawing, impression) संस्कारः, आलेख्यं, सूत्रं, सूत्रपातः; 'with the design of,' अर्थे; 'one who has not effected his design,' अकृतार्थः.

To DESIGNATE, *v. a.* (Mark out, indicate) चिह्न् (c. 10. चिह्नयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं), उपलक्ष्, विशिष् in caus. (-शेषयति -यितुं), प्रदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, सूच् (c. 10. सूचयति -यितुं).—(Appoint) नियुज् (c. 10. -योजयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं).

DESIGNATED, *p. p.* चिह्नितः -ता -तं, लक्षितः -ता -तं, विशेषितः -ता -तं.

DESIGNATION, *s.* लक्षणं, उपलक्षणं, संलक्षणं, चिह्नं, विशेषणं, संज्ञा, अभिज्ञानं, अभिधानं, आख्या, निर्देशः, सूचनं.

DESIGNED, *p. p.* चिकीर्षितः -ता -तं, अभिप्रेतः -ता -तं, उपलक्षितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, अर्थवान् -वती -वत् (त्), व्यवसितः -ता -तं, घटितः -ता -तं.

DESIGNEDLY, *adv.* इच्छातस्, मत्वातस्, कामतस्, प्रकामं, यथाकामं, मतिपूर्व्वकं, बुद्धिपूर्व्वं, बुद्धिपुरःसरं, मनोपूर्व्वकं, मत्वा, बुद्ध्या, तात्पर्य्यतस्, यथाकल्पं.

DESIGNER, *s.* (Contriver) चिन्तकः, उपायचिन्तकः, परिकल्पकः, व्यवसायी *m.* (न्).—(Drawer) आलेखकः, संस्कारलेखकः, सूत्रपातकः.

DESIGNING, *a.* विदग्धः -ग्धा -ग्धं, छली -लिनी -लि (न्), मायी -यिनी -यि (न्), कापटिकः -की -कं, वञ्चनशीलः -ली -लं, प्रतारकः -का -कं, सव्याजः -जा -जं.

DESIGNLESS, *a.* अभिप्रायहीनः -ना -नं, निरर्थकः -का -कं, निष्प्रयोजनः -ना -नं.

DESIGNMENT, *s.* अभिप्रायः, चिकीर्षा, आशयः, अर्थः, अर्थवत्ता, अर्थत्वं, अभिसन्धिः *m.*

DESIRABLE, *a.* स्पृहणीयः -या -यं, स्पृह्यः -ह्या -ह्यं, अभिलषणीयः -या -यं, वाञ्छनीयः -या -यं, कमनीयः -या -यं, काम्यः -म्या -म्यं, लोभ्यः -भ्या -भ्यं, आकांक्षणीयः -या -यं, रमणीयः -या -यं, प्रार्थनीयः -या -यं, अपेक्षणीयः -या -यं, गम्यः -म्या -म्यं; 'a desirable gift,' काम्यदानं.

DESIRABLENESS, *s.* स्पृहणीयता, वाञ्छनीयत्वं, कमनीयता, काम्यत्वं, इष्टत्वं.

DESIRE, *s.* इच्छा, अभिलाषः, अभिलषितं, स्पृहा, वाञ्छा, ईहा, कामः, कामना, कांक्षा, आकांक्षा, अभिकांक्षा, मनोरथः, अभिमतं, समीहितं, लोभः, आशा, तृषा, तृष्णा, इष्टार्थं, इष्टिः *f.*, इष्टं, अभीष्टं, छन्दः *n.* (स्), छन्दं, रुचिः *f.*, अभिरुचिः *f.*, मनस्कामना, मनोभिमतं, अभीप्सा, लिप्सा, औत्सुक्यं, औत्कण्ठ्यं, वशः, लालसा, कौतूहलं, कामिः *f.*, वसारं; 'one's desire,' स्वेच्छा; 'according to one's desire,' स्वेच्छातस्, स्वेच्छया, स्ववाञ्छया, स्वरुच्या, यथेष्टं, यथाभिमतं, स्वच्छन्दं. OBS. The noun formed from the desid. base often expresses 'desire'; as, 'desire to drink,' पिपासा; 'desire to burn,' दिधक्षा.

To DESIRE, *v. a.* इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, संवाञ्छ्; कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, अनुकांक्ष्, अभिकांक्ष्; स्पृह् (c. 10. स्पृहयति -यितुं), कम् (c. 10. कामयते -यितुं), ईह् (c. 1. ईहते -हितुं), समीह्, लुभ् (c. 4. लुभ्यति, लोब्धुं), अभिरुच् in caus. (-रोचयति -यितुं), आप् in des. (ईप्सति -प्सितुं), अभ्याप्, पर्याप्; लभ् in des. (लिप्सते -प्सितुं), अभिलभ्; आशंस् (c. 1. -शंसते -सितुं), गृध् (c. 4. गृध्यति, गर्धितुं), वश् (c. 2. वष्टि, वशितुं).—(Ask, beg for) अर्थ् (c. 10. अर्थयते -ति -यितुं), प्रार्थ्, याच् (c. 1. याचति -चितुं), वृ (c. 9. वृणीते, वरितुं -रीतुं) with 2 acc., निविद् in caus. (-वेदयति -यितुं).

DESIRED, *p. p.* इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, अभिलषितः -ता -तं, वाञ्छितः -ता -तं, कांक्षितः -ता -तं, आकांक्षितः -ता -तं, अभिकांक्षितः -ता -तं, अभिमतः -ता -तं, ईहितः -ता -तं, समीहितः -ता -तं, ईप्सितः -ता -तं, अभीप्सितः -ता -तं, लिप्सितः -ता -तं, सञ्जल्पितः -ता -तं, हृद्यः -द्या -द्यं.

DESIROUS, *a.* इच्छुः -च्छुः -च्छु, इच्छुकः -का -कं, इच्छकः -का -कं, इच्छावान् -वती -वत् (त्), इच्छान्वितः -ता -तं, अभिलाषी -षिणी -षि (न्) -युक्तः -का -कं, वाञ्छी -ञ्छिनी -ञ्छि (न्), आकांक्षी -क्षिणी -क्षि (न्) or अभिकांक्षी, एषी -षिणी -षि (न्), अर्थी -र्थिनी -र्थि (न्), कामी -मिनी -मि (न्), कामुकः -का -कं, कामवान् -वती -वत् (त्), कामयानः -ना -नं, लोभी -भिनी -भि (न्), लुब्धः -ब्धा -ब्धं, स्पृहयालुः -लुः -लु, जातस्पृहः -हा -हं, सस्पृहः -हा -हं, साकांक्षः -क्षा -क्षं, ईप्सुः -प्सुः -प्सु or अभीप्सुः or प्रेप्सुः or परिप्रेप्सुः, इष्टी -ष्टिनी -ष्टि (न्), लिप्सुः -प्सुः -प्सु, आशंसुः -सुः -सु, आशायुक्तः -क्ता -क्तं, लालसी -सिनी -सि (न्), तृष्णकः -का -कं, कामः -मा -मं. 'Desirous' is sometimes expressed by काम affixed to the infinitive, the final of which is rejected; as, 'desirous to do,' कर्तुकामः -मा -मं; 'desirous to go,' गन्तुकामः -मा -मं; or by the adj. formed from the desid. base; as, 'desirous of drinking,' पिपासुः -सुः -सु; 'desirous of taking,' आदित्सुः -त्सुः -त्सु.

To DESIST, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विनिवृत्; शम् (c. 4. शाम्यति, शमितुं), विगम् (c. 1. -गच्छति -गन्तुं), विच्छिद् in pass. (-च्छिद्यते), विश्रम् (c. 4. -श्राम्यति -श्रमितुं), अपया (c. 2. -याति -तुं); 'he desists from wickedness,' पापाद् विरमति or निवर्त्तते.

DESISTANCE, *s.* विरतिः *f.*, विरामः, निवृत्तिः *f.*, निवर्त्तनं, निर्वृत्तिः *f.*, उपशमः.

DESISTED, *p. p.* निवृत्तः -त्ता -त्तं, विरतः -ता -तं, उपरतः -ता -तं, शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, विगतः -ता -तं, विच्छिन्नः -न्ना -न्नं.

DESK, *s.* लिखनफलकं, लिपिफलकं, लिपिसज्जाधारः, लेखसाधनाधारः.

DESOLATE, *a.* (Solitary, uninhabited) शून्यः -न्या -न्यं, शून्याकारः -रा -रं, विविक्तः -क्ता -क्तं, निर्जनः -ना -नं, निर्मनुष्यः -ष्या -ष्यं, पुरुषवर्जितः -ता -तं, अप्रजः -जा -जं, विलोकः -की -कं, निःशलाकः -का -कं, निरालयः -या -यं, वसतिहीनः -ना -नं.—(Laid waste) उच्छिन्नः -न्ना -न्नं, प्रबाधितः -ता -तं, उपपीडितः -ता -तं.

To DESOLATE, *v. a.* उपपीड् (c. 10. -पीडयति -यितुं), प्रबाध् (c. 1. -बाधते -धितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), शून्यीकृ, निर्जनीकृ, निर्दह् (c. 1. -दहति -दग्धुं), वसती नश् in caus. (नाशयति -यितुं).

DESOLATION, *s.* (Destruction of inhabitants) शून्यीकरणं, निर्जनीकरणं, वसतिनाशः, उच्छेदः, उपपीडनं.—(State of destitution) शून्यता, निर्जनत्वं, विविक्तता, रहितत्वं, विषादः, विषण्णता.

DESPAIR, *s.* निराशा, नैराश्यं, आशाहीनता, दौर्मनस्यं, वैक्लव्यं, विषादः; 'in despair,' त्यक्ताशः, आशाहीनः, गताशः.

To DESPAIR, *v. n.* आशां हा (c. 3. जहाति, हातुं) or त्यज्, आशया हा in pass. (हीयते), नैराश्यम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम्; निराशीभू, सङ्कुट् (c. 6. -कुटति -टितुं).

DESPAIRINGLY, *adv.* आशां विना, आशया विना, सनैराश्यं, नैराश्यात्.

To DESPATCH, *v. a.* (Send away hastily) सत्वरं प्रस्था in caus. (-स्थापयति -यितुं) or प्रेर् (c. 10. -ईरयति -यितुं) or प्रेष् in caus. (प्रेषयति -यितुं, rt. इष्), सम्प्रेष्, परिप्रेष्, or प्रहि (c. 5. -हिणोति -हेतुं) or प्रया in caus. (-यापयति -यितुं) or चुद् (c. 10. चोदयति -यितुं), or प्रणुद् (c. 6. -णुदति -णोत्तुं).—(Hasten, perform quickly) त्वर् in caus. (त्वरयति -यितुं), सन्त्वर्; त्वरितं कृ or सम्पद् in caus. (-पादयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं).—(Kill) व्यापद् in caus. (-पादयति -यितुं), लोकान्तरं प्राप् in caus. (-आपयति -यितुं) or प्रेर्.

DESPATCH, *s.* (Hasty execution) क्षिप्रकारित्वं, शीघ्रनिर्वाहः, त्वरा, तूर्णिः *f.*, आवेगः, अदीर्घसूत्रता.—(Official message) वाचिकं, वाचिकपत्रं, राजकीयपत्रं, राजलेखः -लेख्यं.—(Hasty messenger) धावकः, वेगी *m.* (न्), प्रजवी *m.* (न्), लेखहारी *m.* (न्), वार्त्ताहरः, दूतः.

DESPATCHED, *p. p.* (Sent) प्रस्थापितः -ता -तं, प्रेरितः -ता -तं, प्रेषितः -ता -तं, प्रहितः -ता -तं, प्रयापितः -ता -तं, दूतः -ता -तं, प्रतिसृष्टः -ष्टा -ष्टं, नुन्नः -न्ना -न्नं, प्रणुन्नः -न्ना -न्नं, गमितः -ता -तं, प्रतिक्षिप्तः -प्ता -प्तं.

DESPATCHFUL, *a.* शीघ्रकारी -रिणी -रि (न्) or क्षिप्रकारी, अविलम्बी -म्बिनी -म्बि (न्), अदीर्घसूत्रः -त्रा -त्रं, त्वरायुक्तः -क्ता -क्तं, त्वराशीलः -ला -लं.

DESPERADO, *s.* साहसी *m.* (न्), साहसिकः, अत्याहितकर्म्मा *m.* (न्), आततायी *m.* (न्).

DESPERATE, *a.* (Without hope) निराशः -शा -शं, आशाहीनः -ना -नं, आशारहितः -ता -तं, गताशः -शा -शं, त्यक्ताशः -शा -शं, निःप्रत्याशः -शा -शं.—(Daring) साहसिकः -की -कं -का -सिनी -सि (न्).—(Fearless) निर्भयः -या -यं, अकुतोभयः -या -यं.—(Irretrievable) निरुपायी -यिनी -यि (न्), अप्रतीकारः -रा -रं or अशक्यप्रतिकारः.—(Furious) उग्रः -ग्रा -ग्रं, संरब्धः -ब्धा -ब्धं.—(Excessive) अत्यन्तः -न्ता -न्तं, अति or सु prefixed; 'a desperate fool,' अतिमूढः, 'a desperate act,' अत्याहितं, साहसकर्म्म, आततायिता.

DESPERATELY, *adv.* (Furiously) उन्मत्तवत्, साहसेन -सात्, उग्रं, संरब्धं.—(In a great degree) सु or अति prefixed: अत्यन्तं, भृशं, तीव्रं.

DESPERATENESS, *s.* (Fury, daringness) उन्मादः, संरम्भः, उग्रत्वं, साहसिकत्वं.

DESPERATION, *s.* नैराश्यं, आशाहीनता, आशारहित्यं, निराशा.

DESPICABLE, *a.* अवमाननीयः -या -यं, अवमान्यः -न्या -न्यं or अपमान्यः, अवमन्तव्यः -व्या -व्यं, अवज्ञेयः -या -यं, अवज्ञातव्यः -व्या -व्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, गर्हितः -ता -तं, अवगर्हितः -ता -तं, अतिगर्हितः -ता -तं, निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, दूष्यः -ष्या -ष्यं, तुच्छः -च्छा -च्छं, कुत्सितः -ता -तं, क्षुद्रः -द्रा -द्रं, अपकृष्टः -ष्टा -ष्टं.

DESPICABLENESS, *s.* अवमान्यता, गर्ह्यत्वं, निन्द्यता, तुच्छत्वं, दूष्यता.

DESPICABLY, *adv.* गर्हणीयं, गर्हितं, कुत्सितं, अपकृष्टं, तुच्छं.

To DESPISE, *v. a.* अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), तृणाय मन्, अभ्यवमन्, परिमन्, गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, कुत्स् (c. 10. कुत्सयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), परिभू (c. 1. -भवति -वितुं), अवधीर् (c. 10. अवधीरयति -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवध्यै (c. 1. -ध्यायति -ध्यातुं), बाध् in des. (बीभत्सते -त्सितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

कदर्थ (c. 10. -र्थयते -यितुं), कदर्थीकृ, तुच्छीकृ, लघूकृ.

DESPISED, *p. p.* अवमतः -ता -तं, अवमानितः -ता -तं, विमानितः -ता -तं, अपमानितः -ता -तं, अवज्ञातः -ता -तं, परिभूतः -ता -तं, गर्हितः -ता -तं, विगर्हितः -ता -तं, अवधीरितः -ता -तं, कदर्थितः -ता -तं, अवध्यातः -ता -तं, निन्दितः -ता -तं, उपेक्षितः -ता -तं, अवगणितः -ता -तं.

DESPISER, *s.* अवमन्ता *m.* (न्तृ), अवज्ञाता *m.* (तृ), अवमानकर्त्ता *m.* (र्त्तृ), निन्दकः.

DESPITE, *s.* (Malice) द्वेषः, द्रोहः, मात्सर्य्यं, ईर्षा, अभ्यसूया, दुर्बुद्धिः *f.*, नृशंस्यं, दौर्जन्यं, दंशः.—(Opposition) प्रतिरोधः, विरोधः, प्रतियोगः, प्रतिकारः, प्रतिकूलता; 'in despite,' अनिच्छया, विरुद्धं, प्रातिकूल्येन, or expressed by the gen. c. of the pres. part. of the root दृश् 'to see,' or मिष्; 'in despite of thee,' पश्यतस् तव; 'in despite of the princes,' मिषतां पार्थिवानां.

To DESPITE, *v. a.* कुप् in caus. (कोपयति -यितुं), रुष् in caus. (रोषयति -यितुं), तप् in caus. (तापयति -यितुं), सन्तप्; क्लिश् (c. 9. क्लिश्नाति, क्लेशुं), व्यथ् in caus. (व्यथयति -यितुं), दुःख (c. 10. दुःखयति -यितुं).

DESPITEFUL, *a.* द्रोही -हिणी -हि (न्), द्रोहबुद्धिः -द्धिः -द्धि or दुर्बुद्धिः, ईर्षी -र्षिणी -र्षि (न्), सासूयः -या -यं, विषहृदयः -या -यं, नृशंसः -सा -सं, मत्सरः -रा -रं, द्वेषी -षिणी -षि (न्), अहितेच्छुः -च्छुः -च्छु, हिंसाशीलः -ला -लं.

DESPITEFULLY, *adv.* सद्रोहं, सद्वेषं, हिंसापूर्व्वं, नृशंसं, साभ्यसूयं.

DESPITEFULNESS, *s.* द्रोहः, द्वेषः, मात्सर्य्यं, नृशंस्यं, दंशः, दौर्जन्यं.

To DESPOIL, *v. a.* हृ (c. 1. हरति, हर्त्तुं), अपहृ, विमुष् (c. 6. -मुष्णति -मोष्टुं), वियुज् in caus. (-योजयति -यितुं), विप्रयुज् with inst. c.; 'despoil of leaves,' निष्पत्रीकृ.

DESPOILED, *p. p.* हृतः -ता -तं, अपहृतः -ता -तं, वियुक्तः -क्ता -क्तं, वियोजितः -ता -तं; 'despoiled of all possessions,' हृतसर्व्वस्वः -स्वा -स्वं.

DESPOILER, *s.* हर्त्ता *m.* (र्त्तृ), हारकः, अपहारकः, अपहारकृत्, लुण्टाकः.

DESPOLIATION, *s.* हरणं, अपहरणं, अभिहारः, अभ्याहारः, अभिग्रहणं.

To DESPOND, *v. n.* विषद् (c. 1. -षीदति -षत्तुं), अवसद्; निर्वेदं or विषादं or नैराश्यम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम्; आशां हा (c. 3. जहाति, हातुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), निर्विणीभू, निर्विद् (c. 4. -विद्यते -वेत्तुं), सङ्कुट् (c. 6. -कुटति -टितुं).

DESPONDENCY, *s.* विषादः, निर्वेदः, विषण्णता, निर्विण्णता, नैराश्यं, निराशा, अवसन्नता, उद्वेगः, दौर्मनस्यं, ग्लानिः *f.*, क्लान्तिः *f.*

DESPONDENT, *a.* विषण्णः -ण्णा -ण्णं, विषादी -दिनी -दि (न्), निर्विण्णः -ण्णा -ण्णं, निराशः -शा -शं, आशाहीनः -ना -नं, त्यक्ताशः -शा -शं, अवसन्नः -न्ना -न्नं, उद्विग्नमनाः -नाः -नः (स्) or दुर्मनाः or अन्तर्मनाः, ग्लानः -ना -नं.

DESPONDINGLY, *adv.* सनिर्वेदं, सविषादं, निर्वेदात्, सनैराश्यं.

To DESPONSATE, *v. a.* वाग्दत्तां कृ, वाग्दानेन विवाहार्थं प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), कन्यां प्रदा, प्रतिज्ञाविवाहितां कृ.

DESPONSATION, *s.* वाग्दानं, कन्याप्रदानं, विवाहार्थं प्रतिज्ञानं.

DESPOT, *s.* सम्राट् *m.* (ज्), अधिराजः, चक्रवर्त्ती *m.* (न्), सर्व्वेश्वरः, राजाधिराजः, एकराजः, स्वाधीनराजः, स्वयम्प्रभुः.

DESPOTIC, DESPOTICAL, *a.* अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं, अधिराजकः -का -कं, स्वयम्प्रभुः -भुः -भु, साधानिकः -की -कं, स्वयम्प्रभुत्वकारी -रिणी -रि (न्).

DESPOTICALLY, *adv.* अधिराजवत्, अनायत्तं, स्वेच्छातस्, स्वकामतस्, स्वच्छन्दं.

DESPOTISM, *s.* साम्राज्यं, अधिराज्यं, ऐकपत्यं, स्वेच्छाप्रभुत्वं, अनधीनत्वं.

To DESPUMATE, *v. n.* फेन (nom. फेनायते), उत्सेचनं कृ, मण्ड (nom. मण्डायते).

DESPUMATION, *s.* फेनोत्सेचनं, मण्डोत्सेचनं, उत्सेचनं, उत्पीडः.

DESQUAMATION, *s.* त्वक्परिपुटनं, अस्थिपरिपुटनं, अभ्यस्थिपरिपुटनं.

DESSERT, *s.* भोजनान्ते परिवेशितं फलमोदकादिखाद्यं, फलाहारः.

DESTINATION, *s.* (Purpose for which any thing is intended) अर्थः, अर्थत्वं, प्रयोगः, उपयोगः, प्रयोजनं, उद्देशः, आशयः, अभिप्रायः, तात्पर्य्यं.—(Place of destination) अग्रभूमिः *f.*, अग्रस्थानं, अर्थं, निरूपितस्थानं.

To DESTINE or DESTINATE, *v. a.* निरूप् (c. 10. -रूपयति -यितुं), प्रक्लृप् (c. 10. -कल्पयति -यितुं), परिक्लृप्, निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रदिश्, समादिश्; नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), प्रयुज्, उपयुज्, विनियुज्, प्रस्था in caus. (-स्थापयति -यितुं), अभिसन्धा (c. 3. -दधाति -धातुं).

DESTINED, *p. p.* निरूपितः -ता -तं, परिकल्पितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

DESTINY, *s.* दैवं, भाग्यं, भागधेयं, कृतान्तः, विधिः *m.*, विधाता *m.* (तृ), भवितव्यता, दैविकं, अदृष्टं, नियतिः *f.*, कालनियोगः, कालधर्म्मः, दिष्टं, प्राक्तनं.

DESTITUTE, *a.* (Poor, abject, friendless) निर्धनः -ना -नं, अर्थहीनः -ना -नं, निष्किञ्चनः -ना -नं, अकिञ्चनः -ना -नं, दुर्गतः -ता -तं, निःस्वः -स्वा -स्वं, निराश्रयः -या -यं, अनाश्रयः -या -यं, अशरणः -णा -णं, बन्धुहीनः -ना -नं.—(Deprived of, in want of) हीनः -ना -नं, विहीनः -ना -नं, परिहीणः -णा -णं, रहितः -ता -तं, विरहितः -ता -तं, वर्जितः -ता -तं, विवर्जितः -ता -तं, शून्यः -न्या -न्यं, विनाकृतः -ता -तं, वियुक्तः -क्ता -क्तं, लुप्तः -प्ता -प्तं, हृतः -ता -तं, अपेतः -ता -तं; 'destitute of fruit,' फलहीनः -ना -नं or फलरहितः -ता -तं or फलापेतः -ता -तं or हृतफलः -ला -लं; 'destitute of means,' असाधनः -ना -नं.

DESTITUTION, *s.* (State of being deprived) हीनत्वं, रहितत्वं, शून्यता.—(Absence of a thing) अभावः, असम्भवः, विरहः.—(Want of money, &c., poverty) धनाभावः, वर्त्तनाभावः, निष्किञ्चनत्वं, अकिञ्चनं, दारिद्र्यं, बन्धुहीनता, असहायता, अभूमिः *f.*

To DESTROY, *v. a.* (Put an end to, ruin) नश् in caus. (नाशयति -यितुं), विनश्, प्रणश्; साध् in caus. (साधयति -यितुं), संसाध्; क्षि (c. 5. क्षिणोति, क्षेतुं or caus. क्षययति, क्षपयति -यितुं), सद् in caus. (सादयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं or caus. लोपयति -यितुं), विलुप्; ध्वंस् in caus. (ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्; उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), निर्दह् (c. 1. -दहति -दग्धुं), ग्रस् (c. 1. ग्रसते -सितुं).—(Kill) हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं), व्यापद् in caus. (-पादयति -यितुं), मृ in caus. (मारयति -यितुं), सूद् (c. 10. सूदयति -यितुं), अभिसूद्, निसूद्, विनिसूद्, प्रतिसूद्; शद् in caus. (शातयति -यितुं), प्रमी in caus. (-मापयति -यितुं), क्षण् (c. 8. क्षणोति -णितुं).

DESTROYED, *p. p.* नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः -ता -तं, प्रणष्टः -ष्टा -ष्टं, सादितः -ता -तं, सूदितः -ता -तं, हतः -ता -तं, घातितः -ता -तं, ध्वंसितः -ता -तं, उच्छिन्नः -न्ना -न्नं, भग्नः -ग्ना -ग्नं, व्यापादितः -ता -तं.

DESTROYER, *s.* विनाशकः, नाशी *m.* (न्), नाशकारी *m.* (न्), विनाशकारी, हन्ता *m.* (न्तृ), निहन्ता, घाती *m.* (न्), क्षयकरः, अन्तकः, अन्तकृत्, ध्वंसकः, ध्वंसकारी *m.* (न्), प्रलयकर्त्ता *m.* (र्त्तृ), सूदनः, अपहः; 'destroying angel,' कृतान्तः.

DESTRUCTIBLE, *a.* नाशनीयः -या -यं, नाश्यः -श्या -श्यं, विनश्वरः -रा -रं, ध्वंसनीयः -या -यं, अवसेयः -या -यं, क्षयी -यिणी -यि (न्).

DESTRUCTION, *s.* नाशः, विनाशः, विनष्टिः *f.*, प्रणाशः, क्षयः, ध्वंसः, प्रध्वंसः, सादनं, सूदनं, प्रलयः, संहारः, अपायः, अत्ययः, विलोपनं, लोपः, समुच्छेदः, उद्दलनं, उत्पाटनं, वैशसं.—(Murder) घातः -तनं, मारणं, वधः, निहननं, प्रमापणं.—(Of the world) प्रलयः, कल्पान्तः, जहानकः, जिहानकः, संवर्त्तः, क्षयः.

Destructive, *a.* नाशी -शिनी -शि (न्) or प्रणाशी, विनाशकः -का -कं, क्षयकरः -री -रं, घाती -तिनी -ति (न्) or विघाती, घातुकः -का -कं, प्रध्वंसी -सिनी -सि (न्) or परिध्वंसी, अन्तकरः -री -रं, सूदनः -नी -नं, प्रमापी -पिणी -पि (न्), आत्ययिकः -की -कं, निधनकारी -रिणी -रि(न्), नाश्यः -श्या -श्यं, प्राणहरः -रा -रं, अपकारकः -का -कं, पांसनः -ना -नं, अभिमर्शनः -ना -नं, क्रूरः -रा -रं, अपहः -हा -हं or हः हा हं or घ्नः घ्ना घ्नं in comp.

Destructively, *adv.* सनाशं, विनाशेन, विनाशकप्रकारेण, आत्ययिकं.

Destructiveness, *s.* नाशकत्वं, नाशित्वं, घातुकत्वं, अपकारकता.

Desuetude, *s.* विरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, निर्वृत्तिः, निवर्त्तनं, विच्छेदः.

Desultory, *a.* चञ्चलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, तरलः -ला -लं, चपलः -ला -लं, सङ्कसुकः -का -कं, अधीरः -रा -रं, उच्छृङ्खलः -ला -लं.

To **detach**, *v. a.* (Separate) भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, वियुज् (c. 7. -युनक्ति -योक्तुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवच्छिद्, विक्षिप् in caus. (-क्षेपयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), पृथक्कृ.—(Send out a party from the main army) सर्व्वसैन्यमध्यात् कतिपयसैन्यान् डमरकरणार्थं प्रस्था in caus. (-स्थापयति -यितुं).

Detached, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विनियुक्तः -क्ता -क्तं, भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विच्छिन्नः -न्ना -न्नं, अवच्छिन्नः -न्ना -न्नं, विश्लिष्टः -ष्टा -ष्टं, असंलग्नः -ग्ना -ग्नं, असंसक्तः -क्ता -क्तं, असक्तः -क्ता -क्तं, व्यासक्तः -क्ता -क्तं, गतसङ्गः -ङ्गा -ङ्गं, निर्युक्तिकः -का -कं.

Detachment, *s.* (Act of detaching) वियोगः, विप्रयोगः, विभेदः, विच्छेदः, अवच्छेदः, विश्लेषः, व्यासङ्गः, अनभिष्वङ्गः.—(Body of troops sent out for petty warfare) डमरकरणार्थं प्रस्थापितः सैन्यगुल्मः, सैन्यदलं.

Detail, *s.* विवरणं, विस्तारः, विस्तरः, वाग्विस्तारः, उपवर्णः -र्णनं, वृत्तान्तविवरणं, सर्व्ववृत्तान्तव्याख्या; 'in detail,' विस्तरेण, विस्तरशस्, सुविस्तरं, उपवर्णेन, विभागशस्.

To **detail**, *v. a.* सुविस्तरेण कथ् (c. 10. कथयति -यितुं) or आख्या (c. 2. -ख्याति -तुं), सर्व्ववृत्तान्तं विवृ (c. 5. -वृणोति -वरितुं -रीतुं) or व्याख्या; उपवर्ण् (c. 10. -वर्णयति -यितुं), वृत्तान्तविवरणं कृ.

Detailed, *p. p.* and *a.* उपवर्णितः -ता -तं, सविस्तरः -रा -रं, विस्तीर्णः -र्णा -र्णं.

To **detain**, *v. a.* (Keep what belongs to another) परद्रव्यं धृ (c. 1. धरति, धर्त्तुं or caus. धारयति -यितुं) or सन्धृ or परिभुज् (c. 7. -भुंक्ते -भोक्तुं).—(Keep back, withhold) निवृ in caus. (-वारयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विधृ in caus., उपसंहृ (c. 1. -हरति -हर्त्तुं) संहृ.—(Restrain from departure) धृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं) अवरुध्.—(Hold in confinement) कारायां निरुध् or आसिध् (c. 1. -सेधति -सेद्धुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं).

Detained, *p. p.* धृतः -ता -तं, निरुद्धः -द्धा -द्धं, निवारितः -ता -तं.

Detainer, *s.* धारकः, धर्त्ता *m.* (र्त्तृ), परिभोक्ता *m.* (क्तृ), निरोधकः.

To **detect**, *v. a.* ज्ञा (c. 9. जानाति, ज्ञातुं), विज्ञा, परिज्ञा, अभिज्ञा, निरूप् (c. 10. -रूपयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), उपलभ् (c. 1. -लभते -लब्धुं), अवगम् (c. 1. -गच्छति -गन्तुं), अधिगम्, अभ्यागम्, धृ (c. 1. धरति, धर्त्तुं), आसद् (c. 10. -सादयति -यितुं), प्रोत्सद्, अनुसन्धा (c. 3. -दधाति -धातुं), व्यञ्ज् in caus. (-अञ्जयति -यितुं), व्यक्तीकृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं).

Detected, *p. p.* ज्ञातः -ता -तं, विज्ञातः -ता -तं, अभिज्ञातः -ता -तं, अवगतः -ता -तं, निरूपितः -ता -तं, धृतः -ता -तं, निर्णीतः -ता -तं, व्यञ्जितः -ता -तं, व्यक्तीकृतः -ता -तं; 'in a crime,' दृष्टदोषः -षा -षं.

Detection, *s.* ज्ञानं, परिज्ञानं, विज्ञानं, निरूपणं, निर्णयः, धरणं, अवगमः, अनुसन्धानं, व्यक्तीकरणं, विवृतिः *f.*

Detention, *s.* धरणं, धारणं, सन्धारणं, निग्रहः, निवारणं, संहरणं, संरोधः, अमुक्तिः *f.*, अमोक्षः.—(Confinement) रोधः, निरोधः -धनं, आसेधः, स्थानासेधः, सम्प्रतिरोधकः.—(Forcible detention of a debtor) बलात्कारः.

To **deter**, *v. a.* भयहेतुं दर्शयित्वा निवृत् in caus. (-वर्त्तयति -यितुं) or निर्वृत् in caus., or विरम् in caus. (-रमयति -यितुं) or निवृ in caus. (-वारयति -यितुं), विभी in caus. (-भाययति -यितुं), अवभर्त्स् in caus. (-भर्त्सयति -ते -यितुं).

To **deterge**, *v. a.* मलम् अपमृज् (c. 1. -मार्जति, c. 2. -मार्ष्टि -र्ष्टुं), परिमृज्, परिष्कृ.

Detergent, *a.* परिमार्ज्जकः -का -कं, परिमार्ष्णुः -ष्णुः -ष्णु, शोधकः -का -कं.

To **deteriorate**, *v. n.* क्षि in pass. (क्षीयते), ह्रस् (c. 1. ह्रसते -सितुं), दुष् (c. 4. दुष्यति, दोष्टुं), भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), विकृतीभू, अन्यथाभू, विकलीभू.

To **deteriorate**, *v. a.* दुष् in caus. (दूषयति -यितुं), विकलीकृ, विकृ, अपकृष् (c. 1. -कर्षति -क्रष्टुं), ह्रस् in caus. (ह्रासयति -यितुं).

Deteriorated, *p. p.* क्षीणः -णा -णं, परिभ्रष्टः -ष्टा -ष्टं, विकलः -ला -लं.

Deterioration, *s.* (Growing worse) विकारः, विकृतिः *f.*, ह्रासः, अपचयः, क्षयः, क्षीणता, भ्रष्टता, दुष्टता, अधोगतिः *f.*, अन्यथाभावः.—(Making worse) अपकर्षः -र्षणं, विकलीकरणं.

Determent, *s.* निवर्त्तनं, निवृत्तिः *f.*, उद्योगभङ्गः, उद्यमव्याघातः, विघ्नः.

Determinable, *a.* निर्णेयः -या -यं, विवेचनीयः -या -यं, निर्धारणीयः -या -यं, निर्धार्य्यः -र्य्या -र्य्यं, अवधारणीयः -या -यं, अवधार्य्यः -र्य्या -र्य्यं.

Determinate, *a.* (Settled, definite) निश्चितः -ता -तं, निर्णीतः -ता -तं, नियतः -ता -तं, निर्धारितः -ता -तं, सिद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, निर्दिष्टः -ष्टा -ष्टं, व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं.—(Decisive) निश्चायकः -का -कं, निर्णायकः -का -कं.—(Resolved) व्यवसितः -ता -तं, कृतनिश्चयः -या -यं.

Determinately, *adv.* निश्चितं, सनिश्चयं, सनिर्णयं, निर्णयपूर्व्वं, सङ्कल्पपूर्व्वं.

Determination, *s.* निश्चयः, निर्णयः, सङ्कल्पः, व्यवसायः, कल्पः, सम्प्रधारणा, निर्धारणं, अवधारणं, सिद्धिः *f.*, निष्पत्तिः *f.*, व्यवस्थितिः *f.*, विचारः, विवेचना; 'firm determination,' दृढनिश्चयः.—(Persevering direction to an end) अभिनिवेशः, निर्बन्धः, अध्यवसायः.

Determinative, *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निर्धारकः -का -कं.

To **determine**, *v. a.* (Fix, settle) स्था in caus. (स्थापयति -यितुं), अवस्था, व्यवस्था; सिध् in caus. (साधयति -यितुं), स्थिरीकृ, सिद्धीकृ, परिकॢप् (c. 10. -कल्पयति -यितुं).—(Decide) निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -णयति -णेतुं), विचर् in caus. (-चारयति -यितुं).—(Resolve) व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, सङ्कॢप्, मनो निविश् in caus. (-वेशयति -यितुं).—(Ascertain) निरूप् in caus. (-रूपयति -यितुं), अवधृ in caus. (-धारयति -यितुं), सम्प्रधृ, निर्धृ.—(Define) निर्दिश् (c. 6. -दिशति -देष्टुं), लक्ष् (c. 10. लक्षयति -यितुं).—(Confine) परिमा (c. 2. -माति -तुं).—(Direct, influence the choice) उद्दिश्; प्रेर् in caus. (-ईरयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं).

To **determine**, *v. n.* (Come to a decision) निश्चयं कृ, निर्णयं कृ, सङ्कल्पं कृ.—(End, come to a conclusion) सिध् in pass. (सिध्यते or c. 4. सिध्यति), सम्पद् (c. 4. -पद्यते -पत्तुं), अवसो (c. 4. -स्यति -सातुं), व्यवसो; 'I am determined to do that,' तत् कर्त्तुं व्यवसितोऽस्मि.

Determined, *p. p.* निश्चितः -ता -तं, निर्णीतः -ता -तं, कृतनिश्चयः -या -यं,

व्यवसितः -ता -तं, सिद्धः -द्धा -द्धं, व्यवस्थितः -ता -तं, निर्धारितः -ता -तं, अवधारितः -ता -तं, नियतः -ता -तं, प्रयतितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, विचारितः -ता -तं, सङ्कल्पितः -ता -तं.—(Resolute) साङ्कल्पिकः -की -कं, व्यवसायी -यिनी -यि (न्), सुस्थिरः -रा -रं, स्थिरमतिः -तिः -ति, अभिनिविष्टः -ष्टा -ष्टं; 'determined to sacrifice life,' प्राणांस् त्यक्तुं सुनिश्चितः or व्यवसितः.

DETERMINEDLY, *adv.* सुस्थिरं, स्थिरचेतसा, सुनिश्चितं, बुद्धिपुरःसरं, बुद्ध्या.

DETERMINER, *s.* निर्णेता *m.* (तृ), निश्चयकारी *m.* (न्), सङ्कल्पकृत्.

DETERSIVE, *a.* अपमार्जकः -का -कं, शोधकः -का -कं, परिष्कारकः -का -कं.

To DETEST, *v. a.* द्विष् (c. 2. द्वेष्टि -ष्टुं), प्रद्विष्, विद्विष्, गर्ह् (c. 1. गर्हते -र्हितुं), द्रुह् (c. 4. द्रुह्यति, द्रोहितुं, द्रोग्धुं), अभिद्रुह्, बाध् in des. (बीभत्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं).

DETESTABLE, *a.* द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, घृणार्हः -र्हा -र्हं, अक्षिगतः -ता -तं.

DETESTABLY, *adv.* गर्हणीयं, गर्हितं, द्वेषणीयं, विद्विष्टं, घृणार्हं.

DETESTATION, *s.* द्वेषः, विद्वेषः, विद्विष्टता, गर्हा -र्हणं, बीभत्सः, घृणा.

DETESTED, *p. p.* द्विष्टः -ष्टा -ष्टं, विद्विष्टः -ष्टा -ष्टं, गर्हितः -ता -तं, घृणितः -ता -तं, ख्यातगर्हणः -णा -णं, अवगीतः -ता -तं.

DETESTER, *s.* द्वेषी *m.* (न्), विद्वेषी *m.*, विद्वेष्टा *m.* (ष्टृ), गर्हाकारी *m.* (न्).

To DETHRONE, *v. a.* राज्यात् or सिंहासनात् पत् in caus. (पातयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or भ्रंश् in caus. (भ्रंशयति -यितुं) or उत्पद् in caus. (-पादयति -यितुं)

DETHRONED, *p. p.* राज्यभ्रष्टः -ष्टा -ष्टं, भ्रष्टराज्यः -ज्या -ज्यं, राज्यात्प्रभ्रंशितः -ता -तं, राज्यप्रच्युतः -ता -तं, सिंहासनात्पातितः -ता -तं, राज्यादुत्पाटितः -ता -तं.

DETHRONEMENT, *s.* राज्यभ्रंशः, राज्यात्प्रभ्रंशनं, राज्यात्पातनं, राज्यादुत्पाटनं.

To DETONATE, *v. n.* स्तन् (c. 1. स्तनति -नितुं), स्फूर्ज् (c. 1. स्फूर्जति -र्जितुं), तीक्ष्णशब्दं कृ.

DETONATION, *s.* स्तनितं, स्तननं, स्फूर्जनं, विस्फूर्जितं, तीक्ष्णशब्दः, आस्फोटनशब्दः.

To DETORT, *v. a.* विकृ, साचीकृ, वक्रीकृ, विरूप् (c. 10. -रूपयति -यितुं).

To DETRACT, *v. a.* (Take away from) अपकृष् (c. 1. -कर्षति -क्रष्टुं), व्यपकृष्, अपहृ (c. 1. -हरति -हर्तुं), अपनी (c. 1. -नयति -नेतुं).—(Diminish, lessen the value) अल्पीकृ, न्यूनीकृ, कन (nom. कनयति -यितुं), लघ (nom. लघयति -यितुं), लघूकृ, ह्रस् in caus. (ह्रासयति -यितुं).—(Disparage, calumniate) असूय (nom. असूयति -ते -यितुं), अभ्यसूय, अपवद् (c. 1. -वदति -दितुं), परिवद्; निन्द् (c. 1. निन्दति -न्दितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप्.

DETRACTION, *s.* (Taking away, diminishing) अपकर्षः -र्षणं, अपनयनं, अपहरणं, अल्पीकरणं, न्यूनीकरणं, लघूकरणं, ह्रासः.—(Disparagement, calumny) असूया -यनं, अभ्यसूया, असूयुः *m.*, अपवादः, परिवादः, गुणापवादः, गुणनिन्दा, गुणघातः, परगुणमत्सरः, परदोषवादः, परदोषाभिधानं, दोषाविष्करणं, पिशुनवाक्यं, पैशुन्यं, कौलीनं, विगानं, आक्षेपः, कलङ्कः, वाग्दोषः.

DETRACTOR, *s.* असूयकः, अभ्यसूयकः, अपवादी *m.* (न्), गुणापवादकः, परिवादी *m.* (न्), गुणघाती *m.* (न्), परगुणासहनः, निन्दकः, आक्षेपकः, सूचकः, खलः.

DETRACTORY, DETRACTIVE, *a.* असूयकः -का -कं, अभ्यसूयकः -का -कं, असूकः -का -कं, अपवादकः -का -कं, गुणघाती -तिनी -ति (न्), परिवादी -दिनी -दि (न्), लाघवकारी -रिणी -रि (न्), पिशुनः -ना -नं, कलङ्ककरः -री -रं, अकीर्त्तिकरः -री -रं.

DETRACTRESS, *s.* अपवादिनी, परिवादिनी, अभ्यसूयका, निन्दाकारिणी.

DETRIMENT, *s.* क्षतिः *f.*, अपायः, हानिः *f.*, अपकारः, अपचयः, हिंसा, द्रोहः, अनिष्टं, नाशः, विनाशः, विरोधः, क्षतं, अपकृतं, अपचितिः *f.*, अपहारः, क्षयः, उपक्षयः, दोषः, बाधः, भ्रंशः, ध्वंसः, प्रध्वंसः, व्ययः.

DETRIMENTAL, *a.* अपकारकः -का -कं -री -रिणी -रि (न्), घातुकः -का -कं, उपघातकः -का -कं, हिंस्रः -स्रा -स्रं, हिंसकः -का -कं, विरोधी -धिनी -धि (न्), क्षतिकारकः -का -कं, हानिजनकः -का -कं, द्रोही -हिणी -हि (न्).

To DETRUDE, *v. a.* निपत् in caus. (पातयति -यितुं), अधःपत् in caus. or अधोऽधः पत्, अधःक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधःकृ, प्रभ्रंश् in caus. (-भ्रंशयति -यितुं).

To DETRUNCATE, *v. a.* अवछिद् (c. 7. -छिनत्ति -छेत्तुं), अवकृत् (c. 6. -कृन्तति -कर्त्तितुं).

DETRUNCATION, *s.* छेदः, कर्त्तनं, अवच्छेदः, अवकर्त्तनं, लोपः -पनं.

DETRUSION, *s.* निपातनं, अधःपातनं, अधोऽधःपातनं, अधःक्षेपणं.

DEUCE, *s.* (Two) द्विः, द्वयं, द्विकं.—(Devil) पिशाचः, वेतालः, भूतः.

DEUTERONOMY, *s.* ईश्वरीयव्यवस्थाया द्वितीयविवरणं, मूसालिखितं पञ्चमपुस्तकं.

To DEVASTATE, *v. a.* उपपीड् (c. 10. -पीडयति -यितुं); बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्; उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिमृद् (c. 1. -मर्दति -र्दितुं), अवमृद्, उपप्लु (c. 1. -प्लवते -प्लोतुं), दह् (c. 1. दहति, दग्धुं), निर्दह्.

DEVASTATED, *p. p.* पीडितः -ता -तं, विप्लुतः -ता -तं, उपद्रुतः -ता -तं.

DEVASTATION, *s.* विप्लवः, उपप्लवः, उपपीडनं, पीडनं, उपद्रवः, अवमर्दः, बाधा, प्रबाधा, उच्छेदः, विनाशः, अभिसम्पातः.

To DEVELOP, *v. a.* विवृ (c. 5. -वृणोति -वृणुते -वरितुं -रीतुं), अपावृ; प्रकाश् in caus. (-काशयति -यितुं), विकाश्, प्रकटीकृ, उत्पद् in caus. (-पादयति -यितुं), विस्तृ in caus. (-स्तारयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), विप्रथ् in caus. (-प्रथयति -यितुं), व्याकृ.

DEVELOPED, *p. p.* विवृतः -ता -तं, विकाशितः -ता -तं, उत्पादितः -ता -तं.

DEVELOPMENT, *s.* विवृतिः *f.*, विवरणं, विकाशनं, प्रकाशनं, प्रसारणं, उत्पत्तिः *f.*, उत्पादनं, विस्तृतिः *f.*, विस्तारणं, प्रकटीकरणं, व्याकरणं.

DEVERGENCE, *s.* अधःपतनं, अधोगतिः *f.*, च्युतिः *f.*, भ्रंशः, उत्क्रमः, वक्रता.

To DEVIATE, *v. n.* भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), विभ्रंश्, च्यु (c. 1. च्यवते, च्योतुं), विच्यु, विचल् (c. 1. -चलति -लितुं), उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), व्यभिचर् (c. 1. -चरति -रितुं) all with abl. c., त्यज् (c. 1. त्यजति, त्यक्तुं) with acc. c.

DEVIATED, *p. p.* भ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, विचलितः -ता -तं.

DEVIATION, *s.* भ्रंशः, च्युतिः *f.*, विचलनं, उत्क्रमः, व्यभिचारः, भ्रान्तिः *f.*, भ्रमः, भेदः, विक्रिया, त्यागः.—(From the right way) सत्पथभ्रंशः, सत्पथत्यागः, उत्पथगमनं, विमार्गगमनं, कुपथगमनं, यथोचिताद्भ्रंशः.

DEVICE, *s.* (Contrivance) उपायः, व्यपदेशः, अपदेशः, व्यवसायः, प्रयोगः, कैतवप्रयोगः, प्रयुक्तिः *f.*, युक्तिः *f.*, कल्पना, चेष्टा, साधनं, प्रोत्सादनं, मन्त्रणा, छलं, माया, विधः; 'a good device,' सुयुक्तिः *f.*—(Project) अभिप्रायः, आशयः, चिन्ता.—(Emblem) चिह्नं, अङ्कः, कुलीनपदचिह्नं.

DEVIL, *s.* पिशाचः, भूतः, वेतालः, अपदेवता. *See* DEMON. The translators of the Bible have coined the word शैतान् from the Arabic.

DEVILISH, *a.* पैशाचः -ची -चं -चिकः -की -कं, भौतः -ती -तं -तिकः -की -कं.

DEVILISHLY, *adv.* पिशाचवत्, वेतालवत्.—(Greatly) आधर्यं, भृशं.

DEVIOUS, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, अमर्यादः -दा -दं, उत्क्रान्तमर्यादः -दा -दं, व्यभिचारी -रिणी -रि (न्), अनाचारी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्).

To DEVISE, *v. a.* प्रविचिन्त् (c. 10. -चिन्तयति -यितुं), परिचिन्त्, मनसा क्लृप् (c. 10. कल्पयति -यितुं) or परिक्लृप्, अनुसन्धा (c. 3. -दधाति -धातुं), विधा, घट् (c. 1. घटते -टितुं), मन्त्र् (c. 10. मन्त्रयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), आलोच् (c. 10. -लोचयति -यितुं).—(Grant by will) दानपत्रेण स्वरिक्थं दायादादिभ्यः प्रदा (c. 1. -यच्छति -दातुं) or समृ in caus. (-अर्पयति -यितुं).

To DEVISE, *v. n.* उपायप्रयोगं कृ, उपायचिन्तां कृ, व्यपदेशं कृ.

DEVISE, *s.* (Bequeathing by will) दानपत्रेण दायादिभ्यो रिक्थप्रदानं.

DEVISED, *p. p.* प्रचिन्तितः -ता -तं, घटितः -ता -तं, विहितः -ता -तं, परिकल्पितः -ता -तं; 'well-devised,' सुघटितः -ता -तं.

DEVISEE, *s.* धनहारी *m.* (न्), धनाधिकारी *m.* (न्), अधिकारी, दानपात्रं.

DEVISER, *s.* (Contriver) उपायचिन्तकः, उपायज्ञः, उपेता *m.* (तृ), उपायी *m.* (न्), प्रयोजकः, परिकल्पकः, व्यवसायी *m.* (न्).

DEVISOR, *s.* दानपत्रेण रिक्थप्रदाता *m.* (तृ), सम्प्रदाता *m.*

DEVOID, *a.* (Empty) शून्यः -न्या -न्यं.—(Free from) हीनः -ना -नं, विहीनः -ना -नं, रहितः -ता -तं, विरहितः -ता -तं, शून्यः -न्या -न्यं, वर्जितः -ता -तं, विवर्जितः -ता -तं, उज्झितः -ता -तं, वीतः -ता -तं, गतः -ता -तं, or by निर्, वि and अ prefixed: as, 'devoid of fruit,' फलहीनः -ना -नं, फलरहितः -ता -तं, फलशून्यः -न्या -न्यं, वीतफलः -ला -लं, निष्फलः -ला -लं, विफलः -ला -लं, अफलः -ला -लं.

DEVOIR, *s.* सत्कारः, सत्क्रिया, सत्कृतिः *f.*, आदरकर्म्म *n.* (न्), समादरः, सम्मानं, पूजा, अर्चनं -ना, स्वकर्त्तव्यं, कर्त्तव्यता, व्रतं.

To DEVOLVE, *v. a.* (Roll down) प्रवह् in caus. (-वाहयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), अनुवृत्, प्रपत् in caus. (-पातयति -यितुं).—(Deliver over) न्यस् (c. 4. -अस्यति -असितुं), सन्न्यस्, उपन्यस्, ऋ in caus. (अर्पयति -यितुं), समृ, प्रतिपद् in caus. (-पादयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आरुह् in caus. (-रोपयति -यितुं), संक्रम् in caus. (-क्रामयति -यितुं).

To DEVOLVE, *v. n.* (Fall into new hands, be delivered over) आगम् (c. 1. -गच्छति -गन्तुं), आया (c. 2. -याति -तुं), संक्रम् (c. 1. -क्रमते -मितुं), न्यस् in pass. (-अस्यते), सन्न्यस् in pass., समृ in caus. pass. (-अर्प्यते), न्यस्तः -स्ता -स्तं भू.—(Roll down, fall down) अधो वृत् (c. 1. वर्त्तते -र्त्तितुं), अधो पत्, प्रपत् (c. 1. -पतति -तितुं).

DEVOLUTION, *s.* अधःपतनं, प्रवर्त्तनं, न्यसनं, सन्न्यसनं, आरोपणं.

To DEVOTE, *v. a.* (Appropriate to any use, dedicate, consecrate) विनियुज् (c. 7. -युनक्ति -योक्तुं), प्रयुज्, समृ in caus. (-अर्पयति -यितुं), निविद् in caus. (-वेदयति -यितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), प्रश्री (c. 1. -श्रयति -श्रेतुं), उपक्लृप् (c. 10. -कल्पयति -यितुं), प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), सङ्कल्पं कृत्वा दा or समृ, वितॄ (c. 1. -तरति -रितुं -रीतुं).—(Addict one's self to any thing) आसञ्ज् in pass. (-सज्यते or -सज्जते -सक्तुं) with loc., भज् (c. 1. भजति -ते, भक्तुं), आसेव् (c. 1. -सेवते -वितुं), मनो निविश् in caus. (-वेशयति -यितुं), अनुरञ्ज् in pass. (-रज्यते), समायत् (c. 1. -यतते -तितुं), आसक्तः -क्ता -क्तं भू; 'he is devoted to his wife,' भार्य्यायाम् अनुरज्यते.—(Doom to destruction) नरकं गम्या इति शापं कृ.

DEVOTED, *p. p.* भक्तः -क्ता -क्तं, आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, व्यासक्तः -क्ता -क्तं, सक्तः -क्ता -क्तं, रतः -ता -तं, निरतः -ता -तं, आरूढः -ढा -ढं, आस्थितः -ता -तं, समायत्तः -त्ता -त्तं, दृढभक्तिः -क्तिः -क्ति, भक्तियुक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्); 'devoted to one's master,' प्रभुभक्तः; 'to Krishna,' कृष्णाश्रितः or कृष्णार्पितः; 'a devoted wife,' पतिव्रता, एकपत्नी, पतिसेविनी; 'a devoted husband,' पत्नीसेवी *m.* (न्), भार्य्यानुकूलः; 'a devoted friend,' स्थिरप्रेमा *m.* (न्).

DEVOTEDNESS, *s.* (Dedication, consecration) समर्पणं, उत्सर्गः, निवेदनं, विनियोगः, सङ्कल्पकरणं, प्रतिष्ठा, वितरणं.—(Addiction) भक्तिः *f.*, आसक्तिः *f.*, रक्तिः *f.*, उपसेवनं, निवेशः, अभिनिवेशः, निविष्टता, परायणता, उपासकता.

DEVOTEE, *s.* योगी *m.* (न्), सन्न्यासी *m.* (न्), तपस्वी *m.* (न्), तापसः, यती *m.* (न्), महाव्रती *m.* (न्), वैखानसः, मुनिः *m.*, निर्ग्रन्थः -न्थकः, धर्म्मनिबन्धी *m.* (न्), धर्म्मनिरतः, धर्म्मनिविष्टः.

DEVOTION, *s.* (Devoted attachment) भक्तिः *f.*, भक्तत्वं, अनुरागः, आसक्तिः *f.*, प्रसक्तिः *f.*, सक्तिः *f.*, अनुरक्तिः *f.*, योगः, सेवा, उपासना, उपसेवनं.—(Piety) ईश्वरभक्तिः *f.*, भजनशीलता, धर्म्मत्वं, ईश्वरसेवा, उत्सर्गः.—(Act of worship) नियमः, धर्म्मक्रिया, धर्म्मकृत्यं, तपः *n.* (स्); 'to perform austere devotion,' तपस् (nom. तपस्यति) or तपस् तप् in pass. (तप्यते); 'self-devotion,' आत्मपरित्यागः; 'devotion to a husband,' पतिसेवा, पातिव्रत्यं.

DEVOTIONAL, *a.* (Relating to religion) धर्म्मविषयकः -का -कं, ईश्वरपूजाविषयः -या -यं, तपोमयः -यी -यं.—(Religious) धर्म्मपरः -रा -रं, ईश्वरभावनः -ना -नं, भजनशीलः -ला -लं, औपासनः -नी -नं, नियमनिष्ठः -ष्ठा -ष्ठं.

To DEVOUR, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्, भक्ष् (c. 10. भक्षयति -यितुं), सम्भक्ष्, खाद् (c. 1. खादति -दितुं), संखाद्, समद् (c. 2. -अत्ति -त्तुं), समश् (c. 9. -अश्नाति -अशितुं), पर्य्यश्, जक्ष् (c. 2. जक्षिति -तुं) घस् (c. 1. घसति, घस्तुं).—(Swallow up) गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, सङ्गॄ, ग्रस्.—(Consume) उपयुज् (c. 7. -युंक्ते -योक्तुं), नश् in caus. (नाशयति -यितुं).

DEVOURED, *p. p.* ग्रस्तः -स्ता -स्तं, जग्धः -ग्धा -ग्धं, भक्षितः -ता -तं, खादितः -ता -तं.

DEVOURER, *s.* भक्षकः, खादकः, भक्षयिता *m.* (तृ), ग्रसनकारः, ग्रसिष्णुः *m.*

DEVOUT, *a.* भक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्), भजनशीलः -ला -लं, धर्म्मी -र्म्मिणी -र्म्मि (न्), धार्म्मिकः -की -कं, धर्म्मिष्ठः -ष्ठा -ष्ठं, धर्म्मात्मा -त्मा -त्म (न्) or पुण्यात्मा or प्रयतात्मा, पूजकः -का -कं, व्रती -तिनी -ति (न्) or महाव्रती, ईश्वरभावनः -ना -नं, सात्त्विकः -की -कं, पुण्यशीलः -ला -लं, तपस्वी -स्विनी -स्वि (न्), ईश्वरनिष्ठः -ष्ठा -ष्ठं, श्रद्धान्वितः -ता -तं, परमेश्वरे सदाभक्तिः -क्तिः -क्ति.

DEVOUTLY, *adv.* ईश्वरभक्तिपूर्व्वं, ईश्वरभक्तत्वात्, धर्म्मपूर्व्वं.

DEVOUTNESS, *s.* ईश्वरभक्तत्वं, ईश्वरनिष्ठत्वं, नियमनिष्ठता, श्रद्धावत्त्वं.

DEW, *s.* नीहारः, तुषारः, शिशिरः, प्रालेयं, अवश्यायः, रजनीजलं, रात्रिजलं, निशाजलं, खजलं, खवारि *n.*, अवश्यायजलं, अवश्यायसलिलं, निशापुष्पं, खवाष्पः, हिमः -मं, दृतं.

To DEW, *v. a.* नीहारेण or शिशिरेण क्लिद् in caus. (क्लेदयति -यितुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -क्षितुं) or आर्द्रीकृ.

DEW-BESPRENT, *a.* शिशिराक्तः -क्ता -क्तं, नीहारोक्षितः -ता -तं, तुषारक्लिन्नः -न्ना -न्नं, अवश्यायावसिक्तः -क्ता -क्तं.

DEW-DROP, *s.* तुषारकणः, नीहारबिन्दुः *m.*, शिशिरबिन्दुः, अवश्यायबिन्दुः, हिमकणः, तुषारशीकरः.

DEW-LAP, *s.* गलकम्बलः, कम्बलः, सास्ना, वृषगलस्य लोलितमांसं.

DEWY, *a.* तुषारमयः -यी -यं, नीहारसिक्तः -क्ता -क्तं, सशिशिरः -रा -रं.

DEXTERITY, *s.* दक्षता, दाक्ष्यं, हस्तकौशल्यं, करदक्षता, हस्तलाघवं, हस्तपादादिक्षिप्रता, चातुर्य्यं, नैपुण्यं, युक्तिः *f.*, सुप्रयोगः -गता, पटुता, सत्वरता.

DEXTEROUS, *a.* दक्षः -क्षा -क्षं, करदक्षः -क्षा -क्षं, लघुहस्तः -स्ता -स्तं, कृतहस्तः -स्ता -स्तं, चतुरः -रा -रं, निपुणः -णा -णं, क्षिप्रः -प्रा -प्रं, युक्तिमान् -मती -मत् (त्), सुप्रयोगवान् -वती -वत् (त्), पेशलः -ला -लं,

पटुः -टुः -टु, सूत्थानः -ना -नं, उपायः -या -यं.

DEXTEROUSLY, *adv.* सदाक्ष्यं, सलाघवं, युक्त्या, सचातुर्य्यं, सपाटवं.

DEXTRAL, *a.* दक्षिणः -णा -णं, दाक्षिणः -णी -णं, अपसव्यः -व्या -व्यं, वामेतरः-रा-रं,अवामः-मा-मं,दक्षिणस्थः-स्था-स्थं,दक्षिणपार्श्वस्थः-स्था-स्थं.

DHANWANTARI, *s.* (The physician of the gods) धन्वन्तरिः *m.*, काशिराजः.

DIABETES, *s.* बहुमूत्रमेहः, बहुमूत्ररोगः, इक्षुमेहः, प्रमेहः.

DIABOLIC, DIABOLICAL, *a.* पैशाचः -ची -चं -चिकः -की -कं, भौतिकः -की -कं, पिशाचोपमः -मा -मं, वैतालिकः -की -कं, दारुणः -णा -णं.

DIABOLICALLY, *adv.* पिशाचवत्, भूतवत्, वेतालवत्, दारुणं.

DIACOUSTICS, *s.* श्रवणविद्या, शब्दनिर्णयविद्या, ध्वनिविद्या.

DIADEM, *s.* किरीटः, मुकुटं, मौलिः *m.* -ली, वेष्टनं, शिरोवेष्टनं, अवतंसः, तिरीटं, वन्धुरं, चूडा, मस्तकाभरणं.

DIADEMED, *a.* किरीटी -टिनी -टि (न्), किरीटधारी -रिणी -रि (न्).

DIÆRESIS, *s.* स्वरविच्छेदः,पदविभेदः,अक्षरविच्छेदः,असन्धिः,यथा तितउ शब्दे.

DIAGNOSTIC, *s.* रोगलक्षणं, रोगचिह्नं, विमृचिका, प्रज्ञानं, उपसर्गः.

DIAGONAL, *a.* एककोणात् अन्यकोणपर्य्यन्तम् अङ्कितः -ता -तं, कोणाकोणि लिखितः -ता -तं.

DIAGONAL, *s.* कर्णः, श्रुतिः *f.*, श्रवणः, एककोणाद् अन्यकोणपर्य्यन्तम् अङ्किता रेखा, कोणाकोणि लिखिता रेखा यया चतुरस्रं द्विसमीकृतं.

DIAGONALLY, *adv.* कोणाकोणि, आरारि, अस्रास्रि.

DIAGRAM, *s.* मण्डलकं, चक्रं, कूर्म्मचक्रं, क्षेत्रं, अङ्कः, चित्रं.

DIAL, DIAL-PLATE, *s.* मुहूर्त्तदण्डादिपरिमापकं मण्डलं, अङ्कचिह्निता घटी यया मयूखद्वारेण कालः सूच्यते, छन्दः, यामघोषा; 'pin of a dial,' मयूखः, कीलः; 'sun-dial,' सूर्य्यघटी, प्रतोदः.

DIALECT, *s.* (Subdivision of a language) विभिन्नभाषा, देशभाषा. —(Language, speech) भाषा, भाषितं -णं, वचनं, वाक्यं, वाक् *f.* (च्), उक्तिः *f.*; 'foreign dialect,' म्लेच्छभाषा.

DIALECTIC, *s.* (Logic) तर्कः, तर्कविद्या, न्यायः, आन्वीक्षिकी, अनुमानोक्तिः *f.*

DIALECTICAL, *a.* तार्किकः -की -कं, न्यायी -यिनी -यि (न्), प्रोहः -हा -हं.

DIALECTICALLY, *adv.* न्यायतस्, तर्कविद्यानुसारेण, तर्कशास्त्रवत्.

DIALECTICIAN, *s.* तर्की *m.* (न्), न्यायविद्, नैयायिकः, आक्षपादः, सांवादिकः.

DIALLING, *s.* (Science of shadow) छायाविद्या.—(Dial making) घटीनिर्म्माणं, पूर्व्वोक्तमण्डलनिर्म्माणशिल्पं.

DIALOGIST, *s.* कथोपकथकः, सांवादिकः, सम्भाषकः, उत्तरप्रत्युत्तरकृत्, प्रश्नोत्तरक्रमेण कथोपकथनरचकः.

DIALOGUE, *s.* कथोपकथनं, संलापः, सम्भाषा -षणं, संवादः, द्वयोः संवादः, सङ्कथा, सम्प्रवदनं, उत्तरप्रत्युत्तरं, प्रश्नोत्तरं, उक्तिप्रत्युक्तिः *f.*, परस्परालापः, वीथ्यङ्गं.

To DIALOGUE, *v. n.* सम्भाष् (c. 1. -भाषते -षितुं), संवद् (c. 1. -वदति -दितुं), संलप् (c. 1. -लपति -पितुं), संवच् (c. 2. -वक्ति -क्तुं), कथोपकथनं कृ.

DIAMETER, *s.* (Of a circle) व्यासः, विष्कम्भः, विस्तारः, विस्तृतिः *f.*

DIAMETRAL, DIAMETRICAL, *a.* व्यासक्रमेण विपरीतगतः -ता -तं, अभिमुखगतः -ता -तं.

DIAMETRICALLY, *adv.* व्यासक्रमेण विपरीतं, अभिमुखं, प्रतिकूलं, मुखामुखि.

DIAMOND, *s.* हीरं -रकः, वज्रः -ज्रं, वरारकं, अविकं, अशिरं, दधीच्यस्थि *n.*, दृढाङ्गं, लोहजित्, सूचीमुखं, रत्नमुख्यं, भार्गवप्रियः; 'diamond-mine,' वज्राकरः.

DIAMOND-CUTTER, *s.* हीरकारः, हीरकछिद्, हीरभेदकः, हीरपरिष्कारकः.

DIAPASON, *s.* स्वराष्टकं, अष्टस्वराः *m. pl.*, स्वरग्रामः, विरिञ्चाष्टकं.

DIAPER, *s.* पुष्पादिसंस्कारालङ्कृतः क्षौमपटः, चित्रपटः, वरकं.

To DIAPER, *v. a.* क्षौमपटं पुष्पादिसंस्कारेण अलङ्कृ, चित्र् (c. 10. चित्रयति -यितुं).

DIAPHANEITY, *s.* स्वच्छता, अच्छता, प्रसन्नता, प्रसत्तिः *f.*, वैशद्यं.

DIAPHANIC, DIAPHANOUS, *a.* स्वच्छः -च्छा -च्छं, अच्छः -च्छा -च्छं, प्रसन्नः -न्ना -न्नं, विशदः -दा -दं, विमलः -ला -लं, विशुद्धः -द्धा -द्धं, स्फटिकाभः -भा -भं.

DIAPHORETIC, *a.* स्वेदकरः -री -रं, स्वेदनः -ना -नं, स्वेदजनकः -का -कं, घर्म्मोत्पादकः -का -कं, प्रस्वेदितवान् -वती -वत् (त्); 'a diaphoretic,' स्वेदनं.

DIAPHRAGM, *s.* शरीरस्य मध्यदेशः, उदरवक्षःस्थलमध्ये शरीरभागः.

DIARRHŒA, *s.* अतिसारः, सारणः, प्रवाहिका, ग्रहणीरुक् *f.* (ज्), ग्रहणी, विरेकः, प्रस्कन्दनं -न्दिका, वमनः.

DIARRHŒTIC, *a.* रेचकः -की -कं, सारकः -का -कं, अधोभागहरः -रा -रं.

DIARY, *s.* आह्निकव्यवहारपुस्तकं, दैनिकवृत्तान्तपुस्तकं, आह्निकचरित्रलिखनं, पुस्तकं यस्मिन् दैनिकचेष्टितानि समारोप्यन्ते, पदभञ्जिका, पञ्जिका.

DIASTOLE, *s.* रूपकविशेषो येन ह्रस्वस्वरो दीर्घीक्रियते.

DIATESSERON, *s.* गान्धर्वविद्यायां स्वरचतुष्टयं.

DIBBLE, *s.* लघुखनित्रं, क्षुद्रखात्रं, बीजारोपणे प्रयुक्तो तीक्ष्णाग्रो दण्डः.

DICACITY, *s.* वावदूकता, अतिशयोक्तिः *f.*, जल्पः, वाचालता, अविनयः.

DICE, *s.*, *pl.* of DIE. अक्षाः *m. pl.*, पाशकाः *m. pl.*, देवनाः *m. pl.*; 'loaded dice,' कूटाक्षाः *m. pl.*: 'player with dice,' अक्षदेवी *m.* (न्).

To DICE, *v. n.* अक्षैर् दिव् (c. 4. दीव्यति -ते, देवितुं) or प्रदिव् or प्रतिदिव् or क्रीड् (c. 1. क्रीडति -डितुं); ग्लह् (c. 1. ग्लहते -हितुं), अक्षक्रीडां कृ.

DICE-BOARD, *s.* पाशकपीठः, नयपीठी, अष्टापदं, शारिफलं.

DICE-BOX, *s.* अक्षाधारः, पाशकभाण्डं, अक्षभाजनं, अक्षसम्पुटकः.

DICER, *s.* अक्षदेवी *m.* (न्), अक्षधूर्त्तः -धूः, अक्षक्रीडकः; 'player with unfair dice,' कूटाक्षदेवी *m.* (न्).

To DICHOTOMIZE, *v. a.* द्विधा कृ or छिद् (c. 7. छिनत्ति, छेत्तुं), पृथक्कृ.

DICKER, *s.* (Of leather) दशचर्म्माणि *n. pl.*, चर्म्मदशकं.

To DICTATE, *v. a.* आज्ञा in caus. (-ज्ञापयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, शास् (c. 2. शास्ति, शासितुं), चुद् in caus. (चोदयति -यितुं), अभिचुद्, प्रेर् in caus. (-ईरयति -यितुं), प्रक्लृप् in caus. (-कल्पयति -यितुं).

DICTATE, *s.* आज्ञा, आदेशः, निदेशः, निर्देशः, नियमः, नियोगः, शासनं, चोदनः, विधिः *m.*, विधानं, प्रेरणं, वचनं, प्रयुक्तिः *f.*

DICTATED, *p. p.* आदिष्टः -ष्टा -ष्टं, आज्ञापितः -ता -तं, चोदितः -ता -तं.

DICTATION, *s.* आदेशः, आज्ञापनं, निर्देशः, निदेशः, नियोजनं, विज्ञापनं, चोदना.

DICTATOR, *s.* आपाततः or विनिपातसमये सर्व्वसम्मत्या परमाधिकारयुक्तो जनः, अनन्याधीनः शासिता *m.* (तृ), परमशासिता, परमप्रभुः, एकप्रभुः, एकाधिपतिः *m.*

DICTATORIAL, *a.* आज्ञापकः -का -कं, निर्देशकः -का -कं, धृष्टः -ष्टा -ष्टं.

DICTATORSHIP, *s.* पूर्व्वोक्तशासितुः पदं or अधिकारः, ऐकपत्यं, ऐकाधिपत्यं.

DICTION, *s.* वाग्व्यापारः, वाक्यव्यापारः, वाग्रीतिः *f.*, वाक्यं, उक्तिः *f.*, वचनं, भाषा, वाणी, व्याहारः, वचः *n.* (स्).

DICTIONARY, *s.* कोषः, शब्दकोषः, शब्दसङ्ग्रहः, अभिधानं, शब्दग्रन्थः, शब्दजालं, निर्वचनं, निघण्टुः *m.*; 'a dictionary compiler,' कौशिकः.

DICTUM, *s.* (Authoritative saying) वचनं, आदेशः, वक्तव्यं.

DIDACTIC, DIDACTICAL, *a.* उपदेशकः -का -कं, निर्देशकः -का -कं, शिक्षकः -का -कं, शिक्षाकरः -रा -रं, वैधिकः -की -कं, सौत्रः -त्री -त्रं.

DIDAPPER, *s.* (A diving bird) प्लवः, प्लावी *m.* (न्).

DIE, *s.* (To play with) अक्षः, पाशकः, देवनः, नयः, विन्दुतन्त्रः, दुन्दुभिः *f.* -भी, जयपुत्रकः, शारिशृङ्खला, अष्टाङ्गं; 'a loaded die,' कूटाक्षः,

दुरक्षं.—(Chance) दैवं.—(Stamp used in coinage) मुद्रा.

To DIE, *v. a.* (Colour, stain). *See To* DYE.

To DIE, *v. n.* (Lose life) मृ (c. 6. म्रियते, मर्त्तुं), सम्मृ, प्रे (c. 2. -एति -तुं, with प्र, प्रैति), परे, अती (अत्येति), व्यती; जीवनं or देहम् उत्सृज् (c. 6. -सृजति -स्रष्टुं), तनुं or शरीरं त्यज् (c. 1. त्यजति, त्यक्तुं) or न्यस् (c. 4. -अस्यति -असितुं), प्राणत्यागं कृ, प्रमी (c. 4. -मीयते), विपद् (c. 4. -पद्यते -पत्तुं), व्यापद्; पञ्चत्वं गम् (c. 1. गच्छति, गन्तुं), देहाद् अपगम्, लोकान्तरं गम् or प्राप् (c. 5. -आप्नोति -आप्तुं), संस्था (c. 1. -तिष्ठते -स्थातुं), प्रेतीभू.—(Perish, be lost) नश् (c. 4. नश्यति, नशितुं), प्रणश्, विनश्; प्रली (c. 4. -लीयते -लेतुं), क्षि in pass. (क्षीयते), प्रक्षि, संक्षि, ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्.—(Sink, faint) सद् (c. 1. सीदति, सत्तुं), अवसद्, विषद्; ग्लै (c. 1. ग्लायति, ग्लातुं), मुर्छ् (c. 1. मूर्छति -र्छितुं).—(Wither) विशॄ in pass. (-शीर्य्यते).

DIER, *s.* (One who colours) वस्त्ररागकृत्. *See* DYER.

DIET, *s.* (Food) अन्नं, आहारः, खाद्यद्रव्यं, भोजनं, भक्ष्यं, भोज्यं; 'change of diet,' अन्नपरिवर्त्तः.—(Food regulated by the rules of medicine) पथ्यं, पथ्यान्नं, पथ्यापथ्यं.—(Assembly of princes) राजसभा, शिष्टसभा, मण्डलेश्वरसभा.

To DIET, *v. a.* (Feed by the rules of medicine) पथ्यापथ्यं निर्दिश् (c. 6. -दिशति -देष्टुं), पथ्यान्नं or पथ्यान्नेन भुज् in caus. (भोजयति -यितुं), पथ्यान्नं दा.—(Feed) भुज् in caus., पुष् (c. 10. पोषयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्त्तुं).

To DIET, *v. n.* पथ्यान्नं भुज् (c. 7. भुंक्ते, भोक्तुं) or अश् (c. 9. अश्नाति, अशितुं).

DIET-DRINK, *s.* औषधीयजलं, पथ्यपानीयं, सिद्धजलं.

To DIFFER, *v. n.* (Be distinguished from) विशिष् in pass. (-शिष्यते), भिद् in pass. (भिद्यते), विभिद्, प्रभिद्, all with abl. c.; as, 'the son differs from the father,' पितुर् भिद्यते कुमारः.—(Contend, be at variance) विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं).—(Dissent) विपरीतं मन् (c. 4. मन्यते, मन्तुं), न सम्मन्, अन्यथा मन्, असम्मतिं कृ, विवद् (c. 1. -वदते -दितुं), न स्वीकृ, भिन्नमतः -ता -तं भू.

DIFFERENCE, *s.* (Distinction from something else) भेदः, विभेदः, प्रभेदः, भिदा, विशेषः, विशिष्टता, वैशिष्ट्यं, अन्तरं -रितं, भिन्नता, विभिन्नता, पृथक्त्वं, पार्थक्यं, अवच्छेदः, अन्यथात्वं, परत्वं, इतरत्वं.—(Contrariety) विपरीतता, वैपरीत्यं, विरोधः, विरुद्धता, विपर्य्ययः, वैलक्षण्यं, विप्रतिपत्तिः *f.*, द्वैधं, द्वैविध्यं.—(Difference of opinion, dispute) मतिप्रभेदः, मतिविपर्य्ययः, विमतिः *f.*, वैमत्यं, विवादः, विसंवादः, द्वैधं, कलहः, कलिः *m.*—(Difference of meaning) अर्थभेदः, अर्थान्तरं.—(Difference in quantity) तारतम्यं, वैषम्यं.—(Dissimilarity) असाम्यं, असादृश्यं.

To DIFFERENCE, *v. a.* विशिष् in caus. (-शेषयति -यितुं), भिद् in caus. (भेदयति -यितुं), पृथक्कृ.

DIFFERENT, *a.* (Distinct) भिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, अन्यः -न्या -न्यत्, अन्यतरः -रा -रत्, इतरः -रा -रं, परः -रा -रं, विपरीतः -ता -तं, विविक्तः -क्ता -क्तं, व्यतिरिक्तः -क्ता -क्तं, विशिष्टः -ष्टा -ष्टं, त्वः त्वा त्वं.—(Dissimilar) असदृशः -शी -शं, असमानः -ना -नं, असमः -मा -मं, विषमः -मा -मं.—(Various) विविधः -धा -धं, पृथग्विधः -धा -धं, नानाविधः -धा -धं, बहुविधः -धा -धं; 'by a different road,' भिन्नमार्गेण; 'in a different way,' अन्यथा; 'different state of the case,' अन्यथात्वं. Sometimes expressed by अन्तरं affixed; as, 'a different meaning,' अर्थान्तरं.

DIFFERENTIAL, *a.* भेदकरः -री -रं, विशेषकः -का -कं.—(Differential series, dependence of larger numbers on smaller) तारतम्यं.

DIFFERENTLY, *adv.* अन्यथा, इतरथा, परतस्, अन्यतस्, इतरतस्, पृथक्, भिन्नरूपेण, अन्यप्रकारेण, विपरीतं, पृथक्त्वेन.

DIFFICULT, *a.* (Hard, not easy) कठिनः -ना -नं, दुष्करः -रा -री -रं, दुःसाध्यः -ध्या -ध्यं, दुश्चरः -रा -रं, दुर्निवहः -हा -हं, असुकरः -री -रं, असुगमः -मा -मं, विषमः -मा -मं, कष्टः -ष्टा -ष्टं, कष्टकरः -री -रं, आयासी -सिनी -सि (न्); 'difficult to be understood,' दुर्ज्ञेयः -या -यं; 'difficult to be got,' दुर्लभः -भा -भं, दुःप्राप्यः -प्या -प्यं, दुःखलभ्यः -भ्या -भ्यं, दुःखेन प्राप्यः -प्या -प्यं, दुरापः -पा -पं; 'difficult to be overcome,' दुरतिक्रमः -मा -मं; 'difficult to be cut,' दुःखच्छेद्यः -द्या -द्यं; 'difficult to be joined,' दुःसन्धानः -ना -नं; 'difficult of digestion,' दुर्जरः -रा -रं; 'difficult of ascent,' दुरारोहः -हा -हं; 'a difficult case,' सशल्योऽर्थः; 'difficult march,' सङ्क्रमः, दुर्गसञ्चरः.—(Peevish, morose) वक्रभावः -वा -वं, दुर्धर्षः -र्षा -र्षं.

DRUNKARD, *s.* पानरतः, पानप्रसक्तः, [illegible], पानशौण्डः.

DRUNKENNESS, *s.* मत्तत्वं, उन्मत्तता, मद्योन्मत्तत्वं, मादः, मदः, क्षैव्यं, क्षीवता, शौण्डत्वं, परिक्षीवता, उत्कटः, मद्यपानजन्यो-वस्थाविशेषः.

DRY, *a.* शुष्कः -ष्का -ष्कं, परिशुष्कः -ष्का -ष्कं, संशुष्कः -ष्का -ष्कं, उच्छुष्कः -ष्का -ष्कं, निर्जलः -ला -लं, निरुदकः -का -कं, नीरसः -सा -सं, निःसलिलः -ला -लं, अस्तिमितः -ता -तं, अक्लिन्नः -न्ना -न्नं, अपरिक्लिन्नः -न्ना -न्नं, अस्निग्धः -ग्धा -ग्धं, निःस्नेहः -हा -हं, निःस्नेहः -हा -हं, स्नेहरहितः -ता -तं, अट्टः -ट्टा -ट्टं, वानः -ना -नं, कारलः -ला -लं, रूक्षः -क्षा -क्षं, रूक्षः -क्षा -क्षं.—(Flat as style) अरसिकः -का -कं, अरसः -सा -सं.—(Sarcastic) अरुन्तुदः -दा -दं.—(Thirsty) उदकार्थी -र्थिनी -र्थि (न्), तृषार्त्तः -र्त्ता -र्त्तं; 'dry soil,' मरुः *m.*, मरुस्थलं -ली; 'the dry ground,' स्थलं; 'dry flesh,' शुष्कमांसं.

To DRY, *v. a.* शुष् in caus. (शोषयति -यितुं), विशुष्, संशुष्, परिशुष्, उपशुष्, शुष्कीकृ, निर्जलीकृ, नीरसीकृ; स्नेहं or क्लेदं or रसं हृ (c. 1. हरति, हर्त्तुं) or अपनी (c. 1. -नयति -नेतुं) or निष्कृष् (c. 1. -कर्षति -क्रष्टुं); ओल् in caus. (ओलयति -यितुं); 'to dry up,' उच्छुष् in caus. (उच्छोषयति -यितुं rt. शुष्).

To DRY, *v. n.* शुष् (c. 4. शुष्यति, शोष्टुं), परिशुष्, विशुष्, संशुष्, उपशुष्, शुष्कीभू, निर्जलीभू, नीरसीभू; ओल् (c. 1. ओलति -लितुं), वप् (c. 1. वपते -पितुं), श्यै (c. 1. -श्यायते -श्यातुं).

DRYAD, *s.* वनदेवता, वनाधिष्ठात्री देवता, वनस्त्री.

DRYER, *s.* शोषकः, शोषणः, उच्छोषणः, परिशोषकः, शुष्ककृत्.

DRY-EYED, *a.* निरश्रुलोचनः -ना -नं, निःसलिलनयनः -ना -नी -नं.

DRYING, *s.* शोषः -षणं, परिशोषणं, विशोषणं, उच्छोषणं, शुष्ककरणं.

DRYLY, *adv.* शुष्कं, परिशुष्कं, शुष्कतया, अरसं.—(Sarcastically) अरुन्तुदत्वेन.

DRYNESS, *s.* शुष्कता -त्वं, परिशुष्कता, संशुष्कता, शोषः, निर्जलत्वं, नीरसत्वं, निःस्नेहता, अक्लिन्नता, स्नेहराहित्यं.—(Of style, expression) अरसिकत्वं, अरुन्तुदत्वं.

DRY-NURSE, *s.* स्तन्यदानव्यतिरेकेण बालकप्रतिपालिका, बालकपोष्ट्री, अङ्कपाली, शिशुपालिका.

To DRY-NURSE, *v. a.* स्तन्यदानव्यतिरेकेण बालकं पाल् (c. 10. पालयति-यितुं) or प्रतिपाल् or पुष् (c. 10. पोषयति-यितुं) or उपचर् (c. 1. -चरति-रितुं).

DRY-SHOD, *a.* शुष्कपादः -दा -दं -दुकः -का -कं, शुष्कचरणः -णा -णं.

DUAL, *a.* द्विवाचकः -का -कं, द्विकः -का -कं, द्विवचनान्तः -न्ता -न्तं, द्विसंख्यकः -का -कं; 'the dual number,' द्विवचनं.

DUALITY, *s.* द्वित्वं, द्वैतं, द्वैधं, द्वैगुण्यं.

To DUB, *v. a.* नवपदे नियुज् (c. 7. -युनक्ति -योक्तुं), नवोपधिं दा, नवनाम दा, नूतनपदवीं दा; 'dub a knight,' सादिपदं दा.

DUBIOUS, *a.* सन्दिग्धः -ग्धा -ग्धं, संशयी -यिनी -यि (न्), संशयस्थः -स्था -स्थं, ससंशयः -या -यं, सांशयिकः -की -कं, संशयापन्नः -न्ना -न्नं, शङ्कनीयः -या -यं, शङ्कान्वितः -ता -तं, सशङ्कः -ङ्का -ङ्कं, शङ्कामयः -यी -यं, संशयालुः -लुः -लु, संशयापन्नमानसः -सा -सं, सन्दिहानः -ना -नं, वैकल्पिकः -की -कं, विशयी -यिनी -यि (न्), अनिश्चितः -ता -तं, अस्थिरः -रा -रं.—(Not clear) अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, अप्रकाशः -शी -शं, अप्रत्यक्षः -क्षा -क्षं.

DUBIOUSLY, *adv.* सन्दिग्धं, ससंशयं, सशङ्कं, सन्देहेन, शङ्कया, शङ्कापूर्वं.

DUBIOUSNESS, *s.* सन्दिग्धता, ससंशयत्वं, सांशयिकत्वं, अनिश्चयः, अनैश्चित्यं.

DUBITABLE, *a.* वितर्क्यः -र्क्या -र्क्यं, मीमांस्यः -स्या -स्यं, आशङ्कनीयः -या -यं.

DUBITATION, *s.* सन्देहः, संशयः, शङ्का, आशङ्का, विकल्पः, वितर्कः.

DUCAL, *a.* प्रधानकुलीनपदसम्बन्धी -न्धिनी -न्धि (न्), परमपदसम्बन्धी.

DUCAT, *s.* प्रधानकुलीनजनमुद्राङ्कितो मुद्राविशेषः.

DUCHESS, *s.* प्रधानकुलीनजनस्य पत्नी or भार्य्या.

DUCK, *s.* (Bird) हंसः, वरटः -टा -टी, प्लवः, कलहंसः, चक्रवाकः, कादम्बः; 'wild duck,' कामिकः.—(Sudden inclination of the head) अकस्मात् शिरोनम्रीकरणं or मस्तकानतिः *f.*—(Stone thrown obliquely on the water) जले तिर्य्यक्क्षिप्तः प्रस्तरः.—(Word of endearment) प्रियः -या, दयितः -ता, वत्सः -त्सा, हृदयप्रियः -या.

To DUCK, *v. a.* (Plunge in water) जले मज्ज् in caus. (मज्जयति -यितुं) or निमज्ज् or अवगाह् in caus. (-गाहयति -यितुं) or आप्लु in caus. (-प्लावयति -यितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Bow the head suddenly) मस्तकम् अकस्माद् नम् in caus. (नामयति, नमयति -यितुं) or नम्रीकृ.

To DUCK, *v. n.* (Dip) मज्ज् (c. 6. मज्जति, मंक्तुं, मज्जितुं), निमज्ज्, अवगाह् (c. 1. -गाहते -हितुं).—(Bow the head suddenly) मस्तकम् अकस्माद् नम् (c. 1. नमति, नन्तुं), अकस्माद् नम्रीभू.

DUCKED, *p. p.* जलमग्नः -ग्ना -ग्नं, जलाप्लुतः -ता -तं, प्रमग्नः -ग्ना -ग्नं.

DUCKER, *s.* मज्जयिता *m.* (तृ), मंक्ता *m.* (क्तृ), आप्लावकः, प्लवः.

DUCKING, *s.* मज्जनं, निमज्जनं, अवगाहः, प्लावः, प्लवनं, आप्लावः -प्लवनं.

DUCKLING, *s.* हंसशावकः, वरटशावकः, वरटशिशुः *m.*

DUCT, *s.* (Canal, passage) नाली, प्रणालः -ली -लिका, सरणिः *f.*, पथः, मार्गः, सङ्क्रमः, गमनागमनपथः.—(Of the body) नालः -ली -ला, नालिः *f.*, नाडिः *f.* -डी, शिरा, सिरा, धमनिः *f.* -नी, तन्त्री.

DUCTILE, *a.* (Tractable) सुविनेयः -या -यं, सुप्रणेयः -या -यं, विधेयः -या -यं, वश्यः -श्या -श्यं, आकर्षणीयः -या -यं, सुखकर्षणीयः -या -यं.—(Pliable) आयम्यः -म्या -म्यं, आनम्यः -म्या -म्यं, मृदुः -द्वी -दु, द्रवः -वा -वं.—(As metal) उद्वर्त्तनीयः -या -यं, उद्वर्त्तनयोग्यः -ग्या -ग्यं.

DUCTILENESS, DUCTILITY, *s.* सुविनेयत्वं, आयम्यता, आनम्यता, मृदुत्वं, द्रवत्वं, सुकर्षणीयता.—(Of metals) सुखोद्वर्त्तनीयता, उद्वर्त्तनयोग्यता.

DUDGEON, *s.* (Anger) मन्युः *m.*, कोपः, क्रोधः, रोषः, अमर्षः, द्वेषः, दुष्टभावः.—(Small dagger) क्षुद्रकृपाणी, असिपुत्रिका.

DUE, *a.* (That ought to be paid or received) देयः -या -यं, प्रतिदेयः -या -यं, दानीयः -या -यं, दातव्यः -व्या -व्यं, शोध्यः -ध्या -ध्यं, शोधनीयः -या -यं, संशोध्यः -ध्या -ध्यं, परिशोधनीयः -या -यं, प्राप्यः -प्या -प्यं, प्राप्तव्यः -व्या -व्यं, ग्राह्यः -ह्या -ह्यं.—(Fit, becoming) योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, यथोचितः -ता -तं, उपयुक्तः -क्ता -क्तं, यथार्हः -र्हा -र्हं, अनुरूपः -पा -पं; 'in due time,' उपयुक्ते समये, समया; 'in due form,' विधिवत्, यथाविधि.

DUE, *s.* (That which ought to be paid or received) देयं, प्रतिदेयं, दानीयं, शोधनीयं, ग्राह्यं, प्राप्यं, प्राप्तव्यं.—(Debt) ऋणं.—(That which ought to be done) कर्त्तव्यं; 'respect is due to parents,' मातापितरौ पूजनीयौ.—(Tribute) शुल्कः -ल्कं, करः, तारिकं, तार्य्यं, राजग्राह्यभागः.—(Right) अधिकारः, स्वाधिकारः.

DUE, *adv.* (Directly) अवक्रं, अजिह्मं, अविलोमं, समरेखं.

DUEL, *s.* द्वन्द्वयुद्धं, द्वन्द्वसम्प्रहारः, द्वन्द्वं, नियुद्धं, मल्लयुद्धं.

To DUEL, *v. n.* द्वन्द्वयुद्धं कृ, द्वन्द्वसम्प्रहारं कृ, द्वन्द्वं कृ.

DUELLER, DUELLIST, *s.* द्वन्द्वयोद्धा *m.* (द्धृ), मल्लयोद्धा *m.*, द्वन्द्वकृत्.

DUG, *s.* (Of an animal) स्तनः, कुचः, कुचतटं; 'of a cow,' गोस्तनः.

DUG, *p. p.* खातः -ता -तं, खनितः -ता -तं, निखातः -ता -तं, उत्खातः -ता -तं.

DUKE, *s.* कुलीनपदानां मध्ये प्रधानपदभाक् *m.* (ज्), उत्तमकुलीनपदस्थः.—(Chief, prince) अधिपतिः *m.*, राजा *m.* (न्), ईश्वरः.

DUKEDOM, *s.* उत्तमकुलीनपदं, पूर्व्वोक्तकुलीनजनस्य आधिपत्यं or अधिकारः.

DULCET, *a.* (Sweet to the taste) स्वादुः -द्वी -दु, मिष्टः -ष्टा -ष्टं, सुरसः -सा -सं.—(To the ear) श्रुतिसुखः -खा -खं, सुस्वरः -रा -रं, मधुरः -रा -रं.

DULCIFICATION, *s.* मधुरीकरणं, मधुसात्करणं, निरम्लीकरणं.

To DULCIFY OR DULCORATE, *v. a.* मधुरीकृ, मधुसात्कृ, स्वादूकृ, मिष्टीकृ.

DULCIMER, *s.* वाद्ययन्त्रविशेषः, तन्त्री *m.* (न्), वल्लकी, विपञ्चिका.

DULL, *a.* (Stupid) मन्दः -न्दा -न्दं, मन्दबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडः -डा -डं, मूढः -ढा -ढं.—(Blunt) अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अतेजाः -जाः -जः (स्) or निस्तेजाः, तेजोहीनः -ना -नं, धाराहीनः -ना -नं.—(Not bright) मन्दकान्तः -न्ता -न्तं, मन्दतेजाः -जाः -जः (स्), मन्दद्युतिः -तिः -ति, मन्दच्छायः -या -यं, निस्तेजाः -जाः -जः (स्), निष्प्रभः -भा -भं, अप्रभः -भा -भं, मलिनः -ना -नं.—(Sluggish) मन्दः -न्दा -न्दं, मन्थरः -रा -रं, मन्दगतिः -तिः -ति, मन्दगामी -मिनी -मि (न्), मन्थरः -रा -रं, अलसः -सा -सं.—(Gross) स्थूलः -ला -लं, घनः -ना -नं.—(Sad) विषण्णः -ण्णा -ण्णं, विषादी -दिनी -दि (न्), क्लान्तः -न्ता -न्तं, ग्लानः -ना -नं, दीनमनाः -नाः -नः (स्).—(Flat, insipid) अरसः -सा -सं, अरसिकः -का -कं.—(Tedious, troublesome) कष्टकरः -रा -रं, विषमः -मा -मं.—(Cheerless) निरानन्दः -न्दा -न्दं.—(Dull of hearing) श्रोत्रविकलः -ला -लं, श्रवणेन्द्रियविकलः -ला -लं; 'a dull day,' दुर्द्दिनं; 'a dull boil,' दुष्टव्रणः.

To DULL, *v. a.* (Stupefy) जडीकृ, मूढीकृ, मन्दीकृ, मुह् in caus. (मोहयति -यितुं).—(Blunt) अतीक्ष्णीकृ, अतीव्रं -व्रां -व्रं कृ, घनीकृ, स्थूलीकृ.—(Make dim) मन्दीकृ, निष्प्रभीकृ, मलिन (nom. मलिनयति -यितुं), तेजो हृ (c. 1. हरति, हर्त्तुं).—(Dispirit) मनो अवसद् (c. 10.

खण्डयति -यितुं), म्लानीकृ, विषण्णीकृ, विषद् in caus. (-षादयति -यितुं).

DULL-WITTED, *a.* मन्दमतिः -तिः -ति, मन्दबुद्धिः -द्धिः -द्धि, स्थूलबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडमतिः &c., जडबुद्धिः &c., दुर्मतिः &c.

DULLY, *adv.* मन्दं, मन्दं मन्दं, तेजो विना, सविषादं, रसं विना.

DULNESS, *s.* (Stupidity) मन्दता, मान्द्यं स्थूलता, बुद्धिमान्द्यं, स्थूलबुद्धित्वं, मूढता, अविदग्धता.—(Bluntness) अतीक्ष्णता, घनत्वं, अतीव्रता, धाराहीनता.—(Sluggishness) गतिमन्दता, आलस्यं.—(Dimness) तेजोमान्द्यं, निष्प्रभता, प्रभाहानिः *f.*, प्रतिभाहानिः *f.*, अप्रकाशत्वं, अप्रतापः, अतेजः *n.* (स्), अस्पष्टता.

DULY, *adv.* (Fitly) यथायोग्यं, युक्तं, यथार्हं -र्हतस्, यथोचितं, सम्यक्, यथातथं, यथान्याय्यं.—(In proper time) उपयुक्तसमये, समया.

DUMB, *a.* मूकः -का -कं, जडवाक् *m.f.n.* (च्), स्तब्धवाक् *m.f.n.*, जडः -डा -डं, अवाक् *m.f.n.*, वाग्रहितः -ता -तं, वागिन्द्रियविकलः -ला -लं, वाक्शक्तिहीनः -ना -नं, मुद्रितमुखः -खा -खं, निःशब्दः -ब्दा -ब्दं, निर्वचनः -ना -नं, अनालापः -पा -पं.

DUMBLY, *adv.* मूकं, जडं, निःशब्दं, मौक्यपूर्व्वं, तूष्णीं.

DUMBNESS, *s.* मूकता, मौक्यं, वाक्स्तम्भः, वाग्जडता, वाग्जाड्यं, वाक्स्तब्धता, वागिन्द्रियवैकल्यं, वाग्राहित्यं, अवाक्त्वं, नीरवता.

DUMB-SHOW, *s.* वाग्व्यतिरेकेण हस्तपादादिसञ्चालनं.

To DUMFOUNDER, *v. a.* मुह् in caus. (मोहयति -यितुं), विमुह्, आकुलीकृ, व्याकुलीकृ.

DUMPISH, *a.* विषादी -दिनी -दि (न्), उद्विग्नमनाः -नाः -नः (स्) or दुर्मनाः.

DUMPLING, *s.* (Apple) अन्नफलगर्भः क्षुद्रपोलिका.—(Currant) चित्रापूपः.

DUMPS, *s. pl.* विषादः, विषण्णता, चित्तोद्वेगः, खेदः, क्लान्तिः *f.*, ग्लानिः *f.*

DUMPY, *a.* ह्रस्वस्थूलः -ला -लं, खर्व्वघनः -ना -नं, दृढखर्व्वः -र्व्वा -र्व्वं.

DUN, *a.* (Dark-coloured) कपिशः -शा -शं, श्यावः -वा -वं, श्यामः -मा -मं, पिङ्गलः -ला -लं, ताम्रवर्णः -र्णा -र्णं, कृष्णवर्णः -र्णा -र्णं.

To DUN, *v. a.* (For a debt) अतिनिर्बन्धेन ऋणदानं प्रार्थ् (c. 10. -र्थयति -ते -यितुं).

DUN, *s.* अतिनिर्बन्धेन ऋणप्रार्थकः, अतिनिर्बन्धी धनार्थी *m.* (न्).

DUNCE, *s.* दुर्बुद्धिः *m.*, अनभिज्ञः, अज्ञः, निर्बोधः, अव्युत्पन्नः, मेधाहीनः.

DUNDERHEAD, *s.* स्थूलबुद्धिः *m.*, स्थूलमतिः *m.*, वटुकः, बर्ब्बरः.

DUNG, *s.* पुरीषं, शकृत् *n.*, विष्ठा, विट् *f.* (ष्), पशुचरितं, पशूच्चारः, गूथः -थं, अमेध्यं, शोधनं, पूतिकं, अवस्करः, अपस्करः, शारीरं, शमलं, वर्च्चस्कः -स्कं, दूष्यं, कल्कं, मलं, सारः, भूमिलेपनं; 'cow-dung,' गोमयः -यं, गोकृतं, गोहनं.

To DUNG, *v. a.* पुरीषेण लिप् (c. 6. लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं).

To DUNG, *v. n.* पुरीषम् उत्सृज् (c. 6. -सृजति -स्रष्टुं), पुरीषोत्सर्गं कृ.

DUNGEON, *s.* कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनागारं, गुप्तिः *f.*, अन्धकूपः.

DUNGHILL, *s.* पुरीषराशिः *m.f.*, शकृद्राशिः, अमेध्यस्थानं, अशुचिस्थानं.

DUNGHILL, *a.* कलुषयोनिः -निः -नि, विहीनयोनिः -निः -नि, हीनजातिः -तिः -ति.

DUPE, *s.* सुखवञ्चनीयः, सुप्रतारणीयः, वञ्चितः, दम्भास्पदं, कपटास्पदं.

To DUPE, *v. a.* वञ्च् in caus. (वञ्चयति -ते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्; छल् (c. 10. छलयति -यितुं), प्रतॄ in caus. (-तारयति -यितुं), दम्भ् (c. 5. दभ्नोति, दम्भितुं).

DUPED, *p. p.* वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

DUPLICATE, *a.* द्विगुणः -णा -णं; 'a duplicate,' प्रतिरूपं, प्रतिलिपिः *f.*

To DUPLICATE, *v. a.* (Double) द्विगुणीकृ.—(Fold) पुटीकृ, पुट (nom. पुटयति -यितुं).

DUPLICATION, *s.* द्विगुणीकरणं, पुटीकरणं, द्वैगुण्यं, द्वैतं.

DUPLICATURE, *s.* (Fold) पुटः, व्यावर्त्तनं, ऊर्म्मिका, भङ्गः.

DUPLICITY, *s.* वैदग्ध्यं, विदग्धता, कपटः, माया, छलं, असारल्यं.

DURABILITY, *s.* चिरस्थायित्वं, स्थिरता, ध्रौव्यं, ध्रुवता, अक्षयता, स्थायित्वं, स्थितिः *f.*, संस्थितिः *f.*, स्थावरत्वं, अनपायः.

DURABLE, *a.* स्थायी -यिनी -यि (न्) or चिरस्थायी or दीर्घकालस्थायी, स्थिरः -रा -रं, स्थावरः -रा -रं, चिरकालिकः -का -कं, ध्रुवः -वा -वं, अक्षयः -या -यं, स्थितिमान् -मती -मत् (त्), संस्थः -स्था -स्थं, नित्यः -त्या -त्यं, अनपायः -या -यं -यी -यिनी -यि (न्), अजरः -रा -रं.

DURABLY, *adv.* स्थिरं, ध्रुवं, ध्रौव्येण, अक्षयं, अनपायेन.

DURA MATER, *s.* मस्तिष्कस्य वाह्यवेष्टनं or आवेष्टनत्वक् *f.* (च्).

DURANCE, *s.* आसेधः, स्थानासेधः, रोधः, निरोधनं, सम्प्रतिरोधकः, बन्धनं, प्रतिबन्धनं, कारागारे निरोधः or बन्धनं.

DURATION, *s.* स्थितिः *f.*, संस्थितिः *f.*; 'duration of an eclipse,' उपसर्गस्थितिः *f.*—(Space of time) परिमाणं, प्रमाणं; 'duration of day and night,' अहोरात्रस्य परिमाणं.—(Long duration) स्थायित्वं, स्थिरता, स्थावरत्वं, ध्रुवता, ध्रौव्यं, अविरामः.

DURGÁ, *s.* (The goddess) दुर्गा, जगन्माता *f.* (तृ), दशभुजा, श्यामा. *See* BHAVÁNÍ.

DURING, *prep.* यावत्, पर्य्यन्तं, मध्ये, अन्तरे affixed; 'during life,' जीवनपर्य्यन्तं or यावज्जीवं or by prefixing आ with abl.; as, आजीवनान्तात्, आमरणात् (*i. e.* 'until death'); 'during the performance of the vow,' आसमापनाद् व्रतस्य (*i. e.* 'until the completion of the vow'); 'during three fortnights,' पक्षत्रयमध्ये.

DUSK, *a.* ईषत्तामसः -सी -सं, तमस्कल्पः -ल्पा -ल्पं, ईषत्तमस्वी -स्विनी -स्वि (न्), ईषत्तिमिरावृतः -ता -तं, प्रादोषिकः -की -कं, वैकालिकः -की -कं, सान्ध्यः -न्ध्यी -न्ध्यं.—(A little black) [illegible] -ला -लं, ईषत्कृष्णः -ष्णा -ष्णं, आनीलः -ला -लं.

DUSK, *s.* (Twilight) सन्ध्या, सन्ध्याकालः -लं, सन्ध्यासमयः, विकालः, सन्ध्यांशं, प्रदोषः, सायङ्कालः.

DUSKILY, *adv.* ईषदन्धकारेण, ईषत्तमसा, अस्पष्टं, अप्रकाशं.

DUSKINESS, *s.* ईषदन्धकारः, ईषत्तमिस्रं, ईषत्तिमिरं, अवतमसं.

DUSKY OR DUSKISH, *a.* ईषत्तामसः -सी -सं, ईषत्तमस्वी -स्विनी -स्वि (न्), ईषदन्धकारयुक्तः -क्ता -क्तं, अस्पष्टः -ष्टा -ष्टं, ईषत्कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं. *See* DUSK.

DUST, *s.* रेणुः *m.f.*, पांशुः *m.*, रजः *n.* (स्), धूलिः *m.f.* -ली *f.*, क्षोदः -दितं, भूरेणुः *m.f.*, अवकरः, अवस्करः, सङ्करः, सङ्कारः, वातकेतुः *m.*, वायुकेतुः *m.*, क्षितिकणः -णा, परागः, मेदिनीद्रवः, तुलं, तूलं, पांसुः *m.*, रजः *m.*; 'dust of the feet,' चरणजं, पदाः; 'dust of a flower,' परागः, पुष्परेणुः *m.*, सुमनोरजः *n.* (स्); 'dust of gold,' काञ्चनभूः *f.*; 'free from dust,' नीरजाः -जाः -जः (स्), नीरजस्कः -स्का -स्कं, निर्धूलिः -लिः -लि.

To DUST, *v. a.* (Free from dust) नीरजीकृ, निर्धूलीकृ, रेणुम् अपमृज् (c. 2. -मार्ष्टि -ष्टुं, c. 1. -मार्जति -र्जितुं) or अवमृज्, रेणुदूषितं यत्किञ्चित् शुध् (c. 10. शोधयति -यितुं), पांशुपरिष्कारं कृ.

DUSTED, *p. p.* नीरजीकारितः -ता -तं, मार्ज्जितः -ता -तं, सम्मृष्टः -ष्टा -ष्टं, हृतपांशुः -शुः -शु, नीरेणुः -णुः -णु, निष्पांशूकृतः -ता -तं.

DUSTER, *s.* नक्तकः, मार्ज्जनी, मार्ज्जनपटः, अपस्करकः, रेणुपरिष्कारकः.

DUST-HOLE, *s.* अवस्करः, गृहमार्ज्जितपांश्वादिनिचयस्थानं, सङ्करस्थानं, उच्छिष्टप्रक्षेपणार्थं गर्त्तः.

Dust-man, *s.* अवस्करकः, मलाकर्षी *m.* (न्), खलपूः *m.*, अमेध्यहारी *m.* (न्).

Dusty, *a.* पांशुलः -ला -लं, पांशुरः -रा -रं, रेणुदूषितः -ता -तं, रेणुरूषितः -ता -तं, भूरेणुरूक्षः -क्षा -क्षं, रजस्वलः -ला -लं, धूल्यवलुण्ठितः -ता -तं.

Dutch, *a.* हल्लण्डदेशसम्बन्धी -न्धिनी -न्धि (न्).

Dutiful, *a.* भक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्), भक्तियुक्तः -क्ता -क्तं, दृढभक्तिः -क्तिः -क्ति, वश्यः -श्या -श्यं, वशवर्त्ती -र्त्तिनी -र्त्ति (न्), धर्म्मचारी -रिणी -रि (न्), धर्म्मज्ञः -ज्ञा -ज्ञं, धर्म्मपालकः -का -कं, धर्म्मसेवी -विनी -वि (न्), आज्ञापालकः -का -कं, वशानुगः -गा -गं, शुश्रूषुः -षुः -षु, दृढव्रतः -ता -तं, विदितधर्म्मा -र्म्मा -र्म्म (न्), आदृतः -ता -तं, उपयुक्तः -क्ता -क्तं.—(To a parent) पितृभक्तः -क्ता -क्तं, पैतृकधर्म्मपालकः, पितृवशाधीनः -ना -नं.—(To a husband) पतिव्रता.—(To a master) प्रभुभक्तः.

Dutifully, *adv.* भक्तवत्, भक्त्या, धर्म्मपालकवत्, सधर्म्मपालनं.

Dutifulness, *s.* भक्तिः *f.*, भक्तिमत्त्वं, वश्यता, धर्म्मपालनं, आज्ञानुवर्त्तनं, शुश्रूषा, अधीनता, आदरः, प्रणिपातः; 'to parents,' पितृभक्तिः *f.*, पितृसम्मानं, पितृसेवा; 'to a husband,' पतिसेवा.

Duty, *s.* (That which a person is bound to do) धर्म्मः, स्वधर्म्मः, कर्त्तव्यं, स्वकर्त्तव्यं, कर्त्तव्यता, कार्य्यं, कृत्यं, क्रिया, स्वकर्म्म *n.* (न्), न्याय्यकर्म्म, नियमः, यमः, व्रतं, धूः *f.* (धुर्), धुरा, तपः *n.* (स्).—(Appointed duty, office) नियोगः, अधिकारः, पदं, स्थानं, आस्पदं; 'perpetual duty,' नित्यकृत्यं, नित्यकर्म्म *n.* (न्), यमः; 'voluntary duty,' नियमः; 'fulfilment of duty,' धर्म्मनिष्पत्तिः *f.*, कृतकृत्यता; 'one who has done his duty,' कृतकृत्यः, कृतक्रियः; 'morning duty,' प्रातःकृत्यं; 'a woman's peculiar duty,' स्त्रीनिबन्धनं; 'charged with weighty duties,' धुरीणः, धुरीयः, धुर्वहः.—(Reverence) भक्तिः *f.*, मानं, सम्मानं, नमस्कारः, आदरः.—(Impost) शुल्कः -ल्कं, करः, तारिकं, तार्य्यं, राजग्राह्यभागः; 'duty paid at ferries, &c.,' घट्टादिदेयं.

Dwarf, *s.* वामनः -नी *f.*, खर्व्वः -र्व्वा, खर्व्वः -र्व्वा, ह्रस्वकायः, अतुङ्गशरीरः, अतुङ्गः, कुब्जः, खट्टरकं.

To dwarf, *v. a.* ह्रस् in caus. (ह्रासयति -यितुं), वामनीकृ, खर्व्वीकृ.

Dwarfish, *a.* वामनः -ना -नं, ह्रस्वः -स्वा -स्वं, खर्व्वः -र्व्वा -र्व्वं or निखर्व्वः, अतुङ्गः -ङ्गा -ङ्गं, वामनाकृतिः -तिः -ति, खर्व्वाकारः -रा -रं, ह्रस्वमूर्त्तिः -र्त्तिः -र्त्ति, वामनतनुः -नुः -नु, क्षुद्रतनुः -नुः -नु, स्तोककायः -या -यं, खट्टरकः -का -कं.

Dwarfishly, *adv.* वामनवत्, खर्व्वयत, अतुङ्गवत्, वामनरूपेण.

Dwarfishness, *s.* वामनता -त्वं, खर्व्वता, ह्रस्वता, क्षुद्रता, अतुङ्गता.

To dwell, *v. n.* वस् (c. 1. वसति, वस्तुं), निवस्, अधिवस्, आवस्, प्रतिवस्, अध्यावस्, समावस्, अधिनिवस्, सन्निवस्; वृत् (c. 1. वर्त्तते -र्त्तितुं), स्था (c. 1. तिष्ठति -ते, स्थातुं), अधिष्ठा, आस् (c. 2. आस्ते, आसितुं), अध्यास्, आश्रि (c. 1. -श्रयति -ते -यितुं) with acc., सेव् (c. 1. सेवते -वितुं), निषेव्, उपसेव् with acc., जुष् (c. 6. जुषते, जोषितुं) with acc., निली (c. 4. -लीयते -लेतुं), संली, अधिशी (c. 2. -शेते -शयितुं), वासं कृ.—(Dwell together) संवस्.—(Dwell abroad) प्रवस्.—(Dwell on a subject) अतिप्रसङ्गं कृ, प्रपञ्चं कृ, दीर्घसूत्रतां कृ; 'on a note in singing,' दीर्घस्वरं कृ.

Dweller, *s.* वासी *m.* -सिनी *f.* (न्), निवासी *m.* -सिनी *f.* (न्), निलायी *m.* -यिनी *f.*, वासकृत्.

Dwelling, *s.* वासः, वासस्थानं, वसतिः *f.*, निलयः -यनं, आलयः, गृहं, गेहः -हं, वेश्म *n.* (न्), निवेशनं, आयतनं, निकेतः -तनं, आगारः, भवनं, वसितं, निवासः, निवसतिः *f.*, समावासः, अवस्थानं, संवासः, आवसथः, वास्तुः *m.*, स्थानं, ओकः *n.* (स्), धाम *n.* (न्).

Dwelling, *part.* (Residing) वासी -सिनी -सि (न्), निवासी, &c., वर्त्ती -र्त्तिनी -र्त्ति (न्), स्थः स्था स्थं, स्थायी -यिनी -यि (न्), कृतालयः -या -यं, आश्रितः -ता -तं, समाश्रितः -ता -तं, सेवी -विनी -वि (न्), अधिशयानः -ना -नं.

Dwelling-house, *s.* निवासगृहं, वासगेहः -हं, वासागारः, निवासवेश्म *n.* (न्).

Dwelling-place, *s.* वासस्थानं, निवासस्थानं, निवासभूमिः *f.*, निवासभूयं.

Dwelt, *p. p.* उषितः -ता -तं, अध्युषितः -ता -तं, आश्रितः -ता -तं.

To dwindle, *v. n.* अल्पीभू, न्यूनीभू, ह्रस् (c. 1. ह्रसते -सितुं), क्षि in pass. (क्षीयते), परिक्षि, अपचि in pass. (-चीयते), सद् (c. 1. सीदति, सत्तुं).

To dwindle, *v. a.* अल्पीकृ, न्यूनीकृ, ह्रस् in caus. (ह्रासयति -यितुं).

Dwindled, *p. p.* अल्पीभूतः -ता -तं, अल्पीकृतः -ता -तं, क्षीणः -णा -णं, न्यूनीभूतः -ता -तं, ह्रसितः -ता -तं, अपचितः -ता -तं, विशीर्णः -र्णा -र्णं.

Dye, *s.* रागः, रङ्गः, वर्णः, कषायः -यं; 'red dye,' लाक्षा, राक्षा; 'blue dye,' नीलं; 'plants used for dye,' लोध्रः, कुसुम्भं, कुङ्कुमः, कषायकृत्.

To dye, *v. a.* रञ्ज् in caus. (रञ्जयति -यितुं), अभिरञ्ज्, वर्ण् (c. 10. वर्णयति -यितुं), चित्र् (c. 10. चित्रयति -यितुं), सरागं -गां -गं कृ, कषाय (nom. कषायति), कषायीकृ, कुङ्कुमादिना अञ्ज् (c. 7. अनक्ति, अंक्तुं); 'to dye clothes,' कुसुम्भादिना वस्त्राणि रञ्ज् or वस्त्ररागं कृ.

Dyed, *p. p.* रञ्जितः -ता -तं, रक्तः -क्ता -क्तं, रागी -गिणी -गि (न्), सरागः -गा -गं, रागान्वितः -ता -तं, कषायितः -ता -तं, कषायचित्रः -त्रा -त्रं, चित्रितः -ता -तं, वर्णितः -ता -तं; 'with saffron,' कुङ्कुमाक्तः -क्ता -क्तं; 'dyed red,' अरुणितः -ता -तं.

Dyeing, *s.* रञ्जनं, रागकरणं, वर्णनं, चित्रकरणं, कषायीकरणं; 'of clothes,' वस्त्ररागकरणं, वस्त्ररञ्जनं.

Dyer, *s.* रञ्जकः, रागकृत् *m.*, वस्त्ररागकृत्, रागी *m.* (न्), रजकः वस्त्राणां नीलकुसुम्भादिना रागकारकः.

Dying, *part.* (About to die) म्रियमाणः -णा -णं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, कण्ठगतप्राणः -णा -णं, गतायुः -युः -युः (स्); 'dying first,' पूर्व्वमारी -रिणी -रि (न्).

Dyke, *s.* सेतुः *m.*, जलसेतुः, जलबन्धकः. *See* Dike.

Dynasty, *s.* आवलिः *f.*—(Of kings) राजावलिः *f.* -ली, राजवंशः, राजसन्ततिः *f.*, राजकुलं, राजश्रेणी; 'former dynasty,' प्राग्वंशः.

Dysenteric, *a.* (Having dysentery) अतिसारी -रिणी -रि (न्), सातिसारः -रा -रं.

Dysentery, *s.* अतिसारः, आमातिसारः, सारणः, प्रवाहिका, ग्रहणी, विरेकः, आमरक्तः, प्रस्कन्दनं -न्दिका, उदरामयः, उदरभङ्गः, वसन्तः.

Dyspepsia, *s.* अजीर्णं, अजीर्णिः *f.*, अजीर्णता, अपक्तिः *f.*, अपाकः, पाककृच्छ्रं, मन्दाग्निः *m.*, तीक्ष्णाग्निः, अप्रदीप्ताग्निः, अवष्टम्भः, कुपित्तं, अन्नविकारः, आमयावित्वं, परिणामशूलः.

Dyspeptic, *a.* मन्दाग्निपीडितः -ता -तं, आमयावी -विनी -वि (न्).

Dyspnœa, *s.* दुःश्वासः, श्वासावरोधः, श्वासकृच्छ्रं, श्वासस्तम्भः.

E

Each, *a.* (All) सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, सकलः -ला -लं; 'Each' is usually expressed by प्रति or अनु prefixed; as, 'each day,' प्रतिदिनं, प्रतिदिवसं, अनुदिनं, अन्वहं; 'each night,' प्रतिरात्रं; 'each month,' प्रतिमासं; 'each one,' प्रत्येकं. Or by doubling the word; as, 'each day,' दिने दिने, दिवसे दिवसे, अहरहः; 'in each house,' गृहे गृहे; 'each one,' एकैकः -का -कं, एकैकशस्, पृथक् पृथक्; 'each other,' परस्परं -रां, अन्योन्यं, इतरेतरं; 'each

man,' एकैकजनः, प्रतिजनं; 'in each direction,' प्रतिदिशं, सर्व्वदिक्षु; 'each man related his own dream,' एकैको जनः स्वं स्वं स्वप्नम् अकथयत्.

Eager, *a.* अतीच्छः -च्छा -च्छं, अत्यभिलाषी -षिणी -षि (न्), अत्याकांक्षी -क्षिणी -क्षि (न्), कुतूहली -लिनी -लि (न्), कौतूहलान्वितः -ता -तं, व्यग्रः -ग्रा -ग्रं, उत्सुकः -का -कं, तीक्ष्णः -क्ष्णा -क्ष्णं, सरभसः -सा -सं, उद्युक्तः -क्ता -क्तं, सचेष्टः -ष्टा -ष्टं, व्यवसितः -ता -तं, आसक्तः -क्ता -क्तं, अत्यासक्तः -क्ता -क्तं, रतः -ता -तं, उत्कः -त्का -त्कं, शीघ्रकर्म्मा -र्म्मा -र्म्म (न्), उच्चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उत्तप्तः -प्ता -प्तं.

Eagerly, *adv.* अत्यभिलाषेण, अतीच्छया, अतिस्पृहातस्, कौतूहलेन, कुतूहलात्, कौतुकेन, अतिवाञ्छया, ईहातस्, सतैक्ष्ण्यं, सरभसं, व्यवसितं.

Eagerness, *s.* कौतूहलं, कुतूहलं, कौतुकं, अत्यभिलाषः, अतिस्पृहा, अतिवाञ्छा, अतिशयेच्छा, तैक्ष्ण्यं, तीक्ष्णता, उत्तापः, उच्चण्डता, प्रचण्डता, व्यग्रता, औत्सुक्यं, उद्योगः, प्रौढिः *f.*, रभसः, आग्रहः, गर्द्धः, उष्मः.

Eagle, *s.* उत्क्रोशः, कुररः -रा -री, गृध्रः, खरः, समुत्क्रोशः, पक्षिराजः, राजपक्षी *m.* (न्)

Eagle-eyed, *a.* उत्क्रोशदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदृष्टिः -ष्टिः -ष्टि.

Eaglet, *s.* उत्क्रोशशावकः, कुररशावकः, उत्क्रोशपोतकः, कुररशिशुः *m.*

Ear, *s.* कर्णः, श्रोत्रं, श्रुतिः *f.*, श्रवः -वणं, श्रोतः *n.* (स्), श्रवणपथः, शब्दग्रहः, ध्वनिग्रहः, शब्दाधिष्ठानं, पैञ्जूषः, कुहरं.—(Organ of hearing) श्रवणेन्द्रियं; 'outer ear,' श्रुतिमण्डलं, वेष्टनं; 'tip of the ear,' पालिः *f.*; 'lobe of the ear,' कर्णलतिका: 'root of the ear,' श्रुतिमूलं, कर्णजाहं; 'hollow of the ear,' श्रवणोदरं; 'ringing in the ear,' कर्णनादः, कर्णक्ष्वेडः: 'boring the ear,' कर्णवेधः; 'having the ears pricked up,' स्तब्धकर्णः -र्णा -र्णं: 'this noise splits the ear,' अयं शब्दः श्रुतिं छिनत्ति: 'he gives ear,' कर्णं ददाति.—(Ear of corn) कणिशः -शं, धान्यशीर्षकं, शस्यमञ्जरी.—(Handle) कर्णः, वारङ्गः.

Ear-ache, *s.* कर्णशूलं, कर्णवेदना, कर्णव्यथा.

Ear-bored, *a.* विद्धकर्णः -र्णा -र्णं, छिद्रितकर्णः -र्णा -र्णं, छिन्नकर्णः -र्णा -र्णं.

Ear-borer, *s.* कर्णवेधनिका -नी, कर्णारा.

Eared, *a.* (Having ears) कर्णी -र्णिनी -र्णि (न्), कर्णवान् -वती -वत् (त्), कर्णिलः -ला -लं -र्णिकः -का -कं.—(Having spikes) मञ्जरितः -ता -तं, सकणिशः -शा -शं.

Earlap, *s.* कर्णपालिः *f.*, श्रवणपालिः *f.*, कर्णलतिका, कर्णशष्कुली.

Ear-pick, *s.* कर्णकण्डूयनकः, कर्णनिर्घर्षणकः, कर्णशोधनी.

Ear-piercing, *a.* कर्णवेधी -धिनी -धि (न्), कर्णभेदी -दिनी -दि (न्).

Ear-ring, *s.* कुण्डलं, कर्णिका, अवतंसः, कर्णालङ्कारः, कर्णालङ्कृतिः *f.*, कर्णाभरणं, कर्णवेष्टनं, कर्णवेष्टकं, कर्णेन्दुः *f.*, उत्तंसः, कर्णान्दुः *f.*, तुटुः *m.*; 'wearing ear-rings,' कुण्डली -लिनी -लि (न्). कुण्डलधारी -रिणी -रि (न्), अवतंसितः -ता -तं.

Ear-shot, *s.* कर्णगोचरः -रा -रं, कर्णविषयः -या -यं, श्रुतिपर्य्यन्तं.

Ear-wax, *s.* कर्णमलः -लं, कर्णगूथः, कर्णविट् *f.* (ष्), तोक्मं, वारुण्डः -ण्डं.

Ear-wig, *s.* कर्णकीटी, कर्णजलूका, कर्णजलौका *f.* -काः *f.* (स्), कर्णदुन्दुभिः *f.*

Ear-witness, *s.* श्रुतसाक्षी *m.* (न्), स्वकर्णेन श्रुत्वा साक्ष्यं ददाति यः.

Earl, *s.* कुलीनपदानां मध्ये तृतीयपदभाक् *m.* (ज्), तृतीयकुलीनपदस्थः.

Earldom, *s.* तृतीयकुलीनपदं, तृतीयकुलीनपदस्थितस्य आधिपत्यं or अधिकारः.

Earliness, *s.* शीघ्रता, क्षिप्रता, अविलम्बः, पूर्व्वत्वं, प्राक्त्वं, प्राग्भावः, अग्रत्वं, प्रत्यग्रत्वं, सद्यस्त्वं, अचिरत्वं.—(Early maturity) प्राग्विहितकालात् पक्वता or परिणतत्वं.—(Of the day) सुप्रभातं, अतिप्रभातं, अतिप्रत्यूषः.

Early, *a.* (Forward, prior in time) पूर्व्वः -र्व्वा -र्व्वं, अग्रः -ग्रा -ग्रं, प्रत्यग्रः -ग्रा -ग्रं, प्राक्तनः -ना -नं, सद्यस्कः -स्का -स्कं, सद्यस्कालीनः -ना -नं, अचिरः -रा -रं.—(Mature before the time) अपूर्णकालः -ला -लं, प्राग्विहितकालात् or नियमितकालात् पूर्व्वं परिणतः -ता -तं or पक्वः -क्वा -क्वं; 'early decrepitude,' युवजरा.—(Early in the day) प्रगेतनः -नी -नं, अतिप्रगेतनः -नी -नं, पूर्व्वाह्णेतनः -नी -नं, प्रातःकालीनः -ना -नं, प्रभातीयः -या -यं, औषसिकः -की -कं, उषस्यः -स्या -स्यं, औषसः -सी -सं, वैयुष्टः -ष्टी -ष्टं.

Early, *adv.* (Soon) सद्यस्, अचिरेण, आशु, झटिति.—(In advance) अग्रे, प्राक्, पूर्व्वं, पूर्व्वं.—(Betimes in the morning) प्रभाते, अतिप्रभाते, प्रगे, अतिप्रगे, प्रत्यूषे, अतिप्रत्यूषे, प्रातर्, प्रातःकाले, सकाले, उषा, प्राह्णे, पूर्व्वाह्णे, प्राक्, व्युष्टं, समया, समयं, वेलायां.

To Earn, *v. a.* अर्ज् (c. 10. अर्जयति -यितुं), उपार्ज्, लभ् (c. 1. लभते, लब्धुं), उपलभ्, प्राप् (c. 5. -आप्नोति -आप्तुं), अवाप्, अधिगम् (c. 1. -गच्छति -गन्तुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्; आदा (c. 3. -ददाति -दत्ते -दातुं), उपादा, निर्विश् (c. 6. -विशति -वेष्टुं), कॢप् (c. 10. कल्पयति -यितुं); 'to earn money by labour,' श्रमेण धनम् उपार्ज्: 'earn wages,' वेतनम् अर्ह् (c. 1. अर्हति -र्हितुं).

Earned, *p. p.* अर्जितः -ता -तं, उपार्ज्जितः -ता -तं, श्रमेणोपार्ज्जितः -ता -तं, लब्धः -ब्धा -ब्धं, उपात्तः -त्ता -त्तं, निर्विष्टः -ष्टा -ष्टं.

Earnest, *a.* (Zealous) व्यग्रः -ग्रा -ग्रं, उद्युक्तः -क्ता -क्तं, उद्योगी -गिनी -गि (न्), आसक्तचेताः -ताः -तः (स्), समुद्यतः -ता -तं, उत्सुकः -का -कं, प्रयत्नवान् -वती -वत्, महोद्यमः -मा -मं, कृतप्रयत्नः -त्ना -त्नं, सचेष्टः -ष्टा -ष्टं, प्रचण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं उत्साही -हिनी -हि (न्), व्यवसायी -यिनी -यि (न्), तीक्ष्णः -क्ष्णा -क्ष्णं, अत्यनुरागी -गिणी -गि (न्).—(Intent) निविष्टः -ष्टा -ष्टं, अभिनिविष्टः -ष्टा -ष्टं, निविष्टमनाः -नाः -नः (स्), व्यासक्तः -क्ता -क्तं, कृतनिश्चयः -या -यं, अनन्यविषयात्मा -त्मा -त्म (न्), एकाग्रचित्तः -त्ता -त्तं. … desire,' अतिस्पृहा, कौतूहलं, गाढाभिलाषः, अतिशयेच्छा.

Earnest, *s.* (Seriousness, not jest) गौरवं, अलाघवं, धीरत्वं अपरिहासः; 'in earnest,' अपरिहासेन सगौरवं, अलाघवेन, सधैर्य्यं.—(Part paid beforehand) पूर्व्वदत्तभागः, पूर्व्वदत्तमूल्यं.—(Foretaste) पूर्व्वभुक्तिः *f.*—(Pledge) उपनिधिः *m.*, उपन्यासः, आधिः *m.*, निक्षेपः.

Earnestly, *adv.* यत्नतस्, यत्नात् सोत्साहं, महायत्नपूर्व्वं, महोद्यमपूर्व्वं, आसक्तचेतसा, व्यग्रं, निविष्टमनसा, अभिनिवेशेन, निर्बन्धेन, सोद्योगं, उत्सुकं, ईहातस्, अत्यनुरागेण; 'earnestly desiring,' अतीच्छः -च्छा -च्छं, अत्यभिलाषी -षिणी -षि (न्).

Earnestness, *s.* व्यग्रता, निवेशः, अभिनिवेशः, मनोनिवेशः, चित्तासक्तिः *f.*, उद्युक्तता, उद्योगः, मनोनिर्बन्धः, उच्चण्डता, औत्सुक्यं, उत्साहः, चेष्टा, अनुरागः, उग्रत्वं, तैक्ष्ण्यं, आत्मैकाग्र्यं, अभियुक्तता.

Earnings, *s. pl.* उपार्ज्जनं, उपार्ज्जितं, अर्ज्जनं, लब्धिः *f.*, लभ्यं, लभ्यांशः, वेतनं, वर्त्तनं, निर्वेशः, कर्म्मण्या, भरण्यं, निष्क्रयः.

Earth, *s.* (The globe) पृथिवी, पृथ्वी, भूः *f.*, धरणी, मही, वसुधा, धरित्री, धरा, मेदिनी, भूमिः *f.*, क्षितिः *f.*, अवनिः *f.* -नी, जगती, उर्व्वी, क्ष्मा, क्षोणी -णिः *f.*, क्षौणिः *f.*, वसुन्धरा, वसुमती, धारिणी, धात्री, भूगोलः, भूमण्डलं, भूलोकः, भूर्लोकः, रसा, गौः *f.* (गो), ज्या, स्थिरा, अचला, निश्चला, अनन्ता, कुः *f.*, मर्त्यः, काश्यपी, विश्वम्भरा, भूतधात्री, विश्वधारिणी, धारयित्री, सर्व्वंसहा, संसारः, गोत्रा, इला, इलिका, भूरिक् or भूरिक् *f.* (ज्), भुवनं, विष्टपः -पं, पिठरं, सागरमेखला, उदधिमेखला, समुद्राम्बरा, इलागोलं, अस्तनी, व्योमस्थली, रत्नगर्भा, गिरिकर्णिका, पीजमूः *f.* (-मू), नराधारा, दैत्यमेदजा, विश्वगन्धा, नृतूः *m.*

—(Ground, surface of the earth) भूमिः *f.*, भूतलं, पृथिवीतलं, क्षितितलं, महीतलं, क्ष्मातलं.—(Particles of earth, soil) मृद् *f.* मृत्तिका, मृदा, मृत्खण्डं, क्षितिखण्डः.

To EARTH, *v. a.* भूमौ निविश् in caus. (-वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or सम् in caus. (-र्पयति -यितुं), भूमिगर्भं -र्भां -र्भं कृ.

To EARTH, *v. n.* भूमिं निविश् (c. 6. -विशति -वेष्टुं), भूमौ गर्त्तं or विवरं कृ.

EARTH-BORN, *a.* भूमिजः -जा -जं, क्षितिजः -जा -जं, भूमिसम्भवः -वा -वं, स्थलजः -जा -जं, महीजः -जा -जं.

EARTHEN, *a.* (Made of earth) मार्त्तिकः -की -कं, मृण्मयः -यी -यं, मृत्तिकामयः-यी-यं, मृत्तिकानिर्म्मितः-ता-तं, महीमयः-यी-यं, माहेयः-यी-यं.

EARTHEN-WARE, *s.* मृण्मयभाण्डं, मृद्भाण्डानि *n. pl.*, कौलालकं, मार्त्तिकं.

EARTHINESS, *s.* मार्त्तिकत्वं, भौमत्वं, पार्थिवत्वं, माहेयता, स्थूलता.

EARTHLING, *s.* मर्त्यः, पृथिवीस्थः, पृथिवीवासी *m.* (न्), संसारी *m.* (न्), विषयी *m.* (न्), भूजन्तुः *m.*

EARTHLY, *a.* पार्थिवः -वी -वं, भौमः -मी -मं -मिकः -की -कं, लौकिकः -की -कं, ऐहलौकिकः -की -कं, माहेयः -यी -यं, सांसारिकः -की -कं, ऐहिकः -की -कं.

EARTHLY-MINDED, *a.* विषयासक्तचेताः -ताः -तः (स्), संसारासक्तमनाः -नाः -नः (स्), विषयोपभोगव्यग्रः -ग्रा -ग्रं.

EARTHQUAKE, *s.* भूकम्पः, भूमिकम्पः, धरणीचलनं, भूमिचलनं, भूचलं, भूक्ष्मायितं; 'to quake, as the earth,' क्ष्माय् (c. 1. क्ष्मायते -यितुं).

EARTH-WORM, *s.* भूजन्तुः *m.*, क्षितिजन्तुः *m.*, भूलता, महीलता कृमिः *m.*, वैराटः, किञ्चुलुकः.—(Mean person) नीचजनः, तुच्छजनः.

EARTHY, *a.* पार्थिवः -वी -वं, भौमः -मी -मं. *See* EARTHEN, EARTHLY.

EASE, *s.* सुखं, सौख्यं, अनायासः, विश्रामः, विश्रान्तिः *f.*, शमः, उपशमः, निर्वृत्तिः *f.*, निर्वृतिः *f.*, विरतिः *f.*, शान्तिः *f.*, स्वास्थ्यं, सुस्थता, सुस्थितिः *f.*; अकष्टं, अदुःखं, अक्लेशः, निरुद्वेगः, प्रसादः.—(Facility) सौकर्य्यं, सुकरत्वं, अनायासः, सौगम्यं; 'love of ease,' सुखेच्छा; 'at ease,' सुखेन, यथासुखं, निर्वृतः -ता -तं, निरुद्विग्नः -ग्ना -ग्नं.

To EASE, *v. a.* (Free from pain) दुःखं हृ (c. 1. हरति, हर्त्तुं) or शम् (c. 10. शमयति -यितुं), क्लेशं or उद्वेगं हृ.—(Alleviate) शम्, प्रशम्, उपशम्; शान्त्व् or सान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्; लघ (nom. लघयति -यितुं), लघूकृ, शान्तिं दा.—(Free from labour, remove a burden) निरायासं -सां -सं कृ, भारं हृ or उद्धृ or अपनी (c. 1. -नयति -नेतुं).—(Free from any thing) मुच् (c. 6. मुञ्चति, मोक्तुं).

EASEL, *s.* चित्रफलकः, चित्रमञ्चः, चित्राधारः, चित्रलेखापादपः.

EASEMENT, *s.* सुखं, सौख्यं, उपकारः -करणं, साहाय्यं.—(Evacuation) मलविसर्गः, मलशुद्धिः *f.*

EASILY, *adv.* (Without difficulty) सुखेन, सुखं, यथासुखं, अनायासेन, अनायासं, निरायासं, सुकरं, सौकर्य्येण, अयत्नेन, अयत्नतस्, अदुःखेन, अकष्टेन, अक्लेशेन, अश्रमेण, दुःखं विना, क्लेशं विना, हेलया. Often expressed by सु or सुख prefixed; as, 'easily borne,' सुसहः -हा -हं; 'easily obtained,' सुलभः -भा -भं; 'easily cut,' सुखच्छेद्यः -द्या -द्यं; 'easily attained,' सुखसाध्यः -ध्या -ध्यं; 'easily done,' अनायासकृतः -ता -तं; 'doing easily,' सुखकरः -रा -रं.—(With tranquillity) सविश्रामं, शान्त्या, शमेन, निरुद्विग्नं, स्वास्थ्येन.—(Leisurely) सावकाशं.—(Readily) कामं.

EASINESS, *s.* (Facility) सौकर्य्यं, सुकरत्वं -ता, सौगम्यं, सुगमत्वं, सुखत्वं, सुसाध्यता, अनायासः, निरायासत्वं.—(Readiness to comply) अनुकूलता, आनुकूल्यं, अनुरोधः.—(Freedom from pain) स्वास्थ्यं, शान्तिः *f.*, सुस्थता, अक्लेशः; 'easiness of circumstances,' द्रव्यानुकूल्यं.

EAST, *s.* (Eastern quarter) पूर्व्वदिक् *f.* (श्), प्राची, पूर्व्वा, प्राचीनदिक् (श्), पूर्व्वकाष्ठा, पूर्व्वाशा, सूर्य्योदयस्थानं; 'the eastern country प्राच्यः, प्राग्देशः, पूर्व्वदेशः.

EAST, EASTERLY, EASTERN, *a.* प्राङ् प्राची प्राक् (च्), प्राच्यः -च्या -च्यं, पूर्व्वः -र्व्वा -र्व्वं, प्राचीनः -ना -नं, पूर्व्वदिश्यः -श्या -श्यं, पूर्व्वदेशीयः -या -यं, पूर्व्वदिक्स्थः -स्था -स्थं, पूर्व्वदेशजः -जा -जं, पूर्व्वजः -जा -जं; 'facing the east,' प्राङ्मुखः -खा -खी -खं, पूर्व्वमुखः -खा -खं; 'Madhyadesha is east of Vinashana,' मध्यदेशो विनशनात् पूर्व्वः; 'as far as the eastern ocean,' आपूर्व्वसमुद्रात्; 'the eastern mountain,' उदयः, उदयगिरिः *m.*, उदयाचलः, उदयशैलः, पूर्व्वपर्व्वतः, पूर्व्वाद्रिः *m.* दिनमूर्द्धा *m.* (न्), पूर्व्वाचलः.

EASTER, *s.* ख्रीष्टपुनरुत्थानदिवसमुद्दिश्य महोत्सवः, ख्रीष्टपुनरुत्थानपर्व्व *n.* (न्)

EASTERLY, EASTWARD, *adv.* पुरस्तात्, पूर्व्वेण, पुरस्, प्राक्, पूर्व्वं, पूर्व्वदिशि, पूर्व्वदेशे, सूर्य्योदयं प्रति, पुरा, पूर्व्वपार्श्वे.

EASY, *a.* (Not difficult to be done) निरायासः -सा -सं, निरायासकृतः -ता -तं, अनायासी -सिनी -सि (न्), सुखः -खा -खं, सुकरः -रा -री -रं, सुसाध्यः -ध्या -ध्यं or सुखसाध्यः, सुगमः -मा -मं, लघुः -घुः -घ्वी -घु, अकष्टः -ष्टा -ष्टं, अकठिनः -ना -नं, अविषमः -मा -मं, सुखेन कार्य्यः -र्य्या -र्य्यं.—(Intelligible) सुबोधः -धा -धं, सुगम्यः -म्या -म्यं, सुग्राह्यः -ह्या -ह्यं, सुव्याख्येयः -या -यं.—(Free from pain, quiet) स्वस्थः -स्था -स्थं, सुस्थः -स्था -स्थं, शान्तः -न्ता -न्तं, सुखी -खिनी -खि (न्), दुःखहीनः -ना -नं, निरुद्वेगः -गा -गं, निर्वृतः -ता -तं; 'an easy, happy character,' सुखिस्वभावः.—(Complying) अनुकूलः -ला -लं; 'easy of utterance,' सुखोच्चार्य्यः -र्य्या -र्य्यं; 'easy of acquisition,' सुलभः -भा -भं, सुप्राप्यः -प्या -प्यं, सुखलभ्यः -भ्या -भ्यं or सुखेन लभ्यः; 'easy in its paces,' सुखायनः -ना -नं, सुखचारः -रा -रं; 'an easy case,' निःशल्यो ऽर्थः.

To EAT, *v. a.* and *n.* खाद् (c. 1. खादति -दितुं), सङ्खाद्; अद् (c. 2. अत्ति -त्तुं), समद्; भक्ष् (c. 10. भक्षयति -यितुं), सम्भक्ष्, अश् (c. 9. अश्नाति, अशितुं), समश्, पर्य्यश्, प्राश्, भुज् (c. 7. भुंक्ते, भोक्तुं), उपभुज्, जक्ष् (c. 2. जक्षिति -तुं), ग्रस् (c. 1. ग्रसते -सितुं), घस् (c. 1. घसति, घस्तुं), प्सा (c. 2. प्साति -तुं), चम् (c. 1. चमति -मितुं), आस्वद् or आस्वाद् (c. 1. -स्वदति -स्वादति -दितुं), गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, चर्व् (c. 1. चर्वति -र्वितुं), अभ्यवहृ (c. 1. -हरति -हर्त्तुं), अभ्याहृ, प्रत्यालिह् (c. 2. -लेढि -ढुं), प्रत्यवसो (c. 4. -स्यति -सातुं), उपयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), वल्भ् (c. 1. वल्भते -ल्भितुं), आहारं कृ; 'he bid them eat and drink,' अश्नीत पिबतेति तान् अवदत्.

EATABLE, *a.* खाद्यः -द्या -द्यं, खादनीयः -या -यं, भक्ष्यः -क्ष्या -क्ष्यं, भक्षणीयः -या -यं, भोज्यः -ज्या -ज्यं, भोजनीयः -या -यं, आद्यः -द्या -द्यं, अदनीयः -या -यं, आहार्य्यः -र्य्या -र्य्यं, अभ्यवहरणीयः -या -यं, अभ्याहार्य्यः -र्य्या -र्य्यं.

EATABLE, *s.* भक्ष्यं, भोज्यं, भोजनं, खाद्यद्रव्यं, भक्ष्यवस्तु *n.*, खाद्यं, प्राशित्रं, अशितम्भवं, आहार्य्यं, अभ्याहार्य्यः -र्य्यं.

EATEN, *p. p.* भक्षितः -ता -तं, खादितः -ता -तं, भुक्तः -क्ता -क्तं, जग्धः -ग्धा -ग्धं, अशितः -ता -तं, प्राशितः -ता -तं, आशितः -ता -तं, अभ्यवहृतः -ता -तं, प्सातः -ता -तं, आस्वादितः -ता -तं, खदितः -ता -तं, चर्वितः -ता -तं, गिलितः -ता -तं, प्रत्यवसितः -ता -तं, लिप्तः -प्ता -प्तं, प्रत्यालीढः -ढा -ढं, ग्रसितः -ता -तं, उपयुक्तः -क्ता -क्तं, वल्भितः -ता -तं.

EATER, *s.* खादकः, भक्षकः, अत्ता *m.* (त्), भोक्ता *m.* (तृ), भक्षयिता *m.* (तृ), भोजी *m.* (न्), आशी *m.* (न्); 'great eater,' बह्वाशी *m.* बहुभुक् *m.* (ज्).

EATING, *s.* (Act of) भक्षणं, खादनं, भोजनं, चर्वणं, अशनं, प्राशनं,

अभ्यवहरणं, अभ्यवहारः, अभ्याहारः, ग्रसनं, भक्षणं, जग्धिः f., आस्वादः -दनं, प्रत्यवसानं, गिलनं, प्सा, प्सानं, वल्भनं; 'eating together,' सहभोजनं, सग्धिः f.; 'eating of every thing,' सर्व्वान्नभोजी -जिनी -जि (न्), सर्व्वान्नीनः -ना -नं.

Eating-house, s. पक्वान्नविक्रयस्थानं, सिद्धान्नागारः, पक्वान्नपण्यशाला.

Eaves, s. पटलप्रान्तः, वलिकः -कं, नीध्रं, पटलान्तः.

Eaves-dropper, s. गूढश्रोता m. (तृ), प्रच्छन्ने स्थित्वा द्वयोः संलापं कौतुकभावात् शृणोति यः, प्रच्छन्नश्रावी m. (न्).

Ebb, s. पश्चाद्वेला, विपरीतवेला, परावेला, पश्चात्प्रवाहः, विपरीतप्रवाहः, समुद्रवेलाया विपरीतगतिः f., समुद्रजलस्य पुनरावर्त्तः or प्रत्यावर्त्तनं or परावर्त्तः or विपरिवर्त्तनं, वेलापरिवर्त्तनं; 'ebb and flow,' वेला.

To ebb, v. n. वेलावत् परावृत् (c. 1. -वर्त्तते -र्त्तितुं) or विपरिवृत् or परिवृत् or पुनरावृत्, विपरीतं गम् (c. 1. गच्छति, गन्तुं), पश्चात्प्रवाहं कृ.—(Decline) क्षि in pass. (क्षीयते); 'a place whence water has ebbed,' परापः -पा -पं.

Ebony, s. कोविदारः, कुद्दालः, क्षितिसारकः, केन्दुः m., युगपत्रकः, स्फूर्जकः, तिन्दुकः, कालस्कन्धः, कुलकः, चमरिकः.

Ebriety, s. मादः, उन्मादः, उन्मत्तता, मद्यपानजो ऽवस्थाविशेषः.

Ebriosity, s. उन्मादशीलता, सदोन्मत्तता, क्षीवता, नित्यक्षीवता.

Ebullition, s. उत्सेचनं, उत्सेकः, फूत्कारः, फेनकरणं, फेनता.—(Internal agitation) अन्तर्वेगः, अन्तःक्षोभः.

Eccentric, a. (Deviating from the centre) केन्द्रापगामी -मिनी -मि (न्) or मध्यस्थानाद् अपगामी, केन्द्रभ्रष्टः -ष्टा -ष्टं.—(From usual custom) लोकाचारविरुद्धः -द्धा -द्धं, व्यवहारविरुद्धः -द्धा -द्धं, नियमबहिर्गतः -ता -तं, उत्क्रान्तमर्य्यादः -दा -दं, विपथगामी -मिनी -मि (न्), उत्सूत्रः -त्रा -त्रं, व्यभिचारी -रिणी -रि (न्), अव्यवस्थितः -ता -तं, विषमः -मा -मं, विलक्षणः -णा -णं, लोकबाह्यः -ह्या -ह्यं, त्यक्तलोकमार्गः -र्गा -र्गं.

Eccentricity, s. लोकाचारविरोधः, उत्क्रमः, विधिविरुद्धता, लोकमर्य्यादाव्यभिचारः, वैषम्यं, उत्सूत्रता.

Ecclesiastic, a. पौरोहितः -ती -तं, मण्डलीसम्बन्धी -न्धिनी -न्धि (न्) or पौरोहित्यसम्बन्धी, धर्म्मोपदेशविषयः -या -यं, याजकीयः -या -यं.

Ecclesiastic, s. पुरोहितः, धर्म्माध्यापकः, धर्म्मशास्त्रोपदेशकः, आचार्य्यः, याजकः, धर्म्मशास्त्रव्यवसायी m. (न्).

Echo, s. प्रतिध्वनिः f., प्रतिशब्दः, प्रतिस्वनः, प्रतिरवः, प्रतिश्रुत् f., प्रतिध्वानः, प्रतिवचनं, ग्रहणं, अनुनादः, प्रतिगर्ज्जनं, व्यनुनादः, ध्वनिः f., स्वानं.

To echo, v. n. and a. ध्वन् (c. 1. ध्वनति -नितुं), प्रध्वन्, प्रतिध्वन्, स्वन् (c. 1. स्वनति -नितुं), प्रतिस्वन्, स्तन् (c. 1. स्तनति -नितुं), प्रतिध्वनिं कृ, प्रतिशब्दं कृ, प्रतिरवं कृ; 'to cause to echo,' अनुनद् in caus. (-नादयति -यितुं), व्यनुनद्.

Echoing, part. अनुनादयन् -यन्ती -यत् (त्), प्रतिगर्ज्जन् -र्ज्जन्ती -र्ज्जत् (त्); 'echoing with,' अनुनादः -दा -दं, निर्घुष्टः -ष्टा -ष्टं, परिसङ्घुष्टः -ष्टा -ष्टं; 'with the sound of the lute,' सवीणानुनादः -दा -दं.

Eclaircissement, s. परिशोधनं, विवरणं, विवृतिः f., व्याख्या, स्पष्टीकरणं.

Eclat, s. प्रशंसा, स्तुतिः f., श्लाघा, कीर्त्तिः f., ख्यातिः f., सुख्यातिः f., यशः n. (स्), विश्रुतिः f., विश्रावः, प्रतिष्ठा, शोभा, प्रभा; 'causing eclat,' कीर्त्तिकरः -री -रं.

Eclectic, a. उद्धारकः -का -कं, उद्धरणः -णा -णं, वरणकृत्, चूर्णिकृत्.

Eclipse, s. ग्रहः -हणं, उपरागः, उपसर्गः, उपप्लवः, राहुग्राहः, ग्रहपीडनं, राहुसंस्पर्शः, औपग्रहिकः, औपग्रस्तिकः, विमर्द्दनं, परागः; 'solar eclipse,' सूर्य्यग्रहः, सूर्य्योपरागः; 'lunar eclipse,' चन्द्रग्रहणं.

To eclipse, v. a. (Darken) तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, अन्धीकृ, मलिनीकृ, प्रछद् (c. 10. -छादयति -यितुं), आछद्.—(To be eclipsed as the sun, &c.) उपरञ्ज् in pass. (-रज्यते), उपसृज् in pass. (-सृज्यते); 'Ráhu eclipsed the sun,' राहुः सूर्य्यम् उपाग्रसत्.

Eclipsed, p. p. (As the sun, &c.) उपसृष्टः -ष्टा -ष्टं, उपरक्तः -क्ता -क्तं, ग्रस्तः -स्ता -स्तं, राहुग्रस्तः -स्ता -स्तं, राहुयुक्तः -क्ता -क्तं, उपप्लुतः -ता -तं, सोपप्लवः -वा -वं.—(Obscured) तिमिरावृतः -ता -तं, तमोवृतः -ता -तं, आच्छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, उपच्छन्नः -न्ना -न्नं, मलिनः -ना -नं, मलिनप्रभः -भा -भं.

Ecliptic, s. क्रान्तिमण्डलं, क्रान्तिः f., क्रान्तिकक्षः, रविमार्गः.

Eclogue, s. गोमेषपशुपालनादिविषयं क्षुद्रकाव्यं, ग्राम्यकविता.

Economic, economical, a. (Pertaining to the management of household concerns) गृहकर्म्मनिर्वाहसम्बन्धी -न्धिनी -न्धि (न्).—(Frugal) परिमितव्ययः -या -यं, स्वल्पव्ययः -या -यं, अव्ययः -या -यं, अमुक्तहस्तः -स्ता -स्तं, व्ययपराङ्मुखः -खी -खं, अबहुदः -दा -दं.

Economically, adv. परिमितव्ययेन, स्वल्पव्ययेन, अमुक्तहस्तेन.

Economics, s. गृहकार्य्यं, गृहव्यापारः, गृहकर्म्मनिर्व्वाहविद्या.

Economist, s. परिमितव्ययी m. (न्).—(Political economist) नीतिज्ञः, नीतिविद्याकुशलः, नीतिशास्त्रविद् m.

To economize, v. n. परिमितव्ययेन गृहकार्य्याणि निर्वह् in caus. (-वाहयति -यितुं).

Economy, s. (Management of a household) गृहकार्य्यनिर्वाहः, गृहकर्म्मनयः, गार्हस्थ्यं.—(Frugality) परिमितव्ययः, स्वल्पव्ययः, अमुक्तहस्तत्वं.—(Management) नयः, नीतिः f., प्रणयनं, निर्वाहः.—(Arrangement) विन्यासः, विरचनं, संविधानं, कल्पना.—(System) स्थितिः f., संस्थानं, मार्गः.—(Political economy) नीतिः f., नीतिविद्या, राजनीतिः f., राज्यकर्म्मनिर्वाहविद्या.

Ecstasied, a. सम्मोहितः -ता -तं, हर्षमोहितः -ता -तं, हर्षोन्मत्तः -त्ता -त्तं, प्रहर्षितः -ता -तं, आनन्दमग्नः -ग्ना -ग्नं, पुलकितः -ता -तं, रोमाञ्चितः -ता -तं.

Ecstasy, s. प्रमदः, उन्मदः, मादः, प्रहर्षः, मोहः, सम्मोहः, आनन्दः, परमानन्दः, हर्षोन्मत्तता, रोमहर्षः, अत्यन्ताह्लादः, अत्यानन्दः.

Ecstatic, ecstatical, a. मादनः -ना -नी -नं, उन्मादनः -ना -नं, मोहनः -ना -नी -नं, सम्मोही -हिनी -हि (न्), परमानन्ददः -दा -दं, परमाह्लादजनकः -का -कं, पुलकजनकः -का -कं.

Ecstatically, adv. सपरमानन्दं, सानन्दं, सहर्षं, परमाह्लादेन.

Ecumenical, a. सार्व्वलौकिकः -की -कं, सर्व्वसाधारणः -णी -णं.

Edacious, a. भक्षकः -का -कं, खादकः -का -कं, भोजी -जिनी -जि (न्), अद्मरः -रा -रं, घस्मरः -री -रं, प्रघसः -सा -सं, बहुभुक् m. (ज्), बह्वाशी -शिनी -शि (न्), भोजनलुब्धः -ब्धा -ब्धं.

Edacity, s. घस्मरता, अतिभोजनं, गृध्नता, जिघृक्षा.

Eddy, s. जलावर्त्तः, जलगुल्मः, आवर्त्तिका, आवर्त्तिनी, भृमिः m., भ्रमः, भ्रमरकः, अवघूर्णः, दरणिः m., आरणिः m., कूलहुण्डकः, कूलन्धयः, तालूरः.

Edentated, a. निर्दशनः -ना -नं, नीरदः -दा -दं, अदंष्ट्री -ष्ट्रिणी -ष्ट्रि (न्).

Edge, s. (Border, margin) प्रान्तः, अन्तः -न्तं, उपान्तं, समन्तः, पर्य्यन्तं, सीमा, परिसरः, कच्छः, उत्सङ्गः, कोटिः f., धारः.—(Edge or point of a blade) धारा -रं, कोटिः f., अश्रिः f., पालिः f., पाली, पालिका, अणिः m., आणिः m. f., शिखरः -रं, कोणः, अग्रं.—(Edge of a brook) कच्छः, तीरं, तटं, कूलं, कच्छान्तः; 'edge of a wood,' वनान्तं; 'edge of a mountain,' उत्सङ्गः, टङ्कः, धारा; 'edge of a roof,' पटलप्रान्तः, वलिकः, नीध्रं; 'two-edged,' द्विधारः -रा -रं, उभयतस् तीक्ष्णः -क्ष्णा -क्ष्णं; 'red-edged,' रक्तकोटिः -टिः -टि; 'state

of being set on edge (the teeth),' दन्तहर्षः.—(Keenness) तैक्ष्ण्यं, तीक्ष्णता, तेजः n. (स्); 'of appetite,' अग्निः m., रुचिः f.

To EDGE, *v. a.* (Border) प्रान्त (nom. प्रान्तयति -यितुं), समन्त, (समन्तयति -यितुं), पर्य्यन्तं कृ.—(Sharpen) तिज् (c. 10. तेजयति -यितुं), तीक्ष्णीकृ, निशो (c. 4. -श्यति -शातुं).

EDGED, *a.* (Having an edge) धारी -रिणी -रि (न्), धाराधरः -रा -रं, कोटिमान् -मती -मत् (त्).—(Sharp-edged) तीक्ष्णधारः -रा -रं, शितधारः -रा -रं, तीक्ष्णाग्रः -ग्रा -ग्रं, लघिः -घिः -घि; 'two-edged sword,' द्विधारखड्गः.

EDGELESS, *a.* धाराहीनः -ना -नं, कोटिरहितः -ता -तं, अतीक्ष्णः -क्ष्णा -क्ष्णं.

EDGING, *s.* कोटिः f.—(Of a garment) अञ्चलः, वस्त्राञ्चलः -लं.

EDIBLE, *a.* खाद्यः -द्या -द्यं, खादनीयः -या -यं, भोज्यः -ज्या -ज्यं, भक्ष्यः -क्ष्या -क्ष्यं, भक्षणीयः -या -यं, भोजनीयः -या -यं, आद्यः -द्या -द्यं, अदनीयः -या -यं, आहार्य्यः -र्य्या -र्य्यं.

EDICT, *s.* राजाज्ञा, राजशासनं, शासनं, धर्म्मकीलः; 'written order,' आज्ञापत्रं, शासनपत्रं, पट्टः.

EDIFICATION, *s.* ज्ञाननिष्ठा, निष्ठा, ज्ञानवृद्धिः f., ज्ञानप्राप्तिः f., शिक्षा, समुत्थानं, उप ...ः, ज्ञानदानं.

EDIFICE, *s.* हर्म्यं, शाला, भवनं, मन्दिरं, धाम n. (न्), सौधं, अट्टालिका, प्रासादः, सदनं, गृहं, वरणः, वाश्रं, प्राकारः.

EDIFIED, *p. p.* शिक्षितः -ता -तं, प्राप्तज्ञानः -ना -नं, वृद्धज्ञानः -ना -नं, लब्धज्ञानः -ना -नं, गृहीतज्ञानः -ना -नं, उपदिष्टः -ष्टा -ष्टं.

To EDIFY, *v. a.* निष्ठां कृ or जन् (c. 10. जनयति -यितुं), शिक्ष् (c. 10. शिक्षयति -यितुं), उपदिश् (c. 6. -दिशति -देष्टुं), ज्ञानं वृध् in caus. (वर्धयति -यितुं).

EDIFYING, *a.* निष्ठावर्धकः -का -कं, ज्ञानवर्धकः -का -कं, उपदेशकः -का -कं.

To EDIT, *v. a.* ग्रन्थं शोधयित्वा प्रकाश् (c. 10. -काशयति -यितुं), प्रकटीकृ.

EDITED, *p. p.* प्रकाशितः -ता -तं, शोधितः -ता -तं, शुद्धीकृतः -ता -तं.

EDITION, *s.* (Publication) प्रकाशनं, प्रकाशकरणं, प्रकटीकरणं.—(Number of copies printed at once) एकवारे मुद्रितो ग्रन्थसमूहः.

EDITOR, *s.* प्रकाशकः, ग्रन्थप्रकाशकः, ग्रन्थशोधकः.

To EDUCATE, *v. a.* विनी (c. 1. -नयति -नेतुं), अनुनी, शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, अधी in caus. (अध्यापयति -यितुं, rt. इ), उपदिश् (c. 6. -दिशति -देष्टुं), पुष् (c. 10. पोषयति -यितुं), पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, अभ्यस् (c. 4. -अस्यति -असितुं), संवृध् in caus. (-वर्धयति -यितुं), विद्यां दा.

EDUCATED, *p. p.* शिक्षितः -ता -तं, कृतविद्यः -द्या -द्यं, लब्धविद्यः -द्या -द्यं, गृहीतविद्यः -द्या -द्यं, कृताभ्यासः -सा -सं, कृतबुद्धिः -द्धिः -द्धि, कृतधीः -धीः -धि, अनुनीतः -ता -तं, विनीतः -ता -तं, शिष्टः -ष्टा -ष्टं, संवर्धितः -ता -तं, पोषितः -ता -तं, व्युत्पन्नः -न्ना -न्नं, संस्कृतः -ता -तं; 'well-educated,' सुशिक्षितः -ता -तं.

EDUCATION, *s.* शिक्षा, अध्यापनं, विनयः, अनुनयः, शिष्टिः f., शास्तिः f., शासनं, अनुशासनं, उपदेशः, विद्यादानं, अभ्यासः, पोषः -षणं, पुष्टिः f., पालनं, प्रतिपालनं, संवर्धनं, विद्याप्राप्तिः f., विद्यालब्धिः f., विद्याग्रहणं, विद्यार्ज्जनं, व्युत्पत्तिः f.

EEL, *s.* जलव्यालः, कुञ्चिका, अन्धाहिः m. f., पङ्कगतिः f.

EFFABLE, *a.* कथनीयः -या -यं, वाच्यः -च्या -च्यं, निर्वचनीयः -या -यं.

To EFFACE, *v. a.* अपमृज् (c. 2. -मार्ष्टि -र्ष्टुं), व्यामृज्, प्रमृज्, अवमृज्, उन्मृज्; व्यामृश् (c. 6. -मृशति -म्रष्टुं), अवमृश्; अवमृद् (c. 9. -मृद्नाति -मर्द्दितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विनश् in caus. (-नाशयति

-यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, उन्मूल् (c. 10. -मूलयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, अवमर्षणं कृ, व्यामर्षं कृ.

EFFACED, *p. p.* अपमृष्टः -ष्टा -ष्टं, उन्मृष्टः -ष्टा -ष्टं, व्यामृष्टः -ष्टा -ष्टं, उच्छिन्नः -न्ना -न्नं, अवमृदितः -ता -तं, मृदितः -ता -तं, लुप्तः -प्ता -प्तं.

EFFACEMENT, *s.* मार्जना, अपमार्जना, व्यामर्षः, अवमर्षणं, लोपः.

EFFECT, *s.* (That which is produced by an agent) उत्पन्नं, निष्पन्नं, उद्भूतं, सिद्धिः f., उत्पत्तिः f., कार्य्यं, वृत्तं, अनुवृत्तं, घटना.—(Consequence) फलं, कर्म्मफलं, फलानुसरं, प्रयोगः, प्रयुक्तिः f., उत्तरं, अनुसारः, परिणामः, अन्तः -न्तं, वृत्तान्तः, शेषः, अनुषङ्गः, कार्य्यं, अन्वयः, योगः, अनुभवः, भव्यं, फलोदयः, प्रतिफलं, उदर्कः, प्रत्ययः.—(Purpose) अर्थः, प्रयोजनं, अभिप्रायः; 'to what effect?' किमर्थं; 'he spoke to that effect,' इत्युवाच.—(Advantage, validity) फलं, प्रयोजनं, अर्थः, प्रभावः; 'of no effect,' निष्फलः -ला -लं, निरर्थकः -का -कं, निष्प्रयोजनः -ना -नं; 'to destroy the effect of any thing,' निष्फल (nom. निष्फलयति -यितुं), मोघीकृ.—(Completion) निष्पत्तिः f., सिद्धिः f.—(Fact) वस्तु n., अर्थः; 'in effect,' वस्तुतस्, अर्थतस्, तत्त्वतस्.—(Effects, goods) द्रव्याणि n. pl., वस्तूनि n. pl., सामग्र्यं, सामग्री, विभवः, रिक्थं.

To EFFECT, *v. a.* उत्पद् in caus. (-पादयति -यितुं), सम्पद्, निष्पद्, उपपद्, समुत्पद्; साध् in caus. (साधयति -यितुं), संसाध्, सिद्धीकृ, जन् in caus. (जनयति -यितुं), सञ्जन्; कृ (c. 8. करोति, कर्त्तुं), संस्कृ, तन् (c. 8. तनोति -नितुं), निर्मा (c. 2. -माति -तुं).

EFFECTED, *p. p.* सिद्धः -द्धा -द्धं, सम्पादितः -ता -तं, उत्पादितः -ता -तं, उपपादितः -ता -तं, निष्पादितः -ता -तं, समुत्पादितः -ता -तं, निष्पन्नः -न्ना -न्नं, सम्पन्नः -न्ना -न्नं, उत्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, कृतः -ता -तं, साधितः -ता -तं, सिद्धीकृतः -ता -तं, राद्धः -द्धा -द्धं, अनुराद्धः -द्धा -द्धं, 'one who has effected his object,' कृतार्थः, कृतार्थीभूतः.

EFFECTIBLE, *a.* साध्यः -ध्या -ध्यं, साधनीयः -या -यं, प्रसाध्यः -ध्या -ध्यं, निष्पाद्यः -द्या -द्यं, उपपाद्यः -द्या -द्यं, सम्पादनीयः -या -यं, करणीयः -या -यं, कर्त्तुं or उत्पादयितुं शक्यः -क्या -क्यं.

EFFECTIVE, *a.* साधकः -का -कं, साधिकः -का -कं, कार्य्यसाधकः -का -कं, प्रसाधकः -का -कं, सम्पादकः -का -कं, निष्पादकः -का -कं, प्रतिपादकः -का -कं, उत्पादकः -का -कं, निष्पादनः -ना -नं, कारकः -का -कं, कारी -रिणी -रि (न्), फलोत्पादकः -का -कं.

EFFECTIVELY, *adv.* अमोघं, सफलं, निष्पत्तिपूर्व्वं, निष्पादकप्रकारेण, अव्यर्थं, सबलं, प्रभावेन.

EFFECTLESS, *a.* निष्फलः -ला -लं, व्यर्थः -र्था -र्थं, मोघः -घा -घं, अनुपपन्नः -न्ना -न्नं, निर्बलः -ला -लं, निर्गुणः -णा -णं, निष्प्रयोजनः -ना -नं.

EFFECTUAL, *a.* अमोघः -घा -घं, फलोत्पादकः -का -कं, सफलः -ला -लं, अव्यर्थः -र्था -र्थं, अव्यर्थयानः -ना -नं, प्रबलः -ला -लं, बलवान् -वती -वत् (त्), शक्तिमान् -मती -मत् (त्), सप्रयोजनः -ना -नं, सार्थकः -का -कं, अनिरर्थकः -का -कं, समर्थः -र्था -र्थं, उपयोगी -गिनी -गि (न्).

EFFECTUALLY, *adv.* अमोघं, अव्यर्थं, सफलं, सप्रयोजनं, बलवत्.

To EFFECTUATE, *v. a.* साध् (c. 10. साधयति -यितुं), सम्पद् (c. 10. -पादयति -यितुं).

EFFEMINACY, *s.* स्त्रीत्वं, स्त्रीता, स्त्रैणं, क्लैब्यं, क्लीबता, सौकुमार्य्यं, कोमलता, मृदुता, स्त्रीव्यवहारित्वं, स्त्रीधर्म्मसेवा.

EFFEMINATE, *a.* स्त्रैणः -णी -णं, स्त्रीधर्म्मा -र्म्मा -र्म्म (न्), स्त्रीधर्म्मी -र्म्मिणी -र्म्मि (न्), स्त्रीव्यवहारी -रिणी -रि (न्), स्त्रीवदाचारी -रिणी -रि (न्), क्लीबः -बा -बं, सुकुमारः -रा -रं, कोमलः -ला -लं; 'an effeminate person,' निष्पुरुषः, कापुरुषः, गेहशूरः.

To effeminate, *v. a.* क्लीबीकृ, स्त्रीवत् कृ, निष्पुरुषीकृ, कोमलीकृ.

Effeminately, *adv.* स्त्रीवत्, निष्पुरुषवत् कापुरुषवत्, क्लीबवत्, नारीरूपेण, स्त्रीधर्म्मानुसारात्.

To effervesce, *v. n.* फेन (nom. फेनायते) उत्सेचनं कृ, फेनलः -ला -लं भू, फेनलीभू, बुद् कृ, बुद्बुद (nom. बुद्बुदायते), फुत्कारेण वृध् (c. 1. वर्धते -र्धितुं) or उच्छूनीभू, or उद्यीभू or आलोडितः -ता -तं भू.

Effervescence, *s.* फेनता, फेनलत्वं, फेनवत्त्वं, उत्सेकः, उत्सेचनं, उच्छूनीभावः, फेनभावः, उद्यत्वं, उत्तापः, अन्तःक्षोभः, आलोडनं.

Effervescing, *a.* फेनलः -ला -लं, फेनायमानः -ना -नं, फेनवान् -वती -वत् (त्), फेनिलः -ला -लं, बुद्बुदायमानः -ना -नं.

Effete, *a.* (Barren) वन्ध्यः -न्ध्या -न्ध्यं, अप्रसवी -विनी -वि (न्), निष्फलः -ला -लं, शुष्कः -ष्का -ष्कं.—(Worn out) जीर्णः -र्णा -र्णं.

Efficacious, *a.* प्रबलः -ला -लं, बलवान् -वती -वत् (त्), सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, शक्तिमान् -मती -मत् (त्), प्रतापी -पिनी -पि (न्), समर्थः -र्था -र्थं, क्षमः -मा -मं, गुणवान् -वती -वत् (त्), अलन्तमः -मा -मं, कार्य्यसाधकः -का -कं, सिद्धिकरः -री -रं, गुणकारी -रिणी -रि (न्), अमोघः -घा -घं, अव्यर्थः -र्था -र्थं, बलवान् -वती -वत् (त्), तेजोवान् -वती -वत् (त्).

Efficaciously, *adv.* प्रभावेण, अमोघं, प्रबलं, अलन्तमं, अलन्तरां, सफलं.

Efficacy, *s.* प्रभावः, प्राबल्यं, बलं, शक्तिः *f.*, सामर्थ्यं, तेजः *n.* (स्), प्रभविष्णुता, प्रतापः, बलवत्त्वं, अमोघता, फलवत्त्वं, फलोत्पादनं.

Efficiency, *s.* कार्य्यसिद्धिक्षमता, कार्य्यसम्पादकत्वं, कार्य्यकारित्वं, कर्म्मक्षमता, कर्म्मसामर्थ्यं, कार्य्योपयुक्तता. *See* Efficacy.

Efficient, *a.* कार्य्यसाधकः -का -धिका -कं, कार्य्यसम्पादकः -का -कं, कार्य्यसिद्धिक्षमः -मा -मं, कार्य्योपयुक्तः -क्ता -क्तं, कार्य्यक्षमः -मा -मं, कर्म्मक्षमः -मा -मं, अलङ्कर्म्मीणः -णा -णं, फलोत्पादकः -का -कं. *See* Efficacious.

Efficiently, *adv.* सिद्धिपूर्व्वं, अमोघं, सप्रभावं, यथा कर्म्म सिध्यते तथा.

Effigy, *s.* प्रतिमा -मानं, मूर्त्तिः *f.*, प्रतिकायः, प्रतिरूपं, प्रतिकृतिः *f.*, रूपं, आकृतिः *f.*, आकारः, वपुः *n.* (स्).

Efflorescence, *s.* पुष्पोत्पादनं, पुष्पोत्पत्तिः *f.*, प्रस्फोटनं.—(Eruption on the skin) दद्रुः *m.*, उदर्द्दः, पुष्पाकारस्फोटोत्पत्तिः *f.*

Effluence, *s.* निःसारः -रणं, निःस्रावः, प्रस्रवः -वणं, प्रवृत्तिः *f.*, प्रवाहः, उत्पत्तिः *f.*, निर्गमः.

To ENCOURAGE, *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, उच्छ्वस्; प्रोत्सह् in caus. (-साहयति -यितुं), समुत्सह्, परिशान्त्व् (c. 10. -शान्त्वयति -यितुं), प्रहृष् in caus. (-हर्षयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्ग्रह्, प्रदिश् in caus. (-देशयति -यितुं), तेजः or विश्वासं or आशां कृ or दा or वृध् in caus. (वर्धयति -यितुं) or संवृध्; प्रवृत् in caus. (-वर्त्तयति -यितुं).

ENCOURAGED, *p. p.* आश्वासितः -ता -तं, समाश्वासितः -ता -तं, उच्छ्वासितः

-ता -तं, प्रोत्साहितः -ता -तं, उत्तेजितः -ता -तं, अनुगृहीतः -ता -तं.

ENCOURAGEMENT, *s.* (Act of encouraging) आश्वासनं, समाश्वासनं, उच्छ्वासः, प्रोत्साहः -हनं, प्रवर्त्तः, प्ररोचनं, उत्तेजनं, समुत्तेजनं, तेजोवर्धनं, वर्धनं, संवर्धनं.—(Favor) अनुग्रहः, आग्रहः, संग्रहः, ग्रहः, साहाय्यं, उपकारः, अनुपालनं, आनुकूल्यं, अभ्युपपत्तिः *f.*, अनुरागः.

ENCOURAGER, *s.* आश्वासकः, प्रोत्साहकः, प्रवर्त्तकः, अनुग्रहीता *m.* (तृ).

ENCOURAGING, *a.* आश्वासकः -सिका -कं, आशावर्धकः -का -कं, तेजस्करः -री -रं, सान्त्वदः -दा -दं, प्ररोचनदः -दा -दं.

To ENCROACH, *v. n.* क्रमे क्रमे प्रसृप् (c. 1. -सर्पति -सर्प्तुं), पदे पदे प्रसृप्य पराधिकारं or परभूमिम् आविश् (c. 6. -विशति -वेष्टुं) or प्रविश् or समाविश्; क्रमे क्रमे स्वाधिकारमर्य्यादाम् अतिक्रम्य पराधिकारं or परभूमिम् आक्रम् (c. 1. -क्रामति -क्रमितुं) or अभिक्रम् or अध्याक्रम्; पराधीनं किञ्चिद् द्रव्यम् अधर्म्मतः or अन्यायतो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or अभिग्रह् or ग्रस् (c. 1. ग्रसते -सितुं) or स्वीकृ or आत्मीयं कृ.

ENCROACHER, *s.* पदे पदे प्रसर्पकः or पराधिकारग्रसकः or पराधिकाराक्रामकः or स्वभूमिमर्य्यादातिक्रामकः or पराधीनद्रव्यग्राहकः.

ENCROACHING, ENCROACHMENT, *s.* पदे पदे प्रसर्पणं or पराधिकारप्रवेशः; क्रमे क्रमे पराधिकाराक्रमणं or परभूम्यभिक्रमः or स्वाधिकारातिक्रमणं or स्वाधिकारोल्लङ्घनं or पराधीनद्रव्यग्रसनं or पराधिपत्याक्रान्तिः *f.* or स्वाधिपत्यातिक्रान्तिः *f.*

To ENCRUST, *v. a.* *See To* INCRUST.

To ENCUMBER, *v. a.* (Load, clog) भारं दा or न्यस् (c. 4. -अस्यति -असितुं), भारवन्तं -वतीं -वत् कृ, भाराक्रान्तं -न्तां -न्तं कृ, भारेण परिबाध् (c. 1. -बाधते -धितुं) or गतिपरिबाधां कृ or उपरुध् (c. 7. -रुणद्धि -रोद्धुं) or प्रतिरुध् or प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं) or स्तम्भ् in caus. (स्तम्भयति -यितुं) or विघ्न (nom. विघ्नयति -यितुं) or आयम् in caus. (-यामयति -यितुं) or क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं).—(Load with debts) ऋणभारग्रस्तं -स्तां -स्तं कृ.

ENCUMBERED, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), भारयुक्तः -क्ता -क्तं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, बाधितः -ता -तं, प्रतिरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं.

ENCUMBRANCE, *s.* (Load) भारः, धुरा.—(Impediment) बाधा -धकः, प्रतिबन्धः, प्रतिरोधः, उपरोधः, विघ्नः, स्तम्भः, प्रतिष्टम्भः, विष्टम्भः, प्रत्यूहः, अन्तरायः.—(Useless addition) अनुबन्धः.—(Debt) ऋणभारः, ऋणं, धारणा.

ENCYCLICAL, *a.* चाक्रिकः -की -कं, चाक्रेयः -यी -यं, मण्डली -लिनी -लि (न्), वर्त्तुलः -ला -लं; 'letter,' बहुजनानुद्दिश्य पत्रं, बहुसाधारणपत्रं.

ENCYCLOPÆDIA, *s.* विद्याचक्रं, विद्यामण्डलं, विद्यामुक्तावलिः *f.*, विद्याहारावलिः *f.*, विद्यावलिः *f.*, विद्यापर्य्यायः.

END, *s.* (Extremity) अन्तः -न्तं, पर्य्यन्तं, प्रान्तः, समन्तः, पारः -रं.—(Termination) अवसानं, पर्य्यवसानं, अवसायः, अवसादः, अवसन्नता, सातिः *f.*, सायः, अन्तः -न्तं, शेषः, पर्य्यवशेषः, परिणामः, क्षयः, गतिः *f.*, निधनं, अत्ययः.—(Conclusion) समाप्तिः *f.*, निष्पत्तिः *f.*, सिद्धिः *f.*, निर्वृत्तिः *f.*, निष्ठा.—(Cessation) विरतिः *f.*, विरामः, अवरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, विनिवृत्तिः *f.*, विच्छेदः, उपशमः.—(Limit, term) अवधिः *m.*, सीमा, अन्तरं.—(Last stage) परिणामः.—(Death) अन्तकालः, अन्तः, अन्तकः, निधनं, अत्ययः, अपगमः, अपायः, मरणं, नाशः, विनाशः, देहक्षयः, उपसंहारः.—(Extreme point) अग्रं, अग्रभागः, मुखं, शिखा, शिखरं, अणिः *m.*—(Consequence) अन्तः, फलं, फलमुत्तरं, उत्तरं, परिणामः.—(Object, scope) अर्थः, आशयः, अभिप्रायः, तात्पर्य्यं, उद्देशः, अभिसन्धिः *m.*, कार्य्यं, कार्य्यवस्तु *n.*; 'end of the world,' प्रलयः, क्षयः, कल्पः, कल्पान्तः, संवर्त्तः, उपसंयमः; 'end of day,' दिवसात्ययः, दिनावसानं; 'end of night,' निशावसानं, क्षपात्ययः; 'end of a garment,' अञ्चलः, पटाञ्चलः -लं, तरी, तरिः *f.*, दशा, वस्तिः *m.*; 'hear my speech to the end,' मद्वचनम् अवसानपर्य्यन्तं or शेषं यावत् शृणु.

To END, *v. a.* अवसो (c. 4. -स्यति -सातुं), समाप् in caus. (-आपयति -यितुं), सम्पॄ in caus. (-पूरयति -यितुं), निर्वृत् in caus. (-वर्त्तयति -यितुं) or निवृत् with abl. c. (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विनिवृत्, विरम् in caus. (-रमयति -यितुं) or विरम् with abl. c. (c. 1. -रमति -रन्तुं), उपरम्, व्युपरम्, निष्पद् in caus. (-पादयति -यितुं), साध् in caus. (साधयति -यितुं), प्रतियत् (c. 10. -यातयति -यितुं). Often rendered by अन्त as the last member of a compound; as, 'death ends life,' मरणान्तं जीवितं.—(Get to the end) पार् (c. 10. पारयति -यितुं), तीर (c. 10. तीरयति -यितुं).

To END, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, व्युपरम्; निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विनिवृत्, निर्वृत्, समाप् in pass. (-आप्यते), निष्पद् in pass. (-पद्यते), विगम् (c. 1. -गच्छति -गन्तुं), अपया (c. 2. -याति -तुं), विच्छिद् in pass. (-छिद्यते), अवसद् (c. 1. -सीदति -सत्तुं), शम् (c. 4. शाम्यति, शमितुं). Often expressed by अन्तः -न्ता -न्तं or पर्य्यन्तः -न्ता -न्तं as the last member of a compound; as, 'a name which ends in a long vowel,' दीर्घवर्णान्तं नाम; 'ending at the ocean,' सागरपर्य्यन्तः -न्ता -न्तं.

To ENDANGER, *v. a.* संशयस्थं -स्थां -स्थं कृ, शङ्कास्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ, भयस्थं -स्थां -स्थं कृ, सन्देहदोलस्थं -स्थां -स्थं कृ, संशयापन्नं -न्नां -न्नं कृ, शङ्कास्पदं कृ; 'one who endangers his life,' संशयितजीवितः.

To ENDEAR, *v. a.* प्रियं -यां -यं कृ, हृदयप्रियं -यां -यं कृ, दयितं -तां -तं कृ, प्रीतं -तां -तं कृ, [illegible] स्नेहपात्रं कृ.

ENDEARING, *a.* प्रियङ्करः -री -रं, प्रियकरः [illegible] प्रीतिकरः -री -रं.

ENDEARMENT, *s.* प्रेमकारणं, स्नेहकारणं, प्रियता -त्वं, प्रेमहेतुः, प्रेमकर्म्म *n.* (न्), शृङ्गारकर्म्म *n.*, [illegible], हावः, विलासः; 'word of endearment,' प्रियवाक्यं.

ENDEAVOR, *s.* यत्नः, प्रयत्नः, उद्यमः, उद्योगः, उत्साहः, चेष्टा -ष्टनं, व्यवसायः, अध्यवसायः, समुद्यमः, प्रवृत्तिः *f.*, आरम्भः, उपक्रमः, आयासः, प्रयासः, गुरणं, विचेष्टितं, उत्थानं, [illegible], व्यापारः, घटना.

To ENDEAVOR, *v. n.* यत् (c. 1. यतते -तितुं), प्रयत्, चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, सञ्चेष्ट्, व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, उद्यम् (c. 1. -यच्छति -यन्तुं), व्यायम्, घट् (c. 1. घटते -टितुं), उपक्रम् (c. 1. -क्रमते -मितुं), आयस् (c. 4. -यस्यति -यसितुं), प्रयम्, आरभ् (c. 1. -रभते -रब्धुं), समारभ्, वाह् (c. 1. वाहते -हितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), उद्योगं कृ, प्रयासं कृ.

ENDEAVORED, *p. p.* व्यवसितः -ता -तं, अध्यवसायितः -ता -तं, चेष्टितः -ता -तं, कृतप्रयत्नः -त्ना -त्नं, समुद्यतः -ता -तं, कृतोत्साहः -हा -हं, वाहितः -ता -तं.

ENDED, *p. p.* अवसितः -ता -तं, अवसन्नः -न्ना -न्नं, पर्य्यवसितः -ता -तं, सन्नः -न्ना -न्नं, सितः -ता -तं, निवृत्तः -त्ता -त्तं, निर्वृत्तः -त्ता -त्तं, वृत्तः -त्ता -त्तं, समाप्तः -प्ता -प्तं, परिणतः -ता -तं, गतः -ता -तं, विगतः -ता -तं, अस्तङ्गतः -ता -तं, अस्तङ्गमितः -ता -तं.

ENDING, *s.* अन्तः -न्तं, शेषः, समाप्तिः *f.*; 'of a word,' पदान्तं, पदस्य शेषवर्णः.

ENDICT, ENDICTMENT, ENDITE. *See* INDICT, &c.

ENDIVE, *s.* शाकप्रभेदः, शुक्तैलादिना सह खादनीयः शाकः.

ENDLESS, *a.* अनन्तः -न्ता -न्तं -नकः -का -कं, अत्यन्तः -न्ता -न्तं, अपर्य्यन्तः -न्ता -न्तं, अशेषः -षा -षं, निरवधिः -धिः -धि, अपारः -रा -रं, निरन्तरः -रा -रं, अविरतः -ता -तं, अनवरतः -ता -तं, अमितः -ता -तं, अतिदीर्घः -र्घा -र्घं.

ENDLESSLY, *adv.* अत्यन्तं, अविरतं, अनारतं, निरन्तरं, अशेषतस्.

ENDLESSNESS, *s.* आनन्त्यं, अनन्तता -त्वं, अत्यन्तत्वं, अविरामः, अविरतिः *f.*, अविच्छेदः, आनन्तर्य्यं, नित्यता.

ENDORSE, ENDORSEMENT. *See* INDORSE, INDORSEMENT.

To ENDOW, *v. a.* (With a portion) यौतुकं or शुल्कं or वृत्तिं दा, प्रतिष्ठां कृ, प्रतिष्ठा in caus. (-ष्ठापयति -यितुं).—(Furnish with any thing) युज् (c. 10. योजयति -यितुं), समायुज्, सम्पन्नं -न्नां -न्नं कृ, युक्तं -क्तां -क्तं कृ, दा; 'to be endowed with,' युज् in pass. (युज्यते); 'he is endowed with all good qualities,' सर्व्वगुणोपेतो ऽस्ति.

ENDOWED, *p. p.* (With a portion, &c.) प्रतिष्ठितः -ता -तं, गृहीतशुल्कः -ल्का -ल्कं.—(Furnished with any thing) युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, उपेतः -ता -तं, सम्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, अन्वितः -ता -तं, प्रयुक्तः -क्ता -क्तं, शीलः -ला -लं, शीलितः -ता -तं.—(With a grant of property) निबद्धः -द्धा -द्धं.

ENDOWMENT, *s.* (Settling a dower on a woman) यौतुकदानं, प्रतिष्ठा.—(Settling property for religious purposes) देवस्वदानं, अग्रहारदानं, प्रतिष्ठा.—(The property so settled) देवस्वं, अग्रहारः.—(Grant of money for support), निबन्धः -न्धनं.—(Quality, gift of nature) गुणः, शक्तिः *f.*

To ENDUE, *v. a.* सम्पन्नं -न्नां -न्नं कृ, युक्तं -क्तां -क्तं कृ, युज् (c. 10. योजयति -यितुं), समायुज्, दा; 'to be endued,' सम्पन्नः -न्ना -न्नं भू, युज् in pass. (युज्यते). *See* ENDOW.

ENDUED, *p. p.* सम्पन्नः -न्ना -न्नं, उपेतः -ता -तं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, अन्वितः -ता -तं, आपन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं.

ENDURANCE, *s.* (Bearing with patience) सहनं, सहत्वं, सहता, साहनं, सहिष्णुता -त्वं, सहनशीलता, क्षमा, तितिक्षा, क्षान्तिः *f.*, मर्षः -र्षणं, धैर्य्यं, धृतिः *f.*, धीरत्वं, स्थैर्य्यं, उत्साहः; 'of austerities,' दमः.—(Continuance) संस्थितिः *f.*, स्थितिः *f.*, स्थायित्वं.

To ENDURE, *v. a.* (Bear) सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), संक्षम्, तिज् in des. (तितिक्षते -क्षितुं), मृष् (c. 4. मृष्यति -ते, मर्षितुं, c. 10. मर्षयति -यितुं), धृ in caus. (धारयति -यितुं), उपागम् (c. 1. -गच्छति -गन्तुं), भुज् (c. 7. भुंक्ते, भोक्तुं), धैर्य्यम् आलम्ब् (c. 1. -लम्बते -म्बितुं) or अवलम्ब्. Sometimes expressible by शक्; as, 'I cannot endure to see him,' तं द्रष्टुं न शक्नोमि.

To ENDURE, *v. n.* (Last, continue) स्था (c. 1. तिष्ठति -ते, स्थातुं), चिरस्थायी -यिनी -यि भू.

ENDURED, *p. p.* सोढः -ढा -ढं, विसोढः -ढा -ढं, क्षान्तः -न्ता -न्तं, तितिक्षितः -ता -तं, मर्षितः -ता -तं; 'not to be endured,' न सह्यः -ह्या -ह्यं, न क्षन्तव्यः -व्या -व्यं.

ENDURER, *s.* सोढा *m.* (ढृ), विसोढा *m.*, क्षन्ता *m.* (न्तृ), सहः in comp.

ENDURING, *a.* (Lasting) स्थायी -यिनी -यि (न्), चिरस्थायी &c., दीर्घकालस्थायी &c., संस्थः -स्था -स्थं, अविसर्गी -र्गिणी -र्गि (न्).—(Patient) सहिष्णुः -ष्णुः -ष्णु, सहनशीलः -ला -लं, तितिक्षुः -क्षुः -क्षु, सहनः -ना -नं, क्षमः -मा -मं, सहः -हा -हं.

ENDWISE, *adv.* अग्रे, अग्रतस्, अग्राग्रं, अग्रम् उपधाय or अवलम्ब्य.

ENEMY, *s.* शत्रुः *m.*, रिपुः *m.*, अरिः *m.*, अरातिः *m.*, विपक्षः, वैरी *m.* (न्), अमित्रः, प्रतिपक्षः, अपकारी *m.* (न्), अपकर्त्ता *m.* (र्तृ), द्वेषी *m.* (न्), द्वेष्टा *m.* (ष्टृ), द्वेषणः, द्विषन् *m.* (त्), द्विट् *m.* (ष्), विद्विट्, विद्वेषी *m.* (न्), अहितः, विरोधी *m.* (न्), प्रतिरोधी *m.* -रोधकः, सपत्नः, दुर्हृद् *m.*, अभिघाती *m.* (न्), प्रत्यवस्थाता *m.* (तृ), परः, पारक्यः, परिपन्थी *m.* (न्) -न्थकः, प्रत्यर्थी *m.* (न्), शात्रवः, प्रतिबन्धकः, विजिगीषुः *m.* 'enemy in the rear,' पार्ष्णिग्राहः; 'having no enemies, अभूतशत्रुः -त्रुः -त्रु.

ENERGETIC, *a.* उत्साही -हिनी -हि (न्), उद्योगी -गिनी -गि (न्), व्यवसायी -यिनी -यि (न्), उद्यमी -मिनी -मि (न्), उत्साहयुक्तः -क्ता -क्तं, सोत्साहः -हा -हं, सोद्योगः -गा -गं, उद्युक्तः -क्ता -क्तं, तेजोवान् -वती -वत् (त्), तेजस्वी -स्विनी -स्वि (न्), कृतप्रयत्नः -त्ना -त्नं, प्रयत्नवान् -वती -वत् (त्), सयत्नः -त्ना -त्नं, कर्म्मोद्युक्तः -क्ता -क्तं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), कर्म्मशीलः -ला -लं, कर्म्मी -र्म्मिणी -र्म्मि (न्), शक्तिमान् -मती -मत् (त्), शक्तिरूपः -पा -पं, अनलसः -सा -सं, अतन्द्रः -न्द्रा -न्द्रं, अतन्द्रितः -ता -तं, आलस्यशून्यः -न्या -न्यं, प्रगल्भः -ल्भा -ल्भं, वीर्य्यवान् -वती -वत् (त्).

ENERGETICALLY, *adv.* सोत्साहं, सोद्योगं, सव्यवसायं, उद्यमेन, सयत्नं, शक्त्या, प्रयत्नतस्, सवीर्य्यं, ससत्त्वं, पौरुषेण.

ENERGY, *s.* (Power) तेजः *n.* (स्), वीर्य्यं, शक्तिः *f.*, सत्त्वं, प्रभावः, पौरुषं.—(Activity) उद्योगः, व्यवसायः, उद्यमः, उत्साहः, सत्त्वोत्साहः, कर्म्मोद्योगः, सयत्नता, प्रवृत्तिः *f.* The divine energies or mothers of the gods are ब्राह्मी, माहेश्वरी, ऐन्द्री, वाराही, वैष्णवी, कौमारी, कौवेरी, चामुण्डा.

To ENERVATE, *v. a.* दुर्बलीकृ, शिथिलीकृ, तेजः or शक्तिं or वीर्य्यं हृ (c. 1. हरति, हर्त्तुं), क्लीव in caus. (क्लीवयति -यितुं), क्षीणीकृ, क्षीणं -णां -णं कृ, क्लीवीकृ.

ENERVATED, *p. p.* हृततेजाः -जाः -जः (स्), क्षीणवीर्य्यः -र्य्या -र्य्यं, शिथिलशक्तिः -क्तिः -क्ति.

ENERVATION, *s.* दुर्बलीकरणं, शिथिलीकरणं, तेजोहरणं, तेजोहानिः *f.*, वीर्य्यक्षयः, शक्तिहानिः *f.*, क्लीवभावः, क्लीवत्वं, प्रमीला.

To ENFEEBLE, *v. a.* दुर्बलीकृ, अल्पबलीकृ, तेजः or सत्त्वं हृ (c. 1. हरति, हर्त्तुं).

ENFEEBLED, *p. p.* क्षीणशक्तिः -क्तिः -क्ति, शिथिलबलः -ला -लं, हृततेजाः -जाः -जः (स्), क्षीणसत्त्वः -त्त्वा -त्त्वं, गतवीर्य्यः -र्य्या -र्य्यं, सामर्थ्यहीनः -ना -नं, दुर्बलः -ला -लं; 'by age,' जरितः -ता -तं, जरातुरः -रा -रं.

To ENFORCE, *v. a.* (Give strength to) दृढीकृ, स्थिरीकृ, दृढ (nom. दृढयति -यितुं), संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं), सबलं -लां -लं कृ, तेजः or शक्तिं दा.—(Put in act by force) बलेन or बलात्कारेण कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं) or प्रणी (c. 1. -णयति -णेतुं) or निर्वह् in caus. (-वाहयति -यितुं) or निष्पद् in caus. (-पादयति -यितुं). The causal form of a verb may express the sense of enforce; as, 'to enforce payment,' दा in caus. (दापयति -यितुं).

ENFORCED, *p. p.* बलेन प्रवर्त्तितः -ता -तं or निष्पादितः -ता -तं or प्रणीतः -ता -तं, दृढीकृतः -ता -तं, स्थिरीकृतः -ता -तं, संस्तब्धः -ब्धा -ब्धं; 'payment must be enforced,' दाप्यः (*i. e.* he must be made to pay).

ENFORCEMENT, *s.* (Putting in act by force) बलात्कारः, बलेन प्रवर्त्तनं or प्रणयनं or निष्पादनं.—(Corroboration) दृढीकरणं, स्थिरीकरणं, संस्तम्भः, दृढप्रमाणं.—(Urgent evidence) दृढप्रमाणं, गुरुप्रमाणं.

To ENFRANCHISE, *v. a.* (Free from slavery or confinement) दास्यात् or बन्धनाद् मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं) or विमुच् or मोक्ष् (c. 10. मोक्षयति -यितुं) or विसृज् (c. 6. -सृजति -स्रष्टुं).—(Admit to the privileges of citizens) स्वाधीनीकृ, स्वतन्त्रीकृ, स्ववशीकृ, पौरजनानाम् अधिकारान् दा or प्रदा.

Enfranchisement, *s.* (Liberation from slavery or custody) दास्यमोक्षः, बन्धनमोक्षः, दासभावाद् विमोक्षः or विमुक्तिः *f.*—(Admission to the privileges of citizen, &c.) पौरजनाधिकारदानं, स्वाधीनीकरणं.

To engage, *v. a.* (Occupy, employ) व्यापृ in caus. (-पारयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं); 'be occupied in,' व्यापृ in pass. (-प्रियते) with loc. c., वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत् with loc. c., आस्था (c. 1. -तिष्ठति -स्थातुं) with acc. c., सेव् (c. 1. सेवते -वितुं), निरतः -ता -तं भू.—(Appoint to any business) नियुज्, विनियुज्, अधिकृ, प्रकृ, वृ (c. 10. वरयति -यितुं).—(Bind by contract) नियमपत्रेण or नियमेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), प्रतिज्ञापत्रेण बन्ध्.—(Encounter, attack) युद्धं कृ, सङ्ग्रामं कृ, समाघातं कृ, संयुध् (c. 4. -युध्यते -योद्धुं), आक्रम् (c. 1. -क्रामति -क्रमितुं).—(Win, draw) आराध् (c. 10. -राधयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), आकृष् (c. 1. -कर्षति -क्रष्टुं), अनुनी (c. 1. -नयति -नेतुं).—(Pledge, pawn) पण् (c. 1. पणते -णितुं), आधीकृ.

To engage, *v. n.* (In battle) संयुध् (c. 4. -युध्यते -योद्धुं), युद्धारम्भं कृ, रणाभियोगं कृ.—(Undertake) आरभ् (c. 1. -रभते -रब्धुं), उपक्रम् (c. 1. -क्रमते -मितुं), व्यवसो (c. 4. -स्यति -सातुं).—(Promise, make a contract) प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), सम्प्रतिज्ञा, नियमं कृ, समयाकृ, पणं कृ, अङ्गीकृ, पण् (c. 1. पणते -णितुं), उपगम् (c. 1. -गच्छति -गन्तुं); 'make a contract of marriage,' विवाहप्रतिज्ञां कृ, विवाहसम्बन्धं कृ, वाग्दानं कृ, वाग्निश्चयं कृ; 'better die than engage in such an act as this,' वरं मरणं न च ईदृशे कर्म्मणि प्रवृत्तिः.

Engaged, *p. p.* (Occupied in) व्यापृतः -ता -तं, निरतः -ता -तं, रतः -ता -तं, प्रवृत्तः -त्ता -त्तं, परः -रा -रं, निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, आस्थितः -ता -तं, अवस्थितः -ता -तं, वृत्तः -त्ता -त्तं, निविष्टः -ष्टा -ष्टं, निवेशितः -ता -तं; 'engaged in business,' कर्म्मनिष्ठः -ष्ठा -ष्ठं, कर्म्मोद्युक्तः -क्ता -क्तं, कार्य्यवान् -वती -वत् (त्), क्रियावान् &c., कर्म्मी -र्म्मिणी -र्म्मि (न्), व्यापारी -रिणी -रि (न्), व्यवसायी -यिनी -यि (न्), कर्म्मसक्तः -क्ता -क्तं; 'being engaged in,' प्रवर्त्तमानः -ना -नं; 'engaged in devotion,' योगारूढः -ढा -ढं; 'engaged in reading,' अध्ययनरतः -ता -तं, अध्ययनाभिमुखः -खा -खं; 'engaged in meditation,' ध्यानपरः -रा -रं, ध्यानतत्परः -रा -रं; 'engaged in one's own duties,' स्वधर्म्मे निरतः -ता -तं; 'engaged in a quarrel,' कलहायितः -ता -तं.—(By contract, promised) प्रतिज्ञातः -ता -तं, संविदितः -ता -तं, उपगतः -ता -तं, अभ्युपगतः -ता -तं, अभ्युपेतः -ता -तं, अङ्गीकृतः -ता -तं, प्रज्ञप्तः -प्ता -प्तं, कृतसङ्केतः -ता -तं, कृतसमयः -या -यं, कृतसम्बन्धः -न्धा -न्धं.—(Engaged to be married) प्रतिज्ञाविवाहितः -ता, वाग्दत्तः -त्ता, प्रज्ञः -ज्ञा.

Engagement, *s.* (Occupation) व्यापारः, कार्य्यं, कर्म्म *n.* (न्), प्रवृत्तिः *f.*, प्रवर्त्तनं, वृत्तिः *f.*, व्यवसायः, व्यवहारः.—(Agreement, contract) प्रतिज्ञा -ज्ञानं, सङ्केतः, संविद् *f.*, समयः, नियमः, संस्कारः, उपगमः, अभ्युपगमः, अभ्युपायः, पणः, परिपणनं, व्यवस्था, प्रज्ञप्तिः *f.*, समाधिः *m.*; 'to make an engagement,' समयं कृ, समयाकृ. *See To* engage, *v. n.* 'To keep an engagement,' प्रतिज्ञातं पाल् (c. 10. पालयति -यितुं); 'to break an engagement,' समयं भिद् (c. 7. भिनत्ति, भेत्तुं), समयभेदं कृ, विसंवादं कृ; 'one who has fulfilled his engagement,' कृतप्रतिज्ञः.—(Marriage-contract) वाग्निश्चयः, विवाहप्रतिज्ञा.—(Battle) युद्धं, रणाभियोगः, समाघातः, सङ्ग्रामः, सम्प्रहारः.—(Obligation) अवश्यकर्त्तव्यं.

Engaging, *a.* (Attractive, pleasing) मनोहरः -रा -रं, हृदयग्राही -हिणी -हि (न्), हृदयकर्षी -र्षिणी -र्षि (न्), मित्रयुः -युः -यु, मित्रवत्सलः -ला -लं, अनुरञ्जकः -का -कं, हृदयङ्गमः -मा -मं, अनुरागजनकः -का -कं.

Engagingly, *adv.* मनोहरं, सप्रणयं, यथा हृदयम् आकृष्यते तथा.

To engender, *v. a.* (Beget) जन् in caus. (जनयति -यितुं), सञ्जन्, विजन्, प्रसू (c. 2. -सूते, c. 4. -सूयते -सोतुं).—(Produce) उत्पद् in caus. (-पादयति -यितुं), जन् in caus.

Engendered, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, उत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, उद्भवः -वा -वं, in comp.

Engine, *s.* यन्त्रं, उपकरणं, साधनं, विलाक्षः; 'military engine,' युद्धयन्त्रं, युद्धास्त्रं; 'fire-engine,' अग्निनिर्वापणयन्त्रं.

Engineer, *s.* यन्त्रकारः -रकः, यन्त्रनिर्म्माणशिल्पविद्, यन्त्रविद्, अस्त्रज्ञः.

Engineering, *s.* यन्त्रकारस्य व्यापारः or कर्म्म *n.* (न्).

To engird, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), मण्डल (nom. मण्डलयति -यितुं).

England, *s.* श्वेतद्वीपः, इङ्गलण्डनामको देशः.

To engorge, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), निगॄ (c. 6. -गिरति -गरितुं -रीतुं).

To engrapple, *v. n.* बाहूबाहवि or हस्ताहस्ति युध् (c. 4. युध्यते, योद्धुं).

To engrasp, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्तुं).

To engrave, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं, c. 5. तक्ष्णोति), त्वक्ष् (c. 1. त्वक्षति -क्षितुं), रेखादिना अलङ्कृ or उपस्कृ or मुद्रीकृ or मुद्र् (nom. मुद्रयति -यितुं).

Engraved, *p. p.* तष्टः -ष्टा -ष्टं, रेखादिना मुद्रितः -ता -तं or मुद्रीकृतः -ता -तं.

Engraver, *s.* तक्षकः, तष्टा *m.* (ष्टृ), त्वष्टा *m.* (ष्टृ), मुद्राकरः.

Engraving, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्).—(A print) मुद्रा.

To engross, *v. a.* (Thicken) स्थूलीकृ, घनीकृ, सान्द्रीकृ, निविडीकृ.—(Fatten) पुष् in caus. (पोषयति -यितुं), प्यै in caus. (प्याययति -यितुं).—(Take the whole) सर्व्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), पूर्व्वं ग्रह्, समुदायं ग्रह्; 'to engross the mind,' चित्तैकाग्र्यं जन् (c. 10. जनयति -यितुं), चित्तम् अनन्यविषयं कृ or एकप्रवणं कृ.—(Purchase the whole of a commodity with a view to sell at a higher price) अधिकमूल्येन विक्रयार्थं सर्व्वभाण्डानि पूर्व्वं क्री (c. 9. क्रीणाति -णीते, क्रेतुं), पूर्व्वक्रयं कृ, प्रख्या (c. 2. -ख्याति -तुं).—(Copy in a large distinct hand) सुव्यक्ताक्षरैः or स्पष्टरूपेण लिख् (c. 6. लिखति, लेखितुं), सुस्पष्टाक्षराणि लिखित्वा उत्तॄ (c. 1. -तरति -रितुं -रीतुं).

Engrossed, *p. p.* (Absorbed) निविष्टः -ष्टा -ष्टं, अभिनिविष्टः -ष्टा -ष्टं, आविष्टः -ष्टा -ष्टं, निमग्नः -ग्ना -ग्नं, आसक्तचेताः -ताः -तः (स्), अनन्यविषयः -या -यं, एकप्रवणः -णा -णं, एकाग्रः -ग्रा -ग्रं, परायणः -णा -णं; 'by fear,' भयैकप्रवणः -णा -णं.—(Forestalled) पूर्व्वं गृहीतः -ता -तं or क्रीतः -ता -तं.

Engrosser, *s.* (Forestaller) पूर्व्वक्रेता *m.* (तृ), सर्व्वभाण्डक्रेता, पूर्व्वग्राहकः, प्रख्याता *m.* (तृ).—(Copier) सुस्पष्टरूपेण लेखकः, सुव्यक्तलिपिकारः.

To engulph, *v. a.* जलावर्त्ते or जलगुल्मे निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवघूर्णेन ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्.

To enhance, *v. a.* वृध् in caus. (वर्धयति -यितुं), उपचि (c. 5. -चिनोति -चेतुं), अधिकीकृ, अधिकं -कां -कं कृ, गर (nom. गरयति -यितुं), प्रचुरीकृ; 'is enhanced,' उपचीयते.

Enhanced, *p. p.* वर्धितः -ता -तं, अधिकीकृतः -ता -तं, उपचितः -ता -तं.

Enhancement, *s.* वृद्धिः *f.*, वर्धनं, उपचयः, विवर्धनं, उन्नतिः *f.*, अभ्युदयः.

Enigma, *s.* गूढं, गूढार्थं, गूढप्रश्नः, प्रवह्लिः *f.* -ह्लिका, प्रहेलिका, प्रश्नदूती,

श्लेषः, श्लेषोक्तिः *f.*

ENIGMATICAL, *a.* गूढः -ढा -ढं, गूढार्थः -र्था -र्थं, निगूढार्थः -र्था -र्थं, सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं, द्व्यर्थः -र्था -र्थं, दुर्ज्ञेयः -या -यं, बोधागम्यः -म्या -म्यं, अव्याख्येयः -या -यं, व्याख्यागम्यः -म्या -म्यं, वक्रः -क्रा -क्रं.

ENIGMATICALLY, *adv.* गूढं, सगूढार्थं, निगूढार्थतस्, अस्पष्टं, अव्यक्तं, वक्रोक्त्या.

To ENJOIN, *v. a.* आदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, प्रदिश्, विनिर्दिश्, समादिश्, सन्दिश्, व्यादिश्, उपदिश्; आज्ञा in caus. (-ज्ञापयति -यितुं), समाज्ञा, नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), विनियुज्, सन्नियुज्, चुद् (c. 10. चोदयति -यितुं), प्रचुद्, सञ्चुद्, शास् (c. 2. शास्ति, शासितुं), विधा (c. 3. -दधाति -धातुं).

ENJOINED, *p. p.* आदिष्टः -ष्टा -ष्टं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः -ष्टा -ष्टं, प्रचोदितः -ता -तं, सञ्चोदितः -ता -तं, विहितः -ता -तं; 'by the vedas,' वेदविहितः -ता -तं.

To ENJOY, *v. a.* भुज् (c. 7. भनक्ति, भुंक्ते, भोक्तुं), उपभुज्, अनुभुज्, परिभुज्, अधिभुज्; अश् (c. 5. अश्नुते, c. 9. अश्नाति, अशितुं), समश्, उपाश्; अनुभू (c. 1. -भवति -वितुं), आस्वद् or आस्वाद् (c. 1. -स्वदति or -स्वादति -दितुं), पुष् (c. 4. पुष्यति, पोष्टुं) with acc. c.—(Delight in) रम् (c. 1. रमते, रन्तुं), अभिरम्, नन्द् (c. 1. नन्दति -न्दितुं), अभिनन्द्, रुच् (c. 1. रोचते -चितुं).—(Possess with satisfaction) सुखेन or सन्तोषेण उपयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or धृ (c. 10. धारयति -यितुं) or धा (c. 3. धत्ते, धातुं) or सेव् (c. 1. सेवते -वितुं).

ENJOYABLE, *a.* भोग्यः -ग्या -ग्यं, उपभोग्यः -ग्या -ग्यं, सुभोगीनः -ना -नं, भोगवान् -वती -वत् (त्), रम्यः -म्या -म्यं, रमणीयः -या -यं, सुभगः -गा -गं, आनन्ददः -दा -दं, सुखदः -दा -दं, मनोरमः -मा -मं, कमनीयः -या -यं, आस्वादनीयः -या -यं.

ENJOYABLY, *adv.* सभोगं, सोपभोगं, रमणीयं, सुभगं, जोषं.

ENJOYED, *p. p.* भुक्तः -क्ता -क्तं, उपभुक्तः -क्ता -क्तं, कृतोपभोगः -गा -गं, अनुभूतः -ता -तं, अशितः -ता -तं, आस्वादित -ता -तं.

ENJOYMENT, *s.* (Fruition) भोगः, भुक्तिः *f.*, उपभोगः, परिभोगः, अनुभवः, आस्वादः -दनं, फलभोगः, सुखास्वादः, निर्वेशः.—(Pleasure) सुखं, सौख्यं, रतिः *f.*, रतं, आनन्दः, हर्षः, आह्लादः, आमोदः, प्रमोदः, सन्तोषः, मदः.

To ENKINDLE, *v. a.* उद्दीप् in caus. (-दीपयति -यितुं), उत्तप् in caus. (-तापयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), समिन्ध् (c. 7. -इन्द्धे -न्धितुं), प्रज्वल् in caus. (-ज्वलयति -यितुं), संज्वल्, सन्धुक्ष् (c. 10. -धुक्षयति -यितुं).

ENKINDLED, *p. p.* उद्दीप्तः -प्ता -प्तं, समिद्धः -द्धा -द्धं, उत्तेजितः -ता -तं, उत्तापितः -ता -तं, सन्तप्तः -प्ता -प्तं, ज्वलितः -ता -तं, सन्धुक्षितः -ता -तं.

To ENLARGE, *v. a.* (Extend, make large) विस्तृ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), प्रथ् (c. 10. प्रथयति -यितुं), विशालीकृ, विपुलीकृ, प्रचुरीकृ, प्रसृ in caus. (-सारयति -यितुं).—(Augment) वृध् in caus. (वर्धयति -यितुं), संवृध्; ऋध् in caus. (ऋधयति -यितुं), आप्यै in caus. (-प्याययति -यितुं), समाप्यै, स्फाय् in caus. (स्फावयति -यितुं), स्फीतीकृ, वृद्धिं नी (c. 1. नयति, नेतुं), बृंह् (c. 10. बृंहयति -यितुं), उपबृंह्.

To ENLARGE, *v. n.* (Grow large) वृध् (c. 1. वर्धते -र्धितुं), अभिवृध्, विवृध्, प्रवृध्; विशालीभू, विपुलीभू, प्रचुरीभू, प्यै (c. 1. प्यायते, प्यातुं), उपचि in pass. (-चीयते), स्फाय् (c. 1. स्फायते -यितुं), आस्फाय्, वितन् in pass. (-तन्यते), विस्तृ in pass. (-स्तीर्य्यते), वृद्धिम् इ (c. 2. एति -तुं), प्ररुह् (c. 1. -रोहति -रोढुं).—(Describe at large) वर्ण् (c. 10. वर्णयति -यितुं), उपवर्ण्, संवर्ण्, सुविस्तरेण वद् (c. 1. वदति -दितुं), वाग्विस्तारेण or वाक्प्रपञ्चेन व्याख्या (c. 2. -ख्याति -तुं), प्रपञ्च् (c. 10. -पञ्चयति -यितुं), अत्युक्तिं कृ.

ENLARGED, *p. p.* प्रवृद्धः -द्धा -द्धं, प्रथितः -ता -तं, उपचितः -ता -तं, वर्धितः -ता -तं, प्ररूढः -ढा -ढं, शूनः -ना -नं, स्फीतः -ता -तं, स्फातः -ता -तं, आप्यायितः -ता -तं, बृंहितः -ता -तं.

ENLARGEMENT, *s.* वृद्धिः *f.*, वर्धनं, प्रवृद्धिः *f.*, विवृद्धिः *f.*, स्फातिः *f.*, स्फीतिः *f.*, विस्तारः, आप्यायनं, बृंहणं, विपुलता, विशालता, स्फारः, प्रपञ्चः, बाहुल्यं.

ENLARGER, *s.* वृद्धिकरः, स्फीतिकरः, विस्तारकः, संवर्धकः.

To ENLIGHTEN, *v. a.* विकाश् in caus. (-काशयति -यितुं), प्रकाश्, द्युत् in caus. (द्योतयति -यितुं), प्रद्युत्, उद्द्युत्, दीप्, in caus. (दीपयति -यितुं), विदीप्, उद्दीप्; विराज् in caus. (-राजयति -यितुं), भास in caus. (भासयति -यितुं), प्रभास्, उद्भास्, भ्राज् in caus. (भ्राजयति -यितुं), विमल (nom. विमलयति -यितुं).—(Instruct) उपदिश् (c. 6. -दिशति -देष्टुं).

ENLIGHTENED, *p. p.* प्रकाशितः -ता -तं, प्रद्योतितः -ता -तं, उद्द्योतितः -ता -तं, दीपितः -ता -तं, सुप्रभातः -ता -तं.—(Instructed) गृहीतार्थः -र्था -र्थं, प्राप्तबुद्धिः -द्धिः -द्धि, उपदिष्टः -ष्टा -ष्टं.

To ENLIST, *v. a.* (Enter names on a list) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.—(Enlist soldiers) सैन्यमध्ये समारुह् in caus. or सैन्यनामावलिमध्ये आरुह् or अभिलिख्, युद्धकर्म्मणि व्यापृ in caus. (-पारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं), अस्त्राणि ग्रह् in caus. (ग्राहयति -यितुं).—(Gain over to one's own party) स्वपक्षीकृ, आत्मपक्षीकृ, आत्मसात्कृ.

ENLISTED, *p. p.* सैन्यनामावलिमध्ये समारोपितः -ता -तं, अभिलिखितः -ता -तं.

ENLISTING, *s.* सैन्यनामावलिमध्ये समारोपणं or आरोपणं or नामाभिलेखनं, युद्धे प्रवर्त्तनं.

To ENLIVEN, *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस् उत्तिज् in caus. (-तेजयति -यितुं), तेजः कृ or दा.—(Make cheerful) हृष् in caus. (हर्षयति -यितुं), ह्लाद् in caus. (ह्लादयति -यितुं), आह्लाद्, उल्लस् in caus. (-लासयति -यितुं).

ENMITY, *s.* वैरं, वैरिता, शत्रुता, रिपुता, अरिता, शात्रवं, विपक्षता, द्वेषः -षणं, विद्वेषः, विरोधः, वैरभावः, प्रतिद्वन्द्वं, प्रतिपक्षता, विद्विष्टता, अप्रीतिः *f.*, परता.

To ENNOBLE, *v. a.* (Raise to nobility) कुलीनपदे नियुज् (c. 7. -युंक्ते -योक्तुं) or प्रतिपद् in caus. (-पादयति -यितुं).—(Dignify) शुभ् in caus. (शोभयति -यितुं), सम्मन् in caus. (-मानयति -यितुं), उत्कर्षं कृ, उन्नतिं कृ, यशः कृ.

ENNOBLEMENT, *s.* प्रतिपत्तिः *f.*, उत्कर्षः, पदवृद्धिः *f.*, कुलीनता, पदसमुन्नतिः *f.*

ENNUI, *s.* ग्लानिः *f.*, क्लान्तिः *f.*, श्रान्तिः *f.*, विषादः, विषण्णता, विमर्दः.

ENORMITY, *s.* (Atrocious crime) अतिपातकं, अतिपापं, महापातकं, महापापं, अघोरपातकं.—(Atrociousness) अतिदुष्टता, अघोरता, घोरता.

ENORMOUS, *a.* (Beyond measure, exceeding) अतिमात्रः -त्रा -त्रं, अत्यन्तः -न्ता -न्तं, अपरिमितः -ता -तं.—(Very large) अतिमहान् -हती -हत् (त्), सुमहान् &c., अतिबृहन् -हती -हत् (त्).—(In body) अतिकायः -या -यं, बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं, भीमविग्रहः -हा -हं.

ENORMOUSLY, *adv.* अत्यन्तं, अतिमात्रं, अतिशयेन, सुमहत्, अतिमहत्.

ENOUGH, *adv.* अलं, यथेष्टं, इत्यलं, पर्य्याप्तं, प्रचुरं, प्रचुरतरं, उपयुक्तं, कृतं, यथावत्; 'quite enough,' अलन्तरां; 'enough of this,' अलम् अनेन; 'enough of ceremony,' कृतम् आदरेण; 'to be enough for,' क्लृप् (c 1. कल्पते -ल्पितुं).

ENOUGH, *a.* यथेष्टः -ष्टा -ष्टं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, समर्थः -र्था

-प्तं, पर्य्याप्तः -प्ता -प्तं, प्रचुरः -रा -रं -रतरः -रा -रं, सम्पूर्णः -र्णा -र्णं, बहुलः -ला -लं; 'just food enough to satisfy hunger,' तृप्तिमात्रोचितम् अन्नं; 'food enough for a year,' संवत्सरनिर्वाहसमर्थम् अन्नं.

ENOUGH, *s.* यथेष्टत्वं, पर्य्याप्तिः *f.*, प्राचुर्य्यं, उपयुक्तत्वं, बाहुल्यं, निर्वाहः; 'having enough for subsistence,' अलञ्जीविकः -का -कं.

ENQUIRE, ENQUIRY. *See* INQUIRE, &c.

To ENRAGE, *v. a.* कुप् in caus. (कोपयति -यितुं), प्रकुप्, संकुप्; क्रुध् in caus. (क्रोधयति -यितुं), रुष् in caus. (रोषयति -यितुं), क्रोधं or कोपं जन् (c. 10. जनयति -यितुं).

To be ENRAGED, *v. n.* क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), संक्रुध्, अभिसंक्रुध्; कुप् (c. 4. कुप्यति, कोपितुं), प्रकुप्, सङ्कुप्; रुष् (c. 4. रुष्यति, रोषितुं), with dat. c.

ENRAGED, *p. p.* क्रुद्धः -द्धा -द्धं, कुपितः -ता -तं, प्रकोपितः -ता -तं, प्रकुपितः -ता -तं, संक्रुद्धः -द्धा -द्धं, कोपाकुलः -ला -लं, रुषितः -ता -तं, रुष्टः -ष्टा -ष्टं, संरब्धः -ब्धा -ब्धं, उपजातकोपः -पा -पं, जातामर्षः -र्षा -र्षं, आगतमन्युः -न्युः -न्यु, जातरोषः -षा -षं, इद्धमन्युः -न्युः -न्यु, उन्मन्यितः -ता -तं.

To ENRAPTURE, ENRAVISH, *v. a.* परमहर्षेण मुह् in caus. (मोहयति -यितुं) or सम्मुह्, अतिशयेन प्रहृष् in caus. (-हर्षयति -यितुं) or परिहृष्; 'to be enraptured,' अत्यन्तं हृष् (c. 4. हृष्यति, हर्षितुं), पुलकितः -ता -तम् अस्, परमहर्षेण मुह् (c. 4. मुह्यति, मोहितुं).

ENRAPTURED, *p. p.* हर्षमोहितः -ता -तं, सम्मोहितः -ता -तं, प्रहर्षितः -ता -तं, सम्प्रहृष्टः -ष्टा -ष्टं, पुलकितः -ता -तं, रोमाञ्चितः -ता -तं, परमानन्दितः -ता -तं, विस्मितः -ता -तं, हर्षोन्मत्तः -त्ता -त्तं.

ENRAVISHMENT, *s.* परमहर्षेण मोहः, सम्मोहः, प्रहर्षः, हर्षावेशः, परमानन्दः, अत्यन्ताह्लादः, विस्मयः, उन्मदः.

To ENRICH, *v. a.* (Make rich) सधनं -नां -नं कृ, आढ्यं -ढ्यां -ढ्यं कृ, समृद्धीकृ, वृध् in caus. (वर्धयति -यितुं), धनं or अर्थं वृध्.—(Make fertile) आप्यै in caus. (-प्याययति -यितुं), स्फाय् in caus. (स्फावयति -यितुं), स्फीतीकृ, सफल (nom. सफलयति -यितुं).—(Adorn) शुभ् in caus. (शोभयति -यितुं), उपशुभ्.

ENRICHED, *p. p.* संवर्धितः -ता -तं, आप्यायितः -ता -तं, स्फीतीकृतः -ता -तं.

ENRICHING, *a.* अर्थकरः -री -रं, अर्थजनकः -का -कं, शोभकृत् *m. f. n.*

To ENROLL, *v. a.* नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.

ENROLLED, *p. p.* नामावलिपत्रे समारोपितः -ता -तं or अभिलिखितः -ता -तं, अभिलिखितनामा -मा -म (न्), आरोपितनामा -मा -म (न्).

ENROLLER, *s.* नामलेखकः, नामाभिलेखकः, नामसमारोपकः, नामारोपकः.

ENROLMENT, *s.* नामाभिलेखनं, नामसमारोपणं, नामारोपणं, नामलिखनं, नामलेखनं.

ENS, *s.* (Being) भूतं, अधिभूतं, सत्त्वं, भावः, सत्ता, सम्भवः.

ENSAMPLE, *s.* *See* EXAMPLE.

To ENSANGUINE, *v. a.* रक्तेन or शोणितेन लिप् (c. 6. लिम्पति, लेप्तुं), रक्ताक्तं -क्तां -क्तं कृ.

To ENSCONCE, *v. a.* छद् (c. 10. छादयति -यितुं), संछद्, प्रछद्, रक्ष् (c. 1. रक्षति -क्षितुं), गुप् (c. 1. गोपायति, गोप्तुं), अभिगुप्, गुह् (c. 1. गूहति -हितुं); 'ensconce one's self,' आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, संश्रि, आत्मानं गुप् or गुह्.

ENSCONCED, *p. p.* समाश्रितः -ता -तं, गुप्तः -प्ता -प्तं, प्रच्छन्ने स्थापितः -ता -तं.

To ENSEAR, *v. a.* दह् in caus. (दाहयति -यितुं), आरम् ऋ in caus. (अर्पयति -यितुं).

To ENSHIELD, *v. a.* आछद् (-छादयति -यितुं), गुप् (c. 1. गोपायति, गोप्तुं).

To ENSHRINE, *v. a.* पवित्रद्रव्यं सुगहनाधारे or सुगहनभाण्डे or सुप्रतिष्ठितभाजने निविश् in caus. (-वेशयति -यितुं) or रक्ष् (c. 1. रक्षति -क्षितुं).

ENSHRINED, *p. p.* सुप्रतिष्ठितभाण्डे or सुगहनाधारे रक्षितः -ता -तं.

ENSIFORM, *a.* अस्याकारः -रा -रं, खड्गाकृतिः -तिः -ति, खड्गाकारः -रा -रं.

ENSIGN, *s.* (Banner) पताका, ध्वजः, ध्वजपटः, केतनं, केतुः *m.*, वैजयन्ती, केतुवसनः, जयन्तः, कदली -लिका, उच्छ्रूलः.—(Badge) चिह्नं, लिङ्गं, ध्वजः, व्यञ्जनं, लक्षणं.—(Officer). *See* the next word.

ENSIGN-BEARER, *s.* ध्वजी *m.* (न्), ध्वजवान् *m.* (त्), पताकी *m.* (न्), वैजयन्तिकः, ध्वजधारी *m.* (न्), पताकाधारी *m.* (न्), पताकावाहकः.

To ENSLAVE, *v. a.* दासीकृ, वशीकृ, करदीकृ, दास (nom. दासयति -यितुं), दास्ये or दासत्वे नियुज् (c. 7. -युनक्ति -योक्तुं), दास्यं गम् in caus. (गमयति -यितुं).

ENSLAVED, *p. p.* दासीकृतः -ता -तं, दास्यं गमितः -ता -तं, दास्यगतः -ता -तं.

ENSLAVEMENT, *s.* दास्यं, दासत्वं, दासभावः, परप्रेष्यत्वं, बन्धनं.

To ENSNARE, *v. a.* *See* INSNARE.

To ENSUE, *v. n.* अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रवृत्, अनुसृ (c. 1. -सरति -सर्त्तुं), उत्पद् in pass. (-पद्यते), जन् in pass. (जायते), अन्वि (c. 2. अन्वेति -तुं rt. इ), अनुया (c. 2. -याति -तुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा, पश्चाद् आगम् (c. 1. -गच्छति -गन्तुं), सम्भू, प्रभू, उद्भू.

ENSUED, *p. p.* उत्पन्नः -न्ना -न्नं, प्रवृत्तः -त्ता -त्तं, वृत्तः -त्ता -त्तं, जातः -ता -तं.

ENSUING, *a.* आगामी -मिनी -मि (न्), भावी -विनी -वि (न्), उत्तरकालीनः -ना -नं, अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), अनागतः -ता -तं; 'in the ensuing year,' आगामिवत्सरे.

To ENSURE, *v. a.* *See* INSURE.

ENTABLATURE, ENTABLEMENT, *s.* स्तम्भस्य यो भागः स्तम्भाग्रे-पलक्षते.

ENTAIL, *s.* (An estate inherited lineally) क्रमागतरिक्थं, क्रमायातरिक्थं.—(Rule of succession) क्रमागतविधिः *m.*, अन्वयागमविधिः *m.*, बद्धत्वं, नियुक्तता.

To ENTAIL, *v. a.* (An estate) रिक्थं or स्थावरधनादि विशेषक्रमागमानुसारेण दायादिभ्यः प्रदा (c. 3. -ददाति -दातुं), रिक्थाधिकारित्वं विशेषक्रमागमानुसारात् स्थिरीकृ or बन्ध् (c. 9. बध्नाति, बन्धुं).—(Bring on) आवह् (c. 1. -वहति -वोढुं) or उत्पद् in caus. (-पादयति -यितुं) or जन् in caus. (जनयति -यितुं).

To ENTANGLE, *v. a.* संश्लिष् in caus. (-श्लेषयति -यितुं), आश्लिष्, परिश्लिष्, श्लिष्टीकृ, संलग्नीकृ, ग्रन्थ् (c. 1. ग्रन्थति -न्थितुं), ग्रन्थिलीकृ, सङ्कुलीकृ, आकुलीकृ, आकुञ्च् (c. 1. -कुञ्चति -ञ्चितुं), व्यावृत् in caus. (-वर्त्तयति -यितुं), सङ्कीर्णीकृ, सबन्ध् (c. 9. -बध्नाति -बन्धुं), सम्मिश्र् (c. 10. -मिश्रयति -यितुं); 'to be entangled, as the hair,' जट् or झट् (c. 1. जटति, झटति -टितुं); 'to disentangle,' उद्ग्रन्थ्, समुद्ग्रन्थ्.

ENTANGLED, *p. p.* (Caught) श्लिष्टः -ष्टा -ष्टं, आश्लिष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, परिश्लिष्टः -ष्टा -ष्टं, परिलग्नः -ग्ना -ग्नं, संलग्नः -ग्ना -ग्नं, सक्तः -क्ता -क्तं, सबद्धः -द्धा -द्धं.—(Confused) सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, ग्रन्थिलः -ला -लं.—(Twisted) आकुञ्चितः -ता -तं; 'entangled in the teeth,' दन्तश्लिष्टः -ष्टा -ष्टं, दन्तसक्तः -क्ता -क्तं; 'entangled in the branches,' विटपपरिलग्नः -ग्ना -ग्नं, शाखासु सक्तः -क्ता -क्तं; 'entangled hair,' जटा, जुटकं, जूटः; 'having entangled hair,' जटावान् -वती -वत् (त्), जटिलः -ला -लं; 'entangled in a net,' जालबद्धः -द्धा -द्धं.

ENTANGLEMENT, *s.* आश्लिष्टता, संलग्नता, ग्रन्थिलत्वं, जटिलत्वं, सङ्कुलता, सङ्कीर्णत्वं, सङ्करः, सङ्कीर्य्यं, व्यतिकरः, आकुलत्वं, व्याकुलत्वं.

To ENTER, *v. a.* and *n.* विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्, आविश्, समाविश्, आगम् (c. 1. -गच्छति -गन्तुं), अभिगम्, अभ्यागम्, अन्तर्गम्, आया (c. 2. -याति -तुं), अभिया, उपस्था (c. 1. -तिष्ठति -स्थातुं), श्रि (c. 1. श्रयति -यितुं), आश्रि, गाह् (c. 1. गाहते -हितुं), विगाह्. —(Set down in writing) अभिलिख् (c. 6. -लिखति -लेखितुं), पुस्तके समारुह् in caus. (-रोपयति -यितुं) or आरुह्.—(Enter upon a business) प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रक्रम् (c. 1. -क्रमते -मितुं), उपक्रम्.—(Enter into another's views) परमतम् अनुमन् (c. 4. -मन्यते -मन्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

ENTERED, *p. p.* प्रविष्टः -ष्टा -ष्टं, निविष्टः -ष्टा -ष्टं, आविष्टः -ष्टा -ष्टं.—(In writing) अभिलिखितः -ता -तं, आरोपितः -ता -तं, लेख्यारूढः -ढा -ढं, समारोपितः -ता -तं.

ENTERPRISE, *s.* (Undertaking) प्रवृत्तिः *f.*, उद्योगः, उत्साहः, आरम्भः, उपक्रमः, व्यवसायः, उद्यमः, चेष्टा, चेष्टितं, कर्म्म *n.* (न्), प्रौढिः *f.*, ग्रहः, साध्यं.—(Bold undertaking) महोत्साहः, दुर्गकर्म्म *n.* (न्), अद्भुतकर्म्म *n.*, आश्चर्य्यकर्म्म *n.*, कठिनकर्म्म *n.*

To ENTERPRISE, *v. a.* उपक्रम् (c. 1. -क्रमते -मितुं), आरभ् (c. 1. -रभते -रब्धुं), समारभ्, व्यवसो (c. 4. -स्यति -सातुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं).

ENTERPRISER, *s.* कठिनकर्म्मप्रवृत्तः, दुर्गकर्म्मव्यवसायी *m.* (न्), महोत्साहः.

ENTERPRISING, *a.* व्यवसायी -यिनी -यि (न्), व्यवसायकारी -रिणी -रि (न्), उद्योगी -गिनी -गि (न्), सोद्योगः -गा -गं, कठिनकर्म्मव्यवसायी &c., साहसिकः -की -कं.

To ENTERTAIN, *v. a.* (A guest with hospitality) अतिथिं सत्कृ or सेव् (c. 1. सेवते -वितुं) or पूज् (c. 10. पूजयति -यितुं), आतिथ्यं कृ, सत्कारं कृ; 'with choice food,' स्वाद्वन्नैः or भोजनविशेषैः सन्तुष् in caus. (-तोषयति -यितुं) or तृप् in caus. (तर्पयति -यितुं) or भुज् in caus. (भोजयति -यितुं).—(Amuse) विनुद् (c. 10. -नोदयति -यितुं), विलस् (c. 10. -लासयति -यितुं), रम् (c. 10. रमयति -यितुं).—(Hold in the mind) मनसि or मनसा धृ (c. 1. धरति, धर्त्तुं) or उपलभ् (c. 1. -लभते -लब्धुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

ENTERTAINED, *p. p.* (Hospitably) सत्कृतः -ता -तं.—(Amused) विनोदितः -ता -तं.

ENTERTAINER, *s.* सत्कारी *m.* (न्), सत्कृत् *m.*, आमन्त्रयिता *m.* (तृ), निमन्त्रणकृत्.

ENTERTAINING, *a.* विनोदकः -का -कं, विनोदजनकः -का -कं, हास्ययुक्तः -क्ता -क्तं.

ENTERTAINMENT, *s.* (Amusement) विनोदः, विलासः.—(Of guests) सत्कारः, सत्कर्म्म *n.* (न्), अतिथिसत्क्रिया, अतिथिसेवा, अतिथिपूजनं, आतिथ्यं, आतिथिक्रिया, सङ्ग्रहः.—(Feast) उत्सवः, सहभोजनं, सम्भोजनं.

To ENTHRALL. *See* INTHRALL.

To ENTHRONE, *v. a.* राजासने or सिंहासने उपविश् in caus. (-वेशयति -यितुं) or अध्यास् in caus. (-आसयति -यितुं), राज्ये अभिषिच् (c. 6. -षिञ्चति -षेक्तुं).

ENTHRONED, *p. p.* सिंहासनोपविष्टः -ष्टा -ष्टं, सिंहासनाध्यासितः -ता -तं, अध्यासीनः -ना -नं, राज्ये अभिषिक्तः -क्ता -क्तं.

ENTHRONEMENT, *s.* सिंहासनोपवेशनं, सिंहासनाध्यासः, अभिषेकः.

ENTHUSIASM, *s.* (Religious) अतिशयदेवभक्तिजन्यो मादविशेषः or उन्मादः or मदः or उन्मदः, अतिश्रद्धाप्रयुक्ता उन्मत्तता, भक्तिव्यग्रता, श्रद्धाव्यग्रता, भक्तिचण्डता, मिथ्याभक्तिः *f.*—(Warmth, zeal) उत्तापः, उग्रता, उष्मः, चण्डता, उच्चण्डता, प्रचण्डता, व्यग्रता, उग्रता, औत्सुक्यं, तैक्ष्ण्यं, तीक्ष्णता, अत्यन्तानुरागः, बुद्धिव्यग्रता.

ENTHUSIAST, *s.* (In religion) अतिशयदेवभक्तिवाद उन्मत्तो जनः, देवभक्तिव्यग्रः, मिथ्याभक्तिमान् *m.* (त्).—(In any thing) व्यग्रबुद्धिः *m.*, व्यग्रबुद्धिः *m.*, प्रमदजनः, तीक्ष्णजनः.

ENTHUSIASTIC, ENTHUSIASTICAL, *a.* व्यग्रः -ग्रा -ग्रं, उत्तप्तः -प्ता -प्तं, चण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उष्णः -ष्णा -ष्णं, उग्रः -ग्रा -ग्रं, अत्यनुरागी -गिणी -गि (न्), उत्सुकः -का -कं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), उद्युक्तः -क्ता -क्तं, उन्मादवान् -वती -वत् (त्).

ENTHUSIASTICALLY, *adv.* अतिव्यग्रं, उत्तापेन, अत्यनुरागेण, सकुतूहलं.

ENTHYMEME, *s.* न्यूनैकावयवः or न्यूनैकपक्षो न्यायविशेषः, लुप्तन्यायः.

To ENTICE, *v. a.* आकृष् (c. 1. -कर्षति -क्रष्टुं), लुभ् in caus. (लोभयति -यितुं), प्रलुभ्, परिलुभ्, मुह् in caus. (मोहयति -यितुं), भ्रान्तिं जन् (c. 10. जनयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), लल् (c. 10. लालयति -यितुं), दुष्टकर्म्मणि प्रवृत् in caus. (-वर्त्तयति -यितुं) or नियुज् (c. 10. -योजयति -यितुं).

ENTICED, *p. p.* आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं, लालितः -ता -तं.

ENTICEMENT, *s.* आकर्षणं, आकृष्टिः *f.*, प्रलोभनं, विलोभनं, मोहनं, विमोहनं, मोहः, लोभः, लालनं, लोभदर्शनं, वञ्चनं, प्रलम्भः.

ENTICER, *s.* प्रलोभकः, आकर्षकः, विमोही *m.* (न्), लाली *m.* (न्), लोभदर्शकः.

ENTICING, *a.* प्रलोभकः -का -कं, आकर्षकः -का -कं, आकर्षी -र्षिणी -र्षि (न्), विमोहनः -ना -नी -नं, मोही -हिनी -हि (न्), भ्रान्तिजनकः -का -कं.

ENTICINGLY, *adv.* सप्रलोभनं, आकृष्या, प्रलोभनेन, आकर्षकप्रकारेण.

ENTIRE, *a.* (Complete, whole, not defective) कृत्स्नः -त्स्ना -त्स्नं, सकलः -ला -लं, सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, सम्पूर्णः -र्णा -र्णं, पूर्णः -र्णा -र्णं, समग्रः -ग्रा -ग्रं, निखिलः -ला -लं, अखिलः -ला -लं, समस्तः -स्ता -स्तं, पर्य्याप्तः -प्ता -प्तं, अशेषः -षा -षं, निःशेषः -षा -षं, निरवशेषः -षा -षं, अन्यूनः -ना -नं, अनूनः -ना -नं, अविकलः -ला -लं, अखण्डः -ण्डा -ण्डं, अभग्नः -ग्ना -ग्नं, अभिन्नः -न्ना -न्नं, अक्षतः -ता -तं, साद्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, न्यक्षः -क्षा -क्षं, सिमः *m.* only.—(Of perfect integrity) अभेद्यः -द्या -द्यं, अहार्य्यः -र्य्या -र्य्यं, सरलः -ला -लं.—(An entire horse) सवृषणोऽश्वः, बीजाश्वः.

ENTIRELY, *adv.* अशेषतस्, अशेषेण, निःशेषेण, निरवशेषं, कृत्स्नशस्, कार्त्स्न्येन, साकल्येन, अखिलेन, निखिलेन, सर्व्वतस्, सर्व्वशस्, विश्वतस्, आमूलं, सम्यक्, पर्य्याप्तं, साद्यन्तं, अन्यूनं, अखण्डतस्; 'entirely around,' समन्ततस्, अभितस्.

ENTIRENESS, ENTIRETY, *s.* कार्त्स्न्यं, कार्त्स्नं, साकल्यं, आखिल्यं, सामग्र्यं, सम्पूर्णता, समुदायः, समस्तता, समस्तिः *f.*, अभिन्नता, अखण्डत्वं, अन्यूनता, सर्व्वैकत्वं.—(Integrity) अभेद्यता, सारल्यं, मायाहीनता.

To ENTITLE, *v. a.* (Give a title or name) नाम कृ or दा, उपाधिं or संज्ञां दा, नामधेयं कृ, अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -तुं), कीर्त् (c. 10. कीर्त्तयति -यितुं), उदाहृ (c. 1. -हरति -हर्त्तुं).—(Give a claim) अधिकारं or अधिकारित्वं or स्वत्वं दा; 'to be entitled,' अर्ह् (c. 1. अर्हति -ते -र्हितुं), अर्हः -र्हा -र्हं or उपयुक्तः -क्ता -क्तम् अस्; 'he is entitled to honour,' मानम् अर्हति; 'he is entitled to receive so much salary,' उपयुक्तोऽयम् एतावद् वर्त्तनं गृह्णाति; 'knowledge entitles to respect,' विद्या मान्यत्वकारणं; 'a good man is entitled to reverence,' साधुजनः पूजनीयः.

ENTITLED, *p. p.* (Named) प्रोक्तः -क्ता -क्तं, अभिहितः -ता -तं, स्तुतः -ता -तं, संज्ञितः -ता -तं, उदाहृतः -ता -तं, आख्यातः -ता -तं. *See* CALLED.—(Having a claim) अधिकारी -रिणी -रि (न्), अर्हः -र्हा -र्हं; 'entitled to honour,' पूजार्हः -र्हा -र्हं; 'entitled to a sixth,'

षड्भागभाक् *m, f. n.* (ज्).

ENTITY, *s.* भूतं, अधिभूतं, सत्त्वं, सत्ता, भावः, वस्तु *n.*, वर्त्तनं.

To ENTOMB, *v. a.* श्मशाने or समाधौ स्था in caus. (स्थापयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or निखन् (c. 1. -खनति -नितुं) or सम् in caus. (-अर्पयति -यितुं).

ENTOMBED, *p. p.* निखातः -ता -तं, समाधिनिखातः -ता -तं, भूमिनिखातः -ता -तं.

ENTRAIL, ENTRAILS, *s.* अन्त्रं, अन्त्राणि *n. pl.*, पुरीतत् *m. n.*, नाडिः -डी *f.*, धमनी, कोष्ठः.

ENTRANCE, *s.* (Act of entering) प्रवेशः -शनं, निवेशः -शनं, आवेशः -शनं, समावेशः, वेशः -शनं, वेषणं, वेशिका, प्रतिहारणं.—(Door, gate) द्वारं, द्वारवर्त्म *n.* (न्), मुखं, गृहमुखं, निःसरणं, प्रतीहारः, पथः; 'principal entrance,' सिंहद्वारं; 'private entrance,' प्रच्छन्नद्वारं.

ENTRANCED, *p. p.* (Put in a trance) मूर्च्छितः -ता -तं, मूर्च्छापन्नः -न्ना -न्नं.—(Enraptured) सम्मोहितः -ता -तं, मोहप्राप्तः -प्ता -प्तं, परमहर्षमोहितः -ता -तं.

To ENTRAP, *v. a.* उन्माथे or पाशे पत् in caus. (पातयति -यितुं), जालं पातयित्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं) or धृ (c. 1. धरति, धर्त्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रलुभ् in caus. (-लोभयति -यितुं).

ENTRAPPED, *p. p.* उन्माथे पातितः -ता -तं, पाशबद्धः -द्धा -द्धं, जालबद्धः -द्धा -द्धं.

To ENTREAT, *v. a.* अञ्जलिं कृत्वा प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), सम्प्रार्थ्, अभ्यर्थ्; विनयेन or कृताञ्जलिवत् प्रार्थ् or याच् (c. 1. याचति -चितुं), अभियाच्, प्रयाच्, सम्प्रयाच्; प्रसद् (c. 10. -सादयते -ति -यितुं), विनी (c. 1. -नयति -नेतुं), विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं).

ENTREATED, *p. p.* अञ्जलिकर्म्मपूर्व्वं प्रार्थितः -ता -तं or अभ्यर्थितः -ता -तं, विनयेन याचितः -ता -तं, प्रसादितः -ता -तं, अनुनीतः -ता -तं.

ENTREATY, *s.* प्रार्थनं -ना, अभ्यर्थना, अर्थः, अर्थित्वं -ता, याचना, विनतिः *f.*, मार्गणं, विनयेन निवेदनं.

ENTRY, *s.* (Passage for entrance) द्वारं, द्वारवर्त्म *n.* (न्), गमनागमनपथः.—(Ingress) प्रवेशः -शनं.—(Committing to writing) अभिलिखनं, लेख्यारोपणं, पुस्तकारोपणं, समारोपणं.

To ENUCLEATE, *v. a.* स्पष्टीकृ, व्यक्तीकृ, विशुध् in caus. (-शोधयति -यितुं), परिशुध्.

To ENUMERATE, *v. a.* संख्या (c. 2. -ख्याति -तुं), सम्परिख्या, परिसंख्या, प्रसंख्या; परिगण् (c. 10. -गणयति -यितुं), विगण्, प्रगण्, गण्; अनुपूर्व्वशस् or एकैकशस् or यथाक्रमं or पृथक् पृथक् ख्या, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, निर्दिश्.

ENUMERATED, *p. p.* परिसंख्यातः -ता -तं, परिगणितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, समुद्दिष्टः -ष्टा -ष्टं, एकैकशः or प्रत्येकं कथितः -ता -तं or निर्दिष्टः -ष्टा -ष्टं, अनुक्रान्तः -न्ता -न्तं.

ENUMERATION, *s.* परिसंख्या -ख्यानं, संख्या, गणनं -ना, परिगणना, समुद्देशः, एकैकशो निर्देशः.

To ENUNCIATE, *v. a.* उच्चर् in caus. (-चारयति -यितुं), उदीर् (c. 10. -ईरयति -यितुं), समुदीर्, उदाहृ (c. 1. -हरति -हर्त्तुं), प्रख्या (c. 2. -ख्याति -तुं), कॄत् (c. 10. कीर्त्तयति -यितुं), प्रकॄत्.

ENUNCIATED, *p. p.* उच्चारितः -ता -तं, उदीरितः -ता -तं, उदाहृतः -ता -तं.

ENUNCIATION, *s.* उच्चारणं, उदीरणं, उदाहरणं, व्याहारः -हरणं, समुदाहरणं, ख्यापनं, विज्ञापनं, प्रकीर्त्तनं, प्रकाशनं, घोषणा.

ENUNCIATIVE, *a.* उच्चारकः -का -कं, ख्यापकः -का -कं, आवेदकः -का -कं.

To ENVELOP, *v. a.* आवेष्ट् (c. 1. -वेष्टते -ष्टितुं), परिवेष्ट्, संवेष्ट्, आच्छद् (c. 10. -छादयति -यितुं), परिच्छद्, समाच्छद्, प्रच्छद्, प्रतिच्छद्, संच्छद्; परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), आवृ; पिधा (c. 3. -दधाति -धातुं), कोशेन परिवेष्ट्.

ENVELOPE, *s.* कोशः, कोषः, आवेष्टनं, परिवेष्टनं, वेष्टनं, प्रच्छदपटः, प्रावारः, प्रावरणं, वासनं, पिधानं, पुटः, आच्छादनं, निचोलः, अवगुण्ठनं.

ENVELOPED, *p. p.* वेष्टितः -ता -तं, आवेष्टितः -ता -तं, परिवेष्टितः -ता -तं, कोशस्थः -स्था -स्थं, वासनस्थः -स्था -स्थं, परीतः -ता -तं, अवगुण्ठितः -ता -तं.

To ENVENOM, *v. a.* विषेण लिप् (c. 6. लिम्पति, लेप्तुं) or दिह् (c. 2. देग्धि -ग्धुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं) or संमृज् (c. 6. -मृजति -मर्ष्टुं), सविषं -षां -षं कृ.

ENVENOMED, *p. p.* विषाक्तः -क्ता -क्तं, विषलिप्तः -प्ता -प्तं, विषप्रदिग्धः -ग्धा -ग्धं, सविषः -षा -षं, गरली -लिनी -लि (न्); 'envenomed shaft,' दिग्धः.

ENVIABLE, *a.* ईर्ष्यणीयः -या -यं, ईर्ष्योत्पादकः -का -कं, लोभ्यः -भ्या -भ्यं, स्पृहणीयः -या -यं, प्रार्थनीयः -या -यं, आकांक्षणीयः -या -यं.

ENVIED, *p. p.* ईर्षितः -ता -तं, ईर्ष्यितः -ता -तं, अभिलषितः -ता -तं, स्पर्धितः -ता -तं.

ENVIER, *s.* ईर्ष्यी *m.* (न्), असूयकः, अभ्यसूयकः, परकल्याणासहनः.

ENVIOUS, *a.* ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्), ईर्ष्यालुः -लुः -लु, ईर्ष्यकः -का -कं, सेर्ष्यः -र्ष्या -र्ष्यं, मत्सरः -रा -रं -री -रिणी -रि (न्), समत्सरः -रा -रं, परधनमत्सरः -रा -रं, परधनाभिलाषुकः -का -कं, परगुणमत्सरः -रा -रं, परोत्कर्षासहनः -ना -नं, परप्रशंसासहिष्णुः -ष्णुः -ष्णु, स्पर्धी -र्धिनी -र्धि (न्), साभ्यसूयः -या -यं, कृतेर्ष्यः -र्ष्या -र्ष्यं, सञ्जातेर्ष्यः -र्ष्या -र्ष्यं, कुहनः -ना -नं, बीभत्सुः -त्सुः -त्सु, स्पृहयालुः -लुः -लु, अभिलाषी -षिणी -षि (न्), परशुभामर्षणः -णा -णं.

ENVIOUSLY, *adv.* सेर्ष्यं, मात्सर्य्यं, समत्सरं, समात्सर्य्यं, साभ्यसूयं.

To ENVIRON, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), आवृ, परिष्ठा (c. 1. -तिष्ठति -ष्ठातुं). *See* ENCOMPASS.

ENVIRONED, *p. p.* परिवेष्टितः -ता -तं, परिवृतः -ता -तं, आवृतः -ता -तं, परिगतः -ता -तं, परीतः -ता -तं, [illegible] -ता -तं, व्याप्तः -प्ता -प्तं.

ENVIRONS, *s.* (Of a town) नगरोपान्तं, उपान्तं, उपपुरं, परिसरः.

ENVOY, *s.* दूतः, राजदूतः, सन्त्री *m.* (न्), सन्देशहरः, वार्त्ताहरः, निसृष्टार्थः, कार्य्यङ्करः, राजचारः, राजप्रतिनिधिः *m.*

To ENVY, *v. a.* ईर्ष्य् (c. 1. ईर्ष्यति -र्ष्यितुं), ईर्क्ष्य् (c. 1. ईर्क्ष्यति -र्क्ष्यितुं), स्पृह् (c. 10. स्पृहयति -यितुं), स्पर्ध् (c. 1. स्पर्धते -र्धितुं), असूय (nom. असूयति -ते -यितुं), अभ्यसूय, परद्रव्यम् अभिलष् (c. 1. -लषति, c. 4. -लष्यति -षितुं), परोत्कर्षं न सह् (c. 1. सहते, सोढुं) or न मृष् (c. 4. मृष्यति, मर्षितुं), मात्सर्य्यं कृ.

ENVY, *s.* ईर्ष्या, असूया, मात्सर्य्यं, मत्सरः -रता, स्पर्धा, स्पर्धता, अक्षान्तिः *f.*, अमर्षः, परिमर्षः, रागः, द्वेषः, ईर्षा, स्पृहा, परधनाभिलाषः, परोत्कर्षासहिष्णुता, अन्यगुणासहिष्णुता, अन्यशुभद्वेषः, परप्रशंसाया असहिष्णुता.

EOLUS, *s.* (God of the winds) पवनदेवता, वायुदेवता.

EPACT, *s.* कालगणकभाषायां सौरवत्सरावसाने अमावस्याः प्रभृति तिथिसंख्यासूचकः शब्दः or शब्दो येन चान्द्रवत्सरात् सौरवत्सराधिक्यं सूच्यते.

EPAULET, *s.* स्कन्धाभरणं, सैनिकजनैः स्कन्धदेशे भृतः पदसूचको-लङ्कारः, अंशालङ्कारः, अंशाभरणं.

EPHEMERAL, *a.* ऐकाहिकः -की -कं, क्षणविध्वंसी -सिनी -सि (न्), उत्पत्तिविनाशी -शिनी -शि (न्), क्षणभङ्गुरः -रा -रं, एकाहमात्रस्थायी -यिनी -यि (न्).

EPHEMERIS, *s.* आह्निकव्यवहारपुस्तकं, दैवसिकवृत्तान्तपुस्तकं.—(In astronomy) पुस्तकं यस्मिन् नक्षत्राणां गतिभावादि प्रतिदिनम् आरोप्यते.

EPIC, *a.* ऐतिहासिकः -की -कं, वीरचरित्रकथकः -का -कं, काथिकः -की -कं, शूरवृत्तान्तविषयः -या -यं, महाकाव्यसम्बन्धी -न्धिनी -न्धि (न्).

Epic, s. (Poem) महाकाव्यं, इतिहासः, धीरचरित्रविषयं काव्यं.

Epicene, a. सामान्यलिङ्गः -ङ्गा -ङ्गं, साधारणलिङ्गः -ङ्गा -ङ्गं.

Epicure, a. मिष्टान्नव्यञ्जनादिषु प्रसक्तः, सर्व्वान्नरसज्ञः, स्वाद्वन्नाभिलाषी m. (न्), उदरपरायणः, कुक्षिम्भरिः m., लोलुपः, अतिलोभी m. (न्), रसिकः, वैषयिकः, विषयासक्तः, विषयसेवी m. (न्), पात्रेसमितः.

Epicurean, a. विषयी -यिणी -यि (न्), शारीरिकसुखसेवी -विनी -वि (न्), वैषयिकः -की -कं, भोगपरायणः -णा -णं.

Epicurism, s. विषयोपसेवा, विषयासक्तिः f., शारीरिकसुखानुरागः.

Epicycle, s. (In astronomy) प्राक् चक्रं, परिधिः m.

Epidemic, epidemical, a. देशसाधारणः -णा -णी -णं, सर्व्वगः -गा -गं, बहुजनसामान्यः -न्या -न्यं; 'disease,' मारी, मारः -रिः f., महामारी, मरकः, मारकः, आतङ्कनं, सन्निपातकः, उपसर्गः.

Epidermis, s. बाह्यत्वक् f. (च्), बहिस्त्वक्, बाह्यचर्म्म n., (न्), अवभासिनी.

Epiglottis, s. उपजिह्वा, अलिजिह्वा, प्रतिजिह्वा, घण्टिका, शुण्डिका.

Epigram, s. अबहुश्लोकपरिमाणं रसिककाव्यं, सरसं लघुकाव्यं.

Epigrammatical, a. पूर्व्वोक्तलघुकवितायोग्यः -ग्या -ग्यं, रसिककवितासम्बन्धी -न्धिनी -न्धि (न्).—(Pointed) रसिकः -का -कं, रसवान् -वती -वत् (त्), सरसः -सा -सं.

Epigrammatist, s. पूर्व्वोक्तरसिककविताकर्त्ता m. (र्तृ), लघुकाव्यरचकः.

Epilepsy, s. अपस्मारः, ग्रहामयः, भ्रामरं, भूतविक्रिया, प्रतानः, मूर्च्छावायुः m.

Epileptic, a. अपस्मारी -रिणी -रि (न्), भ्रामरी -रिणी -रि (न्), वातग्रस्तः -स्ता -स्तं, वायुग्रस्तः -स्ता -स्तं, ग्रहामयपीडितः -ता -तं, आकृष्टः -ष्टा -ष्टं.

Epilogue, s. अन्तवाक्यं, शेषवाक्यं, अन्त्यवचनं, समापकवाक्यं, समापनवचनं.

Epinicion, s. जयगीतं, जयशब्दः.

Epiphany, s. ख्रीष्टप्रकाशनं, ख्रीष्टप्रकाशनमुद्दिश्य ख्रीष्टजन्मपर्व्वणः परं द्वादशदिने सेवितो महोत्सवः, ख्रीष्टप्रकाशनपर्व्व n. (न्).

Episcopacy, s. धर्म्माध्यक्षता -त्वं, धर्म्माध्यक्षाधिपत्यं, धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षकर्तृका ख्रीष्टीयसमाजनीतिः f.

Episcopal, episcopalian, a. धर्म्माध्यक्षसम्बन्धी -न्धिनी -न्धि (न्), धर्म्माध्यक्षशासितः -ता -तं, धर्म्माध्यक्षपालितः -ता -तं.

Episcopate, s. धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षाधिपत्यं, धर्म्माध्यक्षपदं.

Episode, s. उपाख्यानं, उपकथा, प्रसङ्गवाक्यं, प्रासङ्गिकवाक्यं, पताका, मूलविषयबहिर्गता कथा.

Episodic, episodical, a. प्रासङ्गिकः -की -कं, मूलविषयानन्वितः -ता -तं, प्रस्तुतविषयबहिर्गतः -ता -तं, अनन्वितः -ता -तं, अप्रस्तुतः -ता -तं.

Epispastic, a. त्वक्स्फोटोत्पादकः -का -कं, स्फोटकारी -रिणी -रि (न्).

Epistle, s. पत्रं, लेखः, लेख्यं, पत्रिका, पत्री, संवादपत्रं, सन्देशपत्रं, लिपिः f.

Epistolary, a. पत्री -त्रिणी -त्रि (न्), पत्रीयः -या -यं, लेख्यकः -का -कं.

Epitaph, s. चैत्यस्य उपरिलिखितं मृतजनमुद्दिश्य स्तुतिवाक्यं, चैत्योपरि लिखिता तत्रैव निखातजनमुद्दिश्य गुणस्तुतिः, चैत्यलिपिः f., चैत्योपरिस्था लिपिः.

Epithalamium, s. वैवाहिकगीतं, औद्वाहिकगीतं, विवाहसमये माङ्गलिकगीतं.

Epithem, s. उत्कारिका, उपदेहः, उपनाहः, प्रलेपः, लेपः.

Epithet, s. विशेषणं -षकः -कं, संज्ञाविषयः, सबुद्धिः f., उपाधिः m., गुणागुणवाचकः शब्दः.

Epitome, s. संक्षेपः -पणं, सङ्ग्रहः, सारसङ्ग्रहः, सारः, संहिता, प्रत्याहारः, समाहारः, समाहृतिः f., समसनं.

To epitomize, v. a. संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संहृ (c. 1. -हरति -हर्तुं), उपसंहृ.

Epitomized, p. p. संक्षिप्तः -प्ता -प्तं, सांक्षेपिकः -की -कं, समस्तः -स्ता -स्तं, सामासिकः -की -कं, संहृतः -ता -तं, उपसंहृतः -ता -तं, चुम्बकः -का -कं.

Epitomizer, epitomist, s. संक्षेप्ता m. (प्तृ), सङ्ग्रहकर्त्ता m. (र्तृ), सारलेखकः.

Epoch, epocha, s. (A fixed era from which computation o[f] years begin) ध्रुवः, शाकः, शकः, संवत् indec. The era o[f] Śálivàhana is called शाकः, that of Vikramáditya, संवत्.—(Any period or fixed time) कालः, कालावधिः m., अवधिः m. निर्णीतकालः.

Epode, s. उपगीतं, उपगानं, अधिगीतं, अपरगीतं, गीतानुबन्धः.

Epopee, s. महाकाव्यं, वीरचरित्रविषयं काव्यं.

Epulation, s. उत्सवकरणं, उत्सवः, मिष्टान्नभोजनं.

Equable, a. समानः -ना -नं, निर्विकारः -रा -रं.—(In motion) समानगतिः -तिः -ति.—(In temper) समभावः -वी -वं, समवृत्तिः -त्तिः -त्ति समचित्तः -त्ता -त्तं.

Equal, a. समः -मा -मं, समानः -ना -नं, तुल्यः -ल्या -ल्यं, समीयः -या -यं सदृशः -शी -शं, ईदृशः -शी -शं.—(Not inferior) अनवरः -रा -रं अनवमः -मा -मं.—(Even, uniform) समानः -ना -नं, समस्थः -स्था -स्थं, निर्विकारः -रा -रं, अन्यूनः -ना -नं; 'of equal extent o[r] size,' सम्मितः -ता -तं, सममात्रः -त्रा -त्रं, तुल्यपरिमाणः -णा -णं; 'equa[l] to all,' सर्व्वसमः -मा -मं; 'of equal strength,' तुल्यबलः -ला -लं 'equal in glory,' समानतेजाः -जाः -जः (स्); 'this is equal t[o] a sixteenth part of that,' एतत् तस्य षोडशांशेन समं.

Equal, s. (Of the same age) समानवयस्कः, समवयस्कः, सवयाः m. (स्), तुल्यवयाः m. (स्), समानजन्मा m. (न्), वयस्यः.—(Of th[e] same rank) समानपदस्थः, तुल्यपदस्थः.

To equal, v. a. समीकृ, समानीकृ, तुल्यीकृ, समान (nom. समानयति -यितुं), समानं -नां -नं कृ, तुल्यं -ल्यां -ल्यं कृ.

Equality, s. समता, साम्यं, समानता, तुल्यता -त्वं, सामान्यं, साम्यता प्रतियोगिता.—(In rank) समानपदं, तुल्यपदं.—(In tribe) सवर्णता.

Equalization, s. समीकरणं, समानीकरणं, तुल्यत्वं, समानता.

To equalize, v. a. समीकृ, समानीकृ, तुल् (c. 10. तुलयति -यितुं) *See To* equal.

Equalized, p. p. समीकृतः -ता -तं, समानीकृतः -ता -तं, तुलितः -ता -तं.

Equally, adv. समं, समानं, समानतस्, तुल्यवत्, साम्यतस्, सामान्येन.

Equanimity, s. समचित्तत्वं, समबुद्धिता, समभावः, समानवृत्तिः f., सर्व्वसमता, सत्त्वसम्पन्नता, सत्त्वं, सम्पदापदोर् हर्षविषादराहित्यं.

Equanimous, a. समचित्तः -त्ता -त्तं, समबुद्धिः -द्धिः -द्धि, समभावः -वी -वं, समवृत्तिः -त्तिः -त्ति, सत्त्वसम्पन्नः -न्ना -न्नं, सत्वसम्पन्नः -न्ना -न्नं, सम्पदापदोर् हर्षविषादरहितः -ता -तं, निर्विकारः -रा -रं.

Equation, s. (In algebra) समीक्रिया, समीकरणं, साम्यं, फलं; 'of unknown quantity,' अव्यक्तसाम्यं; 'unlimited equation,' एकवर्णसमीकरणं.

Equator, s. निरक्षः, भूचक्रं, भूपरिधिः m., भूगोलरेखा; 'equatorial region,' निरक्षदेशः; 'celestial equator,' नाडिमण्डलं, नाडीमण्डलं *See* Equinoctial line.

Equatorial, a. निरक्षसम्बन्धी -न्धिनी -न्धि (न्), भूचक्रसम्बन्धी, &c.

Equery, equerry, s. राजाश्वपालः, राजाश्वशालाध्यक्षे नियुक्तो जनः.—(Stable for horses) अश्वशाला, वाजिशाला.

Equestrian, a. आश्वः -श्वी -श्वं, आश्विकः -की -कं, अश्वीयः -या -यं, तुरगी -गिणी -गि (न्); 'person on horseback,' अश्वारूढः, अश्वारोही m. (न्).

Equiangular, a. समकोणः -णा -णं, समानाङ्गः -ङ्गा -ङ्गं, तुल्यकोणः -णा -णं.

Equidistant, a. समान्तरः -रा -रं, तुल्यान्तरः -रा -रं, समान्तरस्थः -स्था -स्थं.

EQUILATERAL, *a.* समभुजः -जा -जं, समानबाहुः -हुः -हु, समपार्श्वः -र्श्वा -र्श्वं ; 'an equilateral triangle,' समत्रिभुजः.

EQUILIBRIUM, *s.* तुल्यता, भारतुल्यता, समतोलत्वं, तुल्यबलत्वं, परिमाणतुल्यता, समता, साम्यं.

EQUINOCTIAL, *a.* विषुवीयः -या -यं, विषुवसम्बन्धी -न्धिनी -न्धि (न्) ; 'equinoctial line,' विषुवच्चक्रं, विषुवमण्डलं, विषुवद्वृत्तं, विषुवरेखा. भूचक्रं, भूपरिधिः *m.*, नाडीमण्डलं ; 'equinoctial point,' अयनं.

EQUINOX, *s.* विषुवं, विषुवत् *n.*, विष्वक् *n.*, विषुपं ; 'the vernal equinox,' महाविषुवं, हरिपदं ; 'autumnal,' विषुपदं ; 'day of the equinox,' विषुवदिनं.

EQUINUMERANT, *a.* समसंख्यः -ख्या -ख्यं, समानसंख्यः -ख्या -ख्यं.

To EQUIP, *v. a.* सज्जीकृ, सज्ज् (c. 1. सज्जति -ज्जितुं), ससज्जं -ज्जां -ज्जं कृ, सर्व्वोपकरणैः or सोपकारद्रव्यैः समायुज् in caus. (-योजयति -यितुं) or युज्, सर्व्वसोपकारद्रव्याणि उपक्लृप् (c. 10. -कल्पयति -यितुं) or सम्प्रक्लृप् or उपस्था in caus. (-स्थापयति -यितुं), or उपपद् in caus. (-पादयति -यितुं) or सम्भृ (c. 1. -भरति -भर्त्तुं) or उपस्कृ or पुरस्कृ or सिद्धीकृ or प्रस्तुतीकृ, द्रव्यसम्भारं कृ, उपकरणसम्भारं कृ.—(With arms) अस्त्रैः or शस्त्रैः सज्जीकृ, सन्नह् (c. 4. -नह्यति -नद्धुं). संवर्म्म् (nom. -वर्म्मयति -यितुं).—(Fit out a ship) नावं समुद्रयानार्थं or युद्धार्थं सज्जीकृ.—(With clothes) वस्त्रैर् वेष्ट् (c. 1. वेष्टते -ष्टितुं) or भूष् (c. 10. भूषयति -यितुं) or अलङ्कृ.

EQUIPAGE, *s.* (Implements, materials) उपकरणं, साधनं, सामग्र्यं -ग्री, सम्भारः, उपस्करः.—(Paraphernalia) सज्जा, परिच्छदः, सन्नाहः, अलङ्क्रिया.—(Of war) युद्धसज्जा, युद्धोपकरणं, वाहिनी.—(Retinue) परिबर्हः, बर्हः, तन्त्रं.—(Vehicle) वाहनं, विमानं.

EQUIPMENT, *s.* (Act of equipping) सज्जीकरणं, सज्जनं -ना, सज्जकर्म्म *n.* (न्), सज्जा, साधनं, सम्भारः, सम्भृतिः *f.*, आयोजनं, उपाकर्म्म *n.* (न्), पुरस्कारः, पुरस्करणं. *See* EQUIPAGE.

EQUIPOISE, *s.* तुल्यता, भारतुल्यता, तुल्यभारत्वं, समतोलत्वं, तुल्यबलत्वं, समता, साम्यं, तुल्यपरिमाणं, परिमाणतुल्यता.

To EQUIPOISE, *v. a.* समीकृ, तुल्यीकृ, तुल्यबलीकृ, समतोलीकृ.

EQUIPOISED, *p. p.* तुलितः -ता -तं, समीकृतः -ता -तं, समतोलः -ला -लं.

EQUIPOLLENCE, *s.* तुल्यबलत्वं, बलसमता, तुल्यशक्तित्वं, शक्तिसाम्यं.

EQUIPOLLENT, *a.* तुल्यबलः -ला -लं, तुल्यशक्तिः -क्तिः -क्ति, तुल्यौजाः -जाः -जः (स्).

EQUIPONDERANCE, *s.* तुल्यता, भारतुल्यता, समतोलत्वं, तुल्यबलत्वं.

EQUIPONDERANT, *a.* समतोलः -ला -लं, तुल्यबलः -ला -लं, तुल्यपरिमाणः -णा -णं.

EQUIPPED, *p. p.* सज्जीकृतः -ता -तं, सज्जितः -ता -तं, सज्जः -ज्जा -ज्जं, सोपकारद्रव्ययुक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, समन्वितः -ता -तं, सोपकारः -री -रं, सन्नद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, संहितः -ता -तं.

EQUITABLE, *a.* समदर्शी -र्शिनी -र्शि (न्), धर्म्मकारी -रिणी -रि (न्), न्यायकारी &c., न्यायी -यिनी -यि (न्), धार्म्मिकः -की -कं, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), यथान्यायः -या -यं, अपक्षपाती -तिनी -ति (न्), विपक्षपातः -ता -तं, पक्षपातरहितः -ता -तं, सर्व्वसमः -मा -मं, उभयसाधारणः -णा -णी -णं, निरपेक्षी -क्षिणी -क्षि (न्).

EQUITABLENESS, *s.* साम्यं, समता, सर्व्वसमता, अपक्षपातः, न्यायता.

EQUITABLY, *adv.* न्यायतस्, यथान्यायं, न्यायवत्, पक्षपातं विना, साम्येन.

EQUITY, *s.* न्यायः, धर्म्मः, न्यायता, अपक्षपातः, साम्यं, समता, उभयसामान्यं, सर्व्वसमता, युक्तिः *f.*, याथार्थ्यं, विचारः.—(Qualification of the severity of law) दण्डनैष्ठुर्य्यशमनं, धर्म्मनैष्ठुर्य्यशमनं; 'court of equity,' दण्डनैष्ठुर्य्यशमनका महाविचारणसभा.

EQUIVALENT, *a.* सममूल्यः -ल्या -ल्यं, तुल्यमूल्यः -ल्या -ल्यं, समानमूल्यः -ल्या -ल्यं, तुल्यबलः -ला -लं, तुल्यार्थः -र्था -र्थं, समार्थः -र्था -र्थं, समानबलः -ला -लं, समशक्तिः -क्तिः -क्ति, तुल्यशक्तिः -क्तिः -क्ति, तुल्यः -ल्या -ल्यं. समः -मा -मं, समानः -ना -नं.

EQUIVALENT, *s.* समानमूल्यकं द्रव्यं, तुल्यद्रव्यं, तुल्यवस्तु *n.*, प्रतिक्रिया, प्रतीकारः, प्रतिकृतिः *f.*, प्रत्युपकारः, निस्तारः, प्रतिफलं, परिवर्त्तः, तुल्यत्वं, साम्यं, समानत्वं.

EQUIVOCAL, *a.* सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं, द्व्यर्थः -र्था -र्थं, वक्रः -क्रा -क्रं, वक्रार्थः -र्था -र्थं, अस्पष्टः -ष्टा -ष्टं, विकल्पार्थकः -का -कं.

EQUIVOCALLY, *adv.* सन्दिग्धार्थतस्, द्व्यर्थतस्, वक्रोक्त्या, अस्पष्टं, अव्यक्तं.

EQUIVOCALNESS, *s.* सन्दिग्धार्थः, द्व्यर्थः, अर्थसन्देहः, अर्थसन्दिग्धता, अर्थवक्रिमा *m.* (न्), अस्पष्टता, सन्दिग्धता, वक्रता.

To EQUIVOCATE, *v. n.* वक्रं or सवक्रार्थं or अर्थवक्रतया or द्व्यर्थतो वद् (c. 1. वदति -दितुं), वक्रोक्तिं कृ, अस्पष्टं वद.

EQUIVOCATING, *a.* वक्रोक्तिमान् -मती -मत् (त्), वाक्छलान्वितः -ता -तं.

EQUIVOCATION, *s.* वक्रोक्तिः *f.*, वक्रवाक्यं, वक्रभणितं, वक्रवचनं, वाक्यवक्रता, वाक्छलं, वक्रता, वक्रिमा *m.* (न्), अर्थवैकल्यं, अपदेशः, व्यपदेशः.

EQUIVOCATOR, *s.* द्व्यर्थवक्ता *m.* (क्तृ), द्व्यर्थवादी *m.* (न्), वक्रवाक्यवादी *m.*

EQUIVOQUE, *s.* वक्रोक्तिः *f.*, कूटोक्तिः *f.*, कैतववादः, लालिका, अर्थापत्तिः *f.*

ERA, *s.* कालः, युगः, शाकः, शकः, संवत् indec. The era of Śáliváhana is called शाकः, that of Vikramáditya, संवत्.

To ERADIATE, *v. a.* स्फुर् (c. 6. स्फुरति -रितुं), रश्मीन् or किरणान् पत् in caus. (पातयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

ERADICABLE, *a.* उन्मूल्यः -ल्या -ल्यं, उन्मूलनीयः -या -यं, उत्पाटनीयः -या -यं, मूल्यः -ल्या -ल्यं.

To ERADICATE, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उत्पट् (c. 10. -पाटयति -यितुं), मूलात् [illegible] or समूलम् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or उच्छिद् (c. 7. [illegible]) or उत्खन् (c. 1. -खनति -नितुं), व्यपरुह् in caus. (-रोपयति -यितुं), उद्वृह् (c. 6. -वृहति -वर्हितुं).

ERADICATED, *p. p.* उन्मूलितः -ता -तं, उत्पाटितः -ता -तं, उच्छिन्नः -न्ना -न्नं, उद्धृतः -ता -तं, उत्खातः -ता -तं, व्यपरोपितः -ता -तं, आवर्हितः -ता -तं, उद्बर्हितः -ता -तं.

ERADICATION, *s.* उत्पाटनं, उच्छेदः, उद्धरणं, उन्मूलनं, समूलोत्पाटनं, समूलोद्धरणं, मूलादुद्धरणं, व्यपरोपणं, समूलघातं, निष्कोषणं, विनाशः.

ERADICATIVE, *a.* उच्छेदी -दिनी -दि (न्), उत्पाटनकारी -रिणी -रि (न्).

ERADICATOR, *s.* उद्धर्त्ता *m.* (र्त्तृ), उन्मूलयिता *m.* (तृ), उच्छेदी *m.* (न्).

To ERASE, *v. a.* (Rub out) व्यामृज् (c. 2. -मार्ष्टि -र्ष्टुं), अपमृज्, उन्मृज्, व्यामृश् (c. 6. -मृशति -म्रष्टुं), लुप् (c. 6. लुम्पति, लोप्तुं), विलुप् (c. 10. -लोपयति -यितुं), लोपं कृ.—(Destroy) उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उद्धृ (c. 1. -हरति -हर्त्तुं), विनश् in caus. (-नाशयति -यितुं).

ERASED, *p. p.* व्यामृष्टः -ष्टा -ष्टं, लुप्तः -प्ता -प्तं, उच्छिन्नः -न्ना -न्नं.

ERASTIAN, *s.* ख्रीष्टीयसमाजो राज्यरीतिसम्बद्धो भवति or राज्यरीत्यधीनो भवति इति मन्यते यो जनः.

ERASURE, *s.* व्यामर्षः, लोपः, विलोपनं, उच्छेदः, विनाशः.

ERE, *adv.* or *prep.* प्राक्, पूर्व्वं, पुरा, अग्रे ; 'ere he could come,' तस्य आगमनात् पूर्व्वं or पुरा ; 'ere the time appointed,' प्राग् विहितकालात् ; 'ere twelve years are over,' प्राग् द्वादशसमाः ; or, expressed by loc. absolute ; as, 'ere my child die,' मम पुत्रे न मृते सति.

ERELONG, *adv.* अचिरेण, अचिरात्, न चिरेण, न चिरात्, पुरा.

ERENOW, *adv.* अधुना पूर्व्वं, अद्य पूर्व्वं, प्राग् इहसमयात्.

To ERECT, *v. a.* (Set up) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, अवस्था, संस्था, अधिष्ठा, अधिरुह् in caus. -रोपयति -यितुं), निरुह्, रुह्.—(Raise, elevate) उत्था (rt. स्था with उत्), उन्नम् in caus. (-नमयति -यितुं), उच्छ्रि (c. 1. -छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि; उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उद्धृ (c. 1. -हरति -हर्त्तुं), उन्नी (c. 1. -नयति -नेतुं), उद्वृह् (c. 6. -वृहति -वर्हितुं), उच्चीकृ, ऊर्द्ध्वीकृ, उच्चैः कृ; 'to erect the hair,' पुलक (nom. पुलकयति -यितुं).

ERECT, *a.* उन्नतः -ता -तं, समुन्नतः -ता -तं, अनतः -ता -तं, ऋजुः -जुः -जु, उच्छ्रितः -ता -तं, उत्तानः -ना -नं, अजिह्मः -ह्मा -ह्मं, उच्चः -च्चा -च्चं, उच्छ्रितः -ता -तं.—(Having the head or countenance erect) उन्नतशिराः -राः -रः (स्), प्रकटशीर्षः -र्षा -र्षं, ऊर्द्ध्वमुखः -खी -खं, उत्पक्ष्मलः -ला -लं; 'having the hair erect,' पुलकितः -ता -तं, रोमाञ्चितः -ता -तं.

ERECTED, *p. p.* प्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, अधिष्ठितः -ता -तं, उत्थापितः -ता -तं, उच्छ्रितः -ता -तं, उन्नमितः -ता -तं, उन्नतः -ता -तं, उद्धृतः -ता -तं, उद्यतः -ता -तं, उद्वर्हितः -ता -तं, उच्चीकृतः -ता -तं, उद्गूर्णः -र्णा -र्णं, उद्गृह्यः -ह्या -ह्यं, उद्वर्त्तितः -ता -तं.

ERECTION, *s.* (Establishing) प्रतिष्ठापनं, संस्थापनं, अवस्थापनं.—(Raising) उत्थापनं, उच्छ्रयः, समुच्छ्रायः, उच्छ्रितिः *f.*, समुच्छ्रयः, उन्नतिः *f.*, उन्नमनं, उद्यमः -मनं, उन्नामः, उन्नायः, उत्क्षेपः, उद्यमः, उद्वर्त्तनं; 'of the hair of the body,' पुलकः, पुलकोद्गमः, उद्धर्षणं, रोमहर्षणं, रोमाञ्चः -ञ्चनं, रोमोद्गमः, रोमोद्भेदः, उद्धूषणं.

ERECTNESS, *s.* अनतता, उन्नतता, उत्तानत्वं, उच्चता, ऋजुता.

EREMITE, *s.* अरण्यवासी *m.* (न्), वनवासी *m.*, वनस्थायी *m.* (न्), वानप्रस्थः

ERMINE, *s.* नकुलजातीयो हिमवद्देशजः शुक्ललोमा क्षुद्रजन्तुः.

EROTIC, *a.* कामी -मिनी -मि (न्), शृङ्गारी -रिणी -रि (न्), कामविषयः -या -यं.

To ERR, *v. n.* भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), विभ्रम्, परिभ्रम्, भ्रान्तिं कृ, अपराध् (c. 4. -राध्यति, c. 5. -राध्नोति -राद्धुं), अपराधं कृ, दोषं कृ, प्रमद् (c. 4. -माद्यति -मदितुं), सत्पथात् or यथोचिताद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) or च्यु (c. 1. च्यवते, च्योतुं) or विच्यु or विचल् (c. 1. -चलति -लितुं), उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, व्यभिचर् (c. 1. -चरति -रितुं); उत्पथेन or उन्मार्गेण गम् (c. 1. गच्छति, गन्तुं), मुह् (c. 4. मुह्यति, मोहितुं), प्रमादं कृ.

ERRAND, *s.* सन्देशः, सन्दिष्टं, शासनं, शास्तिः *f.*, आदेशः, आज्ञा, निर्देशः, समाचारः, वाचिकं, दूत्यं, दौत्यं, कार्य्यं, कृत्यं, कर्त्तव्यं; 'sending on an errand,' प्रतिशासनं.

ERRANT, *a.* भ्रमी -मिणी -मि (न्), परिभ्रमी &c., पर्य्यटनकारी -रिणी -रि (न्), इतस्ततो भ्रमणकारी &c., अवनिचरः -रा -रं.

ERRANTRY, *s.* भ्रमणं, परिभ्रमणं, अटनं, पर्य्यटनं, चक्राटनं.

ERRATA-LIST, *s.* शुद्धिपत्रं, शोधनपत्रं, अशुद्धशोधनपत्रं.

ERRATIC, *a.* परिभ्रमी -मिणी -मि (न्), भ्रमणशीलः -ला -लं, चरः -रा -रं, चलनः -ना -नं, जङ्गमः -मा -मं, अस्थिरः -रा -रं, चञ्चलः -ला -लं. *See* ERRANT

ERRATUM, *s.* अशुद्धं, अशुद्धिः *f.*, अशोधनं.

ERRHINE, *a.* नस्यः -स्या -स्यं, क्षुत्करः -री -रं. छिक्कक: -का -कं.

ERRONEOUS, *a.* भ्रान्तिमान् -मती -मत् (त्), अशुद्धः -द्धा -द्धं, अयथार्थः -र्था -र्थं, अतथ्यः -थ्या -थ्यं, वितथः -था -थं, अनृतः -ता -तं, असत्यः -त्या -त्यं, भ्रमजनकः -का -कं, भ्रमात्मकः -का -कं, भ्रमोत्पादकः -का -कं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्). Often expressed by मिथ्या or मृषा prefixed; as, 'an erroneous opinion,' मिथ्यामतिः *f.*; 'an erroneous statement,' मिथ्यावादः, मृषावादः; 'erroneous conclusion,' अपसिद्धान्तः.

ERRONEOUSLY, *adv.* मिथ्या, मृषा, अन्यथा, अयथार्थं, अयथावत्, वृथा, अतथ्यं, वितथं, अनृतं, असत्यं, प्रमादेन, सप्रमादं.

ERRONEOUSNESS, *s.* अयाथार्थ्यं, असत्यता, अयथार्थता, अतथ्यता, वितथत्वं, भ्रान्तिमत्त्वं, प्रमादवत्त्वं.

ERROR, *s.* (Mistake) भ्रमः, भ्रान्तिः *f.*, मतिभ्रमः, मतिभ्रान्तिः *f.*, विभ्रमः, मतिविभ्रमः, प्रमादः, मिथ्यामतिः *f.*, परिभ्रमः, भ्रामः, प्रपञ्चः, मोहः, व्यामोहः, विपर्य्ययः, विचिकित्सा.—(Irregular course, deviation) उन्मार्गः, उन्मार्गगमनं, विमार्गगमनं, उत्पथः, सत्पथभ्रंशः, यथोचितभ्रंशः, उत्क्रमः, व्यतिक्रमः, व्यभिचारः, भ्रेषः.—(Fault, sin) दोषः, अपराधः, पापं; 'in error,' अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं; 'I am not in error,' नाहम् अपराद्धः.

ERST, *adv.* पुरा, पूर्व्वं, पूर्व्वतस्, पूर्व्वकाले, प्राक्, प्राक्काले.

ERUBESCENCE, *s.* अरुणीभावः, अरुणिमा *m.* (न्), मुखारुणिमा *m.*, कपोलरागः.

ERUBESCENT, *a.* ईषदरुणवदनः -नी -नं, ईषदरुणितकपोलः -ला -लं.

To ERUCT, *v. a.* उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं), उद्वम् (c. 1. -वमति -मितुं).

ERUCTATION, *s.* उद्गारः, उद्गिरणं, उद्वमः -मनं, उत्क्षेपः -पणं, उद्गमः, उद्गारः; 'sour eructation,' अम्लोद्गारः.

ERUDITE, *a.* पण्डितः -ता -तं, विद्यावान् -वती -वत् (त्), ज्ञानवान् &c., कृतधीः -धीः -धि, व्युत्पन्नः -न्ना -न्नं, विपश्चित् *m. f. n.*, शिक्षितः -ता -तं.

ERUDITION, *s.* पाण्डित्यं, विद्या, ज्ञानं, व्युत्पत्तिः *f.*, शिक्षा, वैदुष्यं.

ERUGINOUS, *a.* ताम्रमलसमभावः -वी -वं, ताम्रकलङ्करूपः -पी -पं.

ERUPTION, *s.* (Bursting forth, emission) उद्भेदः, प्रोद्भेदः, उद्गारः, उद्गिरणं, उत्सर्गः, उत्क्षेपः, उद्गमः, स्फोटनं, निःसरणं, निर्गमः.—(On the skin) दद्रुः *m.*, खर्जूः *f.*, स्फोटोत्पत्तिः *f.*, विस्फोटः, वरटी, वरल्लकः.

ERUPTIVE, *a.* उद्भेदी -दिनी -दि (न्), स्फोटविशिष्टः -ष्टा -ष्टं.

ERYSIPELAS, *s.* उदर्दः, विसर्पः, दद्रुः *m.*, दद्रूः *m.*

ESCALADE, *s.* लङ्घनं, दुर्गलङ्घनं, अवस्कन्दः -न्दनं, उल्लङ्घनं.

To ESCAPE, *v. n.* and *a.* पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्; निस्तॄ (c. 1. -तरति -रितुं -रीतुं), उत्तॄ; अपक्रम् (c. 1. -क्रामति -क्रमितुं), निर्गम् (c. 1. -गच्छति -गन्तुं), प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु; प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, उत्पत् (c. 1. -पतति -तितुं), निष्पत्, अपसृप् (c. 1. -सर्पति -सर्प्तुं), क्षेमं or त्राणं or रक्षां लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति -आप्तुं).—(Avoid) परिहृ (c. 1. -हरति -हर्त्तुं), प्रोज्झ् (c. 6. -उज्झति -ज्झितुं), त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्; 'escaping,' निस्तीर्य्य, पलायित्वा, पलायमानः -ना -नं; 'one who has escaped danger,' भयमुक्तः -क्ता -क्तं, भयविमुक्तः -क्ता -क्तं, भयत्रातः -ता -तं, क्षेमप्राप्तः -प्ता -प्तं; 'he escapes blame,' दोषेण विमुच्यते.

ESCAPE, *s.* निस्तारः, निस्तरणं, उत्तरणं, निर्गमः, निर्गतिः *f.*, पलायनं, प्रपलायनं, विपलायनं, अपक्रमः, अपयानं, प्रद्रावः, विद्रवः, उद्द्रावः, आपयः, अपायः, क्षेमप्राप्तिः *f.*, त्राणं, मोक्षः, मुक्तिः *f.*, शेषः; 'from punishment,' दण्डमुक्तः, दण्डमोक्षः; 'desire of escaping with life,' प्राणपरीप्सा.

ESCAPED, *p. p.* निस्तीर्णः -र्णा -र्णं, उत्तीर्णः -र्णा -र्णं, पलायितः -ता -तं, निर्गतः -ता -तं, द्रुतः -ता -तं, परिभ्रष्टः -ष्टा -ष्टं, प्रभ्रष्टः -ष्टा -ष्टं.

ESCHALOT, *s.* लशुनजातीयः क्षुद्रकन्दः, तीक्ष्णकन्दभेदः.

ESCHAROTIC, *a.* मांसदाहकः -का -कं, मांसविलयनकृत्.

ESCHAROTIC, *s.* विलयनं, अवसादनं, मांसदाहकः प्रलेपः.

Escheat, *s.* उत्तराधिकारिणो ऽभावाद् भूस्वामिहस्तगतं भूमिक्षेत्रादि or भूस्वामिना प्राप्तं क्षेत्रादि.

To escheat, *v. n.* उत्तराधिकारिणाम् अभावाद् भूस्वामिनि आधिकारत्वे परावृत् (c. 1. -वर्त्तते -र्त्तितुं) or भूस्वामिहस्तं गम् (c. 1. गच्छति, गन्तुं) or भूस्वामिना पुनः प्राप् in pass. (प्राप्यते).

To eschew, *v. a.* वृज् (c. 10. वर्जयति -यितुं), हा (c 3. जहाति, हातुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं), प्रोज्झ् (c. 6. -उज्झति -ज्झितुं).

Escort, *s.* (Body of men for protection) रक्षार्थं सैनिकगुल्मः or सैन्यदलं, रक्षकाः *m. pl.*, परिचराः *m. pl.*, अनुचराः *m. pl.*, परिवारः. —(Protection, safeguard) रक्षा -क्षणं, आश्रयः, शरणं.—(Attendance for defence) रक्षार्थम् अनुव्रजनं, अनुव्रज्या.

To escort, *v. a.* (Attend by way of defence) रक्षार्थम् अनुव्रज् (c. 1. -व्रजति -जितुं) or अनुया (c. 2. -याति -तुं), अध्वनि रक्ष् (c. 1. रक्षति -क्षितुं), सञ्चर् in caus. (-चारयति -यितुं).

Escorted, *p. p.* अनुयातः -ता -तं, अध्वनि रक्षितः -ता -तं, सञ्चारितः -ता -तं.

Escritoir, *s.* लिपिसज्जाधारः, लेखसाधनाधारः.

Esculent, *a.* खाद्यः -द्या -द्यं, खादनीयः -या -यं, भक्षणीयः -या -यं.

Escutcheon, *s.* कुलचिह्नपत्रं, वंशमर्य्यादालक्षणपत्रं.

Esophagus, *s.* अन्नवाहिस्रोतः *n.* (स्), निगरणस्रोतः *n.* (स्).

Esoteric, *a.* गूढः -ढा -ढं, अलौकिकः -की -कं, अन्तर्भूतः -ता -तं.

Espalier, *s.* वातावरणार्थम् उद्यानपरितो रोपिता क्षुद्रवृक्षपंक्तिः *f.*, वृक्षजालं.

Especial, *a.* (Particular) विशेषकः -का -कं, सविशेषः -षा -षं, विशेष्यः -ष्या -ष्यं, विशेष in comp., as, 'especial duty,' विशेषधर्म्मः.—(Principal) उत्तमः -मा -मं, परमः -मा -मं, मुख्यः -ख्या -ख्यं, अधिकः -का -कं.

Especially, *adv.* विशेषतस्, सविशेषं, प्रधानतस्, मुख्यशस्, परमं.

Espied, *p. p.* दृष्टः -ष्टा -ष्टं, आलोकितः -ता -तं, आलक्षितः -ता -तं.

Espionage, *s.* पैशुन्यं, चारकर्म्म *n.* (न्), गूढान्वेषणं, चारचक्षुः *n.* (स्).

Esplanade, *s.* तृणास्तीर्णः समभूभागः, तृणविशिष्टः समस्थलीकृतः क्रीडाप्रदेशः.

Espousal, *s.* वाग्दानं, कन्याप्रदानं, वाग्निश्चयः, विवाहसम्बन्धः.—(Adoption) परिग्रहः, सङ्ग्रहः, ग्रहणं, अनुपालनं; 'of another's cause,' पक्षपातः.

To espouse, *v. a.* (Betroth) वाग्दानं कृ, विवाहप्रतिज्ञां कृ.—(Marry a wife) कन्यां विवह् (c. 1. -वहति -वोढुं) or उद्वह् or परिणी (c. 1. -णयति -णेतुं) or परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Take to one's self, adopt, maintain) स्वीकृ, आत्मसात्कृ, अङ्गीकृ, सङ्ग्रह्, परिग्रह्, संवृध् in caus. (-वर्धयति -यितुं), अनुपाल् (c. 10. -पालयति -यितुं); 'the cause of another,' परस्य सपक्षो भू or पक्षपातं कृ or पक्षपाती भू; 'of a follower,' भक्ताभिमानं कृ.

Espoused, *p. p.* वाग्दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, प्रतिज्ञाविवाहितः -ता -तं, विवाहितः -ता -तं, परिणीतः -ता -तं, ऊढः -ढा -ढं.

To espy, *v. a.* (See at a distance) दूराद् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक् or दृश् (c. 1. पश्यति, द्रष्टुं) or ईक्ष् (c. 1. ईक्षते -क्षितुं) or समीक्ष् or प्रेक्ष् or आलक्ष् (c. 10. -लक्षयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).

Esquire, *s.* (Armour-bearer) शास्त्रहिनकः.—(Gentleman) महाशयः, आर्यः. In cases where esquire is affixed to a name out of respect, श्री may be prefixed.

To essay, *v. a.* परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ, यत् (c. 1. यतते -तितुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), उपक्रम् (c. 1. -क्रमते -मितुं), व्यवसो (c. 4. -स्यति -सातुं), आरभ् (c. 1. -रभते -रब्धुं).

Essay, *s.* परीक्षा -क्षणं, उद्योगः, चेष्टा, उद्यमः, समुद्यमः, आरम्भः, प्रवृत्तिः *f.*, उपक्रमः.—(A composition on any thesis) अमुकपक्षविषयो लेख्यबन्धः or निबन्धः or लेख्यप्रसङ्गः, लेख्यं, लेख्यपत्रं.

Essayist, *s.* लेख्यनिबन्धा *m.* (न्धृ), निबन्धकृत् *m.*, लेखकः.

Essence, *s.* (Constituent substance or nature) सारः -रता, वस्तु *n.*, मूलवस्तु *n.*, भावः, पदार्थः, मूलं, अधिभूतं.—(Pith, extract) सारः, निष्कर्षः, निर्यासः, कषायः, निर्गलितार्थः, मण्डः, रसः.—(Perfume) वासः, आमोदः, सुगन्धिद्रव्यं, सौरभं.

Essential, *a.* (Constituent) वास्तवः -वी -वं, सारः -रा -रं, सारभूतः -ता -तं, सारवान् -वती -वत् (त्), स्वाभाविकः -की -कं; 'essential nature,' सारता.—(Important or necessary in the highest degree) आवश्यकः -की -कं, अत्यवश्यकः -का -कं, गुर्व्वर्थः -र्था -र्थं, बह्वर्थः -र्था -र्थं, अतिप्रयोजनार्हः -र्हा -र्हं.

Essential, *s.* (First principle) तत्त्वं.—(Constituent principle) वस्तु, मूलं, पदार्थः.—(Important point) परमार्थः, गुर्व्वर्थः, प्रधानार्थः.

Essentially, *adv.* सारतस्, वस्तुतस्, अर्थतस्, भावतस्, भावेन, तत्त्वतस्, पदार्थतस्; 'essentially necessary to be done,' अवश्यकार्य्यः -र्य्या -र्य्यं.

To establish, *v. a.* (Set up, settle) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, अवस्था, संस्था, रुह् in caus. (रोपयति -यितुं), निरुह्; प्रतिनिधा (c. 3. -दधाति -धातुं).—(Ordain, enact) व्यवस्था in caus. विधा, प्रकॢप् (c. 10. -कल्पयति -यितुं), परिकॢप्, प्रतिपद् in caus. (-पादयति -यितुं), नियुज् (c. 7. -युङ्क्ते -योक्तुं).—(Make firm, ratify) स्थिरीकृ, दृढीकृ, सुस्थिरं -रां -रं कृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं); 'by fresh evidence,' प्रमाणीकृ, भू in caus. (भावयति -यितुं), विभू, उपपद् in caus. सत्याकृ.

Established, *p. p.* स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, संस्थापितः -ता -तं, व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, स्थितः -ता -तं, स्थायरः -रा -रं, विहितः -ता -तं, प्रकल्पितः -ता -तं, प्रतिपादितः -ता -तं, निश्चितः -ता -तं, स्थिरीकृतः -ता -तं, उपन्यस्तः -स्ता -स्तं.—(Proved) प्रमाणीकृतः -ता -तं, निर्णीतः -ता -तं, सिद्धः -द्धा -द्धं, उपपन्नः -न्ना -न्नं; 'established custom,' कृतानुसारः.

Establishment, *s.* (Act of establishing) प्रतिष्ठापनं, संस्थापनं, अवस्थापनं, स्थापनं, व्यवस्थापनं, नियोजनं.—(Confirmation) स्थिरीकरणं, दृढीकरणं, संस्तम्भः, सत्यापनं, सत्याकृतिः *f.*—(System) स्थितिः *f.*, संस्थानं.

Estate, *s.* (Condition) अवस्था, स्थितिः *f.*, भावः, दशा, वृत्तिः *f.*—(Property, possession) रिक्थं, दायः, धनं, अधिकारः, भूमिः *f.*; 'paternal estate,' पैतृकभूमिः *f.*—(Rank) पदं, स्थानं, पदविः *f.*—(Degree, order) वर्गः, गणः.

To esteem, *v. a.* (Value) मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्; पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, आदृ (c. 6. -द्रियते -दर्त्तुं); 'to esteem highly,' बहु मन्.—(Consider, think) मन्, भू in caus. (भावयति -यितुं), विभू, विगण् (c. 10. -गणयति -यितुं).

Esteem, *s.* (Opinion) मतं, मतिः *f.*—(Regard, respect) मानं, सम्मानं, आदरः, पूजा, मान्यत्वं; 'high esteem,' बहुमानं, बहुमतिः *f.*

Esteemed, *p. p.* मतः -ता -तं, सम्मानितः -ता -तं, आदृतः -ता -तं, पूजितः -ता -तं; esteemed highly,' बहुमतः -ता -तं.—(Considered) स्मृतः -ता -तं.

Estimable, *a.* मान्यः -न्या -न्यं, सम्मान्यः -न्या -न्यं, अर्घ्यः -र्घ्या -र्घ्यं, अर्घार्हः -र्हा -र्हं, आदरणीयः -या -यं, पूजनीयः -या -यं; 'highly

estimable,' परमान्य: -न्या -न्यं.—(To be reckoned) गणनीय: -या -यं, अनुमेय: -या -यं.

To ESTIMATE, *v. a.* विगण् (c. 10. -गणयति -यितुं), परिगण्, प्रगण्, गण्; संख्या (c. 2. -ख्याति -तुं), परिसंख्या, कल् (c. 10. कलयति -यितुं), सङ्कल्, अर्घं or मूल्यं संख्या or निर्णी (c. 1. -णयति -णेतुं) or निरूप् (c. 10. -रूपयति -यितुं); विभू in caus. (-भावयति -यितुं); 'to estimate worth,' गुणं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं); 'to estimate highly,' बहु मन् (c. 4. मन्यते, मन्तुं).

ESTIMATE, *s.* (Computation) विगणनं -ना, परिसंख्यानं, गणना.—(Valuation) मूल्यपरिसंख्या, मूल्यनिरूपणं, मूल्यविज्ञापनं, अर्घविज्ञप्ति: *f.*; 'rough estimate,' स्थूलमानं, आकार:.

ESTIMATED, *p. p.* विगणित: -ता -तं, विभावित: -ता -तं, निर्णीतमूल्य: -ल्या -ल्यं, निरूपितमूल्य: -ल्या -ल्यं, सङ्कलित: -ता -तं, परिसंख्यात: -ता -तं.

ESTIMATION, *s.* (Calculation) विगणना, गणना, संख्या, परिसंख्यानं.—(Esteem, regard) मानं, सम्मानं, आदर:; 'high estimation,' बहुमानं, बहुमति: *f.*

ESTIMATOR, *s.* गणक:, विगणक:, गुणाकार:, संख्याता *m.* (तृ), मूल्यनिरूपक:.

ESTIVAL, *a.* नैदाघ: -घी -घं. ग्रीष्मकालसम्बन्धी -न्धिनी -न्धि (न्).

ESTRADE, *s.* समभूमि: *f.*, समानभूमि:, समस्थलं, समस्थानं.

To ESTRANGE, *v. a.* विरञ्ज् in caus. (-रञ्जयति -यितुं), वैरक्तं जन् (c. 10. जनयति -यितुं), विरक्तीकृ, स्नेहं निवृत् in caus. (-वर्त्तयति -यितुं) or भिद् (c. 7. भिनत्ति, भेत्तुं), स्नेहच्छेदं कृ, स्नेहविच्छेदं कृ, स्नेहभेदं कृ, द्वैधीकृ, द्वैधं जन्, विक्षिप् in caus. (-क्षेपयति -यितुं), दूरीकृ.

ESTRANGED, *p. p.* विरक्त: -क्ता -क्तं, जातविराग: -गा -गं, विकृत: -ता -तं, विकारित: -ता -तं, विकृतबुद्धि: -द्धि: -द्धि, निवृत्तस्नेह: -हा -हं, दूरीभूत: -ता -तं.

ESTRANGEMENT, *s.* विरक्ति: *f.*, वैरक्त्यं, विराग:, वैराग्यं, विकृति: *f.*, विकार:, बुद्धिविकार:, स्नेहनिवृत्ति: *f.*, स्नेहविच्छेद:, स्नेहभेद:, स्नेहच्छेद:, वियोग:, विप्रयोग:, विक्षेप:, दूरीभाव:, पृथग्भाव:.

ESTUARY, *s.* समुद्रशाखा, समुद्रवङ्क:.—(Mouth of a river) सम्भेद:, सङ्गम:.

To ESTUATE, *v. n.* फेन (nom. फेनायते), उत्सेचनं कृ, वेला (nom. वेलायते).

ET-CÆTERA. Expressed by आदि: -दि in the *m.* or *n.* gender and in the *plur.* or *sing.* numb.; as, 'parrots, starlings, &c.,' शुकसारिकादय:; 'Indra, Kuvera, &c.,' इन्द्रकुवेरादय:; 'Of Agni, Pavana, &c.,' अग्निपवनादीनां; 'the nose, eyes, &c.,' नासाचक्षुरादीनि; 'peace, war, &c.' सन्धिविग्रहादि; 'by liberality, &c.,' दानादिना; 'from liberality, &c.,' दानादे: (for दानादिन:). Sometimes इति is prefixed to आदि; as, 'the word chitralig, &c.,' चित्रलिगित्यादि. Sometimes आदिक: -का -कं, आद्य: -द्या -द्यं and प्रभृति are used for आदि; as, 'gifts, &c.,' दानादिकं; 'Indra, &c.,' इन्द्राद्या:, or इन्द्रप्रभृतय: *pl.*

To ETCH, *v. a.* लिख् (c. 6. लिखति, लेखितुं), आलिख्, चित्र् (c. 10. चित्रयति -यितुं).

ETCHING, *s.* चित्रलिखनं, चित्रं, आलेख्यं, वर्त्तिकारेखा.

ETERNAL, *a.* नित्य: -त्या -त्यं, अनन्त: -न्ता -न्तं -न्तक: -का -कं, सनातन: -नी -नं, शाश्वत: -ती -तं, अनादि: -दि: -दि, अनाद्यन्त: -न्ता -न्तं, अनाद्य: -द्या -द्यं, सदातन: -नी -नं, अनन्तकालस्थायी -यिनी -यि (न्), सर्व्वकालीन: -ना -नं, नैत्यिक: -की -कं, अनन्त्य: -न्त्या -न्त्यं, ध्रुव: -वा -वं, सतत: -ता -तं, सतत: -ता -तं, अभीक्ष्ण: -क्ष्णा -क्ष्णं, निरपाय: -या -यं, निरन्तर: -रा -रं, अविच्युत: -ता -तं, अविसर्गी -र्गिणी -र्गि (न्), अविरत: -ता -तं, अमर: -रा -रं.

ETERNALLY, *adv.* नित्यं, नित्यदा, नित्यशस्, शाश्वतं, शश्वत्, सततं, सन्ततं, अनन्तं, अनाद्यन्तं, सना, अजस्रं, अनिशं, अभीक्ष्णं, निरन्तरं, अविरतं, अश्रान्तं, अनारतं, सर्व्वकालं.

ETERNITY, *s.* नित्यता, नैत्यं, अनन्तता -त्वं, आनन्त्यं, अनन्त्यं, अनन्तकाल:, अनाद्यन्तता, ध्रुवता, ध्रौव्यं, अनन्तभाव:, नैरन्तर्य्यं, अमरता.

To ETERNIZE, *v. a.* अनन्त (nom. अनन्तयति -यितुं), अनन्तीकृ, शाश्वतीकृ.

ETESIAN, *a.* सांवत्सरिक: -की -कं, प्रतिवार्षिक: -की -कं, सामयिक: -की -कं.

ETHER, *s.* आकाश:, खं, शून्यं, वायु: *m.*, निर्म्मलवायु:, अन्तरीक्षोपरिस्थ: सूक्ष्मवायु:, नभ: *n.* (स्), गगनं, विहाय: *n.* (स्).

ETHERIAL, *a.* आकाशीय: -या -यं, आकाशज: -जा -जं, आकाशसम्भव: -वा -वं, आकाशस्थ: -स्था -स्थं, खसम्भव: -वा -वं, वायव: -वी -वं, वैहायस: -सी -सं.

ETHIC, ETHICAL, *a.* वैनयिक: -की -कं, नीतिविषय: -या -यं, नीतिविद्याविषयक: -का -कं, नीतिशास्त्रसम्बन्धी -न्धिनी -न्धि (न्), नीतिशास्त्रीय: -या -यं.

ETHICALLY, *adv.* नीतिशास्त्रवत्, नीतिशास्त्रानुसारेण.

ETHICS, *s.* नीतिविद्या, नीति: *f.*, नीतिशास्त्रं, विनय:, विनयविद्या, अर्थशास्त्रं, दण्डनीति: *f.*, शीलविद्या, आन्वीक्षिकी.—(As invented by Vrihaspati) बार्हस्पत्यं.

ETHNIC, ETHNICAL, *a.* (Relating to the Gentiles) अन्यदेशीय: -या -यं, भिन्नदेशीय: -या -यं, देवार्च्चकसम्बन्धी -न्धिनी -न्धि (न्), देवपूजकसम्बन्धी &c.

ETHNOLOGY, *s.* नृकुलविद्या, नृजातिविद्या, नृवंशविद्या.

ETIQUETTE, *s.* सदाचारविधि: *m.*, आर्य्यव्यवहारविधि:, सुजनाचारविधि:, विनयविधि:, विनयरीति: *f.*, आदरविधि: *m.*, सौजन्यं, मर्य्यादा, सुनीति: *f.*, सभ्यता, सच्चरित्रं, न्याय:.

ETYMOLOGICAL, *a.* शब्दव्युत्पत्तिविषय: -या -यं, पदभञ्जनविषय: -या -यं, शब्दशास्त्रसम्बन्धी -न्धिनी -न्धि (न्), शब्दसाधनविद्यासम्बन्धी &c.

ETYMOLOGIST, *s.* शब्दव्युत्पत्तिकुशल:, पदभञ्जनविद्याज्ञ:, शब्दशास्त्रज्ञ:.

To ETYMOLOGIZE, *v. n.* शब्दव्युत्पत्तिं कृ, पदभञ्जनं कृ, शब्दसाधनं कृ.

ETYMOLOGY, *s.* व्युत्पत्ति: *f.*, शब्दव्युत्पत्ति: *f.*, शब्दव्युत्पत्तिविद्या, पदभञ्जनं, शब्दसाधनं, शब्दसाधनविद्या.

EUCHARIST, *s.* ख्रीष्टमृत्युस्मरणार्थकं भोजनं, ख्रीष्टभोजनं, ख्रीष्टप्रकल्पितभोजनं.—(Giving thanks to God) ईश्वरस्य धन्यवादकरणं or कुशलवाद:.

EULOGIST, *s.* प्रशंसक:, गुणश्लाघक:, स्तुतिपाठक:, बन्दी *m.* (न्).

EULOGISTIC, *a.* स्तुतिमय: -यी -यं, प्रशंसाकर: -री -रं, वन्दारु: -रु: -रु.

To EULOGIZE, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), स्तु (c. 2. स्तौति, स्तोतुं), अभिष्टु, संस्तु, श्लाघ् (c. 1. श्लाघते -घितुं), गुणान् कृत् (c. 10. कीर्त्तयति -यितुं) or उत्कृत्.

EULOGIZED, *p. p.* प्रशंसित: -ता -तं, प्रशस्त: -स्ता -स्तं, श्लाघित: -ता -तं, स्तुत: -ता -तं.

EULOGY, *s.* प्रशंसा -सनं, गुणप्रशंसा, स्तुति: *f.*, गुणस्तुति: *f.*, स्तव:, श्लाघा, गुणश्लाघा, स्तुतिवाद:, स्तुतिवाक्यं, गुणोत्कीर्त्तनं, स्तोत्रं, शंसा, यशोवर्णना, वर्णना, वन्दना, बन्दिपाठ:, गुणगानं, ओगावली.

EUNUCH, *s.* क्लीव:, षण्ढ:, षण्ड:, शण्ढ:, शण्ड:, मुष्कशून्य:, छिन्नवृषण:, छिन्नमुष्क:, निर्मुष्कः, नपुंसक:, पोगण्ड:, पण्ड:, तृतीयप्रकृति: *m.*, तृतीयाप्रकृति:, अफल:, विफल:, वर्षवर:, तूवर:.—(Guard of the women's apartments) स्थापत्य:, कञ्चुकी *m.* (न्), शुद्धान्तपालक:, शुद्धान्तजन:.

EUPHONIC, *a.* सुस्वर: -रा -रं, सुशब्द: -ब्दा -ब्दं, सुश्राव्य: -व्या -व्यं, श्रुतिसुख: -खा -खं, सुखास्वन: -ना -नं, अकर्कश: -शा -शं.

EUPHONY, *s.* सुस्वर:, सुशब्द:, सुस्वन:, सुश्राव्यशब्द:, अकटुत्वं, अकर्कशत्वं.

EUPHORBIA, *s.* बहुदुग्धिका, समन्तदुग्धा, सीहुण्ड:, वज्रद्रु: *m.*, स्नुक् *f.* (ह्),

चुही, गुहा.

EUROPEAN, *s.* अरोपीयः, अरोप्नामकदेशजः, ताम्रमुखः,

To EVACUATE, *v. a.* शून्यीकृ, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, विरिच् (c. 7. -रिणक्ति -रेक्तुं -रेक्तुं), रिच्, उच्चर् (c. 1. -चरति -रितुं), निश्चर् in caus. (-चारयति -यितुं), शुध् (c. 10. शोधयति -यितुं); 'the bowels,' मलोत्सर्गं कृ, मलविसर्गं कृ, मलशुद्धिं कृ.

EVACUATED, *p. p.* रेचितः -ता -तं, विरेचितः -ता -तं, शोधितः -ता -तं, रिक्तः -क्ता -क्तं, विरिक्तः -क्ता -क्तं, विसृष्टः -ष्टा -ष्टं.

EVACUATION, *s.* (Of the bowels) मलविसर्गः, मलोत्सर्गः, समुत्सर्गः, मलशुद्धिः *f.*, मलशोधनं, विरेकः, विरेचनं, रेकः, रेचनं, मलोच्चारः, उच्चारः, शोधनं, उत्थानं, निर्हारः, निश्चारकः, अधोभागहरं.

To EVADE, *v. a.* छलेन पलायित्वा परिहृ (c. 1. -हरति -हर्त्तुं) or प्रोज्झ् (c. 6. -उज्झति -ज्झितुं).—(Elude by sophistry) वक्रोक्त्या छल् (c. 10. छलयति -यितुं), अपलप् (c. 1. -लपति -पितुं), अपह्नु (c. 2. -ह्नुते -ह्नोतुं), निह्नु, अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्.

To EVADE, *v. n.* (Escape) छलेन पलाय् (c. 1. पलायते -यितुं, rt. इ) or निस्तॄ (c. 1. -तरति -रितुं -रीतुं) or अपक्रम् (c. 1. -क्रामति -क्रमितुं) or अपधाव् (c. 1. -धावति -वितुं) or अपसृप् (c. 1. -सर्पति -सर्प्तुं), or उत्पत् (c. 1. -पतति -तितुं) or निष्पत्.—(Practice artifice) वाक्छलं कृ, वक्रोक्तिं कृ, व्यपदेशं कृ, अपह्नवं कृ.

EVADED, *p. p.* छलेन or व्यपदेशेन परिहृतः -ता -तं or प्रोज्झितः -ता -तं, निह्नुतः -ता -तं, अपह्नुतः -ता -तं, निस्तीर्णः -र्णा -र्णं.

EVAGATION, *s.* भ्रमणं, परिभ्रमणं, विभ्रान्तिः *f.*, भ्रान्तिः *f.*, विचलनं, व्यभिचारः,

EVANESCENCE, *s.* अन्तर्द्धानं, तिरोधानं, अन्तर्हितत्वं, अदर्शनं.

EVANESCENT, *a.* तिरोधेयः -या -यं, अन्तर्हितः -ता -तं, अदृश्यरूपः -पी -पं, अदृश्यः -श्या -श्यं, अप्रत्यक्षः -क्षा -क्षं, परोक्षः -क्षा -क्षं.—(Fleeting) भङ्गुरः -रा -रं, क्षणभङ्गुरः -रा -रं, क्षणमात्रस्थायी -यिनी -यि (न्), अशाश्वतः -ती -तं.

EVANGELICAL, *a.* सुसंवादानुसारी -रिणी -रि (न्), ख्रीष्टीयधर्म्मानुयायी -यिनी -यि (न्), ख्रीष्टप्रचारितः -ता -तं, ख्रीष्टीयधर्म्मपुस्तकान्तर्गतः -ता -तं.

EVANGELIST, *s.* (Writer of the life of Christ) ख्रीष्टचरित्ररचकः, ख्रीष्टसमाचाररचकः, सुसंवादलेखकः, मङ्गलसमाचारलेखकः.—(Preacher of the Gospel) सुसंवादप्रचारकः, ख्रीष्टीयधर्म्मप्रवक्ता *m.* (क्तृ).

To EVANGELIZE, *v. a.* and *n.* सुसंवादं प्रचर् in caus. (-चारयति -यितुं), ख्रीष्टीयधर्म्मं प्रवच् (c. 2. -वक्ति -क्तुं) or उपदिश् (c. 6. -दिशति -देष्टुं) or ग्रह् in caus. (-ग्राहयति -यितुं), ख्रीष्टीयधर्म्मे प्रवृत् in caus. (-वर्त्तयति -यितुं).

To EVAPORATE, *v. n.* वाष्प (nom. वाष्पायते), धूम (nom. धूमायते) वाष्पसाद्भू, वाष्पीभू, वाष्परूपेण उत्पत् (c. 1. -पतति -तितुं) or उद्गम् (c. 1. -गच्छति -गन्तुं), धूमरूपेण विद्रु (c. 1. -द्रवति -द्रोतुं) or नश् (c. 4. नश्यति, नशितुं) or प्रणश् or अन्तर्धा in pass. (-धीयते) or क्षि in pass. (क्षीयते).—(Dry up) आतपेन परिशुष् (c. 4. -शुष्यति -शोष्टुं), शुष्कीभू.

To EVAPORATE, *v. a.* वाष्पसात्कृ, धूमसात्कृ, वाष्पीकृ, वाष्परूपेण विद्रु in caus. (-द्रावयति -यितुं), आतपेन परिशुष् in caus. (-शोषयति -यितुं) or शुष्कीकृ.

EVAPORATED, *p. p.* आतपशुष्कः -ष्का -ष्कं, परिशुष्कः -ष्का -ष्कं, शोषितरसः -सा -सं, वाष्परूपेण उद्गतरसः -सा -सं, वाष्पसात्कृतः -ता -तं, वाष्पीभूतः -ता -तं.

EVAPORATION, *s.* (Drying up) परिशोषः -षणं, शोषः -षणं, उच्छोषणं.—(Conversion to vapour) वाष्पसात्करणं, धूमसात्करणं, वाष्पभावः, वाष्परूपेण उत्पतनं or उद्गमः or नाशः, वाष्पीभूतत्वं.

EVASION, *s.* (Artifice to elude) अपदेशः, व्यपदेशः, छद्म *n.* (न्), छलं, कपटः -टं, अपह्नवः, निह्नवः.—(Equivocation) वक्रोक्तिः *f.*, वक्रता, वक्रवाक्यं, वाक्छलं, अपलापः, कैतववादः, प्रतीपवचनं.—(Escape) निस्तारः, उत्तरणं, निर्गमः, निर्गतिः *f.*, पलायनं, अपक्रमः.

EVASIVE, *a.* छली -लिनी -लि (न्), छलान्वितः -ता -तं, व्यपदेशकः -का -कं, वञ्चकः -का -कं, निह्नवकारी -रिणी -रि (न्).—(Equivocating) वक्रः -क्रा -क्रं, वाक्छलान्वितः -ता -तं; 'an evasive answer,' निह्नवोत्तरं, वक्रोत्तरं,

EVASIVELY, *adv.* वाक्छलेन, वक्रोक्त्या, निह्नवेन, सनिह्नवं, वक्रं.

EVE, *s.* (The fast to be observed on the evening before a holiday) महापर्व्वणः पूर्व्वदिनान्ते सेवनीय उपवासः, पुण्यदिवसस्य पूर्व्वप्रदोषः.—(Decline of day). *See* EVENING.—'To be on the eve of happening,' उपस्था (c. 1. -तिष्ठति -स्थातुं).

EVEN, *s.* सायः, सायङ्कालः, प्रदोषः, प्रदोषकालः. *See* EVENING.

EVEN-TIDE, *s.* सन्ध्याकालः, सन्ध्यासमयः, सायङ्कालः, प्रदोषकालः, प्रदोषसमयः.

EVEN, *a.* (Level, flat) समः -मा -मं, समानः -ना -नं, समस्थः -स्था -स्थं, सपाटः -टा -टं, घनाघनः -ना -नं; 'even ground,' समभूमिः *f.*, समस्थलं, आजिः *f.*, पाटः.—(Straight) समरेखः -खा -खं, अवक्रः -क्रा -क्रं, अभुग्नः -ग्ना -ग्नं, निर्भुग्नः -ग्ना -ग्नं, ऋजुः -जुः -जु, अजिह्मः -ह्मा -ह्मं.—(Smooth) श्लक्ष्णः -क्ष्णा -क्ष्णं, अरूक्षः -क्षा -क्षं.—(Uniform, equal) तुल्यः -ल्या -ल्यं, समतुल्यः -ल्या -ल्यं, उभयपार्श्वयोः समानः -ना -नं, निर्विकारः -रा -रं; 'in temper,' समभावः -वी -वं, समवृत्तिः -त्तिः -त्ति.—(Not odd) युग्मः -ग्मा -ग्मं, युगलः -ला -लं, समः -मा -मं; 'an even number,' युग्मं, युगलं; 'with both feet even,' समपदं.

To EVEN, *v. a.* समस्थलीकृ, समीकृ, समानीकृ, समान (nom. समानयति -यितुं).

EVEN, *adv.* अपि, एव, वा, वापि, सह, 'even though,' यद्यपि, यद्यपि स्यात, तथापि; 'even so,' इत्थं, एवमेव, तथा, तथापि, तथैव; 'even as,' यथैव, यद्वदेव, यत्प्रकारेण; 'even now,' अद्यापि, अद्यैव; 'not even,' नापि, नैव.

EVEN-HANDED, *a.* उभयसमः -मा -मं, समदर्शी -र्शिनी -र्शि (न्), विपक्षपातः -ता -तं.

EVENING, *s.* प्रदोषः, प्रदोषकालः, सायः, सायङ्कालः, सायाह्नः, अपराह्नः, सन्ध्या, सन्ध्याकालः, विकालः -लकः, वैकालः, दिनान्तः, दिनावसानं, दिवसावसानं, दिवसात्ययः, अहःशेषः, दिनशेषः, रजनीमुखं, निशादिः *f.*, रात्र्यारम्भः, उत्सूरः, अह्नः पञ्चमो भागः; 'in the evening,' सायं, सायं, दिनान्ते, अभिसायं, अनुसन्ध्यं; 'good evening to you,' शुभस् ते प्रदोषः.

EVENING, *a.* प्रादोषिकः -की -कं, वैकालिकः -की -कं, सान्ध्यः -न्ध्यी -न्ध्यं, सायन्तनः -नी -नं, अपराह्णेतनः -नी -नं or अपराह्णतनः.

EVENLY, *adv.* समं, समानं, समानतस्, अञ्जसा, तुल्यं; 'evenly matched,' तुल्यबलः -ला -लं, तुल्यवीर्य्यः -र्य्या -र्य्यं, समतोलः -ला -लं.

EVEN-MINDED, *a.* समचित्तः -त्ता -त्तं, समबुद्धिः -द्धिः -द्धि, समभावः -वा -वं, सम्पत्सम्पन्नः -न्ना -न्नं, शमसम्पन्नः -न्ना -न्नं, सम्पदापदोर् हर्षविषादरहितः -ता -तं.

EVENNESS, *s.* समता, समानता -त्वं, साम्यं, साम्यता, सामञ्जस्यं, तुल्यता, ऋजुता, निर्भुग्नता; 'of temper,' समचित्तत्वं, समानवृत्तिः *f.*, समभावः.

EVENT, *s.* वृत्तं, सम्भवः, उत्पन्नं, समुत्पत्तिः *f.*, समुत्पन्नं, समुद्भवः, सङ्गतं, गतं, सङ्गतिः *f.*, घटना, समुपागतं, उपागमः, समुपस्थितं.—(Consequence, conclusion) उद्वृत्तं, अनुवृत्तं, अनुवर्त्तनं, परिणामः, निष्पन्नं, सिद्धिः *f.*

To EVENTERATE, *v. a.* निरन्त्रीकृ, अन्त्राणि विदृ in caus. (-दारयति-यितुं).

EVENTFUL, *a.* गुरुघटनाविशिष्टः -ष्टा -ष्टं, गुरुसङ्गतिविशिष्टः -ष्टा -ष्टं, बहुवृत्तविशिष्टः -ष्टा -ष्टं, बहुसमुदयवान् -वती -वत् (त्), बहुघटनामयः -यी -यं.

To EVENTILATE, *v. a.* वीज् (c. 10. वीजयति -यितुं), विधू (c. 5. -धूनोति, c. 6. -धुवति -धवितुं), निष्पावं कृ.

EVENTUAL, *a.* (Consequential) अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), आनुषङ्गिकः -की -कं, अनुसारी -रिणी -रि (न्), अनुभूतः -ता -तं, परः -रा -रं.—(Ultimate) अन्तिमः -मा -मं, अन्त्यः -न्त्या -न्त्यं.

EVENTUALLY, *adv.* अन्ततम्, अन्ते, शेषे, शेषतस्, परतस्, प्रयोगतस्.

EVER, *adv.* (At any time) कदाचित्, कदापि, कदाचन, कर्हिचित्, जातु.—(Always, at all times) सदा, सर्व्वदा, सततं, नित्यदा, अनुक्षणं, प्रतिक्षणं; 'for ever,' नित्यं, सर्व्वकालं, अनन्तकालं, शाश्वतीः समाः, अजस्रं, शश्वत्, निरन्तरं, सना; 'ever and anon,' वारं वारं, काले काले, अनुकालं; 'ever since,' यतः प्रभृति; 'ever so little,' मनाक्, ईषत्, किञ्चित्, कियत्.—(As a word of enforcement) एव; 'ever young,' नित्ययौवनः -ना -नं; 'ever happy,' सदानन्दः -न्दा -न्दं.

EVERGREEN, *a.* अशीर्णपत्रः -त्रा -त्रं, अम्लानपर्णः -र्णा -र्णं, अशुष्कपर्णः -र्णा -र्णं.

EVERLASTING, *a.* अनन्तः -न्ता -न्तं, अनन्तकालस्थायी -यिनी -यि (न्), नित्यस्थायी &c., शाश्वतः -ती -तं, अक्षयः -या -यं, अनाश्यः -श्या -श्यं, अजरः -रा -रं. *See* ETERNAL.

EVERLASTINGLY, *adv.* शाश्वतं, अनन्तकालं, शाश्वतीः समाः, नित्यं, अजस्रं.

EVERLIVING, *a.* नित्यजीवी -विनी -वि (न्), अनन्तकालजीवी &c. *See* ETERNAL.

EVERMORE, *s.* अनन्तकालं, सर्व्वकालं, शाश्वतीः समाः, शाश्वतं, शश्वत्, नित्यं, नित्यकालं, सततं, अजस्रं, सना. *See* ETERNALLY.

EVER-RESTLESS, *a.* नित्यगतिः -तिः -ति, सदागतिः -तिः -ति, सततगतिः -तिः -ति.

EVERSION, *s.* पर्य्यासः, पराक्षेपः, परिवर्त्तनं, नाशः, विनाशः.

To EVERT, *v. a.* पर्य्यस् (c. 4. -अस्यति -असितुं), पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधः कृ.

EVERY, *a.* सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, सकलः -ला -लं, सर्व्वकः -का -कं; 'every art,' सर्व्वकर्म्म *n.* (न्); 'knowing every thing,' सर्व्वज्ञः; 'every road,' सर्व्वपथः; 'the maker of every thing,' सर्व्वभूतकृत्, सर्व्वकर्त्ता *m.* (र्तृ), विश्वकृत्; 'enduring every thing,' सर्व्वंसहः, विश्वसहः; 'every one,' सर्व्वजनाः *m. pl.*, विश्वजनं; 'dear to every one,' सर्व्वप्रियः; 'sustaining every thing,' विश्वम्भरः. 'Every,' may often be expressed by प्रति or अनु prefixed; as, 'every day,' प्रतिदिनं, प्रतिदिवसं, अनुदिनं, अन्वहं, प्रत्यहं; 'every night,' प्रतिरात्रं; 'every month,' प्रतिमासं; 'every moment,' अनुक्षणं; 'to every one,' प्रत्येकं. Or by doubling the word; as, 'every day,' दिने दिने, दिवसे दिवसे, अहरहः; 'in every house,' गृहे गृहे; 'every one,' एकैकः -का -कं, एकैकशस्, पृथक् पृथक्; 'every man,' एकैकजनः, प्रतिजनं; 'in every direction,' प्रतिदिशं, सर्व्वदिक्षु, सर्व्वपर्य्यीणः -णा -णं; 'on every side,' सर्व्वतस्, समन्ततस्, समन्तात्, विश्वतस्, परितस्.

EVERYWHERE, *adv.* सर्व्वत्र, सर्व्वतस्, विश्वतस्, विश्वक्, सर्व्वके, प्रतिदिशं; 'going everywhere,' सर्व्वगः -गा -गं, सर्व्वगः -गा -गं, विश्वव्यापी -पिनी -पि (न्).

To EVICT, *v. a.* निर्णयपादानन्तरं or व्यवहारदर्शनानन्तरम् अधिकाराद् भ्रंश् (c. 10. भ्रंशयति -यितुं) or निराकृ or वहिष्कृ or अधिकारं or स्वत्वं हृ (c. 1. हरति, हर्त्तुं).

EVICTED, *p. p.* व्यवहारसभासकाशाद् आज्ञया हृताधिकारः -रा -रं, साधितः -ता -तं.

EVICTION, *s.* व्यवहारसभ्यसकाशाद् आज्ञानुसारेण अधिकारान्निराकरणं or वहिष्करणं or स्वत्वहरणं, साधनं.

EVIDENCE, *s.* (Testimony) साक्ष्यं, साक्षिता, प्रमाणं, साधनं, प्रामाण्यं, प्रमाता *m.* (तृ), क्रियानिर्देशः, साधननिर्देशः; 'written evidence,' लेखप्रमाणं, लिखितं, साधनपत्रं; 'ocular evidence,' प्रत्यक्षप्रमाणं, साक्षात्प्रमाणं, चाक्षुषज्ञानं; 'false evidence,' कौटसाक्ष्यं, कूटसाक्ष्यं; 'want of evidence,' साक्ष्याभावः, प्रमाणाभावः.—(Witness) साक्षी *m.* (न्), प्रमाता *m.* (तृ); 'having evidence,' साक्षिमान् -मती -मत् (त्).

To EVIDENCE, *v. a.* प्रमाण (nom. प्रमाणयति -यितुं), प्रमाणीकृ, साक्षिणा or साक्ष्येण or प्रमाणेन साध् (c. 10. साधयति -यितुं) or भू in caus. (भावयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or उपपद् in caus. (-पादयति -यितुं).

EVIDENCED, *p. p.* साक्षिभावितः -ता -तं, साक्षिलक्षणः -णा -णं, स्पष्टीकृतः -ता -तं.

EVIDENT, *a.* स्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं or प्रव्यक्तः or अभिव्यक्तः, प्रत्यक्षः -क्षा -क्षं, प्रकाशः -शा -शं, सुप्रकाशः -शा -शं, समक्षः -क्षी -क्षं, स्फुटः -टा -टं, उल्बणः -णा -णं; 'to make evident,' स्पष्टीकृ, व्यक्तीकृ, प्रकाश् (c. 10. -काशयति -यितुं), प्रकटीकृ, प्रत्यक्षीकृ, आविष्कृ, प्रादुष्कृ; 'to be evident,' स्पष्टीभू, आविर्भू, प्रादुर्भू, प्रादुरस्, प्रकाश् (c. 1. -काशते -शितुं); 'made evident,' स्पष्टीकृतः -ता -तं, प्रादुष्कृतः -ता -तं, प्रकाशितः -ता -तं, प्रत्यक्षभूतः -ता -तं.

EVIDENTLY, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, स्पष्टरूपेण, प्रत्यक्षतस्, प्रत्यक्षेण, साक्षात्, प्रकाशं, स्फुटं, प्रादुस्, समक्षं, नाम.

EVIL, *a.* दुष्टः -ष्टा -ष्टं, पापः -पा -पं, पापी -पिनी -पि (न्), खलः -ला -लं, अभद्रः -द्रा -द्रं, असाधुः -धुः -धु, असन् -सती -सत् (त्), निर्गुणः -णा -णं, शठः -ठा -ठं, मन्दः -न्दा -न्दं, अधमः -मा -मं, कुत्सितः -ता -तं, कदर्य्यः -र्य्या -र्य्यं, अधार्म्मिकः -की -कं. 'Evil,' is often expressed by दुर् or कु, or अप prefixed; as, 'an evil man,' दुर्ज्जनः; 'evil thought,' कुचिन्ता, अपध्यानं; 'evil conduct,' दुर्णयः; 'evil deed,' कुकर्म्म *n.* (न्), दुष्कर्म्म *n.*, अपकर्म्म *n.*, पापकर्म्म *n.*, असत्कर्म्म *n.*, दुष्कृतं; 'evil course,' कुमार्गः, उन्मार्गः, विमार्गः; 'evil destiny,' दुर्भाग्यं, दुर्दैवं.

EVIL, *s.* (Wickedness) पापं, दुष्टता, दोषः, व्यसनं -निता, शाठ्यं, दौष्ट्यं, असाधुता, अधर्म्मः, व्यभिचारः, दौरात्म्यं, दौर्जन्यं, कुसृतिः *f.*, निकारः.—(Injury) अपकारः, अपकृतं, अपायः, द्रोहः, हिंसा, क्षतिः *f.*—(Misfortune, distress) अपायः, अशुभं, दुर्गतिः *f.*, दौर्गत्यं, अकुशलं, अभद्रं, अरिष्टं, अनिष्टं, अहितं, दुःखं, दुरवस्था, दुर्दशा, व्यसनं, उत्पातः, आपद् *f.*, विपद् *f.*, विपत्तिः *f.*, अनिष्टपातः, अनयः, क्लेशः, कष्टं.

EVIL, *adv.* दुष्टु; expressed by दुर्, वि, दुष्ट, पाप &c., prefixed; 'evil-intentioned,' दुष्टबुद्धिः -द्धिः -द्धि, दुराशयः -या -यं, पापाशयः -या -यं; 'evil-affected,' विरक्तः -क्ता -क्तं, अहितः -ता -तं; 'evil-natured,' दुष्प्रकृतिः -तिः -ति; 'evil-fated,' दैवोपहतः -ता -तं, उपहतकः -का -कं, दुर्दैवग्रस्तः -स्ता -स्तं; 'evil-favoured,' कुरूपः -पी -पं.

EVIL-DOER, *s.* पापकारी *m.* (न्), पापकर्त्ता *m.* (र्तृ), पापकरः, पापकृत् *m.*, पापकर्म्मा *m.* (न्), असत्कर्म्मा, कुकर्म्मा, दुष्कृती *m.* (न्), कुकर्म्मकारी *m.*, मन्दचरितः, मन्दकारी *m.*, दुर्वृत्तः, दुष्टचारी *m.* (न्), अधर्म्मचारी *m.* (न्), व्यसनी *m.* (न्).

EVIL-EYE, *s.* कुदृष्टिः *f.*, अदृष्टिः *f.*, दुरीक्षणा, क्रूरदृष्टिः *f.*; evil-eyed,' क्रूरदृक् *m. f. n.* (श्), असदृक् *m. f. n.* पापदृष्टिः -ष्टिः -ष्टि.

EVIL-MINDED, *a.* पापमतिः -तिः -ति, पापबुद्धिः -द्धिः -द्धि, पापचेतनः -ना -नं, दुष्टचित्तः -त्ता -त्तं, दुष्टबुद्धिः -द्धिः -द्धि, दुष्टमतिः -तिः -ति, दुरात्मा

-त्मा -त्म (न्), अधर्म्मात्मा &c., पापात्मा &c., पापस्वभावः -वा -वं, दुष्टान्तःकरणः -णा -णं, दुर्हृदयः -या -यं.

EVIL-SPEAKING, *s.* दुरालापः, अपवादः, वाग्दोषः, पिशुनवाक्यं, मौखर्य्यं.

To EVINCE, *v. a.* स्पष्टीकृ, व्यक्तीकृ, प्रकाश् (c. 10. -काशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, दृश् in caus. (दर्शयति -यितुं), प्रमाणीकृ.

EVINCIBLE, *a.* सूच्यः -च्या -च्यं, साध्यः -ध्या -ध्यं, निर्देशनीयः -या -यं.

EVINCIBLY, *adv.* स्पष्टं, सुस्पष्टं, सुव्यक्तं, असंशयं, अत्र न सन्देहः.

To EVISCERATE, *v. a.* निरन्त्रीकृ, निरन्त्र (nom. निरन्त्रयति -यितुं), नाडीर् वहिष्कृ.

EVITABLE, *a.* परिहरणीयः -या -यं, हेयः -या -यं, वर्ज्जनीयः -या -यं.

EVOCATION, *s.* (Calling upon) आह्वानं, प्रह्वायः, अनुकर्षणं.—(Appealing) पुनराह्वानं, पुनर्विचारप्रार्थना, अन्यप्राड्विवाकसाक्षाद् आह्वानं.

To EVOKE, *v. a.* आह्वे (c. 1. -ह्वयति -ह्वातुं), प्रह्वे, अनुकृष् (c. 1. -कर्षति -क्रष्टुं).—(From one tribunal to another) अन्यविचारसभासाक्षाद् आह्वे.

EVOLUTION, *s.* (Unfolding) विस्तारः -रणं, प्रसारणं, प्रकटीकरणं, विवारः, विवृतिः *f.*—(In arithmetic) प्रादुर्भावः.—(Series) श्रेणी, श्रेधी.

To EVOLVE, *v. a.* विस्तृ in caus. (-स्तारयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), अपावृ, वितन् (c. 8. -तनोति -नितुं), विततीकृ.

EVOLVED, *p. p.* विस्तारितः -ता -तं, प्रसारितः -ता -तं, विवृतः -ता -तं.

EVULSION, *s.* उत्पाटनं, उत्कर्षणं, विकर्षणं, उल्लुञ्चनं, अवलुञ्चनं.

EWE, *s.* मेषी -षिका, एडका, उरणी, भेडी, अविला; 'ewe's milk,' अविसोढं, अविदूसं, अविमरीसं.

EWER, *s.* घटी, उदकपात्रं, उदपात्रं, कुम्भः, पुटग्रीवः, कमण्डलुः *m.*

To EXACERBATE, *v. a.* प्रकुप् in caus. (-कोपयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), तीक्ष्णीकृ, तिग्मतरं -रां -रं कृ, तीव्रतरं -रां -रं कृ, उग्रतरं -रां -रं कृ.

EXACERBATION, *s.* प्रकोपः -पणं, उत्तेजनं, समुत्तेजनं, उग्रत्वं, कोपज्वलनं, कोपवर्धनं, रोगवृद्धिः *f.*

EXACT, *a.* (Accurate, correct) यथार्थः -र्था -र्थं, याथार्थिकः -की -कं, समञ्जसः -सा -सं, अञ्जसः -सा -सं, सत्यः -त्या -त्यं, ऋतः -ता -तं, तथ्यः -थ्या -थ्यं, यथातथः -था -थं, शुचिः -चिः -चि, शुद्धः -द्धा -द्धं, निर्दोषः -षा -षं, दोषरहितः -ता -तं, स्पष्टः -ष्टा -ष्टं.—(Careful) सयत्नः -त्ना -त्नं, अवहितः -ता -तं, अप्रमादी -दिनी -दि (न्).—(Nice, precise) सूक्ष्मः -क्ष्मा -क्ष्मं.—(Not different) समानः -ना -नं, निर्विशेषः -षा -षं, अनन्यः -न्या -न्यं -न्यत्, समसमानः -ना -नं.—(Neither more nor less) नाधिको न च न्यूनः; 'the exact state,' तारतम्यं; 'exact measurement,' सूक्ष्ममानं.

To EXACT, *v. a.* (Compel to pay) दा in caus. (दापयति -यितुं), विहा in caus. (-हापयति -यितुं); 'exact tribute,' वलिं or शुल्कम् आहृ in caus. (-हारयति -यितुं) or अपहृ.—(Take forcibly) बलात् or बलेन ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं).—(Demand) याच् (c. 1. याचति -चितुं), प्रार्थ् (c. 10. -अर्थयति -ते -यितुं).—(Enforce) कृ in caus. (कारयति -यितुं) with 2 acc.; 'exact punishment,' दण्डं प्रणी (c. 1. -णयति -णेतुं).

To EXACT, *v. n.* बाध् (c. 1. बाधते -धितुं), बाधं कृ, उपद्रवं कृ, उपधिं कृ.

EXACTED, *p. p.* बलाद्गृहीतः -ता -तं, अपहारितः -ता -तं, आहारितः -ता -तं, आकारितः -ता -तं, विहापितः -ता -तं.

EXACTER, *s.* बलात्कारपूर्व्वं परस्वादायी *m.* (न्) or परस्वग्राहकः, उपधिकः, औपधिकः, बाधकः, आहारकः, अपहारकः, हारकः.

EXACTING, *a.* बाधकः -का -कं, विप्रलुम्पकः -का -कं, प्रार्थकः -का -कं.

EXACTION, *s.* बलेन ग्रहणं or आदानं or हरणं, भर्त्सनपूर्व्वं प्रार्थनं or याचना, बाधः -धनं, उपद्रवः, विप्लवः, उपधिकरणं, परस्वादानं, अर्कभ्रतं.

EXACTLY, *adv.* यथार्थं, यथावत्, सम्यक्, अञ्जसा, समञ्जसं, यथातथं, तथ्यं, सत्यं, ऋतं, सूक्ष्मत्वेन, सूक्ष्मतया; 'neither more nor less,' नाधिकं न च न्यूनं; 'exactly so,' एवमेव, तथैव; 'exactly alike,' समसमानः -ना -नं.

EXACTNESS, *s.* (Accuracy) याथार्थ्यं, यथार्थता, सम्यक्त्वं, याथातथ्यं, सत्यता, तथ्यं, सामञ्जस्यं, शुद्धता.—(Niceness, precision) सूक्ष्मता, सौक्ष्म्यं.—(Carefulness) अवहितत्वं, अप्रमादः, यत्नः, आस्था.—(Regularity, method) पारिपाट्यं, समता, अनुक्रमणं, क्रमानुसारः, न्यायः.

To EXAGGERATE, *v. a.* अत्युक्त्या or अतिशयोक्त्या वृध् (c. 10. वर्धयति -यितुं) or विस्तृ in caus. (-स्तारयति -यितुं) or अधिकीकृ, or उपचि (c. 5. -चिनोति -चेतुं), अतिशयेन वर्ण् (c. 10. वर्णयति -यितुं), अतिवर्णनं कृ, अत्युक्तिं कृ, वाग्विस्तारं कृ.

EXAGGERATED, *p. p.* वर्धितः -ता -तं, अधिकीकृतः -ता -तं, विस्तारितः -ता -तं, उपचितः -ता -तं, अत्युक्तिपूर्व्वं वर्णितः -ता -तं or प्रपञ्चितः -ता -तं.

EXAGGERATION, *s.* अत्युक्तिः *f.*, अतिशयोक्तिः *f.*, अधिकं, वागाधिक्यं, अधिकीकरणं, वागुपचयः, वाक्यबाहुल्यं, चित्रोक्तिः, अतिवर्णना, अतिप्रपञ्चः.

To EXAGITATE, *v. a.* विक्षुभ् in caus. (-क्षोभयति -यितुं). *See* AGITATE.

To EXALT, *v. a.* उन्नम् in caus. -नमयति -यितुं), उच्छ्रि (c. 1. उच्छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, उच्चीकृ, ऊर्द्ध्वीकृ, उन्नी (c. 1. -नयति -नेतुं), उन्नतिं कृ, समुन्नतिं कृ, उद्धृ (c. 1. -हरति -हर्त्तुं), अधिरुह् in caus. (-रोपयति -यितुं). *See* ELEVATE.

EXALTATION, *s.* उन्नतिः *f.*, समुन्नतिः *f.*, उत्कर्षः, उत्कृष्टता, औत्कर्ष्यं, उच्छ्रयः, समुच्छ्रयः, उत्सेधः, उद्धृतिः *f.*, उच्चयः, उच्चता, ऊर्द्ध्वत्वं, अधिरोहः. *See* ELEVATION.

EXALTED, *p. p.* उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, उत्कृष्टः -ष्टा -ष्टं, उद्धतः -ता -तं, उद्यतः -ता -तं, अधिरोपितः -ता -तं, अधिरूढः -ढा -ढं, उद्धृतः -ता -तं, आभ्युदयिकः -की -कं. *See* ELEVATED.

EXAMINATION, *s.* (Investigation) परीक्षा -क्षणं, निरूपणं, अनुसन्धानं, विचारः -रणं -णा, जिज्ञासा, अन्वेषणा -णं, अनुयोगः, समीक्षणं, संवीक्षणं, प्रसमीक्षा, निर्णयः, चर्चा, निरूपत्वं, विमर्शः, निश्चयः, परीष्टिः *f.*, विवेचना, शोधनं.—(By question) प्रश्नेन परीक्षा, प्रश्नोत्तरक्रमेण जिज्ञासा or परीक्षा.—(Inspection) निरीक्षणं, आलोचनं, अवेक्षा -क्षणं, दर्शनं, सन्दर्शनं.—(Judicial) विचारः, व्यवहारदर्शनं, आह्वानदर्शनं; 'examination of a witness,' साक्षिपरीक्षा.

To EXAMINE, *v. a.* (Investigate) परीक्ष् (c. 1. -ईक्षते -क्षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), ज्ञा in des. (जिज्ञासते -सितुं), अन्विष् (c. 4. -इष्यति -एषितुं) or अन्वेष् (c. 1. -एषते -षितुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विचर् in caus. (-चारयति -यितुं), चर्च् (c. 1. चर्चति -र्चितुं), विमृश् (c. 6. -मृशति -म्रष्टुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), विनिश्चि, विचि, अभिनिध्यै (c. 1. -ध्यायति -ध्यातुं), मार्ग् (c. 10. मार्गयति -यितुं).—(Inspect) निरीक्ष्, अवेक्ष्, समीक्ष्, वीक्ष्, अभिवीक्ष्, दृश् (c. 1. पश्यति द्रष्टुं), अनुदृश्, परिदृश्, सन्दृश्, प्रतिदृश्, आलोच् (c. 10. -लोचयति -यितुं), आलोक् (c. 10. -लोकयति -यितुं).—(Interrogate) अनुप्रच्छ् (c. 6. -पृच्छति -प्रष्टुं), परिप्रच्छ्, समनुप्रच्छ्, प्रश्नेन परीक्ष्, प्रश्नोत्तरक्रमेण परीक्ष् or अनुयुज्.—(Judicially) विचर् in caus. विचारं कृ; 'examine witnesses,' साक्षिणः परीक्ष्.

EXAMINED, *p. p.* निरूपितः -ता -तं, परीक्षितः -ता -तं, निरीक्षितः -ता -तं, अवेक्षितः -ता -तं, जिज्ञासितः -ता -तं, विचारितः -ता -तं, अनुयुक्तः -क्ता -क्तं, चर्चितः -ता -तं, अन्वेषितः -ता -तं, निर्णीतः -ता -तं, आलोचितः -ता -तं.

EXAMINER, *s.* परीक्षकः, विचारकः, विचारकर्त्ता *m.* (र्तृ), अनुसन्धाता *m.* (तृ), निरूपकः, अनुयोक्ता *m.* (क्तृ), निर्णेता *m.* (तृ), जिज्ञासाकृत्.

FAITHFUL, *a.* (Firm in adherence) भक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्), दृढभक्तिः -क्तिः -क्ति, भक्तियुक्तः -क्ता -क्तं, आप्तः -प्ता -प्तं, अव्यभिचारी -रिणी -रि (न्); 'faithful to one's master,' प्रभुभक्तः -क्ता -क्तं; 'a faithful friend,' स्थिरप्रेमा *m.* (न्), दृढप्रेमा *m.*, दृढसौहृदः.—(True to obligations) सत्यप्रतिज्ञः -ज्ञा -ज्ञं, सत्यसन्धः -न्धा -न्धं, संशितव्रतः -ता -तं, अस्कन्दितव्रतः -ता -तं, अलङ्घितव्रतः -ता -तं, अनुव्रतः, -ता -तं, प्रतिज्ञापालकः -का -कं.—(Full of faith, having faith) श्रद्धालुः -लुः -लु, श्रद्धावान् -वती -वत् (त्), श्रद्दधानः -ना -नं, श्रद्दधत् -धती -धत् (त्), श्रद्धामयः -यी -यं. विश्वासी -सिनी -सि (न्), प्रत्ययी -यिनी -यि (न्).—(To be trusted, confided in) विश्वास्यः -स्या -स्यं, विश्वसनीयः -या -यं, विश्वस्तः -स्ता -स्तं, विश्रब्धः -ब्धा -ब्धं; 'faithful wife,' पतिव्रता, साध्वी, सती, सुचरित्रा, स्वीया, एकपत्नी; 'faithful lover,' अनुकूलः.

FAITHFULLY, *adv.* भक्त्या, दृढभक्त्या, भक्तवत्, सत्यं, सारल्येन, कपटं विना.

FAITHFULNESS, *s.* (Firm adherence) भक्तिः *f.*, दृढा भक्तिः, भक्तत्वं, भक्तिमत्त्वं, दृढभक्तित्वं, आसक्तिः *f.*, अनुरक्तिः *f.*, दृढं सौहृदं.—(Veracity) सत्यता, सत्यवादित्वं.—(Performance of promises) प्रतिज्ञापालनं -लकत्वं.—(In a wife) पातिव्रत्यं, सतीत्वं, साध्वीत्वं; 'in a lover,' अनुकूलता.

FAITHLESS, *a.* (Unbelieving) अश्रद्दधानः -ना -नं, श्रद्धारहितः -ता -तं, अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी -यि (न्).—(Disloyal, perfidious) अभक्तः -क्ता -क्तं, अभक्तिमान् -मती -मत् (त्). भक्तिहीनः -ना -नं, विश्वासघाती -तिनी -ति (न्), विश्रम्भघाती &c., छिद्रसेवी -विनी -वि (न्), कुटिलाचारः -रा -रं.—(Not to be trusted) अविश्वास्यः -स्या -स्यं.—(Not true to engagements) भग्नप्रतिज्ञः -ज्ञा -ज्ञं, असत्यसन्धः -न्धा -न्धं, मिथ्याप्रतिज्ञः -ज्ञा -ज्ञं. विसंवादी -दिनी -दि (न्).—(Not true to marriage) व्यभिचारी *m.* -रिणी *f.* (न्), असाध्वी *f.*, असती *f.*

FAITHLESSLY, *adv.* अभक्त्या, अभक्तवत्, भक्तिभङ्गात्, प्रतिज्ञाभङ्गात्, मिथ्या.

FAITHLESSNESS, *s.* (Unbelief) अश्रद्धा, अविश्वासः, अप्रत्ययः, अविश्रम्भः.—(Disloyalty) अभक्तिः *f.*, भक्तिहीनता, भक्तिभङ्गः; विश्वासभङ्गः, विश्वासघातः, शत्रुसेवा.—(Violation of promises, &c.) प्रतिज्ञाभङ्गः, प्रतिज्ञातिक्रमः, व्रतलोपनं, संविद्व्यतिक्रमः.

FALCATED, *a.* दात्राकृतिः -तिः -ति, लवित्राकारः -रा -रं, पक्वः -क्वा -क्वं.

FALCHION, *s.* वक्रखड्गः, चन्द्रहासः, निस्त्रिंशः, खड्गः, मण्डलाग्रः, कृपाणः -णकः.

FALCON, *s.* श्येनः, कपोतारिः *m.*, घातिपक्षी *m.* (न्), खगान्तकः, शशादनः, पत्री *m.* (न्), नीलपिच्छः, कपोताद्यनुसरणे शिक्षितः श्येनः.

FALCONER, *s.* श्येनजीवी *m.* (न्), श्येनपोषकः, श्येनपालकः, श्येनशिक्षकः.

FALCONRY, *s.* श्येनम्पाता, श्येनशिक्षा, श्येनपोषः, श्येनपालनं.

FALD-STOOL, *a.* इतस्ततो वहनयोग्यो लघुपीठः, धर्म्माध्यक्षपीठः -ठं.

To FALL, *v. n.* पत् (c. 1. पतति -तितुं), निपत्, परिपत्, भ्रंश् (c. 4. भ्रश्यति, c. 1. भ्रंशते -शितुं), परिभ्रंश्, च्यु (c. 1. च्यवते, च्योतुं), ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, स्रंस् (c. 1. स्रंसते -सितुं), आस्रंस्, विस्रंस्, गल् (c. 1. गलति -लितुं), अवगल्, विगल्, समागल्, लस् (c. 1. लसते -सितुं), स्खल् (c. 1. स्खलति -लितुं).—(Die) मृ (c. 6. म्रियते, मर्तुं).—(Sink) सद् (c. 6. सीदति, सत्तुं), अवसद्.—(Fall away) 'become lean,' क्षि in pass. (क्षीयते), कृशीभू; 'apostatize,' स्वधर्म्मात् भ्रंश् or च्यु or विच्यु; 'decline, fade,' ग्लै (c. 1. ग्लायति, ग्लातुं), प्रली (c. 4. -लीयते -लेतुं).—(Fall back) अवस्था (c. 1. -तिष्ठते -स्थातुं), अपसृ (c. 1. -सरति -सर्तुं).—(Fall calm) निर्वातीभू.—(Fall down) अवपत्, निपत्, प्रपत्; 'prostrate one's self in worship,' प्रणिपत्, अवनिं गम् (c. 1. गच्छति, गन्तुं), अष्टाङ्गपातं कृ; 'fall down with one's face on the ground,' भूमौ न्यङ्मुखः or अधोमुखः पत्; 'fall down at one's feet,' पादयोः or चरणयोः पत्.—(Fall foul) आक्रम् (c. 1. -क्रामति -क्रमितुं).—(Fall from) भ्रंश्, प्रभ्रंश् or च्यु with abl. c.—(Fall into) निपत्; 'fall into the hands of the enemy,' शत्रुहस्ते पत्.—(Fall in with) सम्मन् (c. 4. -मन्यते -मन्तुं), उपगम्.—(Fall off) 'withdraw,' पलाय् (c. 1. पलायति -यितुं, rt. इ), चल् (c. 1. चलति -लितुं), अवस्था, अपसृ; 'abandon one's duty,' स्वधर्म्मं त्यज् (c. 1. त्यजति, त्यक्तुं).—(Fall on) आपत्, आक्रम्, आसद् (c. 10. -सादयति -यितुं), अभिद्रु, (c. 1. -द्रवति -द्रोतुं).—(Fall out) 'quarrel,' विवद् (c. 1. -वदते -दितुं), कलहं कृ; 'befall,' निपत्, आपत्, उपस्था (c. 1. -तिष्ठति -स्थातुं), सम्भू.—(Fall short) न्यूनीभू, ह्रस् (c. 1. ह्रसते -सितुं), क्षि in pass., हा in pass. (हीयते).(Fall sick) रोगग्रस्तः -स्ता -स्तं भू, पीडितः -ता -तं भू.—(Fall to) उपक्रम्, प्रक्रम्.—(Fall under) अन्तर्गम् in pass. (-गम्यते).—(Fall upon). *See To* FALL ON. (Fall into misfortune) आपद्ग्रस्तः -स्ता -स्तं भू, आपद् (c. 4. -पद्यते -पत्तुं).

To FALL, *v. a.* (Drop, let fall) पत् in caus. (पातयति -यितुं), भ्रंश् in caus. (भ्रंशयति -यितुं), स्रंस् in caus. (स्रंसयति -यितुं).—(Diminish) न्यूनीकृ.

FALL, *s.* (Act of falling and dropping) पातः, पतनं, अवपातः, निपातः, निपतनं, सम्पातः, अवस्रंसः, भ्रंशः, प्रभ्रंशः, च्युतिः *f.* ध्वंसः -सनं, विध्वंसः, प्रध्वंसः, अधोगतिः *f.*, अधःपतनं, विस्रंसा.—(Death, ruin) क्षयः, परिक्षयः, ध्वंसः, परिध्वंसः, नाशः.—(Degradation) पदभ्रंशः, पदच्युतिः *f.*, स्थानप्रभ्रंशः, अपकर्षः, अपध्वंसः, अधोगमः -मनं, मर्य्यादाक्षयः.—(Declension, sinking) च्युतिः *f.*, क्षयः, अवक्षयः, सादः, अवसादः.—(Diminution) न्यूनता, ह्रासः, अपचयः, क्षयः.—(Declivity) पातुकः, पातुकभूमिः *f.* प्रवणभूमिः *f.* निम्नभूमिः.—(Cascade) प्रपातः, प्रस्रवणं, वारिप्रवाहः, निर्झरः.—(Fall of the leaf) पर्णध्वंसः, पत्रापगमः, शरद् *f.*—(Fall of snow) हिमवर्षः.—(Fall of rain) धारासम्पातः, धारासारः, धारा, आसारः, अभ्रावकाशः.—(Fall from a vehicle) वाहनभ्रंशः, वाहभ्रंशः.

FALLACIOUS, *a.* मोही -हिनी -हि (न्), मोहनः -ना -नी -नं, भ्रान्तिजनकः -का -कं, भ्रमजनकः -का -कं, भ्रान्तिमान् -मती -मत् (त्), मायी -यिनी -यि (न्), वञ्चकः -का -कं, अविश्वसनीयः -या -यं, असत्यः -त्या -त्यं, मिथ्या in comp.; 'a fallacious opinion,' मिथ्यामतिः *f.*; a fallacious argument,' मिथ्याहेतुः *m.*

FALLACIOUSLY, *adv.* मिथ्या, मोहनार्थं, सव्याजं, मायया, वञ्चनार्थं.

FALLACIOUSNESS, *s.* भ्रान्तिजनकत्वं, भ्रान्तिमत्त्वं, वञ्चकता, असत्यता, सव्याजत्वं; 'of an argument,' हेत्वाभासः.

FALLACY, *s.* (Deceitfulness) वञ्चकत्वं, कूटता.—(Mistake) भ्रमः, भ्रान्तिः *f.*, मिथ्यामतिः *f.*—(False argument) मिथ्याहेतुः *m.*, आभासः. हेत्वाभासः, पक्षाभासः, फक्किका.

FALLEN, *p. p.* पतितः -ता -तं, निपतितः -ता -तं, प्रपतितः -ता -तं, भ्रष्टः -ष्टा -ष्टं, प्रभ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, स्रस्तः -स्ता -स्तं, ध्वस्तः -स्ता -स्तं,

गलितः -ता -तं, विगलितः -ता -तं, पन्नः -न्ना -न्नं, स्रस्तः -स्ता -स्तं; 'fallen down,' अधःपतितः -ता -तं; 'fallen asleep,' सुप्तः -प्ता -प्तं, प्रसुप्तः -प्ता -प्तं; 'fallen into distress,' विपद्ग्रस्तः -स्ता -स्तं, आपत्प्राप्तः -प्ता -प्तं, आपदम्प्राप्तः -प्ता -प्तं.

FALLIBILITY, *s.* भ्रान्तिमत्त्वं, मोहयोग्यता, मोहाधीनता, भ्रमजनकता, मोहवत्त्वं, वञ्चनीयता, वञ्चकता, प्रमादवत्त्वं, असत्यता.

FALLIBLE, *a.* भ्रान्तिजनकः -का -कं, भ्रमजनकः -का -कं, भ्रान्तिमान् -मती -मत् (त्), मोही -हिनी -हि (न्), भ्रमणशीलः -ला -लं, वञ्चनीयः -या -यं, भ्रमयोग्यः -ग्या -ग्यं.

FALLING, *part.* पातुकः -का -कं, पाती -तिनी -ति (न्), पतयालुः -लुः -लु, संसी -सिनी -सि (न्), ध्वंसी -सिनी -सि (न्), पिपतिषन् -षन्ती -षत् (त्), पिपतिषुः -षुः -षु.

FALLING, *s.* (Indenture) भङ्गः, निम्नता.—(Falling away) धर्म्मभ्रंशः, धर्म्मच्युतिः *f.*, धर्म्मत्यागः.—(Falling off) भ्रंशः, भ्रेषः, क्षयः, उत्क्रमः.

FALLING-SICKNESS, *s.* भ्रामरं, ग्रहामयः, अपस्मारः, भूतविक्रिया, प्रतानः.

FALLOW, *a.* (Unsowed) अनुप्तः -प्ता -प्तं, अनुप्तशस्यः -स्या -स्यं, अनुप्तिमः -मा -मं, अवापितः -ता -तं.—(Untilled) अप्रहतः -ता -तं, अकृष्टः -ष्टा -ष्टं, अफालकृष्टः -ष्टा -ष्टं, अकृतः -ता -तं, अहलः -ला -लं, अहल्यः -ल्या -ल्यं, खिलः -ला -लं; 'fallow land,' अनुप्तभूमिः *f.*, अप्रहतभूमिः *f.* —(Pale red) ईषद्रक्तः -क्ता -क्तं, श्वेतरक्तः -क्ता -क्तं.

To FALLOW, *v. a.* बीजारोपणव्यतिरेकेण or बीजानि अनुप्त्वा भूमिं हलेन कृष् (c. 1. कर्षति, क्रष्टुं) or भूमिलोष्टान् भिद् (c. 7. भिनत्ति, भेत्तुं).

FALLOWING, *s.* बीजवपनव्यतिरेकेण भूमिकर्षणं or लोष्टभेदनं or भूमिहतिः *f.*

FALLOWNESS, *s.* अनुप्तत्वं, अकृष्टता, अहल्यता, वन्ध्यता, निष्फलता, वैफल्यं.

FALSE, *a.* (Not true) असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं, अनृतः -ता -तं, अतथ्यः -थ्या -थ्यं, वितथः -था -थं, अयथार्थः -र्था -र्थं, असन् -सती -सत् (त्), अप्रकृतः -ता -तं, अलीकः -का -कं, मिथ्या or मृषा or अन्यथा in comp.; as, 'a false accusation,' मिथ्याभियोगः, मिथ्यापवादः; 'a false opinion,' मिथ्यामतिः *f.*; 'a false reply,' मिथ्योत्तरं; 'false speaking,' मृषावादः, मिथ्यावादः, असत्यभाषणं; 'false accuser,' मृषापवादी *m.* (न्).—(Fictitious) कृत्रिमः -मा -मं, कल्पितः -ता -तं, काल्पनिकः -की -कं, विडम्बितः -ता -तं, कपटी -टिनी -टि (न्), कूट or कपट or छद्म in comp.; as, 'false coin,' कूटस्वर्णं; 'false dice,' कूटाक्षः; 'false document,' कपटलेख्यं; 'false balances,' कूटतुला; 'false measure,' कूटमानं; 'a false ascetic,' छद्मतापसः, वकव्रती *m.* (न्); 'in a false dress,' छद्मवेशी *m.* (न्).—(Unfaithful, treacherous) विश्वासघाती -तिनी -ति (न्), रहस्यभेदी -दिनी -दि (न्), मन्त्रभेदी &c., क्षीणभक्तिः -क्तिः -क्ति, व्यभिचारी -रिणी -रि (न्); 'to vows, engagements,' खण्डितव्रतः -ता -तं, उल्लङ्घितव्रतः -ता -तं, असत्यसन्धः -न्धा -न्धं, लुप्तव्रतः -ता -तं; 'a false wife,' अपतिव्रता.—(Hypocritical) कुहकः -का -कं, दम्भी -म्भिनी -म्भि (न्); 'false worship,' अर्च्चाविडम्बनं.—(Vain, groundless) वृथा or मिथ्या in comp. मोघः -घा -घं; 'a false alarm,' वृथाक्रोशः; 'false hope,' मोघाशा.—(Dishonest) कापटिकः -की -कं.

FALSE-HEARTED, *a.* विश्रम्भघाती -तिनी -ति (न्), अस्थिरप्रेमा -मा -म (न्).

FALSEHOOD, *s.* (Want of truth) असत्यता, निःसत्यता, अतथ्यता, अनृतता, वितथता, अलीकता, अयाथार्थ्यं.—(A lie) अनृतं, असत्यं, वितथं, अतथ्यं, अलीकं, अश्लीलं, मृषोद्यं.—(Speaking falsehood) मिथ्यावादः, मृषावादः, मिथ्याकथनं, मृषाभाषिता, असत्यभाषणं, मृषाभिधानं, कैतववादः; 'one who tells a falsehood,' अनृतवादी *m.* (न्), मिथ्यावादी, मृषावादी; 'devoted to falsehood,' अनृतव्रतः -ता -तं.

FALSELY, *adv.* मिथ्या, मृषा, अन्यथा, असत्यं, निःसत्यं, अनृतं; 'acting falsely,' मिथ्याचारः -रा -रं; 'speaking falsely,' अनृतवादी -दिनी -दि (न्), अनृतवाक् *m. f. n.* (च्); 'falsely modest,' मिथ्याविनीतः -ता -तं, कपटविनयवान् -वती -वत् (त्).

FALSENESS, *s.* (Want of truth) असत्यता, निःसत्यता.—(Fictitiousness) कूटता, कृत्रिमता, कापट्यं.—(Duplicity) कपटता, व्याजः, कैतवं, शठता.—(Perfidy) विश्वासभङ्गः, विश्वासघातः, मन्त्रभेदः.

FALSE-PROPHET, *s.* भविष्यद्वादिनो वेशधारी *m.* (न्), मिथ्याभविष्यद्वादी *m.*

FALSE-WITNESS, *s.* कूटसाक्षी *m.* (न्), मिथ्यासाक्षी *m.*, कूटकारकः, कौटसाक्ष्यं, मिथ्यासाक्ष्यं, असत्यसाक्ष्यं.

FALSIFICATION, *s.* कूटकरणं, कपटकरणं, छद्मकरणं, कृत्रिमकरणं, मिथ्याकरणं, अन्यथाकरणं.

FALSIFIER, *s.* कूटकः, कूटकृत्, कपटकारी *m.* (न्), मिथ्याकारी *m.*—(Disprover) खण्डनकृत्, प्रत्याख्याता *m.* (तृ), अधरीकारी *m.*

To FALSIFY, *v. a.* (Counterfeit) कूटं कृ, कपटं कृ, छल् (c. 10. छलयति -यितुं), अन्यथा कृ, मिथ्या कृ.—(Disprove) खण्ड् (c. 10. खण्डयति -यितुं), अधरीकृ, असत्यम् इति सूच् (c. 10. सूचयति -यितुं).—(Violate, break) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), भिद् (c. 7. भिनत्ति, भेत्तुं), लुप् (c. 6. लुम्पति, लोप्तुं).

To FALSIFY, *v. n.* असत्यं वद् (c. 1. वदति -दितुं), मिथ्या or मृषा वद्.

FALSITY, *s.* असत्यता, निःसत्यता, अनृतता, अयाथार्थ्यं, वितथत्वं, अलीकता.

To FALTER, *v. n.* (Speak with broken utterance) स्वरभङ्गेन or भग्नस्वरेण or स्खलद्वाक्येन वद् (c. 1. वदति -दितुं), स्खलितं वद्, स्वरेण स्खल् (c. 1. स्खलति -लितुं, c. 10. स्खलयति -यितुं), गद्गदया वाचा वद्, अस्पष्टवाचा वद्, गद्गद (nom. गद्गदति).—(Tremble, totter) स्खल्, प्रस्खल्, स्खलनं कृ, कम्प् (c. 1. कम्पते -म्पितुं), वेप् (c. 1. वेपते -पितुं).

FALTERING, *part.* or *a.* स्खलितवाक्यः -क्या -क्यं, भग्नस्वरः -रा -रं, भिन्नस्वरः -रा -रं.

FALTERING, *s.* स्खलनं, वाक्यस्खलनं, स्खलद्वाक्यं, स्वरभङ्गः, स्वरभेदः, गद्गदवाक् *f.* (च्), अस्पष्टवचनं.

FALTERINGLY, *adv.* स्खलत्स्वरेण, स्खलद्वाक्येन, स्वरभङ्गेन, गद्गदवाचा.

FAME, *s.* कीर्त्तिः *f.*, यशः *n.* (स्), ख्यातिः *f.*, सुख्यातिः *f.*, परिख्यातिः *f.*, विश्रुतिः *f.*, प्रतिष्ठा, विश्रावः, प्रसिद्धिः *f.*, प्रकीर्त्तिः *f.*, कीर्त्तनं -नं, प्रथा, प्रथितिः *f.*, सम्प्रथा, समाख्या, समाज्ञा, प्रतिपत्तिः *f.*, विख्यातिः *f.*, प्रविख्यातिः *f.*, प्रतिख्यातिः *f.*, रूढिः.—(Rumour) जनश्रुतिः *f.*, जनप्रवादः, जनोदाहरणं.

FAMED, *a.* ख्यातः -ता -तं, विख्यातः -ता -तं, प्रसिद्धः -द्धा -द्धं, विश्रुतः -ता -तं, प्रथितः -ता -तं, कीर्त्तितः -ता -तं, समाख्यातः -ता -तं, लोकविश्रुतः -ता -तं.

FAME-GIVING, *a.* कीर्त्तिकरः -री -रं, यशस्करः -री -रं, कीर्त्तिदः -दा -दं.

FAMILIAR, *a.* (Domestic) गृहजः -जा -जं -जातः -ता -तं, आवसथिकः -की -कं, कौलिकः -की -कं, कुल in comp.—(Well acquainted with, intimate) परिचितः -ता -तं, सुविद् *m. f. n.*, सुसंसर्गी -र्गिणी -र्गि (न्), संस्तुतः -ता -तं; 'with the scriptures,' शास्त्रज्ञः, अधीतशास्त्रः; 'with law,' स्मृतिकुशलः.—(Accustomed to) अभ्यस्तः -स्ता -स्तं.—(Well-known) सुविदितः -ता -तं, सुज्ञातः -ता -तं, प्रसिद्धः -द्धा -द्धं.—(Unceremonious) आदरहीनः -ना -नं, निर्गौरवः -वा -वं, निरादरः -रा -रं.—(Ordinary) प्राकृतः -ती -तं, लौकिकः -की -कं, लोकसिद्धः -द्धा -द्धं, प्रसिद्धः -द्धा -द्धं; 'familiar conversation,' विश्रम्भालापः.

FAMILIAR, *s.* (Friend) सुपरिचितः सुहृद् *m.*; दृढसुहृद् *m.*, सुसंसर्गी *m.*

(न्), चिरमित्रं, आप्तः.

FAMILIARITY, *s.* (Intimate association) सुसंसर्गः, दृढसंसर्गः, संसर्गित्वं, संसक्तिः *f.*, आसक्तः, संयोगः.—(Intimate acquaintance) परिचयः, सुपरिचयः, परिज्ञानं, संस्तवः.—(Freedom from ceremony, affability) अनादरः, आदरहीनता, गौरवहीनता, अभिगम्यता.

To FAMILIARIZE, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासेन सुगमं -मां -मं or सुकरं -रां -रं कृ, निरन्तराभ्यासं कृ, परिचयं कृ.

FAMILIARIZED, *p.p.* अभ्यस्तः -स्ता -स्तं, कृताभ्यासः -सा -सं, कृतपरिचयः -या -यं.

FAMILIARLY, *adv.* निर्गौरवं, गौरवं विना, निरादरं, अनादरेण, चिरमित्रवत्, सुपरिचितवत्; 'familiarly conversing,' विश्रब्धप्रलापी -पिनी -पि(न्).

FAMILY, *s.* (Race) कुलं, वंशः, कुटुम्बः, जातिः *f.*, गोत्रं, सन्तानः, प्रवरं.—(Lineage) अन्वयः, सन्ततिः *f.*, जननं, आवलिः *f.*, अन्ववायः.—(Household) गृहजनः, अभिजनः, स्वजनः, परिजनः, कुटुम्बकं, स्त्रीपुत्रकन्यादि; 'head of a family,' कुटुम्बी, कौटुम्बिकः, कुलपतिः *m.*, कुलोद्वहः; 'of the same family,' सकुलः -ला -लं, सकुल्यः -ल्या -ल्यं; 'relating to a family,' कौलः -ली -लं -लिकः -की -कं, कुल in comp.; 'of good or noble family,' महाकुलः -ला -लं -लीनः -ना -नं, कुलीनः -ना -नं, कौलेयः -यी -यं, कुलिकः -का -कं, कुलोन्नतः -ता -तं; 'of low family,' दुष्कुलीनः -ना -नं, अकुलीनः -ना -नं; 'a woman of good family,' कुलनारी, कुलकन्या; 'of royal family,' राजवंश्यः -श्या -श्यं; 'family honour,' कुलमर्य्यादा; 'family pride,' कुलाभिमानं, कुलोन्नतिः *f.*; 'family disgrace,' कुलनिन्दा; 'family respectability,' कुलोत्कर्षः; 'family duty,' कुलधर्म्मः, कुलाचारः; 'family priest,' कुलाचार्य्यः; 'family party,' गृहोत्सवः; 'family feuds,' गृहच्छिद्रं; 'family connexions,' गोष्ठी, कुलसन्निधिः *f.*; 'of ancient family,' दीर्घवंशः -शा -शं; 'attentive in supporting one's family,' कुटुम्बव्यापृतः, कुलालम्बी *m.* (न्), अभ्यागारिकः, उपाधिः *m.*; 'cruelty to one's family,' अनात्म्यं.

FAMINE, *s.* दुर्भिक्षं, दुष्कालः, दुर्भक्ष्यं, अनाकालं, अकालः, प्रयामः, नीवाकः, अनाहारकालः, आहारविरहः, आहाराभावः, अन्नाभावः, आहारासम्भवः, दुर्मूल्यं.

To FAMISH, *v. a.* क्षुधया पीड् (c. 10. पीडयति -यितुं) or व्यापद् (c. 10. -पादयति -यितुं) or अवसद् in caus. (-सादयति -यितुं) or कृशीकृ, क्षुधार्त्तं -र्त्तां -र्त्तं कृ.

To FAMISH, *v. n.* आहारविरहाद् अवसद् (c. 6. -सीदति -सत्तुं) or क्षि in pass. (क्षीयते) or क्षीणशरीरः -रा -रं भू or कृशाङ्गीभू or व्यापद् (c. 4. -पद्यते).

FAMISHED, *p.p.* or *a.* क्षुत्पीडितः -ता -तं, क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुधापीडितः -ता -तं, क्षुत्क्षामः -मा -मं, क्षुत्परिकृशः -शा -शं, क्षुधार्द्दितः -ता -तं, बुभुक्षितः -ता -तं, निरन्नः -न्ना -न्नं.

FAMISHMENT, *s.* क्षुत्पीडा, क्षुत्क्षामता, अनाहारः, अन्नाभावः, बुभुक्षा.

FAMOUS, *a.* ख्यातः -ता -तं, सुख्यातः -ता -तं, यशस्वी -स्विनी -स्वि (न्), महायशाः -शाः -शः (स्) -यशस्कः -स्का -स्कं, कीर्त्तिमान् -मती -मत् (त्), विश्रुतः -ता -तं, प्रथितः -ता -तं, प्रसिद्धः -द्धा -द्धं, विख्यातः -ता -तं, परिख्यातः -ता -तं, कीर्त्तितः -ता -तं, प्रतिष्ठः -ष्ठा -ष्ठं, प्रतिपत्तिमान् -मती -मत् (त्), पृथुप्रथः -था -थं, लोकविश्रुतः -ता -तं, 'rendering famous,' यशस्करः -री -रं, यशस्यः -स्या -स्यं, कीर्त्तिकरः -री -रं.

FAMOUSLY, *adv.* महायशसा, महाकीर्त्तिपूर्व्वं, परमं, उत्तमप्रकारेण.

FAMOUSNESS, *s.* कीर्त्तिमत्त्वं, यशस्विता, ख्यातिमत्त्वं, विश्रुतिः *f.*

FAN, *s.* व्यजनं, तालवृन्तः -न्तकं, वीजनं, प्रकीर्णकं, चामरं, मरुदान्दोलः, उत्क्षेपणं, व्यजः.—(For winnowing) सूर्प्पः -र्प्पं, शूर्प्पः -र्प्पं.

To FAN, *v. a.* वीज् c. 10. वीजयति -यितुं), उपवीज्, अनुवीज्, उद्वीज्, व्यजनवायुना विधू (c. 5. -धूनोति, c. 6. -धुवति -धवितुं), व्यजनवातेन शीतल (nom. शीतलयति -यितुं).

FANATIC, FANATICAL, *a.* देवभक्तिव्यग्रः -ग्रा -ग्रं or अतिश्रद्धाव्यग्रः, एकान्तदेवभक्तित्वाद् उन्मत्तः -त्ता -त्तं or उत्तमबुद्धिः -द्धिः -द्धि or उच्चण्डबुद्धिः -द्धिः -द्धि or भ्रान्तबुद्धिः -द्धिः -द्धि.

FANATIC, *s.* अतिशयदेवभक्तित्वाद् उन्मत्तजनः or उन्मादी *m.* (न्), मिथ्याभक्तिमान् *m.* (त्), क्षपणकः.

FANATICALLY, *adv.* देवभक्तिव्यग्रवत्, एकान्तदेवभक्त्या, उन्मत्तवत्.

FANATICISM, *s.* एकान्तदेवभक्तिजन्यो भावविशेषः or उन्मादः or उन्मदः or उत्तमबुद्धित्वं, अतिश्रद्धाप्रयुक्ता उन्मत्तता, अतिभक्तिव्यग्रता, अतिश्रद्धाव्यग्रता, भक्तिसुचण्डता, मिथ्याभक्तिः *f.*

FANCIED, *p. p.* भावितः -ता -तं, विभावितः -ता -तं, मतः -ता -तं.

FANCIFUL, *a.* (Formed in the imagination) मानसिकः -की -कं, मनोजः -जा -जं, मनसिजः -जा -जं, मनोगतः -ता -तं, मायामयः -यी -यं, वासनाकल्पितः -ता -तं, काल्पनिकः -की -कं, मनःकल्पितः -ता -तं, मनोरथसृष्टः -ष्टा -ष्टं, सङ्कल्पजः -जा -जं, अमूलकः -का -कं.—(Fanciful man) वृथावासनाकारी *m.* (न्), दुर्वासनाकृत् *m.*, अनर्थकचिन्ताकरः, असम्भवकल्पकः, चपलबुद्धिः *m.*, मनोलौल्यवान् *m.* (त्), लोलमतिः *m.*

FANCIFULLY, *adv.* वृथावासनापूर्व्वं, अनर्थकचिन्तापूर्व्वं, काल्पनिकप्रकारेण, मनोलौल्यात्, बुद्धिचापल्यात्.

FANCIFULNESS, *s.* मनोलौल्यं, बुद्धिचापल्यं, लोलबुद्धित्वं, मायावत्त्वं, बुद्धिविलासिता, मिथ्यासङ्कल्पवत्त्वं.

FANCY, *s.* (The faculty of imagination) कल्पनाशक्तिः *f.*, भावना -नं, विभावना -नं, वासना, कल्पना.—(Idea) बुद्धिः *f.*, मतिः *f.*, सङ्कल्पः, मनोगतं, चिन्ता, मनोरथः.—(Caprice, whim) मनोलौल्यं, बुद्धिविलासः, बुद्धिचापल्यं, चापलं, भ्रमः, आभासः, निर्बन्धः, लहरी, तरङ्गः, स्वच्छन्दः *m.*, छन्दः *n.* (स्).—(Strange fancy) वृथावासना, असम्भवकल्पना, अनर्थकवासना, मिथ्यावासना, दुर्वासना, अनर्थकचिन्ता, मनोमाया, मृषार्थकं.—(Liking) रुचिः *f.*, अभिरुचिः *f.*

To FANCY, *v. n.* (Imagine, think) मन् (c. 4. मन्यते, मन्तुं), भू (c. 10. भावयति -यितुं), विभू, सम्भू, चिन्त् (c. 10. चिन्तयति -यितुं). 'To fancy one's self,' is sometimes expressed by the adj. मन्यः -न्या -न्यं; as, 'one who fancies himself learned,' पण्डितम्मन्यः; 'one who fancies himself good,' साधुम्मन्यः; 'one who fancies herself beautiful,' सुन्दरीम्मन्या.

To FANCY, *v. a.* (Form in the mind) मनसा क्लृप् (c. 10. कल्पयति -यितुं) or भू in caus. (भावयति -यितुं) or कृ.—(Like) अभिनन्द् (c. 1. -नन्दति -न्दितुं), रुच् (c. 1. रोचते -चितुं) with dat. of the person; as, 'he fancies that,' तत् तस्मै रोचते; 'doing what one fancies,' कामकारी *m.* (न्); 'eating what one fancies,' कामभक्षः.

FANCY-FRAMED, *a.* मनःकल्पितः -ता -तं, वासनाकल्पितः -ता -तं, मनोजः -जा -जं, मनसिजः -जा -जं, मनोरथसृष्टः -ष्टा -ष्टं, मानसिकः -की -कं.

FANCY-SICK, *a.* विकृतबुद्धिः -द्धिः -द्धि; 'one who fancies himself sick,' रोगिणम्मन्यः.

FANE, *s.* देवतागारः, देवागारः, देवालयः, देवतायतनं, देवभवनं, देवप्रासादः, देवगृहं, देववेश्म *n.* (न्), देवतामन्दिरं, देवतावासः.

FANG, *s.* दंष्ट्रा, दशनः -नं, रदः -दनः, दन्तः, उदग्रदन्तः, दीर्घदन्तः, विषाणः

-ष्ट्रा, दाढा, दाढका:, राक्षसी; 'of a serpent,' विषदन्ता:, आशी: *f.* (स्).—(Claw) नख:.

FANGED, *a.* दंष्ट्री -ष्ट्रिणी -ष्ट्रि (न्), दन्ती -न्तिनी -न्ति (न्), दीर्घदन्तवान् -वती -वत् (त्).

FANGLESS, *a.* निर्दशन: -ना -नं, भग्नदंष्ट्र: -ष्ट्रा -ष्ट्रं, गलितदन्त: -न्ता -न्तं, निर्दन्त: -न्ता -न्तं, दशनोच्छिष्ट: -ष्टा -ष्टं.

FAN-LIGHT, *s.* व्यजनाकारो गवाक्ष: or गृहाक्ष:.

FANNED, *p. p.* वीजित: -ता -तं, उपवीजित: -ता -तं, वीज्यमान: -ना -नं, उद्वीज्यमान: -ना -नं, व्यजनेन विधूयमान: -ना -नं or विधुत: -ता -तं.

FANNER, *s.* वीजयिता *m.* (तृ), वीजनकर्त्ता *m.* (र्तृ), विधविता *m.* (तृ).

FANTASM, *s.* मिथ्यावासना, मनोरथसृष्टि: *f.*, आभास:, अपच्छाया.

FANTASTIC, FANTASTICAL, *a.* (Existing in the imagination) मन:कल्पित: -ता -तं, मनसिज: -जा -जं, वासनाकल्पित: -ता -तं, मानसिक: -की -कं.—(Capricious, whimsical) चपल: -ला -लं, लोल: -ला -लं.—(Odd) विषम: -मा -मं, असङ्गत: -ता -तं, अपरूप: -पा -पी -पं, विलक्षण: -णा -णं.

FANTASTICALLY, *adv.* चपलं, चापल्येन, मनोलौल्यात्, विषमं, असङ्गतं.

FANTASTICALNESS, *s.* चापल्यं, मनोलौल्यं, वैषम्यं, अपरूपता, असङ्गतत्वं.

FANTASY, *s.* *See* FANCY.

FAR, *a.* दूर: -रा -रं, विदूर: -रा -रं, दूरस्थ: -स्था -स्थं -स्थायी -यिनी -यि (न्), दूरवर्त्ती -र्त्तिनी -र्त्ति (न्), दूरीभूत: -ता -तं, अनुपस्थायी -यिनी -यि (न्), अनुपस्थ: -स्था -स्थं, असन्निकृष्ट: -ष्टा -ष्टं, विप्रकृष्ट: -ष्टा -ष्टं, असन्निहित: -ता -तं; 'very far,' सुदूर: -रा -रं, दविष्ठ: -ष्ठा -ष्ठं, दवीयान् -यसी -य: (स्).

FAR, *adv.* (At a distance) दूरं, दूरे, दूरतस्, विदूरतस्, आरात्.—(To a distance) दूरं, दूरपर्य्यन्तं.—(By a distance) दूरेण.—(From far) दूरात्, दूरतस्.—(To a great extent) अत्यन्तं, भृशं, बहु, सु or अति or अतिशय prefixed.—(As far as) expressed by आ prefixed governing the abl. c., or by पर्य्यन्तं or अन्त affixed; as, 'the earth as far as the ocean,' आसमुद्रात् or समुद्रपर्य्यन्तं or सागरान्ता पृथिवी.—(By far) दूरेण; 'action is by far inferior to devotion,' कर्म्म दूरेण अवरं योगात्.—(How far?) किं पर्य्यन्तं, कियत् पर्य्यन्तं, कियत् प्रमाणं.—(So far) तदन्तं, तत्पर्य्यन्तं.—(Far off) दूरस्थ: -स्था -स्थं, दूरसंस्थ: -स्था -स्थं, दूरीभूत: -ता -तं; 'the day being far spent,' अतिक्रान्ते दिवसे; 'a woman far gone in love,' दूरगतमन्मथा.

FAR-EXTENDED, *a.* बहुविस्तीर्ण: -र्णा -र्णं, सर्व्वव्यापी -पिनी -पि (न्).

FAR-FAMED, *a.* पृथुप्रथ: -था -थं, पृथुयशा: -शा: -श: (स्), महायशा: &c.

FAR-FETCHED, *a.* क्लिष्ट: -ष्टा -ष्टं, यत्नकृत: -ता -तं; 'far-fetched idea,' क्लिष्टकल्पना.

FAR-SEEING, *a.* दूरदर्शी -र्शिनी -र्शि (न्), दीर्घदर्शी -र्शिनी -र्शि (न्).

FAR-SIGHTED, *a.* दूरदृष्टि: -ष्टि: -ष्टि, दीर्घदृष्टि: -ष्टि: -ष्टि. पारदृश्वा -श्वा -श्व (न्).

FARCE, *s.* प्रहसनं, विलासिका, दुर्म्मल्लिका, हास्योत्पादको नाटक:, परिहासजनकम् उपरूपकं.

FARCICAL, *a.* प्रहसनसम्बन्धी -न्धिनी -न्धि (न्).—(Droll) हासकर: -री -रं, हास्य: -स्या -स्यं, उपहास्य: -स्या -स्यं, रसिक: -का -कं, विनोदी -दिनी -दि (न्), हास्योत्पादक: -का -कं, असङ्गत: -ता -तं, अपरूप: -पा -पं.

FARCY, *s.* अश्वानां चर्म्मरोगविशेष: or दुश्चर्म्मत्वं or चर्म्मदूषिका.

FARDEL, *s.* कूर्च:, गुच्छ: -च्छक:, पोटलिका, पोट्टली, भार:.

To FARE, *v. n.* (Be in any state) वृत् (c. 1. वर्त्तते -र्त्तितुं), अस् (c. 2. अस्ति), भू (c. 1. भवति -वितुं), स्था (c. 1. तिष्ठति, स्थातुं); 'to fare well,' सुस्थ: -स्था -स्थं or सुस्थित: -ता -तं भू or अस्; 'to fare badly,' दु:स्थ: -स्था -स्थं भू or अस्; 'faring well,' भविष्णु: -ष्णु: -ष्णु, भूष्णु: -ष्णु: -ष्णु, भविता -त्री -तृ (तृ).—(Feed) भोजनं कृ, भुज् (c. 7. भुंक्ते, भोक्तुं), आहारं कृ; 'to fare well,' स्वाद्वन्नानि or उत्तमान्नानि or परमान्नानि भुज्.

FARE, *s.* (Passage-money) आतार:, आतर:, तरपण्यं, तरमूल्यं, तारिकं, तार्य्यं, अनुतरं.—(Food) भोजनं, आहार:, अन्नं, भक्ष्यं; 'good fare,' उत्तमाहार:, परमान्नं, उत्तमान्नं; 'bad fare,' कदन्नं.

FAREWELL, *adv.* (To bid farewell) आमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, आप्रच्छ् (c. 6. -पृच्छते -ति -प्रष्टुं).—(Bidding farewell) आमन्त्रणं, आप्रच्छनं, प्रस्थानकाले कुशलवाद: or प्रणाम: or नमस्कार:; 'farewell!' कुशलं भूयात्, सुखं भूयात्, कल्याणं भूयात्, सुखम् आस्तां.

FARINA, *s.* पराग:, सुमनोरज: *n.* (स्), पुष्परेणु: *m.*, सुमन:पांशु: *m.*, पुरु: *m.*

FARINACEOUS, *a.* शस्यमय: -यी -यं, धान्यमय: -यी -यं, गोधूमचूर्णमय: -यी -यं.

FARM, *s.* क्षेत्रं, भूमि: *f.*, क्षेत्रभूमि:, भू: *f.*, कृषिक्षेत्रं, कर्षणभूमि: *f.*, सीर्यं.

To FARM, *v. a.* (Let out the collection of the revenue or any other work at a certain rate per cent.) शते शते निरूपितमूल्यं प्रतिज्ञाय or शते शते नियमितभागो मया दातव्य इति सन्धिं कृत्वा अमुकजनं शुल्ककरादिग्रहणे or किञ्चित्कर्म्मनिर्वहणे नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं).—(Undertake any work for another at a certain rate per cent.) शते शते नियमितभागो मह्यतेनार्पयेम् उद्धरणीयं or शते शते निरूपितमूल्यं मया ग्रहणीयम् इति सन्धिं कृत्वा अमुकजनस्थाने किञ्चित् कर्म्म निर्वह् in caus. (-वाहयति -यितुं) or नियमितमूल्यम् अपेक्ष्य परस्थाने किञ्चित् कर्म्म व्यवसो (c. 4. -स्यति -सातुं) or अध्यवसो.—(Farm the tolls) निरूपितमूल्यं दत्त्वा राजस्थाने घट्टनदीतरादिदेयशुल्कान् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Cultivate land) क्षेत्रं or भूमिं कृष् (c. 6. कृषति, c. 1. कर्षति, क्रष्टुं).

FARM-HOUSE, *s.* क्षेत्रिकगृहं, कर्षकगृहं, क्षेत्रिकवेश्म *n.* (न्), क्षेत्रपतिगृहं.

FARM-YARD, *s.* क्षेत्रिकगृहोपान्ते वाटी or वाटिका or चत्वरं.

FARMER, *s.* क्षेत्रकर्षक:, क्षेत्रिक:, क्षेत्री *m.* (न्), कर्षक:, कृषिक:, कृषक:, क्षेत्राजीव:, कृषिजीवी *m.* (न्), कृषीवल:, कार्षक:, क्षेत्रपति: *m.*—(Of the revenue) शते शते नियमितभागो मह्यतेनार्पयेम् उद्धरणीय इति सन्धिं कृत्वा शुल्ककरादि गृह्णाति यो जन:.

FARMING, *s.* कृषिकर्म्म *n.* (न्), कृषि: *f.*, कार्षि: *f.*, क्षेत्रिकव्यापार:, अनृतं.

FARRAGINOUS, *a.* सान्निपातिक: -की -कं, सन्निपतित: -ता -तं, प्रकीर्ण: -र्णा -र्णं, बहुद्रव्यनिर्म्मित: -ता -तं, नानाद्रव्यघटित: -ता -तं.

FARRAGO, *s.* सन्निपात:, प्रकीर्णकं, नानाद्रव्यसम्मिश्रणं.

FARRIER, *s.* अश्वचिकित्सक:, अश्ववैद्य:.—(Shoer of horses) अश्वपादुकाबन्धा *m.* (न्धृ), अश्वपादुकाकार:.

FARRIERY, *s.* अश्वचिकित्सा, अश्वरोगचिकित्साविद्या.

FARROW, *s.* शूकरशावकगण:, शूकरपोतकगण:, शूकरापत्यं.

To FARROW, *v. n.* शूकरीप्रकारेण शावकगणं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु.

FART, *s.* पर्द: -र्दनं, गुदरव:, पायुशब्द:, शर्द्ध:.

FARTHER, *adv.* दूरतरं, विदूरतरं, अधिकदूरे, अग्रे, अग्रतरं, अग्रतस्, पुरतस्, पुरस्.—(Moreover) अपरं, अपरञ्च, अधिकं, अधिकन्तु, अन्यच्च, अपिच, किञ्च, परन्तु. *See* the more correct word *further*.

FARTHER, *a.* दूरतर: -रा -रं, विदूरतर: -रा -रं, दवीयान् -यसी -य: (स्), अधिकदूरस्थ: -स्था -स्थं, अपर: -रा -रं; 'the farther side,' पार:; 'on the farther side,' पारे.

FARTHEST, *a.* दूरतम: -मा -मं, विदूरतम: -मा -मं, दविष्ठ: -ष्ठा -ष्ठं, सुदूर:

-रा -रं, आयतदूरस्थः -स्था -स्थं.

Farthing, *s.* ताम्रमुद्रा, कपर्द्दकः, वराटकः.

Fasces, *s.* धर्म्माध्यक्षलक्षणं, दण्डनायकचिह्नं, पूर्व्वकाले रोमनगरे दण्डलाक्षणिकः काष्ठखण्डसमबद्धः परशुः.

Fascia, *s.* पट्टः, पट्टकः, बन्धनं, वेष्टनं, आवेष्टनं, अवलिका.

Fasciation, *s.* पट्टबन्धनं, अवलिकाबन्धनं, अनुवेष्टितं.

To **fascinate**, *v. a.* (Bewitch) मुह् in caus. (मोहयति -यितुं), मोहं कृ, मायां कृ, मन्त्रद्वारेण वशीकृ or अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं) or अनुमन्त्र् or अभिचर् (c. 10. -चारयति -यितुं).—(Captivate) चित्तं or मनो हृ (c. 1. हरति, हर्त्तुं) or रम् in caus. (रमयति -यितुं) or आकृष् (c. 1. -कर्षति -क्रष्टुं), हृदयं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

Fascinated, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, सम्मोहितः -ता -तं, परिमूढः -ढा -ढं, सम्मुग्धः -ग्धा -ग्धं, आकृष्टचित्तः -त्ता -त्तं, हृतमानसः -सी -सं, वशीकृतः -ता -तं, वशीभूतः -ता -तं.

Fascinating, *a.* चित्तहारी -रिणी -रि (न्), चित्तापहारी &c., मनोहरः -रा -रं, मोहनः -ना -नी -नं, विमोहनः &c., मोही -हिनी -हि (न्), परिमोही &c., आकर्षकः -की -कं, आकर्षिकः -की -कं, आकृष्टवान् -वती -वत् (त्), हृदयग्राही -हिणी -हि (न्); 'a fascinating woman,' मुग्धा, प्रमदा, मदिरेक्षणा.

Fascination, *s.* मोहः -हनं, परिमोहनं, विमोहनं, सम्मोहः, आकर्षः, माया, वशक्रिया, अभिमन्त्रणं, अभिचारः, इन्द्रजालं, कार्म्मणं -णत्वं.

Fascine, *s.* युद्धे व्यवहारितः काष्ठभारः or काष्ठकूर्चः.

Fashion, *s.* (Form) आकारः, आकृतिः *f.*, रूपं, संस्कारः, मूर्त्तिः *f.*, विधानं, संस्थानं.—(Cut, shape) आकारः, आकृतिः *f.*, रीतिः *f.*—(Prevailing custom) लौकिकाचारः, लोकाचारः, लोकव्यवहारः, लोकरीतिः *f.*, लोकमार्गः, लोकव्यापारः, धारा, लोकमतं.—(Manner, mode) प्रकारः, विधः, विधिः *m.*, रीतिः *f.*, मार्गः; 'after this fashion,' अनेन प्रकारेण, एवंविधं; 'after one's own fashion,' स्वानुरूपं.

To **fashion**, *v. a.* (Form) निर्मा (c. 2. -माति, c. 3. -मिमीते, c. 4. -मायते -मातुं), विनिर्मा, रच् (c. 10. रचयति -यितुं), विरच्, क्लृप् (c. 10. कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं), घट् (c. 10. घटयति -यितुं), कृ, संस्कृ.—(Adapt) युज् (c. 10. योजयति -यितुं), सन्धा, समाधा.

Fashionable, *a.* लौकिकः -की -कं, व्यावहारिकः -की -कं, आचारिकः -की -कं, लोकसिद्धः -द्धा -द्धं, लोकप्रसिद्धः -द्धा -द्धं, व्यवहारसिद्धः -द्धा -द्धं, लोकाचारानुसारी -रिणी -रि (न्), लोकव्यवहारानुसारी &c., लोकमतानुसारी &c., लौकिकाचारानुरूपः -पा -पं, लौकिकरीत्यनुरूपः -पा -पं, लोकमार्गानुयायी -यिनी -यि (न्).

Fashionably, *adv.* लोकाचारानुसारेण, लोकव्यवहारानुसारात्, लोकरीतिवत्.

Fashioned, *p. p.* निर्म्मितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, कल्पितः -ता -तं, क्लृप्तः -प्ता -प्तं, घटितः -ता -तं, कारितः -ता -तं.

Fast, *a.* (Firm, close) दृढः -ढा -ढं, स्थिरः -रा -रं, स्थावरः -रा -रं, स्तब्धः -ब्धा -ब्धं, अचलः -ला -लं, निश्चलः -ला -लं, दृढसन्धिः -न्धिः -न्धि, गाढः -ढा -ढं.—(Fixed) बद्धः -द्धा -द्धं, सन्निबद्धः -द्धा -द्धं; 'a fast colour,' स्थिररङ्गः; 'a fast friend,' दृढसौहृदः, दृढभक्तिः *m.*; 'a fast sleep,' सुषुप्तिः *f.*, सुनिद्रा, अतिशयनिद्रा, अघोरनिद्रा.—(Quick in motion) त्वरितगतिः -तिः -ति, शीघ्रगामी -मिनी -मि (न्), द्रुतगतिः -तिः -ति, शीघ्रः -घ्रा -घ्रं, महावेगः -गा -गं, वेगवान् -वती -वत् (त्).

Fast, *adv.* (Firmly) दृढं, गाढं, स्थिरं; 'fast-rooted,' बद्धमूलः -ला -लं; 'held fast,' सुगृहीतः -ता -तं, सुधृतः -ता -तं, करलग्नः -ग्ना -ग्नं; 'fast bound,' दृढबद्धः -द्धा -द्धं; 'shut fast,' दृढसंवृतः -ता -तं, दृढपिहितः -ता -तं; 'fast asleep,' सुषुप्तः -प्ता -प्तं, सुनिद्रितः -ता -तं, अतिशयनिद्रितः -ता -तं, सुखसुप्तः -प्ता -प्तं or सुखं सुप्तः -प्ता -प्तं.—(Swiftly) शीघ्रं, त्वरितं, द्रुतं, क्षिप्रं, सत्वरं, आशु, अविलम्बितं, अचिरेण; 'going fast,' त्वरितगतिः -तिः -ति; 'spoken fast,' त्वरितोदितः -ता -तं.

To **fast**, *v. n.* उपवस् (c. 1. -वसति -वस्तुं), लङ्घ् (c. 1. लङ्घते -ङ्घितुं), निरूपितकालपर्य्यन्तं भोजनात् or आहाराद् निवृत् (c. 1. -वर्त्तते -र्त्तितुं), उपवासं कृ, अनशनं कृ, आहारनिवृत्तिं कृ; 'to death,' प्रायोपवेशनं कृ.

Fast, *s.* उपवासः, उपवसनं, उपोषितं, उपोषणं, औपवस्तं, अनशनं, अनाहारः, अभोजनं, लङ्घनं, आक्षपणं.

Fast-day, *s.* उपवासदिनं, उपोषणदिनं, अनाहारदिवसः, लङ्घनदिवसः.

Fasted, *p. p.* उपोषितः -ता -तं, कृतोपवासः -सा -सं.

To **fasten**, *v. a.* (Make fast) बन्ध् (c. 9. बध्नाति, बन्द्धुं), सम्बन्ध्, निबन्ध्, अनुबन्ध्.—(Shut up) पिधा (c. 3. -दधाति -धातुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं).—(Bar) अर्गलेन बन्ध्, कील् (nom. कीलयति -यितुं).—(Unite together) सम्बन्ध्, संयुज् (c. 7. -युनक्ति -योक्तुं), संश्लिष् in caus. (-श्लेषयति -यितुं), सन्धा, संलग्नीकृ.—(Tie) योक्त्र् (nom. योक्त्रयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं).—(Tie on) पिनह् (c. 4. -नह्यति -नद्धुं), आनह्, आबन्ध्, अनुबन्ध्.—(Impress) प्रणिधा.—(Make firm) दृढीकृ, स्थिरीकृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं).

Fastened, *p. p.* बद्धः -द्धा -द्धं, पिहितः -ता -तं, पिधानवान् -वती -वत् (त्), सपिधानः -ना -नं, निरुद्धः -द्धा -द्धं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, संयोजितः -ता -तं, संलग्नीकृतः -ता -तं, लग्नः -ग्ना -ग्नं, पिनद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, कीलायितः -ता -तं, कीलितः -ता -तं.

Fastening, *s.* (Any thing that binds) बन्धनं -नी, बन्धनग्रन्थिः *m.*—(Joining) सन्धिः *m.*—(Of a bracelet) कुडुपः, सन्धिः *m.*

Faster, *s.* उपवासी *m.* (न्), उपवासकर्त्ता *m.* (र्त्तृ), कृतोपवासः, सोपवासः.

Faster, *adv.* (More rapidly) शीघ्रतरं, अधिकवेगेन, लघुतरं.

Fastidious, *a.* उपेक्षकः -का -कं, अवमानी -निनी -नि (न्), सावहेलः -ला -लं, सावज्ञः -ज्ञा -ज्ञं, घृणी -णिनी -णि (न्), दुस्तोषणीयः -या -यं, दुःखतोषणीयः -या -यं, दुःखेन सन्तोषणीयः -या -यं or तर्पणीयः -या -यं.

Fastidiously, *adv.* सावज्ञानं, उपेक्षया, सावहेलं, सावमानं, दुस्तोषणीयं.

Fastidiousness, *s.* अवमानशीलता, उपेक्षकत्वं, सावहेलत्वं, दुस्तोषणीयता, दुस्तर्पणीयता, अवमानिता.

Fasting, *s.* उपवासः, उपोषणं -षितं, अनशनं, निरशनं, अभोजनं, अभक्षणं, अनाहारः, लङ्घनं, आक्षपणं, अपतर्पणं; 'to death,' प्रायः -यणं, प्रायोपवेशनं -शनिका.

Fasting, *part.* or *a.* उपवासी -सिनी -सि (न्), निराहारः -रा -रं, अनशनः -ना -नं, अभक्षः -क्षा -क्षं, अनाशकः -का -कं, अकृताहारः -रा -रं; 'to death,' प्रायोपविष्टः -ष्टा -ष्टं.

Fastness, *s.* (Firmness) दृढता, स्थिरता, स्तब्धता, अचलता, निश्चलता.—(Strong-hold) दुर्गं, कोटिः *f.*, शिखरी *m.* (न्).

Fastuous, *a.* गर्व्वी -र्व्विणी -र्व्वि (न्), सावलेपः -पा -पं, उद्धतः -ता -तं.

Fat, *a.* पीवरः -रा -री -रं, पीनः -ना -नं, मेदस्वी -स्विनी -स्वि (न्), पुष्टः -ष्टा -ष्टं, पुष्टाङ्गः -ङ्गी -ङ्गं, मांसलः -ला -लं, स्थूलः -ला -लं, स्थूलकायः -या -यं, प्यानः -ना -नं, आप्यानः -ना -नं, प्रप्यानः -ना -नं, स्फीतः -ता -तं, स्थूलः -ता -तं, पीवा -वा -व (न्), तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, उच्छूनः -ना -नं, कुक्षकः -की -कं.—(Fertile) स्फीतः -ता -तं; 'fat land,' उर्व्वरा.

Fat, *s.* मेदः *n.* (स्), वसा, वपा, मांससारः, मांसस्नेहः, घृतं.

To **fat**, *v. a.* प्यै in caus. (प्याययति -यितुं), आप्यै, पुष् in caus. (पोष-

यति -यितुं), स्त्याय् in caus. (स्त्यापयति -यितुं), स्थूलीकृ, पीवरीकृ, पुष्टीकृ.

To FAT, *v. n.* प्यायी (c. 1. -प्यायते -प्यातुं), पुष् (c. 4. पुष्यति, पोष्टुं), पीवरीभू.

FAT. *s.* (tub) भाण्डं. *See* VAT.

FATAL, *a.* (Proceeding from fate, relating to it) दैवः -वी -वं -विकः -की -कं, दैष्टिकः -की -कं, कालिकः -की -कं, दैवप्रयुक्तः -क्ता -क्तं, दैववशः -शा -शं, नियतः -ता -तं, आवश्यकः -की -कं.—(Deadly, calamitous) प्राणघातकः -का -कं, प्राणहरः -रा -रं, प्राणान्तिकः -की -कं or प्राणात्यकः, प्राणनाशकः -की -कं, मृत्युजनकः -का -कं, मारात्मकः -का -कं, साङ्घातिकः -की -कं, मारकः -का -कं, अन्तकरः -रा -रं, व्यापादकः -का -कं, आत्ययिकः -की -कं, अनायुष्यः -ष्या -ष्यं, मर्म्मान्तिकः -की -कं, मर्म्मभेदी -दिनी -दि (न्), दुरन्तः -न्ता -न्तं, दुर्विपाकः -का -कं.

FATALISM, *s.* दैवायत्तता, दैवाधीनता, दैववशित्वं, दैवचिन्ता, दैविकता, दैष्टिकता.

FATALIST, *s.* दैवपरः, दैवाधीनः, दैवायत्तः, दैवपरायणः, दैवचिन्तकः.

FATALITY, *s.* आवश्यकता, अवश्यकत्वं, भवितव्यता, कृतान्तः, नियतिः *f.*

FATALLY, *adv.* (By necessity) दैवात्, दैववशात्, दैवनियोगात्.—(Mortally) प्राणनाशेन, सनाशं, आत्ययिकं.

FATE, *s.* दैवं, कृतान्तः, विधाता *m.* (तृ), विधिः *m.*, भागधेयं, भाग्यं, नियतिः *f.*, भवितव्यता, दिष्टं, दैविकं, अदृष्टं, कालनियोगः, कालः, कालधर्म्मः, गतिः *f.*, व्यसनं, कर्म्म *n.* (न्), कर्म्मवशः, कार्य्यवशः, प्राक्तनं.—(Death) मृत्युः *m.*, नाशः, विनाशः, क्षयः; 'ill-fate,' दुर्दैवं, दौर्भाग्यं; 'good-fate,' सौभाग्यं.

FATED, *a.* दैवनियुक्तः -क्ता -क्तं, कालनियुक्तः -क्ता -क्तं, दैवनिर्दिष्टः -ष्टा -ष्टं, नियतः -ता -तं, दैविकः -की -कं, दैष्टिकः -की -कं, भवितव्यः -व्या -व्यं; 'one whose fated time is come,' प्राप्तकालः -ला -लं; 'well-fated,' सुभाग्यः -ग्या -ग्यं, सौभाग्यवान् -वती -वत् (त्), पुण्यवान् &c.; 'ill-fated,' दुर्दैवग्रस्तः -स्ता -स्तं, दैवोपहतः -ता -तं.

FATHER, *s.* पिता *m.* (तृ), जनकः, जननः, जनिता *m.* (तृ), जनयिता *m.* (तृ), जन्मदः, तातः, प्रसविता *m.* (तृ), प्रजावान् *m.* (त्), धाता *m.* (तृ), वप्ता *m.* (तृ), वापः, देहकृत् *m.*, सम्भूः *m.*; 'of a family,' कुलपतिः *m.*; 'of a son,' पुत्री *m.* (न्), सुती *m.* (न्); 'father and mother,' मातापितरौ *m.* du. or मातरपितरौ, तातजनयित्र्यौ *f.* du.; 'father of all,' विश्वधाता *m.* (तृ).—(Title of respect) गुरुः, आचार्य्यः.

FATHER-IN-LAW, *s.* श्वशुरः, धर्म्मपिता *m.* (तृ), पूज्यः; 'father and mother-in-law,' श्वश्रूश्वशुरौ *m.* du.

To FATHER, *v. a.* पुत्रं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), पोष्यपुत्रं or कृत्रिमपुत्रं ग्रह्.—(Acknowledge as one's own) स्वीकृ.—(Ascribe to another as his offspring, or production) पुत्रारोपणं कृ, किञ्चित् परस्मै आरुह् in caus. (-रोपयति -यितुं), तेन प्रसुतं or तेन विरचितम् इति विज्ञा in caus. (-ज्ञापयति -यितुं).

FATHERHOOD, *s.* पितृत्वं -ता, जनकत्वं -ता, पितृभावः, प्रजावत्त्वं, पितृधर्म्मः.

FATHER-LAND, *s.* पैतृकभूमिः *f.*, पैतृकदेशः, पैतृकविषयः, जन्मभूमिः *f.*, मूलभूमिः.

FATHERLESS, *a.* अपितृकः -का -कं, पितृहीनः -ना -नं, तातहीनः -ना -नं, क्षमग्रः or क्षेमग्रः *m.* only, अनाथः -था -थं, निर्नाथः -था -थं.

FATHERLINESS, *s.* पितृतुल्यता, ताततुल्यता, पैतृकत्वं, वात्सल्यं.

FATHERLY, *a.* पितृसन्निभः -भा -भं, पितृतुल्यः -ल्या -ल्यं, ताततुल्यः -ल्या -ल्यं, तातलः -ला -लं, पैतृकः -की -कं or पैत्रिकः, पैत्रः -त्री -त्रं, पितृनिर्विशेषः -षा -षं, मनोजवः -वा -वं.

FATHERLY, *adv.* पितृवत्, जनकवत्, तातवत्, पितृरूपेण, जनकरूपेण.

FATHOM, *s.* (Measure of length) व्यामः, व्यायामः, न्यग्रोधः.—(Penetration) वेधः -धनं, मर्म्मवेधः.

To FATHOM, *v. a.* (Sound the depth) वेधं or गाम्भीर्य्यं or तलं परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरूप् (c. 10. -रूपयति -यितुं) or मा in caus. (मापयति -यितुं).—(Penetrate) व्यध् (c. 4. विध्यति, व्यद्धुं); 'one's designs,' मर्म्म व्यध्, अभिप्रायं परीक्ष् or निरूप्.

FATHOMLESS, *a.* अतलस्पर्शी -र्शिनी -र्शि, अगाधः -धा -धं, अनवगाह्यः -ह्या -ह्यं, अगम्यः -म्या -म्यं, अगम्यतलः -ला -लं.

FATIDICAL, *a.* भविष्यद्वाचकः -का -कं, भविष्यत्प्रदर्शकः -का -कं.

FATIGUE, *s.* क्लान्तिः *f.*, श्रान्तिः *f.*, क्लमः, श्रमः, आयासः, परिश्रमः, परिश्रान्तिः *f.*, खेदः, क्लेशः, क्लमित्वं, क्लमथः, अवसादः, ग्लानिः *f.*, कष्टं, व्यायामः, कायक्लेशः, तन्द्रा; 'inured to fatigue,' जितश्रमः -मा -मं.

To FATIGUE, *v. a.* खिद् in caus. (खेदयति -यितुं), क्लम् in caus. (क्लमयति -यितुं), परिक्लम्, आयस् in caus. (-यासयति -यितुं), श्रम् in caus. (श्रमयति -यितुं), परिश्रम्, सद् in caus. (सादयति -यितुं), अवसद्, ग्लै in caus. (ग्लपयति -यितुं), परिग्लै, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), श्रान्तिं जन् in caus. (जनयति -यितुं).

FATIGUED, *p. p.* श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, क्लान्तः -न्ता -न्तं, श्रमार्त्तः -र्त्ता -र्त्तं, जातश्रमः -मा -मं, खिन्नः -न्ना -न्नं, खेदितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लिशितः -ता -तं, क्लेशितः -ता -तं, ग्लानः -ना -नं, परिग्लानः -ना -नं, क्लमी -मिनी -मि (न्), श्रमी -मिणी -मि (न्), अवसन्नः -न्ना -न्नं, अवसादितः -ता -तं, सश्रमः -मा -मं; 'to be fatigued,' श्रम् (c. 4. श्राम्यति, श्रमितुं), आयस् (c. 4. -यस्यति -यसितुं), खिद् (c. 4. खिद्यते, खेत्तुं), क्लम् (c. 4. क्लाम्यति, क्लमितुं), कष्ट (nom. कष्टायते).

FATIGUING, *a.* श्रमकरः -री -रं, श्रमजनकः -का -कं, क्लेशकः -की -कं.

FATNESS, *s.* स्थूलता, स्थौल्यं, मेदस्विता, पुष्टता, पुष्टिः *f.*, पीनता, पीवरत्वं, स्फीतिः *f.*, मेदोवृद्धिः *f.*, स्फातिः *f.*, उन्मेदा, शरीरस्थूलता, स्थूलकायत्वं, आप्यायनं.

To FATTEN, *v. a.* प्यै in caus. (प्याययति -यितुं), आप्यै, पुष् in caus. (पोषयति -यितुं), स्थूलीकृ, पीवरीकृ, पुष्टीकृ, स्त्याय् in caus. (स्त्यापयति -यितुं), संवृध् in caus. (वर्धयति -यितुं).

To FATTEN, *v. n.* आप्यै (c. 1. -प्यायते -प्यातुं), पुष् (c. 4. पुष्यति, पोष्टुं), स्थूलीभू, पीवरीभू, संवृध् (c. 1. -वर्धते -र्धितुं), स्त्याय् (c. 1. स्त्यायते -यितुं).

FATTENED, *p. p.* पुष्टः -ष्टा -ष्टं, पुष्टाङ्गः -ङ्गी -ङ्गं, आप्यायितः -ता -तं, बृंहितः -ता -तं, स्थूलीकृतः -ता -तं, संवर्धितमांसः -सा -सं.

FATTENING, *a.* पौष्टिकः -की -कं, पुष्टिदः -दा -दं, बृंहणः -णा -णं.

FATTY, *a.* मेदस्वी -स्विनी -स्वि (न्), मांसलः -ला -लं, सस्नेहः -हा -हं.

FATUITY, *s.* मूर्खता, मौर्ख्यं, मूढता, मोहः, बालिशता, मुग्धता.

FATUOUS, *a.* मूर्खः -र्खा -र्खं, मूढः -ढा -ढं, बालिशमतिः -तिः -ति, दुर्बुद्धिः -द्धिः -द्धि, दुर्मतिः -तिः -ति, अल्पधीः -धीः -धि.

FAUCET, *s.* भाण्डनिवेशितो जलनिर्गमयोग्यो नाडिविशेषः.

FAULT, *s.* दोषः, अपराधः, मन्तुः *m.*, व्रणः, छिद्रं, अगुणः, पापं, दूषणं, प्रमादः, कर्म्मदोषः, व्यतिक्रमः, परवाच्यं.—(Find fault with) निन्द् (c. 1. निन्दति -न्दितुं), उपालभ् (c. 1. -लभते -लब्धुं), दोषीकृ.

FAULT-FINDER, *s.* दोषग्राही -हिणी -हि (न्), दोषग्राहकः -का -कं, निन्दकः -का -कं, वाच्यदर्शी -र्शिनी -र्शि (न्), छिद्रानुसारी -रिणी -रि (न्), छिद्रान्वेषी -षिणी -षि (न्).

FAULTILY, *adv.* दोषेण, अपराधेन, सदोषं, सापराधं, प्रमादेन, अन्यथा.

FAULTINESS, *s.* अपराधिता -त्वं, दोषिता -त्वं, दोषवत्त्वं, सापराधता, सदोषत्वं, दुष्टता, वाच्यता.

FAULTLESS, *a.* निर्दोषः -षा -षं, निरपराधः -धा -धं, अपराधहीनः -ना -नं, अपापः -पा -पं, अनघः -घा -घं, अनवद्यः -द्या -द्यं, अकल्मषः -षा -षं, अनेनाः -नाः -नः (स्), निरागाः -गाः -गः (स्), निश्छिद्रः -द्रा -द्रं, विशुद्धः -द्धा -द्धं, निर्म्मलः -ला -लं; 'in form,' अव्यङ्गः -ङ्गी -ङ्गं.

शुद्धरूपः -पी -पं.

Faultlessness, *s.* निर्दोषत्वं, निरपराधत्वं, दोषहीनता, विशुद्धता.

Faulty, *a.* दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्), दोषवान् -वती -वत् (त्), निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, सापराधः -धा -धं, सदोषः -षा -षं, दोषिकः -की -कं, वाच्यः -च्या -च्यं, प्रामादिकः -की -कं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अशुद्धः -द्धा -द्धं, ग्राम्यदोषः -षा -षं, अयथार्थः -र्था -र्थं, वितथः -था -थं, अनृतः -ता -तं; 'full of faults,' बहुदोषः -षा -षं; 'a faulty statement,' मिथ्यावादः, मृषावादः; 'a faulty conclusion,' अपसिद्धान्तः.

Faun, *s.* (Sylvan deity) वनदेवता, स्थलीदेवता, वनेचरः.

To favor, *v. a.* अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुकूल (nom. अनुकूलयति -यितुं), उपकृ, उपकारं कृ, साहाय्यं कृ, प्रसादं कृ, अनुपाल् (c. 10. -पालयति -यितुं), प्रतिपाल्, भज् (c. 1. भजति -ते, भक्तुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं), जुष् (c. 6. जुषते, जोषितुं), रक्षां कृ, प्रसन्नो भू or अस्, स्नेहं कृ, कृपां कृ, परप्रियं or परहितम् इष् (c. 6. इच्छति, एषितुं).—(Resemble) सरूपः -पी -पं भू or अस्; 'a child that favors his father,' पितृरूपः पुत्रः; 'fortune favors the brave,' साहसे श्रीः प्रतिवसति.

Favor, *s.* (Kind regard, friendly disposition) प्रसादः, अनुग्रहः, अनुकूलता, आनुकूल्यं, प्रसन्नता, प्रीतिः *f.*, प्रियता, स्नेहः, अनुरोधः, हितेच्छा, हितेप्सा.—(Support, countenance) आग्रहः, सङ्ग्रहः, ग्रहः, आश्रयः, संश्रयः, आधारः, अनुपालनं, साहाय्यं, उपकारः, पुरस्कारः, संवर्धनं, वर्धनं, शरण्यता, अभ्युपपत्तिः *f.*—(Kind act) उपकृतं, उपकारः, सुकृतं, सुकृतिः *f.*, उपचारः, प्रियं, हितं.—(Leave, permission) अनुमतिः *f.*, अनुज्ञा; 'to ask a favour,' प्रसद् (c. 10. -सादयते -यितुं), with acc. of person, उपकारं प्रार्थ् (c. 10. -र्थयते -यितुं); 'I ask you as a favor not to be angry with me,' प्रसादये त्वां न मे क्रोद्धुम् अर्हसि; 'conciliate the favor,' आराध् (c. 10. -राधयति -यितुं), अनुरञ्ज् in caus. (-रञ्जयति -यितुं).

Favorable, *a.* प्रसन्नः -न्ना -न्नं, सुप्रसन्नः -न्ना -न्नं, अनुग्राही -हिणी -हि (न्), अनुकूलः -ला -लं, आनुग्राहकः -की -कं, हितैषी -षिणी -षि (न्), प्रियैषी &c., हितकामः -मा -मं, हितेप्सुः -प्सुः -प्सु, हितः -ता -तं, सुहितः -ता -तं, प्रियकारः -री -रं, प्रियङ्करः -री -रं, हितबुद्धिः -द्धिः -द्धि, अर्थकृत्, उपकारकः -का -कं.—(Tending to promote) उत्पादकः -का -कं; 'favorable to wealth,' अर्थोत्पादकः -का -कं; 'to longevity,' आयुष्यः -ष्या -ष्यं; 'to be favorable,' प्रसद् (c. 1. -सीदति -सत्तुं); 'I am favorable to you,' प्रसन्नोऽस्मि तव.

Favorableness, *s.* प्रसन्नता, अनुकूलता, आनुकूल्यं, हितबुद्धित्वं.

Favorably, *adv.* प्रसन्नं, प्रसादेन, अनुग्रहेण, सानुग्रहं, सानुकूल्यं, प्रियं.

Favored, *p. p.* अनुगृहीतः -ता -तं, उपकृतः -ता -तं, प्रतिपालितः -ता -तं.

Favorer, *s.* अनुग्राही *m.* (न्), अनुग्राहकः, उपकारकः, अनुपालकः.

Favorite, *s.* प्रियः -या, सुप्रियः -या, वल्लभः -भा, सुभगः -गा, हृदयप्रियः -या, स्नेहपात्रं, प्रीतिपात्रं; 'general favorite,' सर्वप्रियः; 'a royal favorite,' नृपवल्लभः, राजवल्लभः; 'a favorite wife,' सुभगा.

Favorite, *a.* प्रियः -या -यं, प्रियतमः मा -मं, हृदयप्रियः -या -यं, दयितः -ता -तं, इष्टतमः -मा -मं, अभीष्टः -ष्टा -ष्टं, इष्टः -ष्टा -ष्टं.

Favoritism, *s.* पक्षपातिता, पक्षानुग्रहः, पक्षोत्साहित्वं, पक्षता, स्नेहः.

Fawn, *s.* मृगशावकः, मृगपोतकः, हरिणशिशुः *m.*, हरिणवत्सः, कुरङ्गः; 'fawn-eyed,' कुरङ्गनयनः -ना -नी -नं.

To fawn, *v. n.* (Bring forth a fawn) मृगशावकं or कुरङ्गं सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं).

To fawn upon, *v. n.* साष्टाङ्गपातं प्रणम्य सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, उपसान्त्व्, परिशान्त्व् or लल् (c. 10. लालयति -यितुं).

Fawner, *s.* साष्टाङ्गपातं प्रणम्य सान्त्वकारः, लाली *m.* (न्), चाटुकारः.

Fawning, *s.* अष्टाङ्गप्रणामपूर्वं सान्त्वनं or लालनं, अतिचाटुकारः.

Fawningly, *adv.* साष्टाङ्गपातं, बद्धाञ्जलिकर्मपूर्वं, दृष्कामचाटुकारेण.

Fay, *s.* विद्याधरी, पिशाची, योगिनी, डाकिनी. *See* Fairy.

Fealty, *s.* भक्तिः *f.*, प्रभुभक्तिः *f.*, भक्तता, प्रभुभक्तता, आसक्तिः *f.*, अनुषङ्गः.

Fear, *s.* भयं, भीतिः *f.*, भीरुता, त्रासः, सन्त्रासः, परित्रासः, साध्वसं, शङ्का, आशङ्का, दरः -रं, भीष्मं, भीषणं; 'removal of fear,' भयप्रतीकारः; 'causing fear,' भयङ्करः -रा -रं, भयकारकः -का -कं, भयदः -दा -दं, भयप्रदः -दा -दं; 'cause of fear,' भयहेतुः *m.*; 'agitated by fear,' भयविह्वलः -ला -लं; 'through fear,' भयात्, त्रासात्, भीत्या, भीतेः, शङ्कया; 'through fear of punishment,' दण्डभयात्.

To fear, *v. a.* भी (c. 3. बिभेति, भेतुं) with abl. or gen. c. So also प्रभी, विभी, त्रस् (c. 4. त्रस्यति, त्रसितुं), वित्रस्, उद्विज् (c. 6. -विजते -जितुं), व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ् all with abl. c., शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क् with acc. c., तर्क् (c. 10 तर्कयति -यितुं).

To fear, *v. n.* त्रस् (c. 4. त्रस्यति, त्रसितुं), व्यथ् (c. 1. व्यथते -थितुं), उद्विग्नीभू, भयार्त्तः -र्त्ता -र्त्तं भू or अस्; 'do not fear,' मा भैषीः, मा त्रासीः or मा त्रसीः.

Fearful, *a.* (Affected by fear, timid) भयार्त्तः -र्त्ता -र्त्तं, भयातुरः -रा -रं, भीरुः -रुः -रु -रुकः -का -कं, सभयः -या -यं, भीतः -ता -तं, ससाध्वसः -सा -सं, सशङ्कः -ङ्का -ङ्कं, शङ्कितः -ता -तं, त्रस्तः -स्ता -स्तं, सन्त्रस्तः -स्ता -स्तं, दीनः -ना -नं, त्रसुः -सुः -सु, भीलुकः -का -कं, दरितः -ता -तं.—(Terrible) भयङ्करः -रा -रं, भयानकः -की -कं, भयावहः -हा -हं, त्रासकरः -री -रं, भीष्मभयः -यी -यं, दारुणः -णा -णं, रौद्रः -द्री -द्रं, घोरः -रा -रं, भीमः -मा -मं, भीषणः -णा -णं, भीष्मः -ष्मा -ष्मं, भैरवः -वी -वं.

Fearfully, *adv.* (With fear) सभयं, सत्रासं, भयेन,ससाध्वसं, सशङ्कं.—(Terribly) दारुणं, घोरं, भैरवं, भयानकं.

Fearfulness, *s.* भीरुता, भीतत्वं, सभयत्वं, सन्त्रस्तता, रौद्रता.

Fearless, *a.* निर्भयः -या -यं, अभयः -या -यं, अभीतः -ता -तं, विभीतः -ता -तं, अशङ्कः -ङ्का -ङ्कं, निःशङ्कः -ङ्का -ङ्कं, विशङ्कः -ङ्का -ङ्कं, निर्विशङ्कः -ङ्का -ङ्कं, अभीरुः -रुः -रु, अपभीः -भीः -भि, अपशङ्कः -ङ्का -ङ्कं, निःसाध्वसः -सा -सं, विगतभयः -या -यं, अकुतोभयः -या -यं, निःसंशयः -या -यं, साहसिकः -की -कं.

Fearlessly, *adv.* निर्भयं, अभयं, निःशङ्कं, अभीतवत्, साहसेन; 'acting fearlessly,' निर्भयार्थः -र्था -र्थं.

Fearlessness, *s.* निर्भयत्वं, अभीतिः *f.*, अभीतता, अभयं -यत्वं, शौर्यं.

Feasibility, *s.* शक्यता, साध्यता, करणीयता, सम्भाव्यता, उपपाद्यत्वं.

Feasible, *a.* साध्यः -ध्या -ध्यं, करणीयः -या -यं, शक्यः -क्या -क्यं, कर्तुं शक्यः -क्या -क्यं, सुकरः -रा -रं, सम्भाव्यः -व्या -व्यं, सम्भवनीयः -या -यं, उपपाद्यः -द्या -द्यं, कृत्यः -त्या -त्यं, सुगमः -मा -मं, लभ्यः -भ्या -भ्यं, सुलभः -भा -भं.

Feast, *s.* (Festival) उत्सवः, महः, पर्व *n.* (न्), यात्रा, यात्रोत्सवः, उद्धर्षः, उद्धवः, पर्वरीणं, अभ्युदयः, क्षणः, चर्चरी; 'a great feast,' महोत्सवः.—(Entertainment) सत्क्रिया, सहभोजनं, सम्भोजनं, उत्तमान्नसम्भारः, परमान्नसम्भारः; 'feast of lanterns,' दीपोत्सवः; 'feast to the eye,' नयनोत्सवः.

To feast, *v. n.* परमान्नानि भुज् (c. 7. भुंक्ते, भोक्तुं), उत्तमाहारं कृ, उत्तमभोजनं कृ, उत्तमान्नेन तृप् (c. 4. तृप्यति), उत्सवं कृ, महोत्सवं कृ.

To FEAST, *v. a.* सन्तर्प् or भोजनविशेषैः सन्तृप् (c. 10. -तर्पयति -यितुं) or सन्तुष् in caus. (-तोषयति -यितुं), परमान्नानि भुज् in caus. (भोजयति -यितुं), सत्कृ.

FEASTED, *p. p.* सत्कृतः -ता -तं, परमान्नसमर्पितः -ता -तं.

FEASTING, *s.* उत्सवकरणं, परमान्नभोजनं, उत्तमाहारकरणं, सहभोजनं.

FEAT, *s.* कर्म्म *n.* (न्), चरित्रं, चेष्टितं, अद्भुतकर्म्म *n.*, आश्चर्य्यकर्म्म *n.*

FEATHER, *s.* पक्षः, पर्णं, गरुत् *m.*, पिच्छं, पतत्रं, पत्रं, पक्ष्म *n.* (न्), वाजः, तनुरुहः; 'of a peacock,' मयूरपिच्छं; 'of an arrow,' पुङ्खः, शरपुङ्खा, शरपक्षः, पत्रं, वाजः, मणिकाचः.

FEATHER-BED, *s.* पक्षपूरितं शयनं, पक्षशय्या, मृदुशयनं, कोमलपर्य्यङ्कः, सुखस्पर्शप्रस्तरः.

FEATHERED, *a.* पक्षी -क्षिणी -क्षि (न्), पक्षवान् -वती -वत् (त्), पक्षाच्छादितः -ता -तं, पक्षयुक्तः -क्ता -क्तं, सपक्षः -क्षा -क्षं, गरुत्मान् -त्मती -त्मत् (त्), पत्री -त्रिणी -त्रि (न्), पतत्री -त्रिणी -त्रि (न्).

FEATHERY, *a.* पक्षतुल्यः -ल्या -ल्यं, पक्षसदृशः -शी -शं, पक्षसगुणः -णा -णं.

FEATURE, *s.* (Form of the face) वदनाकृतिः *f.*, वदनाकारः, वदनरेखा, मुखरेखा, मुखावयवः, वदनावयवः.—(Form, cast) आकारः, आकृतिः *f.*, संस्कारः, संस्थानं, रूपं, मूर्त्तिः *f.*

To FEAZE, *v. a.* उद्ग्रन्थ् (c. 1. -ग्रन्थति -न्थितुं, c. 9. -ग्रथ्नाति), समुद्ग्रन्थ्.

FEBRICULOSE, *a.* ईषज्ज्वरी -रिणी -रि (न्), ईषज्ज्वरातुरः -रा -रं.

FEBRIFACIENT, *a.* ज्वरकरः -रा -रं, ज्वरोत्पादकः -का -कं.

FEBRIFUGE, *a.* ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरान्तकः -का -कं, ज्वरहन्ता -न्त्री -न्तृ (न्तृ), ज्वरनिवारकः -का -कं; 'a febrifuge,' ज्वरनाशकम् औषधं, ज्वरापहा.

FEBRILE, *a.* ज्वरी -रिणी -रि (न्), ज्वरितः -ता -तं, ज्वरजः -जा -जं.

FEBRUARY, *s.* फाल्गुनः, माघः, तपस्यः, फाल्गुनिकः, वत्सरस्य द्वितीयमासः.

FECAL, *a.* मलमयः -यी -यं, शकृन्मयः -यी -यं, विण्मयः -यी -यं, मलिनः -ना -नं, अमेध्यः -ध्या -ध्यं, खली -लिनी -लि (न्).

FECES, *s.* मलं, पुरीषं, विष्ठा, विट् *f.* (ष्), उच्चारः, उच्चरितं, शमलं, गूथः, अवस्करः, अपस्करः, वर्चस्कः, दूर्षं.—(Dregs) मलं, खलं, कल्कं, किट्टं, उच्छिष्टं, शेषं, कलङ्कः; 'to discharge feces,' पुरीषोत्सर्गं कृ, विण्मूत्रोत्सर्गं कृ.

FECULENCE, *s.* मालिन्यं, समलता, अमेध्यता, मलवत्त्वं, कलुषता, मलं.

FECULENT, *a.* समलः -ला -लं, मलवान् -वती -वत् (त्), मलिनः -ना -नं, मलीमसः -सा -सं, मलदूषितः -ता -तं, अमेध्यः -ध्या -ध्यं, खली -लिनी -लि (न्), कल्की -ल्किनी -ल्कि (न्), कलुषः -षा -षं -षी -षिणी -षि (न्), विड्भवः -वा -वं, कलङ्की -ङ्किनी -ङ्कि (न्).

FECUND, *a.* बहुप्रजः -जा -जं, बहुपत्यः -त्या -त्यं, अवन्ध्यः -न्ध्या -न्ध्यं, बहुफलदः -दा -दं, प्रजनिष्णुः -ष्णुः -ष्णु; 'fecund soil,' उर्व्वरा.

To FECUNDATE, *v. a.* सफलीकृ, बहुफलदीकृ, रेतः or परागं सिच् (c. 6. सिञ्चति, सेक्तुं).

FECUNDATION, *s.* सफलीकरणं, अवन्ध्यीकरणं, परागसेकः, रेतःसेचनं.

FECUNDITY, *s.* साफल्यं, सफलता, फलवत्त्वं, बनकता, अवन्ध्यता, स्फीतिः *f.*, प्रसवनं, प्रसवित्वं, सावकत्वं, प्रजनिष्णुता.

FED, *p. p.* पुष्टः -ष्टा -ष्टं, पुषितः -ता -तं, पोषितः -ता -तं, भृतः -ता -तं, पालितः -ता -तं, सन्तोषितः -ता -तं, समर्पितः -ता -तं, अशितः -ता -तं, आशितः -ता -तं; 'well-fed,' सुपुष्टः -ष्टा -ष्टं, हृष्टपुष्टः -ष्टा -ष्टं, स्वाशितः -ता -तं; 'ill-fed,' विपुष्टः -ष्टा -ष्टं; 'fed on by cattle,' आशितङ्गवीनः -ना -नं; 'having fed,' भोजयित्वा.

FEDERAL, *a.* साङ्गतिकः -की -कं, सामयिकः -की -कं, संहितः -ता -तं.

FEDERATE, *a.* सन्धितः -ता -तं, कृतसन्धिः -न्धिः -न्धि, कृतसम्बन्धः -न्धा -न्धं, संहतः -ता -तं, संहितः -ता -तं, सङ्गतवान् -वती -वत् (त्), संयुक्तः -क्ता -क्तं.

FEE, *s.* (Recompense) शुल्कः -ल्कं, पारितोषिकं, वेतनं, भृतिः *f.*, भाटकः, दक्षिणा, उपप्रदानं, उपायनं, निस्तारः, प्रतिफलं.—(Land granted by a lord) भूस्वामिना स्वपरिचारहस्ते समर्पिता भूमिः; 'fee-simple,' स्वाधीनभूमिः *f.*

To FEE, *v. a.* पारितोषिकं दा, वेतनं दा, उपप्रदानेन परितुष् in caus. (-तोषयति -यितुं) or सन्तुष्, उत्कोचं दा.

FEEBLE, *a.* अल्पबलः -ला -लं, दुर्बलः -ला -लं, अल्पशक्तिः -क्तिः -क्ति, अल्पवीर्य्यः -र्य्या -र्य्यं, अल्पसत्त्वः -त्त्वा -त्त्वं, अल्पतेजाः -जाः -जः (स्), शिथिलबलः -ला -लं, शिथिलशक्तिः -क्तिः -क्ति, निर्बलः -ला -लं, बलहीनः -ना -नं, सामर्थ्यहीनः -ना -नं, क्षीणबलः -ला -लं, असमर्थः -र्था -र्थं, शिथिलः -ला -लं, मन्तुः -न्तुः -न्तु, विगलिततेजाः -जाः -जः (स्), क्षीणः -णा -णं, अवसन्नः -न्ना -न्नं, क्षामः -मा -मं, क्लीबः -बा -बं, श्रान्तः -न्ता -न्तं, शातः -ता -तं, अमांसः -सा -सं.

FEEBLE-MINDED, *a.* अल्पबुद्धिः -द्धिः -द्धि, दुर्मतिः -तिः -ति, अल्पधीः -धीः -धि.

FIRE-PLACE, *s.* चुल्लिः *f.* -ल्ली, अङ्गारिणी, वितानं, अश्मन्तं -न्तकं, अस्मन्तं, अन्तिका, अन्दिका, उद्धानं, उध्मानं, उद्धारं, अधिश्रयणी, दृडकः, अग्निकुण्डं.

FIRE-PROOF, *a.* अदाह्यः -ह्या -ह्यं, अदहनीयः -या -यं, अग्निनास्पृश्यः -श्या -श्यं.

FIRE-SHIP, *s.* अग्निनौका, आग्नेयनौका, शीघ्रदाह्यवस्तुपूरिता युद्धनौका.

FIRE-SHOVEL, *s.* अङ्गारधारणयोग्यो लोहकुद्दालः.

FIRE-SIDE, *s.* गृहाग्निस्थानं, अग्निसमीपं, गृहाग्निनिकटे, गृहाग्न्युपान्तं, वितानं.

FIRE-STONE, *s.* अग्निप्रस्तरः, अग्निपाषाणः, आग्नेयाश्मा *m.* (न्).

FIRE-TONGS, *s.* अङ्गारधारणयोग्यो लोहसन्दंशकविशेषः.

FIRE-WOOD, *s.* अग्निकाष्ठं, दाह्यकाष्ठं, इन्धनं, इध्मं, समित् *f.* (ध्).

FIRE-WORKS, *s.* अग्निक्रीडा, खधूपादिक्रीडा, अग्नितारादिक्रीडा.

FIRING, *s.* दाह्यं, इध्मं, समिन्धनं, अङ्गारकाष्ठतृणादीनि दाह्यवस्तूनि.

FIRKIN, *s.* मानविशेषः, आढकः, अर्द्धाढकः, द्रोणः, अर्द्धद्रोणः.

FIRM, *a.* दृढः -ढा -ढं, स्थिरः -रा -रं, निश्चलः -ला -लं, अचलः -ला -लं, अविचलितः -ता -तं, धीरः -रा -रं, धृतिमान् -मती -मत् (त्), धैर्य्यवान् -वती -वत् (त्), स्थाणुः -णुः -णु, स्थासुः -सुः -सु, स्थावरः -रा -रं, स्थेयान् -यसी -यः (स्), स्थेष्ठः -ष्ठा -ष्ठं, अकम्पितः -ता -तं, अक्षुब्धः -ब्धा -ब्धं, अस्खलितः -ता -तं, अव्यभिचारी -रिणी -रि (न्), व्यवस्थितः -ता -तं, स्थितः -ता -तं, स्थितिमान् -मती -मत् (त्), गाढः -ढा -ढं, प्रगाढः -ढा -ढं.—(Compact) घनः -ना -नं, दृढः -ढा -ढं, संहतः -ता -तं, अशिथिलः -ला -लं, दृढसन्धिः -न्धिः -न्धि, निर्भेदः -दा -दं; 'firm in mind,' स्थिरमतिः -तिः -ति, निश्चलमतिः -तिः -ति, स्थिरधीः -धीः -धि, स्थिरात्मा -त्मा -त्म (न्), अभिन्नात्मा &c.; 'in friendship,' दृढसौहृदः; 'in allegiance,' दृढभक्तिः *m.*; 'in battle,' दृढायुधः; 'firm as a rock,' शिलाघनः -ना -नं, शैलसारः -रा -रं; 'firm step,' अस्खलितगतिः; 'a firm, compact breast,' घनपयोधरः; 'firm-footed,' स्थिरपदः -दा -दं.

FIRM, *s.* (Partnership) अनेकवाणिज्यजनसंसर्गः, सहव्यापारिणां बहुजनानाम आख्या or उपाधिः *m.*

To FIRM, *v. a.* दृढीकृ, स्थिरीकृ, दृढ (nom. दृढयति -यितुं).

FIRMAMENT, *s.* आकाशः, आकाशवर्त्म *n.* (न्), व्योम *n.* (न्), व्योमविस्तृतं, नभोमण्डलं, नभस्तलः -लं, गगनं, खं, अन्तरीक्षं, नक्षत्रमण्डलं, ज्योतिश्चक्रं, तारापथः, खगोलः, उडुपथः, शून्यं, शून्यत्वं, घनाश्रयः, मेघवर्त्म *n.* (न्).

FIRMAMENTAL, *a.* आकाशीयः -या -यं, आन्तरीक्षः -क्षी -क्षं, वैहायसः -सी -सं, विहायसीयः -या -यं, गगणीयः -या -यं, गगणस्थः -स्था -स्थं, नभःस्थः -स्था -स्थं.

FIRMLY, *adv.* दृढं, स्थिरं, निश्चलं, धैर्य्येण, स्थैर्य्येण, गाढं, प्रगाढं, दार्ढ्येन; 'firmly rooted,' बद्धमूलः -ला -लं; 'firmly devoted,' दृढभक्तिः -क्तिः -क्ति; 'firmly tied,' दृढबद्धः -द्धा -द्धं; 'firmly united,' दृढसन्धिः -न्धिः -न्धि.

FIRMNESS, *s.* दृढता, दार्ढ्यं, द्रढिमा *m.* (न्), दृढत्वं, स्थिरता, स्थैर्य्यं, धीरत्वं, धैर्य्यं, धृतिः *f.*, निश्चलता, अचलत्वं, स्थितिः *f.*, व्यवस्थितिः *f.*, स्थाणुता, धृतिमत्त्वं, स्थितिमत्त्वं, गाढता, प्रगाढता, स्थेमा *m.* (न्), अक्षोभः, अकम्पः, अस्खलनं, स्थावरत्वं, धारणा.—(Compactness) घनत्वं -ता, संहतिः *f.*, संहतता, सन्धिः *m.*, सान्द्रता, दृढत्वं.

FIRST, *a.* प्रथमः -मा -मं, पूर्व्वः -र्व्वा -र्व्वं, आद्यः -द्या -द्यं, आदिमः -मा -मं, अग्रः -ग्रा -ग्रं, अग्रिमः -मा -मं, आदिः *m.*, पौरस्त्यः -स्त्या -स्त्यं, प्राक्तनः -नी -नं.—(Chief) मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः -ग्र्या -ग्र्यं, अग्रियः -या -यं, अग्रीयः -या -यं, प्रधानः -ना -नं, प्रष्ठः -ष्ठा -ष्ठं, प्रवरः -रा -रं, पुरोगमः -मा -मं; 'first and last,' पूर्व्वापरः -रा -रं; 'first half,' पूर्व्वार्द्धः; 'first part of the night,' पूर्व्वरात्रः; 'first attack' (of disease), पूर्व्वावतारः; 'dying first,' पूर्व्वमारी -रिणी -रि (न्); 'first of all,' सर्व्वप्रधानः -ना -नं, सर्व्वाग्रः -ग्रा -ग्रं.

FIRST, *adv.* प्रथमं, पूर्व्वं, अग्रे, आदितस्, आदौ, पुरस्, पुरस्तात्; 'at first, in the first place,' प्रथमं, प्रथमतस्, पूर्व्वं; 'first and last,' आद्यन्तं.

FIRST-BEGOTTEN, *a.* पूर्व्वप्रसूतः -ता -तं, पूर्व्वजनितः -ता -तं, पूर्व्वजः -जा -जं, प्रथमजातः -ता -तं, प्रथमप्रसूतः -ता -तं, अग्रजातः -ता -तं.

FIRST-BORN, *s.* पूर्व्वजः, अग्रजः, अग्रियः, अग्रिमः, अग्र्यः, अग्रजन्मा *m.* (न्), ज्येष्ठः, वयोज्येष्ठः, अधिकवयाः *m.* (स्), सर्व्वपुत्रज्येष्ठः, प्रधानसन्तानः.

FIRST-FRUITS, *s.* प्रथमफलं, आदिफलं, प्रथमजातं फलं, अग्रफलं, प्रथमोत्पन्नं फलं, प्रथमोत्पन्नं, नवशस्यं; 'sacrifice of first-fruits,' आग्रायणं.

FIRSTLING, *s.* पशोः प्रथमजातसन्तानः or प्रथमप्रसूतसन्ततिः *f.*

FIRSTLY, *adv.* प्रथमतस्, प्रथमं, पूर्व्वं, आदितस्.

FIRST-RATE, *a.* परमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, उत्कृष्टः -ष्टा -ष्टं.

FISCAL, *a.* वालेयः -यी -यं, शौल्कः -ल्की -ल्कं, राजायसम्बन्धीयः -या -यं.

FISH, *s.* मत्स्यः, मीनः, झषः, मत्स्यः, विसारः -री *m.* (न्), वैसारी *m.* (न्), वैसारिणः, अण्डजः, शकली *m.* (न्), शल्की *m.* (न्), शल्कली *m.*, कण्टकी *m.* (न्), आम्भसिकः, जलजः, जलप्रियः, जलजन्तुः *m.*, जलेचरः, जलचारी *m.* (न्), पाठीनः, अनिमिषः, अनिमेषः, स्थिरजिह्वः, पङ्क्षीणः, पृथुरोमा *m.* (न्), आत्माशी *m.* (न्), मत्सी *f.*, मत्सः; 'fish-bone,' कण्टकः; 'fish-sauce,' मत्स्यगण्डः, मीनाम्लीणः; 'fish-bannered god,' मीनकेतनः, मकरध्वजः, मकरकेतुः *m.*, झषकेतनः.

To FISH, *v. a.* and *n.* मत्स्यान् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं) or बन्ध् (c. 9. बध्नाति, बन्धुं), मत्स्यघातं कृ, झष् (c. 1. झषति -षितुं).—(Search) अन्विष् (c. 1. -इच्छति -एषितुं), अनुसृ (c. 1. -सरति -सर्त्तुं).

FISH-BASKET, *s.* मत्स्यधानी, मत्स्यबन्धिनी, कुवेणी, मत्स्यभाजनं.

FISHER, FISHERMAN, *s.* धीवरः, कैवर्त्तः, मात्स्यिकः, मैनिकः, निषादः, मत्स्यधारी *m.* (न्), मत्स्यजीवी *m.* (न्), मत्स्यबन्धी *m.* (न्), मीनाघाती *m.* (न्), मत्स्यघातोपजीवी *m.* (न्), जालिकः, जाली *m.* (न्), कुपिनी *m.* (न्), साकुरिकः, तीवरः, छोटी *m.* (न्), दासः, दाशः, धीवा *m.* (न्).

FISHERY, *s.* धीवरकर्म्म *n.* (न्), मत्स्यबन्धनं, मत्स्यग्रहणं.—(Place for catching fish) मत्स्यग्रहणस्थानं.

FISH-HOOK, *s.* वडिशं -शा -शी, वरिशी, वलिशं -शी, मत्स्यवेधनं -नी.

FISHING, *s.* मत्स्यबन्धनं, मत्स्यग्रहणं, मत्स्यवधः, मात्स्यघातः.

FISHING-BOAT, *s.* धीवरनौका, कैवर्त्तनौका, निषादनौका, मात्स्यिकपोतः.

FISHING-NET, *s.* मत्स्यजालं, मत्स्यग्रहणार्थं जालं, कुपिनी.

FISHING-TACKLE, *s.* मत्स्यग्रहणोपकरणं, मत्स्यबन्धनसाधनं.

FISH-KETTLE, *s.* मत्स्यपचनयोग्या दीर्घस्थाली, मत्स्यपचनी.

FISH-MARKET, *s.* मत्स्यविक्रयस्थानं, मीनविक्रयशाला, निपक्षा.

FISHMONGER, *s.* मत्स्यविक्रेता *m.* (तृ), मत्स्यविक्रयोपजीवी *m.* (न्).

FISH-POND, *s.* मत्स्यपूर्णं सरः *n.* (स्), मीनाशयः, मत्स्यालयः, मीनालयः.

FISH-SPAWN, *s.* मीनाण्डं, मत्स्याण्डं, झषाण्डं, मत्स्यडिम्बः.

Fish-woman, *s.* मत्स्यविक्रेत्री, मत्स्यविक्रयोपजीविनी.

Fishy, *a.* मात्स्यः -त्स्यी -त्स्यं, मात्स्यिकः -की -कं, मात्सिकः -की -कं, मैनिकः -की -कं, मीमरः -रा -रं, मत्स्यगुणोपेतः -ता -तं.

Fissile, *a.* विदलः -ला -लं, भिदुरः -रा -रं, छिदुरः -रा -रं, भिदेलिमः -मा -मं.

Fissure, *s.* छिद्रं, रन्ध्रं, सन्धिः *m.*, भित्तिः *f.*, भङ्गः, दरी -रा, विदरः.

To **fissure**, *v. a.* विद् (c. 10. -दारयति -यितुं), विदल् (c. 10. -दलयति -यितुं).

Fist, *s.* मुष्टिः *m.f.* -ष्टी, हस्तमुष्टिः, मुस्तुः *m.*, खटः -टकः -टिकः, रत्निः *m.* -त्नी *f.*, जितकाशिः *m.*; 'doubling or clenching the fist,' मुष्टिबन्धः, मुष्टिसङ्ग्राहः, हस्तसङ्ग्राहः.

To **fist**, *v. a.* मुष्टिना or मुष्ट्या तड् (c. 10. ताडयति -यितुं) or ग्रह् (c. 1. -हरति -हर्तुं), मुष्टिसङ्ग्राहेण पीड् (c. 10. पीडयति -यितुं).

Fisticuffs, *s.* मुष्टिप्रहारः, मुष्टिपातः, मुष्टियुद्धं, मौष्टा, मुष्टीमुष्टि युद्धं, बाहुयुद्धं, मल्लयुद्धं, पाणिघातः.

Fistula, *s.* नाडिः *f.* -डी, नालिः -ली, नाडीव्रणः, नालीव्रणः, नालीघातं; 'in ano,' शतपोनकः, भगन्दरः; 'lachrymalis,' अश्रुनाली.

Fistulous, *a.* नाड्याकारः -रा -रं, नाडिरूपः -पा -पं. 'fistulous sore,' नाडीव्रणः.

Fit, *s.* (Paroxysm of any disease) आवेशः, अवतारः -तरणं, आक्रमः -मणं; 'fit of the gout,' वातरोगावेशः; 'fit of fever,' ज्वरावतारः; 'of ague,' कम्पज्वराक्रमः, शीतज्वरावेशः; 'fit of anger,' क्रोधावेशः; 'fit of lust,' कामावेशः; 'of madness,' उन्मादावेशः.—(Fit of fainting, epilepsy, &c.) मूर्छा -र्छनं -ना, भ्रामरं, भ्रमिः *f.*, घूर्णिः *f.*

Fit, **fitting**, *a.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, उपयोगी -गिनी -गि (न्), यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, समुचितः -ता -तं, यथोचितः -ता -तं, समञ्जसः -सा -सं, उपपन्नः -न्ना -न्नं, पर्याप्तः -प्ता -प्तं, न्याय्यः -य्या -य्यं, सम्भाव्यः -व्या -व्यं, सम्भावितः -ता -तं, अनुरूपः -पा -पं, अर्हः -र्हा -र्हं, यथार्हः -र्हा -र्हं, सङ्गतः -ता -तं, सङ्गतार्थः -र्था -र्थं, पथ्यः -थ्या -थ्यं, औपयिकः -की -कं, अभिनीतः -ता -तं, लभ्यः -भ्या -भ्यं, भजमानः -ना -नं.—(Qualified) क्षमः -मा -मं, कर्म्मक्षमः -मा -मं, अलङ्कर्म्मीणः -णा -णं; 'fit for a man,' अलम्पुरुषीणः -णा -णं; 'fit for sacrifice,' यज्ञियः -या -यं, यज्ञार्हः -र्हा -र्हं; 'a field fit for growing rice,' शाल्युद्भवोचितं क्षेत्रं. Sometimes expressed by the fut. pass. part.; as, 'fit to be eaten,' खाद्यः -द्या -द्यं, खादनीयः -या -यं; 'fit to be done,' कार्य्यः -र्य्या -र्य्यं, करणीयः -या -यं.

To **fit**, *v. a.* (Adapt, accommodate) युज् (c. 10. योजयति -यितुं, c. 7. युनक्ति, योक्तुं), समायुज्, आयुज्, सन्धा (c. 3. -दधाति -धातुं), समाधा, योग्यं -ग्यां -ग्यं or उपयुक्तं -क्तां -क्तं कृ.—(Fit out, equip) सज्जीकृ, सज्ज् (c. 1. सज्जति -ज्जितुं), सोपकारद्रव्यैः समायुज्, उपयुक्तद्रव्याणि सम्प्रकॢप् (c. 10. -कल्पयति -यितुं) or उपकॢप् or उपपद् (c. 10. -पादयति -यितुं) or पुरस्कृ or उपस्कृ or प्रस्तुतीकृ सर्व्वोपकारद्रव्ययुक्तं -क्तां -क्तं कृ, उपयुक्तद्रव्यसाधनं कृ; 'fit out a ship,' समुद्रयानार्थं or युद्धार्थं नावं सज्जीकृ.

To **fit**, *v. n.* (Be proper, suitable) युज् in pass. (युज्यते), उपपद् in pass. (-पद्यते), योग्यः -ग्या -ग्यं भू or अस्, उपयुक्तः -क्ता -क्तं भू, अर्ह् (c. 1. अर्हति -र्हितुं); 'it is not fit that you should grieve,' न शोचितुम् अर्हसि; 'it is not fit that I should go,' न गन्तुम् अर्हामि.—(Be qualified) कॢप् (c. 1. कल्पते -ल्प्तुं), उपकॢप्, क्षमः -मा -मं भू, उचितः -ता -तं भू; 'he is fit for immortality, अमृतत्वाय कल्पते.

Fitch, *s.* (A chick-pea) चणकः, हरिमन्थः -न्थकः.

Fitful, *a.* चञ्चलः -ला -लं, चलः -ला -लं, विषमः -मा -मं, लोलः -ला -लं, चपलः -ला -लं, अनित्यः -त्या -त्यं.

Fitly, *adv.* युक्तं, योग्यं, यथायोग्यं, उचितं, यथोचितं, उपयुक्तं, योगतस्, यथार्हं -र्हतस्, सम्यक्, यथार्थं, यथायथं, यथातथं, अनुरूपं, साम्प्रतं, स्थाने.

Fitness, *s.* युक्तता, योग्यता, युक्तिः *f.*, उपयोगः, उपयुक्तता, उपयोगिता, उचितत्वं, औचित्यं, सामञ्जस्यं, समञ्जसं, उपपत्तिः *f.*, सम्भावना, न्यायः -यता, सङ्गतत्वं, पर्य्याप्तिः *f.*, यथार्हता, याथार्थ्यं, कल्पः, अभ्रेषः, देशरूपं, कर्त्तव्यता.—(Qualification) पात्रता -त्वं, क्षमता.

Fitting, *s.* (Adaptation) समायोजनं, समाधानं.—(Equipping) सज्जीकरणं, सज्जनं, सज्जकर्म्म *n.* (न्), साधनं, पुरस्करणं.—(Suitable) *see* Fit.

Five, *a.* पञ्च *m.f.n.* (न्), पञ्चकः -का -कं, दशार्द्धः, पञ्चतयः -या -यं, पञ्चत् *m.f.n.*, पञ्चसंख्यकः -का -कं; 'aggregate of five,' पञ्चत्वं -ता, पञ्चकत्वं; 'having five claws,' पञ्चनखः -खा -खं; 'having five fingers,' पञ्चाङ्गुलिः -लिः -लि; 'five times,' पञ्चकृत्वस्; 'having five parts,' पञ्चाङ्गः -ङ्गी -ङ्गं; 'five-hundred,' पञ्चशतं.

Five-fold, *a.* पञ्चगुणः -णा -णं, पञ्चविधः -धा -धं, पञ्चधा.

Five-leaved, *a.* पञ्चपर्णः -र्णी -र्णं, पञ्चपत्रः -त्रा -त्रं, पञ्चदलः -ला -लं.

Fives, *s.* कन्दुकक्रीडा, कन्दुकलीला, गुलिकाक्रीडाविशेषः.

To **fix**, *v. a.* (Establish) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, अवस्था, संस्था, धा (c. 3. दधाति, धातुं), विधा, प्रतिनिधा, रुह् in caus. (रोपयति -यितुं), आरुह्, निरुह्.—(Make firm) स्थिरीकृ, दृढीकृ, सुस्थिरं -रां -रं कृ.—(Fasten) बन्ध् (c. 9. बध्नाति, बन्धुं).—(Determine, ascertain) निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -णयति -णेतुं), उन्नी, निरूप् (c. 10. -रूपयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं).—(Fix the gaze or eye) लक्षं बन्ध्, अनिमिषेण or अनिमेषेण or अनन्यदृष्ट्या or स्तिमितलोचनेन दृश् (c. 1. पश्यति, द्रष्टुं), दृष्टिं निविश् in caus. (-वेशयति -यितुं).—(Fix the mind) मनो निविश् in caus., or युज् (c. 7. युनक्ति योक्तुं c. 10. योजयति -यितुं), अनन्यमनस्कः -स्का -स्कं भू, एकाग्रः -ग्रा -ग्रं भू; 'on any object,' अर्थे धृतिं बन्ध्.

To **fix**, *v. n.* (Be fixed) स्था (c. 1. तिष्ठति स्थातुं), प्रतिधा in pass. (-धीयते), प्रतिनिधा, स्था in caus. pass. (स्थाप्यते), प्रतिष्ठा, बन्ध् in pass. (बध्यते), स्थिरीभू.

Fixed, *p. p.* (Established) स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, संस्थापितः -ता -तं, संस्थितः -ता -तं, स्थितः -ता -तं, अवस्थापितः -ता -तं, अवस्थितः -ता -तं, निहितः -ता -तं, रोपितः -ता -तं, कृतावस्थः -स्था -स्थं, स्थिरीकृतः -ता -तं, विहितः -ता -तं.—(Certain, determined) नियतः -ता -तं, निश्चितः -ता -तं, सुनिश्चितः -ता -तं, निष्पन्नः -न्ना -न्नं.—(Firm) स्थिरः -रा -रं, स्थायी -यिनी -यि (न्), स्थावरः -रा -रं, स्थाणुः -णुः -णु, स्थास्नुः -स्नुः -स्नु, दृढः -ढा -ढं, निश्चलः -ला -लं, अकम्पितः -ता -तं, अस्पन्दः -न्दा -न्दं, नैष्ठिकः -की -कं.—(Attached) लग्नः -ग्ना -ग्नं, अनुलग्नः -ग्ना -ग्नं, आसक्तः -क्ता -क्तं, संसक्तः -क्ता -क्तं.—(Fastened) बद्धः -द्धा -द्धं; 'firmly fixed,' दृढबद्धः -द्धा -द्धं, दृढरोपितः -ता -तं, बद्धमूलः -ला -लं; 'having the eye or look fixed,' बद्धदृष्टिः -ष्टिः -ष्टि, अनिमिषनयनः -ना -नं, स्तिमितलोचनः -ना -नं, स्थिरदृष्टिः -ष्टिः -ष्टि; 'having the mind fixed,' अवस्थितमतिः -तिः -ति, निवेशितमनाः -नाः -नः (स्), आसक्तमनाः &c., आसक्तचित्तः -त्ता -त्तं, अनन्यमनस्कः -स्का -स्कं, अकुण्ठमेधाः -धाः -धः (स्); 'fixed in the mind,' चित्तीकृतः -ता -तं; 'of fixed intent,' बद्धानुशयः -या -यं; 'fixed as to time,' कृतकालः -ला -लं.

Fixedly, *adv.* दृढं, स्थिरं, स्थैर्य्येण, अवस्थितचेतसा, स्थिरदृष्ट्या.

Fixedness, *s.* स्थिरता, स्थैर्य्यं, स्थितिः *f.*, व्यवस्थितिः *f.*, अवस्थितिः *f.*, संस्थितिः *f.*, स्थायित्वं, निष्ठा, धृतिः *f.*, धैर्य्यं, दृढता, दार्ढ्यं, स्थावरत्वं,

स्थायुता, निश्चलत्वं, स्थेमा *m.* (न्), स्थितिमत्त्वं, अकम्पः.

Fixity, *s.* संलग्नत्वं, अनुलग्नता, संसक्तिः *f.*, संश्लेषः, संहतिः *f.*, समासक्तत्वं.

Fixture, *s.* स्थावरं, स्थावरद्रव्यं, स्थितद्रव्यं; 'fixtures,' स्थावराणि.

Flabbiness, *s.* शिथिलता, शैथिल्यं, मृदुता, कोमलत्वं, लालित्यं.

Flabby, *a.* शिथिलः -ला -लं, ललितः -ता -तं, कोमलः -ला -लं, स्निग्धः -ग्धा -ग्धं, मेदुरः -रा -रं, अकठिनः -ना -नं.

Flaccid, *a.* शिथिलः -ला -लं, श्लथः -था -थं, प्रश्लथः -था -थं, म्लानः -ना -नं, आर्द्रः -र्द्रा -र्द्रं, असंहतः -ता -तं, वलिनः -ना -नं, वलिभः -भा -भं, वलिमान् -मती -मत् (त्).

Flaccidity, *s.* शैथिल्यं, शिथिलता, श्लथता, प्रश्लथः, श्रन्थः, म्लानता, आर्द्रता, विस्रंसः, असंहतत्वं, वलिमत्त्वं.

Flag, *s.* (Ensign, banner) पताका, ध्वजः, ध्वजपटः, ध्वजांशुकः, केतनं, केतुः *m.*, केतुवसनः, वैजयन्ती -न्तिका, जयन्तः, कदली -लिका, उच्छलः.—(Stone) शिला, परिस्तरः, प्रस्तरः.—(Plant) गोलोमी, भूतकेशः, श्वेतदूर्वा.

To flag, *v. n.* म्लै (c. 1. म्लायति, म्लातुं), परिम्लै, सद् (c. 1. सीदति, सत्तुं), अवसद्, ग्लै (c. 1. ग्लायति, ग्लातुं), ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, स्रंस् (c. 1. स्रंसते -सितुं), विस्रंस्, क्षि in pass. (क्षीयते), शिथिलीभू, शिथिलबलः -ला -लं भू, शिथिलतेजाः -जाः -जः भू, खिद् (c. 4. खिद्यते, खेत्तुं), खिन्नः -न्ना -न्नं भू.

To flag, *v. a.* (Pave with flag-stones) परिस्तरैर् or प्रस्तरैः or शिलाभिर् आस्तृ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं -रीतुं).

Flag-officer, *s.* नौकासमूहपतिः *m.*, युद्धनौकासमूहाधिपतिः *m.*

Flag-staff, *s.* ध्वजस्तम्भः, केतुयष्टिः *m. f.*, ध्वजः, यष्टिः, पताकायष्टिः.

Flag-stone, *s.* शिला, शिलापट्टः, शिलाफलकं, परिस्तरः, प्रस्तरः.

To flagellate, *v. a.* रज्ज्वा or रज्जुना or चर्म्मदण्डेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

Flagellation, *s.* कशाघातः, कशाताडनं, कशा, चर्म्मदण्डताडनं.

Flageolet, *s.* वंशः, वेणुः *m.*, विवरनालिका, सानेयी -यिका.

Flagged, *p. p.* प्रस्तरास्तीर्णः -र्णा -र्णं, शिलास्तीर्णः -र्णा -र्णं.

Flagging, *part.* म्लानः -ना -नं, स्रंसी -सिनी -सि (न्), खिन्नः -न्ना -न्नं.

Flaggy, *a.* शिथिलः -ला -लं, श्लथः -था -थं, प्रश्लथः -था -थं.

Flagitious, *a.* अतिपापी -पिनी -पि (न्), महापापी &c., अतिपातकी -किनी -कि (न्), महापातकी &c., अतिदुर्वृत्तः -त्ता -त्तं, अतिपापिष्ठः -ष्ठा -ष्ठं, अतिदुष्टः -ष्टा -ष्टं, अतिदोषी -षिणी -षि (न्), दारुणः -णा -णं, घोरः -रा -रं.

Flagitiously, *adv.* समहापापं, अतिपापिष्ठवत्, अतिदुर्वृत्तवत्, दारुणं.

Flagitiousness, *s.* अतिदुष्टता, महापातकं, महापापं, पापिष्ठता, दौरात्म्यं, दुर्वृत्तता, घोरता, दारुणता.

Flagon, *s.* पृथुग्रीवः, सुराभाजनं, पानभाजनं, पानपात्रं.

Flagrancy, *s.* सर्व्वप्रकाशता, सर्व्वप्राकट्यं, वाच्यता, अतिदुष्टता, घोरता.

Flagrant, *a.* प्रकाशः -शा -शं, सर्व्वप्रकाशः -शा -शं, सर्व्वप्रसिद्धः -द्धा -द्धं, लोकविदितः -ता -तं, अतिदुष्टः -ष्टा -ष्टं, घोरः -रा -रं, पुरःस्फुरन् -रन्ती -रत् (त्).

Flagrantly, *adv.* प्रकाशं, सुप्रकाशं, सर्व्वप्रसिद्धं, अतिदुष्टं.

Flagration, *s.* दाहः, दहनं, दाहनं, ज्वलनं, ज्वालः, प्लोषः.

Flail, *s.* धान्यमर्द्दनयष्टिः *m. f.*, शस्यताडनयन्त्रं, कडङ्गरी, शस्यमर्द्दनी, शिथिलदण्डविशेषो यदाघातेन धान्यादि निस्तुषीक्रियते.

Flake, *s.* (Of snow) हिमलवः, हिमकणः, तुषारघनः, नीहारघनः, हिमतूलं, हिमाङ्कुरः, तुषारगडः, तूलोपमो हिमातीलवः.—(Layer) फलकः -कं.—(Scale, loose piece) वल्कं, शल्कं, शकलं.

To flake, *v. n.* शकलीभू, शकलानि बन्ध् (c. 9. बध्नाति, बन्धुं).

Flaky, *a.* सशल्कः -ल्का -ल्कं, शकली -लिनी -लि (न्), फलकी -किनी -कि (न्).

Flam, *s.* अनर्थकं, मृषार्थकं, माया, छलं, प्रतारणा, छद्म *n.* (न्).

Flambeau, *s.* उल्का, उल्मुकं, ज्वलनकाष्ठं, अग्निकाष्ठं, अलातं.

Flame, *s.* शिखा, अग्निशिखा, अर्चिः *f.* (स्), अर्चिः *f.*, ज्वालः -ला, अग्निज्वाला, ज्वलः -लका, ज्वालाग्निः *m.*, अग्निजिह्वा, शिखिशिखा, कीलः -ला, अग्निकीलः, हेतिः *f.*, उल्का, तेजः *n.* (स्); 'in flames,' ज्वलन् -लन्ती -लत् (त्), ज्योतिस्सात्.

To flame, *v. a.* ज्वल् in caus. (ज्वालयति, ज्वलयति -यितुं), प्रज्वल्, सम्प्रज्वल्.

To flame, *v. n.* ज्वल् (c. 1. ज्वलति -लितुं), प्रज्वल्, उज्ज्वल्, सम्प्रज्वल्, ज्वल् in freq. (जाज्वल्यते), दीप् (c. 4. दीप्यते -पितुं), प्रदीप्, आदीप्.

Flame-coloured, *a.* अग्निवर्णः -र्णा -र्णं, वह्निवर्णः -र्णा -र्णं, पीतः -ता -तं.

Flaming, *part.* and *a.* ज्वलन् -लन्ती -लत् (त्), ज्वलयन् -यन्ती -यत् (त्), ज्वलः -ला -लं, ज्वाली -लिनी -लि (न्), ज्वाली &c., ज्वालः -ली -लं, ज्वलितः -ता -तं, उज्ज्वलः -ला -लं, जाज्वल्यमानः -ना -नं, प्रज्वलितः -ता -तं, उज्ज्वलः -ला -लं, प्रदीप्तः -प्ता -प्तं, अर्चिष्मान् -ष्मती -ष्मत् (त्).

Flamingo, *s.* राजहंसः, हंसकः, रक्तपक्षः, अग्निवर्णः पक्षिभेदः.

Flamy, *a.* शिखी -खिनी -खि (न्), शिखावलः -ला -लं, आग्नेयः -यी -यं.

Flank, *s.* पार्श्वः -र्श्वं, पार्श्वभागः, पार्श्वाङ्गं, पक्षः, पक्षभागः, उत्सङ्गः, कुक्षिः *m.*, अङ्कः, क्रोडः, कृक्षः, तटः; 'of a horse,' कक्ष्यं; 'on the flank,' पार्श्वतस्.

To flank, *v. a.* and *n.* (Attack the flank) पार्श्वे or पार्श्वभागम् आक्रम् (c. 1. -क्रामति -क्रमितुं).—(Guard on the flank) पार्श्वतो रक्ष् (c. 1. रक्षति -क्षितुं).—(Border, be posted on the side) पार्श्वतः or निकटे or पार्श्वभागे स्था (c. 1. तिष्ठति स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

Flannel, *s.* कम्बलः, ऊर्णायुः *m.*, सौर्णपटः, और्णं, ऊर्णानिर्म्मितं or मेषलोममयं विरलवस्त्रं, सहस्ररोम *n.* (न्), लाशूकः, कुतपः.

Flap, *s.* (Any thing that hangs loose) लम्बिका, लोला, लोलकः, लम्बमानवस्तु *n.*, प्रलम्बवस्तु, प्रलम्बितं.—(The motion of it) आस्फालः -लनं -लितं.

To flap, *v. a.* (The wings) पक्षौ स्फल् in caus. (स्फालयति -यितुं) or आस्फल् or चल् in caus. (चालयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

To flap, *v. n.* आस्फालितं कृ, आस्फल् (c. 1. -स्फलति -लितुं), कलम्भला (nom. कलम्भलायते).

Flapped, *p. p.* आस्फालितः -ता -तं, चालितः -ता -तं, लोलितः -ता -तं.

Flapping, *s.* (Of wings) आस्फालनं, पक्षास्फालनं, पक्षस्फालनं, पक्षोत्क्षेपः, कलम्भला.—(Of ears) कर्णतालः.

To flare, *v. n.* चञ्चलशिखया or सचञ्चलशिखं or चञ्चलरूपेण ज्वल् (c. 1. ज्वलति -लितुं) or उज्ज्वल् or ज्वल् in freq. (जाज्वल्यते).

Flare, *s.* चञ्चलशिखा, चञ्चलज्वालः, कम्पितज्वाला, स्फुरद्युतिः *f.*

Flaring, *a.* चञ्चलशिखया जाज्वल्यमानः -ना -नं or उज्ज्वलः -ला -लं.

Flash, *s.* ज्वाला, स्फुरितं, स्फुरणं, द्युतिस्फुरणं, प्रभाकम्पः, अकस्मात्स्फुरणं, अकस्माद्दीप्तिः *f.*, क्षणप्रभा, क्षणद्युतिः *f.*, अचिरप्रभा, अचिरद्युतिः *f.*—(Of lightning) विद्युत्स्फुरणं, सौदामिनीस्फुरणं, विद्युत्प्रकाशः, विद्युत्कम्पः, विद्युद्दाम *n.* (न्), मेघज्योतिः *n.* (स्), विद्युज्ज्वाला, इरम्मदः.

To flash, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), विद्युत् (c. 1. -द्योतते -तितुं), अकस्मात् प्रकाश् (c. 1. -काशते -शितुं) or ज्वल् (c. 1. ज्वलति -लितुं) or उज्ज्वल् or प्रज्वल्, विद्युद्वत् कम्प् (c. 1. कम्पते -म्पितुं).

Flashing, *a.* or *part.* स्फुरन् -रन्ती -रत् (त्), स्फुरितः -ता -तं, विद्योत-

मानः -ना -नं, द्योतमानः -ना -नं, कम्प्यमानः -ना -नं, कम्पितप्रभः -भा -भं, क्षणप्रकाशन् -शनी -शत् (त्).

FLASHY, *a.* क्षणमात्रद्योती -तिनी -ति (न्), मिथ्याद्योती &c., मिथ्यातेजस्वः -स्वी -स्वं, मिथ्यातेजोमयः -यी -यं.—(Unsubstantial) असारः -रा -रं, निस्सत्त्वः -त्त्वा -त्त्वं.

FLASK, *s.* कूपी, घुटग्रीवः, काचपात्रं, काचभाजनं; 'of wine,' मद्यभाजनं.

FLASKET, *s.* सत्रभाजनं, अन्नपात्रं, खाद्यद्रव्यभाजनं.

FLAT, *a.* (Even) समः -मा -मं, समानः -ना -नं, समस्थः -स्था -स्थं, सपाटः -टा -टं, समरेखः -खा -खं, निर्भुग्नः -ग्ना -ग्नं, अभुग्नः -ग्ना -ग्नं.—(Not elevated) अनुच्चः -च्चा -च्चं, अनुन्नतः -ता -तं, निम्नः -म्ना -म्नं, नतः -ता -तं.—(Prostrate, lying flat) दण्डवत्पतितः -ता -तं, भूमौ क्षिप्तदेहः -हा -हं, अवनिकृतः -ता -तं.—(Vapid, tasteless) विरसः -सा -सं, नीरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु, असारः -रा -रं, निस्सारः -रा -रं, अलवणः -णा -णं, सारहीनः -ना -नं, लवणहीनः -ना -नं, निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, क्लीवः -वा -वं, निःस्वादुः -दुः -दु, विस्वादः -दा -दं.—(Plain) अवक्रः -क्रा -क्रं; 'flat roof,' पृष्ठं; 'flat surface,' समपृष्ठं, समतलं.

FLAT, *s.* (A plain) समभूमिः *f.*, समस्थलं -ली, समभूभागः, समस्थानं, आजिः *f.*, पाटः, समं.—(Low ground) निम्नभूमिः *f.*—(Shoal) सैकतं.—(Of a sword, &c.) फलकः -कं, पत्रं.—(In music) अनुदात्तः, मन्दः, मन्द्रः, उदात्तेतरः शब्दः.—(Flat-bottomed boat) तरालुः *m.*, तरान्धुः *m.*—(Stupid fellow) मन्दबुद्धिः *m.*, स्थूलधीः *m.*

To FLAT, *v. a.* समीकृ, समानीकृ, समस्थलीकृ, निम्नीकृ.

FLAT-BOTTOMED, *a.* समतलः -ला -लं, समाधोभागः -गा -गं, समाधःस्थानः -ना -नं.

FLAT-NOSED, *a.* नतनासिकः -का -कं, अवनाटः -टा -टं, अवटीटः -टा -टं, अवभ्रटः -टा -टं, खुरणसः -सा -सं or -णाः -णाः -णः (स्).

FLATLY, *adv.* समं, समानतस्.—(Plainly) अवक्रं, सुव्यक्तं.

FLATNESS, *s.* (Evenness) समता, साम्यं, समानता -त्वं, साम्यता, पाटः, निर्भुग्नता, अभुग्नता.—(Want of elevation) अनुच्चता, अनुन्नतिः *f.*, निम्नता, नतत्वं.—(Insipidity, dulness) अरसिकत्वं, आरस्यं, फल्गुता, असारता, निःस्वादुता, अलावण्यं, आलवण्यं, अतेजः *n.* (स्), तेजोहीनता.

To FLATTEN, *v. a.* समीकृ, समानीकृ, समस्थलीकृ, निम्नीकृ, वामनीकृ.—(Depress) अवनम् in caus. (-नामयति -नमयति -यितुं), नम्रीकृ.—(Lay flat) दण्डवत् पत् in caus. (पातयति -यितुं).—(Make vapid) रसं हृ (c. 1. हरति, हर्तुं), फल्गूकृ, विरसीकृ.

To FLATTEN, *v. n.* समीभू, निम्नीभू, अवनतीभू, नम्रीभू, विरसीभू.

FLATTENED, *p. p.* अवनामितः -ता -तं, निम्नीकृतः -ता -तं, नम्रीकृतः -ता -तं.

FLATTENING, *s.* अवनामः, निम्नीकरणं, नम्रीकरणं, समीकरणं.

FLATTER, *s.* अवनामकः, समकरणयन्त्रं, मुद्गरविशेषः.

To FLATTER, *v. a.* (Soothe by praise, &c.) सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), परिशान्त्व्, अभिशान्त्व्, अतिप्रशंसया or स्तुतिवाक्यैः or चाटूक्त्या or मधुरैर्वचोभिः सान्त्व् or प्रलुभ् (c. 10. -लोभयति -यितुं) or सन्तुष् (c. 10. -तोषयति -यितुं) or लल् (c. 10. लालयति -यितुं).—(Speak what is agreeable) प्रियं or प्रियाणि or चाटुवाक्यानि वद् (c. 1. वदति -दितुं).—(Praise falsely) मिथ्या प्रशंस् (c. 1. -शंसति -सितुं) or श्लाघ् (c. 1. श्लाघते -घितुं).—(Gratify) आराध् (c. 10. -राधयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), सभाज् (c. 10. सभाजयति -यितुं).—(Raise false hopes) मिथ्या आशावृद्धिं कृ.

FLATTERED, *p. p.* प्रशंसितः -ता -तं, मिथ्याप्रशस्तः -स्ता -स्तं, लालितः -ता -तं, कृतसान्त्वनः -ना -नं, चाटूक्त्याराधितः -ता -तं, सभाजितः -ता -तं, आश्वासितः -ता -तं.

FLATTERER, *s.* प्रशंसकः, प्रियवादी *m.* (न्), प्रियंवदः, चाटुवादी *m.* सान्त्ववादः, सान्त्वनकारी *m.* (न्), चाटुकारः, लाली *m.* (न्), मिथ्याप्रशंसकः, शंस्ता *m.* (स्तृ), कपटप्रशंसाकृत् *m.*, मिथ्याश्वासकः, आश्वासनशीलः, कापटिकः.

FLATTERING, *a.* परितोषकः -का -कं, सन्तोषणः -णा -णं, सान्त्वनः -ना -नं, स्तुतिमयः -यी -यं, प्रशंसाकरः -री -रं, प्रीतिकरः -रा -रं, आश्वासकः -का -कं.

FLATTERINGLY, *adv.* अतिप्रशंसया, चाटूक्त्या, अतिशयस्तुत्या, सान्त्वनपूर्वं.

FLATTERY, *s.* अतिप्रशंसा -सनं, मिथ्याप्रशंसा -सनं, सान्त्वः -त्वं -त्वनं -ना, सान्त्ववाक्यं, सान्त्वोक्तिः *f.*, सान्त्वकारः, चाटूक्तिः *f.*, चाटुकारः, चाटुः *m.*, -टु *n.*, लालनं, प्रियवाक्यं, मधुरवाक्यं, मधुरवचः *n.* (स्), कोमलवाक्यं, कोमलत्वं, आश्वासनं, आलोकः, आलोकशब्दः, अनुनयः, आराधनं.

FLATTISH, *a.* ईषत्समः -मा -मं, ईषत्समानः -ना -नं, ईषन्निम्नः -म्ना -म्नं.

FLATULENCE, FLATULENCY, *s.* वायुपूर्णता, वायुरोगः, वातफुल्लता, वातफुल्लान्त्रं, वातिकत्वं, कोष्ठाश्रितवायुः *m.*, वायुः *m.*, वातः, वायुगण्डः, अन्त्राध्मानं, उदराध्मानं, आध्मातः, पुप्फुलः -लं.

FLATULENT, *a.* वायुग्रस्तः -स्ता -स्तं, वायुरोगग्रस्तः -स्ता -स्तं, वातफुल्लः -ल्ला -ल्लं, वातफुल्लान्त्रः -न्त्रा -न्त्रं, वातिकः -की -कं, वातबद्धः -द्धा -द्धं, वायुबद्धः -द्धा -द्धं.

FLATUS, *s.* वायुः *m.*, वातः, अन्त्रस्थवायुः, उदरजवातः, उदरजो वातः.

To FLAUNT, *v. n.* सगर्वं or सदम्भं चल् (c. 1. चलति -लितुं), गर्वितगत्या चल् or चर् (c. 1. चरति -रितुं).

FLAUNTING, *a.* सगर्वंचारी -रिणी -रि (न्), गर्वितगतिः -तिः -ति, खेलगामी -मिनी -मि (न्), दर्शनीयमानी -निनी -नि (न्).

FLAVOR, *s.* रसः, आस्वादः, स्वादः, रुचिः *f.*, अभिरुचिः *f.*, लालित्यं, लावण्यं.

To FLAVOR, *v. a.* रसं दा (c. 3. ददाति, दातुं), सरसं -सां -सं कृ, सरसीकृ.

FLAVORED, *p. p.* or *a.* रसितः -ता -तं, सरसः -सा -सं, रसिकः -का -कं; 'well-flavored,' सुरसः -सा -सं, सुस्वास्वादः -दा -दं, सुललितः -ता -तं, सुस्वादुः -द्वी -दु.

FLAVORLESS, *a.* अरसः -सा -सं, अरसिकः -की -कं, विरसः -सा -सं, निरसः -सा -सं, नीरसः -सा -सं, निःस्वादुः -दुः -दु, विस्वादः -दा -दं, अस्वादुः -दुः -दु.

FLAVOROUS, *a.* सुरसः -सा -सं, रसिकः -का -कं, रसवान् -वती -वत् (त्), स्वादुः -द्वी -दु, सुस्वास्वादः -दा -दं, मिष्टः -ष्टा -ष्टं.

FLAW, *s.* (Crack) छिद्रं, रन्ध्रं, भित्तिः *f.*, खण्डः, भेदः, छेदः, भङ्गः, सन्धिः *m.*—(Defect) दोषः, अपराधः, छिद्रं, कलङ्कः.—(In a gem) पुलकः, खण्डः, रक्तबिन्दुः *m.*; 'without a flaw,' निश्छिद्रः -द्रा -द्रं, नीरन्ध्रः -न्ध्रा -न्ध्रं.—(Sudden gust of wind) प्रभञ्जनः, निर्घातः, व्योममुद्गरः.

To FLAW, *v. a.* छिद् (c. 10. छिद्रयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं).

FLAWLESS, *a.* निश्छिद्रः -द्रा -द्रं, नीरन्ध्रः -न्ध्रा -न्ध्रं, निर्दोषः -षा -षं.

FLAWY, *a.* सच्छिद्रः -द्रा -द्रं, सरन्ध्रः -न्ध्रा -न्ध्रं, सदोषः -षा -षं, दर्दरः -रा -रं.

FLAX, *s.* अतसी, उमा, क्षुमा, क्षौमी, शणं, मसीना, मसृणा, सुवर्चला, मालिका.

FLAX-COMB, *s.* अतसीमार्जकः, उमामार्जनी, उमाशोधनी, शणप्रसाधनी.

FLAX-DRESSER, *s.* अतसीशोधकः, उमापरिष्कारकः, शणप्रसाधकः.

FLAXEN, *a.* क्षौमः -मी -मं, क्षौमकः -की -कं, क्षौमः -मी -मं, शाणः -णी -णं.

To FLAY, *v. a.* त्वच (nom. त्वचयति -यितुं), निस्त्वचीकृ, चर्म्म निष्कृष् (c. 1. -कर्षति -क्रष्टुं) or उत्कृष् or निर्हृ (c. 1. -हरति -हर्तुं), निश्चर्म्म (nom. निश्चर्म्मयति -यितुं), त्वक्ष् (c. 1. त्वक्षति -क्षितुं).

FLAYED, *p. p.* निस्त्वचीकृतः -ता -तं, निस्त्वचः -चा -चं, निश्चर्म्मा -र्म्मा -र्म्म (न्).

FLAYER, *s.* चर्म्मनिष्कर्षकः, चर्म्मोत्पाटी *m.* (न्), त्वग्विदारकः.

FLAYING, *s.* निस्त्वचीकरणं, चर्म्मनिष्कर्षणं, निश्चर्म्मीकरणं, त्वक्परिपुटनं.

FLEA, *s.* देहिका, मत्कुणः, मक्षिका, तल्पकीटः, रक्तपायी *m.* (न्).

To FLEA, *v. a.* देहिका or तल्पकीटान् अपनी (c. 1. -नयति -नेतुं) or दूरीकृ.

FLEA-BITE, *s.* देहिकादंशः, मत्कुणदंशनं, देहिकादशनाङ्कः, मक्षिकादंशः.

Flea-bitten, *a.* देहिकादष्टः -ष्टा -ष्टं, देहिकादंशितः -ता -तं, मक्षिकादष्टः -ष्टा -ष्टं.
Fleam, *s.* पशुचिकित्सकादिभिः सिराव्यधे or रक्तमोक्षणे प्रयुक्तं तीक्ष्णायस्त्रं.
Fled, *p. p.* पलायितः -ता -तं, विपलायितः -ता -तं, विद्रुतः -ता -तं.
To fledge, *v. a.* सपक्षं -क्षां -क्षं कृ, पक्षैर् युज् (c. 10. योजयति -यितुं).
Fledged, *p. p.* पक्षयुक्तः -क्ता -क्तं, पक्षवान् -वती -वत् (त्), गरुत्मान् -त्मती -त्मत् (त्मत्).
To flee, *v. n.* पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, विप्रद्रु, प्रद्रु, प्राद्रु; प्रधाव् (c. 1. -धावति -वितुं), अपधाव, निष्पत् (c. 1. -पतति -तितुं), उत्पत्, अपक्रम् (c. 1. -क्रामति -क्रमितुं), निर्गम् (c. 1. -गच्छति -गन्तुं), अपगम्, अपसृप् (c. 1. -सर्पति -सर्प्तुं), व्यपसृप्, भज् (c. 1. भजति -ते, भक्तुं) with दिशः or ककुभः.—(Avoid) वृज् (c. 10. वर्जयति -यितुं), विवृज् परिवृज्, परिहृ (c. 1. -हरति -हर्तुं), त्यज् (c. 1. त्यजति, त्यक्तुं).
Fleece, *s.* मेषलोम *n.* (न्), अविलोम *n.* (न्), मेषरोम *n.* (न्), मेषाङ्गरुहं, यत् मेषलोमपरिमाणम् एकवारे अवच्छिद्यते, मेषस्य छिन्नलोम *n.* (न्).
To fleece, *v. a.* मेषलोम छिद् (c. 7. छिनत्ति, छेत्तुं) or लू (c. 9. लुनाति, लवितुं).—(Strip, plunder) हृ (c. 1. हरति, हर्तुं), अपहृ, प्रबाध् (c. 1. -बाधते -धितुं).
Fleeced, *p. p.* हृतसर्वस्वः -स्वा -स्वं, अपहृतस्वः -स्वा -स्वं, बाधितः -ता -तं.
Fleecy, *a.* लोमशः -शा -शं, रोमशः -शा -शं, बहुलोमा -मा -म (न्), बहुरोमा &c., लोमावृतः -ता -तं, बहुलोमवान् -वती -वत् (त्), मेषलोममयः -यी -यं.
To fleer, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, कु स्मि (c. 1 स्मयते, स्मेतुं), उत्स्मि, विकृतदृष्ट्या स्मि, तिरस्कृ, मुखरीकृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).
Fleer, *s.* अवहासः, अवहेला, अवक्षेपः, कुस्मयः, कुस्मितं, दृष्टिविक्षेपः.
Fleerer, *s.* उपहासकः, अवक्षेपकः, मुखरजनः, कुस्मितः.
Fleet, *s.* वृहन्नौकासमूहः, महानौकासमूहः, वृहन्नौसङ्घः, युद्धनौसमूहः.
Fleet, *a.* शीघ्रगामी -मिनी -मि (न्), द्रुतगामी &c., द्रुतगतिः -तिः -ति, लघुगतिः -तिः -ति, महावेगः -गा -गं, महाजवः -वा -वं, वेगवान् -वती -वत् (त्), जवी -विनी -वि (न्), शीघ्रजवः -वा -वं, प्रतूर्णः -र्णा -र्णं, त्वरितः -ता -तं, त्वरितगतिः -तिः -ति, ससौष्ठवः -वा -वं.—(As the wind) वायुवेगः -गा -गं, वायुवेगसमः -मा -मं, वायुगतिः -तिः -ति, वायव्यः -व्या -व्यं.
To fleet, *v. n.* (Go swiftly) द्रुतगत्या or महावेगेन चल् (c. 1. चलति -लितुं), त्वर् (c. 1. त्वरते -रितुं), शीघ्र (nom. शीघ्रायते), द्रुतं गम् (c. 1. गच्छति, गन्तुं).
To fleet, *v. a.* (Skim over) लघुगत्या अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or विसृप् (c. 1. -सर्पति -सर्प्तुं).—(Skim milk) दुग्धफेनम् अपनी (c. 1. -नयति -नेतुं).
Fleeting, *a.* क्षणमात्रस्थायी -यिनी -यि (न्), अचिरस्थायी &c., अध्रुवः -वा -वं, क्षणभूतः -ता -तं, क्षणभङ्गुरः -रा -रं, क्षणिकः -का -की -कं.
Fleetly, *adv.* शीघ्रं, द्रुतं, त्वरितं, महावेगेन, महाजवेन, द्रुतगत्या, लघुगत्या, लघु, क्षिप्रं, सरभसं, ससौष्ठवं.
Fleetness, *s.* शीघ्रता, द्रुतत्वं, शीघ्रगामित्वं, त्वरितगतिः *f.*, वेगः, प्रजवः, जवः, सत्वरता, तूर्णिः *f.*, आशुगमनं, रभसः.
Flesh, *s.* मांसं, आमिषं, पललं, क्रव्यं, पिशितं usually in plural, तरसं, पलं, अस्रजं, शुक्रं, मेदस्कृत् *n.*, काश्यपं, उत्तप्तं; 'dried flesh,' शुष्कलः -ला -ली -लं, शुष्कमांसं, उत्तप्तं, वल्लूरं; 'game,' जाङ्गलं, जाङ्गलं. —(Body) शरीरं.—(Carnality) शरीरोपसेवा, विषयासक्तिः *f.*, आमिषं.
To flesh, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), निर्दयीकृ, क्रूरकर्माभ्यस्तं -स्तां -स्तं कृ.

Flesh-broth, *s.* मांसजूषं, मांसयूषं, मांसनिष्क्वाथः, मांसक्वाथः, सूपः.
Flesh-brush, *s.* त्वगाघर्षणी, चर्मनिर्घर्षणकः, चर्ममार्जनी.
Flesh-color, *s.* मांसवर्णः, आमिषवर्णः, क्रव्यवर्णः, मांसरागः.
Flesh-colored, *a.* मांसवर्णः -र्णा -र्णं, आमिषवर्णः -र्णा -र्णं, क्रव्यसवर्णः -र्णा -र्णं.
Flesh-diet, *s.* मांसाहारः, मांसभोजनं, आमिषाहारः.
Fleshiness, *s.* मांसलत्वं, मांसलत्वं, पुष्टता, पुष्टाङ्गत्वं, पीनता, पीवरता, मेदस्विता, मेदोवृद्धिः *f.*, शरीरस्थूलता.
Fleshless, *a.* अमांसः -सा -सं, निर्मांसः -सा -सं, विमांसः -सा -सं, विपुष्टः -ष्टा -ष्टं, अपुष्टः -ष्टा -ष्टं, मांसहीनः -ना -नं.
Fleshliness, *s.* शरीरोपसेवा, विषयोपसेवा, विषयासक्तिः *f.*, शारीरिकविषयसङ्गः, कामासक्तिः *f.*
Fleshly, *a.* (Carnal) शारीरिकः -की -कं, शरीरजः -जा -जं, दैहिकः -की -कं, कायिकः -की -कं, वापुषिकः -की -कं, विषयी -यिणी -यि (न्), ऐहिकः -की -कं, सांसारिकः -की -कं.
Flesh-meat, *s.* मांसाहारः, मांसभोजनं, खाद्यमांसं, भोजनार्थम् आमिषं.
Fleshmonger, *s.* मांसविक्रयी *m.* (न्), सौनिकः.—(Pimp) विटः.
Fleshy, *a.* मांसलः -ला -लं, मांसशीलः -ला -लं, पुष्टः -ष्टा -ष्टं, पुष्टाङ्गः -ङ्गी -ङ्गं, क्रव्यमयः -यी -यं, पीनः -ना -नं, पीवरः -रा -रं, मेदस्वी -स्विनी स्वि (न्).
Flexibility, *s.* आनम्यता, नम्यता, नमनीयत्वं, कुञ्चनीयता, अवकुञ्चनीयत्वं, आयम्यत्वं, मृदुता, कोमलता, शैथिल्यं.
Flexible, *a.* आनम्यः -म्या -म्यं, नम्यः -म्या -म्यं, नमनीयः -या -यं, कुञ्चनीयः -या -यं, अवकुञ्चनीयः -या -यं, आयम्यः -म्या -म्यं, नमनशीलः -ला -लं, कुञ्चनशीलः -ला -लं, मृदुः -दुः -द्वी -दु, कोमलः -ला -लं, शिथिलः -ला -लं, अदृढः -ढा -ढं.
Flexion, *s.* नतिः *f.*, नमनं, आनतिः *f.*, आनमनं, कुञ्चनं, अवकुञ्चनं, भङ्गः -ङ्गी.
Flexuous, *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, भङ्गुरः -रा -रं, कुटिलः -ला -लं, जिह्मः -ह्मा -ह्मं, विसर्पी -र्पिणी -र्पि (न्).
Flexure, *s.* नतिः *f.*, आनतिः *f.*, वक्रता, वक्रिमा *m.* (न्), कुञ्चनं, अवकुञ्चनं, जिह्मता, भङ्गः -ङ्गी, पुटः.
To flicker, *v. n.* (With the wings) विहायसा or व्योममध्ये पक्षास्फालनं कृ.—(As a flame, &c.) इतस्ततश् चल् (c. 1. चलति -लितुं), चञ्चलीभू, चपलीभू, चञ्चलरूपेण ज्वल् (c. 1. ज्वलति -लितुं).
Flickering, *a.* (With the wings) व्योममध्ये पक्षास्फालनकारी -रिणी -रि (न्).—(Unsteady) चञ्चलः -ला -लं, विचलः -ला -लं, चलः -ला -लं, चपलः -ला -लं.
Flier, *s.* पलायी *m.* (न्), विपलायी *m.*, प्रपलायी *m.*, पलायनकृत् *m.*
Flight, *s.* (Act of fleeing, running away) पलायनं, विपलायनं, प्रपलायनं, द्रावः, द्रवः, विद्रवः, प्रद्रावः, उद्द्रावः, सन्द्रावः, सन्दावः, अपक्रमः, अपयानं, अपायः, अपगमः, डमरं, शृगाली -लिका; 'to put to flight,' विद्रु in caus. (-द्रावयति -यितुं), द्रु; 'put to flight,' भयद्रुतः -ता -तं, विद्रुतः -ता -तं, कान्दिशीकः -का -कं, प्रपलायितः -ता -तं, पलायितः -ता -तं.—(Flying of a bird) डीनं, डयनं, प्रडीनं, निडीनं; 'upward flight of a bird,' उड्डीनं, उड्डयनं, प्रडीनं; 'downward flight,' अवडीनं; 'indirect flight,' विडीनं; 'direct flight,' अविडीनं.—(Number of birds flying) पक्षिमाला, पक्षिश्रेणी, डीयमानपक्षिगणः; 'of geese,' हंसमाला; 'of pigeons,' कापोतं; 'of parrots,' शौकं.—(Flight of an arrow) शरवेगः, शरपातः.—(Elevation or excursion of thought) बुद्धिसमुन्नतिः *f.*, बुद्धिविलासः.—(Flight of stairs) सोपानपद्धतिः *f.*, सोपानश्रेणिः *f.* निःश्रेणी -णिः *f.*

FLIGHTINESS, *s.* बुद्धिभ्रान्तिः *f.*, बुद्धिविभ्रमः, बुद्धिविलासः, मतिचापल्यं, उच्छृङ्खलता.

FLIGHTY, *a.* भ्रान्तबुद्धिः -द्धिः -द्धि, विभ्रान्तमनाः -नाः -नः (स्), चपलमतिः -तिः -ति, उच्छृङ्खलबुद्धिः -द्धिः -द्धि, अस्थिरबुद्धिः -द्धिः -द्धि, पारिप्लवः -वा -वं.

FLIMSINESS, *s.* असारता, निःसारता, निर्बलता, तेजोहीनता, तुच्छत्वं, शैथिल्यं.

FLIMSY, *a.* असारः -रा -रं, निःसारः -रा -रं, सारहीनः -ना -नं, निस्तेजाः -जाः -जः (स्), अवास्तवः -वी -वं -विकः -की -कं, निर्बलः -ला -लं, तुच्छः -च्छा -च्छं, तनुः -नुः -न्वी -नु, शिथिलः -ला -लं.

To FLINCH, *v. n.* निवृत् (c. 1. -वर्त्तते -र्त्तितुं), परिवृत्, परावृत् with abl. c., उद्विज् (c. 6. -विजते -जितुं) with abl. c., विकम्प् (c. 1. -कम्पते -म्पितुं), अवस्था (c. 1. -तिष्ठते -स्थातुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), पराङ्मुखीभू, विमुखीभू, त्यज् (c. 1. त्यजति, त्यक्तुं).

FLINCHER, *s.* परिवर्त्तकः, परिवर्त्ती *m.* (न्), कर्म्मनिवृत्तः, कर्म्मत्यागी *m.* (न्), पराङ्मुखः, विकम्पितः -म्पकः.

FLINCHING, *s.* विकम्पः -म्पनं, विकम्पितं, निवृत्तिः *f.*, निवर्त्तनं, पराङ्मुखता.

To FLING, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति असितुं), प्रास्, अभ्यस्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), ईर् (c. 10. ईरयति -यितुं), पत् in caus. (पातयति -यितुं). —(Fling away) अपास्, अवमुच्, प्रमुच्, अवसृज्, विसृज्, व्यपसृज्, प्रतिक्षिप्, अपहा (c. 3. -जहाति -हातुं).

To FLING, *v. n.* क्रोधसंरम्भात् पादादिक्षेपं कृ or खुरक्षेपं कृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

FLING, *s.* क्षेपः -पणं, प्रक्षेपः, निःक्षेपः, असनं, पातः -तनं.—(Gibe) क्षेपः, अवक्षेपः.

FLINT, *s.* अग्निप्रस्तरः, अरणिः *m.*, वह्निप्रस्तरः, आग्नेयप्रस्तरः.

FLINTY, *a.* अग्निप्रस्तरमयः -यी -यं.—(Cruel, hard-hearted) पाषाणहृदयः -या -यं, अयोहृदयः -या -यं, कठिनहृदयः -या -यं.

FLIP, *s.* (A beverage) मद्ययवसुरादिनिर्म्मितं पानीयं.—(Stroke) आघातः, आस्फालनं.

FLIPPANCY, *s.* (Of speech) वाक्चापल्यं, वावदूकता.—(Pertness) चापल्यं, चपलत्वं, चाञ्चल्यं, अस्थिरता, लोलता, लौल्यं, अनवस्थितिः *f.*, प्रगल्भता.

FLIPPANT, *a.* (In speech) वाक्चपलः -ला -लं, वाक्चञ्चलः -ला -लं, वाचालः -ला -लं.—(Pertness) चपलः -ला -लं, चञ्चलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, अनवस्थितः -ता -तं, प्रगल्भः -ल्भा -ल्भं.

FLIPPANTLY, *adv.* चपलं, चापल्यात्, लौल्यात्, चञ्चलं, अस्थैर्य्यात्.

To FLIRT, *v. a.* (Toss suddenly) अकस्मात् or सहसा क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

To FLIRT, *v. n.* (Jeer) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्.—(Act with giddiness) चपलः -ला -लं भू, चञ्चलः -ला -लं भू.—(Coquet) विलस् (c. 1. -लसति -सितुं), लल् (c. 1. ललति -लितुं), खेला (nom. खेलायति -यितुं), विलासं कृ, हावं कृ, प्रेमललितं कृ, प्रेमखेलां कृ.

FLIRT, *s.* (Quick throw) अकस्मात्क्षेपः, आकस्मिकक्षेपः.—(Coquette) रसिका स्त्री, प्रगल्भा स्त्री, धृष्टा स्त्री, चपला स्त्री, विलासिनी, लालिनी, लीलावती, प्रेमखेलाकारिणी.

FLIRTATION, *s.* (Playing at courtship) प्रेमखेला, प्रेमललितं, लीला, खेला, विलासः, हावः, लालसा, रमस्यं.

To FLIT, *v. n.* (Fly away, move rapidly) प्रडी (c. 4. -डीयते, c. 1. -डयते -यितुं), द्रुतगत्या or लघुगत्या or लघु चल् (c. 1. चलति -लितुं) or सृप् (c. 1. सर्पति, सर्प्तुं).—(Rove on the wing, flutter) वियति or आकाशे विसृप्, व्योममध्ये पक्षास्फालनं कृ.—(Be unstable) अस्थिरः -रा -रं भू, चञ्चलीभू, चपलीभू.—(Migrate, move about) उत्क्रम् (c. 1. -क्रामति -क्रमितुं), देशान्तरं गम् (c. 1. गच्छति, गन्तुं), स्थानात् स्थानं गम्, इतस्ततो भ्रम् (c. 4. भ्राम्यति, भ्रमितुं).

FLITCH, *s.* लवणीकृतं शूकरपार्श्वमांसं, शूकरस्य शुष्कमांसं, वल्लूरं.

FLITTER, *s.* वस्त्रखण्डः -ण्डं, चीरं, कर्पटः, लक्तकं, कन्था.

FLITTER-MOUSE, *s.* जतुका -तूका, अजिनपत्रा, चर्म्मचटका, चर्म्मचटी.

FLITTING, *s.* लघुचलनं, विसर्पणं, सर्पणं, अस्थैर्य्यं, भ्रमणं.

To FLOAT, *v. n.* (Be borne on the surface, not to sink) प्लु (c. 1. प्लवते, प्लोतुं), भास् (c. 1. भासते -सितुं), उन्मज्ज् (c. 6. -मज्जति -मंक्तुं), उत्पत् (c. 1. -पतति -तितुं).—(Swim) तॄ (c. 1. तरति -रितुं -रीतुं), जले विसृ (c. 1. -सरति -सर्त्तुं).

To FLOAT, *v. a.* प्लु in caus. (प्लावयति -यितुं), वह् in caus. (वाहयति -यितुं).

FLOAT, *s.* (Raft) प्लवः, प्लवाका, तरणः -णी, तरण्डः, तरत् *n.*, तरिः *m.*, तारणः, वहित्रं, कोलः, उडुपः -पं, वारिरथः.—(Of a fishing-line) तरण्डः.

FLOATING, *part.* or *a.* प्लवमानः -ना -नं, भासमानः -ना -नं.

FLOCCULENT, *a.* घनीभूतः -ता -तं, श्यानः -ना -नं.—(Seeds) ग्रीष्महासं, वंशकर्पं.

FLOCK, *s.* (Collection of animals) यूथं, गणः, समूहः, सङ्घः, सङ्घातः, व्रजः, कुलं, वृन्दं, संहतिः *f.*, ओघः, कदम्बकं, निवहः, समुदायः, समुदयः, समाहारः, पाशवं, निकरः, समवायः, सञ्चयः, चयः, निकुरम्बं -म्बकं, वारः, विसरः, व्रातः, सन्दोहः, समजः, सार्थः, निकायः.—(Flock of sheep) मेषयूथं, अविगणः, अविकुलं, अविकटः, आविकं, औरभ्रकं; 'of goats,' आजकं; 'of goats and sheep,' अजाविकं; 'of cattle,' पशुगणः, गोकुलं, गोवृन्दं; 'of pigeons,' कापोतं; 'of parrots,' शौकं; 'of peacocks,' मायूरं; 'of geese,' हंसमाला, हंसश्रेणी; 'of partridges,' तैत्तिरं; 'in flocks,' यूथशस्. —(Flock of cotton) तूलं -लिका, इन्द्रतूलं; 'flock-mattress,' तूलिका.

To FLOCK (together), *v. n.* एकत्र मिल् (c. 6. मिलति, मेलितुं), यूथशः or पशुयूथवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or समागम् or समे (c. 2. समैति -तुं, rt. इ), संसृ (c. 1. -सरति -सर्त्तुं), एकीभू, एकत्रभू, एकौघीभू, समूहीभू, सङ्कुलीभू.

To FLOG, *v. a.* चर्म्मदण्डेन or कशया or वेत्रेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं) or दण्ड् (c. 10. दण्डयति -यितुं).

FLOGGED, *p. p.* कशाताडितः -ता -तं, कशादण्डितः -ता -तं, वेत्राहतः -ता -तं.

FLOGGING, *s.* कशाताडनं, कशाघातः, कशा, रज्जुताडनं, वेत्राघातः, चर्म्मदण्डप्रहारः, 'deserving it,' कश्यः -श्या -श्यं, कशार्हः -र्हा -र्हं.

FLOOD, *s.* (Deluge, inundation) जलाप्लावनं, जलप्लावनं, आप्लावः, जलप्रलयः, जलवेगः, तोयविप्लवः, सलिलोपप्लवः, जलोच्छ्वासः, जलौघः, आप्लाविजलं, परीवाहः, विदारः, वन्या.—(Universal flood) भूतसम्प्लवः, एकार्णवं.—(Stream) स्रोतः *n.* (स्), प्रवाहः.—(Tide) वेला, रयः.—(Overflow of a river) वानं.—(Flood of tears) अश्रुप्रवाहः, अश्रुपातः, अश्रुवर्षः, वाष्पवर्षः, धाराश्रु *n.*, अश्रुकलाघुः *m.*

To FLOOD, *v. a.* प्लु in caus. (प्लावयति -यितुं), आप्लु, सम्प्लु; 'is flooded,' प्लाव्यते.

FLOODED, *p. p.* प्लावितः -ता -तं, आप्लावितः -ता -तं, परिप्लुतः -ता -तं अभिप्लुतः -ता -तं, सम्प्लुतोदकः -का -कं, अभिपरिप्लुतः -ता -तं.

FLOOD-GATE, *s.* जलद्वारं, जलपथः, जलवर्त्म *n.* (न्), जलनिर्गमः, जलनिःसरणं.

FLOOK, *s.* लङ्गरदन्तः, लङ्गरभुजः, लङ्गराकर्षणी, नौबन्धनयन्त्रकीलः.

FLOOR, *s.* (Bottom of a building, part on which one walks) तलं, गृहतलं, हर्म्यतलं, गृहभूमिः *f.*, गृहभूः *f.*, वेश्मभूः *f.*, कुट्टिमं, तलिमं, सुतलः, गृहपोटः, गृहपोतकः, पोतः, वास्तुः *m.*, प्रतिष्ठानं, गृहमूलं, भूमिः *f.*, भूतलं, पृष्ठं.—(Story of a house) भूमिः, कोष्ठः -ष्ठं, मञ्चः; 'second floor,' द्वितीयभूमिः *f.*, द्वितीयकोष्ठं; 'upper floor,' उपरिभूमिः *f.*

—(Platform of boards) फलकः -कं, फलकास्तरः -रणं, दीर्घकाष्ठास्तरः -रणं, फलकस्तरिमा *m.* (न्), फलकसंस्तरः, मञ्चः -ञ्चकः.

To FLOOR, *v. a.* फलकैः or दीर्घकाष्ठैः or काष्ठफलकैर् आस्तॄ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), फलक (nom. फलकयति -यितुं), सफलकीकृ.—(Strike down) भूमौ पत् in caus. (पातयति -यितुं).

FLOORING, *s.* फलकास्तरणं, फलकस्तरः, फलकस्तरिमा *m.* (न्), परिस्तरः.

To FLOP, *v. a.* आस्फोटनशब्देन तड् (c. 10. ताडयति -यितुं), आस्फल् (c. 10. -स्फालयति -यितुं).

FLORA, *s.* (The goddess) सीता, पुष्पदेवता.—(Catalogue of plants) ओषधिपरिसंख्या.

FLORAL, *a.* पौष्पः -ष्पी -ष्पं -ष्पिकः -की -कं, कौसुमः -मी -मं, सौमनसः -सी -सं.

FLORID, *a.* (In colour or complexion) रक्तवर्णः -र्णा -र्णं, अरुणवर्णः -र्णा -र्णं, पुष्पवर्णः -र्णा -र्णं.—(As style) पुष्पितः -ता -तं, अलङ्कृतः -ता -तं, वागलङ्कारमयः -यी -यं, व्यञ्जनामयः -यी -यं, शोभितः -ता -तं.

FLORIDITY, FLORIDNESS, *s.* (Of complexion) कपोलरागः, वदनरक्तता, मुखारुणिमा *m.* (न्).—(Of style) अलङ्कारः, सालङ्कारत्वं, वागलङ्कारः, वागलङ्क्रिया, वाक्शोभा.

FLORIFEROUS, *a.* पुष्पोत्पादकः -का -कं, पुष्पजनकः -का -कं, पुष्पदः -दा -दं.

FLORILEGIUM, *s.* पुष्पचयः, पुष्पावचयः, पुष्पप्रचायः, कुसुमावचयः.

FLORIN, *s.* विदेशीयमुद्राविशेषः, रूप्यमुद्राविशेषः.

FLORIST, *s.* पुष्पादिविद्याज्ञः, पुष्पलावः, ओषधिविद्याज्ञः, मालाकारः, मालिकः, माली *m.* (न्).

FLOTA, *s.* वृहन्नौकासमूहः, महावाणिज्यनौकासमूहः.

FLOTILLA, *s.* क्षुद्रनौकासमूहः, क्षुद्रनौकासङ्घः.

To FLOUNCE, *v. n.* सम्भ्रमोपहतत्वात् or संरम्भाविष्टत्वात् शरीराङ्गानि or शरीरम् इतस्ततः क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or विक्षिप् or चल् in caus. (चालयति -यितुं) or विचल्.

FLOUNCE, *s.* (Sudden jerk of the body) अकस्माद् अङ्गविक्षेपः or शरीरविक्षेपः.—(A piece of cloth sewed round a gown with the lower border loose) स्त्रीवेशपरितः स्यूतः शिथिलाधोभागो वस्त्रखण्डः, स्त्रीवेशोपरि शोभार्थम् अधिकवस्त्रविन्यासः.

FLOUNCED, *p. p.* अधिकवस्त्रपंक्तिशोभितः -ता -तं, वेशोपरिस्थपटपंक्तिशोभितः -ता -तं.

FLOUNDER, *s.* समुद्रजः क्षुद्रमत्स्यभेदः.

To FLOUNDER, *v. n.* यथा वाजी पङ्के तथा पादादिविक्षेपेण लुठ् (c. 6. लुठति -ठितुं), पङ्कपतितवत् निर्गमेच्छया शरीराङ्गानि इतस्ततः क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विप्लु (c. 1. -प्लवते -प्लोतुं).

FLOUR, *s.* शक्तुः *m.*, गोधूमचूर्णं, गोधूमक्षोदः, चूर्णं, क्षोदः, अपूप्यः, पिष्टं, गुण्डिकः -का, समीदः, समिता.

To FLOURISH, *v. n.* (Thrive) ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं), समृध्, एध् (c. 1. एधते -धितुं), समेध्, वृध् (c. 1. वर्धते -र्धितुं). विवृध्, संवृध्, समृद्धीभू.—(Use lofty language) गर्वितवाक्यम् आश्रि (c. 1. -श्रयति -यितुं).

To FLOURISH, *v. a.* (Embellish with flowers, &c.) पुष्पाद्यलङ्कारेण शुभ् (c. 10. शोभयति -यितुं) or रञ्ज् (c. 10. रञ्जयति -यितुं), अलङ्कृ, समलङ्कृ, चित्र् (c. 10 चित्रयति -यितुं).—(Brandish) भ्रम् in caus. (भ्रमयति, भ्रामयति -यितुं), उद्भ्रम्.

FLOURISH, *s.* (Show, embellishment) शोभा, अलङ्कारः, अलङ्क्रिया, रञ्जनं.—(Lofty language) गर्वितवाक्यं, दर्पवाक्यं.—(Brandishing) भ्रान्तिः *f.*, उद्भ्रमः, उद्भ्रान्तिः *f.*

FLOURISHED, *p. p.* (Embellished) अलङ्कृतः -ता -तं.—(Brandished) उद्भ्रान्तः -न्ता -न्तं.

FLOURISHING, *a.* समृद्धः -द्धा -द्धं, वर्धमानः -ना -नं, वर्द्धिष्णुः -ष्णुः -ष्णु, अधिकर्द्धिः -र्द्धिः -र्द्धि, उदयी -यिनी -यि (न्), शुभान्वितः -ता -तं, सुस्थः -स्था -स्थं.

To FLOUT, *v. a.* अवहस् (c. 1. -हसति -सितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), गर्ह् (c. 1. गर्हते -र्हितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

FLOUTED, *p. p.* अवज्ञातः -ता -तं, मुखरीकृतः -ता -तं, गर्हितः -ता -तं.

To FLOW, *v. n.* (Run as water) स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु, परिस्रु, स्यन्द् (c. 1. स्यन्दते -न्दितुं), प्रस्यन्द्, सृ (c. 1. सरति, सर्त्तुं), प्रसृ, संसृ, क्षर् (c. 1. क्षरति -रितुं), री (c. 4. रीयते, रेतुं), गल् (c. 1. गलति -लितुं), जलं प्रवह् (c. 1. -वहति -वोढुं), पयस् (nom. पयस्यति).—(Glide along) प्रसृप् (c. 1. -सर्पति -सर्प्तुं), विसृप्, संसृप्, सृप्, विसृ, प्रसृ.—(As the tide) वेलावत् प्रस्रु, वेला (nom. वेलायते).—(Proceed) प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रसृ, प्रगम् (c. 1. -गच्छति -गन्तुं), प्रया (c. 2. -याति -तुं), प्रचल् (c. 1. -चलति -लितुं).—(Arise from) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), प्रभू, प्रवृत्.—(Hang loose, as hair, &c.) विगलितः -ता -तं भू, प्रविततः -ता -तं भू, प्रश्लथः -था -थं भू, विस्रंस् (c. 1. -स्रंसते -सितुं), शिथिलीभू.

FLOW, *s.* (Stream, course) स्रवः -वणं, प्रवाहः, स्रोतः *n.* (स्), प्रस्रवः, प्रस्रवणं, प्रस्रावः, स्रावः, संसृतिः *f.*, प्रवृत्तिः *f.*, जलवाहनं, स्यन्दः -न्दनं, निस्यन्दः, अभिष्यन्दः, गलनं, गालः, क्षरणं, उदकप्रवाहः.—(Current) वेला, वेगः, रयः, धारः -रा, ओघः, पात्रसंस्कारः, अम्बुपद्धतिः *f.*, पात्रकङ्कारः, रायभाटी, ऊर्म्मी.—(Tide) वेला, समुद्रवेला, समुद्ररयः.—(Flow of words) वाक्सरणिः *f.*, वाक्चापल्यं; 'flow of tears,' अश्रुपातः, अश्रुप्रवाहः, धाराश्रु *n.*; 'flow of blood,' असृक्पातः, असृग्धारा.

FLOWER, *s.* पुष्पं, कुसुमं, सुमनाः *m.* -नः *n.* -नसः *f. pl.* (स्), फुल्लं, प्रसवः, प्रसूनं, प्रसूतं, सूनं; 'flower-gathering,' पुष्पचयः, पुष्पावचयः, पुष्पप्रचयः, पुष्पप्रचायः, कुसुमावचयः; 'flower-gatherer,' पुष्पचायी *m.* (न्), पुष्पावचायी *m.* (न्), पुष्पलावः; 'flower-seller,' पुष्पाजीवी *m.* (न्), मालाकारः, मालिकः.—(Prime, best part) सारः, उत्तमभागः, श्रेष्ठभागः; 'flower of age,' यौवनावस्था; 'flower of youth,' यौवनप्रौढिः *f.*, नवयौवनं, अक्षतयौवनं; 'of corn,' धान्यस्य श्लाघ्यभागः; 'in the flower of youth,' प्रौढयौवनः -ना -नं.—(Catamenia) पुष्पं, कुसुमं.

To FLOWER, *v. n.* (Blossom) पुष्प् (c. 4. पुष्प्यति, पुष्पितुं), कुसुम (nom. कुसुमयति -यितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), स्फुट् (c. 6. स्फुटति -टितुं, c. 1. स्फोटते -टितुं), विकस् (c. 1. -कसति -सितुं).—(Be in the prime) प्रौढयौवनः -ना -नं भू.—(Froth) फेन (nom. फेनायते) मण्ड (nom. मण्डायते).

To FLOWER, *v. a.* पुष्पाद्यलङ्कारेण शुभ् (c. 10. शोभयति -यितुं).

FLOWER-ARMED, *a.* (The Hindu Cupid) कुसुमायुधः, कुसुमेषुः *m.*, पुष्पास्त्रः, पुष्पचापः.

FLOWER-DE-LUCE or FLOWER-DE-LIS, *s.* उत्पलभेदः, पद्मविशेषः.

FLOWERED, *p. p.* or *a.* पुष्पितः -ता -तं, कुसुमितः -ता -तं, विकसितः -ता -तं, फुल्लः -ल्ला -ल्लं.—(Embellished with flowers) पुष्पाद्यलङ्कारशोभितः -ता -तं.

FLOWERET, *s.* पुष्पकः -कं, क्षुद्रपुष्पं, क्षुद्रकुसुमं.

FLOWER-GARDEN, *s.* पुष्पोद्यानं, कुसुमोद्यानं, पुष्पवाटी -टिका, उद्यानं, कुसुमाकरः.

FLOWERING, *a.* फुल्लवान् -वती -वत् (त्), प्रफुल्लः -ल्ला -ल्लं, पुष्पी -ष्पिणी -ष्पि (न्), पुष्पवान् -वती -वत् (त्), पुष्पितः -ता -तं, कुसुमितः -ता -तं, कुसुमवान् -वती -वत् (त्), स्फुटितपुष्पः -ष्पा -ष्पं, विकासी -सिनी -सि

(न्), पुष्पदः -दा -दं.

FLOWERLESS, *a.* अपुष्पः -ष्पा -ष्पं, अपुष्पकः -का -कं, अपुष्पदः -दा -दं.

FLOWER-STALK, *s.* मञ्जरी, पुष्पवृन्तं, प्रसवबन्धनं.

FLOWERY, *a.* (Having flowers) पौष्पः -ष्पी -ष्पं, पुष्पी -ष्पिणी -ष्पि (न्), सपुष्पः -ष्पा -ष्पं, पुष्पितः -ता -तं, पुष्पशाली -लिनी -लि (न्), पुष्पमयः -यी -यं, कौसुमः -मी -मं, सौमनसः -सी -सं, सकुसुमः -मा -मं. —(As style) पुष्पितः -ता -तं, अलङ्कृतः -ता -तं, वागलङ्कारमयः -यी -यं, व्यञ्जनामयः -यी -यं.

FLOWING, *part.* or *a.* सुतः -ता -तं, स्रवन् -वन्ती -वत् (त्), प्रसुतः -ता -तं, स्यन्नः -न्ना -न्नं, स्यन्दी -न्दिनी -न्दि (न्), विसारी -रिणी -रि (न्), प्रसारी &c., विसृत्वरः -रा -रं, विसृमरः -रा -रं, रीणः -णा -णं, स्रुतः -ता -तं.

FLOWING, *s.* स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, स्रावः, उदकप्रवाहः, वेला.

FLOWINGLY, *adv.* वाक्सरणिपूर्व्वं, वाक्चापल्येन, द्रुतं, द्रुतवाक्येन, अस्खलितवाक्येन, अविलम्बितं, अविलम्बितवाक्येन.

FLUCTUANT, *a.* ऊर्म्मिवद् इतस्ततो लोलमानः -ना -नं or विचलः -ला -लं.

To FLUCTUATE, *v. n.* (Roll or move to and fro) इतस्ततो लुट् (c. 6. लुठति -ठितुं) or लुल् (c. 1. लोलति -ते -लितुं) or चल् (c. 1. चलति -लितुं) or विचल्. —(Be unsteady, irresolute) दोल (nom. दोलायते -यितुं), विचल्, विचलीभू, अस्थिरः -रा -रं भू, अस्थिरीभू, अनवस्थितः -ता -तं भू, चञ्चलीभू, पातोत्पातं कृ, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं).

FLUCTUATING, *a.* दोलायमानः -ना -नं, विचलः -ला -लं, अप्रतिष्ठः -ष्ठा -ष्ठं, अनवस्थितः -ता -तं, अस्थिरः -रा -रं, चलः -ला -लं, चञ्चलः -ला -लं, लोलः -ला -लं, लोलमानः -ना -नं, चपलः -ला -लं, तरलायितः -ता -तं.

FLUCTUATION, *s.* अस्थैर्य्यं, अस्थिरता, अनवस्थितिः *f.*, विचलनं, चञ्चलता, चाञ्चल्यं, चलता, आन्दोलनं, दोलायमानता, अप्रतिष्ठा, चपलता, पातोत्पातः.

FLUE, *s.* (Passage for smoke) धूमपथः, धूममार्गः, धूमवर्त्म *n.* (न्), धूमनिर्गमपथः. —(Soft down) मृदुलोम *n.* (न्), मृदुपक्षः.

FLUENCY, *s.* (Of speech) वाक्सरणिः *f.*, वाग्द्रुतता, वाक्चापल्यं, वाक्क्षिप्रता, वाग्विभवः, वाक्पटुता, वाक्चातुर्य्यं, शब्दचातुर्य्यं, वाक्कौशलं, वाक्शीघ्रता, वाग्बाहुल्यं.

FLUENT, *a.* (In speech) वाग्द्रुतः -ता -तं, द्रुतवाक् *m. f. n.* (च्), वाक्क्षिप्रः -प्रा -प्रं, वाक्त्वरितः -ता -तं, त्वरितवाक् *m. f. n.*, वाक्पटुः -टुः -टु, अस्खलितवाक्यः -क्या -क्यं, अस्खलद्वाक्यः -क्या -क्यं, अविलम्बितवाक्यः -क्या -क्यं, शब्दचतुरः -रा -रं.

FLUENTLY, *adv.* द्रुतवाक्येन, क्षिप्रवाक्येन, वाक्चापल्येन, अविलम्बितवाचा, अस्खलितवाचा, त्वरितवाचा, वाग्विभवेन, द्रुतं, शीघ्रं, अस्खलितं, अविलम्बितं.

FLUID, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, विद्रुतः -ता -तं, द्राव्यः -व्या -व्यं, विलीनः -ना -नं, तरलः -ला -लं, पयस्यः -स्या -स्यं, विभाजनीयः -या -यं.

FLUID, *s.* द्रवः, रसः, द्रवद्रव्यं, द्रववस्तु *n.*, जलवद्द्रव्यं, वारि *n.*, जलं, पयः *n.* (स्).

FLUIDITY, *s.* द्रवता -त्वं, द्राव्यत्वं, द्रुतत्वं, विद्रुतत्वं, विलीनता, तारल्यं.

FLUKE, *s.* लङ्गरदन्तः, लङ्गरभुजः. *See* FLOOK.

FLUMMERY, *s.* मिथ्याप्रशंसा, मिथ्यास्तुतिः *f.*, कल्पितप्रशंसा, अनर्थकस्तुतिः *f.*

FLUNG, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं; 'flung aside,' अपास्तः -स्ता -स्तं, अपसारितः -ता -तं, समाक्षिप्तः -प्ता -प्तं.

FLUNKEY, *s.* दासः, नीचकर्म्मकरः, तुच्छकर्म्मकरः, कापुरुषः, लटकः.

FLURRIED, *p. p.* आकुलितः -ता -तं, आकुलीकृतः -ता -तं, व्याकुलः -ला -लं -लितः -ता -तं, सम्भ्रान्तः -न्ता -न्तं, ससम्भ्रमः -मा -मं, विभ्रान्तमनाः -नाः -नः (स्), विक्षिप्तचित्तः -त्ता -त्तं, व्यग्रः -ग्रा -ग्रं, समाकुलः -ला -लं, चित्तवेगवान् -वती -वत् (त्), त्रस्तः -स्ता -स्तं, कातरः -रा -रं.

FLURRY, *s.* आकुलत्वं, व्याकुलता, सम्भ्रमः, विभ्रमः, चित्तभ्रान्तिः *f.*, चित्तवेगः, व्यग्रता, आवेगः, संवेगः, त्रस्तता, कातरता, वैक्लव्यं, विस्मयः, मोहः.

To FLURRY, *v. a.* आकुलीकृ, व्याकुलीकृ, व्याकुल (nom. व्याकुलयति -यितुं), कातरीकृ, मुह् (c. 10. मोहयति -यितुं), विमुह्, चित्तवेगं जन् (c. 10. जनयति -यितुं).

To FLUSH, *v. n.* (Become suddenly red) अकस्माद् रक्तोद्गमत्वाद् अरुणमुखीभू or लोहिताननः -ना -नं भू or रक्तवदनः -ना -नं भू, अरुणीभू, रक्तीभू, लोहित (nom. लोहितायते), रञ्ज् in pass. (रज्यते) संरञ्ज्.

To FLUSH, *v. a.* (Redden suddenly) अकस्माद् अरुणीकृ or रक्तीकृ or अरुण (nom. अरुणयति -यितुं), सरागं -गां -गं कृ, रञ्ज् in caus. (रञ्जयति -यितुं). —(Elate) दृप् in caus. (दर्पयति -यितुं), उद्धतीकृ, गर्व्वितीकृ.

FLUSH, *a.* (Vigorous) प्रौढतेजाः -जाः -जः (स्), तेजस्वी -स्विनी -स्वि (न्), प्रौढः -ढा -ढं. —(Affluent) धनाढ्यः -ढ्या -ढ्यं, समृद्धः -द्धा -द्धं. —(Liberal) धनव्ययशीलः -ला -लं, मुक्तहस्तः -स्ता -स्तं.

FLUSH, *s.* कपोलरागः, कपोलरक्तता, मुखारुणिमा *m.* (न्), वदनरागः, नववर्णः. —(Abundance, affluence) बाहुल्यं, धनबाहुल्यं, समृद्धिः *f.*

FLUSHED, *p. p.* (Colored) अरुणितः -ता -तं, अरुणीकृतः -ता -तं, रञ्जितः -ता -तं, रक्तः -क्ता -क्तं, रागी -गिणी -गि (न्), कपोलरागवान् -वती -वत् (त्). —(Elated) उद्धतः -ता -तं, दर्पाध्मातः -ता -तं, दृप्तः -प्ता -प्तं, 'with victory,' जयगर्व्वितः -ता -तं.

FLUSHING, *s.* अरुणीभावः, वदनरक्तत्वं, रक्तवर्णः, लोहितवर्णः

To FLUSTER, *v. a.* पानादिना मद् in caus. (मादयति -यितुं) or उन्मत्तीकृ or विमुह् (c. 10. -मोहयति -यितुं) or चित्तविभ्रमं जन् (c. 10. जनयति -यितुं).

FLUSTER, *s.* चित्तविभ्रमः, मद्यपानजः भ्रमः, व्यग्रता, मोहः, व्याकुलता.

FLUTE, *s.* (Instrument) वेणुः *m.*, वंशः -शी, मुरली, सानेयी -यिका मानिका, विवरनालिका. [illegible] 'sound of the flute,' वेणुशब्दः, वेणुध्वानः *m.*, [illegible] —(Channel of a column) स्तम्भरेखा, स्तम्भस्रोता.

To FLUTE, *v. n.* (Play on the flute) वेणुं or वंशीं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा, or वद् in caus. (वादयति -यितुं) or [illegible] or प्रवद्.

To FLUTE, *v. a.* स्तम्भपरितो दीर्घरेखाः कृ or निखन् (c. 1. -खनति -नितुं).

FLUTE-PLAYER, *s.* वेणुध्मः, वांशिकः, वैणविकः, मुरलीवादकः.

FLUTED, *p. p.* or *a.* स्तम्भवत् दीर्घरेखायुक्तः -क्ता -क्तं or रेखापंक्तियुक्तः -क्ता -क्तं.

To FLUTTER, *v. n.* (Flap the wings in mid air) विहायसा or व्योममध्ये पक्षास्फालनं कृ or पक्षस्पन्दनं कृ or पक्षौ स्फल् (c. 10. स्फालयति -यितुं) or आस्फल्, प्रडीनम् अकृत्वा आकाशमध्ये पक्षौ विचल् in caus. (-चालयति -यितुं) or चल्. —(Move about with bustle) इतस्ततश् चल् or धाव् (c. 1. धावति -वितुं). —(Vibrate, beat, be agitated) स्पन्द् (c. 1. स्पन्दते -न्दितुं), कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उच्छ्वस् (c. 2. -छ्वसिति -तुं, rt. श्वस्), दोल् (nom. दोलायते -यितुं).

FLUTTER, *s.* (Vibration) स्पन्दनं, प्रतिस्पन्दनं, स्फुरणं, कम्पः -म्पनं, विकम्पः, उच्छ्वासः, उच्छ्वसनं, इतस्ततो विचलनं or चलनं. —(Hurry, agitation) सम्भ्रमः, वेगः, संवेगः, आवेगः, चित्तवेगः, क्षोभः.

FLUTTERING, *s.* पक्षास्फालनं, पक्षस्पन्दनं, पक्षकम्पनं, पक्षचालनं, स्फालः -लनं.

FLUTTERING, *part.* or *a.* आस्फालितः -ता -तं, स्पन्दमानः -ना -नं, कम्पमानः -ना -नं, विचलः -ला -लं, विचलन् -लन्ती -लत् (त्), उच्छ्वासी -सिनी -सि (न्); 'in the breeze,' अनिलोद्धतः -ता -तं, पवनाहतः -ता -तं, पवनक्षिप्तः -प्ता -प्तं.

FLUVIAL, FLUVIATIC, *a.* नादेयः -यी -यं, नदीसम्बन्धी -न्धिनी -न्धि (न्).

FLUX, *s.* (Flow) स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, प्रवाहः, स्यन्दः, क्षरणं, गलनं, गालः.—(Of the tide) वेला.—(Confluence) सङ्गमः, समागमः.—(Bloody flux) आमातिसारः, आमरक्तः.

To FLUX, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), द्रवीकृ, द्रु in caus. (द्रावयति -यितुं), विद्रु, गल् in caus. (गालयति -यितुं), विलीनीकृ.

FLUXIBILITY, FLUXILITY, *s.* द्रवत्वं, द्राव्यत्वं, गलनीयता, विलीनता.

FLUXIBLE, *a.* द्राव्यः -व्या -व्यं, गलनीयः -या -यं, सुविलयः -या -यं.

FLUXION, *s.* स्रवः -वणं, प्रस्रवः -वणं, स्रावः, प्रवाहः, गलनं, क्षरणं.

To FLY, *v. n.* (As a bird in the air) डी (c. 4. डीयते, c. 1. डयते -यितुं), प्रडी, उड्डी, खे or वियति विसृप् (c. 1. -सर्पति -सर्प्तुं) or सृप्, आकाशेन गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं), पत् (c. 1. पतति -तितुं), उत्पत्, प्रोत्पत्, समुत्पत्, सम्पत्.—(Move along swiftly) त्वरितं or सत्वरं or शीघ्रं गम् or चल् (c. 1. चलति -लितुं) or सृ (c. 1. सरति, सर्त्तुं) or प्रसृ.—(Run away) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु, प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, अपक्रम् (c. 1. -क्रामति -क्रमितुं), अपगम्, निर्गम्, अपसृप् (c. 1. सर्पति -सर्प्तुं), अपया (c. 2. -याति -तुं), अपसृ (c. 1. -सरति -सर्त्तुं), अपे (c. 2. अपैति -तुं, rt. इ).—(Pass rapidly) शीघ्रम् अतिक्रम् or अती (c. 2. अत्येति -तुं, rt. इ) or अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं); 'to fly away,' उड्डी, प्रडी, प्रोड्डी, निष्पत्; 'he flew away,' पलायितः; 'to fly at,' अभिपत्, आपत्, उपपत्, अभिद्रु, आद्रु, उपद्रु, अभिधाव्, आधाव्, प्रतिधाव्; 'to fly up,' उड्डी, उत्पत्, अधिरुह् (c. 1. -रोहति -रोढुं); 'to let fly,' मुच् (c. 6. मुञ्चति, मोक्तुं), सृज् (c. 6. सृजति, स्रष्टुं), पत् in caus. (पातयति -यितुं).

To FLY, *v. a.* (Avoid) वृज् (c. 10. वर्जयति -यितुं), वियुज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परिहृ (c. 1. -हरति -हर्त्तुं).—(Cause to float in the air) आकाशे विसृप् in caus. (-सर्पयति -यितुं) or विसृ in caus. (-सारयति -यितुं).

FLY, *s.* (Insect) मक्षिका, मशकः, मक्षीका, माक्षिका, भम्भः, भम्भराली, बम्भराली.

FLY-BITTEN, *a.* मक्षिकादष्टः -ष्टा -ष्टं, मक्षिकादंशाङ्कितः -ता -तं.

To FLY BLOW, *v. a.* मक्षिकावद् अण्डप्रसवेन खाद्यमांसं दुष् (c. 10. दूषयति -यितुं).

FLY-BOAT, *s.* प्रणालीप्रयाणयोग्या लघुनौका, द्रुतगामिनी दीर्घनौका.

FLY-CATCHER, *s.* मक्षिकाखादकः पक्षिभेदः, मक्षिकाभुक् *m.* (ज्), मक्षिकानाशकः.

To FLY-FISH, *v. n.* मक्षिकां वडिशे निवेश्य मत्स्यान् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

FLY-FLAP, *s.* मक्षिकानिवारणार्थं चामरं, अवधूलकं, रोमगुच्छः.

FLY-LEAF, *s.* मलपृष्ठं, पुस्तकस्य आद्यन्तयोः शून्यपत्रं.

FLYER, *s.* डीयमानः, खविसर्पी *m.* (न्), आकाशगामी. *See* FLIER.—(Wheel) तुलाचक्रं.

FLYING, *s.* (Act of) डीनं, डयनं, प्रडीनं, विसर्पणं, आकाशगमनं, पतनं; 'flying up and down,' डीनावडीनं.

FLYING, *part.* डीयमानः -ना -नं, खविसर्पी -र्पिणी -र्पि (न्), आकाशगतिः -तिः -ति, आकाशगामी -मिनी -मि (न्), आकाशयायी -यिनी -यि (न्), पतन् -तन्ती -तत् (त्), नभोगतिः -तिः -ति; 'flying up,' उड्डीयमानः -ना -नं.

FLYING-BRIDGE, *s.* नौसेतुः *m.*, चलसेतुः *m.*, जङ्गमसेतुः.

FLYING-FISH, *s.* आकाशगमनशीलो मत्स्यभेदः.

FOAL, *s.* अश्वशावः -वकः, किशोरः, घोटकवत्सः, बालः, बालघोटकः, अश्वपोषः.

To FOAL, *v. n.* किशोरं or अश्वशावकं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं) or प्रजा (c. 4. -जायते -जनितुं).

FOAM, *s.* फेनः, मण्डः -ण्डं, पराह्नः, परघ्नः, कारूजः, उत्पीडः, उत्सेकः, उत्सेचनं.

To FOAM, *v. n.* फेन (nom. फेनायते -यितुं), मण्ड (nom. मण्डायते -यितुं), उत्सेचनं कृ, उत्पीडं कृ, फेनम् उत्पद् in caus. (-पादयति -यितुं) or निर्गम् in caus. (-गमयति -यितुं).

FOAMING, *part.* फेनायमानः -ना -नं, उत्सेचनकारी -रिणी -रि (न्).

FOAMY, *a.* फेनलः -ला -लं, फेनिलः -ला -लं, फेनवान् -वती -वत् (त्), फेनी -निनी -नि (न्), फेनोत्पादकः -का -कं.

FOB, *s.* घटीकोषः, घटीपिधानं, क्षुद्रघटीधारकः, कटिवस्त्रपार्श्वे कालमापनयन्त्राधारः or -कोषः.

To FOB, *v. a.* छल् (c. 10. छलयति -यितुं), वञ्च् in caus. (वञ्चयते -यितुं), छलं कृ.

FOCUS, *s.* अग्रांशुः *m.*, अग्रकरः, केन्द्रं, बिन्दुः *m.*, अक्षः, तेजःसङ्घर्षदेशः, नाभिः *m. f.*

FODDER, *s.* पशुभोजनं, गवादनं, गवादिभोजनं, अश्वादनं, पशुखादनीयं शुष्कतृणादि, विधः धा -धानं, विधिः *m.*

To FODDER, *v. a.* शुष्कतृणादि दा (c. 3. ददाति, दातुं) or भुज् (c. 10. भोजयति -यितुं).

FOE, *s.* शत्रुः *m.*, रिपुः *m.*, अरिः *m.*, अरातिः *m.*, वैरी *m.* (न्), विपक्षः अमित्रः, प्रतिपक्षः, विरोधी *m.* (न्), प्रतिद्वन्द्वः, सपत्नः, अपकारी *m.* (न्), अहितः.

FŒTAL, FŒTUS, FŒCES. *See* FETAL, &c.

FOG, *s.* (Mist) धूमिका, धूलिका, धूपिका, शीकरः, खवाष्पः, मृगतृष्णा -तृषा -ष्णिका, मृगतृट् *f.* (ष्), कुहा, कुहेडिका, कुज्झटिका, कुज्झटिः *f.* -टी -टिका, हिमझटिः *f.*, रूभेटिः *f.*, धूममहिषी.—(After grass) द्वितीयतृणं.

FOGGINESS, *s.* सधूमिकत्वं, धूमलता, सशीकरत्वं, कुज्झटिकावस्था, कुज्झटिकाकीर्णता, सान्धकारत्वं, शीकराकीर्णता.

FOGGY, *a.* सधूमिकः -का -कं, धूमिकावृतः -ता -तं, धूमलः -ला -लं, सशीकरः -रा -रं, शीकरीयः -या -यं, शीकरीघः -घा -घं, कुज्झटिकाच्छन्नः -न्ना -न्नं, सान्धकारः -रा -रं, सकुज्झटिकः -का -कं, अभियः -या -यं.—(Dull) स्थूलः -ला -लं.

FOH, *exclam.* धिक्, शान्तं, अपेहि, अपसर.

FOIBLE, *s.* छिद्रं, दोषः, कलङ्कः, अपराधः, वैकल्यं, हानिः *f.*, हीनता.

To FOIL, *v. a.* (Frustrate) प्रतिहन् (c. 2. -हन्ति -न्तुं), व्याहन्, परास् (c. 4. -अस्यति -असितुं), खण्ड् (c. 10. खण्डयति -यितुं), उद्यमभङ्गं कृ, विफलीकृ, वृथा कृ.—(Blunt) रुग्नीकृ, विरुग्नीकृ; 'one who foils one's designs,' कार्य्यहन्ता *m.* (न्).

FOIL, *s.* (Defeat, frustration) प्रतिहतिः *f.*, खण्डनं, भङ्गः.—(Blunt sword) धाराहीनः खड्गः, क्रीडाखड्गः, युद्धक्रीडायां प्रयुक्तो लोहयष्टिः.—(Leaf of metal) धातुपत्रं; 'tin-foil,' त्रपुपत्रं.—(Foil of a jewel) रत्नप्रभावर्धकं, मणितेजोवर्धको धातुपत्रखण्डः.—(Any thing which sets off) प्रकाशकः -का -कं, कान्तिवर्धकः -का -कं, शोभकृत् *m. f. n.*

FOILED, *p. p.* प्रतिहतः -ता -तं, परास्तः -स्ता -स्तं, भग्नोद्यमः -मा -मं, विफलीकृतः -ता -तं, खण्डिताशंसः -सा -सं, अकृतार्थः -र्था -र्थं, हताशः -शा -शं, मनोहतः -ता -तं, विक्षिप्तः -प्ता -प्तं, विनिवृत्तकामः -मा -मं, तिरस्कृतः -ता -तं.

FOILER, *s.* कार्य्यहन्ता *m.* (न्), उद्यमभङ्गकारी *m.* (न्), कर्म्मध्वंसकारी *m.*

FOIN, *s.* यष्टिक्रीडायां यष्ट्याघातः or यष्टिप्रहारः, खड्गाघातः.

To FOIN, *v. a.* यष्टिक्रीडायां यष्टिना प्रहृ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं).

To FOIST, *v. a.* छलेन or कपटेन निविश् in caus. (-वेशयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं), मिथ्या कॢप् (c. 10. कल्पयति

-यितुं), कृत्रिमं -मां -मं कृ.

Foisted, *p. p.* छलेन निवेशितः -ता -तं or अभिलिखितः -ता -तं.

Foistiness, *s.* पर्युषितत्वं, विरसत्वं, ईषत्पूतत्वं, पूतिगन्धिता, कुरसवत्त्वं.

Fold, *s.* (For sheep or cattle) मेषस्थानं -नकं, व्रजः, व्रजाजिरं, मेषव्रजः, मेषशाला, गोष्ठं, गोस्थानकं.—(A double in cloth, &c.) पुटः, वस्त्रपुटः, ऊर्म्मिः *m.f.* -र्म्मिका -र्म्मी, भङ्गः, वस्त्रभङ्गः, तरङ्गः, व्यावर्त्तनं, वृत्तः. 'Fold,' in comp. is expressed by the affix धा; as, 'two-fold,' द्विधा, or by गुण; as, द्विगुणः -णा -णं.

To fold, *v. a.* (Double) पुटीकृ, पुट (nom. पुटयति -यितुं), द्विगुण (nom. द्विगुणयति -यितुं), द्विगुणीकृ, व्यावृत् (c. 10. -वर्त्तयति -यितुं) विपरिवृत्, व्यावर्त्तनं कृ, संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं -रीतुं), सम्पीड् (c. 10. -पीडयति -यितुं); 'fold the arms,' भुजौ सम्पीड्; 'in the arms,' भुजापीडं कृ.—(Confine sheep in a fold) मेषान् व्रजे निविश् in caus. (-वेशयति -यितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

Folded, *p. p.* पुटितः -ता -तं, पुटीकृतः -ता -तं, द्विगुणितः -ता -तं, संवृतः -ता -तं, सम्पीडितः -ता -तं, व्यावर्त्तितः -ता -तं. 'folded or wrapped up,' वेष्टितः -ता -तं, वासनस्थः -स्था -स्थं; 'folded leaf,' दलकपाटः.

Folding, *s.* पुटीकरणं, व्यावर्त्तनं, संवृतिः *f.*; 'folding in the arms,' भुजापीडं कृ.

Folding-doors, *s.* द्विकपाटयुक्तं or द्विशाखायुक्तं द्वारं.

Foliage, *s.* पत्रं -त्राणि *n. pl.*, पर्णं, दलं, वृक्षपत्रं, तरुछदः, तरुजं.

To foliate, *v. a.* मुद्गराघातेन धातुं सूक्ष्मपत्राकारं कृ or धातुपत्रं कृ, उद्वर्त्तनं कृ.

Foliation, *s.* मुद्गराघातेन धातुपत्रकरणं, उद्वर्त्तनं.

Folio, *s.* पुस्तकपत्रं, महापत्रं, पृथुपत्रं, बृहत्पत्रं, विशालपत्रं, द्विपत्रं.

Folk, *s.* लोकः, जनः, मनुष्यजातिः *f.*, नृजातिः *f.*, प्रजा, जगती.

To follow, *v. a.* (Go after) अनुगम् (c. 1. -गच्छति -गन्तुं), अन्वागम्, पश्चाद् गम्, अनुया (c. 2. -याति -तुं), समनुया, अन्वि (c. 2. -एति -तुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), समनुवृत्, अनुसृ (c. 1. -सरति -सर्त्तुं), अनुव्रज् (c. 1. -व्रजति -जितुं), समनुव्रज्, अनुक्रम् (c. 1. -क्रामति -क्रमितुं), अनुचर् (c. 1. -चरति -रितुं), अन्वग्या, पुरस्कृ.—(Imitate) अनुकृ, अनुधृत्, अनुगम्.—(Observe, practise) अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, सेव् (c. 1. सेवते -वितुं), उपसेव्, निषेव्, समासेव्, आश्रि (c. 1. -श्रयति -यितुं), विधा (c. 3. -दधाति -धातुं).—(Adhere to, serve, honour) आश्रि, श्रु in des. (शुश्रूषते -षितुं), उपास् (c. 2. -आस्ते -आसितुं), भज् (c. 1. भजते, भक्तुं), परिचर्.—(Result from) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् in pass. (जायते), अनुवृत्, उद्भू, अनुभू.

Followed, *p. p.* अनुगतः -ता -तं, अनुयातः -ता -तं, अनुगम्यमानः -ना -नं, अन्वीयमानः -ना -नं.—(Observed) अनुष्ठितः -ता -तं, सेवितः -ता -तं, आश्रितः -ता -तं.

Follower, *s.* (One who goes after) अनुगामी *m.* (न्), पश्चाद्गामी, अनुगः -गतः, अनुयायी *m.* (न्), अनुवर्त्ती *m.* (न्), अनुचरः -चारी *m.* (न्), अनुगतिकः, अनुयात्रिकः, अभिसरः, पार्श्वपरिवर्त्ती *m.* (न्), पार्ष्णिग्राहः, उपधावनः.—(Adherent, disciple) अनुयुक्तो, भक्तः, आश्रितः, भाक्तिकः, शिष्यः; 'follower of Krishna,' कृष्णाश्रितः.—(Attendant, defendant) परिजनः, अनुचरः, सेवकः, अनुजीवी *m.* (न्) -विकः, उपजीवी *m.*, परिवारः.—(Companion, associate) सहायः, सहचरः, सङ्गी *m.* (न्).

Following, *part.* (Going after) अनुगः -गा -गं, अनुयायी -यिनी -यि (न्), अनुसारी -रिणी -रि (न्), अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), अनुमयः -या -यं, अन्वक्षः -क्षा -क्षं, अन्वङ् अनूची अन्वक् (च्), अनुपदं.—(Next after) परः -रा -रं.—(Succeeding) अनुयायी &c.

Following, *s.* (Act of) अनुगमः -मनं, अनुसरणं, अनुवर्त्तनं, अनुव्रजनं.

Folly, *s.* मूर्खता, मौर्ख्यं, मूढता -त्वं, मोहः, मौढ्यं, बुद्धिहीनता, निर्बुद्धिता, अज्ञता, अविज्ञता, अनभिज्ञता, अज्ञानं, ज्ञानाभावः, प्रज्ञाहीनता.

To foment, *v. a.* (Heat with warm lotions) स्विद् in caus. (स्वेदयति -यितुं), प्रस्विद्, घर्म्मोदकादिना or उष्णोदकादिना लिप् (c. 6. लिम्पति, लेप्तुं) or अनुलिप् or अञ्ज् (c. 7. अनक्ति, अंक्तुं) or दिह् (c. 2. देग्धि -ग्धुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or निषिच्.—(Encourage, excite) वृध् in caus. (वर्धयति -यितुं), संवृध् in caus., प्रवृत् in caus. (-वर्त्तयति -यितुं), तेजो दा, तेजोवृद्धिं कृ, उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं), उद्दीप् (c. 10. -दीपयति -यितुं); 'foment dissensions,' उपजप् (c. 1. -जपति -पितुं), कर्णे जप्, उपजापेन भेदं वृध् in caus.

Fomentation, *s.* (Act of heating with warm lotions, &c.) स्वेदनं, प्रस्वेदनं, घर्म्मोदकादिना विलेपनं or अनुलेपनं or सेचनं.—(The lotion itself) घर्म्मलेपः, घर्म्मानुलेपनं, उष्णोपदेहः.—(Encouragement) उद्दीपनं, उत्तेजनं, उत्तापः, संवर्धनं.

Fomented, *p. p.* स्वेदितः -ता -तं.—(Encouraged) उद्दीप्तः -प्ता -प्तं, संवर्धितः -ता -तं.

Fomenter, *s.* (Of dissension) उपजापकः, कर्णेजपः, भेदकरः, कलिकारकः.

Fond, *a.* (Loving) अनुरक्तः -क्ता -क्तं, अनुरागवान् -वती -वत् (त्), अनुरागी -गिणी -गि (न्), सानुरागः -गा -गं, स्नेही -हिनी -हि (न्), स्नेहितः -ता -तं, कामी -मिनी -मि (न्), प्रणयी -यिनी -यि (न्).—(Attached to, delighting in) आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, परः -रा -रं, तत्परः -रा -रं, रतः -ता -तं, सेवी -विनी -वि (न्), अभिलाषी -षिणी -षि (न्), आनन्दी -न्दिनी -न्दि (न्), -न्दितः -ता -तं, प्रमोदी -दिनी -दि (न्); 'fond of one's ease,' सुखाभिलाषी -षिणी -षि (न्); 'fond of embracing,' आलिङ्गनतत्परः -रा -रं; 'fond of noise,' ध्वनमोदी &c. Often expressed by प्रिय in comp.; as, 'fond of water,' जलप्रियः -या -यं; 'fond of mountains,' गिरिप्रियः -या -यं; 'fond of ornament,' प्रियमण्डनः -ना -नं; or by काम in comp.; as, 'fond of flesh,' मांसकामः -मा -मं; 'to be fond of,' अनुरागवान् -वती -वत् अस् or भू, सेव् (c. 1. सेवते -वितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते -चितुं), with dat. of the person; अभिनन्द् (c. 1. -नन्दति -न्दितुं).—(Doting) अत्यनुरक्तः -क्ता -क्तं.—(Silly) मूढः -ढा -ढं, मुग्धः -ग्धा -ग्धं.

To fondle, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं), परिमृश् (c. 6. -मृशति -मर्ष्टुं), लल् (c. 10. लालयति -यितुं), क्रोडीकृ, भुजापीडितं -तां -तं कृ, प्रेम कृ, अनुरागं कृ, अङ्कीकृ, अङ्के कृ, अङ्के पाल् (c. 10. पालयति -यितुं).

Fondled, *p. p.* लालितः -ता -तं, क्रोडीकृतः -ता -तं, भुजापीडितः -ता -तं.

Fondling, *s.* (Caressing) आलिङ्गनं, परिष्वङ्गः, लालनं, क्रोडीकरणं, अङ्कपाली -लिका -लिः *m.*, भुजापीडः.—(The person or thing fondled) प्रेमपात्रं, प्रेमभूमिः *f.*, अनुरागपात्रं.

Fondly, *adv.* सानुरागं, वात्सल्येन, अतिस्नेहेन, अतिप्रीतिपूर्वं.—(Foolishly) मूढवत्.

Fondness, *s.* स्नेहः, प्रीतिः *f.*, अनुरक्तिः *f.*, अनुरागः, प्रेम *n.* (न्), प्रियता, वात्सल्यं, वत्सलता, प्रणयः, अभिरुचिः *f.*, रुचिः *f.*, सन्तोषः.

Font, *s.* पूजाशालामध्ये जलसंस्कारकरणे प्रयुक्तः प्रस्तरमयो जलाधारः.—(Complete assortment of printing types of one size) समपरिमाणमुद्राक्षरपरिसंख्या.

Food, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, खाद्यं, अन्नं, खाद्यं, अदनं, खादनं,

आहार्य्यं, अभ्याहार्य्यं, आमिषं, जग्धि: *f.*, अशनं, भक्ष्यं, भक्तं, खाद्यं, जेमनं, जमनं, घस: *n.* (स्), वसि: *m.*, निघस:, विघस:, ग्रास:, प्राशं, प्रत्यदनं, आद्य:, देहयात्रा, जीवनक:, शरीरयात्रा, न्याद:, लेप:, लेह:; 'choice food,' परमान्नं, उत्तमान्नं, भोजनविशेष:; 'bad food,' कदन्नं; 'food and raiment,' ग्रासाच्छादनं, अन्नाच्छादनं, अशनाच्छादनं or -ने n. du., अन्नवस्त्रं, कशिपु: m. du.; 'food of the gods,' अमृतं, पीयूषं, पेयूषं, सुधा, लेह्यं; 'to eat food,' आहारं कृ. Food is divided by the Hindús into five kinds, भक्ष्यं, भोज्यं, लेह्यं, चोष्यं, पेयं.

FOOL, *s.* मूर्ख:, मूढ:, अज्ञ:, निर्बुद्धि: *m.*, निर्बोध:, अबुद्धि: *m.* -द्धिमान् *m.* (त्), अबुध:, अप्राज्ञ:, अविज्ञ:, अविद्वान् *m.* (स्), प्रमूढ:, प्रज्ञाहीन:, अज्ञानी *m.* (न्), जड:, जडमति: *m.*, अल्पधी: *m.*, मन्दबुद्धि: *m.*, मन्द:, बर्ब्बर:, कुशलक:, लट:.—(Buffoon, jester) विदूषक:, नर्म्मसचिव:, भग्ड:.

To FOOL, *v. n.* खेला (nom. खेलायति), कुड् (c. 6. कुडति -डितुं), परिहासं कृ, लट् (c. 1. लटति -टितुं).

To FOOL, *v. a.* मुह् (c. 10. मोहयति -यितुं), सम्मुह्, वञ्च् (c. 10. वञ्चयते -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं).

FOOLERY, *s.* मूर्खकर्म्म *n.* (न्), मूर्खक्रिया, मूर्खता, बालकर्म्म *n.*, बालिश्यं.

FOOL-HARDINESS, *s.* असमीक्ष्य साहसं, अविचारेण प्रगल्भता, अतिसाहसिकत्वं, आत्मत्वं, अविमृश्यकारित्वं, अनाहितं, दर्प:, प्रमत्तता.

FOOL-HARDY, *a.* असमीक्ष्य साहसी -सिनी -सि (न्), अविमृश्य प्रगल्भ: -ल्भा -ल्भं, आत्मल: -त्मा -त्मं, प्रमत्तवीर: -रा -रं, प्रमत्तशूर: -रा -रं.

FOOLISH, *a.* मूर्ख: -र्खा -र्खं, मूढ: -ढा -ढं, अज्ञ: -ज्ञा -ज्ञं, अनभिज्ञ: -ज्ञा -ज्ञं, निर्बुद्धि: -द्धि: -द्धि, निर्बोध: -धा -धं, अबुद्धिमान् -मती -मत् (त्), अप्राज्ञ: -ज्ञा -ज्ञं, अल्पबुद्धि: &c., दुर्बुद्धि: &c., अल्पधी: -धी: -धि, बुद्धिहीन: -ना -नं, प्रज्ञाहीन: -ना -नं, दुर्मेधा: -धा: -ध: (स्), दुर्मति: -ति: -ति, अज्ञान: -ना -नं -नी -निनी -नि (न्), अकोविद: -दा -दं, बालिश: -शा -शं, बालिशमति: -ति: -ति, अल्पधी: -धी: -धि, वैधेय: -यी -यं, असकृत: -ता -तं.

FOOLISHLY, *adv.* मूर्खवत्, मूढवत्, अज्ञवत्, अज्ञानात्, मौर्ख्यात्, अल्पबुद्ध्या.

FOOLISHNESS, *s.* मूर्खता, मौर्ख्यं, मूढता, मौढ्यं, अज्ञता, अनभिज्ञता, निर्बुद्धित्वं, मोह:, बुद्धिहीनता, अबोधता, अज्ञानं, ज्ञानाभाव:, बालिशता, बालिश्यं.

FOOLSCAP, *s.* मूर्खशिरोवेष्टनसंज्ञक: कार्पासविशेष: or पत्रविशेष:.

FOOT, *s.* (Part of the body) पाद:, पदं, चरणं -ण:, अंह्रि: *m.*, अङ्घ्रि: *m.*, अधमाङ्गं, लग्न:; 'both feet,' पादौ du., चरणौ du., चरणयुगं; 'point of the foot,' पादाग्रं, पदिकं; 'foot and knee,' पदष्ठीवं.—(Bottom, base) तलं, अधोभाग:, अध:स्थानं, मूलं, उपस्थ:; 'foot of a tree,' तरुतलं, वृक्षतलं, वृक्षाङ्घ्रि: *m.*, पाद:, 'foot of a mountain,' उपत्यका, शैलोपशल्यं, पर्व्वततलं, गिरिपाद:, पर्व्वताधोभाग:.—(Measure) मनुष्यपादपरिमाणं, सार्द्धचतुरङ्गुलिपरिमाणं; 'ornament for the feet,' नूपुर:, पादाङ्गदं, चरणाभरणं, पादकटक:, तुलाकोटि: *f.*, मञ्जीरं; 'water for ablution of the feet,' पाद्यं, पादोदकं; 'to go on foot,' पद्भ्यां or पादाभ्यां व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं); 'going on foot,' पादचार:; 'foot by foot,' पादश:, पदं पदं, पद्धश; 'at the foot,' पादतस्; 'to set on foot,' प्रवृत् (c. 10. -वर्त्तयति -यितुं); 'set on foot,' प्रवर्त्तित: -ता -तं, उपक्रान्त: -न्ता -न्तं.

To FOOT, *v. a.* (Kick) पादेन प्रहृ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं), पादाघातं कृ.—(Tread) क्रम् (c. 1. क्रामति, क्रमितुं), चरणपातं कृ.

To FOOT IT, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), पादादि सञ्चल् in caus. (-चालयति -यितुं).

FOOT-BALL, *s.* वाताध्मातो गोचर्म्मविस्तरो य: सक्रीडमानजनपादाघातेन इतस्ततो विक्षिप्यते, पादाहतकन्दुकक्रीडा.

FOOT-BOARD, *s.* पादफलकं, चरणफलकं, पादकाष्ठं.

FOOT-BOY, *s.* बालसेवक:, युवसेवक:, बालभृत्य:, युवप्रेष्य:.

FOOT-BRIDGE, *s.* सङ्क्रम:, सङ्क्राम:, सङ्क्रमसेतु: *m.*, दुर्गसञ्चर: -सञ्चार:.

FOOTED, *p. p.* पादाहत: -ता -तं.—(Having feet) पादी -दिनी -दि (न्), पदी &c.

FOOT-FALL, *s.* पदपात:, पादपात:, चरणपात:, पदन्यास:, पदविष्टम्भ:.—(Trip) स्खलनं.

FOOT-FIGHT, *s.* पादातियुद्धं, पदातियुद्धं, पदिकयुद्धं, पदगयुद्धं.

FOOT-GUARD, *s.* पादातिकसैन्य:, पदातिकसैनिक:, पदगरक्षक:.

FOOTING, *s.* (Ground for the feet) पादन्यासस्थानं, पादनिक्षेपस्थानं, पदविष्टम्भस्थानं, पदं, स्थानं, भूमि: *f.*, स्थलं, आस्पदं, वर्त्म *n.* (न्), पदवी -वि: *f.*, अयनं, सरणि: *f.*, वर्त्तनं; 'firm footing,' प्रतिष्ठानं; 'place with no firm footing,' अस्थानं.—(Basis, foundation) मूलं, उपष्टम्भ:, तलं.—(Support) उपस्तम्भ:, उपघ्न:, आश्रय:, अवलम्बनं.
(Condition, position) अवस्था, स्थिति: *f.*, भाव:, संस्थानं, वृत्ति: *f.*

FOOTLESS, *a.* पादहीन: -ना -नं, निष्पाद: -दा -दं, चरणहीन: -ना -नं.

FOOT-LICKER, *s.* पादसेवक:, चरणसेवक:, पदानुराग:, पीठमर्द:.

FOOT-MAN, *s.* (Foot-soldier) पदाति: *m.* -तिक:, पादाति: *m.* -तिक:, पादात:, पदात:, पादात्, पत्ति: *m.*, पदग:, पद्ग:, पदिक:, पादचार: -री *m.* (न्), पादाविक:, पदाजि: *m.*—(Running footman) जाङ्घिक:.—(Servant) सेवक:, प्रेष्य:, कुलसेवक:, परिचर:, किङ्कर:.

FOOT-MARK, *s.* पादचिह्नं, पदचिह्नं, पदाङ्क:, पदपंक्ति: *f.*, पादमुद्रा, चरणपदवी, पदवी, पदं; 'of a horse,' खुरपदवी.

FOOT-PACE, *s.* पदपात:, पादगति: *f.*, पदक्रम:, चरणक्रम:.

FOOT-PAD, *s.* मार्गनिकाय:, पादविकाय:, परिपन्थी *m.* (न्), होडा *m.* (ड्).

FOOT-PAN, *s.* पाद्यपात्रं, पाद्यभाजनं, पाद्याधार:, पादोदकपात्रं.

FOOT-PATH, *s.* पदवि: *f.* -वी, पदगपथ:, पदिकमार्ग:, पादचारयोग्य: क्षुद्रपथ:.

FOOT-SOLDIER, *s.* पदाति: *m.*, पत्ति: *m.*, पदातिकसैन्य:, पादातिकयोद्धा *m.* (द्धृ). *See* FOOT-MAN.

FOOT-STALK, *s.* प्रसवबन्धनं, वृन्तं, मञ्जरी.

FOOT-STEP, *s.* (Mark of the foot) पादचिह्नं, पदाङ्क:, पदपंक्ति: *f.*, पादमुद्रा, चरणपदवी.—(Tread) पदपात:, पादपात:, पादन्यास:, चरणपात:, पदविक्षेप:, पदविष्टम्भ:.—(Course, track) पदवि: -वी *f.*, अनुपदं, पद्धति: *f.*, पथ:, मार्ग:, अयनं, वर्त्म *n.* (न्).—(Token) चिह्नं, लक्षणं.

FOOT-STOOL, *s.* पादपीठं, चरणपीठं, पादासनं, पादप:, पदासनं.

FOP, *s.* दर्शनीयमानी *m.* (न्), दम्भी *m.* (न्), गर्व्वी *m.* (न्), आत्माभिमानी, रूपगर्व्वित:, सुवेशमानी *m.*, सुवेशिनम्मन्य:, छेक:.

FOPPERY, *s.* सुवेशमानिता, रूपमानिता, मूर्खता, मूर्खकर्म्म *n.* (न्).

FOPPISH, *a.* दम्भी -म्भिनी -म्भि (न्), वेशाभिमानी -निनी -नि (न्).

FOPPISHNESS, *s.* वेशाभिमानता, दम्भ:, दाम्भिकत्वं, रूपगर्व्वितत्वं.

FOR, *conj.* (Because) यतस्, यत्, येन, यस्मात्, हि, इति हेतो:, तदर्थं, अनेन हेतुना. *See* BECAUSE.—(For as much as) यतस्, यत्, or expressed by the abl. c. of the abst. noun; as, 'for as much as he was a good man,' सज्जनत्वात्.

FOR, *prep.* (In exchange for) प्रति with abl. c., विनिमयेन; 'he exchanges beans for sesamum seed,' तिलेभ्य: प्रति माषान् ददाति; or expressed by the inst. c., as, तिलैर् माषान् परिवर्त्तयति; 'in exchange for one's life,' स्वप्राणविनिमयेन.—(Instead of, in place of) स्थाने, प्रति.—(Toward) प्रति, उद्दिश्य with

acc. c.—(On account of, by reason of) अर्थं, अर्थे, हेतोः, हेतौ, कृते, निमित्ते, कारणात् all affixed to the crude; as, 'for this cause,' तदर्थं, or expressed by उद्दिश्य with acc. c., or by the abl. c.; as, 'for anger he did it,' कोपात् तत् कृतवान्; 'for want of money,' धनाभावात्.—(Conducive to) अर्थं, अर्थे, or expressed by the dat. c., as, 'for the good of the world,' भूतये भुवः; 'for one's own advantage,' आत्मविवृद्धये.—(For the sake of) अर्थं, अर्थे, हेतोः, कृते, or by dat. c., as, 'for the satisfying of hunger,' क्षुधाशान्तये; 'for thy enjoyment,' तव भोगाय.—(In order to obtain) अर्थं, अर्थे or by dat. c., as, 'for fame,' प्रतिपत्तये, or even by inst. c., as, 'for hire,' भाटकेन.—(In return for) प्रति, or more usually expressed by the indec. part.; as, 'for so doing,' तत् कृत्वा.—(During a certain time) यावत्, पर्य्यन्तं; 'for life,' पुरुषस्यायुर् यावत्, यावज्जीवं, जीवनपर्य्यन्तं, or by prefixing आ with abl. c., as, आमरणात्, आजीवनान्तात् (*i. e.* until death); 'lasting for life,' आमरणान्तिकः -का -कं; 'for three days,' दिनत्रयपर्य्यन्तं; 'for a hundred years,' वर्षशतं यावत्. Sometimes expressed by the acc. c., as, 'for one month,' एकं मासं; 'for two months,' द्वौ मासौ; 'for a hundred years,' वर्षशतं, or even by the instr. c., as, 'for twelve years,' द्वादशभिर् वर्षैर्; 'for a few days,' कतिपयदिवसैः; 'for a long time,' चिरकालं, अनेककालं, चिरात्, चिरेण, चिराय; 'food for a year,' वर्षोपभोग्यम् अन्नं.—(In proportion to, considering) अपेक्ष्य, उद्दिश्य, प्रतीक्ष्य, अवेक्ष्य, all with acc. c.—(On the part of) अपेक्ष्य, उद्दिश्य, कृते; 'as for me,' मामपेक्ष्य, मामुद्दिश्य, मत्कृते.—(On the side of) सपक्षः -क्षा -क्षं; 'he is for us,' अस्माकं सपक्षो भवति.—(Notwithstanding, for all that) तथापि.—(As if) वत् affixed, इव; 'he shewed himself for dead,' मृतवत् or मृतम् इवात्मानम् अदर्शयत्.—(According to) यथा, अनुसारेण, अनुरूपेण, 'for one's ability,' यथाशक्ति. 'For,' may be expressed by the acc. c. in such phrases as 'looking for,' 'waiting for,' &c.; as, 'he looks for me,' माम् अपेक्षते, or by other cases, as, 'we depend on God for success,' ईश्वराधीना सिद्धिः; 'I have great affection for her,' तस्याम् अनुरागवान् अस्मि or तया सह महान् स्नेहः, or by गत, as, 'through love for him,' तद्गतेन अनुरागेण, or by the crude form, as, 'search for money,' धनान्वेषणं, or even by the affix सात्, as, 'he built a house for the Brahman,' गृहं चकार द्विजातिसात्.—(For the most part) प्रायेण, प्रायस्, प्रायशस्, भूयिष्ठं.

FORAGE, *s.* (Food for horses and cattle) अश्वादनं, गवादनं, अश्वादिभोजनं.—(Provisions) पाथिकं, पाथेयं, खाद्यद्रव्यं, भोज्यं, भोजनसम्भारः.—(Search for food) खाद्यद्रव्यान्वेषणं; 'going to forage,' प्रसारः -रणं, प्रसरणं.

To FORAGE, *v. n.* परिभ्रमणं कृत्वा खाद्यद्रव्याणि or अश्वादनम् अन्विष् (c. 4. -इष्यति -एषितुं), प्रसारं or अवस्कन्दं or उपद्रवं कृत्वा धान्यादिभोज्यम् अपहृ (c. 1. -हरति -हर्तुं).

FORAGER, *s.* भोजनार्थं परिभ्रमणकारी *m.* (न्) or अवस्कन्दकारी or प्रसारी *m.* (न्), युद्धसमये खाद्यद्रव्यान्वेषी *m.* (न्), or अश्वादिभोजनार्थं धान्यादिहारकः.

FORAGING, *s.* भोजनान्वेषणार्थं परिभ्रमणं or प्रसारणं or प्रसरणं or अवस्कन्दः or उपद्रवः, युद्धसमये खाद्यद्रव्यान्वेषणं; 'foraging army,' प्रचक्रं.

FORAY, *s.* उपद्रवः, अवस्कन्दः, विप्लवः, लोप्त्रार्थम् उपप्लवः.

To FORBEAR, *v. a.* and *n.* (Cease from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमति -रन्तुं).—(Delay, pause) विलम्ब् (c. 1. -लम्बते -म्बितुं), विरम्, आकालात्कालात् यम् (c. 1. यच्छति, यन्तुं).—(Avoid) वृज् (c. 10. वर्जयति -यितुं), परिहृ (c. 1. -हरति -हर्तुं).—(Be patient) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते -मितुं, क्षन्तुं).

FORBEARANCE, *s.* (Cessation from, avoidance) निवृत्तिः *f.*, विनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, विरतिः *f.*, विरामः, उपरतिः *f.*, वर्जनं, त्यागः, परिहारः.—(Patience) क्षमा, क्षान्तिः *f.*, तितिक्षा, सहनं, सहनशीलता, सहिष्णुता, मर्षः, परामर्षः, अपकारेऽपि चित्तस्याविकारः.—(Restraint) संयमः, यमः, यामः, संयामः, वियामः, वियमः, दमः.

FORBEARING, *a.* सहनशीलः -ला -लं, सहिष्णुः -ष्णुः -ष्णु, तितिक्षुः -क्षुः -क्षु, क्षमी -मिणी -मि (न्), संयामवान् -वती -वत् (त्).

To FORBID, *v. a.* (Prohibit) प्रतिषिध् (c. 1. -षेधति -षेद्धुं, c. 10. -षेधयति -यितुं), निषिध्, प्रत्याख्या (c. 2. -ख्याति -तुं), अन्तःख्या, परिभाष् (c. 1. -भाषते -षितुं), मैवं कुरु or मैवं कार्षीर् इति आज्ञा in caus. (-ज्ञापयति -यितुं) or आदिश् (c. 6. -दिशति -देष्टुं).—(Prevent) वृ in caus. (वारयति -यितुं), निवृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), बाध् (c. 1. बाधते -धितुं); 'heaven forbid!' इत्थं न भूयात्, एतादृशं न भवतु, शान्तं.

FORBIDDANCE, *s.* निषेधः, प्रतिषेधः, प्रतिषेधोक्तिः *f.*, प्रत्याख्यानं, वारणं, निवारणं, निरोधः, बाधः, बाधकता.

FORBIDDEN, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, निवारितः -ता -तं.

FORBIDDING, *a.* बीभत्सजनकः -का -कं, घृणोत्पादकः -का -कं, अनिष्टः -ष्टा -ष्टं.

FORCE, *s.* (Strength) बलं, शक्तिः *f.*, सामर्थ्यं, समर्थता.—(Energy, might) तेजः *n.* (स्), वीर्य्यं, विक्रमः, पराक्रमः, ऊर्जः, शौर्य्यं.—(Violence) बलात्कारः, साहसं, प्रमाथः, [illegible].—(Momentum) वेगः, आपातः.—(Efficacy) [illegible], प्राबल्यं, गौरवं, सामर्थ्यं, प्रतापः.—(Validity) सिद्धिः *f.*, निष्पत्तिः *f.*; '[illegible] of force,' सिद्धः -द्धा -द्धं, निष्पन्नः -न्ना -न्नं; 'of no force,' असिद्धः -द्धा -द्धं, मोघः -घा -घं, निष्फलः -ला -लं; 'put in force,' प्रवर्त्तितः -ता -तं.—(Force of a word) शब्दशक्तिः *f.*, शब्दसामर्थ्यं -समर्थता, निरूढः, लक्षणं.—(Forces, troops) बलं, सैन्यं, सेना, सैन्याः *m. pl.*, अनीकं -कानि *n. pl.*, अनीकिनी, दण्डः; 'by force,' बलात्, बलेन, बलात्कारेण; 'taken by force,' बलाद्गृहीतः -ता -तं, कलहापहृतः -ता -तं.

To FORCE, *v. a.* (Compel). Expressed by the causal form usually in conjunction with बलात् or बलेन or बलात्कारेण or यत्नेन; as, 'to force a man to do any thing,' बलेन पुरुषं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं); 'to force to give,' दा in caus. (दापयति -यितुं); 'to force to go,' बलेन गम् in caus. (गमयति -यितुं).—(Impel, drive) प्रेर् (c. 10. प्रेरयति -यितुं), कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रणुद् (c. 6. -णुदति -णोत्तुं).—(Use force) बलात्कारं कृ, साहसं कृ, विक्रमं कृ, यत्नं कृ, प्रतियत्नं कृ.—(Force a town, storm) दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं) or बलेन प्रविश् (c. 6. -विशति -वेष्टुं).—(Violate) धृष् (c. 10. धर्षयति -यितुं), बलात्कारेण अभिगम् (c. 1. -गच्छति -गन्तुं).—(Cause to produce fruit prematurely) प्राक्पूर्णकालात् फलोत्पत्तिं जन् (c. 10. जनयति -यितुं).

FORCED, *p. p.* (To do) बलात् कारितः -ता -तं.—(To pay) दापितः -ता -तं.—(Done by force) बलात्कृतः -ता -तं, बलात्कारितः -ता -तं, यत्नकृतः -ता -तं, यत्नपूर्वः -र्व्वा -र्व्वं.—(Strained, unnatural, affected)

क्लिष्टः -ष्टा -ष्टं, प्रतियत्नपूर्वः -र्वा -र्वं, विलक्षः -क्षा -क्षं, कृत्रिमः -मा -मं; 'a forced idea,' क्लिष्टकल्पना; 'a forced smile,' वैलक्ष्यस्मितं.

Forcedly, *adv.* बलात्, यत्नपूर्वं, प्रतियत्नपूर्वं, वैलक्ष्येण, सवैलक्ष्यं.

Forceful, *a.* बलवान् -वती -वत् (त्), शक्तः -क्ता -क्तं, साहसी -सिनी -सि (न्).

Forceless, *a.* निर्बलः -ला -लं, शक्तिहीनः -ना -नं, अशक्तः -क्ता -क्तं.

Force-meat, *s.* वृत्तं, निस्तनी, मिष्टान्नं, उपस्करः, व्यञ्जनं.

Forceps, *s.* सन्दंशः -शकं -शका, लवङधारा, शल्योद्धरणयन्त्रं.

Forcible, *a.* (Powerful) प्रबलः -ला -लं, बलवान् -वती -वत् (त्), शक्तिमान् -मती -मत् (त्), समर्थः -र्था -र्थं, तेजोवान् -वती -वत् (त्),—(Efficacious) सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, अमोघः -घा -घं, अव्यर्थः -र्था -र्थं.—(Impressive) निर्बन्धेन or दार्ढ्येन or गौरवेण or सगौरवम् उक्तः -क्ता -क्तं, तीक्ष्णः -क्ष्णा -क्ष्णं.—(Violent, done by force) साहसिकः -की -कं, बलेन कृतः -ता -तं; 'forcible entry,' बलप्रवेशः or बलात्प्रवेशः; 'forcible removal,' बलापकर्षः.

Forcibleness, *s.* बलवत्त्वं, शक्तिमत्त्वं, प्राबल्यं, सामर्थ्यं, तैक्ष्ण्यं, गौरवं.

Forcibly, *adv.* बलात्, बलेन, बलात्कारेण, बलवत्, प्रसभं, प्रसह्य, अभिपद्य, प्रमथ्य, बलापकर्षं, अवगृह्य.—(Impressively) निर्बन्धेन, दार्ढ्येन, गौरवेण, सगौरवं.

Ford, *s.* नदीतरस्थानं, नदीतरस्थलं, तरणस्थानं, उत्तरणस्थानं, ईषज्जलो नदीभागः, घट्टः.

To **ford,** *v. a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन नदीम् ईषज्जल-स्थाने तॄ (c. 1. तरति -रितुं -रीतुं) or नदीपारं तॄ.

Fordable, *a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन तार्य्यः -र्य्या -र्य्यं, सुतरः -रा -रं, पादस्पृश्यतलः -ला -लं, अल्पजलः -ला -लं.

Fording, *s.* पद्भ्यां or पादाभ्यां or अश्वादिवाहनेन नदीतरणं or उत्तरणं.

Fore, *a.* पूर्व्वः -र्व्वा -र्व्वं, अग्रः -ग्रा -ग्रं, पूर्व्ववर्त्ती -र्त्तिनी -र्त्ति (न्), अग्रगामी -मिनी -मि (न्), पूर्व्वगतः -ता -तं; 'fore-part,' अग्रभागः, अग्रांशः; 'fore part of the thigh,' अग्रजङ्घा.

Fore, *adv.* पूर्व्वं, पूर्व्वे, अग्रे, अग्रतस्, पूर्व्वतस्, प्राक्; 'fore and aft,' नावो-ग्रभागात्प्रभृति पश्चिमभागपर्य्यन्तं.

To **fore-admonish,** *v. a.* अग्रे प्रबुध् (c. 10. -बोधयति -यितुं) or उपदिश् (c. 6. -दिशति -देष्टुं).

Fore-arm, *s.* प्रकोष्ठः, प्रवेष्टः, कलाचिका, अग्रबाहुः *m.*, अग्रभुजः.

To **fore-arm,** *v. a.* अग्रे or पूर्व्वे सन्नह् (c. 4. -नह्यति -नद्धुं) or युद्धार्थं सज्जीकृ.

To **fore-bode,** *v. a.* अनिष्टघटनां पूर्व्वं सूच् (c. 10. सूचयति -यितुं) or अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्व्वलक्षणं दा, पूर्व्वचिह्नं दा, पूर्व्वलक्षणेन अनिष्टम् अनुमा (c. 2. -माति -तुं) or अवगम् (c. 1. -गच्छति -गन्तुं).

Foreboder, *s.* अनिष्टसूचकः, अनिष्टप्रदर्शकः, पूर्व्वलक्षणज्ञः, पूर्व्वलिङ्गज्ञः, अग्रसूचकः.

Foreboding, *s.* अनिष्टसूचनं -ना, अनिष्टप्रदर्शनं, पूर्व्वलक्षणात् अनिष्टानुमानं.

To **forecast,** *v. a.* and *n.* अग्रे or पूर्व्वं चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन्त् or निरूप् (c. 10. -रूपयति -यितुं) or उपायम् अनुसन्धा, (c. 3. -दधाति -धातुं), अग्रविवेचनां कृ, अग्रकल्पनां कृ.

Forecast, *s.* अग्रचिन्तनं, अग्रनिरूपणं, पूर्व्वविवेचनं, पूर्व्वकल्पना, दीर्घदृष्टिः *f.*

Forecastle, *s.* नावः पूर्व्वभागः or अग्रभागः, अग्रकूपकपुरतो नौभागः.

To **foreclose,** *v.* प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं).—(Foreclose a mortgage) न्यासकारिणः ऋणमोक्षण-क्षमताम् अपनी (c. 1. -नयति -नेतुं).

Foreclosure, *s.* प्रतिबन्धनं, प्रतिषेधः, अवरोधनं, ऋणमोक्षणक्षमताहरणं.

Foredeck, *s.* नौकापृष्ठस्य पूर्व्वभागः or अग्रभागः, पूर्व्वपृष्ठं, अग्रपृष्ठं.

To **fore-determine,** *v. a.* अग्रे निश्चि (c. 5. -चिनोति -चेतुं) or निर्णी (c. 1. -णयति -णेतुं).

Fore-determined, *p. p.* पूर्व्वनिश्चितः -ता -तं, पूर्व्वनिर्णीतः -ता -तं, अग्रविचारितः -ता -तं.

To **foredoom,** *v. a.* अग्रे or पूर्व्वं निर्दिश् (c. 6. -दिशति -देष्टुं) or प्रकॢप् (c. 10. -कल्पयति -यितुं) or विचर् in caus. (-चारयति -यितुं).

Forefathers, *s. pl.* पूर्व्वाः *m. pl.*, पूर्व्वपुरुषाः *m. pl.*, पूर्व्वजाः *m. pl.*, पितृलोकः, पितरः *m. pl.*, पितृपितामहादि *n.*, वृद्धाः *m. pl.*; 'practice of forefathers,' वृद्धाचारः.

To **forefend,** *v. a.* निवृ (c. 10. -वारयति -यितुं), प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिकृ.

Forefinger, *s.* प्रदेशिनी, प्रदेशनी, देशिनी, देशी *m.* (न्), तर्ज्जनी, तरिता.

Forefoot, *s.* अश्वादिचतुष्पदजन्तूनां पूर्व्वपादः or सम्मुखीनपादः.

To **forego,** *v. a.* अवसृज् (c. 6. -सृजति -स्रष्टुं), उत्सृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हा (c. 3. जहाति, हातुं), उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्.

Foregone, *s.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, अवसृष्टः -ष्टा -ष्टं.

Foreground, *s.* चित्रगतभूमेर् अग्रभागः or पूर्व्वभागः.

Forehead, *s.* ललाटं, अलिकं, अलीकं, भालं, गोधिः *m.*, मुखः -खं, ललाटतटं, ललाटपट्टं, लकं, निटलं, गण्डशैलः, महाशङ्खः; 'having a high forehead,' उच्चललाटः -टा -टं; 'the open forehead,' ललाटफलकं.

Foreign, *a.* विदेशीयः -या -यं, वैदेशिकः -की -कं, विदेशी -शिनी -शि (न्), पारदेशिकः -की -कं, परदेशी -शिनी -शि (न्), विदेशजः -जा -जं, अन्यदेशीयः -या -यं, अन्यदेशजः -जा -जं, अन्यदेशोद्भवः -वा -वं, भिन्नदेशीयः -या -यं; 'a foreign country,' विदेशः, वहिर्देशः, देशान्तरं, अन्यदेशः.—(Extraneous) वहिर्भवः -वा -वं, वहिर्भूतः -ता -तं, वहिःस्थः -स्था -स्थं, वाह्यः -ह्या -ह्यं.—(Not pertaining) असम्बन्धी -न्धिनी -न्धि (न्), अनन्वितः -ता -तं, असम्पर्कीयः -या -यं.

Foreigner, *s.* विदेशी *m.* (न्), विदेशीयः, वैदेशिकः, परदेशी *m.* (न्), पारदेशिकः, पारदेश्यः, भिन्नदेशीयः, वहिर्देशजः, विदेशादागतः, देशान्त-रादागतः, वहिर्देशोद्भवः, वैदेश्यः.

Foreignness, *s.* वाह्यत्वं, वहिर्भूतत्वं, दूरत्वं, असम्बन्धः, असम्पर्कः.

To **fore-imagine,** *v. a.* अग्रे मन् (c. 4. मन्यते, मन्तुं) or चिन्त् (c. 10. चिन्तयति -यितुं).

To **fore-judge,** *v. a.* अग्रे or पूर्व्वं विचर् (c. 10. -चारयति -यितुं) निर्णी (c. 1. -णयति -णेतुं).

To **fore-know,** *v. a.* अग्रे or पूर्व्वं ज्ञा (c. 9. जानाति, ज्ञातुं) or विद् (c. 2. वेत्ति, वेदितुं) or निरूप् (c. 10. -रूपयति -यितुं) or बुध् (c. 4. बुध्यते, बोद्धुं), भविष्यद् ज्ञा, प्रवेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्व्वं लक्ष्यीकृ.

Foreknowledge, *s.* अग्रज्ञानं, पूर्व्वज्ञानं, अग्रनिरूपणं, भविष्यज्ज्ञानं, भावि-ज्ञानं, प्रवेक्षणं, प्रदर्शनं, पूर्व्वलक्ष्यं, अग्रदृष्टिः *f.*, पूर्व्वदृष्टिः *f.*

Foreknown, *p. p.* पूर्व्वज्ञातः -ता -तं, अग्रज्ञातः -ता -तं, अग्रनिरूपितः -ता -तं.

Foreland, *s.* अन्तरीपः -पं, समुद्रमध्ये महाद्वीपवहिःस्थो भूमिभागः, उदग्र-भूमिः *f.*, उदग्रभूः *f.*, उदग्रस्थलं, महाद्वीपनासिका, समुद्रनासिका.

Forelock, *s.* ललाटरुहः -हं, ललाटजः -जं, केशपाशी, ललाटकेशः, मस्तकाग्रकेशः, मस्तकाग्ररुहः केशपाशः or केशपक्षः.

Foreman, *s.* (Of a jury) द्वादशप्रमाणपुरुषाग्रः, द्वादशमध्यस्थपुरुषमुखं, प्रधानमध्यस्थः, मुख्यप्रमाणपुरुषः.—(Superintendant) कार्य्याधिष्ठाता *m.* (तृ), अधिकर्म्मिकः, कार्य्याधीशः, कार्य्याध्यक्षः, कार्य्याधिकृतः, श्रेष्ठी *m.* (न्), कर्म्म कुर्व्वताम् अधिष्ठाता *m.*

FOREMAST, *s.* नौकाग्रस्थः कूपकः, नौकाग्रभागे गुणवृक्षकः, अग्रकूपकः.

FORE-MENTIONED, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FOREMOST, *a.* अग्रः -ग्रा -ग्रं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, प्राग्र्यः -ग्र्या -ग्र्यं, प्रधानः -ना -नं, प्रथमः -मा -मं, उत्तमः -मा -मं, उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, सर्व्वाग्रस्थः -स्था -स्थं; 'first in rank,' प्रथमपदस्थः -स्था -स्थं.

FORENAMED, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वाभिहितः -ता -तं, पूर्व्वोदाहृतः -ता -तं.

FORENOON, *s.* पूर्व्वाह्णः, प्राह्णः, पूर्व्वाह्णकालः; 'in the forenoon,' प्राह्णे, पूर्व्वाह्णे, प्राह्णेतमां; 'relating to it,' प्राह्णेतनः -नी -नं, पूर्व्वाह्णेतनः -नी -नं.

FORENSIC, *a.* व्यावहारिकः -की -कं or व्यवहारिकः, व्यवहारी -रिणी -रि (न्), विचारसभासु व्यवहारितः -ता -तं, विचारस्थानसम्बन्धीयः -या -यं.

To FORE-ORDAIN, *v. a.* अग्रे or पूर्व्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रक्लृप् (c. 10. -कल्पयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or नियुज् (c. 7. -युनक्ति -योक्तुं) or विधा (c. 3. -दधाति -धातुं).

FORE-ORDAINED, *p. p.* अग्रनिरूपितः -ता -तं, पूर्व्वनिर्दिष्टः -ष्टा -ष्टं, पूर्व्वप्रकल्पितः -ता -तं.

FOREPART, *s.* अग्रभागः, पूर्व्वभागः, आदिभागः, प्रथमभागः, सम्मुखभागः.

FORERANK, *s.* अग्रपदं, प्रथमपदं, प्रधानपदं, मुख्यपदं, श्रेष्ठपदविः *f.*

To FORE-RUN, *v. a.* अग्रे or अग्रतः or पुरः or प्राक् सृ (c. 1. सरति, सर्त्तुं) or गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं).

FORE-RUNNER, *s.* अग्रेसरः, अग्रसरः, अग्रगः -गामी *m.* (न्), पुरोगः -गामी *m.*, प्राग्गामी *m.*, अग्रवर्त्ती *m.* (न्), अग्रगतः, पूर्व्वपुरुषः.

FORESAID, *p. p.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FORESAIL, *s.* नौकाग्रस्थकूपकालम्बितं वायुवसनं or वातवसनं.

To FORESAY, *v. a.* अग्रे or पूर्व्वं वद् (c. 1. वदति -दितुं) or प्रवद्, भविष्यद् वद्.

To FORESEE, *v. a.* प्रदृश् (c. 1. -पश्यति -द्रष्टुं), उद्दृश्, प्रवेक्ष for प्रावेक्ष (c. 1. -ईक्षते -क्षितुं), अग्रे or पूर्व्वं दृश्, अनागतं or परिणामं or भविष्यद् दृश् or समीक्ष्, अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or निरूप् (c. 10. -रूपयति -यितुं).

FORESEEING, *part.* प्रपश्यन् -श्यन्ती -श्यत् (त्), अग्रदर्शी -र्शिनी -र्शि (न्), अनागतदर्शी &c., पूर्व्वदर्शी &c., भविष्यद्दर्शी &c., दूरदर्शी &c., अन्तरज्ञः -ज्ञा -ज्ञं, प्रवेक्षन् &c. for प्रावेक्षन् &c.

FORESEEN, *p. p.* पर्व्वेक्षितः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, सन्दृष्टः -ष्टा -ष्टं, सन्दृश्यमानः -ना -नं, अग्रनिरूपितः -ता -तं.

To FORESHADOW, *v. a.* पूर्व्ववर्णनं कृ, पूर्व्वमूर्त्तिं कृ, अग्रे रूप् (c. 10. रूपयति -यितुं).

To FORESHAME, *v. a.* लज्ज् in caus. (लज्जयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

FORE-SHIP, *s.* नावः पूर्व्वभागः or अग्रभागः, नौकाग्रभागः.

To FORESHORTEN, *v. a.* मूर्त्तिं चित्रसमर्पणात् सम्मुखभागे ह्रस् (c. 10. ह्रासयति -यितुं) or संहृ (c. 1. -हरति -हर्त्तुं) or संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

To FORESHOW, *v. a.* प्रदृश् in caus. (-दर्शयति -यितुं), अग्रे or पूर्व्वं दृश् or सूच् (c. 10. सूचयति -यितुं), भविष्यत् सूच् or वद् (c. 1. वदति -दितुं).

FORESHOWN, *p. p.* प्रदर्शितः -ता -तं, अग्रसूचितः -ता -तं, पूर्व्वसूचितः -ता -तं.

FORESIGHT, *s.* पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, प्रवेक्षणं, प्रदर्शनं, परिणामदृष्टिः *f.*, अग्रनिरूपणं, भविष्यद्दर्शनं, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, परिवेदना.

FORESKIRT, *s.* अग्रस्थो वस्त्राञ्चलः, परिधानस्य अग्राञ्चलः, अग्रतो वसनान्तं.

To FORESPEAK, *v. a.* अग्रे वद् (c. 1. वदति -दितुं), प्रवद्, प्रव्याहृ (c. 1. -हरति -हर्त्तुं).

FORESPENT, *a.* क्षीणबलः -ला -लं, श्रान्तः -न्ता -न्तं, खिन्नः -न्ना -न्नं.

FORESPOKEN, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FOREST, *s.* अरण्यं -ण्यी -ण्यानी, वनं -नी, अटविः -वी *f.*, गहनं, गहः, काननं, विपिनं, जङ्गलः -लं, दावः, दवः, कान्तारः -रं, कुञ्जं, रिक्तं, तल्कं; 'forest on fire,' दावः, दावाग्निः *m.*, मुखाग्निः, मङ्गलः

FOREST, *a.* वन्यः -न्या -न्यं, आरण्यः -ण्यी -ण्यं -ण्यकः -का -कं, जाङ्गलः -ला -लं, जाङ्गलः -ली -लं; 'produced in a forest,' वनोद्भवः -वा -वं, अरण्यजः -जा -जं -जातः -ता -तं, अरण्यभवः -वा -वं, अरण्योत्पन्नः -न्ना -न्नं, अरण्यसम्भवः -वा -वं, अरण्य or वन in comp.; as, 'a forest tree,' वनपादपः, अरण्यवृक्षः, वनराजिः *m.*, वनस्पतिः *m.*, वन्यतरुः *m.*

To FORESTALL, *v. a.* (Take beforehand) अग्रे or पूर्व्वं or पूर्व्वतो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -दत्ते -दातुं), अग्रे गृहीत्वा निवृ (c. 10. -वारयति -यितुं) or निषिध् (c. 1. -षेधति -षेद्धुं).—(Buy beforehand) पूर्व्वं क्री (c. 9. क्रीणाति, क्रेतुं), पूर्व्वक्रयं कृ, प्रख्या (c. 2. -ख्याति -तुं).

FORESTALLED, *p. p.* पूर्व्वगृहीतः -ता -तं, पूर्व्वक्रीतः -ता -तं, प्रख्यातः -ता -तं.

FORESTALLER, *s.* पूर्व्वक्रेता *m.* (तृ), अग्रक्रयी *m.* (न्), सर्व्वपण्यानि विक्रयस्थानानयनात् पूर्व्वं क्रीत्वा मूल्यवर्धकः.

FORESTER, *s.* (Inhabitant of a forest) वनवासी *m.* (न्), अरण्यवासी *m.*, वनस्थायी *m.* (न्), वनस्थः, वनेचरः, वनचरः, वनचारी *m.* (न्), वनवर्त्ती *m.* (न्), वनौकाः *m.* (स्), अरण्यौकाः *m.* (स्), वनाश्रयः, वनव्यवहारी *m.* (न्), आरण्यकः, अरण्यसद् *m.*—(Overseer of the forests) अरण्याध्यक्षः, अरण्यरक्षकः.

FORETASTE, *s.* पूर्व्वभुक्तिः *f.*, अग्रभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वास्वादनं, अग्रोपभोगः, पूर्व्वोपभोगः, पूर्व्वानुभवः, पूर्व्वज्ञानं, अग्रज्ञानं.

To FORETASTE, *v. a.* अग्रे or पूर्व्वं or अग्रतो भुज् (c. 7. भुंक्ते, भोक्तुं) or उपभुज् or अनुभू or आस्वाद् (c. 1. -स्वादते -दितुं), पूर्व्वभुक्तिं कृ, पूर्व्वस्वादनं कृ.

FORETASTED, *p. p.* पूर्व्वभुक्तः -क्ता -क्तं, पूर्व्वास्वादितः -ता -तं, पूर्व्वानुभूतः -ता -तं.

To FORETELL, *v. a.* अग्रे or अग्रतः or पूर्व्वं वद् (c. 1. वदति -दितुं) or प्रवद्, भविष्यद् [illegible] (c. 2. वक्ति -क्तुं), प्रदृश् in caus. (-दर्शयति -यितुं), अग्र दृश्, [illegible] ज्ञापयति -यितुं).

FORETELLER, *s.* अग्रवादी *m.* (न्), भविष्यद्वक्ता *m.* (क्तृ), भविष्यद्वादी *m.*, भाविवक्ता *m.*, अनागतज्ञापकः, प्रदर्शकः, भाविदर्शकः, दैवज्ञः.

To FORETHINK, *v. a.* पूर्व्वं or अग्रे चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन्त् or विमृश् (c. 6. -मृशति -म्रष्टुं) or निरूप् (c. 10. -रूपयति -यितुं), पूर्व्वविवेचनं कृ.

FORETHOUGHT, *s.* पूर्व्वचिन्ता, अग्रचिन्ता, पूर्व्वविवेचनं -ना, अग्रविवेचनं, पूर्व्वविचारणं -णा, अग्रनिरूपणं, पूर्व्वविमर्शः, प्रसमीक्षा, प्रवेक्षणं, पूर्व्वदृष्टिः *f.*, दीर्घदृष्टिः *f.*, परिणामदृष्टिः, परिवेदना.

To FORETOKEN, *v. a.* अग्रे or पूर्व्वं दृश् (c. 10. दर्शयति -यितुं) or सूच् (c. 10. सूचयति -यितुं), प्रदृश्, पूर्व्वलक्षणं or पूर्व्वचिह्नं दा, पूर्व्वलक्षणेन भविष्यत् सूच्.

FORETOKEN, *s.* पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, भाविलक्षणं, भाविचिह्नं, भविष्यल्लक्षणं, भविष्यल्लिङ्गं.

FORETOLD, *p. p.* पूर्व्वकथितः -ता -तं, प्रदर्शितः -ता -तं, प्राक्सम्भवादुक्तः -क्ता -क्तं.

FORE-TOOTH, *s.* अग्रदन्तः, राजदन्तः, सम्मुखदन्तः, मुख्यदन्तः.

FORETOP, *s.* मस्तकाग्रकेशः.—(Of a ship) कूपकाग्रे मञ्चकः.

FOR-EVER, *adv.* नित्यं, सर्व्वकालं, अनन्तकालं, शाश्वतीः समाः.

FORE-WARD, *s.* सेनामुखं, ध्वजिनीमुखं, सेनाग्रं, रणमूर्द्धा *m.* (न्), शिरः *n.* (स्).

To FORE-WARN, *v. a.* अग्रे or पूर्व्वं बुध् (c. 10. बोधयति -यितुं) or प्रबुध् or प्रत्यादिश् (c. 6. -दिशति -देष्टुं) or उपदिश् or सन्दिश् or ज्ञा in caus. (ज्ञापयति -यितुं), पूर्व्वलक्षणं दा.

FORE-WARNED, *p. p.* पूर्व्वबोधितः -ता -तं, अग्रविज्ञापितः -ता -तं, पूर्व्वोपदिष्टः -ष्टा -ष्टं.

FORE-WARNING, *s.* अग्रप्रत्यादेशः, पूर्व्वबोधनं, पूर्व्वोपदेशः, पूर्व्वविज्ञप्तिः *f.*

To FORFEIT, *v. a.* दण्ड् in pass. (दण्ड्यते), दण्डं दा; 'he forfeits the eighth part of his property,' स्ववित्तस्य अष्टमांशं दण्ड्यते.—(Lose one's right) स्वाधिकारात् or स्वस्वत्वाद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) or परिभ्रंश् or प्रभ्रंश् or च्यु (c. 1. च्यवते, च्योतुं) or प्रच्यु, हा in pass. (हीयते) with instr. or abl. c., प्रहा; 'he forfeits his right,' तस्मात् स्वत्वम् अपवर्ज्यते; 'his kingdom,' राज्यात् प्रभ्रश्यति.

FORFEIT, *s.* दण्डः, धनदण्डः, अर्थदण्डः, हारितं, विहापितं, निक्षेपः, न्यासः.

FORFEITABLE, *a.* दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डनीयः -या -यं, हेयः -या -यं.

FORFEITED, *p. p.* दण्डितः -ता -तं, भ्रष्टः -ष्टा -ष्टं, हीनः -ना -नं, च्युतः -ता -तं; 'one who has forfeited his right,' हृताधिकारः -रा -रं, च्युताधिकारः -रा -रं, अधिकाराद्भ्रष्टः -ष्टा -ष्टं; 'all his property,' सर्व्वस्वदण्डः -ण्डा -ण्डं, हृतसर्व्वस्वः -स्वा -स्वं; 'his kingdom,' राज्यात्प्रभ्रष्टः -ष्टा -ष्टं.

FORFEITURE, *s.* हानिः *f.*, भ्रंशः, अपहारः, च्युतिः *f.*, नाशः, अपवर्ज्जनं, वृद्धिः *f.*, दण्डदानं; 'of right,' स्वत्वहानिः *f.*, अधिकारहानिः, अधिकारभ्रंशः; 'of property,' वित्तहानिः *f.*, दायापवर्ज्जनं.

FORGE, *s.* कुटिलिका, उध्मानं, अग्निकुण्डं, तप्तलोहघटनस्थानं, निर्म्माणस्थानं.

To FORGE, *v. a.* (Metals) तप्तलोहादि मुद्गरादिना ताडयित्वा नानारूपेण घट् (c. 10. घटयति -यितुं) or कुटिलिकायां विलाप्य घट् or निर्म्मा (c. 2. -माति -तुं).—(Make) घट्, निर्म्मा, कॢप् (c. 10. कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं), विरच् (c. 10. -रचयति -यितुं).—(Counterfeit) छलेन or कपटेन कॢप् or निर्म्मा, कूटं कृ, कपटं कृ; 'forge a writing,' कपटलेख्यं कृ, कूटलेखं कृ.

FORGED, *p. p.* (Fabricated) घटितः -ता -तं, कल्पितः -ता -तं, रचितः -ता -तं, निर्म्मितः -ता -तं.—(Counterfeit) काल्पनिकः -की -कं, कृत्रिमः -मा -मं, कपटी -टिनी -टि (न्), कूट or कपट in comp.; as, 'a forged document,' कपटलेख्यं, कूटलेखः; 'a forged decree,' कूटशासनं; 'forged coin,' कूटस्वर्णं.

FORGER, *s.* कूटकः, कूटकृत् *m.* -कारः, कपटलेख्यकारी *m.* (न्), कूटलेख्यकारकः, कपटिकः, कपटकारी *m.*, कृत्रिमलेखकृत्.

FORGERY, *s.* कूटकरणं, कपटकरणं, कपटलेख्यकरणं, कूटलेख्यकरणं, कृत्रिमलेखकरणं, कूटता.—(That which is counterfeited) कपटलेखः.

To FORGET, *v. a.* विस्मृ (c. 1. -स्मरति -ते -स्मर्त्तुं), न स्मृ, अपस्मृ, स्मृतेर् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) with nom. of thing forgotten, स्मृत्यपेतः -ता -तं भू, विस्मरणात् परित्यज् (c. 1. -त्यजति -त्यक्तुं), अवमर्षणं कृ.

FORGETFUL, *a.* विस्मरणशीलः -ला -लं, विस्मारकः -का -कं, नष्टसंस्मृतिः -तिः -ति, नष्टस्मृतिः -तिः -ति, अपस्मृतिः -तिः -ति, अनवहितः -ता -तं, प्रमत्तः -त्ता -त्तं.

FORGETFULNESS, *s.* विस्मृतिः *f.*, विस्मरणं, विस्मरणशीलता, अस्मृतिः *f.*, अस्मरणं, अपस्मारः, प्रस्मृतिः *f.*, स्मृतिभ्रंशः, स्मृतिहानिः *f.*, स्मृतिनाशः, भ्रमः.

FORGING, *s.* घटनं -ना, निर्म्माणं, कल्पनं, रचना, कूटकरणं.

To FORGIVE, *v. a.* क्षम् (c. 1. क्षमते -ति, क्षन्तुं), संक्षम्, मुच् (c. 6. मुञ्चति, मोक्तुं), विमुच्, अवसृज् (c. 6. -सृजति -स्रष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं), मृष् (c. 4. मृष्यति, मर्षितुं, मर्ष्टुं, c. 10. मर्षयति -यितुं), मृज् (c. 2. मार्ष्टि -र्ष्टुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं), समनुज्ञा, सह् (c. 1. सहते, सोढुं), निर्यत् (c. 10. -यातयति -यितुं); 'forgive injuries,' अपराधान् क्षम्; 'forgive sins,' पापानि मृज् or अवसृज्; 'forgive a debt,' ऋणं त्यज्.

FORGIVEN, *p. p.* क्षान्तः -न्ता -न्तं, दोषमुक्तः -क्ता -क्तं, पापमुक्तः -क्ता -क्तं, विमोचितः -ता -तं, अवमृष्टः -ष्टा -ष्टं, पापमार्ज्जितः -ता -तं.

FORGIVENESS, *s.* क्षमा, क्षान्तिः *f.*, पापमोचनं, पापमुक्तिः *f.*, दोषमुक्तिः *f.*, अपराधसहिष्णुता, पापमार्ज्जनं, विमोचनं, कृपा, दया, मर्षणं; 'of a debt,' ऋणत्यागः.

FORGIVING, *a.* क्षमी -मिणी -मि (न्), क्षमावान् -वती -वत् (त्), क्षमान्वितः -ता -तं, क्षमायुक्तः -क्ता -क्तं, अपराधसहिष्णुः -ष्णुः -ष्णु, दयालुः -लुः -लु, कृपालुः -लुः -लु.

FORGOTTEN, *p. p.* विस्मृतः -ता -तं, अस्मृतः -ता -तं, स्मृतिभ्रष्टः -ष्टा -ष्टं, स्मृत्यपेतः -ता -तं, अन्तर्गतः -ता -तं.

FORK, *s.* खाद्यमांसाद्युत्तोलनार्थं शूलविशेषः, कण्टकः; 'two-pronged,' द्विशिखशूलः, द्व्यग्रशूलः; 'three-pronged,' त्रिशिखशूलः, त्र्यग्रशूलः.

To FORK, *v. n.* (Divide in two) द्विशिखः -खा -खं भू, द्विशिखारूपेण भिन्नीभू or विभिद् in pass. (-भिद्यते), द्विशिखीभू.

To FORK, *v. a.* पूर्व्वोक्तशूलेन उत्तुल् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

FORKED, FORKY, *a.* द्विशिखः -खा -खं, द्व्यग्रः -ग्रा -ग्रं, वज्रः -ज्रा -ज्रं, कण्टकाकारः -रा -रं; 'having a forked tongue,' द्विजिह्वः -ह्वा -ह्वं, द्विरसनः -ना -नं; 'forked lightning,' विद्युल्लता, तडिल्लता, छौत्रं.

FORLORN, *a.* गतिहीनः -ना -नं, अगतिकः -का -कं, अशरणः -णा -णं, निःशरणः -णा -णं, सहायहीनः -ना -नं, निःसहायः -या -यं, असहायः -या -यं, अनाथः -था -थं, निराश्रयः -या -यं, एकाकी -किनी -कि (न्), निरवलम्बः -म्बा -म्बं; 'on the forlorn hope,' त्यक्तजीवितः -ता -तं, त्यक्तप्राणः -णा -णं.

FORM, *s.* (Shape) आकारः, आकृतिः *f.*, रूपं, मूर्त्तिः *f.*, संस्कारः, संस्थानं, वरिमा *m.* (न्), विग्रहः, वपुः *n.* (स्), वर्पः *n.* (स्); 'in the form of a man,' नररूपेण; 'of regular form,' आकारशुद्धः -द्धा -द्धं.—(Manner, fashion) प्रकारः, रीतिः *f.*, विधः, विधिः *m.*, मार्गः, विधानं, प्रकृतिः *f.*, भेदः.—(Established rule) विधिः *m.*, नियमः, स्थितिः *f.*, सूत्रं, धर्म्मः, मर्य्यादा, व्यवस्था, क्रमः, आचारः, चर्य्या, व्यवहारः.—(Method) क्रमः.—(Ceremony) नियमः, विधिः *m.* संस्कारः.—(Arrangement) विन्यासः, पर्य्यायः, प्रतिविधानं, विरचना.—(Long seat) दीर्घासनं, दीर्घपीठं, फलकं.—(Class of scholars) सहाध्यायिनां पंक्तिः *f.*, छात्रपदं.—(Bed of a hare) शशकशय्या, शशकासनं. 'in due form,' यथाविधि, यथावत्, विधिवत्, विधितस्.

To FORM, *v. a.* कृ (c. 8. करोति, कुरुते, कर्त्तुं), संकृ, अभिकृ, निर्म्मा (c. 2. -माति, c. 3. -मिमीते, c. 4. -मायते -मातुं), विनिर्म्मा, कॢप् (c. 10. कल्पयति -यितुं), संकॢप्, विधा (c. 3. -दधाति -धातुं), रच् (c. 10. रचयति -यितुं), विरच्, घट् (c. 10. घटयति -यितुं); 'to form a plan,' उपायं प्रचिन्त् (c. 10. -चिन्तयति -यितुं) or मनसा कॢप्; 'to form in clots, as blood,' रक्तगुल्मान् बन्ध् (c. 9. बध्नाति, बन्द्धुं); 'to form an alliance,' सन्धा, सन्धिं कृ.

FORMAL, *a.* (Agreeable to established rule) नैयमिकः -की -कं, वैधिकः -की -कं, नियमानुसारी -रिणी -रि (न्), रीत्यनुसारी &c., व्यावहारिकः -की -कं.—(Strictly ceremonious) अत्याचारः -रा -रं, आचारसेवी -विनी -वि (न्), सभ्याचारनिष्ठः -ष्ठा -ष्ठं, नियमनिष्ठः -ष्ठा -ष्ठं, नियमशीलः -ला -लं.—(Exact) यथार्थः -र्था -र्थं, याथार्थिकः -की -कं, समञ्जसः -सा -सं.—(Constituent) वास्तवः -वी -वं.

FORMALIST, *s.* नियममात्रसेवी *m.* -विनी *f.* (न्), धर्म्मक्रियामात्रनिष्ठः *m.* -ष्ठा *f.*, धर्म्मकृत्यमात्रावलम्बी *m.* -म्बिनी *f.* (न्), यमान् अकुर्व्वाणो नियमान् केवलान् भजन् *m.* (त्).

FORMALITY, *s.* (Observance of forms) नियममात्रसेवनं, धर्म्मक्रियामात्रनिष्ठा.—(Ceremoniousness) अत्याचारसेवनं, अत्यादरः, सभ्यरीतिनिष्ठा, एकान्ततः सभ्यनियमसेवनं; 'enough of this formality,' कृतं कृतम् आदरेण.

FORMALLY, *adv.* (According to established rule) विधिवत्, यथाविधि, नियमानुसारेण, रीत्यनुसारात्. — (Ceremoniously) सकलादरेण, सत्यादरपूर्व्वं, सत्याचारसेवनात्, सभ्यनियमानुसारात्.

FORMATION, *s.* निर्म्माणं, निर्म्मितिः *f.*, रचना, विरचनं -ना, कल्पनं -ना, विधानं, करणं, घटनं, उत्पादनं, उत्पत्तिः *f.*, जननं, उद्भवः, सम्भवः, सृष्टिः *f.*, सर्ज्जनं.

FROWNED UPON, *p. p.* कटाक्षितः -ता -तं, भ्रूभङ्गेन निरीक्षितः -ता -तं.

FROWNING, *a.* नतभ्रूः -भ्रूः -भ्रु, संहतभ्रूः -भ्रूः -भ्रु, सभ्रूभङ्गः -ङ्गा -ङ्गं, सभ्रूक्षेपः -पा -पं, सभ्रूकुटीमुखः -खी -खं, सकटाक्षः -क्षा -क्षं, काक्षः -क्षा -क्षं.

FROWNINGLY, *adv.* सभ्रूभङ्गं, भ्रूभङ्गेन, सभ्रूक्षेपं, भ्रूक्षेपेण, कटाक्षेण, सकटाक्षं.

FROZEN, *a.* or *p. p.* अतिशीतत्वाद् घनीभूतः -ता -तं or संहतीभूतः -ता -तं or श्यानीभूतः -ता -तं, हिमसंहतः -ता -तं, अवश्यानः -ना -नं, अवशीतः -ता -तं, अवशीनः -ना -नं, शीतः -ता -तं, शीनः -ना -नं, जडीभूतः -ता -तं, जडीकृतः -ता -तं.

FRUCTIFEROUS, *a.* फलदः -दा -दं, फलदायी -यिनी -यि (न्), फली -लिनी -लि (न्).

FRUCTIFICATION, *s.* सफलीकरणं, फलदीकरणं, अवन्ध्यीकरणं, आधानं.

To FRUCTIFY, *v. a.* सफल (nom. सफलयति -यितुं), सफलीकृ, बहुफलदीकृ, फलितं -तां -तं कृ, स्फीतीकृ, अवन्ध्यीकृ.

FRUCTUOUS, *a.* फली -लिनी -लि (न्), फलवान् -वती -वत् (त्), फलदः -दा -दं.

FRUGAL, *a.* परिमितव्ययः -या -यं, मितव्ययी -यिनी -यि (न्), स्वल्पव्ययः -या -यं, अव्ययः -या -यं, व्ययपराङ्मुखः -खी -खं, अबहुप्रदः -दा -दं, अबहुदः -दा -दं, अमुक्तहस्तः -स्ता -स्तं, परिमितः -ता -तं, कृपणः -णा -णं.

FRUGALITY, *s.* परिमितव्ययः, मितव्ययः, स्वल्पव्ययः, अमुक्तहस्तत्वं, व्ययपराङ्मुखता, परिमितत्वं, कृपणत्वं.

FRUGALLY, *adv.* परिमितव्ययेन, मितव्ययेन, स्वल्पव्ययेन, अमुक्तहस्तेन, अल्पव्ययपूर्व्वं, परिमितं, कृपणं, सकार्पण्यं.

FRUIT, *s.* (Produce of a tree or plant) फलं, वृक्षादिफलं, प्रसवः, वृक्षोत्पन्नं.—(Offspring) अपत्यं, सन्तानः, सन्ततिः *f.*, प्रजा, प्रसूतिः *f.*, उत्पत्तिः *f.*—(Effect, consequence) उत्पन्नं, उत्पत्तिः *f.*, उद्भूतं, कार्य्यं, वृत्तं, फलं, कर्म्मफलं.—(Profit) फलं, लाभः, अर्थः; 'moist fruit,' शलाटुः *m. f. n.*; 'dry fruit,' वानः -ना -नं; 'collection of fruit,' फलोच्चयः; 'fruit season,' फलकालः, फलसमयः; 'fruit-stalk,' शस्यमञ्जरी, प्रसवबन्धनं; 'to bear fruit,' फल् (c. 1. फलति -लितुं), फलं दा; 'bearing fruit,' फलनिष्पत्तिः *f.*

FRUIT-BEARER, *s.* फलदाता *m.* (तृ), फलग्राही *m.* (न्), फलेग्राही *m.*, फलदः.

FRUIT-BEARING, *a.* फलदः -दा -दं -दायी -यिनी -यि (न्), फलग्रहिः -हिः

-हि, फलेग्रहि: -हिः -हि, फली -लिनी -लि (न्), फलवान् -वती -वत् (त्), फलशाली -लिनी -लि (न्).

FRUITERER, *s.* फलविक्रेता *m.* (तृ), फलक्रयविक्रयिकः, फलादिविक्रयी *m.* (न्).

FRUITERY, *s.* (Fruit collectively) फलत्वं, फलानि *n. pl.*, फलोच्चयः. —(Fruit-loft) फलस्थानं, फलागारं.

FRUITFUL, *a.* फली -लिनी -लि (न्), फलवान् -वती -वत् (त्), बहुफलः -ला -ली -लं, फलितः -ता -तं, सफलः -ला -लं, प्रचुरफलः -ला -लं, फलदः -दा -दं -दायी -यिनी -यि (न्), बहुफलदः -दा -दं, फलोत्पादकः -का -कं, फलेग्रहिः -हिः -हि, कृतफलः -ला -लं, फलोपेतः -ता -तं, अवन्ध्यः -न्ध्या -न्ध्यं.—(Prolific) बहुप्रजः -जा -जं, बहुप्रजावान् -वती -वत् (त्), बहुपत्यः -त्या -त्यं, प्रजनिष्णुः -ष्णुः -ष्णु.—(Productive of) उत्पादकः -का -कं, जनकः -का -कं, साधकः -धिका -कं.

FRUITFULLY, *adv.* सफलं, सबहुफलं, फलबाहुल्येन, बहुशस्, प्रचुरं.

FRUITFULNESS, *s.* साफल्यं, सफलता, फलवत्त्वं, फलिता, फलबाहुल्यं, फलप्राचुर्य्यं, फलोत्पादकत्वं. — (Fecundity) प्रजनिष्णुता, बहुप्रजावत्त्वं, बहुपत्यत्वं, स्फीतिः *f.*, प्रसवित्वं, साधकत्वं.—(Productiveness) उत्पादकता, जनकता.

FRUITION, *s.* भोगः, भुक्तिः *f.*, उपभोगः, परिभोगः, फलभोगः, अनुभवः, आस्वादः -दनं, सुखभोगः, सुखास्वादः.

FRUITIVE, *a.* फलभोगी -गिनी -गि (न्), उपभोगी &c., परिभोक्ता -क्त्री -क्तृ (तृ).

FRUITLESS, *a.* निष्फलः -ला -लं, विफलः -ला -लं, अफलः -ला -लं, फलहीनः -ना -नं, फलापेतः -ता -तं, मोघः -घा -घं, अनर्थः -र्था -र्थं -र्थकः -का -कं, व्यर्थः -र्था -र्थं, निरर्थकः -का -कं, अपार्थः -र्था -र्थं, अनुपयुक्तः -क्ता -क्तं, निष्प्रयोजनः -ना -नं, वन्ध्यः -न्ध्या -न्ध्यं.

FRUITLESSLY, *adv.* निष्फलं, विफलं, मोघं, व्यर्थं, वृथा, मुधा.

FRUITLESSNESS, *s.* निष्फलता, विफलता, वैफल्यं, अफलत्वं, फलहीनता, व्यर्थता, वैयर्थ्यं, अनर्थकत्वं, मोघता, अनुपयोगः, वन्ध्यत्वं.

FRUIT-TIME, *s.* फलकालः, फलसमयः, फलावचयकालः, फलसङ्ग्रहकालः.

FRUIT-TREE, *s.* फलदः, फलग्राही *m.* (न्), सफलवृक्षः.

FRUITY, *a.* फलसरसः -सा -सं, फलरसोपेतः -ता -तं, फलोपमः -मा -मं.

FRUMENTACEOUS, *a.* गोधूममयः -यी -यं, धान्यमयः -यी -यं, शस्यमयः -यी -यं.

FRUMENTY, *s.* *See* FURMENTY.

To FRUSTRATE, *v. a.* खण्ड् (c. 10. खण्डयति -यितुं), प्रतिहन् (c. 2. -हन्ति -न्तुं), व्याहन्, विफलीकृ, निष्फलीकृ, मोघीकृ, व्यर्थीकृ, सङ्कल्पं हन् or भञ्ज् (c. 7. भनक्ति, भंक्तुं), वृथा कृ, मुधा कृ, यत्नं or आशां खण्ड्, भग्नाशं -शां -शं कृ, विफलं -लां -लं कृ, तिरोभू in caus. (-भावयति -यितुं); 'to be frustrated,' वृथा भू, मुधा भू, तिरोभू.

FRUSTRATE, *a.* निष्फलः -ला -लं, विफलः -ला -लं, मोघः -घा -घं, व्यर्थः -र्था -र्थं, निष्प्रयोजनः -ना -नं, अनिष्पन्नः -न्ना -न्नं.

FRUSTRATED, *p. p.* खण्डितः -ता -तं, प्रतिहतः -ता -तं, व्याहतः -ता -तं, विफलीकृतः -ता -तं, मोघीकृतः -ता -तं, वृथाभूतः -ता -तं, व्यर्थीकृतः -ता -तं, भग्नोद्यमः -मा -मं; 'in one's efforts,' भग्नोद्यमः -मा -मं, खण्डितयत्नः -त्ना -त्नं, व्यर्थयत्नः -त्ना -त्नं, भग्नसङ्कल्पः -ल्पा -ल्पं; 'in one's expectations,' भग्नाशः -शा -शं, हताशः -शा -शं, खण्डिताशंसः -सा -सं, आशाविभिन्नः -न्ना -न्नं, मोघवाञ्छितः -ता -तं, अनधिगतमनोरथः -था -थं, अकृतार्थः -र्था -र्थं, भ्रष्टसङ्कल्पः -ल्पा -ल्पं.

FRUSTRATION, *s.* खण्डनं, भङ्गः, विफलीकरणं, निष्फलीकरणं, मोघीकरणं, व्यर्थीकरणं, वृथाकरणं, व्याघातः.—(Of expectation) आशाखण्डनं, आशाभङ्गः.—(Of effort) यत्नखण्डनं, यत्नव्याघातः, कर्म्मध्वंसः.

FRUSTRATIVE, FRUSTRATORY, *a.* व्यर्थकारी -रिणी -रि (न्), विफलकारी &c., मोघकारी &c., वृथाकारी &c., खण्डनकारी &c., घाती -तिनी -ति (न्), भञ्जकः -का -कं, व्याघातजनकः -का -कं.

FRUTESCENT, *a.* गुल्मी -ल्मिनी -ल्मि (न्), स्तम्बाकारः -रा -रं.

FRUTICANT, *a.* अङ्कुरितः -ता -तं, पल्लवितः -ता -तं, पल्लवी -विनी -वि (न्).

FRY, *s.* (Swarm of fish) मत्स्यसङ्घातः, मत्स्यसङ्घः, क्षुद्रमत्स्यसमूहः, क्षुद्राण्डमत्स्यसङ्घातः, पोताधानं.—(Spawn) जलाण्डकः, मीनाण्डं.—(Any thing fried) भृष्टान्नं.

To FRY, *v. a.* भ्रज्ज् (c. 6. भृज्जति -ते, भर्ष्टुं, भ्रष्टुं), भृज् (c. 1. भर्जते -र्जितुं), अम्बरीषे पच् (c. 1. पचति, पक्तुं).

To FRY, *v. n.* भृज् in pass. (भृज्यते), भृष्टः -ष्टा -ष्टं भू, पच् in pass. (पच्यते).

FRYING, *s.* भर्ज्जनं, भृज्जनं or अम्बरीषे पचनं or पाकः.

FRYING-PAN, *s.* अम्बरीषं, भ्राष्ट्रः, ऋजीषं, भृज्जनं, भर्ज्जनयन्त्रं, कटाहः, कन्दुः -न्दूः *m. f. n.*, स्वेदनी, खर्प्परिका.

FUCATED, *a.* चित्रितः -ता -तं, मिथ्यारागान्वितः -ता -तं, कपटरागान्वितः &c.

To FUDDLE, *v. a.* मद् in caus. (मदयति, मादयति -यितुं) or उन्मद्, मद्यदानेन मुह् in caus. (मोहयति -यितुं) or मूढीकृ.

To FUDDLE, *v. n.* मद् (c. 4. माद्यति, मदितुं), मत्तीभू, मद्यपानेन मूढीभू.

FUDDLED, *p. p.* मत्तः -त्ता -त्तं, मद्यपानेन उन्मत्तः -त्ता -त्तं or मूढः -ढा -ढं, मदोन्मत्तः -त्ता -त्तं, मूढबुद्धिः -द्धिः -द्धि.

FUDDLER, *s.* पानरतः, पानप्रसक्तः, मद्यपानासक्तः, पानशौण्डः.

FUDGE, *s.* अनर्थकं, आनर्थक्यं, असम्बद्धं, मृषार्थकं.

FUEL, *s.* इन्धनं, इध्मं, समित् *f.* (ध्), समिन्धनं, एधः *n.* (स्), दारुकाष्ठं, अरणिः *m. f.*, दारुं, ज्वलनार्थम् अङ्गारकाष्ठादि.

To FUEL, *v. a.* इन्धनं दा, काष्ठादीनि दारुवस्तूनि उपस्था in caus. (-स्थापयति -यितुं) or अग्नौ क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

FUGACIOUS, *a.* पलायी -यिनी -यि (न्), प्रपलायी &c., विपलायी &c., पलायनशीलः -ला -लं, पलायमानः -ना -नं, अस्थायी -यिनी -यि (न्).

FUGACIOUSNESS, FUGACITY, *s.* पलायनशीलता, अस्थायित्वं, चपलत्वं.

FUGITIVE, *a.* (Apt to flee away) प्रपलायी -यिनी -यि (न्), पलायनपरायणः -णा -णं.—(Lasting, fleeting) अस्थिरः -रा -रं, अचिरस्थायी -यिनी -यि (न्), चञ्चलः -ला -लं, चपलः -ला -लं, अशाश्वतः -ती -तं, क्षणिकः -का -कं, अनियतः -ता -तं, भङ्गुरः -रा -रं, वाष्पधर्म्मकः -का -कं, तरलः -ला -लं.

FUGITIVE, *s.* पलायी *m.* (न्), विपलायी *m.*, युद्धत्यागी *m.* (न्), सेनात्यागी *m.* -त्यक्ता *m.* (क्तृ), युद्धपराङ्मुखः.

FUGITIVENESS, *s.* चाञ्चल्यं, चञ्चलता, अस्थैर्य्यं, अस्थिरता, चापल्यं, तरलता, अचिरस्थायित्वं.

FULCRUM, *s.* उपस्तम्भः, आधारः, धारणं, अवलम्बनं, आलम्बः, आश्रयः.

To FULFIL, *v. a.* (Complete) सम्पॄ in caus. (-पूरयति -यितुं), पॄ, समभिपॄ, सम्पूर्णीकृ, सम्पद् in caus. (-पादयति -यितुं), निष्पद्, समाप् in caus. (-आपयति -यितुं).—(Accomplish, carry into effect) साध् (c. 10. साधयति -यितुं), संसाध्, निर्वह् in caus. (-वाहयति -यितुं), सफलं -लां -लं कृ, सफलीकृ, तीर् (c. 10. तीरयति -यितुं); 'to fulfil a promise,' प्रतिज्ञां शुध् (c. 10. शोधयति -यितुं) or अपवृज् (c. 10. -वर्जयति -यितुं) or तॄ (c. 1. तरति, तरितुं -रीतुं, तर्त्तुं); 'is fulfilled,' सिध्यति.

FULFILLED, *p. p.* सम्पूर्णः -र्णा -र्णं, पूर्णीभूतः -ता -तं, सम्पन्नः -न्ना -न्नं, निष्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, कृतार्थीभूतः -ता -तं, निर्वृत्तः -त्ता -त्तं; 'one whose wishes are fulfilled,' पूर्णकामः -मा -मं, कृतार्थः -र्था -र्थं.

FULFILLER, *s.* पूरकः, पूरयिता *m.* (तृ), सम्पूरकः, परिपूरकः, सम्पादकः, साधकः.

FULFILLING, *part.* पूरयन् -यन्ती -यत् (त्), पूरकः -का -की -कं, सम्पादकः

-का -कं, निष्पादकः -का -कं, समापकः -का -कं; 'fulfilling the desires,' कामपूरः -रा -रं.

Fulfilment, *s.* पूरणं, साधनं, सिद्धिः *f.*, संसिद्धिः *f.*, समाप्तिः *f.*, निष्पत्तिः *f.*, सम्पूर्णता, परिपूर्णता; 'of one's wishes,' इच्छापूरणं, कामसिद्धिः *f.*, साध्यसिद्धिः *f.*, इच्छासम्पत् *f.*, कृतार्थता.

Fulgency, *s.* द्युतिः *f.*, दीप्तिः *f.*, तेजस् *n.*, प्रभा, उज्ज्वलता, दीप्तता.

Fulgent, *a.* दीप्तिमान् -मती -मत् (त्), द्युतिमान् &c., प्रभावान् &c., द्योती -तिनी -ति (न्), उज्ज्वलः -ला -लं, अतितैजसः -सी -सं.

Fuliginous, *a.* कज्जलमयः -यी -यं, धूम्रः -म्रा -म्रं, सधूमः -मा -मं.

Full, *a.* (Replete) पूर्णः -र्णा -र्णं, सम्पूर्णः -र्णा -र्णं, परिपूर्णः -र्णा -र्णं, पूरितः -ता -तं, आकीर्णः -र्णा -र्णं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, व्याप्तः -प्ता -प्तं, आढ्यः -ढ्या -ढ्यं, संवलितः -ता -तं, सम्भृतः -ता -तं, मयः -यी -यं in comp.; 'a jar full of ghee,' घृतपूर्णो घटः; 'full of nectar,' अमृतमयः -यी -यं.—(Complete, entire) सकलः -ला -लं, निखिलः -ला -लं, कृत्स्नः -त्स्ना -त्स्नं, समग्रः -ग्रा -ग्रं, अशेषः -षा -षं, अविकलः -ला -लं, अखण्डः -ण्डा -ण्डं, अन्यूनः -ना -नं, सिद्धः -द्धा -द्धं; 'full two years old,' पूर्णद्विवर्षः -र्षा -र्षं.—(Mature) पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, परिणतः -ता -तं, सम्पन्नः -न्ना -न्नं.—(As the moon) पूर्णः -र्णा -र्णं, प्रौढः -ढा -ढं, कठोरः -रा -रं; 'at full length,' विस्तरेण, सुविस्तरं.

Full, *s.* पूर्णता -त्वं, सम्पूर्णता, पूर्त्तिः *f.*, साकल्यं; 'to the full,' सर्व्वतस्.

Full, *adv.* सर्व्वथा, साकल्येन, अशेषतस्, अशेषेण, कृत्स्नशस्.

To full, *v. a.* वस्त्रं पेषणयन्त्रेण घनीकृ or स्थूलीकृ or संहत्य निर्णिज् (c. 3. -णेनेक्ति -णेक्तुं) or प्रक्षल् (c. 10. -क्षालयति -यितुं) or सम्मृज् (c. 2. -मार्ष्टि -र्ष्टुं).

Full-blown, *a.* फुल्लः -ल्ला -ल्लं, उत्फुल्लः -ल्ला -ल्लं, प्रफुल्लः -ल्ला -ल्लं, स्फुटितः -ता -तं, प्रस्फुटः -टा -टं, विकचः -चा -चं, विकसितः -ता -तं.

Full-bodied, *a.* स्थूलशरीरः -रा -रं, प्रौढकायः -या -यं, पुष्टाङ्गः -ङ्गी -ङ्गं.

Full-bosomed, *a.* पीनस्तनः -ना -नं, स्तनाभोगवान् -वती -वत् (त्), पीनकुचकुड्मलः -ला -लं.

Full-bottomed, *a.* स्थूलाधोभागः -गा -गं, वृहदधोभागः -गा -गं.

Full-eyed, *a.* फुल्लनयनः -ना -नं, फुल्ललोचनः -ना -नं.

Full-fed, *a.* पुष्टाङ्गः -ङ्गी -ङ्गं, हृष्टपुष्टः -ष्टा -ष्टं, परितृप्तः -प्ता -प्तं.

Full-grown, *a.* प्रवृद्धः -द्धा -द्धं, प्रौढः -ढा -ढं, एधितः -ता -तं, प्ररूढः -ढा -ढं, उन्नतः -ता -तं, गतशैशवः -वा -वं, पूर्णवृद्धिः -द्धिः -द्धि, कठोरः -रा -रं.

Full-growth, *s.* प्रवृद्धिः *f.* -द्धता, प्रौढिः *f.*, प्रौढता, पूर्णवृद्धिः *f.*

Full-laden, *a.* सुभारवान् -वती -वत् (त्), पूर्णगर्भः -र्भा -र्भं.

Full-moon, *s.* पूर्णेन्दुः *m.*, सकलेन्दुः *m.*, पूर्णिमा, राका, कठोरचन्द्रः, अखण्डकलः; 'day of full moon,' पौर्णमासी, पूर्णिमा, पौर्णिमा.

Fuller, *s.* रजकः, वस्त्रनिर्णेजकः, वस्त्रधावकः, चेलधावः, वस्त्रमार्जकः.

Fuller's-earth, *s.* रजकादिभिर् वस्त्रमार्जने प्रयुक्तो मृत्तिकाविशेषः.

Fuller's-thistle, *s.* रजकादिभिर् वस्त्रपरिष्करणे प्रयुक्तो बहुतीक्ष्णशूकवान् क्षुपभेदः.

Fullery, *s.* वस्त्रनिर्णेजनस्थानं, वस्त्रधावनगृहं, वस्त्रमार्जनशाला.

Fulling-mill, *s.* वस्त्रनिर्णेजने प्रयुक्तं पेषणयन्त्रं, वस्त्रमार्जनयन्त्रं.

Fully, *adv.* सर्व्वतस्, सर्व्वशस्, अशेषतस्, अशेषेण, निःशेषेण, निरवशेषं -षतस्, कृत्स्नशस्, सम्यक्, साकल्येन, अखिलेन, अखण्डतस्, सम्पूर्णं, अन्यूनं; 'at full length,' विस्तरेण -रशस्, सुविस्तरं.

Fulminant, *a.* स्फूर्ज्जन् -र्ज्जन्ती -र्ज्जत् (त्), स्फूर्ज्जथवान् -वती -वत् (त्), वज्रनिर्घोषकारी -रिणी -रि (न्), स्तनितकारी &c.

To fulminate, *v. n.* स्फूर्ज्ज् (c. 1. स्फूर्ज्जति -र्ज्जितुं), स्तन् (c. 1. स्तनति -नितुं), वज्रनिर्घोषवत् or वज्रनिर्घोषवत् शब्दं कृ.—(Issue threatenings as if with the force of thunder) वज्रनिर्घोषेण इव भर्त्सनानि उदीर् (c. 10. -ईरयति -यितुं).

Fulmination, *s.* स्फूर्ज्जनं, मेघनिर्घोषः, वज्रनिर्घोषेण इव आक्रोशनं.

Fulness, *s.* पूर्णता -त्वं, सम्पूर्णता, परिपूर्णता -त्वं, पूर्त्तिः *f.*, आपूर्त्तिः *f.* आकीर्णता, सङ्कीर्णता, व्याप्तिः *f.*, सम्भारः.—(Satiety) परिपूर्णता सौहित्यं.—(Perfection) सिद्धिः *f.*, संसिद्धिः *f.*, प्रौढिः *f.*, सम्पन्नता सम्पद् *f.*—(Maturity) परिणामः, परिणतिः *f.*, परिपाकः.—(Plenty) बाहुल्यं, प्राचुर्य्यं; 'fulness of consequences,' महाफलत्वं.

Fulsome, *a.* बीभत्सजनकः -का -कं, विरसः -सा -सं, अरुचिरः -रा -रं घृणाजनकः -का -कं, कुत्सितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, वैराग्यकृत् *m. f. n*

Fulsomely, *adv.* विरसं, अरुचिरं, कुत्सितं, यथा बीभत्सः or घृणा जायते तथा

Fulsomeness, *s.* विरसता, वैरस्यं, कुत्सितत्वं, गर्ह्यता, अरुचिरता.

To fumble, *v. a.* and *n.* परामृश् (c. 6. -मृशति -म्रष्टुं), परिमृश् अदक्षप्रकारेण कर्म्म कृ or विधा (c. 3. -दधाति -धातुं), समालभ् (c. 1 -लभते -लब्धुं).

Fumbler, *s.* अदक्षप्रकारेण परिमर्शकारी *m.* (न्) or कर्म्मविधायी *m.* (न्)

Fumbling, *s.* अदक्षपरिमर्शः, तमःप्रवेशः, अदक्षप्रकारेण कर्म्मकरणं.

Fumblingly, *adv.* अदक्षपरिमर्शेन, अदक्षं, अपटु, अनार्य्यं, अक्षिप्रं.

Fume, *s.* (Smoke, vapor) धूमः -मिका, धूपः -पिका, बाष्पः.—(Exhalation) धूमोद्गारः, धूमोद्गतिः *f.*—(Rage) कोपः, क्रोधः, संरम्भः.

To fume, *v. n.* (Smoke) धूम (nom. धूमायते -ति), धूप (nom. धूपायति -ते), धूमोद्गारं कृ.—(Be angry) क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), कुप् (c. 4. कुप्यति, कोपितुं), संरब्धः -ब्धा -ब्धं भू.

To fume, *v. a.* धूम (nom. धूमयति -यितुं), धूप (nom. धूपायति, धूपयति -यितुं), धूप (nom. धूपयति -यितुं), वास् (c. 10. वासयति -यितुं), अनुवास् अधिवास्.

Fumid, *a.* सधूमः -मा -मं, धूम्रः -म्रा -म्रं, धौमीयः -यी -यं.

To fumigate, *v. a.* धूप (nom. धूपायति or धूपयति -यितुं), धूम (nom धूमयति -यितुं), वास् (c. 10. वासयति -यितुं), अनुवास्, धूमव्याप्तं -प्तां -प्तं कृ

Fumigated, *p. p.* धूपितः -ता -तं, धूपायितः -ता -तं, अवधूपितः -ता -तं वासितः -ता -तं, अनुवासितः -ता -तं, धूमव्याप्तः -प्ता -प्तं.

Fumigation, *s.* वासनं, अनुवासनं, अधिवासनं, सधूमीकरणं, धूमव्याप्यकरणं

Fuming, *part.* धूमायमानः -ना -नं.—(Angry) क्रुध्यन् -ध्यन्ती -ध्यत् (त्)

Fumingly, *adv.* सक्रोधं, सकोपं, सरोषं, संरम्भात्, संरब्धवत्.

Fumitory, *s.* क्षुद्रपुष्पस्तवकविशिष्ट ओषधिप्रभेदः.

Fumous, fumy, *a.* धूममयः -यी -यं, सधूमः -मा -मं, सधूपः -पा -पं.

Fun, *s.* परिहासः -स्यं, परीहासः, खेला, क्रीडा, कौतुकं, क्रीडाकौतुकं नर्म्म *n.* (न्), केलिः *m. f.*, प्रहसनं, हासिका, रसिकता, मुदा; 'in fun,' परिहास्येन.

Funambulist, *s.* रज्जुचारी *m.* (न्), रज्जुनर्त्तकः, रज्जुनृत्यकारी *m.* (न्), प्लवकः

Function, *s.* (Performance) करणं, निर्वाहः, अनुष्ठानं, आचरणं.—(Office, employment) कर्म्म *n.* (न्), कार्य्यं, कृत्यं, क्रिया, व्यापारः व्यवसायः, व्यवहारः, वृत्तिः *f.*, प्रवृत्तिः *f.*, वृत्तं, नियोगः, पदं, अधिकारः —(Duty, property) धर्म्मः, गुणः, व्रतं.—(Faculty) इन्द्रियं कर्म्मेन्द्रियं, शक्तिः *f.*

Functional, *a.* ऐन्द्रियिकः -की -कं, शक्तिसम्बन्धीयः -या -यं.

Functionary, *s.* नियोगी *m.* (न्), नियुक्तः, अधिकारी *m.* (न्), अधिकारवान् *m.* (त्), कर्म्मकारी *m.* (न्), कर्म्मकारः, कार्य्यनिर्वाहकः.

Fund, *s.* (Stock) सञ्चयः, सञ्चितं, पुञ्जः, समुदायः, समूहः, सम्भारः, संयोगः सन्निपातः, सङ्ग्रहः, राशिः, निचयः, संहारः, समाहारः, समवायः, कोषः

संस्थितिः f., संस्थानं.—(Capital) मूलधनं, नीविः -वी f., परिपणं, परिपणः.—(Money lent to government and bearing interest) राजकोषे निक्षिप्तं सवृद्धिकं धनं.

To FUND, *v. a.* संचितं कृ, पुञ्जं कृ, मूलधनं सचि (c. 5. -चिनोति -चेतुं).

FUND-HOLDER, *s.* राजधनार्थी *m.* (न्), राजकोषे सवृद्धिकधननिक्षेप्ता *m.* (तृ).

FUNDAMENT, *s.* गुदं, पायुः *m.* मैत्रः, अपानं, अपानद्वारं, मार्गः, मलद्वारं, सीमं, गुह्यं, शकृद्देशः, अधोङ्गं, अधोभागः, अधोदेशः, अधोपक्षः.

FUNDAMENTAL, *a.* मौलः -ली -लं, मूलिकः -की -कं, मूली -लिनी -लि (न्), आवश्यकः -की -कं, गुर्वर्थः -र्था -र्थं, प्रधानार्थः -र्था -र्थं, पारमार्थिकः -की -कं, सारः -रा -रं, वास्तवः -वी -वं.

FUNDAMENTAL, *s.* (Principle) तत्त्वं, मूलतत्त्वं, गुह्यतत्त्वं, सारः, मूलं, परमार्थः, प्रधानं, प्रधानतत्त्वं.

FUNDAMENTALLY, *adv.* मूलतस्, वस्तुतस्, सारतस्, प्रधानतस्, तत्त्वतस्.

FUNERAL, *s.* अन्त्येष्टिः *f.*, अन्त्येष्टिक्रिया, प्रेतकर्म्म *n.* (न्), प्रेतकार्य्यं, प्रेतकृत्यं, और्द्ध्वदेहिका -कं, और्द्ध्वदेहिकक्रिया, अन्त्यकर्म्म *n.* (न्), अन्तकर्म्म *n.*, शवकर्म्म *n.*, मृतशरीरसत्कर्म्म *n.* उत्तरक्रिया, अन्त्यसत्क्रिया, सत्क्रिया, प्रेतनिर्हारः, शवानुगमनं, श्मशाननयनं, श्मशाने स्थापनकर्म्म *n.* (न्), श्राद्धादिकर्म्म, शवदाहादि कर्म्म *n.*

FUNERAL, *a.* और्द्ध्वदेहिकः -की -कं, आन्तकर्म्मिकः -की -कं, अन्त्येष्टिसम्बन्धी -न्धिनी -न्धि (न्); 'funeral rite,' श्राद्धं, प्रेतकर्म्म *n.* (न्), अन्त्येष्टिः *f.*, कटोदकं; 'funeral fire,' चिताग्निः *m.*, श्मशानाग्निः *m.*; 'funeral hymn,' यमगाथा.

FUNERAL-PILE, *s.* चिता, चितिः *f.* -ती, चित्या, श्मशानाग्निः *m.*

FUNEREAL, *s.* अन्त्येष्टियोग्यः -ग्या -ग्यं, शोकसूचकः -का -कं, विलापी -पिनी -पि (न्), श्माशानिकः -की -कं, निरानन्दः -न्दा -न्दं.

FUNGOUS, *a.* छत्राकरूपेण or गोमयछत्रवद् रोही -हिणी -हि (न्), छत्राकोपमः -मा -मं, छत्राकस्वभावः -वा -वं, छत्राकगुणविशिष्टः -ष्टा -ष्टं.

FUNGUS, *s.* गोमयछत्रं, विड्छत्रं, विड्जं, गोमयजं, छत्रं -त्रा, छत्राकं, छत्रकः, शिलीन्ध्रं -न्ध्रकं, उच्छिलीन्ध्रं -न्ध्रकं, अतिछत्रः -त्रकः, अर्य्यकुं.

FUNICLE, *s.* रज्जुकः, क्षुद्ररज्जुः *m.f.*, क्षुद्रगुणः, सूत्रं, तन्तुः *m.*

FUNK, *s.* अतिभयात् कृतो दुर्गन्धः or कुत्सितगन्धः or पूतिगन्धः, पूतिः *f.*

To FUNK, *v. n.* अतिभयाद् दुर्गन्धं कृ or कुत्सितगन्धं कृ.

FUNNEL, *s.* (For smoke) धूमपथः, धूममार्गः, धूमद्वारं.—(Tube, pipe) सूच्याकारा नाली, प्रणाली -लिका, नाडिः *f.* -डी, सुषिरनाडिः *f.*

FUNNY, *a.* (Droll) हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, हासकरः -री -रं, रसिकः -का -कं, सरसः -सा -सं, विनोदी -दिनी -दि (न्), कौतुकी -किनी -कि (न्), अपरूपः -पा -पं.

FUNNY, *s.* (Light boat) लघुनौकाविशेषः.

FUR, *s.* लोम *n.* (न्), पशुलोम *n.* (न्), रोम *n.* (न्), अङ्गरुहं, तनुरुहं, तनुजं, पश्वादेर् लोमशचर्म्म *n.* (न्), लोमचर्म्म *n.*—(On the tongue) कुलुकं, कुल्वकः, जिह्वामलं.

FUR, *a.* पशुलोममयः -यी -यं, लोमनिर्म्मितः -ता -तं.

To FUR, *v. a.* लोमावृतं -तां -तं कृ, वस्त्रं लोमान्वितं or लोमोपेतं कृ.

FURBELOW, *s.* ऊर्म्याकारांशुकमयो वस्त्राञ्चलः or वस्त्रसम्बन्धी अलङ्कारः, स्त्रीवस्त्रपरितः स्यूतम् ऊर्म्याकारम् अधिकांशुकं.

To FURBISH, *v. a.* तिज् (c. 10 तेजयति -यितुं), निघृष् (c. 10. निघर्षयति -यितुं, rt. तप्), मृज् (c. 2. मार्ष्टि -र्ष्टुं), कान्तिं दा, धाव् (c. 10. धावयति -यितुं), परिष्कृ.

FURBISHED, *p. p.* तेजितः -ता -तं, सुनिघृष्टः -ष्टा -ष्टं, मार्जितः -ता -तं, मृष्टः -ष्टा -ष्टं, प्रमृष्टः -ष्टा -ष्टं, निर्धौतः -ता -तं, धौतः -ता -तं, परिष्कृतः -ता -तं.

FURBISHER, *s.* तेजकः, मार्जनकृत्, सम्मार्जकः, धावकः, निर्णेजकः, कान्तिदायकः.—(Of weapons) अस्त्रमार्जः, असिधावः.

FURBISHING, *s.* तेजनं, मार्जनं, मार्ष्टिः *f.*, धावनं, परिष्कारः.

FURCATED, *a.* द्व्यग्रः -ग्रा -ग्रं, अग्रद्वयविशिष्टः -ष्टा -ष्टं, वक्रः -क्रा -क्रं.

FURIOUS, *a.* (Mad) उन्मत्तः -त्ता -त्तं, उन्मादः -दा -दं, मदोत्कटः -टा -टं, उन्मादसंरब्धः -ब्धा -ब्धं, मदोद्धतः -ता -तं, मत्तः -त्ता -त्तं, समदः -दा -दं, उत्कटः -टा -टं.—(Violent) उग्रः -ग्रा -ग्रं, साहसिकः -की -कं, प्रबलः -ला -लं, महावेगवान् -वती -वत् (त्), उच्चण्डः -ण्डा -ण्डं.—(With rage) कोपाकुलः -ला -लं, क्रोधाकुलः -ला -लं, संरब्धः -ब्धा -ब्धं, संरम्भी -म्भिणी -म्भि (न्), रोषणः -णा -णं, रोषवेगाकुलः -ला -लं.

FURIOUSLY, *adv.* उग्रं, उन्मत्तवत्, संरम्भेण, कोपाकुलवत्, महावेगेन.

FURIOUSNESS, *s.* उन्मत्तता, उग्रता, संरब्धत्वं, संरम्भः, कोपाकुलत्वं.

To FURL, *v. a.* नौकावसनं or वातवसनं सम्पुटीकृ or संवेष्ट् (c. 10. -वेष्टयति -यितुं) or संहृ (c. 1. -हरति -हर्तुं) or संवृ (c. 1. -वरति, c. 5. वृणोति -वरितुं -रीतुं).

FURLED, *p. p.* संवृतः -ता -तं, सम्पुटीकृतः -ता -तं, संवेष्टितः -ता -तं.

FURLONG, *s.* नल्वः, किष्कुचतुःशतं, अर्द्धक्रोशस्य अष्टमभागः.

FURLOUGH, *s.* निरूपितकालं यावत् कर्म्मत्यागानुज्ञा or कर्म्मविरामानुज्ञा or कर्म्मनिवृत्तिः *f.*, or कर्म्मावकाशः or अवकाशः or कर्म्मावसरः.

FURMENTY, *s.* दुग्धेन सह क्वथितं गोधूमधान्यादि भोजनं.

FURNACE, *s.* उष्मानं, उद्धानं, उद्धारं, चुल्लिः *f.* -ल्ली, अश्मन्तं, अश्मन्तं, अग्निका, अन्दिका, अधिश्रयणी, अग्निकुण्डं, वह्निकुण्डं, भीष्टन्भ्रः, मूषा; 'a portable furnace,' अङ्गारधानिका, अङ्गारशकटी, हसन्ती, हसनी.

To FURNISH, *v. a.* (Supply with all things necessary) सर्व्वोपकरणैः समायुज् (c. 10. -योजयति -यितुं) or संयुज् or युज्, सर्व्वोपकारद्रव्याणि उपक्लृप् (c. 10. -कल्पयति -यितुं) or परिक्लृप् or सम्प्रक्लृप् or उपपद् in caus. (-पादयति -यितुं) or उपपद् in caus. (-पादयति -यितुं) or सम्भृ (c. 1. -भरति -भर्तुं) or पुरस्कृ or प्रस्तुतीकृ or विधा (c. 3. -दधाति -धातुं), द्रव्यसम्भारं कृ, उपकरणसम्भारं कृ; 'furnish a house,' गृहम् उपस्करादिना समायुज् or शैय्यासनभाण्डाद्युपेतं कृ; 'furnish with arms,' अस्त्रैः or शस्त्रैः सज्जीकृ, सन्नह (c. 4. -नह्यति -नद्धुं).—(Equip) सज्जीकृ, सस्ज् (c. 1. सज्जति -ज्जितुं), सन्नद्धं -द्धां -द्धं कृ.

FURNISHED, *p. p.* युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, समन्वितः -ता -तं, अन्वितः -ता -तं, उपेतः -ता -तं, उपक्लृप्तः -प्ता -प्तं, परिक्लृप्तः -प्ता -प्तं, सम्प्रक्लृप्तः -प्ता -प्तं, सहितः -ता -तं, सम्भृतः -ता -तं.—(With necessaries) सोपकारद्रव्ययुक्तः -क्ता -क्तं, सोपकारः -रा -रं, सोपकरणः -णा -णं, सोपस्करः -रा -रं; 'a furnished house,' उपस्करादियुक्तं गृहं, सोपस्करगृहं.—(Equipped) सज्जीकृतः -ता -तं.

FURNITURE, *s.* उपकरणं, उपस्करः, परिच्छदः, पारिणाह्यं, परीभाण्डं, सामग्र्यं -ग्री, सम्भारः, सज्जा; 'household furniture,' गृहोपस्करः, गृहपारिणाह्यं.—(Appendages) अनुबन्धाः *m. pl.*

FURRED, *p. p.* or *a.* लोमावृतः -ता -तं, लोमवान् -वती -वत् (त्), लोमान्वितः -ता -तं; 'as the tongue,' मलवान् -वती -वत् (त्), समलः -ला -लं.

FURRIER, *s.* पशुलोमविक्रेता *m.* (तृ), लोमक्रयविक्रयिकः, लोमव्यवसायी *m.* (न्).

FURROW, *s.* (Made by a plough) सीता, हलिः *m.*, लाङ्गलपद्धतिः *f.*, हलरेखा, वृहद्धलं, लेखा.—(Groove) सुषिरं, रेखा.—(Wrinkle) रेखा, वदनरेखा, वलिरेखाः *pl.*

To FURROW, *v. a.* सीतां कृ, विलेखनं कृ, लाङ्गलेन पद्धतिं कृ or लेखां कृ or भूमौ रेखाः कृ, हल् (c. 1. हलति -लितुं), भूमिं कृष् (c. 1. कर्षति, क्रष्टुं).

FURROWED, *p. p.* सीतः -ता -तं, रेखाविशिष्टः -ष्टा -ष्टं, रेखान्वितः -ता -तं.

FURRY, *a.* लोमशः -शा -शं, लोमवान् -वती -वत् (त्), लोममयः -यी -यं.

FURTHER, *a.* (More distant) दूरतरः -रा -रं, विदूरतरः -रा -रं, दवीयान्

-वती -यः (स्), अधिकतरस्थः -स्था -स्थं.—(Additional) अधिकः -का -कं, अधिकतरः -रा -रं, अपरः -रा -रं, परः -रा -रं. *See* FARTHER.

FURTHER, *adv.* दूरतरं, विदूरतरं, अधिकदूरे, अग्रे, अग्रतरं, अग्रतस्, पुरतस्, ऊर्द्ध्वं; 'further and further,' उत्तरोत्तरं, अधिकाधिकं; 'move off a little further,' स्तोकम् अन्तरं or किञ्चिद् अपसरतोऽपसर.—(Moreover) अपरं, अपरञ्च, अधिकन्तु, किञ्च, अन्यच्च.

To FURTHER, *v. a.* उपकृ, पुरस्कृ, साहाय्यं कृ, प्रवृत (c. 10. -वर्त्तयति -यितुं), प्रवृध (c. 10. -वर्धयति -यितुं), संवृध, प्रयुज (c. 10. -योजयति -यितुं), अनुग्रह (c. 9. -गृह्णाति -ग्रहीतुं), उपग्रह, त्वर् (c. 10. त्वरयति -यितुं), उपकारं कृ, पक्षपातं कृ.

FURTHERANCE, *s.* उपकारः -रिता, उपकरणं, साहाय्यं, वर्धनं, प्रवर्धनं, वृद्धिः *f.*, संवर्धना, उपग्रहः, अनुग्रहः, सङ्ग्रहः, प्रवर्त्तनं, पक्षपातः.

FURTHERED, *p. p.* प्रवर्धितः -ता -तं, संवर्धितः -ता -तं, प्रवर्त्तितः -ता -तं, कृतसाहाय्यः -य्या -य्यं, उपकृतः -ता -तं, कृतोपकारः -रा -रं.

FURTHERER, *s.* उपकारी *m.* (न्), उपकारकः, साहाय्यकर्त्ता *m.* (र्त्तृ), प्रवर्धकः, प्रवर्त्तकः, संवर्धनकारी *m.*, उत्तरसाधकः, प्रयोजकः.

FURTHERMORE, *s.* अपरञ्च, अपरं, अपरन्तु, परन्तु, अधिकन्तु, अन्यच्च, अपिच, किञ्च.

FURTHEST, FURTHERMOST, *a.* दूरतमः -मा -मं, विदूरतमः -मा -मं, दविष्ठः -ष्ठा -ष्ठं, सुदूरः -रा -रं, अत्यन्तदूरः -रा -रं, अतिदूरस्थः -स्था -स्थं.

FURTHEST, *adv.* दूरतमं, विदूरतमं, सुदूरं, अत्यन्तदूरं, दविष्ठं.

FURTIVE, *a.* चौरहृतः -ता -तं, छलेन हृतः -ता -तं or गृहीतः -ता -तं, चौर्य्येण अपहृतः -ता -तं, मुषितः -ता -तं.

FURTIVELY, *adv.* छलेन, निभृतं, सुनिभृतं, रहसि, उपांशु, चोरवत्.

FURUNCLE, *s.* व्रणः -णी, नालीव्रणः, स्फोटः -टकः, विस्फोटः, गण्डः.

FURY, *s.* (Madness) उन्मादः, उन्मत्तता, प्रमादः, मदोत्कटत्वं, मदोदग्रता.—(Rage) संरम्भः, संरब्धता, उग्रता त्वं, कोपः, क्रोधः, औत्कट्यं, चण्डता, उच्चण्डता.—(Impetuous motion) अत्यन्तवेगः, महावेगः, आघातः.—(Goddess of vengeance) चण्डा -ण्डी, दुर्गा.—(Furious woman) चण्डी.

FURZE, *s.* प्रचुरकण्टकः पीतपुष्पः सदाहरितवर्णो गुल्मभेदः.

FURZY, *a.* पूर्वोक्तगुल्मावृतः -ता -तं, सकण्टकलतापूर्णः -र्णा -र्णं.

FUSCATION, *s.* तिमिरीकरणं, तिमिरं, कलुषीकरणं, अन्धकारकरणं.

FUSCOUS, *a.* आकृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, कपिशवर्णः -र्णा -र्णं.

To FUSE, *v. a.* विली in caus. (-लापयति -लापयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), द्रवीकृ, गल in caus. (गालयति -यितुं), गलितीकृ, जलसात्कृ, आर्द्रीकृ, विलीनीकृ.

To FUSE, *v. n.* विली (c. 4. लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल, द्रवीभू, विलीनीभू, जलसाद्भू, क्षर् (c. 1. क्षरति -रितुं).

FUSED, *p. p.* द्रुतः -ता -तं, विद्रुतः -ता -तं, विद्रावितः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, निलीनः -ना -नं, द्रवीकृतः -ता -तं, द्रवीभूतः -ता -तं, गलितः -ता -तं, गालितः -ता -तं, परिगलितः -ता -तं, स्रुतः -ता -तं.

FUSEE, *s.* (Of a watch) घटीमध्यवर्त्ती सूची यत्परितः शृङ्खलम् आवेष्टितं तिष्ठति.—(Small firelock) क्षुद्रपरिमाणा युद्धनाडी or आग्नेयनाडिः *f.*

FUSIBILITY, *s.* द्राव्यत्वं -ता, विद्राव्यता, द्रवत्वं, गलनीयता, विलयनीयता.

FUSIBLE, *a.* द्राव्यः -व्या -व्यं, विद्राव्यः -व्या -व्यं, विलयनीयः -या -यं, गलनीयः -या -यं, द्रवणीयः -या -यं, सुविलयः -या -यं, क्षरणीयः -या -यं, क्षरभावः -वा -वं, साध्यः -ध्या -ध्यं, विलयनशीलः -ला -लं.

FUSIL, *s.* क्षुद्रपरिमाणा लघुयुद्धनाडी or आग्नेयनाडिः *f.*

FUSILEER, *s.* पूर्वोक्तशस्त्रधारी or पूर्वोक्तशस्त्रभृत् सैन्यः or योद्धा *m.* (द्धृ).

FUSING, *part.* द्रवमाणः -णा -णं, गाली -लिनी -लि (न्).

FUSION, *s.* द्रावः, द्रवत्वं, विलयनं, विलयः, विद्रावः, गलनं, गालनं, लयः -यं, गलितत्वं, प्रतीवापः, द्रवीकरणं, विलीनता.

FUSS, *s.* सम्भ्रमः, व्यग्रता, आकुलत्वं, वैक्लव्यं, व्यस्तता, तुमुलं, कोलाहलः.

FUSSY, *a.* सम्भ्रमशीलः -ला -लं, व्यग्रशीलः -ला -लं.

FUST, *s.* (Of a column) स्तम्भदण्डः, स्तम्भः, स्थूणास्तम्भः, स्तम्भयष्टिः *f.*—(Strong smell) दुर्गन्धः, कुत्सितगन्धः, पूतिगन्धः, उग्रगन्धः.

FUSTIAN, *s.* (Cloth) स्थूलकार्पासं, स्थूलवस्त्रं, स्थूलशाटकः, वराशिः *m.*—(Inflated style of writing) गर्व्वितवाग्वृत्तिः *f.*, दर्पवाक्यं, अतिशयोक्तिः *f.*

FUSTIAN, *a.* कार्पासिकः -की -कं, स्थूलकार्पासमयः -यी -यं.—(Inflated) अतिगर्व्वितः -ता -तं, आध्मातः -ता -तं.

FUSTINESS, *s.* पूतिः *f.*, कुत्सितत्वं, पूतिगन्धता, दुर्गन्धः, विरसता, वैरस्यं.

FUSTY, *a.* दुर्गन्धः -न्धा -न्धं, पूतिगन्धः -न्धा -न्धं, उग्रगन्धिः -न्धिः -न्धि, कुत्सितगन्धः -न्धा -न्धं, विरसः -सा -सं, पूतः -ता -तं, पर्य्युषितः -ता -तं.

FUTILE, *a.* तुच्छार्थः -र्था -र्थं, तृणप्रायः -या -यं, निरर्थकः -का -कं, अनर्थकः -का -कं, मोघः -घा -घं, असारः -रा -रं, क्षीणः -णा -णं, मन्दः -न्दा -न्दं.

FUTILITY, *s.* अनर्थकत्वं, लाघवं, मोघता, असारता, क्षीणता, निर्गुणत्वं.

FUTURE, *a.* भावी -विनी -वि (न्), भविष्यन् -ष्यन्ती -ष्यत् (त्), आगामी -मिनी -मि (न्), अनागतः -ता -तं, भाविकः -का -कं, उत्तरकालीनः -ना -नं, कालान्तरीयः -या -यं, श्वोवस्तिकः -की -कं, श्वस्तनः -नी -नं.—(Belonging to another world) पारलौकिकः -की -कं, पारत्रिकः -की -कं, आमुष्मिकः -की -कं, अमुत्रत्यः -त्या -त्यं; 'future event,' भाविघटना, 'future tense,' भविष्यत्कालः.

FUTURE, FUTURITY, *s.* भविष्यत्कालः, भाविकालः, उत्तरकालः, आगामिकालः, परकालः, भावि *n.* (न्), भविष्यत् *n.*, आयतिः *f.*, आयतिः *f.* उदर्कः, 'knowledge of futurity,' भविष्यज्ज्ञानं; 'ignorant of the future,' अश्वस्तनविद् *m. f. n.*

FUZZBALL, *s.* रेणुपूरितो गोमयच्छत्रप्रभेदः, बहुपांशुगर्भं विड्भक्तं.

FY, *exclam.* धिक्, अपेहि, अपेहि, शान्तं, उम्, अये, अरे, कित.

G.

GABARDINE, *s.* स्थूलशाटकः, स्थूलशाटी, ग्राम्यजनभृतं शिथिलोत्तरीयं.

To GABBLE, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प, प्रलप् (c. 1. लपति -पितुं), अनर्थकवाक्यम् उदीर (c. 10. -ईरयति -यितुं), अनर्थकशब्दं कृ, वृथाशब्दं कृ.

GABBLE, *s.* जल्पः -ल्पना -ल्पितं, प्रजल्पः, प्रलापः, निरर्थकशब्दः, चीत्कारः.

GABBLER, *s.* जल्पकः, जल्पाकः, उपजल्पी *m.* (न्), अनर्थकशब्दकारी *m.* (न्).

GABEL, *s.* शुल्कः -ल्कं, करः, राजग्राह्यभागः, राजदेयो भागः, राजस्वं.

GABION, *s.* युद्धे शत्रुप्रक्षिप्तगोलनिवारको मृत्तिकागर्भः करण्डविशेषः.

GABLE, GABLE-END, *s.* गृहशृङ्गं, प्रासादशृङ्गं, गृहशिखरं, वडभिः *f.*

GAD, *s.* (Head of a spear or arrow) शूलाग्रं, बाणाग्रं.—(Wedge of steel or iron) तीक्ष्णायसकीलः, लोहकीलः.

To GAD ABOUT, *v. n.* अट् (c. 1. अटति -टितुं), पर्य्यट्, भ्रम् (c. 1. भ्रमति, c. 4. भ्राम्यति, भ्रमितुं), परिभ्रम्, अट् in freq. (अटाट्यते), इतस्ततो विचर् (c. 1. -चरति -रितुं).

GADDER, *s.* अटनकारी *m.* (न्), पर्य्यटनकृत्, भ्रमणकारी *m.*, अधनिचरः.

GADDING ABOUT, *s.* अटनं, पर्य्यटनं, भ्रमणं, परिभ्रमणं, अट्या, विहरणं.

GADFLY, *s.* दंशः -शी, दंशकः, वनमक्षिका, अरण्यमक्षिका, गोमक्षिका, नीलाङ्कुः *m.*, पांशुरः.

GAFF, *s.* (Light spear used by fishermen) लघुशूलः, चौवटी.—(For extending sails) नौकावसनप्रसारणार्थं यष्टिः *m. f.*

GAFFER, *s.* साधुजनः, आत्मीकः, ग्रामीणनायकः, तपस्वी *m.* (न्).

To GAG, *v. a.* मुखं बन्ध् (c. 9. बध्नाति, बन्धुं) or प्रतिबन्ध् or रुध् (c. 7. रुणद्धि, रोद्धुं) or निरुध् or प्रतिरुध् or पिधा (c. 3. -दधाति -धातुं).

GAG, *s.* मुखरोधनं, मुखबन्धनी, मुखप्रतिबन्धकं, मुखपिधानं.

GAGE, *s.* (Pledge) पणः, परिपणनं, प्रतिपाणं, आधिः *m.*, बन्धकः.—(Challenge) आह्वानं.—(Measure) परिमाणं, परिमाणविधिः *m.*, परिमाणरीतिः *f.*, प्रमाणं, मानं.—(Instrument for measuring) मापनयन्त्रं, परिमापनयन्त्रं; 'rain-gage,' वृष्टिमापनयन्त्रं.

To GAGE, *v. a.* (Pledge) पण् (c. 1. पणते -णितुं), पणं कृ, प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), अङ्गीकृ.—(Bind by pledge) पणेन बन्ध् (c. 9. बध्नाति, बन्धुं).—(Measure). *See* GUAGE.

To GAGGLE, *v. n.* हंसनादं कृ, हंसवत् कूज् (c. 1. कूजति -जितुं).

GAGGLING, *s.* हंसनादः, हंसरुतं, हंसकूजनं, कूजनं.

GAIETY, *s.* *See* GAYETY.

GAILY, *adv.* (Joyfully) सहर्षं, सानन्दं, हृष्टमनसा, प्रफुल्लमनसा, प्रसन्नचेतसा, प्रमोदेन.—(Splendidly) अतिशोभनं, शोभनं, सशोभं; 'gaily dressed,' शोभनवेशी -शिनी -शि (न्), उज्ज्वलवेशधारी -रिणी -रि (न्).

GAIN, *s.* लाभः, लब्धिः *f.*, प्राप्तिः *f.*, फलं, अर्जनं, उपार्जनं, लभ्यं, लभ्यांशः, प्रतिपत्तिः *f.*, आयः, फलोदयः, अर्थः, उत्पन्नं, पक्षफलत्वं, योगक्षेमः, वृद्धिः *f.*, विवृद्धिः *f.*, प्रयोगः.

To GAIN, *v. a.* (Obtain, acquire) अर्ज् (c. 10. अर्जयति -यितुं), उपार्ज्; लभ् (c. 1. लभते, लब्धुं), उपलभ्, आप् (c. 5. आप्नोति, आप्तुं), प्राप् सम्प्राप्, अवाप्, समाप्; आसद् (c. 10. -सादयति -यितुं), समासद्, अधिगम् (c. 1. -गच्छति -गन्तुं), गम्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), आपद्, आविश् (c. 6. -विशति -वेष्टुं), समाविश्, अश् (c. 5. अश्नुते, अशितुं), समश्, उपाश्, विद् (c. 6. विन्दति, वेत्तुं, वेदितुं), अभिविद्, प्रतिविद्, इ (c. 2. एति -तुं), स्वीकृ.—(Gain by conquest) निर्जि (c. 1. -जयति -जेतुं).—(Gain over) अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), प्रसाध् (c. 10. -साधयति -यितुं); 'to one's own party,' आत्मपक्षीकृ.—(Gain ground) वृध् (c. 1. वर्धते -र्धितुं), प्रभू.

To GAIN, *v. n.* (Have advantage) लाभं कृ, फलं कृ.—(Grow rich, prosper) समृद्धीभू, समृध् (c. 5. -ऋध्नोति -अर्धितुं), वृध् (c. 1. वर्धते -र्धितुं).—(Advance on, encroach) क्रमे क्रमे प्रसृप् (c. 1. -सर्पति -सर्प्तुं) or प्रगम् (c. 1. -गच्छति -गन्तुं).—(Prevail against) अतिरिच् in pass. (-रिच्यते), अभिभू, प्रभू, जि (c. 1. जयति, जेतुं).

GAINABLE, *a.* प्राप्यः -प्या -प्यं, लभ्यः -भ्या -भ्यं, आसादनीयः -या -यं.

GAINED, *p. p.* प्राप्तः -प्ता -प्तं, आप्तः -प्ता -प्तं, अवाप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, अर्जितः -ता -तं, उपार्जितः -ता -तं, आसादितः -ता -तं, समासादितः -ता -तं, अधिगतः -ता -तं, आपन्नः -न्ना -न्नं, उपात्तः -त्ता -त्तं, कलितः -ता -तं; 'gained with difficulty,' कृच्छ्राप्तः -प्ता -प्तं.

GAINER, *s.* अर्जयिता *m.* (तृ), अर्जकः, उपार्जकः, प्रापकः, फलप्रापकः, लब्धा (ब्धृ).

GAINFUL, *a.* फली -लिनी -लि (न्), फलदः -दा -दं, सफलः -ला -लं, अर्थकरः -री -रं, अर्थदः -दा -दं, लाभजनकः -का -कं, प्राप्तिजनकः -का -कं.

GAINFULLY, *adv.* सफलं, सलाभं, सार्थं, लाभेन, फलोदयेन.

GAINFULNESS, *s.* सफलता, सलाभता, सार्थत्वं, लाभः, लब्धिः *f.*, प्राप्तिः *f.*

GAINLY, *adv.* दक्षं, सदाक्ष्यं, युक्त्या, सपाटवं, चतुरं, यथायोग्यं.

To GAINSAY, *v. a.* विपरीतं वद् (c. 1. वदति -ते -दितुं), विवद्, अपवद्, प्रत्याख्या (c. 2. -ख्याति -तुं), अन्तःख्या, अपलप् (c. 1. -लपति -पितुं), विरुध् (c. 7. -रुणद्धि -रोद्धुं), अधरीकृ, बाध् (c. 1. बाधते -धितुं).

GAINSAYED, *p. p.* प्रत्याख्यातः -ता -तं, अपह्नुतः -ता -तं, बाधितः -ता -तं.

GAINSAYER, *s.* विपरीतवादी *m.* (न्), प्रत्याख्याता *m.* (तृ), अपवादकः, विवादी *m.* (न्), प्रतिवादी *m.*, विरोधी *m.* (न्), विघ्नकारी *m.* (न्).

GAIRISH, *a.* अतिशोभनः -ना -नं, दृष्टमात्रशोभनः -ना -नं, शोभामात्रसेवी -विनी -वि (न्), अलङ्करिष्णुः -ष्णुः -ष्णु, दाम्भिकः -की -कं, रूपाध्मातः -ता -तं.

GAIRISHLY, *adv.* अतिशोभनं, दृष्टमात्रशोभापूर्वं, रूपाध्मातवत्, सदम्भं, दाम्भिकवत्.

GAIRISHNESS, *s.* अतिशोभा, दृष्टमात्रशोभा, दम्भः, दाम्भिकत्वं, रूपाध्मातत्वं.

GAIT, *s.* गतिः *f.*, गमनं, गतं, चारः, चरणं, चलनं, सरणं, व्रजनं, अयनं; 'graceful in gait,' सुगः -गा -गं -गामी -मिनी -मि (न्), शुभगः -गा -गं, हंसगामी &c., चारुचरणः -णा -णं.

GAITER, *s.* स्थूलवस्त्रमयं जङ्घात्राणं or जङ्घारक्षणं, जङ्घोत्तरीयं.

GALA, *s.* उत्सवः -वदिनं, महोत्सवः, पर्व *n.* (न्), पर्वाहः, उद्धर्षः.

GALACTOPHAGIST, *s.* क्षीरपः -पायी *m.* (न्), दुग्धपः, पयस्पः, क्षीरादः, क्षीराशी *m.* (न्).

GALAXY, *s.* (Milky way) मन्दाकिनी, आकाशगङ्गा, स्वर्गङ्गा, नागवीथी, हरिताली.—(Assemblage of splendid objects) शोभनवस्तुमण्डलं, सुप्रभवस्तुसमूहः.

GALE, *s.* प्रबलवायुः *m.*, प्रचण्डवायुः *m.*, अतिवातः, वात्या, वातावेगः, चण्डवातः, वाताली, वातरूपः, वातगुल्मः, झञ्झावातः, झञ्झा, पवनः, पवनाघातः, जवानिलः, भ्रमिः *f.*, भ्राजिः *f.*, करीषङ्कषा, फः; 'tossed by gales,' पवनक्षिप्तः -प्ता -प्तं, पवनवेगक्षिप्तः -प्ता -प्तं.

GALIOT, *s.* शीघ्रगामी लघुनौकाविशेषः.

GALL, *s.* (Bitter fluid, bile) पित्तं, तिक्तपित्तं, मायुः *m.*—(Rancour) विषं, विषहृदयत्वं, कालकूटं, दंशः, दुष्टभावः, दुर्बुद्धिः *f.*, द्रोहः, द्वेषः, कटुता, तीक्ष्णता, तिग्मता, उग्रत्वं, अरुन्तुदत्वं, कठोरता, क्रोधः.—(Excrescence on a tree) वृक्षफेनः -नकः.

GALL-BLADDER, *s.* पित्ताधारः, तिक्तपित्ताधारः, तिक्तपित्ताशयः.

GALL-STONE, *s.* पित्ताशयजा शर्करा.

To GALL, *v. a.* (Excoriate by friction) घर्षणेन चर्मक्षतं कृ or त्वक्छेदं कृ or त्वगुत्खननं कृ, चर्म घृष् (c. 1. घर्षति -र्षितुं) or कृष् (c. 10. कर्षयति -यितुं).—(Vex, harass) तप् (c. 10. तापयति -यितुं), परितप्, सन्तप्, पीड् (c. 10. पीडयति -यितुं), अभिपीड्, आपीड्, क्लिश् (c. 9. क्लिश्नाति, क्लेशुं), बाध् (c. 1. बाधते -धितुं), अर्द् (c. 10. अर्दयति -यितुं), समर्द्, मर्मपीडां कृ, अरुन्तुदः -दा -दं भू.

To GALL, *v. n.* (Vex one's self) आत्मानं तप् (c. 10. तापयति -यितुं), or पीड् (c. 10. पीडयति -यितुं) or बाध् (c. 1. बाधते -धितुं), परितप् in pass. (-तप्यते).

GALLANT, *a.* (Brave, heroic) वीरः -रा -रं, प्रवीरः -रा -रं, महावीर्यः -र्या -र्यं, शूरः -रा -रं, पराक्रान्तः -न्ता -न्तं, विक्रान्तः -न्ता -न्तं, विक्रमी -मिणी -मि (न्), साहसिकः -की -कं, माहात्मिकः -की -कं, उदारचेताः -ताः -तः (स्).—(Courteous, inclined to courtship) सभ्यः -भ्या -भ्यं, सभ्यशीलः -ला -लं, सुशीलः -ला -लं, स्त्र्युपासनशीलः -ला -लं, स्त्र्युपचारशीलः -ला -लं, सुजनः -ना -नं, प्रेमशीलः -ला -लं.

GALLANT, *s.* (Courtly man) सभ्यजनः, सुजनः.—(One attentive to ladies) स्त्र्युपासकः, स्त्र्युपचारकः -चारपरः.—(Lover) प्रणयी *m.* (न्), कामिजनः, कामी *m.* (न्), कामुकः, नायकः, रमकः.—(Paramour) जारः, रमणः, उपपतिः *m.*, पापपतिः *m.*, विटः, चेटकः.

GALLANTLY, *adv.* (Bravely) सवीर्यं, महावीर्येण, महावीरवत्, शूरवत्, समहाशौर्यं, सपराक्रमं, सविक्रमं, उदारवत्, प्रसभं.—(Like one inclined to courtship) स्त्र्युपासकवत्, स्त्र्युपचारकवत्, रमणवत्.

GALLANTRY, *s.* (Bravery) वीर्यं, महावीर्यं, शौर्यं, वीरता, शूरता,

पौरुषं, विक्रमः, पराक्रमः, धाम *n.* (न्).—(Nobleness) उदारता, औदार्य्यं, माहात्म्यं.—(Courtliness, attention to ladies) सभ्यता, सुशीलता, सुजनता, स्त्र्युपासनं, स्त्र्युपचारः.

GALLED, *p. p.* (Having the skin torn by friction) क्षतचर्म्मा -र्म्मा -र्म्म (न्), घर्षितचर्म्मा &c., छिन्नत्वक् *m. f. n.*—(Harassed) सन्तापितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, पीडितः -ता -तं, बाधितः -ता -तं.

GALLEON, *s.* सुवर्णरूप्यसम्भारता प्रयुक्ता बृहती विदेशीयनौका.

GALLERY, *s.* (Covered way) छन्नपथः, छन्नमार्गः.—(In a building) हर्म्ये or महाभवने इतस्ततो भ्रमणयोग्यः पथः.—(Elevated floor furnished with seats) दीर्घासनयुक्तो मञ्चः or मञ्चकः.—(Covered terrace outside a house) बहिर्द्वारप्रकोष्ठकं, वरण्डः, निष्काशः.

GALLEY, *s.* (Long, light boat) दीर्घपरिमाणा लघुनौका, मद्गुः *m.*—(Cook-room of a ship of war) युद्धनौकायाः पाकस्थानं.

GALLEY-SLAVE, *s.* आमृत्योर् मद्गुदण्डसञ्चारणे नियुक्तो महापातकी *m.* (न्)

GALLIARD, *a.* हृष्टः -ष्टा -ष्टं, प्रमुदः -दा -दं, उत्तसः -सा -सं, रसिकः -का -कं.

GALLICISM, *s.* फ्रान्सीयरीत्यनुसारी वाग्व्यापारः.

GALLIGASKINS, *s.* नौकाभाषायां स्थूलवस्त्रमयं जङ्घोत्तरीयं or जङ्घापरिधानं.

GALLIMATIA, *s.* असम्बद्धप्रलापः, अनर्थकवाक्यं, वृथाकथा, प्रलपितं.

GALLIMAUFRY, *s.* सन्निपातः, सान्निपातिकं, प्रकीर्णकं, सङ्कीर्णकं.

GALLINACEOUS, *a.* गृहकुक्कुटसम्बन्धी -न्धिनी -न्धि (न्) or -वाचकः -का -कं, 'a gallinaceous fowl,' कुक्कुटः -टी, कृकवाकुः *m.*, ताम्रचूडः, चरणायुधः.

GALLING, *s.* पर्य्याण चर्म्मक्षतिः *f.* or त्वक्परिक्षतिः *f.*, चर्म्मदारणं, चर्म्मनिर्घर्षणं

GALLINULE, *s.* कालकण्ठः -ण्ठकः, नीलकण्ठः, दात्यूहः, कालूहः, नत्यूहः, जलरङ्कुः, पीतमुण्डः, मद्गुलः, मासङ्गः, डाहुकः, खंगमनः, टुटुक्कः, मादकः.

GALLIPOT, *s.* भेषजविक्रेतृभिः प्रयुक्तं मृण्मयम् औषधपात्रं, चलुकः, चुलुकः

GALL-NUT, *s.* मसीजलकरणे प्रयुक्तः फलाकारो वृक्षफेनः.

GALLON, *s.* द्रवद्रव्याणां परिमाणविशेषः, अर्द्धप्रस्थः.

GALLOON, *s.* स्वर्णरूप्यसूत्रमयस् तास्रयालङ्कारविशेषः.

To GALLOP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्, धोर् (c. 1 धोरति -रितुं), धाव् (c. 1. धावति -वितुं), पुलायितं कृ, प्लुतगत्या or वल्गितेन चल् (c. 1. चलति -लितुं).

GALLOP, *s.* वल्गितं, पुलायितं, पुला, प्लुतः -तं, प्रवः -वनं, विप्लावः, विक्रान्तिः *f.*, तरङ्गः, धोरणं, धोरितं -तकं, धौरितकं

GALLOPADE, *s.* द्रुतनृत्यविशेषो यत्र नर्त्तकाः प्लुतगत्या चलन्ति.

GALLOPER, *s.* प्लवगः -गतिः *m.*, प्लवकः, वल्गितकारी *m.* (न्), पुलायितकृत

To GALLOW, *v. a.* त्रस् in caus. (त्रासयति -यितुं), भी in caus. (भाययति -यितुं)

GALLOWAY, *s.* मध्यमपरिमाणो न बृहन् न क्षुद्रस् तुरङ्गभेदः.

GALLOWS, *s.* उद्बन्धनकाष्ठं, उद्बन्धनवृक्षः, वधस्थानं, घातस्थानं.

GALOCHE, GALOSHE, *s.* काष्ठपादुका, उपरपादुका, उपपादुका.

GALVANIC, *a.* पश्चमाणवैद्युतशक्तिसम्बन्धी -न्धिनी -न्धि (न्).

GALVANISM, *s.* गल्वाणिनाम्ना विदेशीयविदुषा परिकल्पिता विद्युतीयशक्तिः or वैद्युतशक्तिः or आकर्षकशक्तिः, विद्युच्छक्तिः.

GALVANIST, *s.* पूर्व्वोक्तविद्युच्छास्त्रज्ञः.

To GALVANIZE, *v. a.* पूर्व्वोक्तविद्युतीयशक्त्या आकृष् (c. 1. -कर्षति -क्रष्टुं) or उपहन् (c. 2 -हन्ति -न्तुं)

GALVANIZED, *p. p.* पूर्व्वोक्तवैद्युतशक्त्युपहतः -ता -तं

To GAMBLE, *v. n.* (With dice, &c.) अक्षैः or अक्षान् दिव् (c. 4. दीव्यति -ते, देवितुं) or प्रदिव् or प्रतिदिव्, अक्षैः क्रीड् (c. 1. क्रीडति -डितुं), अक्षादिक्रीडां कृ, द्यूतक्रीडां कृ, अक्षद्यूतं कृ.

GAMBLER, *s.* द्यूतकरः -कारः, अक्षद्यूतः, अक्षधूः *m.*, अक्षदेवी *m.* (न्), अक्षधूर्त्तः, धूर्त्तः, कितवः, द्यूतक्रीडकः, वाक्षिकः. See GAMESTER.

GAMBLING, *s.* अक्षद्यूतं, द्यूतं, द्यूतक्रीडा, अक्षादिक्रीडा, देवनं, अक्षवती, द्यूतसेवा, कैतवं, ग्रहः, पणः, दुरोदरं.

GAMBOGE, *s.* पीतवर्णः पूर्व्वदेशीयवृक्षनिर्यासः.

To GAMBOL, *v. n.* (Frolic) क्रीड् (c. 1. क्रीडति -डितुं), विक्रीड्, परिक्रीड्, दिव् (c. 4. दीव्यति -ते, देवितुं), विलम्फनपूर्व्वं इतस्ततः प्लु (c. 1. प्लवते, प्लोतुं) or नृत् (c. 4. नृत्यति, नर्त्तितुं), खेला (nom. खेलायति -यितुं), कुमार (nom. कुमारयति -यितुं).

GAMBOL, *s.* क्रीडा -डनं, देवनं, खेला, केलिः *m. f.*, लीला, नृत्यं, लास्यं.

GAMBOLING, *part.* क्रीडन् -डन्ती -डत् (त्), क्रीडमानः -ना -नं, दीव्यन् -व्यती -व्यत् (त्).

GAME, *s.* (Sport) क्रीडा, खेला, केलिः *m. f.*, लीला, नर्म्म *n.* (न्), परीहासः, कूर्द्दनं, विलासः.—(Game of play) रासः, रासेरसः.—(Wild animals) जाङ्गलं, जङ्गलपश्वादि, वन्यपश्वादि, आरण्यपशुपक्ष्यादि.—(The chase) मृगव्यं, मृगया.—(Scheme) सङ्कल्पः, निश्चितं, व्यवसितं, व्यवसायः, कल्पना.

To GAME, *v. n.* क्रीड् (c. 1. क्रीडति -डितुं), दिव् (c. 4. दीव्यति -ते, देवितुं)—(With dice, &c.) अक्षैः क्रीड् or दिव् द्यूतक्रीडां कृ.

GAME-COCK, *s.* चरणायुधः, नखायुधः, युद्धे शिक्षितः कृकवाकुः.

GAMEKEEPER, *s.* वन्यपक्षिरक्षकः, जाङ्गलपक्षिप्रतिपालकः, वन्यजन्तुपोषकः

GAME-LEG, *s.* खञ्जजङ्घा, पङ्गुजङ्घा, गतिविकलः पादः, पङ्गुपादः.

GAMESOME, *a.* क्रीडापरः -रा -रं, क्रीडावान् -वती -वत् (त्), लीलावान् &c., खेलापरः -रा -रं, विलासी -सिनी -सि (न्), केलिकः -का -कं

GAMESOMENESS, *s.* क्रीडापरत्वं, खेलापरत्वं, सविलासता, लीलावत्त्वं, उत्तसता

GAMESTER, *s.* द्यूतकरः -कारः, द्यूतकृत् *m.*, अक्षदेवी *m.* (न्), अक्षधूर्त्तः, अक्षधूः *m.*, अक्षधूर्त्तः, द्यूतवृत्तिः *m.*, द्यूतसेवी *m.* (न्), द्यूतप्रसक्तः, अक्षक्रीडकः, धूर्त्तः, कितवः, अक्षादिसेवी *m.*, दुरोदरः, कृष्णकोहलः.

GAMING, *s.* अक्षद्यूतं, द्यूतं -तः, द्यूतकर्म्म *n.* (न्), द्यूतक्रीडा, द्यूतसेवा, अक्षादि क्रीडा, अक्षवती, देवनं, कैतवं, ग्रहः, पणः, दुरोदरं.

GAMING-HOUSE, *s.* द्यूतसभा, द्यूतस्थानं, द्यूतशाला, द्यूतगृहं; 'keeper of one,' द्यूतसभाधिकारी *m.* (न्), सभिकः, द्यूताधिकारी *m.*, द्यूतकारः रक्तः, द्यूतवृत्तिः *m.*

GAMMON, *s.* (Dried hog's flesh) वल्लूरं, शूकरस्य शुष्कमांसं or वालिकमांसं.—(Game) चर्म्मपट्टिकाक्रीडा, शारिक्रीडा.—(Imposition, hoax) छलं, वञ्चनं, कपटः, दम्भः.

To GAMMON, *v. a.* शूकरमांसं शुष्कीकृ or लवणीकृ, वल्लूरं कृ.—(Hoax) प्रलभ् (c. 1. -लभते -लब्धुं), अभिसन्धा (c. 3. -दधाति -धातुं), वञ्च् (c. 10 वञ्चयति -यितुं).

GAMUT, *s.* (Musical scale) ग्रामः. The seven musical notes of the Hindú gamut are called निषादः, ऋषभः, गान्धारः, षड्जः, मध्यमः, धैवतः, पञ्चमः.

GANDER, *s.* वरटः, हंसः, राजहंसः, कालहंसः, चक्रः, चक्रवाकः, चक्राङ्गः

GANDHARBA, *s.* (A celestial musician. These are demigods who inhabit heaven, and form the orchestra at the banquets of the gods) गन्धर्व्वः, हाहाः (स्), हुहूः *m.*, हूहूः *m.*, हहाः *m.*

GANESHA, *s.* (Son of Siva and Párvatí, the god of wisdom, and remover of difficulties and obstacles, addressed at the commencement of all undertakings, and at the opening of all compositions. He is called 'Ganesha,' as presiding over the troop of deities attendant on Siva) गणेशः, गणनाथः, गणाधिपः, गणनायकः, गणपतिः *m.*, गणाग्रणीः *m.*,

गणः, हेमाङ्गः, हेरम्बः, हस्तिमुखः,—(As remover of obstacles) विघ्नेशः, विघ्नराजः, विघ्ननाशकः -शनः, विघ्नविनायकः, विनायकः, विघ्नहारी *m.* (न्).—(Elephant-faced) गजाननः, गजवदनः, गजास्यः.—(Elephant-toothed) गजदन्तः.—(One-toothed) एकदन्तः.—(Big-bellied) लम्बोदरः.—(Two-bodied) द्विदेहः.—(Having two mothers) द्वैमातुरः.

Gang, *s.* (Company of persons) गणः, जनसमूहः, जनसंसर्गः, जननिवहः, सङ्घः, सङ्गः; 'of thieves,' चौरगणः.

Gang-board, *s.* नौकारोहणावरोहणार्थं दीर्घकाष्ठफलकं.

Gang-days, *s.* भ्रमणदिवसाः *m. pl.*, परिक्रमदिवसाः, पर्य्यटनकालः.

Ganges, *s.* (The River) गङ्गा, गङ्गका, गङ्गिका. The name Gangá is derived from the root *gam*, 'to go,' *i. e.* 'that which goes or flows on the earth,' whence also the name भवायना, 'going in the world.' (Daughter of Jahnu. The Ganges in its course from heaven disturbed the devotions of this saint, upon which he drank up its waters, but released them again at the intercession of the sage Bhagíratha. Hence the following names) जाह्नवी, जह्नुतनया, जह्नुसुता, भागीरथी, (Crest of Siva. The Ganges, in its descent from heaven, alighted on the head of Siva, where it wandered for a time in the tresses of his hair) हरशेखरा. (River of heaven) स्वर्णदी, सुरनदी, सुरनिम्नगा, स्वरापगा, स्वर्गगङ्गा, स्वर्वापी, खापगा, सिद्धापगा.—(Flowing in heaven, earth, and hell) त्रिपथगा, त्रिस्रोताः *f.* (स्).—(Flowing from the foot of Vishnu) विष्णुपदी.—(Mother of Bhíshma) भीष्मसूः *f.*—(The very auspicious one) महाभद्रा.

Ganglion, *s.* वायुस्फोटः -टकः, शिरास्फोटकः, नाडीविस्फोटः.

Gangrene, *s.* कोथः, पूतिमांसं, विद्रधिः *m.*, क्षतं, नालीव्रणः, मांसपाकः, रक्तविद्रधिः *m.*, मांसपूतिः, शरीरस्य परभागे स्वस्थे सति एकभागस्य पूतीभावः.

To gangrene, *v. n.* मांसैकदेशे पूतीभू, पूतमांसीभू, कोथीभू.

Gangrenous, *a.* कोथवान् -वती -वत् (त्), कोथीयः -या -यं, पूतिमांसवान् &c.

Gangway, *s.* नौकायां गमनागमनपथः or आरोहणावरोहणपथः.

Gantlet, gantlope, *s.* सेनायां दण्डार्हस्य दण्डविशेषः; 'to run the gantlet,' महापातकिवत् सैन्यानां यष्टिपाणीनां द्विपंक्तिमध्ये धाव् (c. 1. धावति -ते -वितुं) यावद् एकैकेन यष्ट्याघातः क्रियते.

Gaol, *s.* कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, गुप्तिः *f.*

To gaol, *v. a.* कारायां बन्ध् (c. 9. बध्नाति, बन्द्धुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

Gaol-delivery, *s.* काराशुद्धिः *f.*, कारागारशोधनं, बन्धनागारविशोधनं.

Gaoler, *s.* कारागाराध्यक्षः, कारारक्षकः, बन्धनालयरक्षकः.

Gap, *s.* (In a wall) सन्धिः *m.*, गृहरन्ध्रं, सुरङ्गा, कुड्यच्छेदः.—(Breach, chasm) भङ्गः, भेदः, छेदः, रन्ध्रं, छिद्रं, विवरं, विच्छेदः, गर्त्तः, खण्डः -ण्डनं.

To gape, *v. n.* जृम्भ् (c. 1. जृम्भते -म्भितुं), विजृम्भ्, प्रजृम्भ्, जभ् or जम्भ् (c. 1. जभते, जम्भते -म्भितुं), मुखं व्यादा (c. 3. -ददाति -दातुं) or विस्तृ in caus. (-स्तारयति -यितुं), जृम्भं कृ, ग्लै (c. 1. ग्लायति, ग्लातुं).—(Open in fissures) स्फुट् (c. 6. स्फुटति -टितुं), विदल् (c. 1. -दलति -लितुं), विदॄ in pass. (-दीर्य्यते).

Gaper, *s.* जृम्भी *m.* (न्), जृम्भकः, जृम्भणकारी *m.* (न्), मुखव्यादानकारी.

Gaping, gape, *s.* जृम्भः -म्भा -म्भणं -म्भिका, जृम्भितं, विजृम्भितं, विजृम्भणं, हर्म्म *n.* (न्), हाफिका, उपपुष्पिका.—(Opening the mouth) मुखव्यादानं, मुखविवृतिः *f.*

Gaping, *part.* जृम्भः -म्भा -म्भं, जृम्भमाणः -णा -णं, जृम्भी -म्भिणी -म्भि (न्), जृम्भावान् -वती -वत् (त्), जृम्भितः -ता -तं, विजृम्भितः -ता -तं, व्यात्तमुखः -खा -खं, विवृतमुखः -खा -खं.

Gap-toothed, *a.* विरलदन्ती -न्तिनी -न्ति (न्), विच्छिन्नदन्ती &c.

Garb, *s.* वेशः, वेषः, वासः *n.* (स्), परिधानं, परिच्छदः, अम्बरं, वस्त्रं, वसनं, आच्छादनं, सज्जा, प्रसाधनं.

Garbage, *s.* उच्छिष्टं, उच्छिष्टांशः, शेषान्नं, पशोर् अन्त्रादि, मलं.

To garble, *v. a.* (Pick out the best parts of a book to serve a purpose) स्वार्थं or वचनार्थं ग्रन्थस्य उत्तमवचनानि or उत्तमदेशान् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or ग्रन्थचूर्णिं कृ, ग्रन्थं खण्ड् (c. 10. खण्डयति -यितुं).—(Pervert) साचीकृ, वक्रीकृ, विकृ, विकलीकृ.

Garbled, *p. p.* साचीकृतः -ता -तं, छलेन विकलीकृतः -ता -तं or खण्डितः -ता -तं.

Garboil, *s.* कोलाहलः, तुमुलं, हलहलाशब्दः, हाहाकारः.

Garden, *s.* उद्यानं, आरामः, उपवनं, पुष्पवाटी -टिका, पुष्पवनं, वाटिका, वृक्षवाटिका, कुसुमाकरः, वेलं, तेवनं, पुष्पफलोपचयहेतुर् भूभागः; 'pleasure-garden,' क्रीडार्था भूमिः, क्रीडावाटिका, क्रीडावनं; 'garden near a house,' गृहवाटिका, गृहारामः; 'kitchen-garden,' शाकशाकटं, शाकशाकिनं, शाकवाटिका.

To garden, *v. n.* उद्यानं कृ, पुष्पफलोत्पत्तियोग्यं भूमिभागं कृष् (c. 6. कृषति, क्रष्टुं), उद्यानकर्म्म कृ.

Gardener, *s.* उद्यानपालः -लकः, उद्यानरक्षकः, उद्यानसेवकः, मालिकः, माली *m.* (न्).

Gardening, *s.* उद्यानकरणं, उद्यानकर्म्म, उद्यानसेवनं, पुष्पफलोत्पत्तिकर्म्म *n.* (न्).

Garden-plot, *s.* पुष्पफलोत्पत्तियोग्यो भूमिभागः, पुष्पस्थलं, स्थलं -ली.

Garden-stuff, *s.* उद्यानजं, उद्यानोद्भिद् *m. f. n.*, उद्यानजं शाकादि.

Garden-wall, *s.* उद्यानपरिसरः, वाटिकापरिसरः, उद्यानप्राकारः.

Gargarism, *s.* आचाम्यं, आचमनीयं, कवलः, मुखमार्जनजलं.

To gargarize, *v. a.* आचम् (c. 1. -चामति -चमितुं), जलम् उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं).

Gargle, *s.* आचाम्यं, आचमनीयं, कवलः, मुखधावनार्थं जलादि.

To gargle, *v. n.* जलम् आचम् (c. 1. -चामति -चमितुं) or उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं), आचमनं कृ, उपस्पर्शं कृ, जलोपस्पर्शं कृ, जलादिना मुखं मृज् (c. 2. मार्ष्टि -र्ष्टुं) or धाव् (c. 10. धावयति -यितुं).

Gargled, *p. p.* आचान्तः -न्ता -न्तं, उपस्पृष्टः -ष्टा -ष्टं.

Garish, *a.* *See* Gairish.

Garland, *s.* माला, माल्यं, स्रक् *f.* (ज्), दाम *n.* (न्), हारः, आवलिः -ली *f.*, मालकः -लिका; 'of flowers,' कुसुममाला, पुष्पावली, कुसुमस्तबकः, कुसुमावतंसकं; 'of pearls,' मुक्तावली, देवच्छन्दः, शतयष्टिकः; 'other kinds of garlands,' गुत्सः, गुत्सार्द्धः, गोस्तनः.

To garland, *v. a.* मालया or स्रजा अलङ्कृ, मालायुक्तं -क्तां -क्तं कृ.

Garlanded, *p. p.* माली -लिनी -लि (न्), स्रग्वी -ग्विणी -ग्वि (न्), स्रग्धरः -रा -रं.

Garlic, *s.* लशुनं, रशुनं, लशूनं, लसुनः, रसुनः, रसोनः -नकः, गृञ्जनः, महौषधं, महाकन्दः, अरिष्टः, सोनहः, उग्रगन्धः, दीर्घपत्रः, ग्रन्थिमूलं, श्रीमस्तकः, मुखदूषणः, राहूच्छिष्टः, तरिता.

Garlic-eater, *s.* लशुनाशी *m.* (न्), लशुनभोजी *m.* (न्), लशुनादः.

Garlicky, *a.* लशुनीयः -या -यं, रशुनीयः -या -यं.

Garment, *s.* वस्त्रं, वेशः, वेषः, वासस् *n.*, वसनं, परिधानं, परिच्छदः, अम्बरं, आच्छादनं, प्रच्छादनं, प्रसाधनं, संव्यानं, प्रवारः, झर्म्मटः; 'under-

garment,' अन्तरीयं, अन्तर्वासस्, अधोवसनं; 'upper,' उत्तरीयं, प्रावारः.

Garner, *s.* कुशूलः, धान्यागारं, अन्नकोष्ठः, कोष्ठः -ष्ठकं, भाण्डागारं, व्रीह्यगारं, कण्डोलः -लकः, काण्डालः, पिटः, कुदरः.

To garner, *v. a.* कुशूले निविश् (c. 10. -वेशयति -यितुं) or सञ्चि (c. 5. -चिनोति -चेतुं).

Garnered, *p. p.* कुशूलभृतः -ता -तं, कोष्ठभृतः -ता -तं, कुशूलीकृतः-ता -तं.

Garnet, *s.* रक्तवर्णो मणिविशेषः, पद्मरागविशेषः, सर्पमणिः *m.f.*

To garnish, *v. a.* शुभ् (c. 10. शोभयति -यितुं), उपशुभ्, भूष् (c. 10 भूषयति -यितुं), विभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ, रञ्ज् (c. 10. रञ्जयति-यितुं).

Garnish, *s.* अलङ्कारः, अलङ्क्रिया, शोभा -भनं, भूषणं, विभूषणं, आभरणं, सज्जा, प्रसाधनं. *See* Garnishment.

Garnished, *p. p.* शोभितः -ता -तं, उपशोभितः -ता -तं, अलङ्कृतः -ता -तं, भूषितः -ता -तं, विभूषितः -ता -तं, परिष्कृतः -ता -तं, प्रसाधितः -ता -तं, कृतशोभः -भा -भं.

Garnishment, garniture, *s.* सज्जा, उपकरणानि *n. pl.*, शोभार्थम् अनुबन्धाः *m. pl.*

Garret, *s.* उपरिस्थः कोष्ठः, व्योमः -मं, व्योम -मं, अट्टः, अट्टालः, कूटागारं, चन्द्रशाला -लिका, वलभी.

Garrison, *s.* दुर्गनिवासिनः सैन्याः *m. pl.*, दुर्गस्थाः सैन्याः, दुर्गस्थसैन्यं, दुर्गसैन्यं, दुर्गबलं, दुर्गरक्षिणः *m. pl.*, दुर्गरक्षकाः *m. pl.*, रक्षिणः *m. pl.*, रक्षकाः *m. pl.*, रक्षिवर्गः.

To garrison, *v. a.* नगररक्षार्थं दुर्गे सैन्यान् or रक्षकान् निविश् in caus. (-वेशयति -यितुं), नगररक्षणे सैन्यगुल्मं नियुज् (c. 7. युनक्ति -योक्तुं).

Garrisoned, *p. p.* रक्षकयुक्तः -क्ता -क्तं, रक्षार्थं सैन्ययुक्तः -क्ता -क्तं.

Garrulity, *s.* वावदूकता, वाचालता, बहुवादित्वं, बहुभाषिता, अतिशयोक्तिः *f.* जल्पकता, जल्पाकत्वं, वाग्मित्वं, अतिभाषणं, अत्यालापः, अतिवादः.

Garrulous, *a.* वावदूकः -का -कं, वाचालः -ला -लं, बहुभाषी -षिणी -षि (न्), बहुवादी -दिनी -दि (न्), जल्पकः -का -कं, जल्पाकः -का -कं, वाग्मी -ग्मिनी -ग्मि (न्), गदयित्नुः -त्नुः -त्नु, मुखरः -रा -रं, वक्ता -क्त्री -क्तृ (क्तृ).

Garter, *s.* जङ्घाबन्धनी, पादबन्धनी, जङ्घाबन्धः, जङ्घावस्त्ररक्षणी.

Garuda, *s.* (The bird on which the god Vishnu is carried, represented as being something between a man and a bird, and considered as the lord of the feathered tribe. He is the son of Kasyapa by Vinatá, and younger brother of Aruna) गरुडः, गरुत्मान् *m.* (-त्मत्), तार्क्ष्यः, खगेश्वरः, सुपर्णः, विष्णुरथः, वैनतेयः, विनतासूनुः *m.*, नागान्तकः, पन्नगाशनः, भुजगदारणः, सिताननः, दक्षाय्यः. The son of Garuda is called सम्पातिः -तिकः.

Gas, *s.* वायुः *m.*, वाष्पः, वातः, धूमः, धूमिका, अङ्गारजो वायुः *m.*

Gash, *s.* दीर्घच्छेदः, गम्भीरच्छेदः, दीर्घक्षतं, गम्भीरक्षतं, दीर्घगम्भीरस् त्वग्भेदः or त्वक्छेदः.

To gash, *v. a.* दीर्घच्छेदं कृ, गम्भीरच्छेदं कृ, दीर्घगम्भीरं त्वग्भेदं कृ.

Gasometer, *s.* वायुमापनयन्त्रं, अङ्गारजवायुनिर्म्माणस्थानं.

To gasp, *v. n.* मुखं व्यादाय कृच्छ्रेण श्वासप्रश्वासं कृ, कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं) or प्राण् (c. 2. प्राणिति -तुं), दुःश्वासं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.

Gasp, *s.* दुःश्वासः, श्वासः, श्वसितं, दुःश्वसितं, उच्छ्वासः, उच्छ्वसितं प्राणः.

Gasping, *part.* उच्छ्वसन् -सन्ती -सती -सत् (त्), कृच्छ्रेण श्वसन् &c., उच्छ्वसितः -ता -तं, काशश्वासः -सा -सं, दुःश्वासी -सिनी -सि (न्), श्वासकृच्छ्रोपहतः -ता -तं, पष्टिप्राणः -णा -णं.

Gastric, *a.* जाठरः -री -रं, औदरिकः -की -कं, उदरीयः -या -यं, जठरीयः -या -यं; 'gastric juice,' कोष्ठाग्निः *m.*, अग्निः.

Gastronome, *s.* उदरपरायणः, उदरसेवी *m.* (न्), कुक्षिम्भरिः *m.*, सद्बाद्यरसज्ञः.

Gastronomy, *s.* सद्बाद्यरसविद्या, परमान्नरसविद्या, उदरसेवा.

Gastrotomy, *s.* उदरच्छेदः -दनं, जठरच्छेदः -दनं.

Gate, *s.* द्वारं, द्वाः *f.* (र्), प्रतीहारः, प्रतिहारः, अररः -री -रं, गृहमुखं, द्वारकण्टकः; 'back-gate,' पक्षद्वारं; 'private-gate,' अन्तर्द्वारं, प्रच्छन्नद्वारं; 'city-gate,' पुरद्वारं, नगरद्वारं, गोपुरं; 'raised place over it,' हस्तिनखः; 'outer-gate,' बहिर्द्वारं.

Gate-post, *s.* द्वारस्तम्भः, द्वारस्थूणा, द्वारदारुः *m.*; 'its ornament,' तोरणः.

Gate-way, *s.* द्वारवर्त्म *n.* (न्), द्वारपथः, निःसरणं.

To gather, *v. a.* (Collect) चि (c. 5. चिनोति, चेतुं), अवचि, समाचि, सञ्चि, आचि, प्रचि, समानी (c. 1. -नयति -नेतुं), समुपानी, समादा (c. 3. -ददाति -दातुं), समाहृ (c. 1. -हरति -हर्तुं), उपसंहृ, समूह् (c. 1. ऊहते -हितुं), सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह्, सम्भृ (c. 1. -भरति, c. 3. -बिभर्त्ति -भर्तुं), संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं), एकीकृ, एकत्र कृ.—(Gather flowers, &c.) पुष्पाणि चि or अवचि or लू (c. 9. लुनाति, लवितुं).—(Select) उद्धृ, समुद्धृ, वृ, उद्धृ.—(Deduce, infer) अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते), ऊह् (c. 1. ऊहते -हितुं), अपोह्, अवगम् (c. 1. -गच्छति -गन्तुं).

To gather, *v. n.* (Congregate) सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्, समे (सम and आ with rt. इ, समैति -तुं), एकत्र मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, एकत्र आगम्.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), उपचि in pass. (-चीयते).—(Form matter) पूय् (c. 1. पूयते -यितुं), पूयं बन्ध् (c. 9. बध्नाति, बन्धुं), पूयपूर्णः -र्णा -र्णं भू.

Gather, *s.* (Fold) वस्त्रपुटः, ऊर्म्मिः *m. f.*, ऊर्म्मिका, व्यावर्त्तनं, चूणः.

Gathered, *p. p.* चितः -ता -तं, सञ्चितः -ता -तं, अवचितः -ता -तं, उपचितः -ता -तं, समूढः -ढा -ढं, सङ्गृहीतः -ता -तं, लूनः -ना -नं.

Gatherer, *s.* अवचायी *m.* (न्), सञ्चयी *m.* (न्), सङ्ग्रहीता *m.* (तृ), सङ्ग्राहकः; 'gatherer of taxes,' करग्रहः, शुल्कग्राही *m.* (न्); 'of flowers,' पुष्पावचायी *m.*

Gathering, *s.* (Act of collecting) चयनं, सञ्चयनं, चायः, अवचयः, अवचायः, लावः, सङ्ग्रहः -हणं, एकत्रकरणं; 'of flowers,' पुष्पचयः, कुसुमावचयः, पुष्पप्रचायः.—(Crowd, assembly) समूहः, सङ्घः, सञ्चयः, सङ्घातः, समागमः, समवायः, समाहारः, सन्नयः; 'of people,' जनसमूहः, जननिवहः, लोकसङ्घः.—(Abscess) विद्रधिः *m.*, पूयसम्पूर्णः स्फोटः.—(Gathering of clouds) घनचयः, घनौघः, घनजालं, घनघनौघः.

Gaudery, *s.* अलङ्कारः, चित्रविचित्राभरणानि *n. pl.*, शोभाकरद्रव्याणि *n. pl.*

Gaudily, *adv.* सचित्रालङ्कारं, शोभाकरणार्थं, एकान्तशोभनं, चित्रविचित्रं; 'gaudily dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

Gaudiness, *s.* रक्तता, सरागत्वं, रागः, रङ्गः, चित्रता, चित्रविचित्रता, शोभा, एकान्तशोभा, अतिशोभा, वर्णः, नानावर्णत्वं, कर्बुरता, चाक्षुदृष्टिः *f.*

Gaudy, *a.* बहुवर्णः -र्णा -र्णं, नानावर्णः -र्णा -र्णं, चित्रः -त्रा -त्रं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं, एकान्तशोभनः -ना -नं, रक्तः -क्ता -क्तं, अतिरागी -गिणी -गि (न्), चित्रालङ्कारवान् -वती -वत् (त्), उज्ज्वलः -ला -लं.

Gaudy, *s.* (A feast) उत्सवः, उत्सवदिनं, पर्वाहः, उद्धर्षः.

To gauge, *v. a.* प्रमाणदण्डेन भाण्डभरकं मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

Gauge, *s.* (Measure) परिमाणं, प्रमाणं, मानं, परिमाणविधिः *m.*, परिमाणरीतिः *f.*—(Instrument for measuring) मापनयन्त्रं, परिमापनदण्डः, प्रमाणदण्डः, भाण्डपूरकमापनार्थं यष्टिः *m.* *See* Gage.

Gauger, *s.* प्रमाणदण्डद्वारेण भाण्डभरकमापकः, परिमाणकर्त्ता *m.* (र्त्तृ).

Gauging, *s.* प्रमाणदण्डेन भाण्डभरकमापनं or भाण्डपूरकपरिमापणं.

Gaunt, *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, क्षामः -मा -मं, शुष्काङ्गः &c., सुक्षामः &c.

Gauntlet, *s.* लोहनिर्म्मितं हस्ताच्छादनं or हस्तत्राणं; 'to throw the gauntlet,' पूर्व्वोक्तहस्ताच्छादनं भूमौ प्रक्षिप्य युद्धार्थम् आह्वे (c. 1. -ह्वयति -ह्वातुं).

Gaur, *s.* (The country) गौडः; 'its inhabitants,' गौडाः *m. pl.*

Gauze, *s.* विरलतन्तुः स्वच्छवस्त्रविशेषः, विरलांशुकं, सूक्ष्मांशुकं.

Gavot, *s.* गवोत्संज्ञको लघुनृत्यविशेषः.

Gawk, *s.* मूर्खः, मूढः, स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, जडधीः *m.*

Gawky, *a.* स्थूलः -ला -लं, स्थूलशरीरः -रा -रं, दीर्घस्थूलः -ला -लं, दीर्घदेहः -हा -हं, अदक्षः -क्षा -क्षं, विरूपः -पी -पं.

Gay, *a.* (Merry) उल्लसः -सा -सं -सितः -ता -तं, आनन्दी -न्दिनी -न्दि (न्), हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, प्रफुल्लः -ल्ला -ल्लं, उल्लासितः -ता -तं, समुल्लसितः -ता -तं, विलासी -सिनी -सि (न्), केलिकः -का -कं, मुदितः -ता -तं, प्रमोदी -दिनी -दि (न्), ललितः -ता -तं, परिहासशीलः -ला -लं, हासी -सिनी -सि (न्).—(Showy) नानावर्णः -र्णा -र्णं, बहुवर्णः -र्णा -र्णं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं.

Gayety, *s.* उल्लसता, उल्लासः, आनन्दः, आह्लादः, सानन्दता, हर्षः, प्रहर्षः, प्रफुल्लता, मुदा, प्रमोदः, चित्तप्रसन्नता, प्रहसनं.—(Merry making) उत्सवः, महोत्सवः, उत्सवकरणं.

Gayly, *adv.* सानन्दं, सहर्षं, प्रमोदेन, उल्लासेन, प्रहृष्टवत्.—(Showily) सबहुवर्णं, चित्रविचित्रं, अतिशोभनं; 'gayly dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

To gaze, *v. a.* and *n.* ईक्ष् (c. 1. ईक्षते -क्षितुं), प्रेक्ष्, निरीक्ष्, वीक्ष्, अभिवीक्ष्, समीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां निरीक्ष् or दृश् (c. 1. पश्यति, द्रष्टुं), स्थिरदृष्टिं कृ, दृष्टिं or लक्षं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

Gaze, *s.* स्थिरदृष्टिः *f.*, बद्धदृष्टिः *f.*, अनिमिषदृष्टिः *f.*, दृष्टिः *f.*, आलोकनं, ईक्षणं, निरीक्षा, वीक्षणं, वीक्षितं, प्रेक्षणं, प्रेक्षितं, दर्शनं, लक्षः -क्षणं; 'with fixed gaze,' बद्धदृष्टिः -ष्टिः -ष्टि, अनिमिषनयनः -ना -नं.

Gazehound, *s.* दृष्टिमात्रेण शशकाद्यनुसरणशीलो मृगव्यकुक्कुरः.

Gazelle, *s.* तनुशरीरो हरिणभेदः, मृगः -गी; 'gazelle-eyed,' मृगीदृक् *m. f. n.* (श्).

Gazette, *s.* वार्त्तिकपत्रं, समाचारपत्रं, संवादपत्रं, सन्देशपत्रं.

To gazette, *v. a.* वार्त्तिकपत्रेण प्रकाश् (c. 10. -काशयति -यितुं).

Gazetteer, *s.* अमुकदेशे यत्किञ्चिद् नगरग्रामममार्गादि विद्यते तदाकारनामादिवाचकं पुस्तकं.

Gazing, *part.* स्थिरदृष्ट्या प्रेक्षमाणः -णा -णं or आलोकयन् -यन्ती -यत् (त्); 'gazing up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि; 'in various directions,' इतस्ततो दत्तदृष्टिः.

Gazing-stock, *s.* तिरस्कारविषयः, अवहासभूमिः *f.*, परिभवास्पदं, कौतुकं.

Gear, *s.* उपकरणं, सामग्री -ग्र्यं, सज्जा, परिच्छदः, पारिणाह्यं, आभरणं, प्रसाधनं, प्रतिकर्म्म *n.* (न्); 'plough-gear,' हलोपकरणं.

Geese, *s. pl.* हंसाः *m. pl.* *See* Goose.

Gelatin, *s.* क्वथितमांसनिर्म्मितं घनीभूतं or श्यानीभूतं स्वच्छद्रव्यं.

Gelatinous, *a.* पूर्व्वोक्तश्यानद्रव्यगुणविशिष्टः -ष्टा -ष्टं, श्यानः -ना -नं, शीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, संलग्नशीलः -ला -लं, अपलेक्षः -क्षा -क्षं.

To geld, *v. a.* वृषणाव् उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), वृषणद्वयम् उत्पट् (c. 10. -पाटयति -यितुं).

Gelded, *p. p.* छिन्नवृषणः -णा -णं, छिन्नमुष्कः -ष्का -ष्कं, मुष्कशून्यः -न्या -न्यं.

Gelding, *s.* (Horse) अवृषणो ऽश्वः, छिन्नवृषणो वाजी *m.* (न्).

Gelid, *a.* अतिशीतलः -ला -लं, अत्यन्तशिशिरः -रा -रं, हिमः -मा -मं.

Gelidity, gelidness, *s.* अतिशीतलता, अतिशैत्यं, शीतता, शिशिरत्वं.

Gelly, *s.* क्वथितमांसनिर्म्मितो घनीभूतः or श्यानीभूतः स्वच्छरसः.

Gem, *s.* (Precious stone) मणिः *m. f.* -णी, रत्नं, चारुशिला, प्रस्तरः, मणिरत्नं; 'necklace of gems,' मणिमाला, मणिसरः, रत्नावलिः *f.*, 'its central gem,' तरलः; 'mine of gems,' रत्नाकरः.—(Bud) मुकुलं, जालकं, पल्लवः -वं, कुटमलं.

To gem, *v. a.* मणिभिः or रत्नैर् अलङ्कृ or भूष् (c. 10. भूषयति -यितुं).

To gem, *v. n.* (Bud) फुल्ल् (c. 1. फुल्लति -ल्लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).

To geminate, *v. a.* द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), द्वैधीकृ, द्विकं -कां -कं कृ.

Gemination, *s.* द्विगुणीकरणं, द्वैगुण्यं, द्विरावृत्तिः *f.*, पुनरुक्तिः *f.*

Gemini, *s. pl.* (Twins) यमौ m. du., यमजौ m. du.—(Constellation) द्वन्द्वः, मिथुनः, जितुमः.

Geminous, *a.* द्विगुणः -णा -णं, द्विकः -का -कं, द्वैधः -धी -धं, द्विविधः -धा -धं, यमः -मा -मं, यमकः -का -कं.

Geminy, *s.* मिथुनं, द्वन्द्वं, यमकं, यमलं, युगं, युग्मं, युगलं, द्वयं.

Gemmate, *a.* मुकुलितः -ता -तं, फुल्लवान् -वती -वत् (त्), पल्लवितः -ता -तं.

Gemmed, *p. p.* रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), रत्नमयः -यी -यं, रत्नानुविद्धः -द्धा -द्धं, रत्नालङ्कृतः -ता -तं, मणिभूषितः -ता -तं.

Gemmy, *a.* मणिशः -शा -शं, रत्नद्योती -तिनी -ति (न्), मणिमयः -यी -यं.

Gender, *s.* लिङ्गं, प्रकृतिः *f.*; 'masculine gender,' पुंलिङ्गं, पुरुषः; 'feminine gender,' स्त्रीलिङ्गं; 'a noun of invariable gender,' अजहल्लिङ्गः

To gender, *v. a.* जन in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 2. -सूते, c. 1. -सुवति -वितुं), उत्पद् in caus. (-पादयति -यितुं).

To gender, *v. n.* स्त्रीपुरुषवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or मैथुनं कृ.

Genealogical, *a.* वंशावलीविषयः -या -यं, वंशान्वयविषयकः -का -कं, वंशक्रमसम्बन्धी -न्धिनी -न्धि (न्).

Genealogist, *s.* अन्वयज्ञः, वंशावलिज्ञः, घटकः, कुलाचार्य्यः, वंशावलिरचकः, वंशपरम्पराज्ञः.

Genealogy, *s.* वंशावली -लिः *f.*, आवलिः *f.*, वंशान्वयः, अन्वयः, वंशश्रेणी, वंशक्रमः, वंशपरम्परा, वंशानुचरितं, वंशवितति: *f.*, वंशविवरणं; 'of kings,' राजावलिः *f.*, नृपावलिः, पार्थिवावलिः.

General, *a.* (Common to many, or all) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसामान्यः -न्या -न्यं, बहुसामान्यः -न्या -न्यं, सर्व्वसाधारणः -णी -णं, सर्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सार्व्वत्रिकः -की -कं, सर्व्वीयः -या -यं, सर्व्वजनीयः -या -यं, सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, विश्वजनीनः -ना -नं, विश्वजनीयः -या -यं, विश्वजन्यः -न्या -न्यं, सार्व्वलौकिकः -की -कं, लौकिकः -की -कं, व्यापकः -का -कं, सर्व्वव्यापकः -का -कं, सर्व्वमयः -यी -यं, औत्सर्गिकः -की -कं.—(Not particular) अविशेषकः -का -कं, अवच्छेदावच्छेदकः -का -कं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, आचारिकः -की -कं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं; 'general practice,' जनरीतिः *f.*, लोकव्यवहारः; 'general order,' सामान्यशासनं; 'general opinion,' बहुमतं; 'general collection,' सर्व्वसङ्ग्रहः; 'general reader,' पुस्तकः, प्रपठाविद् *m.*; 'in general,' प्रायेण, प्रायशस्, बहुशस्. *See* Generally.

GENERAL, *s.* (Of an army) सेनापतिः *m.*, वाहिनीपतिः *m.*, सेनानीः *m.*, सेनाधिपः, सेनाग्रगः, चमूपतिः *m.*, योधमुख्यः, सेनाध्यक्षः, सैन्याध्यक्षः, बलाध्यक्षः, दण्डनायकः, महासेनः; 'skilful general,' सांयुगीनः.—(Total, whole) साकल्यं, सामान्यं, साधारण्यं, समुदायः.

GENERALISSIMO, *s.* प्रधानसेनापतिः *m.*, अग्रसेनानीः *m.*, प्रधानसैन्याध्यक्षः.

GENERALITY, *s.* (State of being general) सामान्यं -न्यत्वं, साधारण्यं, साधारणत्वं.—(Greatest part) प्रधानभागः, अधिकभागः, बहुतरभागः, प्रधानांशः.

GENERALIZATION, *s.* अवच्छेदावच्छेदः, व्यापकत्वं, जातिनिर्देशः, बहुसामान्यकरणं, गणीकरणं.

To GENERALIZE, *v. a.* अवच्छेदावच्छेदं कृ, बहुव्यापकं -कां -कं कृ, बहुसामान्यं -न्यां -न्यं कृ, गणीकृ, जातिनिर्देशं कृ.

GENERALLY, *adv.* प्रायस्, प्रायशस्, प्रायेण, भूयस्, बहुशस्, बाहुल्येन, भूयिष्ठं, बहुतरं, साधारण्येन, सामान्यतस्, साकल्येन.

GENERALNESS, *s.* साधारणत्वं, सामान्यत्वं, व्यापकत्वं, बाहुल्यं, प्रसिद्धत्वं.

GENERALSHIP, *s.* सैनापत्यं, सेनापतित्वं.—(Skill in tactics) व्यूहपाण्डित्यं, रणपाण्डित्यं, सेनाव्यूहनैपुण्यं, बलविन्यासकौशल्यं, सेनानयप्रवीणता.

GENERALTY, *s.* साकल्यं, समस्तत्वं, सामान्यं, कार्त्स्न्यं, साकल्यं, समुदायः.

To GENERATE, *v. a.* जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 1. -सवति, c. 2. -सूते, c. 4. -सूयते -सोतुं), सू, उत्पद् in caus. (-पादयति -यितुं).

GENERATED, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, सञ्जातः -ता -तं, उत्पादितः -ता -तं, समुत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, कृतजन्मा -न्मा -न्म (न्), उद्भवः -वा -वं, प्रभवः -वा -वं; 'generated in water,' जलोद्भवः -वा -वं.

GENERATION, *s.* (Production) जननं, प्रजननं, जन्म *n.* (न्), उत्पादनं, उत्पत्तिः *f.*, प्रसूतिः *f.*, प्रसवः, सम्भवः, उद्भवः, प्रभवः.—(Race) जातिः *f.*, वंशः, सन्तानः, सन्ततिः *f.*, कुलं, अन्वयः, प्रवरं.—(The people living at the same time) समवयस्काः or समकालजीविनः पुरुषाः *m. pl.*—(Series of descendants) वंशावली, वंशपरम्परा, वंशश्रेणी; 'extending to seven generations,' साप्तपौरुषः -षी -षं; 'organ of generation,' उपस्थः.

GENERATIVE, *a.* जनकः -का -कं, उत्पादकः -का -कं, सावकः -विका -कं.

GENERATOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जननः, जनकः, जन्मदः -दाता *m.* (तृ), वीजप्रदः, वीजी *m.* (न्), उत्पादकः.

GENERIC, GENERICAL, *a.* सामान्यः -न्या -न्यं, साधारणः -णा -णी -णं, वर्गीयः -या -यं, जातीयः -या -यं, जातिसम्बन्धीयः -या -यं, व्यापकः -का -कं; 'generic property,' जातित्वं, जातिधर्म्मः, जातिस्वभावः, सामान्यं, समानाधिकरणं; 'generic characteristic,' जातिलक्षणं, सामान्यलक्षणं.

GENERICALLY, *adv.* जातिमुद्दिश्य, वर्गमुद्दिश्य, जातितस्, सामान्यतस्.

GENEROSITY, *s.* (Liberality) औदार्य्यं, उदारता, दानशीलता, त्यागशीलता -त्वं, त्यागः, त्यागिता, बहुप्रदत्वं, अतिसर्ज्जनं, अतिदानं, वदान्यता, अकार्पण्यं, विलम्भः.—(Nobleness of soul) माहात्म्यं, औदार्य्यं, उदीर्णता.

GENEROUS, *a.* (Liberal) उदारः -रा -री -रं, दानशीलः -ला -लं, त्यागशीलः -ला -लं, बहुप्रदः -दा -दं, वहदः -दा -दं, अतिदाता -त्री -तृ (तृ), दायकः -का -कं, दानरतः -ता -तं, वदान्यः -न्या -न्यं, अकृपणः -णा -णं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, उदात्तः -त्ता -त्तं.—(Noble-minded) उदारचेताः -ताः -तः (स्), उदारधीः -धीः -धि, उदारचरितः -ता -तं, माहात्मिकः -की -कं, महामनाः -नाः -नः (स्), महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, उदीर्णः -र्णा -र्णं.—(Of honourable birth) सत्कुलीनः -ना -नं, महाकुलः -ला -लं.

GENEROUSLY, *adv.* उदारवत्, वदान्यवत्, औदार्य्येण, दानशीलत्वात्, माहात्म्येन.

GENEROUSNESS, *s.* औदार्य्यं, उदारता, माहात्म्यं. *See* GENEROSITY.

GENESIS, *s.* धर्म्मग्रन्थानां मध्यात् प्रथमग्रन्थः, जगत्सृष्टिविषयकं मूसालिखितम् आदिपुस्तकं.

GENET, *s.* (Horse) सुरूपी विदेशीयः क्षुद्रवाजी *m.* (न्).—(Civet) गन्धमार्ज्जारः.

GENETHLIAC, *s.* (Birthday poem) जन्मदिवसमुद्दिश्य काव्यं.

GENIAL, *a.* (Contributing to propagation) सावकः -का -कं, प्रसवकारी -रिणी -रि (न्), प्रसूतिवर्धकः -का -कं.—(Contributing to life and cheerfulness) जीवदः -दा -दं, तेजोवर्धकः -का -कं, आनन्दकरः -रा -रं, रम्यः -म्या -म्यं, रमणीयः -या -यं, मनोरमः -मा -मं, सुखकरः -री -रं, प्रसन्नः -न्ना -न्नं, सुभगः -गा -गं, प्रसादकरः -रा -रं, रुचिरः -रा -रं.

GENIALLY, *adv.* प्रसन्नं, प्रसादेन, सप्रसादं, सानन्दं, प्रमोदेन, सहर्षं.

GENIALNESS, *s.* सुनन्दता, रम्यता, रमणीयत्वं, प्रसन्नता, सानन्दता.

GENICULATED, *a.* जानुपर्व्वाकारग्रन्थियुक्तः -क्ता -क्तं, ग्रन्थिलः -ला -लं.

GENITAL, *a.* प्रसवसम्बन्धी -न्धिनी -न्धि (न्), जननसम्बन्धी &c., यौनः -नी -नं.

GENITALS, *s. pl.* उपस्थः, शिश्नादि *n.*, भगादि *n.*, अधोङ्गं, जननाङ्गं.

GENITIVE, *a.* or *s.* (In grammar) सम्बन्धः, शेषः, षष्ठी विभक्तिः *f.*

GENITOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जनकः, जननः, जन्मदः.

GENIUS, *s.* (Natural disposition) स्वभावः, प्रकृतिः *f.*, शीलः, गुणः. (Strength of mind, power of intellect) धीशक्तिः *f.*, बुद्धिशक्तिः *f.*, मनःशक्तिः *f.*, मनोयुक्तिः *f.*, बुद्धिसामर्थ्यं, बुद्धिप्रभावः, मतिसुप्रयोगता.—(Power of invention) कल्पनाशक्तिः *f.*—(Man endowed with talent) गुणी *m.* (न्), गुणवान् *m.* (त्), धीशक्तियुक्तः, बुद्धिशक्तिमान् *m.* (त्), युक्तबुद्धिः *m.*, बुद्धिमान् *m.* (त्), धीमान् *m.* (त्).—(Peculiar characteristic) विशेषणं, लक्षणं, स्वभावः, स्वधर्म्मः, वृत्तिः *f.*; 'poetical genius,' कविताशक्तिः *f.*

GENIUS, *s.* (Demon) भूतः, असुरः, दैत्यः, दानवः, प्रेतः, पिशाचः; 'evil genius,' दुर्दैवं; 'good genius,' सुदैवं, शुभदैवं.

GENTEEL, *a.* सभ्यः -भ्या -भ्यं, सभ्याचारी -रिणी -रि (न्), आर्य्यः -र्य्या -र्य्यं, आर्य्यव्यवहारः -रा -रं, आर्य्यवृत्तः -त्ता -त्तं, सद्वृत्तः -त्ता -त्तं, सुजनः -ना -नं, साधुवृत्तः -त्ता -त्तं, साधुव्यवहारः -रा -रं, सुशीलः -ला -लं, अग्राम्यः -म्या -म्यं, शिष्टाचारी -रिणी -रि (न्), महानुभावः -वा -वं.—(Elegant) विनीतः -ता -तं, चारुः -र्व्वी -रु, ललितः -ता -तं.

GENTEELLY, *adv.* सभ्यवत्, सुशीलवत्, आर्य्यवत्, सुजनवत्, सभ्याचारानुसारेण.

GENTEELNESS, *s.* सभ्यता, आर्य्यत्वं, सभ्याचारत्वं, आर्य्यवृत्तत्वं, सुशीलता, शिष्टाचारत्वं, सौजन्यं, सुजनता, साधुता, विनीतत्वं.

GENTIAN, *s.* (Plant) किरातः, किराततिक्तः, अनार्य्यतिक्तः, चिरातिक्तः, चिरतिक्तः, काण्डतिक्तकः, कैरातं, भूनिम्बः, भूतीकः.

GENTILE, *s.* अन्यदेशीयः, भिन्नदेशीयः, भिन्नदेशीयलोकः, अन्यदेशीयलोकः, देवतार्च्चकः, देवताभ्यर्च्चकः, देवार्च्चकः.—(Kindred) गोत्रजः; 'in grammar,' ज्ञातिवाचकः.

GENTILE, *a.* अन्यदेशीयः -या -यं, भिन्नदेशीयः -या -यं, जातीयः -या -यं.

GENTILISM, *s.* देवार्च्चकत्वं, देवतार्च्चनं -ना, देवताभ्यर्च्चनं, भिन्नदेशीयता.

GENTILITIAL, *a.* कौलिकः -की -कं, कुलजः -जा -जं, वंशिकः -की -कं, वंश्यः -श्या -श्यं, जातीयः -या -यं, दैशिकः -की -कं.

GENTILITY, *s.* (Politeness of manners) सभ्यता, सभ्याचारत्वं, सुशीलता, शिष्टाचारत्वं, आर्य्यत्वं, आर्य्यवृत्तत्वं, सौजन्यं, सुजनता, साधुवृत्तत्वं, सुविनीतता, महानुभावता.—(Good birth) कुलीनता, महाकुलत्वं, वंशविशुद्धता, कुलोत्कर्षः.

GENTLE, *a.* (Well-born) कुलीनः -ना -नं, सत्कुलीनः -ना -नं, महाकुलः

-ला -लं, महाकुलप्रसूतः -ता -तं, साधुजः -जा -जं, साधुवंशजः -जा -जं, आर्य्यवंशजः -जा -जं, सुजन्मा -न्मा -न्म (न्); 'a maid of gentle birth,' कुलकन्यका.—(Mild, soft, bland) मृदुः -द्वी -दु, मृदुलः -ला -लं, मन्दः -न्दा -न्दं, कोमलः -ला -लं, सौम्यः -म्या -म्यी -म्यं, स्निग्धः -ग्धा -ग्धं, सुकुमारः -रा -री -रं, मसृणः -णा -णं, अनुग्रः -ग्रा -ग्रं, अकर्कशः -शा -शं, अपरुषः -षा -षं, अचण्डः -ण्डा -ण्डी -ण्डं, अखरः -रा -रं, असाहसिकः -की -कं, सुकरः -रा -री -रं; 'of a gentle disposition,' मृदुभावः -वा -वं, मृदुस्वभावः -वा -वं.—(Quiet, tame) शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, शमी -मिनी -मि (न्), दान्तः -न्ता -न्तं; 'a gentle breeze,' मन्दानिलः, मृदुवातः; 'a gentle laugh,' मन्दहास्यं, मन्दस्मितं, ईषद्धासः; 'gentle remedy,' सौम्योपचारः, सामोपचारः; 'by gentle means,' साम्ना; 'gentle speech,' प्रियवाक्यं, प्रियोदितं.

GENTLE, *s.* (Maggot) अलिः *m.*, अली *m.* (न्), कोषकारी *m.* (न्).

GENTLEFOLK, *s.* आर्य्यलोकाः *m. pl.*, साधुजनाः *m. pl.*, आर्य्यमिश्राः *m. pl.*, कुलीनलोकः.

GENTLEMAN, *s.* आर्य्यः, आर्य्यजनः, आर्य्यमिश्रः, साधुः *m.*, साधुजनः, महाशयः, महानुभावः, कुलीनः, कुलीनजनः, सत्कुलीनः, सुजनः, सुजन्मा *m.* (न्), सज्जनः, सज्जातिः *m.*, महाजनः, सत्कुलजातः, सुविनीतः, श्री prefixed.

GENTLEMAN-COMMONER, *s.* राजविद्यालये अन्तेवासिनां मध्यात् प्रथमपदस्थः.

GENTLEMANLIKE, GENTLEMANLY, *a.* आर्य्यव्यवहारानुसारी -रिणी -रि (न्), सभ्याचारानुसारी &c., सभ्यः -भ्या -भ्यं, आर्य्यवृत्तः -त्ता -त्तं, सुशीलः -ला -लं, सुविनीतः -ता -तं, शिष्टाचारयोग्यः -ग्या -ग्यं; 'gentlemanly deportment,' आर्य्यवृत्तिः *f.*, सौजन्यं.

GENTLEMANLINESS, *s.* आर्य्यत्वं, सुशीलता, सौजन्यं, सुविनीतता.

GENTLENESS, *s.* मृदुता, म्रदिमा *m.* (न्), मार्द्दवं, मन्दता, कोमलता, सौम्यता -त्वं, स्निग्धता, सौकुमार्य्यं, सुकुमारता, अनुग्रता, अकार्कश्यं, अकर्कशत्वं, अपरुषता, अपारुष्यं, अचण्डता, असाहसं; 'of disposition,' भावमृदुता.

GENTLEWOMAN, *s.* आर्य्या, कुलीना स्त्री, सुशीला स्त्री, सुविनीता स्त्री.

GENTLY, *adv.* शनैस्, शनैः शनैस्, शनकैस्, मन्दं मन्दं, मृदु, अनुग्रं, अकर्कशं, अपरुषं, अचण्डं, साहसं विना.

GENTRY, *s.* आर्य्यलोकाः *m. pl.*, आर्य्याः *m. pl.*, साधुलोकाः *m. pl.*, कुलीनलोकाः *m. pl.*, कुलीनवर्गः, सुजनवर्गः, सुजनता, सौजन्यं.

GENUFLEXION, *s.* पूजार्थं जानुभ्यां नतिः *f.* or आनतिः *f.*, जानुनतिः *f.*

GENUINE, *a.* सत्यः -त्या -त्यं, प्रकृतः -ता -तं, वास्तवः -वी -वं -विकः -की -कं, अकल्पितः -ता -तं, अकृत्रिमः -मा -मं, अकपटः -टा -टं, निष्कपटः -टा -टं, निर्व्याजः -जा -जं, निर्व्यलीकः -का -कं, यथार्थः -र्था -र्थं, सारः -रा -रं.

GENUINELY, *adv.* सत्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्व्यलीकं, यथार्थं.

GENUINENESS, *s.* सत्यता, प्रकृतत्वं, अकृत्रिमता, अकल्पितत्वं, याथार्थ्यं, यथार्थता, निर्व्यलीकता, निर्व्याजत्वं, वास्तविकता, सारता.

GENUS, *s.* (In logic) परं.—(A class) जातिः *f.*, गणः, वर्गः, जातिमात्रं, गोत्रं.

GEOGRAPHER, *s.* भूपृष्ठविद्याज्ञः, भूगोलविद्याज्ञः, भूगोलशास्त्रज्ञः, भूपृष्ठलेखकः, भूगोलज्ञानी *m.* (न्), भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिलेखकः, भूपृष्ठस्य देशसमुद्रपर्व्वतनद्यादिव्याख्याता *m.* (तृ), भूपृष्ठविवरणकृत्.

GEOGRAPHICAL, *a.* भूगोलविषयः -या -यं, भूपृष्ठविषयकः -का -कं, भूगोलशास्त्रविषयः -या -यं, भूपृष्ठसम्बन्धी -न्धिनी -न्धि (न्), भूगोलशास्त्रीयः -या -यं.

GEOGRAPHICALLY, *adv.* भूगोलशास्त्रानुसारेण, भूगोलशास्त्रवत्.

GEOGRAPHY, *s.* भूपृष्ठविद्या, भूगोलविद्या, भूपृष्ठविषयकं ज्ञानं, भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिव्याख्या, भूपृष्ठस्य देशसमुद्रपर्व्वतनद्यादीनां ज्ञानं or विवरणं, भूगोलशास्त्रं.

GEOLOGICAL, *a.* पार्थिवांशविषयः -या -यं, पृथिवीविद्यासम्बन्धी -न्धिनी -न्धि (न्), पृथिवीसंस्थानविषयकः -का -कं.

GEOLOGIST, *s.* पार्थिवांशविद्याज्ञः, पृथिवीविद्याज्ञः, पृथिवीसंस्थानव्याख्याता *m.* (तृ), मृत्तिकाभावगुणादिविवरणकृत् *m.*

GEOLOGY, *s.* पार्थिवांशानां ज्ञानं or विद्या, पार्थिवांशविषयं ज्ञानं, पृथिवीविद्या, पार्थिवांशानां प्राचीनेतिहासः, पृथिवीसंस्थानविद्या, मृत्तिकासंस्थानविद्या, मृत्तिकाभावगुणादिविवरणविद्या.

GEOMETRAL, GEOMETRIC, GEOMETRICAL, *a.* क्षैत्रः -त्री -त्रं, क्षेत्रपरिमाणविषयः -या -यं, क्षेत्रगतः -ता -तं, क्षेत्रविद्यानुसारी -रिणी -रि (न्), रेखागणितसम्बन्धी -न्धिनी -न्धि (न्); 'geometrical proof,' क्षेत्रगतोपपत्तिः *f.*

GEOMETRICALLY, *adv.* क्षेत्रविद्यानुसारेण, रेखागणितशास्त्रवत् or -तस्.

GEOMETRICIAN, *s.* क्षेत्रविद्याज्ञः, रेखागणितविद् *m.*, क्षैत्रज्ञः, रेखागणितशास्त्रदर्शी *m.* (न्), क्षेत्रपरिमाणविद्यावान् *m.* (त्).

GEOMETRY, *s.* क्षैत्रं, क्षेत्रं, क्षेत्रविद्या, क्षेत्रपरिमाणविद्या, क्षेत्रपरिमाणविषया विद्या, रेखागणितं, रेखागणितशास्त्रं, रेखागणनाविद्या; 'proof by geometry,' क्षेत्रगतोपपत्तिः *f.*

GEORGIC, *s.* गोमेषादिविषयं गीतं, कृषिविद्याविषयकं काव्यं.

GERANIUM, *s.* वकमुखाकारबीजकोषः सुपुष्पवान् ओषधिभेदः.

GERFALCON, *s.* श्येनभेदः, कपोतारिः *m.*, घातिपक्षी *m.* (न्).

GERM, GERMEN, GERMIN, *s.* (The embryo of fruit, a bud) पल्लवः -वं, अङ्कुरः, अभिनवोद्भिद् *m.*, जालकं, क्षारकः, जोषिका, कुन्दुकं; 'of leaves,' नाडिः *f.*—(Origin, that from which any thing springs) बीजं, योनिः *m. f.*, आदिः *m.*, आरम्भः, गर्भः, मूलं.

GERMAN, *a.* (Related) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्की -र्किणी -र्कि (न्); 'cousin german,' पितृव्यपुत्रः -त्री, मातुलपुत्रः -त्री.—(Belonging to Germany) जर्म्मणिदेशसम्बन्धी &c., जर्म्मणिदेशजः -जा -जं; 'language,' जर्म्मणिदेशभाषा.

GERMANDER, *s.* अनेकौषधीनां साधारणनाम *n.* (न्), ओषधिगणसंज्ञा.

GERMANISM, *s.* जर्म्मणिदेशभाषासम्बन्धी सम्प्रदायः.

To GERMINATE, *v. n.* स्फुट् (c. 6. स्फुटति टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं), विक्रम् (c. 1. -क्रमति -मितुं), उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, प्ररुह् (c. 1. -रोहति -रोढुं), वृध् (c. 1. वर्धते -र्धितुं).

GERMINATING, *part.* उद्भिज्जः -ज्जा -ज्जं, उद्भिद् *m. f. n.*, उद्भिदः -दा -दं, प्ररोही -हिणी -हि (न्), अङ्कुरितः -ता -तं, फुल्लवान् -वती -वत्, प्रस्फुटः -टा -टं, स्फुटन् -टन्ती -टत् (त्).

GERMINATION, *s.* स्फुटनं, स्फुटता, उद्भेदः, प्रोद्भेदः, प्ररोहः, उद्वर्त्तनं.

GERUND, *s.* लाटीनभाषाव्याकरणे क्रियावाचकः शब्दः.

GESTATION, *s.* गर्भधारणं, गर्भपोषणं, गर्भवहनं, गर्भिणीभावः.

To GESTICULATE, *v. n.* अङ्गानि विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), हस्तादि विक्षिप् or सञ्चल् in caus. (-चालयति -यितुं), अङ्गविक्षेपं कृ, इङ्ग् (c. 1. इङ्गति -ङ्गितुं), नट् (c. 10. नाटयति -यितुं), अभिनयं कृ, आङ्गिककर्म्म कृ.

GESTICULATION, *s.* अङ्गविक्षेपः -पणं, हस्तादिविक्षेपः, अङ्गहारः, इङ्गितं, इङ्गितकरणं, अङ्गसञ्चालनं, हस्तादिसञ्चालनं, सङ्केतकरणं, ज्ञापी, सूचा -चना, भावकरणं, आङ्गिककर्म्म *n.* (न्).

GESTICULATOR, *s.* अङ्गविक्षेपकः, हस्तादिविक्षेपकः, अङ्गसञ्चालकः, इङ्गितकारी *m.* (न्), सङ्केतकारी *m.* (न्).

GESTURE, *s.* इङ्गितं, अङ्गविक्षेपः, हस्तादिविक्षेपः, सङ्केतः, अङ्गहारः -रिः *m.*, चेष्टा, भावः, इङ्गः, अभिनयः, अभिनीतिः *f.*, सूचना.

To GESTURE, *v. a.* साङ्गविक्षेपं कृ, सहस्तविक्षेपं कृ, साभिनयं कृ.

To GET, *v. a.* (Obtain) आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्,

सम्प्राप्, समवाप्, लभ् (c. 1. लभते, लब्धुं), उपलभ्, अर्ज् (c. 1. अर्जति -र्जितुं, c. 10. अर्जयति -यितुं), उपार्ज्, आसद् (c. 10. -सादयति -यितुं), समासद्, अधिगम् (c. 1. -गच्छति -गन्तुं), गम्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), आपद्, अभिपद्, आविश् (c. 6. -विशति -वेष्टुं), इ (c. 2. एति -तुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्.—(Have) धा (c. 3. दधाति, धत्ते, धातुं), धृ in caus. (धारयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्तुं), आप.—(Beget) जन् (c. 10. जनयति -यितुं).—(Learn) शिक्ष् (c. 1. शिक्षते -क्षितुं), अधी (c. 2. अधीते, अध्येतुं rt. इ), अधिगम्.—(Induce, persuade) अनुनी (c. 1. -नयति -नेतुं), प्रोत्सह् (c. 10. -साहयति -यितुं), or expressed by the causal; as, 'he got him to return,' निवर्त्तयामास.—(Earn) उपार्ज्, लभ्.—(Receive, take) आदा (c. 3. -दत्ते -दातुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), उपलभ्.—(Procure, get ready) कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, सज्जीकृ, उत्पद् (c. 10. -पादयति -यितुं).—(Get together) समानी (c. 1. -नयति -नेतुं), सञ्चि (c. 5. -चिनोति -चेतुं), समादा, सङ्ग्रह्, एकीकृ, एकत्र कृ.—(Get over, get through, surmount) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), तीर् (c. 10. तीरयति -यितुं), पार् (c. 10. पारयति -यितुं), तॄ (c. 1. तरति -रितुं -रीतुं), निस्तॄ; 'get over a difficulty,' दुःखम् आरुह्, दुःखपारं गम् (c. 1. गच्छति, गन्तुं), दुःखस्यान्तं गम्.—(Get up, prepare) उपस्कृ, संस्कृ, पुरस्कृ, विरच् (c. 10. -रचयति -यितुं), सज्जीकृ.—(Get into debt) ऋणं कृ, ऋणग्रस्तः -स्ता -स्तं भू, ऋणवान् -वती -वत् भू.

To GET, *v. n.* (Arrive at) आगम् (c. 1. -गच्छति -गन्तुं), उपगम्, अभिगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), अवाप्, आया (c. 2. -याति -तुं). उपस्था (c. 1. -तिष्ठति -स्थातुं).—(Get away) अपगम्, अपया, अपे (c. 2. अपैति -तुं, rt. इ), अपसृ (c. 1. -सरति -सर्तुं), अपक्रम् (c. 1. -क्रामति -क्रमितुं), चल् (c. 1. चलति -लितुं), प्रस्था.—(Get before) अग्रे or पूर्व्वं or पूर्व्वम् आगम् or प्राप्.—(Get clear) मुच् in pass. (मुच्यते).—(Get down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अधो या or गम्.—(Get in) विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्, आविश्.—(Get off, escape) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, निस्तॄ, अपक्रम्, निर्गम्.—(Get off, alight) अवतॄ, अवरुह्.—(Get out) अपगम्, अपसृ, अपे.—(Get up) उत्था for उत्स्था.—(Get quit of) मुच् in pass.—(Get on) प्रगम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रसृ, प्रया, प्रचल्.—(Get drunk) मत्तः -त्ता -त्तं भू, उन्मत्तीभू; 'get out with you,' अपसर, अपैहि, अपेहि.

GETTER, *s.* प्रापकः, अवाप्ता *m.* (प्तृ), लब्धा *m.* (ब्धृ), अर्जकः, उपार्जकः, अधिगन्ता *m.*(न्तृ), लाभकृत् *m.*, आदाता *m.*(तृ), ग्राहकः, जनकः, उत्पादकः.

GETTING, *s.* लाभः, लब्धिः *f.*, आप्तिः *f.*, प्राप्तिः *f.*, प्रापणं, अवाप्तिः *f.*, सम्प्राप्तिः *f.*, अर्जनं, उपार्जनं, आसादनं, अधिगमः, आगमः, ग्रहणं.

GEWGAW, *s.* अल्पमूल्यकम् आभरणं, अल्पार्थं क्रीडाद्रव्यं, क्रीडनकं, कन्दुकं, खेलाद्रव्यं, कदर्थद्रव्यं.

GHASTFULLY, *adv.* पिशाचवत्, भूतवत्, प्रेतवत्, दारुणं, भयानकं, घोरं.

GHASTLINESS, *s.* रूपदारुण्यं, वदनघोरता, मुखरौद्रता, भूतसरूपता, भौतत्वं, करालत्वं, विकटत्वं.

GHASTLY, *a.* (Like a ghost) भूतसरूपः -पी -पं, प्रेतसरूपः -पी -पं, भौतिकः -की -कं, पैशाचिकः -की -कं, शवसवर्णः -र्णा -र्णं, प्रेतसवर्णः -र्णा -र्णं.—(Frightful) घोररूपः -पी -पं, घोराकृतिः -तिः -ति, दारुणः -णा -णं, भयानकः -का -कं, रौद्रः -द्री -द्रं, भीमदर्शनः -ना -नं, उग्रम्पश्यः -श्या -श्यं, करालमुखः -खी -खं.

GHAUT, *s.* (Landing-place) घट्टः -ट्टी, मज्जनं, गुल्मः.—(Malaya range of mountains) मलयः, मलयाचलः, मलयपर्व्वतः, मलयाद्रिः *m.*, दक्षिणाचलः, दक्षिणपर्व्वतः.

GHEE, *s.* घृतं, हविस् *n.*, सर्पिस् *n.*, हव्यं, हवनीयं, हविष्यं, आज्यं, तनूनपं, तृप्तः.

GHOST, *s.* (Soul) आत्मा *m.* (न्), अन्तरात्मा *m.* (न्).—(Disembodied spirit) प्रेतः, प्रेतनरः, परेतः, नारकः, नरकवासी *m.* (न्), नरकामयः.—(Goblin) वेतालः, रात्रिचरः, निशाचरः, निशाटः, भूतः -तं, श्मशानवासी *m.* (न्), राक्षसः; 'to give up the ghost,' प्राणत्यागं कृ, ईश्वरहस्ते जीवनं or प्राणं समृ in caus. (-अर्पयति -यितुं).

GHOSTLIKE, *s.* प्रेतसरूपः -पा -पी -पं, भूतसरूपः -पा -पी -पं.

GHOSTLINESS, *s.* प्रेतत्वं, भूतत्वं, परेतत्वं, आत्मता, पारमार्थिकत्वं.

GHOSTLY, *a.* (Spiritual) आत्मिकः -की -कं, आत्मविषयः -या -यं, पारमार्थिकः -की -कं, अशारीरिकः -की -कं, पारत्रिकः -की -कं.—(Pertaining to ghosts) भौतिकः -की -कं, प्रेतसम्बन्धी -न्धिनी -न्धि (न्).

GIANT, *s.* (A man of extraordinary size) बृहत्कायः, बृहच्छरीरः, विकटशरीरः, भीमविग्रहः, प्रकाण्डशरीरः, अखर्वः.—(A titan) दैत्यः, असुरः, राक्षसः, दानवः, दैतेयः, रक्षस् *n.*, इन्द्रारिः *m.*, सुरद्विट् *m.* (ष्), दितिसुतः, दनुजः, यातु *n.*, यातुधानः, पूर्व्वदेवः, शुक्रशिष्यः, कौणपः, नैरृतः, निकषात्मजः, क्रव्याद् *m.*, निशाचरः.

GIANTESS, *s.* बृहत्काया, बृहच्छरीरा, विकटशरीरा स्त्री, राक्षसी.

GIANT-LIKE, GIANTLY, *a.* बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं.

To GIBBER, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), अस्पष्टं वद् (c. 1. वदति -दितुं).

GIBBERISH, *s.* अनर्थकवाक्यं, असम्बद्धवाक्यं, वृथाकथा, मृषार्थकवचनं, जल्पितं; 'one who talks it,' अनियद्धप्रलापी *m.* (न्).

GIBBET, *s.* उद्बन्धनकाष्ठं, उद्बन्धनवृक्षः, वधस्थानं, घातस्थानं.

To GIBBET, *v. a.* रज्जुपाशेन उद्बन्ध् (c. 9. -बध्नाति -बन्धुं), उद्बन्धनं कृ.

GIBBOSITY, *s.* कुब्जता, न्युब्जता, कूर्म्मपृष्ठाकारत्वं, पिण्डाकारता, आभोगः, खण्डमण्डलत्वं.

GIBBOUS, *a.* (Convex, protuberant) न्युब्जः -ब्जा -ब्जं, पिण्डाकारः -रा -रं, कूर्म्मपृष्ठाकारः -रा -रं, गण्डाकारः -रा -रं, आभोगी -गिनी -गि (न्); 'as the moon,' खण्डमण्डलः -ला -लं.—(Hump-backed) कुब्जः -ब्जा -ब्जं, गडुरः -रा -रं.

GIBBOUSNESS, *s.* न्युब्जता, कूर्म्मपृष्ठाकारता, आभोगता. *See* GIBBOSITY.

GIB-CAT, *s.* जीर्णमार्जारः, अतिवृद्धो बिडालः.

To GIBE, *v. a.* and *n.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, परिक्षिप्, अवहस् (c. 1. -हसति -सितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

GIBE, *s.* क्षेपः, अवक्षेपः, तिरस्कारः, अवहासः, दुर्वाक्यं, दुरुक्तं, कटुवाक्यं.

GIBER, *s.* क्षेपकः, अवक्षेपकः, दुर्मुखः, मुखरः, दुर्वक्ता *m.* (क्तृ).

GIBLETS, *s. pl.* हंसादेर् यत् पादमस्तकयकृदादि प्राक्शूलारोपणाद् अवच्छिन्नीभूय पृथक् पच्यते, हंसस्य पचनयोग्यं हृद्यकृदन्त्रादि, हंसखण्डकाः *m. pl.*

GIDDILY, *adv.* भ्रामररोगग्रस्तवत्, सभ्रामरं, चपलं, मनोलौल्यात्.

GIDDINESS, *s.* (Of the head, &c.) भ्रमरं, भ्रामरं, भ्रमिः *f.*, भ्रमः, विभ्रमः, विभ्रान्तिः *f.*, घूर्णिः *f.*, घूर्णनं, चक्षुरादिचापल्यं -चापलं, चक्षुरादिविभ्रान्तिः *f.*, प्रमादः.—(Of character) चपलता, चापल्यं, चञ्चलत्वं, चाञ्चल्यं, चलचित्तता, अस्थिरता, अस्थैर्यं, लोलता, अनवस्थितिः *f.*, अधीरत्वं, लौल्यं, मनोलौल्यं, विभ्रान्तिः *f.*, विभ्रान्तशीलता, तरलता, प्रमत्तता.

GIDDY, *a.* (In the head) भ्रामरी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्), घूर्णरोगी -गिणी -गि (न्), भ्रामररोगी &c., विभ्रान्तः -न्ता -न्तं.—(Causing giddiness) भ्रमकरः -री -रं.—(In character) चपलः -ला -लं, चञ्चलः -ला -लं, विभ्रान्तशीलः -ला -लं, अस्थिरः -रा -रं, अनवस्थः -स्था -स्थं, अनवस्थितः -ता -तं, अधीरः -रा -रं, चपलबुद्धिः -द्धिः -द्धि, चपलात्मकः -का -कं, चलचित्तः -त्ता -त्तं, लोलः -ला -लं, लोलमनाः

-नाः -नः (स्), प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्).—(Elated) उद्धतः -ता -तं, मत्तः -त्ता -त्तं; 'with power,' ऐश्वर्य्यमत्तः -त्ता -त्तं.

GIFT, *s.* दानं, प्रदानं, दत्तं, प्रदेयं, सम्प्रदानं, दायः, उपहारः, उपायनं, वितरणं, त्यागः, उत्सर्ज्जनं, विसर्गः, विसर्ज्जनं, विश्राणनं, अंहतिः *f.*, उपग्राह्यं, उपढौकनं, उपदा -दानकं, प्रदा, दादः, दा, दं, विहापितं, प्रतिपादनं, निर्वपणं, स्पर्शनं, प्रादेशनं, प्रदेशनं, अपवर्ज्जनं, उपचारः, प्रीतिदानं, प्राभृतं; 'a special gift,' सदायः, सुदायः, हरणं; 'nuptial gift,' यौतकं; 'desirable gift,' प्रवारणं, प्रहारणं; 'gift to deceased ancestors,' पितृदानं.—(Endowment) गुणः, शक्तिः *f.*

GIFTED, *p. p.* or *a.* (Endowed) सम्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, उपेतः -ता -तं, अन्वितः -ता -तं, शीलितः -ता -तं. —(With talents) गुणी -णिनी -णि (न्), गुणवान् -वती -वत् (त्), इष्टगुणसम्पन्नः -न्ना -न्नं, सद्गुणोपेतः -ता -तं.

GIG, *s.* (Any thing that whirls round in play) भ्रमरं, भ्रमरक्रीडनकं. —(A light carriage) द्विचक्रयुक्तं लघुयानं, लघुरथः.—(Boat) उपनौका, लघुनौका, क्षुद्रनौका.

GIGANTIC, *a.* बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं -री -रिणी -रि (न्), भीमविग्रहः -हा -हं, अतिकायः -या -यं, विकटशरीरः -रा -रं, अतिमहान् -हती -हत् (त्), अतिबृहन् -हती -हत् (त्), राक्षसपरिमाणः -णा -णं, दैत्यपरिमाणः -णा -णं.

GIGGLE, *s.* असम्बद्धपरिहासः, अनर्थकहासः, कुहसितं, मूर्खहसितं.

To GIGGLE, *v. n.* असम्बद्धपरिहासं कृ, अनर्थकहासं कृ, मूर्खवत् or असम्बद्धं or कु हस् (c. 1. हसति -सितुं), कक्ख् (c. 1. कक्खति -क्खितुं), कख् (c. 1. कखति -खितुं).

GIGGLER, *s.* असम्बद्धपरिहासशीलः, निरर्थकहासकारी *m.* (न्).

To GILD, *v. a.* (Overlay with gold) सुवर्ण (nom. सुवर्णयति -यितुं), स्वर्णपत्रपिनद्धं -द्धां -द्धं कृ, सुवर्णोपेतं -तां -तं कृ.—(Illuminate) रञ्ज् (c. 10. रञ्जयति -यितुं), द्युत् (c. 10. द्योतयति -यितुं), विराज् (c. 10. -राजयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं).

GILDED, *p. p.* सुवर्णितः -ता -तं, रसितः -ता -तं, स्वर्णपत्रपिनद्धः -द्धा -द्धं, स्वर्णमण्डितः -ता -तं, स्वर्णपत्रसंवीतः -ता -तं or -प्रतिबद्धः -द्धा -द्धं, राजतान्वितः -ता -तं, रञ्जितः -ता -तं, राजितः -ता -तं, प्रद्योतितः -ता -तं.

GILDER, *s.* स्वर्णपत्रादिना रञ्जकः, स्वर्णपत्रपिनद्धकारी *m.* (न्).

GILDING, *s.* स्वर्णरञ्जनं, सुवर्णीकरणं, स्वर्णमण्डनं; 'of the leaves of a book,' पत्ररञ्जनं.

GILL, *s.* (Organ of respiration in fishes) मत्स्यानां श्वासेन्द्रियं, मत्स्यानां श्वासप्रश्वासार्थं मस्तकरन्ध्रं or शिरोरन्ध्रद्वयं.—(Of a fowl) कुक्कुटस्य मुखकम्बलः or मुखस्याधःस्थं लोलमांसं.—(Flesh on the lower part of the cheek) अधोगण्डमांसं, अधोगण्डः, अधःकपोलः, चिबुकमांसं.—(Measure) द्रवद्रव्याणां परिमाणविशेषः.

GILLY-FLOWER, *s.* अनेकौषधीनां सामान्यनाम *n.* (न्), ओषधिगणसंज्ञा.

GILT, *p. p.* or *a.* सुवर्णितः -ता -तं, रसितः -ता -तं, राजतान्वितः -ता -तं. *See* GILDED.

GILT, *s.* सुवर्णरञ्जनं, स्वर्णपत्रं; 'silver-gilt,' विमलं.

GILT-HEAD, *s.* (Fish) गडकः, शकुलगडः, शकुलार्भकः, शालः, कुम्भिलः.

GIMCRACK, *s.* निरर्थकयन्त्रं, क्रीडायन्त्रं, क्रीडाद्रव्यं, क्रीडनकं.

GIMLET, *s.* वेधनिका, आस्फोटनी, लास्फोटनी, आविधः.

GIMP, *s.* कौशिकसूत्रनिर्म्मितः सुतनुचेलकः.

GIN, *s.* (Spirit) शुण्डा, सुरा -री, वारुणी, शीधुः *m.* -धु *n.*, मदिरा, हाला, आसवं; 'gin-drinker,' सुरापः -पी, शुण्डापायी *m.* -यिनी; 'gin-drinking,' सुरापानं; 'gin-shop,' शुण्डापानं, पानगोष्ठिका.

—(Snare, trap) पाशः, उन्माथः, जालं, कूटयन्त्रं, वागुरा, पाशबन्धं.

GINGER, *s.* आर्द्रकं, शृङ्गवेरं, अकूलोद्भः, गुल्ममूलं, अपाकशाकं; 'dry ginger,' शुष्कार्द्रं, शुण्ठिः *f.* -ण्ठी -ण्ठ्यं, विश्वभेषजं, विश्वं -श्वा, महौषधं, नागरं.

GINGER-BEER, *s.* आर्द्रकपानं, आर्द्रकरसः, आर्द्रकपानीयं, आर्द्रकसुरा.

GINGER-BREAD, *s.* आर्द्रकपिष्टकः, आर्द्रकपूपः, आर्द्रकमयं मिष्टान्नं.

GINGER-WINE, *s.* आर्द्रकमद्यं, आर्द्रकमदिरा, आर्द्रकसुरा.

GINGERLY, *adv.* सावधानं, अवधानेन, शनैः शनैस्, असहसा.

GINGHAM, *s.* रेखाचित्रितं कार्पासाम्बरं or तूलावस्त्रं.

GINGIVAL, *a.* दन्तमांससम्बन्धी -न्धिनी -न्धि (न्), दन्तशिरासम्बन्धी &c.

To GINGLE, *v. n.* शिञ्ज् (c. 2. शिंक्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), किङ्किण (nom. किङ्किणायते), झञ्झनं कृ.

GINGLE, GINGLING, *s.* शिञ्जः -ञ्जा, शिञ्जितं, आशिञ्जितं, क्वणितं, किङ्किणिशब्दः, झञ्झनं, झनत्कारः.

GINGLING, *part.* क्वणन् -णन्ती -णत् (त्), शिञ्जी -ञ्जिनी -ञ्जि (न्).

GINNET, *s.* अश्वकः. *See* JENNET.

GIPSY, *s.* हस्तरेखानिरीक्षणानन्तरं दैवकथनाद्युपजीवी चक्राटः, अवनिचरः -रा *f.*, धूर्त्तः -र्त्ती *f.*, काकचरित्रः -त्रा.

GIRAFFE, *s.* तरक्षुरूपेण चित्रित उष्ट्रजातीयो दीर्घग्रीवो जन्तुभेदः.

To GIRD, *v. a.* (Bind round) बन्ध् (c. 9. बध्नाति, बन्धुं), परिबन्ध्.—(Bind on) आबन्ध्, पिनह् (c. 4. -नह्यति -नद्धुं), अवनह्, सन्नह्, पिनद्धं -द्धां -द्धं कृ, आकृष् (c. 1. -कर्षति -र्षितुं); 'gird the loins,' कटिं बन्ध्.—(Encircle, invest) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिधा (c. 3. -दधाति -धत्ते -धातुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

To GIRD, *v. n.* (Gibe) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अधिक्षिप्, अवहस् (c. 1. -हसति -सितुं).

GIRD, *s.* आकर्षः, शूलं, अपतानकः, अपतन्त्रकः, आक्षेपकः, वेगाघातः.

GIRDED, *p. p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, अवनद्धः -द्धा -द्धं, आबद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, परिहितः -ता -तं.

GIRDER, *s.* गृहतले वृहत्काष्ठं or अयःकाष्ठं or महादारु *m.*

GIRDLE, *s.* (Belt) मेखला, रसना, कटिसूत्रं, कटिबन्धनं -नी, काञ्ची, कलापः, कक्षा, कक्ष्या, परिकरः, सारसं -सनं, यन्त्रनं, सप्तकी, शृङ्खरी, रशना, शृङ्खला.—(Inclosure, circumference) वेष्टनं, परिवेष्टनं, आवेष्टनं, मण्डलं, वलयः, चक्रवालं.—(Zodiac) राशिचक्रं.

To GIRDLE, *v. a.* मेखलया बन्ध् (c. 9. बध्नाति, बन्धुं), वेष्ट् (c. 1. वेष्टते -ष्टितुं, c. 10. वेष्टयति -यितुं), परिवेष्ट्, परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

GIRDLER, *s.* मेखलाकारः, रसनाकर्त्ता *m.* (र्तृ), कटिसूत्रकारी *m.* (न्).

GIRL, *s.* कन्या, कुमारी, तरुणी, बाला, बालिका, पुत्री, दारिका, अनागतार्त्तवा, लग्निका, नग्निका, गौरी, वासूः *f.*

GIRLHOOD, *s.* कन्यात्वं, कुमारीत्वं, तरुणीत्वं, कौमार्य्यं, तारुण्यं.

GIRLISH, *a.* कन्यायोग्यः -ग्या -ग्यं, कुमारीयोग्यः -ग्या -ग्यं.

GIRLISHLY, *adv.* कन्यावत्, कुमारीवत्, तरुणीवत्, कन्यारूपेण.

GIRT, *p.p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, वेष्टितः -ता -तं, परिवेष्टितः -ता -तं; 'girt with a falchion,' बद्धनिस्त्रिंशः -शा -शं; 'sea-girt,' समुद्रमेखलः -ला -लं.

GIRTH, *s.* उदरत्राणं, अधोबन्धनं -नी, वरत्रा, वर्ध्रं, वर्ध्री, नद्ध्री, चूषा, कक्षा, कक्ष्या.

To GIRTH, *v. a.* वरत्रया बन्ध् (c. 9. बध्नाति, बन्धुं), उदरत्राणं पिनह् (c. 4. -नह्यति -नद्धुं).

GIST, *s.* अर्थः, मुख्यार्थः, परमार्थः, उत्तमार्थः, अर्थविषयः.

To GIVE, *v. a.* दा (c. 3. ददाति, दत्ते, दातुं), प्रदा, प्रादा, अभिदा, सम्प्रदा,

निदा, अनुदा, सम्दा, यम् (c. 1. यच्छति -ते, दातुं), प्रयम्, संयम्, प्रतियम्, सम्प्रयम्, दद् (c. 1. ददते -दितुं), प्रतिपद् (c. 10. -पादयति -यितुं), उपपद्, ऋ in caus. (अर्पयति -यितुं), सम्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), वितृ (c. 1. -तरति -रितुं -रीतुं), विश्रण् (c. 10. -श्राणयति -यितुं), त्यज् (c. 1. त्यजति, त्यक्तुं), विसृज् (c. 10. -सर्जयति -यितुं), ग्रह् in caus. (ग्राहयति -यितुं), आहृ (c. 1. हरति -हर्तुं), उपहृ, सङ्क्रम् in caus. (-क्रामयति -यितुं), दिश् (c. 6. दिशति, देष्टुं).—(Give away) प्रदा, प्रयम्.—(Give back) प्रतिदा, प्रतिपद्, प्रत्यर्प् (caus. of ऋ with प्रति), निर्यत् (c. 10. -यातयति -यितुं), प्रतिनिर्यत्, प्रतिरुह् in caus. (-रोपयति -यितुं).—(Give chase) अनुधाव् (c. 1. धावति -वितुं), अनुसृ (c. 1. -सरति -सर्तुं).—(Give forth) प्रकाश् (c. 10. -काशयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं).—(Give the hand for support) करालम्बनं कृ.—(Give in) अनुदा, अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), त्यज्.—(Give over) त्यज्, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विरम् (c. 1. -रमति -रन्तुं) with abl. c., निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. c. 'To give over a sick man,' असाध्य इति परिच्छिद्य रोगातुरं मुच् (c. 6. मुञ्चति, मोक्तुं).—(Give out) निविद्, प्रकाश्, विघुष् (c. 10. -घोषयति -यितुं); 'emit,' उत्सृज्, मुच्, निःसृ in caus. (-सारयति -यितुं).—(Give up) त्यज्, परित्यज्, सन्त्यज्: हा (c. 3. जहाति, हातुं), विहा; उत्सृज्, विमुच्, उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, प्रत्यादिश्.—(Give one's self up to) आसञ्ज् in pass. (-सज्यते or -सज्जते), सेव् (c. 1. सेवते -वितुं), आसेव्, आसक्तः -क्ता -क्तं भू. निरतः -ता -तं भू.—(Give ground) अपक्रम् (c. 1. -क्रामति -क्रमितुं), अवस्था (c. 1. -तिष्ठते -स्थातुं), परावृत्, निवृत्.—(Give way) पन्थानं दा, त्यज्, अपसृ (c. 1. -सरति -सर्तुं); 'give way,' अपसरत, पन्थानं त्यजत.—(Give in marriage) दा, प्रदा, उपादिश्; 'the girl is given in marriage to a husband,' कन्या वोढुः प्रदीयते.—(Give thanks) धन्यवादं कृ, धन्यं वद् (c. 1. वदति -दितुं), कुशलं वद्.—(Give ear) कर्णं दा.—(Give power) शक्तिं दा, क्षमताम् ऋ, नियुज् (c. 7. -युनक्ति -योक्तुं).—(Give utterance) उदीर् (c. 10. -ईरयति -यितुं), उच्चर् (c. 10. -चारयति -यितुं), उदाहृ.—(Give suck) धे in caus. (धापयति -यितुं), उपधे, पा in caus. (पाययति -यितुं).—(Give offence) रुष् in caus. (रोषयति -यितुं), विप्रियं कृ.

To give, *v. n.* (Give way, sink) सद् (c. 1. सीदति, सत्तुं), अवसद्.—(Relent, be mitigated) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, शान्तिं or सान्त्वनं या (c. 2. याति -तुं), शान्तीभू, शिथिलीभू.—(Recede) अपसृ (c. 1. -सरति -सर्तुं), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), अपया.—(Cease) विरम् (c. 1. -रमति -रन्तुं), निवृत्, शम्.—(Give in to) अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं).

Given, *p. p.* दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, नीत्तः -त्ता -त्तं, निहितः -ता -तं, निक्षिप्तः -प्ता -प्तं, प्रतिपादितः -ता -तं, उपपादितः -ता -तं, विश्राणितः -ता -तं, अर्पितः -ता -तं, समर्पितः -ता -तं, वितीर्णः -र्णा -र्णं, विसर्जितः -ता -तं, विसृष्टः -ष्टा -ष्टं, उपन्यस्तः -स्ता -स्तं; 'well given,' सुदत्तः -त्ता -त्तं; 'given and taken,' दत्तादत्तः -त्ता -त्तं, दत्तापहृतः -ता -तं.—(Given up) त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, उत्सृष्टः -ष्टा -ष्टं.—(Addicted to) आसक्तः -क्ता -क्तं, रतः -ता -तं, निरतः -ता -तं; 'given quantity,' दृश्यः.

Giver, *s.* दाता *m.* (तृ), प्रदाता, दायकः, दायी *m.* (न्), दानकर्त्ता *m.* (र्तृ), दात्रकः, दादी *m.* (न्), प्रदः or दः in comp., त्यागी *m.* (न्); 'giver and receiver,' दातृग्राहकौ m. du., दातृप्रतीच्छकौ m. du.

Giving, *s.* दानं, प्रदानं, सम्प्रदानं, त्यागः, वितरणं, विसर्जनं.

Gizzard, *s.* कुक्कुटादीनां जठरः or उदरं or अन्नजठरं or पक्वाशयः.

Glacial, *a.* हिम्यः -म्या -म्यं, हैमः -मी -मं, हिमरूपः -पा -पं.

To glaciate, *v. n.* हिमीभू, हिमवत् संहतीभू or शीतीभू.

Glaciation, *s.* शीतीकरणं, शीतीभावः, हिमीकरणं, हिमसंहतिः *f.*

Glacier, *s.* हिमपर्वतोत्सङ्गे सुविस्तीर्णा हिमसंहतिः.

Glacis, *s.* दुर्गबहिर्भागे प्रवणभूमिः *f.* or निम्नभूमिः or स्थानं क्रमशो ऽधोगम्यं.

Glad, *a.* हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, हृष्टमानसः -सा -सं, हर्षयुक्तः -क्ता -क्तं, आनन्दी -न्दिनी -न्दि (न्), आनन्दितः -ता -तं, सानन्दः -न्दा -न्दं, प्रीतः -ता -तं, आह्लादितः -ता -तं, प्रह्लादितः -ता -तं, प्रवत्तः -त्ता -त्तं, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, तृप्तः -प्ता -प्तं, प्रसादितः -...तं, प्रफुल्लः -ल्ला -ल्लं, उल्लसः -सा -सं -सितः -ता -तं, अभिहर्षितः -ता -तं, मत्तः -त्ता -त्तं.—(Making glad) हर्षकः -का -कं, नन्दकः -का -कं, मोदकः -का -कं, आनन्दकरः -री -रं, हर्षकरः -री -रं, सुभगः -गा -गं, रमणीयः -या -यं.

To glad, gladden, *v. a.* हृष् (c. 10. हर्षयति -यितुं), प्रहृष्, परिहृष्, नन्द् (c. 10. नन्दयति -यितुं), अभिनन्द्, ह्लाद् (c. 10. ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, रम् (c. 10. रमयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), तुष् (c. 10. तोषयति -यितुं), तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं).

Gladdened, *p. p.* आह्लादितः -ता -तं, आनन्दितः -ता -तं, प्रमोदितः -ता -तं.

Gladdening, *a.* हर्षकः -का -कं, हर्षणः -णा -णं, हर्षकरः -री -रं, नन्दकः -का -कं, आनन्दनः -ना -नं, आनन्ददः -दा -दं, प्रीतिदः -दा -दं.

Gladder, gladdener, *s.* आनन्दकारी *m.* (न्), आनन्दकः, सुखदः.

Glade, *s.* जङ्गलमध्ये or वनमध्ये पथः, वनपथः, वनमार्गः, वृक्षावृतः पथः, तरुगुल्मावृतो मार्गः.

Gladiate, *a.* खड्गाकारः -रा -रं, अस्याकारः -रा -रं, खड्गाकृतिः -तिः -ति.

Gladiator, *s.* मल्लः, मल्लः, आसिकः, असिक्रीडकः, खड्गक्रीडकः, मल्लक्रीडकः, नैस्त्रिंशिकः.

Gladiatorial, *a.* मल्लसम्बन्धी -न्धिनी -न्धि (न्), असिक्रीडासम्बन्धी &c., आसिकः -की -कं.

Gladiature, *s.* असियुद्धं, खड्गयुद्धं, असिक्रीडा, खड्गक्रीडा.

Gladly, *adv.* सानन्दं, सहर्षं, हर्षेण, हृष्टमनसा, हृष्टवत्, साह्लादं, आह्लादेन, प्रह्लादेन, प्रमोदेन, सन्तोषेण.

Gladness, *s.* हर्षः, आनन्दः, आह्लादः, प्रह्लादः, प्रमोदः, आमोदः, हृष्टिः *f.*, मुदा, हृष्टता, प्रहृष्टता, प्रफुल्लता, उल्लासः, उल्लसत्वं, चित्तप्रसन्नता, प्रीतिः *f.*, प्रीतता, तुष्टिः *f.*, सन्तुष्टिः *f.*, मोदः, उत्सवः.

Gladsome, *a.* आनन्दी -न्दिनी -न्दि (न्), रम्यः -म्या -म्यं, सुभगः -गा -गं.

Glair, *s.* अण्डशुक्लं, अण्डगर्भपरिगतः शुक्लरसः, अण्डपयस् *n.*

Glance, *s.* (Of the eye) दृष्टिपातः, दृष्टिनिपातः, नयनपातः, दृष्टिविक्षेपः, कटाक्षः, नेत्रकटाक्षः, अपाङ्गदृष्टिः *f.*, अपाङ्गदर्शनं, वीक्षितं, प्रेक्षितं, अवलोकनं, काक्षः, दृष्टिबाणः.—(Slight view) ईषद्दर्शनं, ईषद्दृष्टिः *f.*, अर्द्धवीक्षणं, अर्द्धदृष्टिः *f.*; 'glance in return,' प्रतिसमीक्षणं.—(A shoot of light) स्फुरितं, स्फुरणं, द्युतिपातः, रश्मिः *m.*

To glance, *v. n.* (As light) स्फुर् (c. 6. स्फुरति -रितुं), परिस्फुर्, लस् (c. 1. लसति -सितुं).—(Strike lightly and pass by) लघु हत्वा or ताडयित्वा अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or अती (c. 2. अत्येति -तुं, rt. इ), दूरम् अतिक्रम्य वृष् (c. 1. वर्षति -र्षितुं).—(Glance with the eye) दृष्टिं पत् (c. 10. पातयति -यितुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), दृष्टिबाणं मुच्, कटाक्ष (nom. कटाक्षयति -यितुं).—(Glance at, inspect slightly) ईषद् दृश् (c. 1. पश्यति, द्रष्टुं) or निरीक्ष् (c. 1 -ईक्षते -क्षितुं), अर्द्धवीक्षणं कृ.

GLANCING, *part.* स्फुरन्-रन्ती-रत् (त्), लसन्-सन्ती-सत् (त्), स्फुरितः-ता-तं.

GLANCINGLY, *adv.* लघु, ईषत्, अल्पमात्रं, साचिदर्शनं, लाघवेन, तिर्य्यक्, तिरस्, वक्रगत्या.

GLAND, *s.* शरीराभ्यन्तरे ग्रन्थिसंज्ञकः पित्तश्लेष्माद्याशयो मृदुमांसपिण्डः, मांसग्रन्थिः *m.*

GLANDERS, *s.* अश्वानाम् उग्ररोगविशेषो यत्र नासिकारन्ध्रेभ्यः दुर्गन्धश्लेष्म or दुर्गन्धमलम् उत्सृज्यते.

GLANDULE, *s.* शरीराभ्यन्तरे श्लेष्माद्याशयो मृदुमांसपिण्डकः.

GLANDULOUS, GLANDULAR, *a.* पूर्व्वोक्तमांसपिण्डसम्बन्धी -न्धिनी -न्धि (न्).

GLANS, *s.* (Penis) मणिः *m.f.*

GLARE, *s.* तेजस् *n.*, अतितेजस्, अतिद्युतिः *f.*, द्युतिः *f.*, अतिप्रभा, भाः *f.* (स्), दृष्टिसन्तापका द्युतिः, नयनोपघातिनी प्रभा, हेतिः *f.*, उज्ज्वलद्युतिः *f.*, प्रखरदीप्तिः *f.*, खरदीप्तिः *f.*—(Fierce look) उग्रदृष्टिः *f.*, तीक्ष्णदृष्टिः, कोपज्वलिता दृष्टिः.

To GLARE, *v. n.* अतितेजसा द्युत् (c. 1. द्योतते -तितुं), उज्ज्वल् (c. 1. -ज्वलति -लितुं), ज्वल् in freq. (जाज्वल्यते), दीप् in freq. (देदीप्यते), अतितेजसा दृष्टिं सन्तप् (c. 10. -तापयति -यितुं) or उपहन् (c. 2. -हन्ति -न्तुं), स्फुर् (c. 6. स्फुरति -रितुं).—(Look with fierce eyes) तीक्ष्णदृष्टिं or कोपज्वलितां दृष्टिं पत् (c. 10. -पातयति -यितुं), रोषप्रदीप्ताक्षः -क्षा -क्षं भू.

GLAREOUS, *a.* अण्डशुक्लसगुणः -णा -णं, अण्डशुक्लधर्म्मी -र्म्मा -र्म्म (न्).

GLARING, *part.* or *a.* अतितेजसः -सी -सं, उज्ज्वलः -ला -लं, अतिद्योती -तिनी -ति (न्), अतितेजसा दृष्टिसन्तापकः -का -कं or नयनोपघाती -तिनी -ति (न्), भास्वान् -स्वती -स्वत् (त्), काशीनवः -वी -वं.—(Clear, notorious) सर्व्वप्रकाशः -शा -शं, सुप्रकाशः -शा -शं, पुरःस्फुरन् -रन्ती -रत् (त्); 'having eyes glaring with anger,' रोषदीप्ताक्षः -क्षा -क्षं.

GLARINGLY, *adv.* सुप्रकाशं, सर्व्वप्रकाशं, सर्व्वप्रसिद्धं, अतितेजसा.

GLASS, *s.* (Transparent substance formed by fusing sand with alkalies) काचः, क्षारः, सिक्थं, अभ्रं -भ्रकं, स्फटिकः.—(Glass drinking-vessel) काचभाजनं, काचपात्रं, काचकूपी, पलिघः, चुलुकः, घारी; 'glass jar,' काचघटी.—(Looking-glass, mirror) दर्पणः, मुकुरः, आदर्शः.

GLASS, *a.* काचमयः -यी -यं, काचनिर्म्मितः -ता -तं, काच in comp.

To GLASS, *v. a.* *See To* GLAZE.

GLASS-BLOWER, *s.* काचधमकः, क्षारधमकः, काचध्माकारः, काचनिर्म्माणकृत्.

GLASSFUL, *s.* काचपात्रपूरणं, काचभाण्डभरकः, काचभाण्डपूरकः.

GLASS-GRINDER, *s.* काचपरिष्कारकः, काचमार्ज्जकः, काचतेजस्कारी *m.* (न्).

GLASS-HOUSE, *s.* काचनिर्म्माणशाला, क्षारनिर्म्माणगृहं, काचशाला.

GLASSINESS, *s.* स्वच्छता, प्रसन्नता, प्रसत्तिः *f.*, विमलता, श्लक्ष्णता.

GLASS-LIKE, *a.* काचोपमः -मा -मं, काचसगुणः -णा -णं.

GLASS-MAN, *s.* काचविक्रेता *m.* (तृ), काचद्रव्यविक्रयी *m.* (न्), काचव्यवसायी *m.* (न्).

GLASS-WORK, *s.* काचनिर्म्माणं, काचनिर्म्माणशिल्पं, काचकर्म्म *n.* (न्).

GLASSY, *a.* काचोपमः -मा -मं, काचवत्प्रसन्नः -न्ना -न्नं, काचवद्विमलः -ला -लं, स्वच्छः -च्छा -च्छं, स्फटिकप्रभः -भा -भं, श्लक्ष्णः -क्ष्णा -क्ष्णं.

GLAUCOUS, *a.* समुद्रवर्णः -र्णा -र्णं, श्यामहरित् *m.f.n.*, घननीलः -ला -लं.

GLAVE, *s.* पृथुपत्रः खड्गः, कृपाणः, निस्त्रिंशः, असिः *m.*

To GLAZE, *v. a.* काच (nom. काचयति -यितुं), काचेन आच्छद् (c. 10. -च्छादयति -यितुं), काचान्वितं -तां -तं कृ, काचोपेतं -तां -तं कृ.—(Make smooth) श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं), स्निग्धीकृ, श्लक्ष्णीकृ.

GLAZED, *p.p.* काचितः -ता -तं, काचान्वितः -ता -तं, काचाच्छादितः -ता -तं.

GLAZIER, *s.* काचव्यवसायी *m.* (न्), काचबन्धकः, काचबन्धा *m.* (न्धृ).

GLAZING, *s.* काचबन्धनं, काचाच्छादनं, काचकर्म्म *n.* (न्).

GLEAM, *s.* (Sudden shoot of light) द्युतिस्फुरणं, स्फुरितं, अकस्मात्स्फुरणं, प्रभास्फुरणं, क्षणप्रभा, क्षणद्युतिः *f.*, क्षणज्योतिस् *n.*, अचिरप्रभा, अचिरद्युतिः *f.*, अकस्माद्दीप्तिः *f.* द्युतिज्वाला.—(Beam) रश्मिः *m.*, किरणः, अंशुः *m.*—(Brightness) उज्ज्वलता, प्रभा, तेजस् *n.*

To GLEAM, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), प्रस्फुर्, परिस्फुर्, लस् (c. 1. लसति -सितुं), विद्युत् (c. 1. -द्योतते -तितुं), अकस्मात् or क्षणमात्रं प्रकाश् (c. 1. -काशते -शितुं) or ज्वल् (c. 1. ज्वलति -लितुं) or उज्ज्वल्.

GLEAMING, *part.* स्फुरन् -रन्ती -रत् (त्), लसन् -सन्ती -सत् (त्), स्फुरितः -ता -तं.

GLEAMY, *a.* क्षणमात्रद्योतमानः -ना -नं, क्षणप्रभः -भा -भं, कम्पितप्रभः -भा -भं, चपलप्रभः -भा -भं, चपलद्योती -तिनी -ति (न्), प्रकाशमानः -ना -नं, उज्ज्वलः -ला -लं.

To GLEAN, *v. a.* and *n.* उञ्छ् (c. 1. 6. उञ्छति -ञ्छितुं), शिल् or सिल् (c. 6. शिलति, सिलति -लितुं), ग्रस् or उग्रस् (c. 9. ग्रसाति, c. 10. ग्रासयति, उग्रसाति, उग्रासयति -यितुं), शेषधान्यानि or शस्यशेषं or अवशिष्टकणिशान् or लूनशस्यावशिष्टं चि (c. 5. चिनोति, चेतुं) or अवचि or उद्धृ (c. 1. -हरति -हर्तुं) or हृ or सङ्ग्रह् (c. 9. गृह्णाति -ग्रहीतुं).

GLEAN, *s.* धान्यशेषं, अवशिष्टकणिशसङ्ग्रहः, शेषधान्यसञ्चयः, लूनशस्यावशिष्टं.

GLEANED, *p. p.* हृतधान्यशेषः -षा -षं, हृतशस्यावशेषः -षा -षं, उद्धृतसर्व्वकणिशः -शा -शं, सङ्गृहीतसर्व्वशस्यः -स्या -स्यं.

GLEANER, *s.* शिलोञ्छवृत्तिः *m.f.*, उञ्छवृत्तिः *m.f.*, उञ्छशीलः -ला -लं, शिलोञ्छकारी *m.* (न्), शेषधान्यसङ्ग्राहकः, अवशिष्टकणिशसञ्चयी *m.* (न्), उच्छिष्टशस्यावचायी *m.* (न्).

GLEANING, *s.* (The act) उञ्छः, उञ्छनं, शिलोञ्छः, उञ्छशिलं, उञ्छसिलं, शिलोञ्छवृत्तिः *f.*, उञ्छवृत्तिः *f.*, शिलं, ऋतं, कटभङ्गः, अवशिष्टशस्यसङ्ग्रहः -हणं, लूनक्षेत्रशेषधान्यावचयः, उच्छिष्टकणिशचयः, शस्यशेषापहरणं, धान्यशादानं.—(That which is gleaned) शस्यशेषं, शस्यावशिष्टं, लूनशस्योच्छिष्टं, लूनकेदारशेषधान्यानि *n. pl.* कणिशावशेषः.

GLEBE, *s.* (Soil, ground) मृद् *f.*, मृत्तिका, स्थलं -ली, भूमिः *f.*, लोष्टं, मृल्लोष्टं.—(Land belonging to a beneficed clergyman) धर्म्माध्यापकभूमिः *f.*, धर्म्माध्यापकक्षेत्रं.

GLEBY, *a.* मृल्लोष्टमयः -यी -यं, मृत्पूर्णः -र्णा -र्णं, मार्त्तिकः -की -कं.

GLEE, *s.* हर्षः, आह्लादः, प्रह्लादः, आनन्दः, मुदा, प्रमोदः, आमोदः, मदः, उल्लासः, उत्सवः, महोत्सवः.

GLEEFUL, *a.* हृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी -न्दि (न्), हृष्टचित्तः -त्ता -त्तं

To GLEEK, *v. n.* अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अपहस् (c. 1. -हसति -सितुं).

GLEET, *s.* मूत्रमार्गरोगः, मूत्रमार्गदोषः, मेहविकारः, प्रमेहविकारः, इक्षुमेहः मूत्रमार्गनिर्गतं पूयशोणितं, धातुप्रस्रावः.

To GLEET, *v. n.* शनैर् मूत्रमार्गात् स्रु (c. 1. स्रवति, स्रोतुं) or प्रस्रु.

GLEN, *s.* दरी -रा, कन्दरः -री, दरीभूः *f.*, अद्रिद्रोणी, निम्नभूमिः *f.*, प्रान्तरं.

GLENE, *s.* अक्षिपात्रं, अक्षिरन्ध्रं, नयनपात्रं, नयनकोटरः.

GUESSER, *s.* अनुमाता *m.* (तृ), अनुमानकर्त्ता *m.* (र्त्तृ), वितर्ककः.

GUEST, *s.* अतिथिः *m. f.* -थी *f.*, अभ्यागतः, अभ्यागतजनः, गृहाभ्यागतः, गृहागतः, आगन्तुः *m. f.*, आमान्तुः, आगन्तुकः -का -कं, आवेशिकः -की -कं, प्राघुणः, प्राघुर्णिकः, प्रघूर्णः, साङ्गतिकः; 'proper for a guest,' आतिथ्यः -थ्यी -थ्यं, आतिथेयः -यी -यं.

GUEST-CHAMBER, *s.* अतिथिशाला, अतिथिसत्कारयोग्या शाला.

GUEST-RITE, *s.* अतिथिसत्कारः -सत्क्रिया, अतिथिक्रिया, अतिथिसेवा.

To GUGGLE, *v. n.* *See* GURGLE.

GUIDANCE, *s.* नयः, नायः, नीतिः *f.*, प्रणयनं, नेतृत्वं, विनियमः, पथदर्शनं.—(Direction) निर्देशः, निदेशः, उपदेशः, शास्तिः *f.*, शासनं, अनुशास्तिः *f.*, अनुशासनं, विधानं; 'good guidance,' सुनयः, सुनीतिः *f.*

To GUIDE, *v. a.* नी (c. 1. नयति नेतुं), आनी, समानी, मार्गं or पथं दृश् (c. 10. दर्शयति -यितुं), गम् (c. 10. गमयति -यितुं).—(Direct) निर्दिश् (c. 6. -दिशति -देष्टुं), उपदिश्, उद्दिश्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, समनुशास्, प्रणी, विनियम् (c. 1. -यच्छति -यन्तुं), विधृ (c. 10. -धारयति -यितुं), विधा (c. 3. -दधाति -धातुं).

GUIDE, *s.* नेता *m.* (तृ), नायकः, नेत्रः, विनेता *m.* (तृ), पथदर्शकः, मार्गदर्शकः, दर्शकः, दर्शयिता *m.* (तृ), प्रदर्शकः, निर्देष्टा *m.* (ष्टृ), निर्देशकः, उद्देशकः, उपदेशी *m.* (न्), उपदेशकः, देशकः, उपदेष्टा *m.* (ष्टृ), आदेष्टा *m.*, पथिकः, सञ्चारकः, शासिता *m.* (तृ), शास्ता *m.*, अनुशासकः, अध्यक्षः.

GUIDED, *p. p.* नीतः -ता -तं, आनीतः -ता -तं, समानीतः -ता -तं, नीयमानः -ना -नं, गमितः -ता -तं, शासितः -ता -तं, अनुशासितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

GUIDE-POST, *s.* पथदर्शनार्थं or मार्गसूचनार्थं स्थूणा.

GUILD, *s.* श्रेणी -णिः *m.*, सहकारिजनसमूहः, नगरकार्य्यसम्पादनार्थं जनसंसर्गः, नागरसमाजः, वणिकसमाजः, निगमः, नैगमः, महाजनसंसर्गः.

GUILD-HALL, *s.* सहकारिणां वाणिजजनानां समागमशाला, निगमशाला, नगरकार्य्यसम्पादनार्थं महाचत्वरं.

GUILE, *s.* माया, कपटः -टं, छलं -लना, शठता, शाठ्यं, खलता, धूर्त्तता, व्याजः, विदग्धता, वैदग्ध्यं, छद्म *n.* (न्), कूटः -टं, कौटिल्यं, कैतवं, वक्रता, कापट्यं, वञ्चनं -ना, असारल्यं.

GUILEFUL, *a.* मायावान् -वती -वत् (त्), मायी -यिनी -यि (न्), मायामयः -यी -यं, मायान्वितः -ता -तं, मायावी -विनी -वि (न्), छली -लिनी -लि (न्), छलान्वितः -ता -तं, विदग्धः -ग्धा -ग्धं, कापटिकः -की -कं, वञ्चकः -का -कं, वञ्चनशीलः -ला -लं, शठः -ठा -ठं, खलः -ला -लं, कुटिलः -ला -लं, विजिह्मः -ह्मा -ह्मं, सव्याजः -जा -जं, धूर्त्तः -र्त्ता -र्त्तं, वक्रः -क्रा -क्रं, वक्रभावः -वा -वं.

GUILEFULLY, *adv.* मायया, समायं, शाठ्येन, छलेन, खलवत्, शठवत्, धूर्त्तवत्, सव्याजं, कितववत्, कैतवेन, विदग्धं.

GUILEFULNESS, *s.* मायावत्त्वं, शठता, शाठ्यं, कौटिल्यं, वक्रता, विजिह्मता, विदग्धता, सव्याजत्वं, असारल्यं.

GUILELESS, *a.* अमायी -यिनी -यि (न्), अमायिकः -की -कं, मायाहीनः -ना -नं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, निर्व्याजः -जा -जं, छलरहितः -ता -तं, शुद्धमतिः -तिः -ति, सरलः -ला -लं, अजिह्मः -ह्मा -ह्मं, अवक्रः -क्रा -क्रं, अकुटिलः -ला -लं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, दक्षिणः -णा -णं, अकृत्रिमः -मा -मं, अकूर्चः -र्चा -र्चं.

GUILELESSLY, *adv.* मायां विना, मायया विना, मायाव्यतिरेकेण, कपटं विना, निष्कपटं, निर्व्याजं, सरलवत्.

GUILELESSNESS, *s.* मायाहीनता, सारल्यं, अवक्रता, अजिह्मता, शुद्धता.

GUILLOTINE, *s.* शिरश्छेदनयन्त्रं, अतितीक्ष्णयन्त्रं यदाघातेन निमेषमात्रेण शीर्षच्छेदः क्रियते.

To GUILLOTINE, *v. a.* पूर्व्वोक्तयन्त्रेण मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं).

GUILT, *s.* (Criminality) अपराधिता -त्वं, सापराधता, पापित्वं, सपापत्वं, अपराद्धता, दोषिता -त्वं, सदोषता, पापवत्त्वं, दोषवत्त्वं.—(Crime) पापं, अपराधः, दोषः, पातकं, दुष्कृतं, दुष्कर्म्म *n.* (न्), पापकर्म्म *n.*, कल्मषं, एनस् *n.*, आगस् *n.*, अघं, दुरितं, मन्तुः *m.*

GUILTILY, *adv.* सापराधं, सपापं, सदोषं, सपातकं, अपराद्धवत्.

GUILTINESS, *s.* अपराधिता, अपराद्धता, सापराधत्वं, पापित्वं, सपापता, दोषिता -त्वं, सदोषता, पापवत्ता, दोषवत्ता.

GUILTLESS, *a.* निष्पापः -पा -पं, [illegible] -पिनी -पि (न्), अपापः -पा -पं, निरपराधः -धा -धं, अनपराधी -धिनी -धि (न्), निर्दोषः -षा -षं -षी [illegible] अपराद्धः [illegible] शुद्धः -द्धा -द्धं, शुद्धमतिः -तिः -ति, अनघः -घा -घं.

GUILTLESSLY, *adv.* निष्पापं, [illegible] निरपराधं, अपराधेन विना.

GUILTLESSNESS, *s.* निष्पापत्वं, निर्दोषत्वं, निरपराधता, शुद्धता.

GUILTY, *adv.* अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, कृतापराधः -धा -धं, प्राप्तापराधः -धा -धं, पापी -पिनी -पि (न्), पापवान् -वती -वत् (त्), पापकर्म्मा -र्म्मा -र्म्म (न्), सपापः -पा -पं, दोषी -षिणी -षि (न्), दोषवान् -वती -वत् (त्), सदोषः -षा -षं, पातकी -किनी -कि (न्), दुष्कृती -तिनी -ति (न्), एनस्वी -स्विनी -स्वि (न्), कृतैनाः -नाः -नः (स्), अनिष्कृतैनाः [illegible] कृतागाः -गाः -गः (स्), अभिपन्नः -न्ना -न्नं; 'rashly guilty,' चिकुरः -रा -रं, चपलः -ला -लं.

GUINEA, *s.* सुवर्णमुद्राविशेषः, सुवर्णः.

GUINEA-HEN, *s.* चित्रशरीरविशिष्टा विदेशीयकुक्कुटी.

GUINEA-PIG, *s.* अत्यल्पशरीरो विदेशीयशूकरभेदः.

GUISE, *s.* वेशः, वेषः, वासस् *n.*, परिधानं, अम्बरं, वस्त्रं, वसनं, आकारः, रूपं, व्यवहारः, रीतिः *f.*; 'in the guise of a herdsman,' गोपवेशः; 'of a Brahmin,' द्विजरूपी *m.* (न्).

GUITAR, *s.* वीणा, वल्लकी, विपञ्ची -ञ्चिका, तन्त्री, रुद्री, सारङ्गी, शारङ्गी, पिनाकी, ततं, परिवादिनी.

GULF, *s.* (A bay) अखातं, खातं, समुद्रवङ्कः, पुटभेदः.—(Abyss) अगाधदरी, अगाधरन्ध्रं, अतलस्पर्शखातं, गम्भीररन्ध्रं, नरकः.—(Whirlpool) आवर्त्तः, जलावर्त्तः, जलगुल्मः, अवघूर्णः, घूर्णः, घूर्णजलं.

GULFY, *a.* घूर्णजलपूर्णः -र्णा -र्णं, जलगुल्ममयः -यी -यं.

To GULL, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), परिवञ्च्, छल् (c. 10.

छलयति -यितुं), प्रतृ (c. 10. -तारयति -यितुं).

Gull, *s.* (Bird) जलकुक्कुटः -टी, विष्वका, गङ्गाचिल्ली, देवट्टी, ध्वांक्षः. —(One easily cheated) सुवञ्चनीयः, सुप्रतारणीयः.

Gull-catcher, *s.* वञ्चकः, प्रतारकः, छली *m.* (न्), कूटकारः.

Gulled, *p. p.* वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

Gullery, *s.* वञ्चनं, छलं, कपटः -टं, प्रतारणा, व्याजः, कैतवं.

Gullet, *s.* निगरणस्रोतस *n.*, निगरणः, अन्नवाहिस्रोतस *n.*

Gullibility, *s.* सुवञ्चनीयता, सुखवञ्चनीयत्वं, सुप्रतारणीयता.

Gullible, *a.* सुवञ्चनीयः -या -यं, सुखेन प्रतारणीयः -या -यं.

Gully, *s.* नालः, प्रणालः -ली -लिका, खातं, कुल्या, जलमार्गः, उदकगमनमार्गः, जलवाहनी, परीवाहः, मारणिः -णी *f.*

To **gully**, *v. a.* भूमिम् उत्खन् (c. 1. -खनति -नितुं), प्रणालिकां कृ, कुल्यां कृ.

Gully-hole, *s.* कर्द्दमाटकरन्ध्रं, प्रणालिकारन्ध्रं, प्रणालीविवरं.

Gulosity, *s.* अतिभोजनं, अत्याहारः, घस्मरता, अतृप्तिः *f.*

To **gulp**, *v. a.* जलं बहुशो गृ (c. 6. गिरति, गरितुं -रीतुं) or निगृ or अवगृ or ग्रस् (c. 1. ग्रसते -सितुं).—(Disgorge) उद्गृ, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Gulp, *s.* गरणं, गरः, गीर्णिः *f.*, गिरिः *f.*, निगारः, निगरणं, ग्रसनं, ग्रासः, एकवारे निगीर्णं यत्किञ्चित्.—(Disgorging) उद्गारः -रणं, उद्गिरणं, उद्वमः -मनं.

Gum, *s.* (Fleshy covering of the teeth) दन्तमांसं, दन्तवेष्टः -ष्टनं, दन्तशिरा, दन्तमूलं, वेला.—(Exudation from trees) निर्यासः, वृक्षनिर्यासः, वृक्षरसः.—(Adhesive substance) श्यानद्रव्यं, सान्द्रद्रव्यं.

To **gum**, *v. a.* पूर्व्वोक्तनिर्यासेन or श्यानद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं) or संयुज् (c. 7. -युनक्ति -योक्तुं) or संलग्नीकृ.

Gum-arabic, *s.* सूक्ष्मपत्रः, सूक्ष्मपत्ररसः.

Gum-boil, *s.* दन्तविस्फोटः, दन्तस्फोटः -टकः, दन्तव्रणः -णं, दन्तार्बुदः, स्निग्धव्रणः, वैदर्भः, उपकुशः.

Gumminess, *s.* सान्द्रत्वं, श्यानत्वं, स्निग्धता, संलग्नशीलता.

Gummy, *a.* वृक्षनिर्यासमयः -यी -यं, श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं.

Gun, *s.* अन्तरग्निबलेन गुलिकाप्रक्षेपणी लोहनाडिः or -डी, गुलिप्रक्षेपणी सुषिरनाली, गुलिकाप्रक्षेपार्थं शुषिरयन्त्रं, लोहसुषिः *f.*

Gunner, *s.* पूर्व्वोक्तनाडिद्वारा गुलिकाप्रक्षेपकः, लोहनाडिधारी *m.* (न्), अग्न्यस्त्रधारी *m.*, आग्नेयास्त्रप्रक्षेपकः.

Gunnery, *s.* अग्न्यस्त्रविद्या, लोहनाडिद्वारेण गुलिकाप्रक्षेपणविद्या.

Gunpowder, *s.* आग्नेयचूर्णं, शीघ्रदाह्यचूर्णं, आग्नेयक्षोदः, महाशब्दपूर्व्वम अग्निसम्पर्कात् सद्योदाह्यचूर्णं.

Gun-shot, *s.* लोहगुलिकागोचरं, लोहगुलिविषयः, युद्धनाडिक्षेपणं.

Gun-smith, *s.* अग्न्यस्त्रकारः, आग्नेयशस्त्रकारः, आग्नेयनाडिनिर्म्माता *m.* (तृ), युद्धनाडिनिर्म्माणशिल्पज्ञः.

Gun-stock, *s.* आग्नेयनाडिदण्डः, लोहनाडिदारु *m.*, नाडियारङ्गः.

Gunwale, gunnel, *s.* नौपार्श्वधारा -रः, नौपार्श्वस्य उपरिकाष्ठं, नावुत्सङ्गः.

Gurge, *s.* जलावर्त्तः, जलभ्रमः, जलावघूर्णः, जलगुल्मः, घूर्णजलं.

To **gurgle**, *v. n.* जलवद् घर्घराशब्देन सृ (c. 1. सरति, सर्तुं), घर्घराशब्दं कृ, घर्घ or गर्ग (nom. घर्घायते, गर्गायते), गर्घ (c. 1. गर्घति -र्घितुं).

Gurgling, *s.* घर्घराशब्देन जलप्रस्रावः, घर्घरा.

To **gush**, *v. n.* प्रपत् (c. 1. -पतति -तितुं), निर्पत्, बहुशः प्रस्रु (c. 1. -स्रवति -स्रोतुं) or प्रस्यन्द् (c. 1. -स्यन्दते -न्दितुं) or क्षर् (c. 1. क्षरति -रितुं), वेगेन or वेगतः निःसृ (c. 1. -सरति -सर्त्तुं); 'tears gushed from (her) eyes,' जलं नेत्राभ्यां प्रापतत्.

Gush, gushing, *s.* बहुप्रस्रावः, जलप्रपातः, उत्सेकः, उत्सेचनं, उत्पीडः.

Gusset, *s.* वस्त्रनिवेशित उपवस्त्रखण्डः or अधिकवस्त्रखण्डः.

Gust, *s.* (Blast of wind) निर्घातः, प्रभञ्जनः, व्योममुद्गरः, वातरूपः वायुगुल्मः, वायुवेगः, वात्या, प्रबलवायुः *m.*, प्रचण्डवायुः *m.*, चण्डवातः तीव्रवातः, पवनाघातः, जवानिलः.—(Taste) स्वादः, आस्वादः, रसनेन्द्रियं, रुचिः *f.*, अभिरुचिः *f.*

Gustation, *s.* स्वादनं, आस्वादनं, प्राशनं, लेहनं.

Gustful, *a.* रुच्यः -च्या -च्यं, रुचिरः -रा -रं, सरसः -सा -सं.

Gustless, *a.* विरसः -सा -सं, निःस्वादुः -दुः -दु, अस्वादुः -दुः -दु.

Gusto, *s.* रुचिः *f.*, अभिरुचिः *f.*, रसः, सुरसः, आस्वादः.

Gusty, *a.* वातलः -ला -लं, वातवान् -वती -वत (त्), वातीयः -या -यं वातमयः -यी -यं, बहुपवनः -ना -नं, पवनक्षिप्तः -प्ता -प्तं.

Gut, *s.* नाडिः -डी *f.*, अन्तर्नाडी, नाली -लिः *f.*, धमनी -निः *f.*, शिरा सिरा, अन्त्रं, पुरीतत *m. n.*, कोष्ठः.—(Stomach) उदरं, जठरः -रं.

To **gut**, *v. a.* निरन्त्रीकृ, निरन्त्र (nom. निरन्त्रयति -यितुं), नाडीः or अन्त्राणि वहिष्कृ.—(Plunder) द्रव्याणि अपहृ (c. 1. -हरति -हर्तुं).

Gutta serena, *s.* तिमिरं; 'an eye affected with it,' तिमिरदोषहतं चक्षुः.

Gutted, *p. p.* निरन्त्रीकृतः -ता -तं, हृतसर्व्वद्रव्यः -व्या -व्यं.

Gutter, *s.* प्रणालः -ली -लिका, नालः, जलनिर्गमः, जलमार्गः, परीवाहः जलवाहनी, मारणिः *f.* -णी, उदकगमनमार्गः.

To **gutter**, *v. a.* प्रणालीरूपेण उत्खन् (c. 1. -खनति -नितुं) or शुषिरीकृ.

To **gutter**, *v. n.* प्रणालीरूपेण उत्खन् in pass. (-खन्यते) or शुषिरीभू प्रणालिकां कृ, जलदीपिकारूपेण लवशः स्यन्द् (c. 1. स्यन्दते -न्दितुं).

Guttler, *s.* बहुभक्षकः, अतिभोजी *m.* (न्), कुक्षिम्भरिः *m.*

Guttural, *a.* कण्ठ्यः -ण्ठ्या -ण्ठ्यं, कण्ठस्थः -स्था -स्थं, ग्रैवः -वी -वं ग्रैवेयः -यी -यं; 'guttural letter,' कण्ठ्यं; 'guttural sound,' कूजं.

Guzarat, *s.* (The country) गुर्जरः.—(The people) गुर्जराः *m. pl.*

To **guzzle**, *v. a.* बहुशो गृ (c. 6. गिरति, गरितुं -रीतुं) or निगृ or ग्रस् (c. 1. ग्रसते -सितुं) or पा (c. 1. पिबति, पातुं), पानरतः -ता -तं भू.

Guzzler, *s.* अतिपायी *m.* (न्), अतिभोजी *m.* (न्), पानरतः.

Gymnasium, *s.* व्यायामशाला, मल्लयुद्धशाला, मल्लशाला, विहारः.

Gymnastic, *a.* व्यायामी -मिनी -मि (न्), व्यायामसम्बन्धी -न्धिनी -न्धि (न्), मल्लयुद्धसम्बन्धी &c., व्यायामशीलः -ला -लं.

Gymnastics, *s. pl.* व्यायामः, मल्लयुद्धं, व्यायामविद्या.

Gypsy, gypsey. *See* Gipsy.

To **gyrate**, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), भ्रम् (c. 4. भ्राम्यति, c. 1. भ्रमति -मितुं), घूर्ण् (c. 6. 1. घूर्णति -ते -र्णितुं), परिघूर्ण्, विघूर्ण्, व्याघूर्ण्.

Gyration, *s.* परिवर्त्तनं, आवर्त्तः, भ्रमः -मणं, भ्रमिः *f.*, घूर्णिः *f.*, घूर्णनं 'of a bird,' परिडीनकं.

Gyre, *s.* चक्रावर्त्तः, चक्रगतिः *f.*, आवृत्तिः *f.*, मण्डलं, परिमण्डलं.

To **gyve**, *v. a.* निगडेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), निगड (nom. निगडयति -यितुं), पाश (nom. पाशयति -यितुं).

Gyves, *s. pl.* निगडः -डं, पाशः, बन्धनं -नानि *n. pl.*, पादपाशः, शृङ्खला

H.

Ha, *interj.* हा, हहा, आहा, अहो, आहो, अहहः, अहोवत्, ह, अह आः अयि, आश्चर्य्यं.

Habeas corpus, *s.* मिथ्यानिरोधनिषेधार्थकं पूर्व्वकालीनशासनपत्रं.

Haberdasher, *s.* वस्त्रादिविक्रेता *m.* (तृ), वसनादिविक्रेता *m.*, अंशुकादिविक्रयी *m.* (न्), क्षुद्रद्रव्यविक्रेता *m.*

Haberdashery, *s.* पूर्व्वोक्तव्यापारिणा विक्रीता वस्त्रादिद्रव्यसामग्री.

Habergeon, *s.* वक्षस्त्राणं, उरस्त्राणं, उरश्छदः, कण्ठस्थकवचं.

Habiliment, *s.* वेशः, परिधानं, परिच्छदः, वसनं, वस्त्रं, आभरणं, अम्बरं, वासस् *n.*, प्रसाधनं, आच्छादनं, सज्जा.

Habit, *s.* (Dress) वेशः, वेषः, वसनं, वस्त्रं, वासस् *n.*, परिधानं, परिच्छदः, अम्बरं.—(State, condition) अवस्था, स्थितिः *f.*, भावः, वृत्तिः *f.*, दशा, संस्थितिः *f.*, स्वभावः; 'habit of body,' शरीरस्थितिः *f.*, देहस्वभावः; 'habit of mind,' चित्तवृत्तिः *f.*—(Temperament, disposition) प्रकृतिः *f.*, शीलः -लता, स्वभावः, अन्तःकरणं.—(Custom, practice, established manner) आचारः, अभ्यासः, व्यवहारः, समाचारः, नित्यकृत्यं, नित्यक्रिया, रीतिः *f.*, व्यवहृतिः *f.*, शीलः, प्रचारः, चरितं, चर्य्या, क्रमः, नियमः, आवृत्तिः *f.*, व्यापारः, प्रवृत्तिः *f.*, मार्गः, अनुशीलनं; 'bad habit,' व्यसनं; 'having bad habits,' दुराचारः -रा -रं, पापसमाचारः -रा -रं, पापचर्य्यः -र्य्या -र्य्यं, दुर्वृत्तः -त्ता -त्तं, दुश्चरित्रः -त्रा -त्रं, व्यसनी -निनी -नि (न्).

To habit, *v. a.* वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, आच्छद् (c. 10. -च्छादयति -यितुं), वस्त्र (nom. वस्त्रयति -यितुं), परिधा in caus. (-धापयति -यितुं).

Habitable, *a.* वासतेयः -यी -यं, वासव्यः -व्या -व्यं, वासयोग्यः -ग्या -ग्यं, वासक्षमः -मा -मं, आजीव्यः -व्या -व्यं, उपजीव्यः -व्या -व्यं.

Habitant, *s.* वासी *m.* (न्), निवासी *m.*, निलायी *m.* (न्), वासकृत्.

Habitation, *s.* वासः, वासस्थानं, निवासः, वसतिः *f.*, निवसतिः *f.*, गृहं, गेहः -हं, वेश्म *m.* (न्), निलयः -यनं, आलयः, आयतनं, निवेशनं, निकेतः -तनं, आगारः, भवनं, वसितं, समावासः, अवस्थानं, आवसथः, स्थानं, ओकस् *n.*, धाम *n.* (न्).

Habitual, *a.* आभ्यासिकः -की -कं, अभ्यस्तः -स्ता -स्तं, आचारिकः -की -कं, आचरितः -ता -तं, व्यावहारिकः -की -कं, व्यवहारिकः -की -कं, नित्यः -त्या -त्यं, स्वाभाविकः -की -कं, अनुशीलितः -ता -तं, नैयमिकः -की -कं, प्रायिकः -की -कं.

Habitually, *adv.* नित्यं, नित्यशस्, यथाव्यवहारं, यथारीति, साभ्यासं, अभ्यासेन, अभ्यासपूर्व्वं, यथाभ्यासं.

To habituate, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासं कृ, अभ्यस्तं -स्तां -स्तं कृ, शिक्ष् (c. 10. शिक्षयति -यितुं), शील् (c. 10. शीलयति -यितुं); 'to be habituated,' अभ्यस्तः -स्ता -स्तं भू.

Habituated, *p. p.* अभ्यस्तः -स्ता -स्तं, शिक्षितः -ता -तं, कृताभ्यासः -सा -सं, शीलितः -ता -तं, अनुशीलितः -ता -तं, शीलः -ला -लं in comp.

Habitude, *s.* (Custom) व्यवहारः, आचारः, रीतिः *f.*, चरितं, चर्य्या, नित्यकृत्यं.—(Relation) सम्बन्धः, सम्पर्कः, प्रतीक्षा.—(Intercourse) संसर्गः.

To hack, *v. a.* (Mangle) व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), प्रव्रश्च्, विदृ (c. 10. -दारयति -यितुं), बहुलवशः खण्ड् (c. 10. खण्डयति -यितुं) or छिद्, बहुखण्डशः कृ, खण्डं खण्डं कृ, बहुखण्डीकृ, शतविक्षतीकृ.

To hack, *v. n.* (For hire) अतिशरीरायासेन नीचकर्म्म कृ, निरन्तरायासं कृ, पण्यः -ण्या -ण्यं भू, सर्व्वप्रयोज्यः -ज्या -ज्यं भू, सर्व्वसाधारणीभू.

Hack, *s.* (Cut) प्रहारः, छेदः, आघातः, छुरिकाघातः.—(Horse kept for hire, worn out horse) कदश्वः, पण्याश्वः, भाटकीयवाजी *m.* (न्), साधारणवाजी *m.*, सर्व्वप्रयोज्यवाजी *m.*, पण्यघोटकः, अश्वकः; 'hack-carriage,' पण्यवाहनं, साधारणरथः.—(Drudge) निरन्तरायासी *m.* (न्), अतिदेहक्लेशेन नीचकर्म्मकारी *m.* (न्), हीनवृत्तिः *m.*, व्रातीनः.

Hacked, *p. p.* व्यवच्छिन्नः -न्ना -न्नं, क्षतविक्षतः -ता -तं, वृक्णः -क्णा -क्णं.

To hackle, *v. a.* वक्ष्यमाणयन्त्रेण शणं or अतसीं मृज् (c. 2. मार्ष्टि -र्ष्टुं) or सम्मृज्, or परिष्कृ or शुध् (c. 10. शोधयति -यितुं) or पृथक्कृ.

Hackle, *s.* अतसीमार्जनी, शणमार्जकः, उमाशोधनी.

Hackney, *s.* (Horse) कदश्वः, अश्वकः, पण्याश्वः, पण्यघोटकः, साधारणवाजी *m.* (न्), भाटकीयवाजी *m.*—(Any thing much used, a drudge, a hireling) नीचकर्म्मणि नियुक्तः, नीचकर्म्मकारी *m.* (न्), निरन्तरायासी *m.* (न्), हीनवृत्तिः *m.*, वैतनिकः, पण्यः, साधारणः, सर्व्वप्रयोज्यः.—(Prostitute) पण्यस्त्री, साधारणस्त्री.

To hackney, *v. a.* नीचकर्म्मणि नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), पण्यीकृ, साधारणीकृ, सर्व्वप्रयोज्यं -ज्यां -ज्यं कृ, जीर्णीकृ.

Hackney-coach, *s.* साधारणरथः, पण्यरथः, पण्यवाहनं, सर्व्वप्रयोज्यरथः.

Hackneyed, *p. p.* सर्व्वप्रयुक्तः -क्ता -क्तं, सर्व्वसाधारणः -णा -णी -णं, सर्व्वपण्यः -ण्या -ण्यं, अपकर्म्मनियुक्तः -क्ता -क्तं, जीर्णः -र्णा -र्णं.

Haddock, *s.* हड्डकसंज्ञकः समुद्रीयमत्स्यभेदः.

Hades, *s.* प्रेतलोकः, अधोलोकः, अधोभुवनं, नरकः, पातालं.

Haft, *s.* (Handle) त्सरुः *m.*, तलः, वारङ्गः, मुष्टिः *m.* -ष्टी *f.*, दण्डः, कर्णः.

To haft, *v. a.* त्सरौ or तले or वारङ्गे निविश् (c. 10. -वेशयति -यितुं).

Hag, *s.* कुरूपी -पिणी, कुट्टिनी, डाकिनी, वृद्धा स्त्री, जरिणी.

Haggard, *a.* कृशाननः -ना -नं, क्षीणवदनः -ना -नं, क्षामवदनः -ना -नं, शुष्कवदनः -ना -नं, उग्रमुखः -खा -खं, उग्रदर्शनः -ना -नं.

Haggish, *a.* कुरूपिणी, अपरूपिणी, विरूपिणी, जरापरिणता.

To haggle, *v. a.* व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), क्षतविक्षतीकृ, खण्डशः कृ.

To haggle, *v. n.* (In bargaining) क्रयकाले विलम्ब् (c. 1. -लम्बते -म्बितुं) or विचर् (c. 10. -चारयति -यितुं) or एतावन्न दातुम् इच्छामीति वादानुवादं कृ or न्यूनमूल्यं दित्सामीति वद् (c. 1. वदति -दितुं).

Haggler, *s.* क्रयकाले विलम्बी *m.* (न्) or एतावन्मूल्यं न दातुम् इच्छामीति वादानुवादकारी *m.* (न्).

Hagiographa, *s.* धर्म्मग्रन्थः, धर्म्मशास्त्रसंहिता, धर्म्मपुस्तकं.

Ha, *interj.* हा, अहो, अहावत्, अहह, हाहा, आ, अयि, आश्चर्य्यं.

Hail, *s.* (Frozen rain) करका, करकावृष्टिः *f.*, शिला, शिलावृष्टिः *f.*, वर्षोपलः, पयोघनः, पयोगडः, घनकफः, मेघास्थि *n.*, मेघकफः, मेघगर्भः, धारा, तोयडिम्भः, मरुत्फलं, जलशूकः, धाराङ्कुरः, मटती, शिलीन्ध्रं, वार्षिला.

Hail, *exclam.* नमस्, स्वस्ति, कुशलं, कुशलं भूयात्, सुखं भूयात्, कल्याणं भूयात्, क्षेमं भवतु, शेवं, अभिवादये, अभिवन्दे.

To hail, *v. n.* (Pour down hail) करकासारं वृष् (c. 1. वर्षति -र्षितुं), शिला वृष्, उपलान् वृष् or पत् (c. 10. पातयति -यितुं).

To hail, *v. a.* (Call from a distance) दूराद् आह्वे (c. 1. -ह्वयति -ह्वातुं) or ह्वे or सम्बोधनं कृ or आक्रन्द् (c. 1. -क्रन्दति -न्दितुं) or आमन्त्र् (c. 10. -मन्त्रयते -यितुं) or समाभाष् or अभिभाष् (c. 1. -भाषते -षितुं) or आभाष्.—(Salute) वन्द् (c. 1. वन्दते -न्दितुं), अभिवन्द्, अभिवद् (c. 10. -वादयति -ते -यितुं), नमस्कृ, आमन्त्र्, उपास् (c. 2. -आस्ते -आसितुं).

Hailed, *p. p.* दूराद् आहूतः -ता -तं or अभिहितः -ता -तं or आमन्त्रितः -ता -तं, सम्बोधितः -ता -तं, आक्रन्दितः -ता -तं.

Hail-stone, *s.* शिला, वर्षोपलः, पयोघनः, करका, पयोगडः.

Hail-storm, *s.* करकासारः, करकावृष्टिः *f.*, शिलासारः.

Haily, *a.* करकामयः -यी -यं, शिलामयः -यी -यं, वर्षोपलमयः &c.

Hair, *s.* केशः, वालः, कचः, चिकुरः, वृजनः -जिनः, कुन्तलः.—(Of the head) केशः, शिरोरुहः, शिरोरुट् *m.*, शिरसिजः, मूर्द्धजः, कुशला.—(Of the body) लोम *n.* (न्), रोम *n.* (न्), तनुरुहः -हं, तनूरुहः -हं, तनुरुट् *m.* (ह्), तनुजं, अङ्कुरः; 'a head of hair,' कैश्यं, कैशिकं; 'a quantity of hair,' केशकलापः, केशपक्षः, केशोच्चयः, केशपाशः, कचपाशः, कचपक्षः, कचहस्तः, चिकुरपाशः, चिकुरपक्षः, चिकुरहस्तः; 'having much or fine hair,' केशी -शिनी -शि (न्), केशवान् -वती -वत् (त्), केशवः -वा -वं, केशिकः -की -कं; 'a fine head

of hair,' केशभारः, कवरीभारः -भरः; 'a braid of hair,' कवरी, केशगर्भः -र्भकः, केशवेशः; 'braided hair,' धम्मिल्लः, वेणिः -णी *f.*, वेणिका, प्रवेणिः -णी *f.*; 'a lock of hair,' अलकः -कं, चूर्णकुन्तलः, भ्रमरकः, काकपक्षः, शिखण्डः -ण्डकः, केशपाशी, चूडा, शिखा; 'clotted hair,' जटा, सटा, 'unentangled hair,' शीर्षण्यः, शिरस्यः; 'covered with hair,' लोमशः -शा -शं, बहुलोमा -मा -म (न्), रोमाक्रान्तः -न्ता -न्तं; 'point of hair,' वालाग्रं; 'erection of the hair,' रोमहर्षणं, उद्धर्षणं. *See* ERECTION.—(Filament of a plant) केशरः, केसरः.

HAIR-BELL, *s.* घण्टाकारपुष्पविशिष्ट ओषधिभेदः.

HAIR-BREADTH, *s.* एककेशान्तरं, एककचपरिमाणं, अत्यल्पान्तरं.

HAIR-BROOM, *s.* केशनिर्म्मिता मार्जनी, लोममयी शोधनी.

HAIR-BRUSH, *s.* केशमार्जनी, केशशोधनी, केशनिर्घर्षणकः.

HAIR-CLOTH, *s.* लोमनिर्म्मितं वस्त्रं, केशमयः पटः.

HAIR-CUTTER, *s.* केशछिद् *m.* -छेत्ता *m.* (तृ), शिरोरुहच्छेदकः.

HAIR-DRESSER, *s.* केशरचकः, केशविरचकः, केशसंस्कारकृत् *m.*

HAIR-DRESSING, *s.* केशरचना, केशविरचनं -ना, केशसंस्कारः.

HAIRED, *a.* केशी -शिनी -शि (न्), केशवान् -वती -वत् (त्).

HAIRINESS, *s.* लोमशत्वं, रोमशत्वं, बहुलोमत्वं, लोमप्राचुर्य्यं.

HAIRLESS, *a.* अकेशः -शा -शं, विकेशः -शा -शं, केशहीनः -ना -नं, निर्लोमा -मा -म (न्), लोमरहितः -ता -तं, अविद्यमानलोमा &c.

HAIRY, *a.* लोमशः -शा -शं, रोमशः -शा -शं, बहुलोमा -मा -म (न्), प्रचुरलोमा &c., बहुकेशः -शा -शं, केशी -शिनी -शि (न्), केशकः -का -कं, केशिकः -की -कं, केशवः -वा -वं, बहुकेशवान् -वती -वत् (त्), लोमवान् &c., लोममयः -यी -यं, लोमपूर्णः -र्णा -र्णं.

HAKE, *s.* समुद्रीयमत्स्यभेदः.

HALBERD, *s.* युद्धे प्रयुक्तः काष्ठदण्डो लोहाग्रः शूलविशेषः, प्रासः, शक्तिः *f.*

HALBERDIER, *s.* पूर्व्वोक्तशूलधरः, शक्तिग्रहः, शाक्तीकः, प्रासिकः.

HALCYON, *s.* (Kingfisher) मत्स्यरङ्गः -ङ्गकः, सुचित्रकः, कुट्टकः.

HALCYON, *a.* प्रसन्नः -न्ना -न्नं, शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, निर्वेगः -गा -गं, निराकुलः -ला -लं, निर्वृतः -ता -तं, निर्वातः -ता -तं, सुखी -खिनी -खि (न्).

HALE, *a.* निरामयः -या -यं, नीरोगः -गा -गं, नीरुजः -जा -जं, नीरुक् *m. f. n.* (ज्), कल्यः -ल्या -ल्यं, आधिव्याधिरहितः -ता -तं, अक्षतः -ता -तं.

To HALE, *v. a.* कृष् (c. 1. कर्षति, क्रष्टुं), आकृष्, अपकृष्, अपहृ (c. 1. -हरति -हर्त्तुं).

HALF, *s.* अर्द्धं -र्द्धः, अर्द्धभागः, अर्द्धांशः; 'half an hour,' अर्द्धदण्डः; 'half a league,' अर्द्धक्रोशः; 'half a hundred,' अर्द्धशतं; 'half the body,' अर्द्धाङ्गं, 'a year and a half,' सार्द्धवत्सरः; 'a hundred and a half,' सार्द्धशतं; 'the best half,' उत्तमार्द्धं -र्द्धः; 'the last half,' अपरार्द्धं, पश्चार्द्धं, 'sharing a half,' अर्द्धभागी -गिनी -गि (न्), अर्द्धांशी -शिनी -शि (न्), अर्द्धी -र्द्धिनी -र्द्धि (न्); 'lasting half a month,' आर्द्धमासिकः -की -कं.

HALF, *a.* अर्द्धः -र्द्धा -र्द्धं, आर्द्धिकः -की -कं, अर्द्धिकः -का -कं; 'half assent,' अर्द्धाङ्गीकारः; 'half moon,' अर्द्धचन्द्रः.

HALF, *adv.* अर्द्धं, अर्द्धेन, सामि; 'half-man, half-woman,' अर्द्धेन पुरुषोऽर्द्धेन स्त्री; 'half-eaten,' अर्द्धभुक्तः -क्ता -क्तं, जग्धार्द्धः -र्द्धा -र्द्धं, सामिभुक्तः -क्ता -क्तं; 'half-drank,' अर्द्धपीतः -ता -तं, सामिपीतः -ता -तं; 'half-read,' अर्द्धवाचितः -ता -तं; 'half-spoken,' अर्द्धोक्तः -क्ता -क्तं; 'half-closed,' अर्द्धसंवृतः -ता -तं, मुकुलितः -ता -तं, निमीलितः -ता -तं.

HALF-BLOOD, *s.* or *a.* भिन्नोदरः -रा -रं, भिन्ननाभिः -भिः -भि, भिन्नगर्भः -र्भा -र्भं, असमानोदरः -रा -रं, भिन्नोदर्य्यः, अन्योदर्य्यः, भिन्नशरीरान्वयः.

HALF-BROTHER, *s.* वैमात्रः -त्रेयः, भ्राता द्वैमातुरः, अन्योदर्य्यः, सापत्नः.

HALF-DEAD, *a.* मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, मरणोन्मुखः -खी -खं, अर्द्धमृतः -ता -तं, कण्ठगतप्राणः -णा -णं.

HALF-HEARD, *a.* अर्द्धश्रुतः -ता -तं, ईषच्छ्रुतः -ता -तं.

HALF-HOLIDAY, *s.* अर्द्धोत्सवः, अर्द्धमहोत्सवः, अर्द्धानध्यायः.

HALF-LEARNED, *a.* अल्पज्ञानी -निनी -नि (न्), किञ्चिज्ज्ञः -ज्ञा -ज्ञं, चुञ्चुकः.

HALF-LOST, *a.* नष्टप्रायः -या -यं, आसन्ननाशः -शा -शं, नाशोन्मुखः -खी -खं.

HALF-MOON, *s.* अर्द्धचन्द्रः, चन्द्रार्द्धं, अर्द्धेन्दुः *m.*; 'shaped like a half-moon,' अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

HALF-PAY, *s.* निवृत्तयुद्धस्य सैन्यस्य प्रकल्पितम् अर्द्धवेतनं.

HALF-PENNY, *s.* ताम्रमुद्रार्द्धं, ताम्रमुद्राविशेषः.

HALF-PIKE, *s.* लघुशूलः -लं, अदीर्घपरिमाणः शूलविशेषः, परिघः.

HALF-SEAS-OVER, *s.* ईषन्मत्तः -त्ता -त्तं, ईषदुन्मत्तः -त्ता -त्तं, ईषत्क्षीवः -वा -वं.

HALF-SISTER, *s.* वैमात्री, वैमात्रेयी, स्वसा द्वैमातुरी, अन्योदर्य्या.

HALF-SPHERE, *s.* अर्द्धमण्डलं, अर्द्धगोलः, मण्डलार्द्धं, भूगोलार्द्धं.

HALF-STARVED, *a.* अनाहारेण म्रियमाणः -णा -णं or मृतप्रायः -या -यं, क्षुधावसन्नः -न्ना -न्नं.

HALF-UTTERED, *a.* अर्द्धोक्तः -क्ता -क्तं, अर्द्धोदितः -ता -तं, अर्द्धकथितः -ता -तं.

HALF-WAY, *adv.* अर्द्धमार्गे, अर्द्धपथे, मध्यमार्गे, मध्यपथे.

HALF-WITTED, *a.* अल्पबुद्धिः -द्धिः -द्धि, अल्पधीः -धीः -धि, अल्पमेधाः -धाः -धः (स्).

HALF-YEAR, *s.* अर्द्धवत्सरः, वत्सरार्द्धं, अब्दार्द्धं, षण्मासः, अयनं.

HALF-YEARLY, *a.* षाण्मासिकः -की -कं, आर्द्धवर्षिकः -की -कं.

HALIBUT, *s.* गृहत्कायः समुद्रीयमत्स्यभेदः.

HALIDOM, *s.* शापः, शपथः, दिव्यं, सत्यं, प्रत्ययः.

HALITUOUS, *a.* प्राणसमभावः -वा -वं, वाष्पोपमः -मा -मं, धूमलः -ला -लं.

HALL, *s.* (Large room at the entrance of a house) शाला, बहिर्द्वारशाला, द्वारोपान्ते महाशाला, वाह्यकोष्ठः, कक्षा, कक्ष्या, किम्मी; 'a temporary hall,' मण्डपः -पा, जनाश्रयः; 'a judgment-hall,' विचारशाला.

HALLELUIAH, HALLELUJAH, *exclam.* ईश्वरस्य धन्यवादं or स्तुतिवादं कुरुत.

HALLELUJAH, *s.* ईश्वरस्य धन्यवादः or स्तुतिवादः or स्तुतिगानं.

HALLIARD, HALYARD, *s.* नौरज्जुः *m.*, नौगुणः, वातवसनोत्तोलनार्थं रज्जुः

HALLOO, *interj.* भोः, भो, भोभो, हे, है, अये, अयि, अरे, रे, अहो, हंहो, हलहलाशब्दः.

To HALLOO, *v. n.* हलहलाशब्दं कृ, हलहला (nom. हलहलायते), भोः, हे, है इत्यादिशब्दैर् उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं) or दूराद् आह्वे (c. 1. -ह्वयति -ह्वातुं), उच्चैःस्वरेण घुष् (c. 10. घोषयति -यितुं).

To HALLOO, *v. a.* (Set on by shouts) हे, है, हलहला इत्यादिशब्दैः कुक्कुरादीन् प्रचुद् (c. 10. -चोदयति -यितुं).

To HALLOW, *v. a.* (Make holy) पवित्रीकृ, पवित्रं -त्रां -त्रं कृ, पुण्यीकृ, पुण्यं -ण्यां -ण्यं कृ, पूज्यं -ज्यां -ज्यं कृ, शुद्धीकृ.—(Consecrate) संस्कृ, अभिसंस्कृ, अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), प्रोक्ष् (c. 1. -उक्षति -क्षितुं), प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), धर्म्मार्थं विनियुज् (c. 7. -युनक्ति -योक्तुं) or निर्दिश् (c. 6. -दिशति -देष्टुं).

HALLOWED, *p. p.* (Made holy, reverenced) पवित्रीकृतः -ता -तं, पवित्रितः -ता -तं, पूजितः -ता -तं, पूज्यः -ज्या -ज्यं, अर्चितः -ता -तं.—(Consecrated) संस्कृतः -ता -तं, कृतसंस्कारः -रा -रं, प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, प्रोक्षितः -ता -तं, प्रणीतः -ता -तं, अभिषिक्तः -क्ता

-र्क्कं, धर्म्मार्थं विनियोजितः -ता -तं.

HALLUCINATION, *s.* मोहः, व्यामोहः, माया, भ्रमः, भ्रान्तिः *f.*, मतिविभ्रमः, मिथ्यामतिः *f.*, इन्द्रजालं, वञ्चना.

HALM, *s.* (Straw) तृणं, पलालः -लं -ली, पलः, धान्यकल्कं.

HALO, *s.* द्युतिमाला, अंशुमाला, सूर्य्यपरिगतं or चन्द्रपरिगतं द्युतिमण्डलं or दीप्तिमण्डलं or रश्मिवर्णमण्डलं, दीप्तिचक्रं, द्युतिवलयः, परिधिः *m.* परिवेशः.

HALSER, *s.* नौरज्जुः *m.*, नौगुणः, नौबन्धनरज्जुः, नौबन्धनार्थं महागुणः.

HALT, *s.* (Stopping) अयानं, पथमध्ये स्थितिः *f.* or अवस्थितिः *f.*, स्थानं, आसनं, विश्रामः, यानविरतिः *f.*, विरामः, अवरतिः *f.*, स्तम्भः, यतिः *f.* —(Limping) लङ्गः.

HALT, *a.* (Lame) पङ्गुः -ङ्गुः -ङ्गु, खञ्जः -ञ्जा -ञ्जं, खोरः -रा -रं, गतिविकलः -ला -लं, पादविकलः -ला -लं.

To HALT, *v. n.* (Stop) पथमध्ये स्था (c. 1. तिष्ठति -ते, स्थातुं), संस्था, विष्ठा, अवस्था, or विरम् (c. 1. रमति -रन्तुं) or विश्रम् (c. 4. -श्राम्यति -श्रमितुं), स्तम्भ् (c. 1. स्तम्भते -म्भितुं).—(Limp) लङ्ग् (c. 1. लङ्गति -ङ्गितुं), खञ्जीभू, गतिविकलः -ला -लम् अस्.

HALTED, *p. p.* निवृत्तयानः -ना -नं, अवस्थितः -ता -तं, सन्निपन्नः -ना -न्नं.

HALTER, *s.* (Rope) कण्ठपाशः -शकः, कण्ठरज्जुः *m.*, पाशः, कण्ठलता, पलापः, प्रग्रहः, प्रग्राहः.

To HALTER, *v. a.* कण्ठपाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाश (nom. पाशयति -यितुं).

To HALVE, *v. a.* अर्द्धीकृ, द्विसमभागीकृ, द्विधा कृ, द्विखण्डीकृ, द्व्यंशीकृ.

HALVED, *a.* अर्द्धीकृतः -ता -तं, सामिकृतः -ता -तं, द्विसमभागीकृतः -ता -तं.

HALVES, *s. pl.* (To go halves) अर्द्धभागी -गिनी -गि भू, अर्द्धांशी -शिनी -शि भू.—(To cry halves) अर्द्धभागो ममेति वद् (c. 1. वदति -दितुं).

HAM, *s.* (Back of the knee) मन्दिरः, जङ्घोरुसन्धेः पश्चिमभागः.—(Thigh) सक्थि *n.*, जङ्घा, जाङ्घनी; 'seated on the hams,' कृतावसक्थिकः -का -कं.—(Dried hog's flesh) वल्लूरं, शूकरस्य शुष्कमांसं.

HAMADRYAD, *s.* वनदेवता, तरुदेवता, वृक्षाधिष्ठात्री देवता, वन्यस्त्री.

HAMLET, *s.* ग्रामः, क्षुद्रग्रामः, पल्लिः *f.*, पल्ली, पद्रः, खेटकः, निवसथः.

HAMMER, *s.* मुद्गरः, घनः, अयोघनः, अयोग्रं, मुषलः, मुसलः.

To HAMMER, *v. a.* मुद्गरेण आहन् (c. 2. -हन्ति -न्तुं) or तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

To HAMMER, *v. n.* (Labour, work hard) महायत्नं कृ, महाकष्टेन मुहुर् मुहुर् उद्योगं कृ, पुनः पुनर् उत्साहं कृ or श्रम् (c. 4. श्राम्यति, श्रमितुं).

HAMMER-CLOTH, *s.* रथोपस्थवस्त्रं, सूतासनाच्छादनं.

HAMMERER, *s.* मुद्गरेण ताडयिता *m.* (तृ), मुद्गरादिना कर्म्मकारी *m.* (न्).

HAMMERING, *s.* मुद्गरताडनं, मुद्गरप्रहरणं, मुद्गराघातः.

HAMMOCK, *s.* दोला -ली, दोलिका, प्रेङ्खा, खट्वा, प्रेङ्खोलनं.

HAMPER, *s.* पेटा -टी, पेटिका, पेटकः, करण्डः, उड्डकः.

To HAMPER, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, विरुध्, विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), क्लेशं दा, शल्यं कृ.

HAMPERED, *p. p.* विरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं, बाधितः -ता -तं.

HAMSTRING, *s.* मन्दिरशिरा, मन्दिरस्नायुः *m.*, जङ्घोरुसन्धिबन्धनं, ऊरुपर्श्व-बन्धनस्नायुः *m.*, जङ्घोरुबन्धनं.

To HAMSTRING, *v. a.* मन्दिरशिरां छिद् (c. 7. छिनत्ति, छेत्तुं), जङ्घोरुपर्श्वबन्धनं छित्त्वा गतिविकलं -लां -लं कृ.

HAMSTRUNG, *p. p.* छिन्नमन्दिरस्नायुः -युः -यु, छिन्नजङ्घोरुबन्धनः -ना -नं.

HANAPER, *s.* कोषः, राजकोषः, राजस्वकोषः, धनकोषः.

HAND, *s.* (Palm with the fingers) हस्तः, करः, पाणिः *m.*, पञ्चशाखः, भुजादलः, शयः, शमः, कुलिः *m.*, हरणः; 'the right hand,' अग्रहस्तः, अग्रकरः, अग्रपाणिः *m.*; 'the left hand,' वामहस्तः; 'the palm of the hand,' हस्ततलं, करतलं; 'the open hand,' प्रहस्तः, प्रपाणिः *m.*, चपेटः; 'back of the hand,' करपृष्ठं, अपहस्तः; 'hollow of the hand,' करपुटं, करकोषः, करपात्रं; 'both hands,' हस्तौ *m.* du., हस्तद्वयं, करद्वयं; 'a beautiful hand,' करकमलं, करपद्मं, करपल्लवः, करपङ्कजं; 'the hand below the wrist,' करभः, हस्तपुच्छं; 'the clenched hand,' मुष्टिः *m. f.*, हस्तमुष्टिः; 'part of the hand sacred to the gods,' देवतीर्थं, दैवं; 'to the manes,' पितृतर्पणं, पितृतीर्थं, पित्र्यं; 'the hands and feet,' पाणिपादं; 'bound hand and foot,' संयमितकरचरणः -णा -णं; 'hand to hand,' हस्ताहस्ति, मुष्टीमुष्टि, बाहूबाहवि; 'hand in hand,' सहितं, सह, समं, योगतस्, सम्भूय, एकीभूय; 'with joined hands,' अभिगृहीतपाणिः -णिः -णि; 'with hands across,' व्यत्यस्तपाणिः -णिः -णि; 'with one's own hand,' स्वहस्तेन; 'at hand,' उपस्थितः -ता -तं, आसन्नः -न्ना -न्नं, सन्निहितः -ता -तं; 'in hand, in one's possession,' हस्तस्थः -स्था -स्थं, हस्तस्थितः -ता -तं, हस्तवर्त्ती -र्त्तिनी -र्त्ति (न्), हस्तगतः -ता -तं; 'held in the hand,' करधृतः -ता -तं, करतलधृतः -ता -तं, करनिहितः -ता -तं, करप्राप्तः -प्ता -प्तं; 'in hand, ready to hand,' प्रस्तुतः -ता -तं, प्रत्युत्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं; 'matter in hand,' प्रस्तुतं; 'sword in hand,' खड्गपाणिः *m.*; 'staff in hand,' लगुडहस्तः; 'off hand,' अचिरेण, अविलम्बितं, आकस्मिकः -की -कं, प्रत्युत्पन्नः -न्ना -न्नं, अचिन्तापूर्व्वः -र्व्वा -र्व्वं; 'out of hand,' तत्काले, तत्क्षणात्, सपदि, सद्यस्; 'living from hand to mouth,' उत्पन्नभक्षी -क्षिणी -क्षि (न्); 'to take in hand,' आरभ् (c. 1. -रभते -रब्धुं), व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो; 'to lend a hand,' उपकृ, साहाय्यं कृ or सहायत्वं कृ; 'to lay hands [illegible] धर्त्तुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), हृ (c. 1. हरति, हर्त्तुं); 'to [illegible] परस्परं पाणिं ग्रह, अन्योन्यं हस्तं or हस्तौ स्पृश् (c. 6. स्पृशति, स्प्रष्टुं); 'to [illegible] a hand in,' सहकारी -रिणी -रि (न्) [illegible]; 'to get the upper hand,' अभिभू, प्रभू; 'to clap the hands,' करतालं कृ; 'to support with the hand,' करालम्बनं कृ; 'under-hand,' तिरस्, रहस्, छलेन.—(A measure) हस्तपरिमाणं, करतलपरिमाणं.—(Side, part) पार्श्वः, पक्षः, भागः; 'on the [illegible] hand,' एकतस्, [illegible]; 'on the other hand,' अन्यत्र, पुनर्; 'on all hands,' सर्व्वतस्, सर्व्वत्र.—(Action, performance) करणं, विधानं, प्रवृत्तिः *f.*, चेष्टा, क्रिया.—(Power, possession) शक्तिः *f.*, अधिकारः, आधिकारण्यं; 'fallen into one's hand,' हस्तगतः -ता -तं.—(Agent) कर्त्ता *m.* (र्त्तृ), कारः, कारकः, कर्म्मकरः.—(Index of a dial) कीलः, देशिनी, प्रदेशिनी, सूचिः *f.*, सूचिनी.—(Form of writing) स्वाक्षरं, स्वहस्ताक्षरं, लिपिः *f.*

To HAND, *v. a.* (Give with the hand) हस्तेन गृहीत्वा परहस्ते दा (c. 3. ददाति, दातुं) or प्रदा or ऋ in caus. (अर्पयति -यितुं) or समृ or प्रतिपद् (c. 10. -पादयति -यितुं).—(Guide or lead with the hand) हस्तेन नी (c. 1. नयति, नेतुं) or समानी or गम् in caus. (गमयति -यितुं).—(Support with the hand) परालम्बनार्थं हस्तं दा, करालम्बनं कृ.—(Hand down, transmit) क्रमागतं -तां -तं कृ, क्रमायातं -तां -तं, क्रमेण or पारम्पर्य्येण सञ्चर् (c. 10. -चारयति -यितुं) or सङ्क्रम् (c. 10. -क्रामयति -यितुं) or प्रतिपद्.

HAND-BARROW, *s.* हस्तसञ्चालितं वाहनं or यानं.

HAND-BELL, *s.* हस्तेन वादिता क्षुद्रघण्टा, घण्टिका, हस्तघण्टा.

HAND-BREADTH, *s.* एकहस्तपरिमाणं, एककरपरिमाणं, पाणितलं.

HANDCUFF, *s.* हस्तपाशः, पाणिबन्धनं, हस्तबन्धः, करबन्धनं.

To HANDCUFF, *v. a.* हस्तौ पाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाणिबन्धनं कृ.

HANDCUFFED, *p. p.* बद्धहस्तः -स्ता -स्तं, यन्त्रितकरः -रा -रं, संयमितकरः -रा -रं.

HANDED, *p. p.* (Given into the hand) हस्ते दत्तः -त्ता -त्तं or अर्पितः -ता -तं.—(Led with the hand) हस्तेन नीतः -ता -तं.—(Supported with the hand) दत्तहस्तः -स्ता -स्तं, आलम्बितकरः -रा -रं.—(Handed down) पारम्पर्य्यक्रमागतः -ता -तं, क्रमायातः -ता -तं, पारम्पर्य्येण सञ्चारितः -ता -तं.

HANDFUL, *s.* मुष्टिः *m. f.*, हस्तपूरणं, पाणिपूरणं, गण्डूषः -षा, मुष्टिपरिमितं द्रव्यं; 'a handful of grass,' तृणमुष्टिः.

HAND-GALLOP, *s.* ईषत्पुलायितं, अर्द्धपुलायितं, ईषद्वल्गितं, अर्द्धवल्गितं.

HAND-GUN, *s.* हस्तद्वारेण प्रयुक्ता आग्नेयनाडिः, हस्तनाडिः.

HANDICRAFT, *s.* शिल्पं, शिल्पकर्म्म *n.* (न्), शिल्पिकं, शिल्पविद्या, हस्तकर्म्म *n.*, हस्तव्यापारः, हस्तव्यवसायः.

HANDICRAFTSMAN, *s.* शिल्पी *m.* (न्), शिल्पकारः, कर्म्मकारः, हस्तव्यापारी *m.* (न्), हस्तव्यवसायी *m.* (न्), पाणिघः.

HANDILY, *adv.* सदाक्ष्यं, दाक्ष्येण, दक्षं, करदाक्ष्येण, हस्तकौशल्येन, हस्तलाघवेन, कुशलं, निपुणं, चतुरं, सलाघवं, युक्त्या.

HANDINESS, *s.* दक्षता, दाक्ष्यं, हस्तकौशल्यं, करदक्षता, हस्तलाघवं, हस्तपादादिक्षिप्रता, युक्तिः *f.*, कौशल्यं, कुशलता, सुप्रयोगः -गता, नैपुण्यं, चातुर्य्यं, चतुरता, पटुता, क्षिप्रता.

HANDIWORK, *s.* हस्तकर्म्म *n.* (न्), हस्तव्यापारः, हस्तकृतं कर्म्म.

HANDKERCHIEF, *s.* नक्तकः, वरकं, मुखमार्जनी, गात्रमार्जनी; 'neck-handkerchief,' कण्ठवेष्टनं, गलावेष्टनं, कण्ठवस्त्रं.

To HANDLE, *v. a.* (Feel with the hand) स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), संस्पृश्, परिस्पृश्, हस्तेन परामृश् (c. 6. -मृशति -म्रष्टुं) or परिमृश् or आलभ् (c. 1. -लभते -लब्धुं) or समालभ् or घट्ट् (c. 10. घट्टयति -यितुं) or परिघट्ट्.—(Manage) प्रणी (c. 1. -णयति -णेतुं), विधा (c. 3. -दधाति -धातुं).—(Use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), उपयुज्.—(Treat) आचर् (c. 1. -चरति -रितुं), व्यवहृ (c. 1. -हरति -हर्त्तुं).—(Discuss) विचर् (c. 10. -चारयति -यितुं), विमृश्.

HANDLE, *s.* मुष्टिः *m. f.*, त्सरुः, दण्डः, तलः, तालः, नालः, कर्णः.—(Of a sword, &c.) त्सरुः *m.*, सरुः *m.*, तलः, तालः.—(Of a plough) ईषादण्डः; 'become a handle,' नालयितः -ता -तं.

HANDLED, *p. p.* स्पृष्टः -ष्टा -ष्टं, संस्पृष्टः -ष्टा -ष्टं, परामृष्टः -ष्टा -ष्टं, परिमृष्टः -ष्टा -ष्टं, परिघट्टितः -ता -तं, करघट्टितः -ता -तं, करपरिघट्टितः -ता -तं.

HANDLESS, *a.* अहस्तः -स्ता -स्तं, विहस्तः -स्ता -स्तं, अकरः -रा -रं.

HAND-MAID, *s.* दासी, दासिका, चेटी, सेविका, परिचारिका.

HAND-MILL, *s.* यन्त्रपेषणी, हस्तेन सञ्चालिता पेषणी.

HAND-RAIL, *s.* (Of a staircase) सोपाने उभयतः स्थापिता क्षुद्रस्तम्भपंक्तिः.

HAND-SAW, *s.* हस्तसञ्चारितं करपत्रं, हस्तसञ्चालितः क्रकचः.

HANDSEL, *s.* प्रथमविक्रयः, आदिविक्रयः, प्रथमप्रयोगः, प्रथमव्यवहारः, प्रथमकर्म्म *n.* (न्), आदिक्रिया.

To HANDSEL, *v. a.* प्रथमं कृ or प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), प्रथमप्रयोगं कृ.

HANDSOME, *a.* (Beautiful) सुरूपः -पी -पं, रूपवान् -वती -वत् (त्), रूपी -पिणी -पि (न्), रूपोपेतः -ता -तं, सुगात्रः -त्री -त्रं, स्वङ्गः -ङ्गी -ङ्गं, वराङ्गः -ङ्गी -ङ्गं, दर्शनीयः -या -यं, सुदृश्यः -श्या -श्यं, चारुः -र्वी -रु, चारुदर्शनः -ना -नं, सौम्यः -म्या -म्यी -म्यं, सुन्दरः -रा -री -रं, शोभनः -ना -नं, कान्तः -न्ता -न्तं, लावण्यवान् -वती -वत् (त्), वामः -मा -मं, वामिलः -ला -लं, पद्मलः -ला -लं, सिंहसंहननः -ना -नं; 'having a handsome countenance,' शुभाननः -ना -नं, चारुवदनः -ना -नं सुमुखः -खा -खी -खं, आननाब्जः -ब्जा -ब्जं; 'a handsome woman, रूपवती, प्रमदा. Often expressed by सु; as, 'having handsome teeth,' सुदन् -दती -दत् (त्); 'having handsome eyes, सुनयनः -ना -नं, सुदृक् *m. f. n.* (श्); 'having a handsome waist,' सुमध्यमा.—(Generous, liberal) उदारः -रा -रं, वदान्यः -न्या -न्यं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, अकृपणः -णा -णं.—(Ample, large) विपुलः -ला -लं, विशालः -ला -लं, प्रचुरः -रा -रं, बृहन् -हती -हत् (त्).

HANDSOMELY, *adv.* (With beauty or grace) चारु, सुन्दरं, सौन्दर्य्येण, लावण्येन, सलावण्यं, शोभनं, शोभया.—(Generously) उदारवत्, वदान्यवत्, अकृपणं.

HANDSOMENESS, *s.* सुरूपता, रूपवत्त्वं, रूपं, रूपलावण्यं, दर्शनीयता, सुदृश्यता, चारुता, सौम्यता, सौन्दर्य्यं, कान्तता, शोभा, वामता.

HAND-STROKE, *s.* कराघातः, हस्ताघातः, पाणिघातः, हस्तप्रहारः, हस्तपातः.

HAND-WEAPON, *s.* हस्तायुधं, हस्तशस्त्रं, हस्तास्त्रं, हस्तप्रहरणं.

HAND-WRITING, *s.* स्वहस्ताक्षरं, हस्ताक्षरं, स्वाक्षरं, हस्तलिखनं, हस्तलेखा.—(In general) लेखः -खा, लिखनं, लिपिः *f.*, लिविः *f.*, अक्षरसंस्थानं.

HANDY, *a.* दक्षः -क्षा -क्षं, करदक्षः -क्षा -क्षं, लघुहस्तः -स्ता -स्तं, चतुरः -रा -रं, कुशलः -ला -लं, निपुणः -णा -णं, क्षिप्रः -प्रा -प्रं, युक्तिमान् -मती -मत् (त्), सुप्रयोगवान् -वती -वत् (त्), पटुः -टुः -टु, लघुः -घुः -घु.—(Convenient, ready, near) उपयुक्तः -क्ता -क्तं, प्रस्तुतः -ता -तं, प्रत्युत्पन्नः -न्ना -न्नं, आसन्नः -न्ना -न्नं, निकटः -टा -टं, समीपस्थः -स्था -स्थं.

HANDY-BLOW, *s.* कराघातः, हस्ताघातः, पाणिघातः; 'handy-blows, मुष्टीमुष्टि.

To HANG, *v. a.* उद्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), उद्बन्धनं कृ, उद्बद्धं -द्धां -द्धं कृ, ऊर्द्ध्वं or उच्चैः or विहायसा बन्ध्, आन्दोल (nom. आन्दोलयति -यितुं); 'by a loop,' काच (nom. काचयति -यितुं).—(Put to death by hanging) रज्जुपाशेन उद्बन्ध्, उद्बन्धनेन हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं) or प्राणदण्डं कृ.—(With curtains, &c.) यवनिकादिना परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or प्रच्छद् (c. 10. -छादयति -यितुं).

To HANG, *v. n.* (Be suspended) उद्बन्ध् in pass. (-बध्यते), ऊर्द्ध्वं or उच्चैर् बन्ध्.—(Dangle) लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, प्रलम्ब्, लुल् (c. 1. लोलति -ते -लितुं), लुठ् (c. 6. लुठति -ठितुं), चञ्च् (c. 1. चञ्चति -ञ्चितुं).—(Swing) दोल (nom. दोलायते -यितुं), प्रेङ्ख् (c. 1. प्रेङ्खति -ङ्खितुं).—(Depend) अवलम्ब्, समालम्ब्, आश्रि (c. 1. -श्रयति -ते -यितुं), अधीनः -ना -नं भू.—(Cling to) अवलम्ब्, समालम्ब्, संलग्नीभू, अनुलग्नीभू, लग्नीभू, अनुबन्ध् in pass., सञ्ज् in pass. (सज्यते, सज्जते).—(Hang back) विलम्ब्.—(Hang by) अवलम्ब्; 'hanging by the mouth,' मुखेन अवलम्ब्य.—(Hang down) अवलम्ब्, प्रलम्ब्, अधो लम्ब्.—(Hang over, impend) उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्युपस्था.—(Hang over, project) बहिर्लम्ब्.—(Hang one's self) आत्मदेहम् उद्बन्ध्, रज्जुपाशेन आत्मघातं कृ.—(Hang the head) शिरो नम् (c. 10. नामयति, नमयति -यितुं) or अवनम्.

HANGER, *s.* (One who hangs) उद्बन्धा *m.* (न्धृ), उद्बन्धनकृत्.—(Sort of sword) हूस्वपत्रः खड्गविशेषः, हस्तकृपाणः.

HANGER-ON, *s.* उपजीवी *m.* (न्), अनुजीवी *m.*, परान्नभोजी *m.* (न्), परपिण्डादः, पराधीनः, पार्श्वसमितः, पीठमर्द्दः.

HANGING, *s.* उद्बन्धनं, ऊर्द्ध्वबन्धनं.—(Tapestry, drapery) जवनिका, चित्रजवनिका, यवनिका, प्रच्छदपटः, अपटी, परिच्छदः, वसनं, अम्बरं.

HANGING, *part.* (Dangling, being suspended) लम्बमानः -ना -नं,

लम्बः -म्बा -म्बं, प्रलम्बः -म्बा -म्बं, लम्बितः -ता -तं, अवलम्बितः -ता -तं, अवलम्बः -म्बा -म्बं, अवलम्बी -म्बिनी -म्बि (न्), विलम्बमानः -ना -नं; 'hanging the head,' नतमूर्द्धा -र्द्धा -र्द्ध (न्), अवनतशिराः -राः -रः (स्).

HANGMAN, *s.* दण्डपाशिकः, मृतपाः *m.*, घातुकपुरुषः, उद्बन्धनकर्म्माधिकृतः.

HANG-NAIL, *s.* नखाङ्कुरः, नखमूलाङ्कुरः, नखकीलः.

HANK, *s.* (A bundle of skeins) पञ्चिकासमूहः.—(Wooden ring) काष्ठवलयः.—(Check) संयमः, नियहः, यन्त्रणं, निरोधः.

To HANKER AFTER, *a.* अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, स्पृह् (c. 10. स्पृहयति -यितुं), कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, अनुकांक्ष्, उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं), लुभ् (c. 4. लुभ्यति, लोब्धुं), कम् (c. 10. कामयते -यितुं), लभ् in des. (लिप्सते -प्सितुं), गृध् (c. 4. गृध्यति, गर्धितुं).

HANKERING, *s.* स्पृहा, अभिलाषः, वाञ्छा, उत्कण्ठा, आकांक्षा.

HAP, HAP-HAZARD, *s.* दैवं, दैवयोगः, दैवगतिः *f.*, दैवघटना, अदृष्टं, सङ्गतिः *f.*, दैवसङ्गतं, नियतिः *f.*

HAPLESS, *a.* दुर्भाग्यः -ग्या -ग्यं, अभाग्यः -ग्या -ग्यं मन्दभाग्यः -ग्या -ग्यं, दैवहीनः -ना -नं, निर्दैवः -वा -वं, अधन्यः -न्या -न्यं, हतभाग्यः -ग्या -ग्यं.

HAPLY, *adv.* दैवात्, दैववशात्, दैवयोगेन, अदृष्टवशात्, अकस्मात्, अनिश्चितं, अचिन्तितं, अपिनाम, किल.

To HAPPEN, *v. n.* घट् (c. 1. घटते -टितुं), निपत् (c. 1. -पतति -तितुं), आपत्, सम्पद् (c. 4. -पद्यते -पत्तुं), उपपद्, समापद्, उत्पद्, उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था, सम्भू (c. 1. -भवति -वितुं), संवृत् (c. 1. -वर्त्तते -र्त्तितुं), वृत्, आगम् (c. 1. -गच्छति -गन्तुं), उपागम्, दैवात् or अकस्मात् भू.

HAPPENED, *p. p.* घटितः -ता -तं, उपस्थितः -ता -तं, समुपस्थितः -ता -तं, समापन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, उत्पन्नः -न्ना -न्नं, निपतितः -ता -तं, आपतितः -ता -तं, वृत्तः -त्ता -त्तं, संवृत्तः -त्ता -त्तं, आगतः -ता -तं, उपागतः -ता -तं, सम्भूतः -ता -तं.

HAPPILY, *adv.* (Fortunately) सौभाग्येन -ग्यात्, कल्याणात्, दिष्ट्या, भद्रं.—(In a state of happiness) सुखं, सुखेन, यथासुखं, सौख्येन, स्वास्थ्येन.

HAPPINESS, *s.* सुखं, सौख्यं, सुखित्वं, आनन्दः, आह्लादः, धन्यता, हर्षः, कल्याणं, शर्म्म *n.* (न्), श्रेयस्, निःश्रेयसं, क्षेमः -मं, स्वास्थ्यं, कुशलं, शुभं, मङ्गलं, माङ्गल्यं, कौशल्यं, भद्रं, सौभाग्यं, सम्पत्तिः *f.*, सम्पद् *f.*, निर्वृतिः *f.*, निर्वृतिः *f.*, श्रीः *f.*, पुण्योदयः, शस्तं, मतल्लिका, मचर्चिका, प्रकाण्डं, उद्घः, तल्लजः.

HAPPY, *a.* सुखी -खिनी -खि (न्), सुखयुक्तः -क्ता -क्तं, सुखभागी -गिनी -गि (न्), आनन्दी -न्दिनी -न्दि (न्), हृष्टः -ष्टा -ष्टं, प्रीतः -ता -तं, तुष्टः -ष्टा -ष्टं, प्रहृष्टः -न्ना -न्नं, प्रमोदी -दिनी -दि (न्), प्रमुदितः -ता -तं, विशोकः -का -कं, शोकहीनः -ना -नं, सुस्थः -स्था -स्थं, निर्वृतः -ता -तं, अकातरः -रा -रं, तृप्तः -प्ता -प्तं, मग्नः -ग्ना -ग्नं.—(Fortunate, prosperous) धन्यः -न्या -न्यं, सौभाग्यवान् -वती -वत् (त्), भाग्यवान् &c., पुण्यवान् &c., पुण्यः -ण्या -ण्यं, शर्म्मवान् &c., क्षेमवान् &c., क्षेमः -मा -मं, क्षेम्यः -म्या -म्यं, कुशली -लिनी -लि (न्), कुशलः -ला -लं, कल्याणः -णा -णं, -णी -णिनी -णि (न्), शुभः -भा -भं, शुभान्वितः -ता -तं, शुभंयुः -युः -यु, भद्रः -द्रा -द्रं, श्रीमान् -मती -मत् (त्), श्रीयुक्तः -क्ता -क्तं, लक्ष्मीवान् &c., मङ्गलः -ला -लं, शिवः -वा -वं, भावुकः -का -कं, भविकः -का -कं, भव्यः -व्या -व्यं, श्वःश्रेयसः -सा -सं, शस्तः -स्ता -स्तं, लक्षणः -णा -णं, श्रीलः -ला -लं, समृद्धः -द्धा -द्धं, अधिकर्द्धिः -र्द्धिः -र्द्धि, वर्द्धिष्णुः -ष्णुः -ष्णु, निरापद् *m. f. n.*; 'a happy moment,' शुभलग्नः; 'a happy result,' शुभफलं, स्वन्तं; 'having a happy result,'

स्वन्तः -न्ता -न्तं; 'to be happy,' सुख (nom. सुखायते).

HARANGUE, *s.* वाक्यं, अलङ्कारमयं वाक्यं, रसिकवाक्यं.

To HARANGUE, *v. n.* बहुजनसमाजे अलङ्कारमयं वाक्यं वद् (c. 1. वदति -दितुं), अभिवद्, अभिभाष् (c. 1. -भाषते -षितुं).

HARANGUER, *s.* बहुजनसमाजे अलङ्कारमयवाक्यवक्ता *m.* (क्तृ), वागीशः, वागीश्वरः, प्रवचनपटुः, वाक्यद्वारेण विस्मयोत्पादकः or इन्द्रियमोहकः.

To HARASS, *v. a.* (Fatigue) खिद् (c. 10. खेदयति -यितुं), आयस् (c. 10. -यासयति -यितुं), सद् (c. 10. सादयति -यितुं), अवसद्, क्लम् (c. 10. क्लमयति -यितुं), परिक्लम्, श्रम् (c. 10. श्रमयति -यितुं), परिश्रम्, ग्लै in caus. (ग्लपयति -यितुं).—(Vex) बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), संक्लिश्, पीड् (c. 10. पीडयति -यितुं), परिपीड्, उपपीड्, प्रपीड्, अभिपीड्, अभिनिपीड्, निपीड्, सम्पीड्, आपीड्, व्यथ् (c. 10. व्यथयति -यितुं), अर्द् (c. 10. अर्दयति -यितुं), समर्द्, दु (c. 5. दुनोति, दोतुं), प्रदु, तप् (c. 10. तापयति -यितुं), परितप्, सन्तप्, कृप् (c. 10. कर्पयति -यितुं), अभिकृप्, उपरुध् (c. 7. -रुणद्धि, रोद्धुं), मथ् (c. 1. मथति, c. 9. मथ्नाति, मन्थितुं), प्रमथ्, क्षि (c. 5. क्षिणोति, क्षेतुं), रध् (c. 10. रन्धयति -यितुं), उपहन् (c. 2. -हन्ति -न्तुं).

HARASSED, *p. p.* खेदितः -ता -तं, खिन्नः -न्ना -न्नं, श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, क्लान्तः -न्ता -न्तं, बाधितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लिशितः -ता -तं, क्लेशितः -ता -तं, परिक्लिष्टः -ष्टा -ष्टं, पीडितः -ता -तं, अर्दितः -ता -तं, अभ्यर्दितः -ता -तं, समर्दितः -ता -तं, अवसादितः -ता -तं, दूनः -ना -नं, उपहतः -ता -तं, व्यथितः -ता -तं, विडम्बितः -ता -तं, दुर्मनायमानः -ना -नं; 'to be harassed,' खिद् (c. 4. खिद्यते).

HARASSER, *s.* खेदकरः, श्रमकरः, बाधकः, क्लेशकः, पीडकः, पीडाकरः.

HARASSING, *a.* खेदजनकः -का -कं, क्लेशकरः -री -रं, दुःखकरः -री -रं.

HARBINGER, *s.* अग्रेसरः, अग्रसरः, अग्रगः, अग्रगामी *m.* (न्), पुरोगः, -गामी *m.* (न्), प्राग्गामी *m.*, अग्रवर्त्ती *m.* (न्), अग्रगतः, दूतः, [illegible] सन्देशहरः; 'harbinger of spring,' वसन्तदूतः.

HARBOR, *s.* (For ships) [illegible] नौबन्धनयोग्यं खातं, नौबन्धनखातं, नौरक्षणस्थानं, नौकाश्रयः.—(Shelter, place of rest) आश्रयः, समाश्रयः, संश्रयः, प्रतिश्रयः, आशयः, अवस्थानं, अवकाशः, वासस्थानं, निवासस्थानं, आश्रयस्थानं.

To HARBOR, *v. a.* आश्रयं कृ [illegible], अवकाशं दा, वासस्थानं दा, वस् in caus. (वासयति -यितुं), निवस्, सत्कृ.—(Entertain in the mind) मनसि or मनसा धृ (c. 1. धरति, धर्त्तुं) or उपलभ् (c. 1. -लभते -लब्धुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

To HARBOR, *v. n.* आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, वस् (c. 1. वसति, वस्तुं), निवस्.

HARBORAGE, *s.* आश्रयः, समाश्रयः, संश्रयः, अवस्थानं, अवकाशः.

HARBORER, *s.* आश्रयकर्त्ता *m.* (र्त्तृ), आश्रयः, आशयिता *m.* (तृ), अवस्थापकः, ग्रहीता *m.* (तृ).

HARBORLESS, *a.* निराश्रयः -या -यं, आश्रयहीनः -ना -नं, निर्वासः -सा -सं.

HARD, *a.* (Firm, solid, compact) दृढः -ढा -ढं, घनः -ना -नं, कठिनः -ना -नं, कर्कशः -शा -शं, कठोरः -रा -रं, संहतः -ता -तं, अशिथिलः -ला -लं, अमसृणः -णा -णं, वज्रः -ज्रा -ज्रं, ग्रावा -वा -व (न्), वज्रमयः -यी -यं, दृढग्रन्थिः -न्थिः -न्थि, कर्कैरः -रा -रं, जरठः -ठा -ठं, गाढः -ढा -ढं, प्रगाढः -ढा -ढं, कीकसः -सा -सं, कक्खटः -टा -टं, कठोलः -ला -लं, क्रूरः -रा -रं, निष्ठुरः -रा -रं, दुर्वेतरः -रा -रं.—(Hard to be understood) दुर्ज्ञेयः -या -यं.—(Difficult, not easy to be done) कठिनः -ना -नं, दुष्करः -रा -री -रं, दुःसाध्यः -ध्या -ध्यं, दुश्चरः -रा -रं, असुकरः -री -रं, असुगमः -मा -मं, विषमः -मा -मं, कष्टः -ष्टा -ष्टं,

दुर्निग्रहः -हा -हं, सायासकृतः -ता -तं, दुःखसाध्यः -ध्या -ध्यं, दुःखेन कार्य्यः -र्य्या -र्य्यं or साध्यः -ध्या -ध्यं. *Often expressed by* दुर् *or* दुःख *in comp.*; as, 'hard to be borne,' दुःसहः -हा -हं; 'hard to obtain,' दुर्लभः -भा -भं, दुःखलभ्यः -भ्या -भ्यं, दुष्प्रापः -पा -पं, दुःखेन प्राप्यः -प्या -प्यं; 'hard to be crossed,' दुस्तरः -रा -रं, दुस्तार्य्यः -र्य्या -र्य्यं; 'hard to be broken,' दुर्भेद्यः -द्या -द्यं, दुःखभेद्यः -द्या -द्यं; 'hard to be relinquished,' दुस्त्यजः -जा -जं.—(Fatiguing, painful, laborious) कष्टकरः -री -रं, दुःखी -खिनी -खि (न्), दुःखकरः -रा -रं, क्लेशी -शिनी -शि (न्), क्लेशकः -का -कं.—(Severe, harsh) कठोरः -रा -रं, निष्ठुरः -रा -रं, उग्रः -ग्रा -ग्रं, उग्रदण्डः -ण्डा -ण्डं, तीक्ष्णः -क्ष्णा -क्ष्णं, क्रूरः -रा -रं, कर्कशः -शा -शं, रूक्षः -क्षा -क्षं.—(Unfavorable) अननुकूलः -ला -लं; 'hard fate,' दुर्दैवं.—(Sour, acid) अम्लरसः -सा -सं, शुक्तः -क्ता -क्तं.

HARD, *adv.* (Near, hard by) समीपं, निकटे, उपान्ते, आरात्, आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं.—(With difficulty) दुःखेन, कष्टेन, कृच्छ्रेण, आयासेन, कठिनं, विषमं, दुर् prefixed. (Violently, with force) बलेन, बलात्, बलवत्, तीव्रं, तीक्ष्णं, प्रसभं.—(Hard) शीघ्रं, सत्वरं, त्वरितं.

HARD-BOUND, *a.* दृढबद्धः -द्धा -द्धं, दृढसन्धिः -न्धिः -न्धि, बद्धकोष्ठः -ष्ठा -ष्ठं.

HARD-DRINKER, *s.* मद्यपानप्रसक्तः, पानरतः, अतिपायी *m.* (न्).

HARD-EARNED, *a.* श्रमेणोपार्ज्जितः -ता -तं, कृच्छ्रोपार्ज्जितः -ता -तं, कृच्छ्राप्तः -प्ता -प्तं.

To HARDEN, *v. a.* कठिनीकृ, घनीकृ, कठोरीकृ, दृढीकृ, कर्कशीकृ, स्तब्धीकृ, कठिनं -नां -नं कृ.

To HARDEN, *v. n.* कठिनीभू, घनीभू, कठोरीभू, दृढीभू, कर्कशीभू.

HARDENED, *p. p.* कठिनीकृतः -ता -तं, घनीकृतः -ता -तं, दृढीभूतः -ता -तं.

HARD-FEATURED, *a.* कठिनवदनः -ना -नं, कठिनमुखः -खी -खं, दुर्मुखः -खी -खं.

HARD-FISTED, *a.* कठिनमुष्टिः -ष्टिः -ष्टि, दृढमुष्टिः -ष्टिः -ष्टि.

HARD-HEARTED, *a.* कठिनहृदयः -या -यं, कठिनान्तःकरणः -णा -णं, पाषाणहृदयः -या -यं, अयोहृदयः -या -यं, निर्दयः -या -यं, निरनुक्रोशः -शा -शं, दुर्हृदयः -या -यं, अक्लिन्नहृदयः -या -यं, वज्रमयः -यी -यं.

HARD-HEARTEDNESS, *s.* कठिनहृदयता, हृदयकाठिन्यं, निरनुक्रोशता.

HARDIHOOD, *s.* वीर्य्यं, वीरता, धीरत्वं, धृतिः *f.*, धैर्य्यं, शौर्य्यं, शूरता, साहसं, निर्भयत्वं, प्रगल्भता, प्रागल्भ्यं, स्थैर्य्यं, स्थिरता.

HARDILY, *adv.* शूरवत्, वीरवत्, धीरवत्, धैर्य्येण, साहसेन, धीरं.

HARDINESS, *s.* (Boldness) शौर्य्यं, धीरत्वं, धैर्य्यं, धृतिः *f.*, वीरता.—(Of body) देहकाठिन्यं, शरीरदृढता, दृढदेहत्वं.

HARDLY, *adv.* (With difficulty) दुःखेन, कष्टेन, कृच्छ्रेण, कठिनं, कष्टं, आयासेन, दुर् prefixed.—(Scarcely, barely) कष्टं, कष्टेन, कृच्छ्रेण.—(Severely) निष्ठुरं, कठोरं, उग्रं, तीक्ष्णं, नैष्ठुर्य्येण.

HARD-MOUTHED, *a.* कठिनमुखः -खा -खं, दृढमुखः -खा -खं, कठोरमुखः -खा -खं.

HARDNESS, *s.* (Firmness, solidity) दृढता, दार्ढ्यं, द्रढिमा *m.* (न्), कठिनता, काठिन्यं, घनता, कठोरता, द्राढ्यं, कर्कशता, कार्कश्यं, निष्ठुरता.—(Difficulty to be understood) दुर्ज्ञेयता, अस्पष्टता.—(Difficulty to be effected) दुःसाध्यता, दुष्करत्वं, काठिन्यं, कठिनता, असौकर्य्यं, कष्टत्वं.—(Severity) निष्ठुरता, नैष्ठुर्य्यं, कठोरता, उग्रता, तीक्ष्णता, कर्कशता, कार्कश्यं.

HARDS, *s. pl.* शणोच्छिष्टं, शणावशिष्टं, शणशेषं, अतसीशणादेः शेषभागः.

HARDSHIP, *s.* क्लेशः, कायक्लेशः, देहक्लेशः, शरीरक्लेशः, श्रमः, आयासः, शरीरायासः, कष्टं, खेदः, परिश्रमः.—(Oppression) बाधः -धा, अभिद्रोहः, निष्ठुरता, उत्पातः.

HARDWARE, *s.* पिठरकटाहादीनि लोहभाण्डानि, लोहमयभाण्डं -ण्डानि *n. pl.*, लोहादिनिर्म्मितभाण्डानि.

HARDWAREMAN, *s.* लौहभाण्डविक्रयी *m.* (न्), पिठरकटाहादिभाण्डविक्रेता *m.* (तृ).

HARDY, *a.* (Bold, brave) शूरः -रा -रं, वीरः -रा -रं, प्रवीरः -रा -रं, प्रगल्भः -ल्भा -ल्भं, साहसी -सिनी -सि (न्), प्रतिभानवान् -वती -वत् (त्), प्रतिभावान् &c.—(In body) दृढदेहः -हा -हं, कठिनदेहः -हा -हं, दृढशरीरः -रा -रं.

HARE, *s.* शशः, शशकः, लम्बकर्णः, लोमकर्णः -र्णकः, मृदुलोमकः, मृदुरोमवान् *m.* (त्).

HAREBRAINED, *a.* चपलबुद्धिः -द्धिः -द्धि, चञ्चलबुद्धिः -द्धिः -द्धि, विभ्रान्तशीलः -ला -लं.

HAREHUNTING, *s.* शशकाखेटः, शशकानुसरणं.

HARELIP, *s.* शशकौष्ठः, छिन्नौष्ठः, शशकौष्ठरूपेण छिन्नौष्ठः.

HAREM, *s.* (Women's apartments) अन्तःपुरं, अवरोधः -धनं, अवरोधगृहं, अवरोधायनं, स्त्रीगृहं, स्त्र्यगारं, शुद्धान्तः, भोगगृहं, भोगावासः, कलत्रावासः, सुविदल्लं; 'guard of the harem,' शुद्धान्तपालकः.

HARESKIN, *s.* शशोर्णः, शशलोम *n.* (न्), शशचर्म्म *n.* (न्), शशकाजिनं.

HARICOT, *s.* शाकमूलादिना सह सिद्धं मांसं.

HARK, *interj.* शृणु, कर्णं देहि, अवधीयतां, निशामय.

HARLEQUIN, *s.* चित्रवेशो भण्डविशेषः, वैहासिकः, परिहासवेदी *m.* (न्).

HARLOT, *s.* वेश्या, गणिका, पण्यस्त्री, पण्याङ्गना, पण्याजनः, पणाङ्गना, वारस्त्री, वाराङ्गना, वारविलासिनी, वारसुन्दरी, पुंश्चली, भोग्या, बन्धकी, दारिका, भ्रष्टा, साधारणस्त्री, सामान्या स्त्री, व्यभिचारिणी, कुलटा, निशाचरी, ग्रामणीः, वेष्या, रूपाजीवा, कुम्भा, लञ्चिका, कर्करा, बन्धुरा, त्रपारण्डा; 'a company of harlots,' गाणिक्यं.

HARLOTRY, *s.* वेश्यात्वं, वेश्यावृत्तिः *f.*, वेश्याव्यवसायः, वैशिकं, पौंश्चल्यं, वारसेवा, वेश्यासेवा.

HARM, *s.* हिंसा -सनं, क्षतिः *f.*, परिक्षतिः *f.*, क्षतं, द्रोहः, अभिद्रोहः, अपायः, नाशः, अपकारः, अपकृतं, पीडा, व्यथा, अपचयः, अपचितिः *f.*, विहेठः -ठनं, हानिः *f.*, दूषणं, दोषः, अनिष्टं, अपहारः, क्षयः, अर्दना.

HONESTY, *s.* सारल्यं, सरलता, दाक्षिण्यं, शुचिता -त्वं, ऋजुता, आर्जवं, अमाया, मायाहीनता, अकपटः, अकापट्यं, कपटहीनता, अव्याजः, न्यायिता, न्यायाचारता, अजिह्मता, अकौटिल्यं, अशठता, निर्व्यलीकता, अवक्रता, अस्तेयं, अपैशुन्यं, भद्रता, साधुता, शुद्धत्वं, धार्म्मिकत्वं, सत्यता, सत्यशीलता, सत्यवादित्वं, नैर्मल्यं, विमलता, अदत्तानुपादानं.

HONEY, *s.* मधु *n.*, क्षौद्रं, पुष्पनिर्यासः, पुष्परसः, पुष्पसारः, पुष्पासवं, कुसुमासवं, माक्षिकं, लात्रं -त्रकं, सारघं, कापिशायनं; 'honey of flowers,' मवं; 'become honey,' मधुसाद्भूतः -ता -तं.

To HONEY, *v. n.* मधुरवचोभिः or मधुरवाक्यैः सान्त्व् (c. 10. सान्त्वयति -यितुं).

HONEY-COMB, *s.* मधुकोषः, मधुवासः, मधुचक्रं, माक्षिकाश्रयं, मधुक्रमः, करण्डः.

HONEY-MOON, *s.* आनन्दमासः, विवाहात् परं प्रथममासो यस्मिन् स्त्रीपुरुषौ प्रेममात्रं कुरुतः.

HONEY-SUCKLE, *s.* सुरभिगन्धविशिष्टो लताविशेषः.

HONEY-SWEET, *a.* मधुरः -रा -रं, मधुवत् स्वादुः -दुः -द्वी -दु, मधुसात् ind.

HONEY-TONGUED, *a.* मधुरभाषी -षिणी -षि (न्), मधुरवादी -दिनी -दि (न्).

HONIED, *a.* मधुमान् -मती -मत् (त्), मधुमयः -यी -यं, मधुरः -रा -रं.

HONORARY, *a.* सम्मानकरः -रा -रं, मानदः -दा -दं, यशस्यः -स्या -स्यं, यशस्वी -स्विनी -स्वि (न्), कीर्त्तिकरः -रा -रं, यशस्करः.—(Conferring honour only, without gain) सम्मानमात्रदः -दा -दं, कीर्त्तिमात्रकरः -री -रं, अलाभकरः -री -रं.

HONOUR, *s.* (Fame, reputation) कीर्त्तिः *f.*, यशस् *n.*, ख्यातिः *f.*, सुख्यातिः *f.*, विख्यातिः *f.*, प्रतिष्ठा, विश्रुतिः *f.*, समाख्या, प्रतिपत्तिः *f.*—(Reverence) सम्मानं, मानं, पूजा, अर्चनं -ना, अर्चा, अभ्यर्चा -र्चनं, नमस्कारः, सेवा, अर्हा, अर्हणं -णा, आदरः, सम्भावना, सत्कारः, आराधनं, पुरस्कारः, सम्भ्रमः, श्लाघा.—(Dignity, honourable rank) उत्कर्षः, उत्कृष्टता, उत्कृष्टपदं, कुलीनपदं, प्रतिपत्तिः *f.*, प्रधानपदं, प्रधानता, प्राधान्यं, श्रेष्ठत्वं, उन्नतिः *f.*, मर्य्यादा, अभिजातता, पूज्यता, मान्यता -त्वं, अभ्यर्हणीयता.—(Family honour) मर्य्यादा, कुलमर्य्यादा.

To HONOUR, *v. a.* पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, मन् (c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, समभ्यर्च्, समर्च्, सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), अर्ह् (c. 10. अर्हयति -यितुं), सम्भू (c. 10. -भावयति -यितुं), आदृ (c. 6. -द्रियते -दर्त्तुं), नमस्कृ, सत्कृ, पुरस्कृ, आराध् (c. 10. -राधयति -यितुं), श्रु in des. (शुश्रूषते -षितुं), अर्घ् (c. 1. अर्घति -र्घितुं) मह् (c. 1. महति -हितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), पूजां कृ, सम्मानं कृ.—(Accept a bill) लेख्यपत्रं ग्रह् or स्वीकृ or आदृ.

HONOURABLE, *a.* पूज्यः -ज्या -ज्यं, पूजनीयः -या -यं, पूजयितव्यः -व्या -व्यं, सम्पूजनीयः -या -यं, सम्मान्यः -न्या -न्यं, मान्यः -न्या -न्यं, मानी -निनी -नि (न्), पूजार्हः -र्हा -र्हं, अर्घार्हः -र्हा -र्हं, अर्हः -र्हा -र्हं, अर्हणीयः -या -यं, श्लाघ्यः -घ्या -घ्यं, आदरणीयः -या -यं, पुरस्करणीयः -या -यं, मर्य्यादावान् -वती -वत् (त्), मर्य्यादान्वितः -ता -तं.—(Illustrious) ख्यातः -ता -तं, सुख्यातः -ता -तं, यशस्वी -स्विनी -स्वि (न्), महायशाः -शाः -शः (स्), कीर्त्तिमान् -मती -मत् (त्), प्रतिपत्तिमान् -मती -मत् (त्), विश्रुतः -ता -तं, प्रसिद्धः -द्धा -द्धं.—(Conferring honour) कीर्त्तिकरः -री -रं, यशस्करः -री -रं, यशस्यः -स्या -स्यं.—(Upright, equitable) सच्चरितः -ता -तं, न्यायाचारः -रा -रं, धार्म्मिकः -की -कं, शुचिः -चिः -चि, दक्षिणः -णा -णं, सात्त्विकः -की -कं, शुद्धात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, निष्कपटः -टा -टं, विमलात्मा -त्मा -त्म (न्), अवक्रः -क्रा -क्रं, ऋजुः -जुः -जु, साधुः -धुः -ध्वी -धु.—(Noble) कुलीनः -ना -नं, उदारः -रा -रं, उदारचेताः -ताः -तः (स्).

HONOURABLY, *adv.* समानं, सम्मानपूर्व्वं, शुचिवत्, धार्म्मिकवत्, साधुवत्, उदारवत्, सौदार्य्यं, सत्कारपूर्व्वं, नमस्कारपूर्व्वं, श्लाघ्यप्रकारेण, सुकीर्त्तिपूर्व्वं, सुयशसा, निर्व्यलीकं, सम्पूजनीयं.

HONOURED, *p. p.* पूजितः -ता -तं, सम्पूजितः -ता -तं, अर्चितः -ता -तं, अभ्यर्चितः -ता -तं, सम्मानितः -ता -तं, पुरस्कृतः -ता -तं, सेवितः -ता -तं, अर्हितः -ता -तं, सेव्यमानः -ना -नं, निषेव्यमाणः -णा -णं, आदृतः -ता -तं, अर्घितः -ता -तं, सत्कृतः -ता -तं, महितः -ता -तं, आराधितः -ता -तं, शुश्रूषितः -ता -तं, अनिन्दितः -ता -तं.—(Accepted as a bill) गृहीतः -ता -तं, स्वीकृतः -ता -तं, आदृतः -ता -तं; 'to be honoured,' पूज् in pass. (पूज्यते), मह् (nom. महीयते).

HOOD, *s.* स्त्रीवस्त्रानुबद्धं मस्तकाच्छादनं or मस्तकावरणं or मस्तकपिधानं, फणाकारं मस्तकाच्छादनं, शिरस्कं, शिरस्त्रं -त्राणं, शिरोवस्त्रं; 'of a snake,' फणः -णा -णं, भोगः, स्फोटा.

To HOOD, *v. a.* पूर्व्वोक्तपिधानेन मस्तकम् आछद् (c. 10. -छादयति -यितुं), मस्तकावरणेन पिधा (c. 3. -दधाति -धातुं).

To HOODWINK, *v. a.* चक्षुषी वस्त्रेण रुध् (c. 7. रुणद्धि, रोद्धुं), नयने पिधानेन आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or आछद् (c. 10. -छादयति -यितुं), नयनरोधं कृ.

HOOF, *s.* खुरः, क्षुरः, शफः -फं, वर्त्तकः -का, निघृष्वः, पुटः, विङ्खः, रिङ्खः; 'hoof of a cow,' गोखुरं, गोष्पदं; 'mark of a hoof,' खुरपदवी, खुरचिह्नं.

HOOFED, *a.* खुरी -रिणी -रि (न्), क्षुरी -रिणी -रि (न्), खुरयुक्तः -क्ता -क्तं.

HOOK, *s.* (Any thing bent that catches hold) आकर्षी -र्षिणी, अङ्कुशः, आकर्षणार्थं वक्रयन्त्रं or वक्रलोहः, ग्रहणी, धरणी.—(Fish-hook) वडिशं -शा -शी, वरिशी, वलिशं -शी, मत्स्यवेधनं -नी.—(Hook for driving an elephant) अङ्कुशः -शं, अङ्कूषः -षं, सृणिः *f.*—(Bill-hook) दात्रं.

To HOOK, *v. a.* (Fish) वडिशेन मत्स्यान् व्यध् (c. 4. विध्यति, व्यद्धुं) or धृ (c. 1. धरति, धर्त्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), धरणं कृ, ग्रहणं कृ.

HOOKED, *a.* (Bent in the form of a hook) वक्रः -क्रा -क्रं, अङ्कुशाकारः -रा -रं, अङ्कुशी -शिनी -शि (न्), अनृजुः -जुः -जु, कुञ्चितः -ता -तं.

HOOP, *s.* (Any thing circular) चक्रं, चक्रवालं, वलयः -यं.—(For playing with) क्रीडाचक्रं, क्रीडावलयः.

To HOOP, *v. a.* (Bind with hoops) लोहवलयान् बन्ध् (c. 9. बध्नाति, बन्द्धुं), लोहचक्रादिभिर् युज् (c. 10. योजयति -यितुं).—(Shout out) चित्कारं कृ, चित्कारशब्दं कृ, उच्चैःस्वरेण उद्घुष् (c. 10. -घोषयति -यितुं).

HOOPER, *s.* (A cooper) लोहवलयबन्धा *m.* (न्धृ), काष्ठभाण्डकारः.

HOOPING-COUGH, *s.* आक्षेपककाशः, हूपशब्दपूर्व्वकः काशः, बालकानां काशः.

To HOOT, *v. n.* रु (c. 2. रौति, रवितुं), विरु, दीर्घरुतं कृ, दीर्घरावं कृ, घूत्कृ, घूत्कारं कृ, चित्कारं धृ, उच्चैःस्वरेण उद्घुष् (c. 10. -घोषयति -यितुं); 'to hoot at,' हे, रे, अरे, धिक्, हुम्, घूत् इत्यादिशब्दैर् अवमानं or अवज्ञां or अप्रसादं सूच् (c. 10. सूचयति -यितुं) or इत्यादिशब्दैर् अवज्ञास्पदं कृ.

HOOT, HOOTING, *s.* दीर्घरुतं, दीर्घरावः, रावः, घूत्कारः, घूत्कृतं, चित्कारः, हे, रे, धिक्, घूत् इत्यादिशब्दैर् अवमानसूचनं or अप्रसादसूचनं.

To HOP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), नृत् (c. 4. नृत्यति, नर्त्तितुं), एकपादेन प्लु or वल्ग्.

HOP, *s.* (The plant) लताविशेषो यस्य पुष्पाणि यवरसेन सह संसृज्यन्ते तेन च यवसुरा उत्पद्यते.—(Jump) प्लवः, प्लुतं, वल्गितं, झम्पः, नृत्यं, नर्त्तनं, एकपादेन प्लुतं, वल्गितं.

HOPE, *s.* आशा, प्रत्याशा, आशंसा, आकांक्षा, आशाबन्धः, मनोरथः, अपेक्षा, व्यपेक्षा, प्रतीक्षा, सम्प्रतीक्षा, स्पृहा, निरीक्षा, उदीक्षणं, ईप्सितं, मनस्विता; 'hope of a good issue,' फलाकांक्षा; 'having one's hopes fulfilled,' पूर्णमनोरथः, आशाप्राप्तः; 'hopes whose fulfilment is delayed,' विलसितफला मनोरथाः; 'hope-inspiring,' आशाजननः -ना -नं.

To HOPE, *v. a.* and *n.* आशंस् (c. 1. -शंसते -सितुं), आकांक्ष् (c. 1. -कांक्षति -क्षितुं), प्रत्याकांक्ष्, प्रतीक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, व्यपेक्ष्, उदीक्ष्, स्पृह् (c. 10. स्पृहयति -यितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, आशां कृ, प्रत्याशां कृ, आशंसां कृ, आशास् (c. 2. शास्ते -शासितुं); 'I hardly hoped to see you again,' न खलु मे आसीद् आशंसा यथा पुनरपि त्वां प्रेक्षिष्ये; 'I hope' may be expressed by the particle कच्चित्; as, 'I hope the fever does not pain you much,' कच्चित् त्वां नातिबाधते ज्वरः.

HOPEFUL, *a.* (Full of hope) आशावान् -वती -वत् (त्), आशान्वितः -ता -तं, आशायुक्तः -क्ता -क्तं, आशाविष्टः -ष्टा -ष्टं, आशाबद्धः -द्धा -द्धं, स्पृहयालुः -लुः -लु, आकांक्षी -क्षिणी -क्षि (न्), सप्रत्याशः -शा -शं, प्रत्याशी -शिनी -शि (न्), अपेक्षी -क्षिणी -क्षि (न्), अपेक्षकः -का -कं.—(Promising, exciting hope) आशाजननः -ना -नं, आशाकारी -रिणी -रि (न्).

HOPEFULLY, *adv.* सप्रत्याशं, साशंसं, आशापूर्व्वं, आशंसापूर्व्वं.

HOPEFULNESS, *s.* आशावत्त्वं, आशाविष्टत्वं, सप्रत्याशत्वं.

HOPELESS, *a.* आशाहीनः -ना -नं, निराशः -शा -शं, आशारहितः -ता -तं, गताशः -शा -शं, त्यक्ताशः -शा -शं, निःप्रत्याशः -शा -शं, हताशः -शा -शं.

HOPELESSLY, *adv.* निराशं, निःप्रत्याशं, आशां विना, गताशं.

HOPELESSNESS, *s.* नैराश्यं, निराशता, आशाहीनता, आशाराहित्यं.

HOPPER, *s.* (One who hops) एकपादेन प्लुतकारी *m.* (न्), एकपादेन नर्त्तकः.—(In a mill) शस्याधारः, शस्यपात्रं.

HOPPING, *s.* एकपादेन नर्त्तनं or नृत्यं or प्लुतकरणं or वल्गितकरणं.

HORAL, HORARY, *a.* मौहूर्त्तिकः -की -कं, घटिकाविषयः -या -यं.

HORDE, *s.* अस्थिरवासिनां or पर्य्यटनकारिणां म्लेच्छपुरुषाणां समूहः or सङ्घः or वृहत्कुलं or वृहद्गणः, शबरगणः, किरातगणः.

HORIZON, *s.* दिङ्मण्डलं, मण्डलं, चक्रवालं, चक्रं, दिगन्तः, आकाशकक्षा, अम्बरान्तं -न्तः, चक्रपालः. 'The eastern horizon,' प्राची दिक्, प्राचीमूलं.

HORIZONTAL, *a.* अनुप्रस्थः -स्था -स्थं, अन्वायततः -ता -तं, दिगन्तसमः -मा -मं, समः -मा -मं, समरेखः -खा -खं, समस्थः -स्था -स्थं, सपाटः -टा -टं; 'a horizontal line,' क्षितिज्यामार्गं, समरेखा; 'plane,' समानभूभागः.

HORIZONTALLY, *adv.* अनुप्रस्थं, अन्वायततं, समं, समरेखं, समानरूपेण

HORN, *s.* (Of an animal) शृङ्गं, विषाणः -णी -णं, कूणिका, काहलः -ला -लिका; 'of a buffalo,' गवलं.—(Wind-instrument) शङ्खः, काहलः -ला; 'to blow a horn,' शङ्खं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा.—(Of the moon) चन्द्रशिखा, चन्द्रशृङ्गं, चन्द्राग्रं.

HORN-BOOK, *s.* बालकस्य आरम्भपुस्तकं or आदिपुस्तकं or प्रथमपाठग्रन्थः.

HORNED, *a.* शृङ्गी -ङ्गिणी -ङ्गि (न्), शृङ्गिणः -णा -णं, विषाणी -णिनी -णि (न्), शृङ्गविशिष्टः -ष्टा -ष्टं; 'in the form of a horn,' शृङ्गाकारः -रा -रं; 'horned moon,' सिनीवाली.

HORNET, *s.* वृहद्वरलभेदः, वृहद्भृङ्गरोलः, विषशृङ्गी *m.* (न्), विषशूकः.

HORNLESS, *s.* अशृङ्गः -ङ्गा -ङ्गं, शृङ्गहीनः -ना -नं; 'hornless bull,' तूबरः.

HORN-OWL, *s.* उलूकभेदः, शृङ्गिणपेचकः, शृङ्गिकौशिकः.

HORN-PIPE, *s.* नृत्यविशेषः यस्मिन् नर्त्तको हस्तपादादि इतस्ततः क्षिप्रं सञ्चालयति, नाविकनृत्यं.

HORNY, *a.* शार्ङ्गः -ङ्गी -ङ्गं, शृङ्गमयः -यी -यं, शृङ्गगुणः -णा -णं.

HOROLOGE, HOROLOGY, *s.* घटी, यामघोषा, कालमापनयन्त्रं.

HOROSCOPE, *s.* जन्मपत्रं -त्रिका, जन्मनक्षत्रपत्रं, जन्मयोगपत्रं, जन्मकालग्रहः.

HORRIBLE, *a.* दारुणः -णा -णं, घोरः -रा -रं, सुभैरवः -वी -वं, भैरवः -वी -वं, रौद्रः -द्री -द्रं, भयङ्करः -री -रं, सुभयानकः -की -कं, भयानकः -की -कं, भीमः -मा -मं, उग्रः -ग्रा -ग्रं, भीषणः -णा -णं, त्रासकरः -रा -रं, भयावहः -हा -हं, विकटः -टा -टं, करालः -ला -लं, भीष्मः -ष्मा -ष्मं.—(In appearance) घोरदर्शनः -ना -नं, रौद्रदर्शनः -ना -नं, भीमदर्शनः -ना -नं.

HORRIBLY, *adv.* दारुणं, घोरं, भयानकं, सुभैरवं, रौद्रं, उग्रं, विकटं.

HORRID, *a.* घोरः -रा -रं, दारुणः -णा -णं, उग्रः -ग्रा -ग्रं, कुत्सितः -ता -तं, भयानकः -का -कं, [illegible] भीमः -मा -मं, भीषणः -णा -णं, रौद्रः -द्री -द्रं, भैरवः -वी -वं, विकटः -टा -टं, करालः -ला -लं.

HORRIDLY, *adv.* घोरं, दारुणं, उग्रं, कुत्सितं, अतिकुत्सितं, रौद्रं.

HORRIDNESS, *s.* घोरता, दारुणता, उग्रता, कुत्सितत्वं, भयानकत्वं, रौद्रता.

HORRIFIC, *a.* भैरवकारकः -का -कं, भैरवजनकः -का -कं, सुभयङ्करः -री -रं, सुभयानकः -का -कं, साध्वसकारी -रिणी -रि (न्).

HORRIFIED, *p. p.* भयसहृष्टरोमा -मा -म (न्), साध्वसोपहतः -ता -तं.

To HORRIFY, *v. a.* भैरवं जन् (c. 10. जनयति -यितुं), ससाध्वसं -सां -सं कृ.

HORRIPILATION, *s.* रोमहर्षः -र्षणं, लोमहर्षणं, संहर्षः, उद्धर्षणं, रोमाञ्चः -ञ्चनं, रोमोद्गमः, रोमोद्भेदः, पुलकः, पुलकोद्गमः, उद्धूषणं.

HORROR, *s.* भैरवं, भयसंहर्षः, भयकम्पः, साध्वसं, भीषणं, भीष्मं, भीमं, घोरं, भयानकं, भयङ्करं, त्रासः, सन्त्रासः, परिकम्पः.

HORSE, *s.* अश्वः, हयः, तुरङ्गः -ङ्गमः, तुरगः, वाजी *m.* (न्), घोटकः, वाहः, तार्क्ष्यः, अर्व्वा *m.* (न्), सैन्धवः, सप्तिः *m.*, किल्की *m.* (न्), प्रचेलकः, श्रीभ्राता *m.* (तृ), पीतिः *m.*, पीती *m.* (न्), वीतिः *m.*, पलद्वारः, मुद्गभुक् *m.* (ज्), मुद्गभोजी *m.* (न्), गन्धर्व्वः; 'a well-bred horse,' आजानेयः, कुलीनः, सिन्धुवारः, भूमिपक्षः, भूमिरक्षकः; 'a well-trained horse,' विनीतः, साधुवाही *m.* (न्); 'a white horse,' कर्कः; 'a bay horse,' उकनाहः, कियाहः; 'a fleet horse,' जवनः, जवाधिकः, प्रजवी *m.* (न्); 'a good horse,' वल्लभः, हयोत्तमः; 'a chariot horse,' रथ्यः; 'a pack-horse,' पृष्ठ्यः, स्थौरी *m.* (न्), स्थूरी *m.*, स्थोरी *m.*; 'a horse for sacrifice,' ययुः *m.*, अश्वमेधीयः; 'four-horsed carriage,' चतुरश्वो रथः.—

(Cavalry) आश्वं, आश्विकं, अश्वारूढाः *m. pl.*—(Support for towels, &c.) मार्जनपटाधारः, वरकाधारः; 'relating to a horse,' अश्वीयः -या -यं, आश्विकः -की -कं, आश्वः -श्वी -श्वं.—(A number of horses,' अश्वीयं, आश्वं.

To HORSE, *v. a.* अश्वम् आरुह् in caus. (-रोपयति-यितुं), अश्वारूढं-ढां-ढं कृ.

HORSE-BACK, *s.* अश्वपृष्ठं, ऊर्द्धस्थितिः *f.*: 'on horse-back,' अश्वपृष्ठे loc. c.; 'going on horse-back,' तुरङ्गयायी *m.* (न्).

HORSE-BEAN, *s.* क्षुद्रशिम्बिकभेदः, शिम्बा, मुद्गः, माषः.

HORSE-BOAT, *s.* अश्ववहनं, अश्ववहनयोग्या नौका.

HORSE-BREAKER, *s.* अश्वदमकः, अश्वविनेता *m.* (तृ), अश्वशिक्षकः, अश्वशिक्षाजीवी *m.* (न्).

HORSE-BREAKING, *s.* अश्वदमनं, अश्वशिक्षा, अश्वविनयः.

HORSE-CHESTNUT, *s.* (Tree) श्यामफलविशिष्टो वृक्षभेदः.

HORSE-CLOTH, *s.* अश्वास्तरणं, आस्तरः, अश्वपरिस्तोमः.

HORSE-COMB, *s.* अश्वमार्जनी, अश्वलोमशोधनी.

HORSE-DEALER, *s.* अश्वव्यापारी *m.* (न्), हयज्ञः, हेडावुक्कः, हेलावुक्कः. हयविद्याविशारदः.

HORSE-DRIVING, *s.* अश्वसारथ्यं, अश्वप्रेरणं, हयप्रेरणं.

HORSE-DUNG, *s.* अश्वशकृत् *n.*, अश्वपुरीषं, अश्वमलं, अश्वहवं.

HORSE-FACED, *a.* अश्वमुखः -खी -खं, अश्ववदनः -ना -नं, हयमुखः -खी -खं, तुरङ्गवक्त्रः -क्त्रा -क्त्रं, तुरङ्गाननः -ना -नं, तुरङ्गास्यः -स्या -स्यं.

HORSE-FLESH, *s.* अश्वमांसं, घोटकमांसं, तुरगमांसं.

HORSE-FLY, *s.* अश्वदंशकः, हयदंशी, अश्वमक्षिका.

HORSE-GUARDS, *s.* अश्वारूढसैनिकाः *m. pl.*, राजशरीररक्षकम् अश्वारूढसैन्यं.

HORSE-HAIR, *s.* अश्वलोम *n.* (न्), अश्वरोम *n.* (न्), अश्वबालः.

HORSE-LAUGH, *s.* अट्टहासः, अतिहासः, अतिहसितं, महाहासः, आच्छुरितं, सोत्प्रासः.

HORSE-LEECH, *s.* अश्वदंशका जलौका, अश्वरक्तपायिनी.—(Farrier) अश्वचिकित्सकः, अश्ववैद्यः.

HORSEMAN, *s.* अश्वारूढः, अश्वारोहः -ही *m.* (न्), हयारूढः, हयारोहः, सादी *m.* (न्), अश्वसादी *m.* (न्), तुरगी *m.* (न्), तुरङ्गी *m.* (न्), अश्ववहः, अश्वधारः, सायी *m.* (न्), हयविद्याविशारदः.

HORSEMANSHIP, *s.* अश्वविद्या, हयविद्या, अश्वारोहणविद्या, हयज्ञता, हयारोहः, अश्वहृदयं.

HORSE-MEAT, *s.* अश्वाहारः, अश्वभोजनं, अश्वखाद्यं, पशुखाद्यद्रव्यं.

HORSE-POND, *s.* अश्वतडागः, अश्वपुष्करिणी, अश्ववापी.

HORSE-RACE, *s.* अश्वचर्य्या, अश्वमार्गः, अश्वधावनं.

HORSE-RADISH, *s.* कुरुकन्दकः -कं, कन्दमूलभेदः.

HORSE-SHOE, *s.* अश्वखुरत्रं, अश्वखुरत्राणं, अश्वखुरबन्धनं, अश्वपादुका.

HORSE-STEALER, *s.* अश्वहारकः, वाजिहर्त्ता *m.* (र्तृ), अश्वमुक् *m.* (ष्).

HORSE-TRAPPINGS, *s.* आदानं, अश्वपरिस्तोमः, अश्वसज्जा, अश्वास्तरणं.

HORSE-WAY, *s.* अश्वपथः, अश्वमार्गः, अश्ववर्त्म *n.* (न्).

HORSE-WHIP, *s.* कशा, अश्वकशा, अश्वताडनी, अश्वप्रतोदः, प्रतिष्कशः, प्रतिष्कषः, चर्म्मदण्डः.

To HORSE-WHIP, *v. a.* कशया or चर्म्मदण्डेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्तुं), कशाघातं कृ.

HORTATION, *s.* उपदेशः, उपदेशवाक्यं, प्रबोधनं, प्रबोधवाक्यं, भर्त्सनं.

HORTATORY, *a.* उपदेशकः -का -कं, प्रबोधकः -का -कं, आदेशकः-का-कं.

HORTICULTURAL, *a.* उद्यानविद्यासम्बन्धी-न्धिनी-न्धि(न्), उद्यानविषयः-या-यं.

HORTICULTURE, *s.* उद्यानविद्या, उद्यानकर्षणविद्या, उद्यानकर्षणं, उद्यानकरणविद्या, उद्यानकरणं, उद्यानकृषिकर्म्म *n.* (न्), पुष्पफलोत्पत्तिकर्म्म *n.* (न्).

HORTICULTURIST, *s.* उद्यानविद्याज्ञः, उद्यानकर्षकः, उद्यानकर्षणाजीवी *m.* (न्

HORTULAN, *a.* उद्यानसम्बन्धी -न्धिनी -न्धि (न्).

HORTUS SICCUS, *s.* शुष्कोद्यानं, शुष्कौषधिपुस्तकं, शुष्कौषधिसङ्ग्रहः, शुष्कतृणादिसङ्ग्रहः, शुष्कौषधयः *f. pl.*

HOSE, *s.* ऊर्णामयं पादत्राणं, और्णपादत्रं, पादरक्षणं, जङ्घापरिधानं.

HOSIER, *s.* पूर्व्वोक्तपादत्रविक्रेता *m.* (तृ), और्णपादत्रविक्रयी *m.* (न्).

HOSPITABLE, *a.* आतिथ्यः -थ्या -थ्यं, आतिथेयः -यी -यं, अतिथिसेवक -का -कं, अतिथिपूजकः -का -कं, आतिथ्यकारी -रिणी -रि (न्), प्रियातिथिः -थिः -थि, वत्सलातिथिः -थिः -थि, सत्कारशीलः -ला -लं.

HOSPITABLY, *adv.* आतिथ्यपूर्व्वं, सातिथ्यं, सत्कारेण, सत्कारपूर्व्वं, आतिथेयं 'to receive hospitably,' सत्कृ, आतिथ्यं कृ.

HOSPITAL, *s.* आरोग्यशाला, चिकित्साशाला, चिकित्सागारं, रोगप्रतीकारशाला, रोगोपचारशाला, रोगार्त्तलोकपोषणस्थानं, दरिद्रलोकानरोगचिकित्सनशाला, धर्म्मशाला.

HOSPITALITY, *s.* आतिथ्यं, अतिथित्वं, अतिथिक्रिया, आतिथ्यकर्म्म *n.* (न् अतिथिसत्कारः, अतिथिसत्क्रिया. सत्कारः, सत्क्रिया, सत्कर्म्म *n.* (न सत्कृतिः *f.*, सत्कृतं, अतिथिसेवा, अतिथिपूजनं, मनुष्ययज्ञः, नृयज्ञः.

HOST, *s.* (Entertainer) सत्कारी *m.* (न्), सत्कर्त्ता *m.*, आमन्त्रयिता *m.* (तृ), निमन्त्रणकर्त्ता *m.*, निमन्त्रकः, भोजनदाता *m.* (तृ), आतिथ्यकर्त्ता *m.* —(Army) चमूः *f.*, सेना, अनीकं, वाहिनी, अनीकिनी, वरूथिनी योधसमूहः.—(A great number) समूहः, सङ्घः, सङ्घातः, गणः, कुलं समवायः, समुदायः, निवहः, निकायः; 'a host of persons,' जनसमूहः लोकसङ्घः, जनौघः; 'a host of enemies,' शत्रुनिकायः; 'a host of excellencies,' गुणग्रामः.

To HOST, *v. n.* (Lodge) वस् (c. 1. वसति, वस्तुं), निवस्, अतिथिरूपेण or वस्.—(Encounter in battle) युद्धे समागम् (c. 1. -गच्छति -गन्तुं) or सङ्गम्.

HOSTAGE, *s.* शरीरबन्धकः, बन्धकः, सन्धिनियमस्योपरि विश्वासार्थं त्यक्तः शरीरबन्धकः.

HOSTEL, HOSTELRY, *s.* उत्तरणस्थानं, उत्तरणगृहं, उपकारी -रिका.

HOSTESS, *s.* आतिथ्यकारिणी, सत्कारिणी, निमन्त्रणकारिणी, भोजनदात्री

HOSTILE, *a.* वैरी -रिणी -रि (न्), विरुद्धः -द्धा -द्धं, विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, प्रतिकूलः -ला -लं, विपरीतः -ता -तं, अहितः -ता -तं, अहितकारी -रिणी -रि (न्), प्रातिपक्षः -क्षी -क्षं, विद्वेषी -षिणी -षि (न्), द्वेषी &c., द्वेषणः -णा -णं, विद्विषः -षा -षं, शात्रवीयः -या -यं, द्रोहवृत्तिः -त्तिः -त्ति, अपकारी -रिणी -रि (न्), प्रतिरोधी -धिनी -धि (न्), पर्य्यवस्थाता -त्री -तृ (तृ), सवैरः -रा -रं; 'a hostile invasion,' शत्रुविग्रहः; 'to be hostile,' विपक्षीभू, प्रतिकूल (nom. प्रतिकूलयति -यितुं), विरुध् (c. 7. -रुणद्धि -रोद्धुं), वैर (nom. वैरायते), शत्रु (nom. शत्रूयति), द्विष् (c. 2. द्वेष्टि -ष्टुं), विद्विष्, पर्य्यवस्था (c. 1 -तिष्ठति -स्थातुं).

HOSTILELY, *adv.* शत्रुवत्, रिपुवत्, विरोधेन, विरुद्धं, विपरीतं, विपक्षवत्

HOSTILITY, *s.* वैरिता, वैरभावः, वैरं, शत्रुता, रिपुता, विपक्षता, विरोधः विरुद्धता, विद्वेषः, द्वेषः, शात्रवं, अरिता, प्रतिपक्षता, विद्विष्टता अप्रीतिः *f.*, प्रतिद्वन्द्वं, परता -त्वं; 'natural hostility,' जातिवैरं.—(War, state of war) युद्धं, युद्धभावः, युद्धावस्था, विग्रहः, संग्रामः.

HOSTLER, *s.* अश्वपालः -लकः, अश्वरक्षकः, उत्तरणस्थाने अभ्यागतान् अश्वान् पालयति यो जनः.

HOT, *a.* (Contrary to cold) उष्णः -ष्णा -ष्णं, तप्तः -प्ता -प्तं, चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, सन्तप्तः -प्ता -प्तं, उपतप्तः -प्ता -प्तं, तापी -पिनी -पि (न्), कोष्णः -ष्णा -ष्णं, सोष्णः -ष्णा -ष्णं, सोष्म

-ष्णा -ष्ण (न्), नैदाघः -घी -घं, अशिशिरः -रा -रं, अशीतः -ता -तं, तिग्मः -ग्मा -ग्मं, तीव्रः -व्रा -व्रं, तीक्ष्णः -क्ष्णा -क्ष्णं, खरः -रा -रं, ग्रीष्मः -ष्मा -ष्मं, घर्म्म in comp.; 'hot season, hot weather,' उष्णकालः, उष्णसमयः, ग्रीष्मः, ग्रीष्मकालः, निदाघः, निदाघकालः, उष्णागमः; 'hot water,' उष्णोदकं, घर्म्मोदकं, घर्म्माम्बु *n*.—(Hot to the taste) तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, खरः -रा -रं, कटुः -टुः -टु, उग्रः -ग्रा -ग्रं.—(Passionate) चण्डः -ण्डा -ण्डं, चण्डवान् -वती -वत् (त्), तीक्ष्णः -क्ष्णा -क्ष्णं, तिग्मः -ग्मा -ग्मं, उग्रः -ग्रा -ग्रं, शीघ्रकोपी -पिनी -पि (न्), रागी -गिणी -गि (न्), उष्णः -ष्णा -ष्णं.—(Impetuous) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), संरम्भी -म्भिणी -म्भि (न्), उत्तप्तः -प्ता -प्तं; 'to make hot,' तप् (c. 10. तापयति -यितुं); 'to be hot,' उष्णीभू, उष्म (nom. उष्मायते).

Hotbed, *s.* गोहयशकृदादिप्रक्षेपेण तप्तीकृतम् उद्यानस्थलं, उष्णस्थलं.

Hotch-potch, *s.* नानाखाद्यद्रव्यसंयोगः, नानाशाकादिसम्मिश्रणं, सन्निपातः, प्रकीर्णकं.

Hotel, *s.* उत्तरणशाला, उत्तरणगृहं, उत्तरणस्थानं, उपकारी -रिका, उपकार्य्या, सौपकार्य्यं, प्रवासीयगृहं.

Hot-headed, *a.* साहसिकः -की -कं, साहसी -सिनी -सि (न्), उच्चण्डः -ण्डा -ण्डं, उत्तप्तः -प्ता -प्तं, संरम्भी -म्भिणी -म्भि (न्), शीघ्रकोपी -पिनी -पि (न्), तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्); 'hot-headed zeal,' उत्तापः.

Hot-house, *s.* उद्याने विदेशीयवृक्षरक्षणार्थं काचाच्छादितं तप्तगृहं or उष्णगृहं.

Hotly, *adv.* तीक्ष्णं, तीव्रं, तिग्मं, सतैक्ष्ण्यं, चण्डं, प्रचण्डं, उच्चण्डं, उग्रं, उग्रतया, उत्तापेन, सौष्म्यं, उत्तप्तं, उष्णं.

Hot-mouthed, *a.* तीक्ष्णवादी -दिनी -दि (न्), उग्रमुखः -खी -खं, दुर्मुखः -खी -खं.

Hotness, *s.* उष्णता, औष्ण्यं, तापः, तप्तत्वं, चण्डता, प्रचण्डता, अशिशिरता, तिग्मता, तैग्म्यं, तीक्ष्णता, निदाघः.—(To the taste) तिग्मता, तीक्ष्णता, तीव्रता, कटुता, उग्रता -त्वं.—(Ardor, vehemence) उत्तापः, उच्चण्डता, व्यग्रता, तीक्ष्णता, उष्मः, संरम्भः.—(Of temper) चण्डता, शीघ्रकोपित्वं.

Hotspur, *s.* साहसिकजनः, तीक्ष्णस्वभावो जनः, संरम्भी *m.* (न्).

Hovel, *s.* कुटीरः, कुटेरः, कुटी, तृणकुटी, उटजः, मण्डपः, गोष्ठं.

To hovel, *v. a.* कुटीरे वस् (c. 1. वसति, वस्तुं) or निवस्, कुटीरम् अधिवस्.

Hoven, *a.* उच्छूनः -ना -नं, प्रस्फुरितः -ता -तं, उत्थितः -ता -तं.

To hover, *v. n.* विहायसा or व्योममध्ये वृत् (c. 1. वर्त्तते -र्त्तितुं) or व्यावृत्, आकाशमध्ये मस्तकोपरि वृत्, प्रडीनम् अकृत्वा अर्द्धवियति विसृप् (c. 1. -सर्पति -सृप्तुं) or विचल् (c. 1. -चलति -लितुं), व्योममध्ये पक्षास्फालनं कृत्वा निश्चलो वृत्.—(Hesitate, waver) विलम्ब् (c. 1. -लम्बते -म्बितुं), दोल (nom. दोलायते), आन्दोल (nom. आन्दोलयति -यितुं), विकॢप् (c. 1. -कल्पते -ल्पितुं), विचर् (c. 10. -चारयति -यितुं), विशङ्क् (c. 1. -शङ्कते -ङ्कितुं).

Hough, *s.* जङ्घास्थिशिरा, जङ्घास्थिस्नायुः *m.* जङ्घासन्धिबन्धनं.

To hough, *v. a.* जङ्घास्थिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं).

Hound, *s.* मृगयाकुक्कुरः, मृगव्यकुक्कुरः, मृगयार्थं कुक्कुरः, आखेटकार्थं श्वा *m.* (न्), आखेटिकः, मृगारिः *m.*, मृगदंशकः, वृकारिः *m.*, विश्वकद्रुः *m.*

To hound, *v. a.* मृगव्यकुक्कुरैर् अनुसृ (c. 1. -सरति -सर्त्तुं).

Hour, *s.* घटिका, होरा, कोरली, दिवसस्य चतुर्विंशभागः or चतुर्विंशतितमांशः, दिनांशः; 'an hour of forty eight minutes,' मुहूर्त्तः -र्त्तं; 'a space of twenty-four minutes,' दण्डः; 'half-an-hour,' अर्द्धघटिका; 'an hour and a half,' अर्द्धयामः.

Hour-glass, *s.* यामनाली, वालुकायन्त्रं, कालपरिमापकयन्त्रं.

Houri, *s.* दिव्याङ्गना, दिव्यकन्या, देवकन्या, स्वर्गकन्या, स्वर्वेश्या.

Hourly, *adv.* प्रतिमुहूर्त्तं, मुहूर्त्ते मुहूर्त्ते, दण्डे दण्डे, प्रतिदण्डं.

Hour-plate, *s.* मुहूर्त्तदण्डादिपरिमापकं मण्डलं, यामघोषा, घटीमुखं.

House, *s.* गृहं, गेहं -हः, वेश्म *n.* (न्), भवनं, आलयः, निलयः, आयतनं, निकेतः -तनं -तकं, निवेशनं, सदनं, मन्दिरं, वासः, संवासः, वासस्थानं, आगारः -रं, अगारः -रं, निवासः, निवासस्थानं, निवसतिः *f.*, वसतिः, समावासः, आवसथः, निकाय्यः, अवस्थानं, वस्त्यं, उदवसितं, वास्तुः *m.* ओकस् *n.*, धाम *n.* (न्), छाद्वरः, निशान्तं, कुटः -टी, शाला, सभा, स्थानं; 'house and land,' गृहक्षेत्रादि; 'a number of houses,' सद्मचितिः *f.*; 'house of confinement,' बन्धनगृहं, बन्धनागारं, बन्धनालयः; 'confined to the house,' गृहानुबद्धः -द्धा -द्धं.—(Family, race) कुलं, वंशः, कुटुम्बः, जातिः *f.*—(Family, household) गृहजनः, परिजनः, परिवारः, स्वजनः, कुटुम्बकं, स्त्रीपुत्रकन्यादि.

To house, *v. a.* गृहे निविश् (c. 10. -वेशयति -यितुं), गृहं प्रविश् (c. 10. -वेशयति -यितुं), वेश्मनि वस् (c. 10. वासयति -यितुं), आश्रयं दा, वासस्थानं दा.

House-breaker, *s.* गृहभेदकः, आगारभेदकः, भित्तिचौरः, सन्धिचौरः, सन्धिचौरः, काष्ठचौरः, कुड्यच्छेदी, कपाटघ्नः, खनिलः, कुजम्भलः -म्भिलः.

House-builder, *s.* गृहकारकः, गृहकारी *m.* (न्), गृहकर्म्मी *m.* (न्), गृहनिर्माता *m.* (तृ).

House-burner, *s.* गृहदाहकः, आगारदाहकः, गृहदाहनकृत *m.*

House-burning, *s.* गृहदाहः -हनं, गृहदहनं, गृहप्लोषः, आगारदाहः.

Housedog, *s.* गृहकुक्कुरः, गृहरक्षकः श्वा *m.* (न्).

Housedoor, *s.* गृहद्वारं, गेहद्वारं.

Household, *s.* गृहजनः, परिजनः, गृहपरिजनः, गृहपरिवारः, स्वजनः, परिवारः, अभिजनः, कुटुम्बकं.

Household, *a.* गृह्यः -ह्या -ह्यं, गृहसम्बन्धी -न्धिनी -न्धि (न्), आवसथिकः -की -कं or expressed by गृह in comp., as 'household affairs,' गृहकार्य्यं, गृहकरणं, गृहव्यापारः; 'household utensils' [illegible]; 'household gods,' गृह्या देवताः *f. pl.*, कुलदेवताः *f. pl.*; 'household [illegible]

Householder, *s.* गृहस्थः, गृहस्वामी [illegible] (न्), गृहपतिः *m.*, गृहाधिकारी *m.* [illegible] *m.* (न्), गेही *m.* (न्), कुटुम्बी *m.* (न्), कौटुम्बिकः, गृहमेधी *m.* (न्), स्नातकः, ज्येष्ठाश्रमी *m.* (न्).

Household-stuff, *s.* गृहोपस्करः, गृहोपकरणं, गृहसामग्री -ग्र्यं.

Housekeeper, *s.* (Householder) गृही *m.* (न्), गेही *m.* (न्), गृहस्वामी *m.* (न्), गृहाधिकारी *m.* (न्), कुटुम्बी *m.* (न्).—(A woman who has the care of a family) गृहिणी, गेहिनी, कुटुम्बिनी, गृहमेधिनी.

Housekeeping, *s.* गृहव्यापारः, गृहकार्य्यं, गृहकरणं, गृहकर्म्म *n.* (न्), गार्हस्थ्यं, गृहस्थता.

Houseleek, *s.* कुतृणं, गृहभित्तिरुह ओषधिभेदः.

Houseless, *a.* गृहहीनः -ना -नं, गृहशून्यः -न्या -न्यं, निरालयः -या -यं, अनिकेतनः -ना -नं, अकेतनः -ना -नं, अलयः -या -यं, निराश्रयः -या -यं, अशरणः -णा -णं, निर्वासः -सा -सं.

Housemaid, *s.* गृहदासी, गृहपरिष्कारिणी, गृहमार्जनी, दासी.

House-room, *s.* गृहावस्थानं, वासस्थानं, निवासस्थानं, आवासः, वासः.

House-top, *s.* गृहपृष्ठं, गृहाग्रं, गृहशिखरं, गृहशृङ्गं.

House-warming, *s.* गृहप्रवेशः, नवगृहप्रवेशकाले उत्सवः, वास्तुप्रवेशः, वास्तुसंशमनं -नीयं.

Housewife, *s.* गृहमेधिनी, गृहव्यापारकुशला, गृहकार्य्यदक्षा, गृहकर्म्मनिपुणा, गृहिणी, गेहिनी.

Housewifery, *s.* गृहव्यापारकुशलता, गृहकार्य्यदक्षता, गृहकर्म्मनिपुणता, गृहमेधित्वं, परिमितव्ययः.

Housing, *s.* (House-room) वासस्थानं, निवासस्थानं.—(Of a horse or elephant) आस्तर: -रणं, परिस्तोम:, वर्ण:, आदानं.

How, *adv.* कथं, किं, केन प्रकारेण, केन रूपेण, किमु, कुतस्, किमुत; 'how much, how many, how little, how long, &c.,' कियान् -यती -यत् (त्) or कियत् indec., कति: -ति: -ति or कति in comp.; as, 'how long?' कियत्कालं, कियन्तं कालं, कियता कालेन, कतिकालं; 'how long!' कियच्चिरं; 'how many sorts?' कतिविध: -धा -धं; 'how many times?' कतिकृत्वस्; 'for how much?' कियता मूल्येन; 'how far?' कियत्पर्य्यन्तं, किम्पर्य्यन्तं, कियदवधि; 'how much more,' किम्पुनर्, किमुत, किमु, किम्, कुतःपुनर्; 'how much less,' किमुत, किमु; 'how so?' किमिति, किमिव; 'how else,' अथकिम्; 'how wonderful,' किमाश्चर्यं; 'how do you do?' किं क्षेमम् अस्ति भवत:, किं कुशलम् अस्ति भवत:, कीदृशी स्थितिर् भवत:; 'how are we to act?' किम् अस्माभि: करणीयं; 'he knows not how to act,' यथाकार्य्यं न जानाति; 'how great is that darkness!' सोऽन्धकार: कियान् महान्; 'any how,' यथाकथञ्चित्, यथातथा, कथञ्चन, कथञ्चित्.

Howbeit, *adv.* तथापि, तथैव, तथाच, किञ्च, अपि, अपितु, किन्तु.

Howdah, *s.* (On the back of an elephant) वरण्डक:.

However, *adv.* तथापि, किञ्च, अपितु, किन्तु, तु, परन्तु, पुनर्; 'in whatever manner,' यत्प्रकारेण.

Howitzer, *s.* अन्तरग्निबलेन लोहगुलिकाप्रक्षेपकं युद्धयन्त्रं.

To howl, *v. n.* रु (c. 2. रौति, रवितुं), विरु, दीर्घरावं कृ, दीर्घरुतं कृ, गर्ज् (c. 1. गर्जति -र्जितुं), भष् (c. 1. भषति -षितुं), रै (c. 1. रायति रातुं), रस् (c. 1. रसति -सितुं), रट् (c. 1. रटति -टितुं), वाश् (c. 1. वाशते -शितुं).

Howl, howling, *s.* राव:, रुतं, दीर्घरावं, दीर्घरुतं, गर्जनं, रायणं, भाष:, भषणं, उक्कनं, वाशितं, मुखघण्टा; 'making a howling,' दीर्घराव: -वी -वं.

Howsoever, *adv.* यत्प्रकारेण, येन प्रकारेण, यथा यथा, यथातथा, तथापि

To hox, *v. a.* जङ्घास्थिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं).

Hoy, *s.* वृहन्नौकाविशेष:, विशालनौका.

Hubbub, *s.* कोलाहल:, कलकल:, कलरव:, रास:, हलहलाशब्द:, कालकोल:, तुमुलं, विप्लव:, कलह:.

Huckaback, *s.* नानारेखाङ्कित: क्षौमपटविशेष:.

Hucklebacked, *a.* न्युब्ज: -ब्जा -ब्जं, कुब्ज: -ब्जा -ब्जं, वक्रकन्धर: -रा -रं

Hucklebone, *s.* कट्यस्थि *n.*, कटास्थि *n.*, श्रोण्यस्थि *n.*, जघनास्थि.

Huckster, *s.* क्षुद्रवाणिज्यकारी *m.* (न्), तुच्छवाणिज्यकृत्, कुत्सितवणिक् *m.* (ज्).

To huckster, *v. n.* तुच्छवाणिज्यं कृ, तुच्छप्रकारेण or नीचप्रकारेण or कुत्सितप्रकारेण वाणिज्यं कृ.

To huddle, *v. a.* सम्मिश्रीकृ, अस्तव्यस्तीकृ, सङ्कुलीकृ, सङ्करीकृ, सम्मिश्र् (c. 10. -मिश्रयति -यितुं), सबाध् (c. 1. -बाधते -धितुं), अधरोत्तरीकृ, संक्षुभ्.

To huddle, *v. n.* सम्मिश्रीभू, सङ्कुलीभू, सङ्कीर्णीभू, सङ्करीभू, अस्तव्यस्तीभू, अधरोत्तरीभू, सबाधीभू.

Huddle, *s.* अस्तव्यस्तता -त्वं, अधरोत्तरं, सङ्कर:, साङ्कर्य्यं, सङ्क्षोभ:.

Hue, *s.* (Dye, colour) वर्ण:, राग:, रङ्ग:, छाया, छवि: *f.*—(Hue and cry) जनरव:, बहुभि: कृता संहूति:, जनघोषणा.

Huff, *s.* (Anger) क्रोधावेश:, क्रोध:, कोप:, रोष:, संरम्भ:.—(Arrogance) दर्प:, दर्पावेश:, औद्धत्यं.—(One inflated with arrogance) दर्पाध्मात:, अतिगर्व्वित:, उद्धत:.

To huff, *v. a.* रुष् (c. 10. रोषयति -यितुं), कुप् (c. 10. कोपयति -यितुं).

To huff, *v. n.* दृप् (c. 4. दृप्यति, द्रप्तुं), धृष् (c. 5. धृष्णोति, धर्षितुं), दर्पाध्मात: -ता -तं भू, भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), विकत्थ् (c. 1. -कत्थते -त्थितुं).

Huffer, *s.* दाम्भिक:, भर्त्सनकार:, विकत्थी *m.* (न्), धर्षी *m.* (न्), शूरम्मन्य:.

Huffish, *a.* (Angry) क्रोधाविष्ट: -ष्टा -ष्टं, कोपी -पिनी -पि (न्), सरोष: -षा -षं, सकोप: -पा -पं.—(Arrogant) दृप्त: -प्ता -प्तं, गर्व्वी -र्व्विणी -र्व्वि (न्), उद्धत: -ता -तं, धर्षी -र्षिणी -र्षि (न्), आत्मश्लाघी -घिनी -घि (न्).

Huffishly, *adv.* सकोपं, सरोषं, सदर्पं, धृष्टवत्, गर्व्वितवत्.

Huffishness, *s.* सकोपत्वं, सरोषत्वं, क्रोधाविष्टता, गर्व्वित्वं, अहङ्कार:.

To hug, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, आश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), संश्लिष्, समाश्लिष्, परिष्वञ्ज् (c. 1. ष्वजते -ष्वंक्तुं), परिरभ् (c. 1. -रभते -रब्धुं), बाहुभ्यां पीड् (c. 10. पीडयति -यितुं) or परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

Hug, *s.* आलिङ्गनं -ङ्गितं, आश्लेष:, परिष्वङ्ग:, बाहूपपीड:, अङ्कपाली.

Hugged, *p. p.* आलिङ्गित: -ता -तं, आश्लिष्ट: -ष्टा -ष्टं, पीडित: -ता -तं.

Huge, *a.* वृहन् -हती -हत् (त्), अतिवृहन् &c., सुवृहन् &c., महान् -हती -हत् (त्), अतिमहान् &c., सुमहान् &c., स्थूल: -ला -लं, अतिविशाल: -ला -लं, वृहत्परिमाण: -णा -णं, अपरिमित: -ता -तं, वरीयान् -यसी -य: (स्), वरिष्ठ: -ष्ठा -ष्ठं, गरिष्ठ: -ष्ठा -ष्ठं.—(In body) महाकाय: -या -यं, अतिकाय: -या -यं, वृहत्काय: -या -यं, वृहच्छरीर: -रा -रं.

Hugely, *adv.* सुमहत्, अतिमहत्, सुवृहत्, अत्यन्तं, अतिमात्रं, अपरिमितं.

Hugeness, *s.* सुवृहत्त्वं, वृहत्त्वं, महत्त्वं, सुमहत्त्वं, अतिमहत्त्वं, स्थूलता, अतिविशालता, अपरिमितत्वं, सुविपुलता, कायवृहत्त्वं, वृहत्कायत्वं.

Hugger-mugger, *s.* रहस् *n.*, गूढता, प्रच्छन्नता; 'in huggermugger,' रहसि, रहस्यं, निभृतं, प्रच्छन्नं, गुप्तं, उपांशु.

Hulk, *s.* जीर्णनौका, गुणकूपकादिरहिता नौका, रज्जुकूपकादिहीनो नौकाया: स्थूलभाग:.

Hull, *s.* (Integument) कञ्चुक:, आवेष्टनं, परिवेष्टनं, कोश:, कोष:, पुट:, त्वक् *f.* (च्).—(Of a ship) गुणकूपकादिभिन्नो नौकाभाग:, नौकाया: स्थूलभाग: or काय:.

Hully, *a.* कोशवान् -वती -वत् (त्), तुषवान् &c., त्वग्युक्त: -क्ता -क्तं.

To hum, *v. n.* गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), रु (c. 2. रौति, रवितुं), विरु, रणरणं कृ; 'to hum and haw,' भिन्नस्वरेण or स्खलितवाचा वद् (c. 1. वदति -दितुं).

Hum! *interj.* हुम्, हूम्, आ, आम्, हा, अहो, अहोवत्, तावत्, किं.

Hum, *s.* (Buzzing sound) कल:, कलरव:, कलकल:, कलस्वर:, रुतं, विरुतं, राव:, विराव:, गुञ्जनं, गुञ्जितं, मर्मर:, झङ्कार:, रणत्कार:; 'of bees,' अलिविराव:, अलिविरुतं.

Human, *a.* मानुष: -षी -षं -षिक: -की -कं, मानवीन: -ना -नं, मानवीय: -या -यं, पौरुष: -षी -षं, पौरुषेय: -यी -यं, जनकीय: -या -यं, नार: -री -रं, मनुष्यजातीय: -या -यं, लौकिक: -की -कं; 'human nature,' पुरुषत्वं -ता, मनुष्यत्वं -ता, मानुष्यं, मानुषत्वं; 'human race,' मनुष्यजाति: *f.*, मनुष्यवर्ग:, नृजाति: *f.*; 'human form,' नररूपं; 'human art,' मनुष्यकला; 'a human brute,' पुरुषपशु: *m.*

Humane, *a.* परोपकारशील: -ला -लं, परोपकारी -रिणी -रि (न्), परहितैषी -षिणी -षि (न्), परहित: -ता -तं, परहितकाम: -मा -मं, उपकारपर: -रा -रं, दयालु: -लु: -लु, कृपालु: -लु: -लु, कारुणिक: -की -कं, सकरुण: -णा -णं, दयाशील: -ला -लं, करुणाशील: -ला -लं, करुणात्मा -त्मा -त्म (न्), करुणार्द्र: -र्द्रा -र्द्रं, अनुकम्पी -म्पिनी -म्पि (न्), सानुकम्प: -म्पा -म्पं, सर्व्वभूतानुकम्पक: -का -कं, आपन्नरक्षणशील: -ला -लं, दया-

वान् -वती -वत् (त्), सुहृदयः -या -यं, सुशीलः -ला -लं, दीनानुकम्पनः -ना -नं, सदयः -या -यं, सानुक्रोशः -शा -शं, क्षमावान् -वती -वत् (त्), अनृशंसः -सा -सं, करुणावेदी -दिनी -दि (न्).

HUMANELY, *adv.* सकरुणं, सकारुण्यं, सानुकम्पं, सदयं, दयाशीलत्वात्, सुशीलवत्, परहितेच्छया.

HUMANIST, *s.* शास्त्रज्ञः, शास्त्रव्युत्पन्नः, शब्दशास्त्रविद् *m.*, विद्वज्जनः.

HUMANITY, *s.* (Benevolence, compassion) दया, दयाशीलता, दयालुता, कारुण्यं, करुणा, करुणाशीलत्वं, अनुकम्पा, कृपा, परहितेच्छा, परोपकारशीलता, हितकाम्या, उपकारपरता, करुणार्द्रता, सानुकम्पता, आपन्नरक्षणं.—(Nature of man) पुरुषता -त्वं, मानुषता, मनुष्यता -त्वं, मानुष्यं, मानवत्वं, मानव्यं.

To HUMANIZE, *v. a.* शिष्टाचारान् or आर्य्यव्यवहारान् शिक्ष् (c. 10. शिक्षयति -यितुं) or शास् (c. 2. शास्ति, शासितुं), शिष्टीकृ, सुशीलीकृ, विनीतं -तां -तं कृ, सभ्यं -भ्यां -भ्यं कृ.

HUMANKIND, *s.* मनुष्यजातिः *f.*, नृजातिः *f.*, मनुष्यवर्गः, पुरुषवर्गः.

HUMANLY, *adv.* पुरुषवत्, मनुष्यवत्, नरवत्, मानुषवत्, मानुषप्रकारेण.

HUMBIRD or HUMMING BIRD, *s.* कलरवकारी नानावर्णो सूक्ष्मपक्षिभेदः.

HUMBLE, *a.* नम्रबुद्धिः -द्धिः -द्धि, नम्रचेताः -ताः -तः (स्), नम्रः -म्रा -म्रं, विनम्रः -म्रा -म्रं, नम्रशीलः -ला -लं, विनतचेताः &c., विनतः -ता -तं, विनयी -यिनी -यि (न्), विनीतः -ता -तं, सविनयः -या -यं, निर्विणः -णा -णं, निर्विणचेताः &c., अगर्व्वः -र्व्वा -र्व्वं, गर्व्वहीनः -ना -नं, दर्पहीनः -ना -नं, दर्परहितः -ता -तं, दम्भरहितः -ता -तं, वीतदम्भः -म्भा -म्भं, निरहङ्कारः -रा -रं, अनहङ्कारी -रिणी -रि (न्), अनहङ्कृतः -ता -तं, निरहङ्कारी &c., निरभिमानः -ना -नं, अभिमानहीनः -ना -नं, अभिमानशून्यः -न्या -न्यं, अनभिमानी -निनी -नि (न्), अनुद्धतः -ता -तं, वश्यात्मा -त्मा -त्म (न्).—(Low) अपकृष्टः -ष्टा -ष्टं, नीचः -चा -चं, अधमः -मा -मं, प्राकृतः -ती -तं, कृपणः -णा -णं.

To HUMBLE, *v. a.* अपकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं), नम् (c. 10. नमयति -यितुं), अवनम्, नम्रीकृ, पत् (c. 10. -पातयति -यितुं), भंश् (c. 10. भंशयति -यितुं), अभिभू (c. 1. -भवति -वितुं), तिरोभू (c. 10. -भावयति -यितुं), दर्पं or गर्व्वं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or हृ (c. 1. हरति, हर्तुं).

HUMBLE-BEE, *s.* गुञ्जकृत् *m.*, ध्वनमोदी *m.* (न्), भृङ्गराजः, भ्रमरः.

HUMBLED, *p. p.* भग्नदर्पः -र्पा -र्पं, आत्तगर्व्वः -र्व्वा -र्व्वं, हृतगर्व्वः -र्व्वा -र्व्वं, अभिभूतः -ता -तं, पराभूतः -ता -तं, पातितः -ता -तं, लघूकृतः -ता -तं, आनतः -ता -तं.

HUMBLENESS, *s.* बुद्धिनम्रता, नम्रता, विनम्रता, नम्रशीलता, विनयः, विनीतिः *f.*, विनतिः *f.*, वश्यता, अनहङ्कारः, अगर्व्वः, गर्व्वहीनता, दर्पहीनता, अनभिमानता, अपकृष्टता.

HUMBLING, *s.* अभिभवः, अभिभूतिः *f.*, अपकर्षः -र्षणं, दर्पभङ्गः, मानभङ्गः, दर्पहरणं, नम्रीकरणं.

HUMBLING, *a.* दर्पहः -हा -हं, दर्पहरः -रा -रं, मानहरः -रा -रं.

HUMBLY, *adv.* सविनयं, नम्रचेतसा, नम्रं, विनम्रं, दर्पं विना, गर्व्वं विना, अगर्व्वेण, निरभिमानेन, अहङ्कारं विना, सनिर्वेदं, निर्विणं, अनुद्धतं, कृपणं.

HUMBUG, *s.* प्रतारणं -णा, कपटः -टं, व्याजः, प्रवञ्चना, छलं, कैतवं.

To HUMBUG, *v. a.* प्रतॄ (c. 10. -तारयति -यितुं), छल् (c. 10. छलयति -यितुं), मुह् (c. 10. मोहयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), अभिसन्धा (c. 3. -दधाति -धातुं).

HUM-DRUM, *a.* मन्दः -न्दा -न्दं, विरसः -सा -सं, अरसिकः -का -कं, मन्थुः -न्थुः -न्थु, कष्टकरः -रा -रं, जडः -डा -डं.

HUMECTATION, *s.* क्लेदनं, आर्द्रीकरणं, आप्लावनं, तेमनं, समुन्दनं.

To HUMECTATE, *v. a.* क्लिद् (c. 10. क्लेदयति -यितुं), आप्लु (c. 10. -प्लावयति -यितुं), आर्द्रीकृ, उन्द् (c. 7. उनत्ति, उन्दितुं), समुन्द्, सरसीकृ.

HUMERUS, *s.* प्रगण्डः.

HUMID, *a.* आर्द्रः -र्द्रा -र्द्रं, सार्द्रः -र्द्रा -र्द्रं, तिमितः -ता -तं, स्तिमितः -ता -तं, सरसः -सा -सं, क्लिन्नः -न्ना -न्नं, उन्नः -न्ना -न्नं, समुन्नः -न्ना -न्नं, वोदः -दा -दं.

HUMIDITY, *s.* आर्द्रता, सार्द्रता, क्लेदः, संक्लेदः, क्लिन्नता, सरसता, तेमः, स्तेमः, तेमनं, समुन्दनं, समुन्नता.

HUMILIATING, *a.* दर्पहः -हा -हं, दर्पहरः -रा -रं, मानहरः -रा -रं.

HUMILIATION, *s.* मानभङ्गः, मानहानिः *f.*, दर्पभङ्गः, दर्पहरणं, अपकर्षः -र्षणं, अभिभवः, अभिभूतिः *f.*, नम्रता, नम्रीकरणं, विनतिः *f.*, हानिः *f.*, नियमनं, दमनं.

HUMILITY, *s.* विनयः, विनीतिः *f.*, विनतिः *f.*, नम्रता, विनम्रता, नम्रशीलता, बुद्धिनम्रता, अनहङ्कारः, अगर्व्वः, गर्व्वहीनता, दर्पहीनता, अनभिमानं, वश्यता, दैन्यं, दीनता, निर्वेदः, निर्विणता, अनौद्धत्यं, आनतिः *f.*, सन्नतिः *f.*, अपकृष्टता, कृपणता, कार्पण्यं.

HUMORIST, *s.* परिहासवेदी *m.* (न्), परिहासशीलः, रसिकः, रसज्ञः, वैहासिकः, हासकरः, विदूषकः, भण्डः, नर्म्मसचिवः, रागी *m.* (न्).

HUMOROUS, *a.* रसिकः -का -कं, रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), सरसः -सा -सं, परिहासशीलः -ला -लं, हासकरः -री -रं, हासजनकः -का -कं, हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, प्रहासी -सिनी -सि (न्), विनोदी -दिनी -दि (न्), कौतुकी -किनी -कि (न्).

HUMOROUSLY, *adv.* सरसं, रसिकप्रकारेण, हास्यप्रकारेण, रसिकं, हास्यं, विनोदार्थं, परिहासपूर्व्वं.

HUMOROUSNESS, *s.* रसिकत्वं, रसवत्त्वं, सरसत्वं, परिहासशीलता, हास्यता, उपहास्यता, हासजनकता, विनोदकत्वं.

HUMOURSOME, *s.* (Peevish) वक्रभावः -वा -वं, वक्रशीलः -ला -लं.—(Full of whims) चपलप्रकृतिः -तिः -ति, चपलभावः -वा -वं, चलचित्तः -त्ता -त्तं, छन्दोवान् -वती -वत् (त्), नैकभावाश्रयः -या -यं.

HUMOUR, *s.* (Moisture) क्लेदः, [illegible] संक्लेदः, स्तेमः, तेमः, जलावसेकः, चिक्लिदं, समुन्दनं, [illegible].—(Fluid) रसः, जलं; 'of the body,' धातुः *m.*; 'disorder of the humours,' दोषः; 'vitiation of the three humours,' दोषत्रयं.—(Temper of mind) भावः, स्वभावः, शीलः, [illegible] -त्वं, प्रकृतिः *f.*; 'good humour,' सद्भावः सत्प्रकृतिः *f.*, सुशीलता, सुप्रकृतिः *f.*, 'bad humour,' असद्भावः, वक्रभावः; 'in bad humour,' दुष्प्रकृतिः -तिः -ति, दुःशीलः -ला -लं, वक्रभावः -वा -वं.—(Whim) [illegible] *n.*, छन्दं, मनोलौल्यं, बुद्धिलौल्यं, बुद्धिविलासः, बुद्धिचापल्यं, चापलं, तरङ्गः, लहरी, अस्तद्धिः *m.*—(Wit) रसः, रसिकता, रसिता, चित्रं, वैदग्ध्यं, कौतुकं.

To HUMOUR, *v. a.* अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुकूल् (c. 10. -कूलयति -यितुं), सन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, अनुरुध् (c. 4. -रुध्यते -ति -रोद्धुं), आराध् (c. 10. -राधयति -यितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), प्रसद् (c. 10. -सादयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), भज् (c. 1. भजति -ते, भक्तुं), लल् (c. 10. लालयति -यितुं); 'to humour one's inclination,' छन्दोऽनुवृत्.—(Suit) युज् (c. 4. युज्यते, c. 10. योजयति -यितुं).

HUMOURED, *p. p.* अनुवृत्तः -त्ता -त्तं, अनुरुद्धः -द्धा -द्धं, अनुगृहीतः -ता -तं, आराधितः -ता -तं, प्रसादितः -ता -तं, सन्तोषितः -ता -तं.

HUMOURING, *s.* (Indulging) अनुवर्त्तनं, अनुवृत्तिः *f.*, छन्दोनुवृत्तं, अनुरोधः -धनं, सन्तोषणं, तुष्टिकरणं, तुष्टिदानं, आराधनं, प्रसादनं, प्रीतिकरणं, तर्पणं.

HUMP, *s.* गडुः *m.*, स्यगुः *m.*, पृष्ठग्रन्थिः *m.*; 'of a bull, &c.,' ककुद् *f.*, ककुदः -दं, अंसकूटः; 'having a hump,' ककुद्मान् -द्मती -द्मत् (त्), ककुद्मी -द्मिनी -द्मि (न्), न्युब्जः -ब्जा -ब्जं.

Hump-backed, *a.* कुब्जः -ब्जा -ब्जं, कुब्जकः -का -कं, गडुः -डुः -डु, गडुरः -रा -रं, गडुलः -ला -लं, वक्रपृष्ठः -ष्ठा -ष्ठं, उन्नतस्कन्धः -न्धा -न्धं.

Hunch, *s.* (A hump) गडुः *m.*, स्यगुः *m.*—(A lump) पिण्डः, गण्डका, घनः.

To hunch, *v. a.* करलिना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं).

Hunch-backed, *a.* गडुपृष्ठः -ष्ठा -ष्ठं. *See* Hump-backed.

Hundred, *a.* शतं, शतसंख्यकः -का -कं, एकशतसंख्यकः -का -कं, शतकः -का -कं, दशतिः *f.* The word शतं may be used with the nom. pl. or gen. pl.; as, 'a hundred ancestors,' शतं पितरः or शतं पितॄणां; or in comp., as, 'a hundred years,' वर्षशतं, शतवर्षं; 'a hundred and fifty,' सार्द्धशतं; 'a hundred thousand,' लक्षं -क्षा; 'a hundred millions,' अर्बुदं; 'a hundred years old,' शतायुः -युः -युः (स्).

Hundred, *s.* शतं, शतकः, दशतिः *f.*; 'by hundreds,' शतशस्.

Hundredth, *a.* शततमः -मी -मं, शतः -ती -तं.

Hunger, *s.* क्षुधा, क्षुत् *f.* (ध्), बुभुक्षा, जिघत्सा, अन्नलिप्सा, आहारलिप्सा, अशनाया -यितं, अन्नायी, क्षारिका; 'hunger and thirst,' क्षुत्पिपासा or -से *f.* du.

To hunger, *v. n.* क्षुध् (c. 4. क्षुध्यति, क्षोद्धुं), भुज् in des. (बुभुक्षति -ते -क्षितुं), घस् in des. (जिघत्सति -त्सितुं), अशन (nom. अशनायति -यितुं), अन्नं or आहारं लभ् in des. (लिप्सते -प्सितुं); 'to hunger after righteousness,' धर्म्माय क्षुध्.

Hunger-bit, hunger-bitten, *a.* क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुत्पीडितः -ता -तं.

Hungered, *a.* क्षुधितः -ता -तं, बुभुक्षितः -ता -तं, क्षुधार्त्तः -र्त्ता -र्त्तं.

Hungerly, *a.* अन्नार्थी -र्थिनी -र्थि (न्), भोजनार्थी &c., आहारार्थी &c.

Hunger-starved, *a.* क्षुदवसन्नः -न्ना -न्नं, क्षुधावसन्नः -न्ना -न्नं, क्षुधार्दितः -ता -तं.

Hungry, *a.* क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुधितः -ता -तं, क्षुत्पीडितः -ता -तं, क्षुधापीडितः -ता -तं, क्षुधातुरः -रा -रं, बुभुक्षितः -ता -तं, बुभुक्षुः -क्षुः -क्षु, जिघत्सुः -त्सुः -त्सु, आहारार्थी -र्थिनी -र्थि (न्), अन्नार्थी &c., अन्नलिप्सुः -प्सुः -प्सु, आहारलिप्सुः -प्सुः -प्सु, अशनायितः -ता -तं, क्षुधाव्याकुलः -ला -लं; 'hungry and thirsty,' क्षुत्पिपासितः -ता -तं, क्षुत्तृष्णोपपीडितः -ता -तं.—(Lean) कृशः -शा -शं, अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं.

Hunks, *s.* कृपणः, कदर्य्यः, धनलोभी *m.* (न्), मितम्पचः.

To hunt, *v. a.* and *n.* (Chase) मृग् (c. 10. मृगयते -यितुं), मृगयां कृ, आखिद् (c. 1. -खेटति -टितुं), परिकल् (c. 10. -कालयति -यितुं).—(Pursue, follow after, search for) अनुसृ (c. 1. -सरति -सर्त्तुं), अनुधाव् (c. 1. -धावति -वितुं), पश्चाद्धाव्, अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), पश्चाद्वृत्, अन्विष् (c. 4. -इष्यति -एषितुं).

Hunt, *s.* (Chase) मृगया, मृगव्यं, खेटः -टं, आखेटः, आच्छोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराधिः *f.*—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

Hunted, *p. p.* मृगितः -ता -तं, अनुसृतः -ता -तं, अनुधावितः -ता -तं, आखेटितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं.

Hunter, *s.* (One who pursues wild animals) व्याधः, मृगयुः *m.*, लुब्धकः, मृगवधाजीवः, मृगजीवनः, आखेटकः, मृगादिपशुहन्ता *m.* (न्), शौकरिकः, अन्धः, खट्टिकः; 'with nets,' जालिकः.—(Horse) मृगयाश्वः.

Hunting, *s.* मृगया, मृगव्यं, खेटः -टं, आखेटः, आच्छोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराधिः *f.*; 'hunting-knife,' कर्त्तरिका; 'hunting-dog,' आखेटकः श्वा *m.* (न्), मृगयाकुक्कुरः; 'hunting appointments,' मृगयावेशः.—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

Hunting-horn, *s.* मृगयाशृङ्गः, मृगव्यशृङ्गः, व्याधवादितं शृङ्गं or विषाणं.

Huntress, *s.* व्याधी *f.*, व्याधस्त्री, आखेटकी, मृगयाकारिणी.

Huntsman, *s.* मृगयाकारी *m.* (न्), मृगव्यकारी *m.*, मृगयुः *m.*, आखेटकः.

Huntsmanship, *s.* मृगयाविद्या, मृगव्यविद्या, आखेटविद्या.

Hurdle, *s.* काष्ठशलाकानिर्म्मितम् अवरोधकं or आवरणं, सम्भकटः.

Hurdy-gurdy, *s.* कर्कशशब्दः सतन्त्रीवाद्यविशेषः.

To hurl, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति, असितुं), प्रास्, ईर् (c. 10. ईरयति, -यितुं), उदीर्, समीर्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), व्यवसृज्, पत् (c. 10. पातयति -यितुं), प्रहृ (c. 1. -हरति -ते -हर्त्तुं), प्रेष् (c. 10. प्रेषयति -यितुं, rt. इष्), उद्गुर् (c. 6. -गुरते -रितुं); 'to hurl stones,' शिलाप्रहरणं कृ; 'is hurled down,' निपात्यते.

Hurl, *s.* (Throw) क्षेपः -पणं, असनं, पातनं.—(Tumult) तुमुलं, कोलाहलः, विप्लवः, डिम्बः.

Hurled, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं, प्रास्तः -स्ता -स्तं, पातितः -ता -तं, ईरितः -ता -तं, विसृष्टः -ष्टा -ष्टं.

Hurler, *s.* क्षेपकः, क्षेप्ता *m.* (प्तृ), असिता *m.* (तृ), प्रासकः.

Hurling, *s.* क्षेपणं, असनं, पातनं; 'of stones,' शिलाप्रहरणं.

Hurly-burly, *s.* कोलाहलः, हलहलाशब्दः, कालकीलः -लकः, तुमुलं.

Hurrah, *exclam.* जयशब्दः, प्रशंसाशब्दः, आनन्दशब्दः.

Hurricane, *s.* चक्रवातः, प्रभञ्जनः, उत्पातवातः, अतिवातः, वात्या, वातावेगः, चण्डवातः, प्रचण्डवायुः *m.*, वाताली, वातरूषः, वातगुल्मः, झञ्झावातः, झञ्झा, जवानिलः, भृमिः *m.*, निर्घातः, पवनाघातः.

Hurried, *a.* त्वरितः -ता -तं; 'spoken fast,' त्वरितोदितः -ता -तं, निरस्तः -स्ता -स्तं.

Hurriedly, *adv.* त्वरितं, सत्वरं, द्रुतं, शीघ्रं, अविलम्बितं, सरभसं.

To hurry, *v. a.* त्वर् (c. 10. त्वरयति -यितुं), सन्त्वर्.—(Hurry along drive, impel) कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रेर् (c. 10. -ईरयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं).

To hurry, *v. n.* त्वर् (c. 1. त्वरते -रितुं), सन्त्वर्, अतित्वर्, शीघ्र (nom शीघ्रायते), सत्वरं or शीघ्रं गम् (c. 1. गच्छति, गन्तुं) or चर् (c. 1. चरति -रितुं).

Hurry, *s.* त्वरा, सम्भ्रमः, संवेगः, आवेगः, वेगः, रभसः, क्षिप्रकारिता, त्वरितगतिः *f.*, आशुगमनं, शीघ्रता.—(Bustle) सम्भ्रमः, आकुलत्वं, व्यग्रता, व्यस्तता; 'in a hurry,' त्वरितः -ता -तं, सम्भ्रमी -मिणी -मि (न्), सम्भ्रान्तः -न्ता -न्तं, आकुलः -ला -लं.

Hurry-skurry, *adv.* ससम्भ्रमं, सरभसं, सावेगं, व्याकुलं, सम्भ्रमेण.

To hurt, *v. a.* हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), विहिंस्, उपहिंस्, आहिंस्, क्षतं कृ, क्षतिं कृ, क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, अपकृ, द्रोहं कृ, अर्द् (c. 10. अर्दयति -यितुं), समर्द्, पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), रिष् (c. 1. रेषति, c. 4. रिष्यति, रेषितुं, रेष्टुं), क्षि (c. 5. क्षिणोति, c. 1. क्षयति, क्षेतुं), हन् (c. 2. हन्ति -न्तुं), विहन्, उपहन्, तुद् (c. 6. तुदति, तोत्तुं), नश् (c. 10. नाशयति -यितुं), दुष् (c. 10. दूषयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं); 'you hurt me by your sharp words,' तुदसि मे मर्म्माणि वाक्शरैः.

Hurt, *s.* क्षतं, क्षतिः *f.*, परिक्षतं, हिंसा -सनं, अपकारः, अपकृतं, द्रोहः, अभिद्रोहः, अपायः, क्षयः, उपक्षयः, पीडा, व्यथा, आघातः, बाधः, नाशः, दोषः, विहेठः -ठनं, हानिः *f.*, रिष्टं.

Hurt, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, हिंसितः -ता -तं, विहिंसितः -ता -तं, अपकृतः -ता -तं, कृतापकारः -रा -रं, अर्दितः

-ता -तं, पीडितः -ता -तं, निपीडितः -ता -तं, व्यथितः -ता -तं, विहतः -ता -तं, दूषितः -ता -तं, रिष्टः -ष्टा -ष्टं.

HURTER, *s.* क्षतकारी *m.* (न्), अपकारी *m.*, हिंसकः, रेष्टा *m.* (ष्टृ).

HURTFUL, *a.* हिंस्रः -स्रा -स्रं, हिंसालुः -लुः -लु -लुकः -का -कं, हिंसात्मकः -का -कं, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, आपकरः -री -रं, क्षतिकारी &c., क्षतिजनकः -का -कं, अहितः -ता -तं, नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, यातुकः -का -कं, उपघातकः -का -कं, हानिजनकः -का -कं, बाधकः -का -कं, सबाधः -धा -धं, रिष्वः -ष्वा -ष्वं, अनिष्टजनकः -का -कं, द्रोही -हिणी -हि (न्).

HURTFULLY, *adv.* हिंसापूर्व्वं, हिंसया, क्षतपूर्व्वं, सक्षतं, हिंस्रं, हिंस्रप्रकारेण, अहितं, यथा हिंसा क्रियते तथा, यथा क्षतं जायते तथा.

HURTFULNESS, *s.* हिंस्रता -त्वं, हिंसालुता, क्षतिकारिता, अहितत्वं.

To HURTLE, *v. a.* समाहन् (c. 2. -हन्ति -न्तुं), परस्परसमाघातं कृ.—(Whirl) भ्रम् (c. 10. भ्रमयति -यितुं).

HURTLESS, *a.* अहिंस्रः -स्रा -स्रं, अनपकारी -रिणी -रि (न्).

HUSBAND, *s.* (Man married to a woman) पतिः *m.*, भर्त्ता *m.* (र्त्तृ), स्वामी *m.* (न्), वरः, वोढा *m.* (ढृ), विवोढा *m.*, वरयिता *m.* (तृ), कान्तः, परिणेता *m.* (तृ), परिणायकः, नाथः, दयितः, इष्टः, प्रियः -यतमः, धवः, उपयन्ता *m.* (न्तृ), परिग्रहीता *m.* (तृ), क्षेत्रिकः, हृदयेशः, प्राणेशः, जीवितेशः, प्राणनाथः, प्राणाधिनाथः, वेत्ता *m.* (त्तृ); 'husband and wife,' दम्पती *m.* du., जम्पती *m.* du., भार्य्यापती *m.* du., जायापती *m.* du.; 'a husband's brother,' देवा *m.* (वृ), देवः, देवरः, देवलः; 'a second husband,' दिधिषुः *m.* -षूः *m.*—(Economist) परिमितव्ययी *m.* (न्), अल्पव्ययी *m.*—(Cultivator) कृषकः, कृषिकारी *m.* (न्).

To HUSBAND, *v. a.* (Economize) परिमितव्ययं कृ, न व्ययीकृ, न विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं); 'to husband one's time,' न कालक्षेपं कृ.—(Cultivate) कृष् (c. 6. कृषति, क्रष्टुं).

HUSBANDLESS, *a.* पतिहीना, भर्त्तृहीना, भर्त्तृरहिता, निर्णाथा, अनाथा.

HUSBANDLY, *a.* परिमितव्ययः -या -यं, गृहव्यापाराभिज्ञः -ज्ञा -ज्ञं.

HUSBANDMAN, *s.* (Cultivator, farmer) कृषकः, कृषिकः, कर्षकः, कार्षकः, कार्षिकः, कृषीवलः, क्षेत्रकर्षकः, क्षेत्रिकः, क्षेत्री *m.* (न्), क्षेत्राजीवः, कृषिजीवी *m.* (न्), हालिकः, क्षेत्रपतिः *m.*, कृषाणः, कीनाशः, आर्द्धिकः.—(Man of the third tribe) वैश्यः, विट् *m.* (श्), ऊरुजः, ऊरव्यः, अर्य्यः, भूमिस्पृक् *m.* (श्).

HUSBANDRY, *s.* (Agriculture) कृषिः *f.*, कार्षिः *f.*, कृषिकर्म्म *n.* (न्), कृषिविद्या, अनृतं, वैश्यक्रिया, वैश्यवृत्तिः *f.*, हलभृतिः *f.*, कर्षणं, कृष्टिः *f.*, प्रमृतं.—(Frugality, economy) परिमितव्ययः, गृहकर्म्मनयः, गृहकर्म्मनिर्वाहविद्या.

HUSH, *exclam.* शान्तं, शान्तं शान्तं, शब्दं मा कुरु, तूष्णीम्भव, मौनीभव, निःशब्दो भव, वाचं यम, वाग्रोधं कुरु, हूम्, नीचैस्.

To HUSH, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् (c. 10. सान्त्वयति -यितुं), शब्दशान्तिं कृ, शब्दरोधं कृ, निःशब्दीकृ.

To HUSH, *v. n.* शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, प्रसद् (c. 1. -सीदति -सत्तुं), शान्तीभू, निःशब्दीभू, मौनीभू, तूष्णीम्भू.

HUSHED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः -ता -तं.

HUSK, *s.* तुषः -षा, तुसः, त्वक् *f.* (च्), कञ्चुकः, कोशः, पुटः, आवेष्टनं; 'of corn,' धान्यत्वक् *f.* (च्), धान्यतुषः.—(Chaff) बुसं, बुषं, तुच्छं, तुच्छधान्यकं, धान्यकल्कं; 'rice in husk,' शुष्कार्णं.

To HUSK, *v. a.* निस्तुष (nom. निस्तुषयति -यितुं), निस्तुषीकृ, तुषीकृ, निस्त्वच (nom. निस्त्वचयति -यितुं), निस्त्वचीकृ, त्वच (nom. त्वचयति -यितुं), तुषं or त्वचं हृ (c. 1. हरति, हर्त्तुं).

HUSKED, *p. p.* (Stripped of the husk) निस्तुषितः -ता -तं, निस्तुषः -षा -षं, निस्त्वचः -चा -चं, तुषीकृतः -ता -तं.—(Having a husk) तुषरः -रा -रं, तुषवान् -वती -वत् (त्), त्वग्युक्तः -क्ता -क्तं.

HUSKY, *a.* (Having husks, consisting of husks) सतुषः -षा -षं, बहुतुषवान् -वती -वत् (त्), तुषमयः -यी -यं, त्वङ्मयः -यी -यं.—(Rough, harsh) रूक्षः -क्षा -क्षं, कर्कशः -शा -शं; 'in sound,' रूक्षस्वरः -रा -रं.

HUSSAR, *s.* अश्वारूढः सैन्यः, अश्वारोही *m.* (न्), सादी *m.* (न्).

HUSSY, *s.* पापीयसी, दासीपुत्री, बन्धकी, दुष्टा स्त्री.

HUSTINGS, *s.* काष्ठनिर्म्मितो मञ्चविशेषो यत्र नगरप्रतिनिधिवरणं क्रियते.

To HUSTLE, *v. a.* निरस् (c. 4. -अस्यति -असितुं), निःसृ (c. 10. -सारयति -यितुं), निराकृ, बहिष्कृ, सम्बाध् (c. 1. -बाधते -धितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं).

HUSWIFE, *s.* गृहिणी, कुटुम्बिनी, गेहिनी, स्वामिनी, गृहमेधिनी, गृहव्यापारकुशला.

HUSWIFERY, *s.* गृहव्यापारकुशलता, गृहकार्य्यदक्षता, गृहकर्म्मनिपुणता, गृहमेधित्वं, परिमितव्ययः.

HUT, *s.* उटजः, कुटीरः, पर्णशाला, कुटेरः, कुटिरं, सहोटजः, तृणौकस् *n.*, तृणकुटी, कुट्टिमः, वेश्म *n.* (न्), कायमानं.

HUTCH, *s.* (Bin) धान्यकोष्ठकं, कुशूलः, पिटः.—(For rabbits) शशकाधारः, शशकरक्षणी.

HUZZA, *s.* जयशब्दः, जयनादः, सानन्दशब्दः, प्रणादः, जयध्वनिः *m.*, जयकोलाहलः, जयारवः, प्रशंसानादः.

To HUZZA, *v. n.* जयशब्दं कृ, प्रणादं कृ, जयप्रणादं कृ.

HYACINTH, *s.* सुगन्धपुष्प ओषधिभेदः, सुगन्धिकुसुमा.

HYBRID, *a.* सङ्कीर्णजातिः -तिः -ति, सङ्कीर्णजातीयः -या -यं, सङ्करजातः -ता -तं, सङ्कीर्णः -र्णा -र्णं.

HYDRA, *s.* जलव्यालः, जलभुजङ्गमः, कविकल्पितो बहुमस्तकविशिष्टो वृहन् जल[illegible].

HYDRAULIC, HYDRAULICAL, *a.* [illegible]लविषयः -या -यं, चलनजलसम्बन्धी -न्धिनी -न्धि (न्), जङ्गमजलसम्बन्धी &c.

HYDRAULICS, *s.* चलनजलविद्या, जङ्गमजलविद्या, जलचलनविषया विद्या.

HYDROCELE, *s.* कोषवृद्धिः *f.*, मुष्कवृद्धिः *f.*, कुरण्डः.

HYDROCEPHALUS, *s.* जलमस्तकः, उदकमस्तकः, मस्तकाध्मानं.

HYDRODYNAMICS, *s.* जलगुणविषया विद्या, जलशक्तिविषया विद्या.

HYDROGEN, *s.* जलकरः, जलजं, जलजो वायुः, जलजो वाष्पः.

HYDROGRAPHER, *s.* समुद्रवेलादिपत्रलेखकः, नदीसमुद्रादिपत्रलेखकः, समुद्रलेखकः, समुद्रालेख्यकृत् *m.*, वेलालेख्यकृत् *m.*

HYDROGRAPHICAL, *a.* समुद्रलिखनसम्बन्धी -न्धिनी -न्धि (न्).

HYDROGRAPHY, *s.* समुद्रलिखनं, समुद्रलिखनविद्या, नदीसमुद्रादिपत्रलिखनं, समुद्रवेलादिविवरणं.

HYDROMANCY, *s.* जलादिलक्षणात् शुभाशुभदर्शनं or भविष्यदनुमानं or अनागतवृत्तसूचनं or भाविविषयप्रदर्शनं.

HYDROMEL, *s.* जलसंसृष्टं मधु, जलमधु *n.*, जलमाक्षिकं, मधु *n.*

HYDROMETER, *s.* जलपरिमापकयन्त्रं, जलमापनी.

HYDROPATHY, *s.* शीतजलप्रयोगेण रोगचिकित्सा, जलोपचारः.

HYDROPHOBIA, *s.* अलर्करोगः, जलभयं, अलर्कदंशनप्रयुक्तो जलभयरोगः.

HYDROPIC, HYDROPICAL, *a.* जलोदरी -रिणी -रि (न्), जलोदरीयः -या -यं.

HYDROPSY, *s.* जलोदरं -री, उदरी, उदकोदरं, आध्मानं, जठरामयः.

HYDROSTATICS, *s.* स्थावरजलविषया or अजङ्गमजलविषया विद्या, जलादिद्रवद्रव्यधर्म्मविषया विद्या.

HYEMAL, *a.* शीतकालीनः -ना -नं, हैमन्तः -न्ती -न्तं -न्तिकः -की -कं.

Hyena, *s.* तरक्षुः *m.*, तरक्षुकः, तरक्षः, तर्क्षुः *m.*, मृगाजीवः, मृगादनः, युयुक्खुरः.

Hygrometer, *s.* क्लेदपरिमापकयन्त्रं, तेमपरिमापकः.

Hymen, *s.* विवाहाधिष्ठात्री देवता, विवाहाधिष्ठाता *m.* (तृ).

Hymeneal, *a.* वैवाहिकः -की -कं, विवाहीयः -या -यं, उद्वाहिकः -की -कं, पाणिग्रहणिकः -की -कं.

Hymn, *s.* स्तुतिगीतं, ईश्वरस्तुतिगीतं, स्तुतिगानं, गीतं, सङ्गीतं, गानं, भक्तिगानं, गाथा, गेयं, खिलिः *f.*, स्तोत्रं, सूक्तं; 'a chanter of hymns,' सुम्नयुः *m.*, गायकः, उद्गाता *m.* (तृ).

To **hymn**, *v. a.* (Celebrate in song) सङ्गीतद्वारेण स्तु (c. 2. स्तौति, स्तोतुं) or स्तुतिं कृ or प्रशंस् (c. 1. -शंसति -सितुं), उपवीण (nom. उपवीणयति -यितुं).

To **hymn**, *v. n.* गै (c. 1. गायति, गातुं), उद्गै, प्रगै, सुम्न (nom. सुम्नायते), स्तुतिं पठ् (c. 1. पठति -ठितुं), स्तुतिपाठं कृ.

Hymned, *p. p.* उपगीतः -ता -तं, उपगीयमानः -ना -नं, स्तुतः -ता -तं, संस्तुतः -ता -तं, स्तूयमानः -ना -नं.

Hyp, *s.* विषादः, अवसादः, अवसन्नता, उद्वेगः, ग्लानिः *f.*, खेदः.

To **hyp**, *v. a.* विषद् (c. 10. -षादयति -यितुं), विषण्णीकृ, ग्लानीकृ, उद्विग्नीकृ.

Hyperbole, *s.* अत्युक्तिः *f.*, अतिशयोक्तिः *f.*, चित्रोक्तिः *f.*, अधिकोक्तिः *f.*, आधिक्यं, वागाधिक्यं, वागुपचयः, वाक्यबाहुल्यं, अतिवर्णना, सत्यातिक्रमः, याथार्थ्यातिक्रमः, यथार्थोल्लङ्घनं, सत्यातिरिक्ता कथा.

Hyperbolic, **hyperbolical**, *a.* अत्युक्तिपूर्ण्णः -र्ण्णा -र्ण्णं, अत्युक्तिमान् -मती -मत् (त्), अधिकः -का -कं, अधिकवाङ्मयः -यी -यं, अतिक्रान्तसत्यः -त्या -त्यं, उल्लङ्घितसत्यः -त्या -त्यं.

Hyperbolically, *adv.* अत्युक्त्या, अत्युक्तिपूर्ण्णं, अतिशयोक्त्या, सत्यातिक्रमेण.

To **hyperbolize**, *v. n.* अत्युक्तिं कृ, अतिशयोक्तिं कृ, अतिवर्णनं कृ, अतिशयोक्त्या वद् (c. 1. वदति -दितुं).

Hyperborean, *a.* उत्तरः -रा -रं, उत्तरदिश्यः -श्या -श्यं, उत्तरीयः -या -यं, उदङ् -दीची -दक् (च्), उदीचीनः -ना -नं, उत्तरदिक्सम्बन्धी -न्धिनी -न्धि (न्); 'a hyperborean,' उत्तरदेशजः.

Hypercritic, *s.* अतिशयेन गुणदोषपरीक्षकः, एकान्ततो गुणदोषनिरूपकः or दोषग्राही *m.* (न्), वितण्डकः.

Hypercriticism, *s.* अतिशयेन गुणदोषपरीक्षा or गुणदोषनिरूपणं, वितण्डा, अतिवितण्डा.

Hyphen, *s.* सम्बन्धचिह्नं, संयोगचिह्नं, सम्बन्धसूचकं चिह्नं or अङ्कः.

Hypochondres, **hypochondria**, *s.* कुपितवायुः *m.*, वायुरोगः, विषादः, विषण्णता, अवसादः, उद्वेगः.

Hypochondriac, **hypochondriacal**, *a.* कुपितवायुग्रस्तः -स्ता -स्तं, विषादी -दिनी -दि (न्), विषण्णः -ण्णा -ण्णं, अन्तर्मनाः -नाः -नः (स्), चिन्ताकुलः -ला -लं, उद्विग्नः -ग्ना -ग्नं.

Hypocrisy, *s.* कुहना -निका, दम्भः, कुहकवृत्तिः *f.*, धर्म्मोपधा, मिथ्याधर्म्मः -र्म्मत्वं, कपटधर्म्मः, धर्म्मविषये छद्म *n.* (न्), छद्मवेशः or कापट्यं, कुक्कुटिः *f.* -टी, काल्पनिकता, धर्म्मध्वजमात्रं, आर्य्यरूपता, आर्य्यवेशधारणं, मस्कः, मस्कः.

Hypocrite, *s.* दम्भी *m.* (न्), दाम्भिकः, कुहकः, कुहकवृत्तिः *m.*, कपटधर्म्मी *m.* (न्), कपटी *m.* (न्), आर्य्यवेशधारी *m.* (न्), वेशधारी *m.*, धर्म्मध्वजी *m.* (न्), आर्य्यरूपः, आर्य्यलिङ्गी *m.* (न्), छद्मतापसः, कपटतपस्वी *m.* (न्), कपटव्रती *m.* (न्), लिङ्गवृत्तिः *m.*, छद्मवेशी *m.* (न्), कपटवेशी *m.* (न्), वकव्रती *m.* (न्), वैडालव्रतिकः, कौक्कुटिकः, कुयोगी *m.* (न्), छन्दपातनः, लोकरञ्जनार्थम् आर्य्यकर्म्मानुष्ठायी *m.* (न्), साधुम्मन्यः.

Hypocritical, *a.* दाम्भिकः -की -कं, दम्भी -म्भिनी -म्भि (न्), कुहनः -ना -नं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, छद्मवेशी -शिनी -शि (न्), छाद्मिकः -की -कं, धर्म्मोपधः -धा -धं, काल्पनिकः -की -कं.

Hypocritically, *adv.* कुहकवत्, दाम्भिकवत्, सदम्भं, सकपटं, मिथ्याधर्म्मेण.

Hypogastric, *a.* वास्तेयः -यी -यं; 'hypogastric region,' वस्तिः *m. f.*

Hypothenuse, *s.* कर्णः, विषमकर्णः.

Hypothesis, *s.* उपन्यासः, प्रतिज्ञा, कल्पना, प्रमेयं, निष्प्रमाणेन उपन्यासः अप्रमाणपूर्व्वं उपन्यासः, अनुमानं, अनुभवः.

Hypothetic, **hypothetical**, *a.* अप्रमाणपूर्व्वम् उपन्यस्तः -स्ता -स्तं, आनुमानिकः -की -कं, काल्पनिकः -की -कं, सोपन्यासः -सा -सं, निष्प्रमाणः -णा -णं.

Hypothetically, *adv.* उपन्यासक्रमेण, प्रतिज्ञाक्रमेण, सोपन्यासं, निष्प्रमाणेन.

Hyssop, *s.* हिस्सप्संज्ञकः कटुरसविशिष्ट ओषधिभेदः.

Hysteric, **hysterical**, *a.* मूर्च्छालः -ला -लं, मूर्च्छावान् -वती -वत् (त्), गर्भरोगोपहतत्वाद् मूर्च्छाग्रस्तः -स्ता -स्तं, मूर्च्छनोपहतः -ता -तं.

Hysterics, *s.* जरायुरोगजाता मूर्च्छना or मूर्च्छा, गर्भरोगजात उपसर्गः or आवेशः.

I.

I, *pron.* अहम् (अस्मद्); 'I myself,' सो ऽहं.

Iambic, *s.* ध्वजं, द्व्यक्षरं पदं यस्य पूर्व्वाक्षरं लघु पश्चिमाक्षरं गुरु.

Ibex, *s.* पर्व्वतवासी छागभेदः, अजः, वस्तः, पर्णभोजनः.

Ibis, *s.* पूर्व्वं मिसरदेशे महापूजापुरःसरं पालितः पक्षिभेदः.

Ice, *s.* हिमं, हिमानी, हिमसंहतिः *f.*, हिमसंहतम् उदकं, शीतमुदकं, घनजलं, संहतजलं, घनीकृतजलं, तुषारः, नीहारः, प्रालेयं, अवश्यायः.

To **ice**, *v. a.* हिमीकृ, तुषारीकृ, हिमरूपं -पां -पं कृ.—(Cool with ice) हिमद्वारेण or तुषारद्वारेण शीतलीकृ or शिशिरीकृ or शीतल (nom. शीतलयति -यितुं).

Iceberg, *s.* हिमपर्व्वतः, हिमराशिः *m.*, तुषारपर्व्वतः, तुषारराशिः *m.*, घनजलराशिः.

Ice-bound, *a.* हिमबद्धः -द्धा -द्धं, हिमपरिवेष्टितः -ता -तं.

Ice-house, *s.* ग्रीष्मकाले हिमरक्षणयोग्यं गृहं, हिमगृहं, हिमगुप्तिः *f.*

Ichneumon, *s.* अङ्गूषः, नकुलः, बभ्रुः *m.*

Ichor, *s.* पूयरक्तं, पूयशोणितं.

Ichthyology, *s.* मत्स्यविद्या, मत्स्यजातिगुणादिविषया विद्या.

Ichthyosaurus, *s.* मत्स्यमकरः.

Icicle, *s.* हिमकणः -णिका, तुषारकणः, नीहारकणः, हिमबिन्दुः *m.*

Iciness, *s.* हिमता, हिम्यता, हिमवत्त्वं, हैमता, हैमं, शीतता, शैत्यं.

Iconoclasm, *s.* देवताप्रतिमाभङ्गः, देवतामूर्त्तिभञ्जनं.

Iconoclast, *s.* देवताप्रतिमाभञ्जकः, देवतामूर्त्तिभङ्गकरः.

Iconography, *s.* प्रतिमालिखनं, मूर्त्तिविवरणं, प्रतिमूर्त्तिव्याख्या.

Iconology, *s.* प्रतिमाविद्या, देवतादिप्रतिमानविषया विद्या.

Icy, *a.* हिमः -मा -मं, हिम्यः -म्या -म्यं, हैमः -मी -मं, हिमवान् -वती -वत् (त्), तुषारवान् &c., तौषारः -री -रं, नीहारवान् &c.—(Frigid) शीतः -ता -तं, शीतलः -ला -लं, शिशिरः -रा -रं, जडः -डा -डं.—(Wanting in affection) निःस्नेहः -हा -हं, स्नेहशून्यः -न्या -न्यं.

Idea, *s.* बुद्धिः *f.*, मतिः *f.*, सङ्कल्पः, मनोगतं, मनसिजं, चिन्ता, मनःकल्पितं, मनःकल्पना, कल्पना, वासना, भावना, बोधः; 'with the idea that,' 'under the idea of,' is expressed by the inst. c. of बुद्धिः; as, 'with the idea that he was a tiger,' व्याघ्रबुद्ध्या; 'with the idea of reaching,' प्रापणबुद्ध्या; 'from an idea of (his) incapacity,' अपात्रबुद्ध्या.—(Abstract idea) भावः.

Ideal, *a.* मनसिजः -जा -जं, मनोगतः -ता -तं, मनोजः -जा -जं, मानसिकः

-की -कं, मानसः -सी -सं, मनोभवः -वा -वं, चित्तोद्भूतः -ता -तं, चित्ताभवः -वा -वं, काल्पनिकः -की -कं, मनःकल्पितः -ता -तं, मायामयः -यी -यं, मायिकः -की -कं.

IDEALISM, *s.* माया, विषयाभावबुद्धिः *f.*, अमूर्त्तिवादः, अविद्या.

IDEALIST, *s.* मायिकमतावलम्बी *m.* (न्), विषयाभाववादी *m.* (न्).

IDEALLY, *adv.* मनसा, मनसि, बुद्ध्या, बुद्धिमात्रेण, चिन्तया, चिन्तामात्रेण.

IDENTICAL, *a.* अनन्यः -न्या -न्यं, अभिन्नः -न्ना -न्नं, अविभिन्नः -न्ना -न्नं, अनन्यरूपः -पा -पं, अभिन्नरूपः -पा -पं, समः -मा -मं, समानः -ना -नं, समसमानः -ना -नं, तुल्यः -ल्या -ल्यं, अभेदः -दा -दं, अपरः -रा -रं, अविपरीतः -ता -तं, निरस्तभेदः -दा -दं, निर्विशेषः -षा -षं; 'identical with the world,' जगात्मकः -मा -मं, जगदात्मकः -का -कं.

IDENTICALLY, *adv.* अनन्यं, अभिन्नं, समं, समानं, समसमानं, अपृथक्.

IDENTIFICATION, *s.* समीकरणं, एकीकरणं, सायुज्यं; 'with Brahma,' ब्रह्मसायुज्यं, ब्रह्मभूयं.

IDENTIFIED, *p. p.* समीकृतः -ता -तं, समानीकृतः -ता -तं, समीभूतः -ता -तं, समानीभूतः -ता -तं, एकीकृतः -ता -तं, सरूपीकृतः -ता -तं.

To IDENTIFY, *v. a.* समीकृ, समानीकृ, एकीकृ, सरूपीकृ, तुल्यीकृ, अनन्यीकृ.

To IDENTIFY, *v. n.* समीभू, समानीभू, एकीभू, सरूपीभू, संयुक्तः -क्ता -क्तं भू.

IDENTITY, *s.* समता, समानता, साम्यं, अभिन्नता, अनन्यता, अभेदः, अविभेदः, अविभिन्नता, सारूप्यं, सरूपता, आत्मता, स्वरूपता, तादात्म्यं; 'identity of class,' सावर्ण्यं, सजातित्वं.

IDES, *s.* रोमीयपञ्जिकायां मासस्य त्रयोदशो दिवसः or पञ्चदशो दिवसः.

IDIOCY, *s.* जडता, जाड्यं, मूढता, मूर्खता, बुद्धिवैकल्यं, बुद्धिन्यूनता, अज्ञता, मेधाभावः, बुद्ध्यभावः, बोधाभावः.

IDIOM, *s.* वाग्रीतिः *f.*, वाक्प्रवृत्तिः *f.*, वाग्व्यापारः, वाग्व्यवहारः, वाग्धारा, विशेषवाक्यं, विशेषवचनं, सविशेषवाक्यं, भाषाविशेषणं, विशेषभाषा, विशिष्टवचनं, विशिष्टवाक्यं, विशिष्टभाषा, भाषालक्षणं, भाषावच्छेदः, अवच्छेदकवाक्यं, सम्प्रदायः.

IDIOMATIC, *a.* भाषाविशेषकः -का -कं, भाषालाक्षणिकः -की -कं, विशेषवाग्रीत्यनुसारी -रिणी -रि (न्), भाषारीत्यनुसारी &c.

IDIOSYNCRASY, *s.* प्रकृतिस्वभावः, शरीरस्वभावः, देहस्वभावः, जातिस्वभावः.

IDIOT, *s.* जडः, मूढः, न्यूनबुद्धिः *m.*, न्यूनधीः *m.*, बुद्धिविकलः, विकलबुद्धिः *m.*, निर्बुद्धिः *m.*, बुद्धिहीनः, हतबुद्धिः *m.*, हतज्ञानः, मूर्खः, अज्ञः, निर्बोधः, न्यूनपञ्चाङ्गभावः, पामरः, बर्बरः, वैधेयः, बालिशः, यथाजातः.

IDIOTCY, *s.* *See* IDIOCY.

IDIOTIC, *a.* जडः -डा -डं, मूढः -ढा -ढं, मूर्खः -र्खा -र्खं, न्यूनबुद्धिः -द्धिः -द्धि, न्यूनधीः -धीः -धि, निर्बुद्धिः -द्धिः -द्धि, अल्पबुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, बुद्धिविकलः -ला -लं, बालिशः -शा -शं, वैधेयः -यी -यं.

IDIOTISM, *s.* (Peculiarity of expression) विशेषवाक्यं, विशेषभाषा, भाषाविशेषणं, वाग्रीतिः *f.*, विशेषवाग्रीतिः *f.*—(Idiotcy) जडता, जाड्यं, मूढता, बुद्धिवैकल्यं, बुद्धिन्यूनता.

IDLE, *a.* (Averse to labour, doing nothing) अलसः -सा -सं, आलस्यः -स्या -स्यं, निष्कर्म्मा -र्म्मा -र्म्म (न्), निष्कर्म्मकः -का -कं, अकर्म्मशीलः -ला -लं, अकर्म्मा &c., कर्म्मरहितः -ता -तं, कार्य्यशून्यः -न्या -न्यं, निर्व्यापारः -रा -रं, अव्यापारी -रिणी -रि (न्), अक्रियः -या -यं, निरुद्योगः -गा -गं -गी -गिनी -गि (न्), निरुत्साहः -हा -हं, अनुद्योगः -गा -गं, निरुद्यमः -मा -मं, निश्चेष्टः -ष्टा -ष्टं, कार्य्यपराङ्मुखः -खा -खं, अकर्म्मकृत् *m.f.n.*, कर्म्मविमुखः -खा -खं, उदासीनः -ना -नं, सावकाशः -शा -शं, कर्म्मद्वेषी -षिणी -षि (न्); 'to be idle,' उदास् (c. 2. -आस्ते -आसितुं), अलसीभू.—(Vain, useless) निरर्थकः -का -कं, अनर्थकः -का -कं, व्यर्थः -र्था -र्थं, मोघः -घा -घं, निष्प्रयोजनः -ना -नं, विफलः

-ला -लं, असम्बद्धः -द्धा -द्धं; 'idle talk,' आलस्यवचनं, वृथाकथा; 'idle talker,' असम्बद्धभाषकः.

To IDLE, *v. n.* आलस्यं कृ, अलसीभू, कालक्षेपं कृ, कालहरणं कृ, कालव्ययं कृ, कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), उदास् (c. 2. -आस्ते -आसितुं).

IDLENESS, *s.* आलस्यं, अलसता -त्वं, अकर्म्मशीलता, कार्य्यप्रद्वेषः, कार्य्यपराङ्मुखता, कर्म्मविमुखता, अनुद्योगः, अव्यापारः, कार्य्यशून्यता, निष्कर्म्मत्वं, उदासीनता, कालक्षेपः.

IDLER, *s.* अलसजनः, आलस्यकारी *m.* (न्), निष्कर्म्मकः, निर्व्यापारः, अव्यापारी *m.* (न्), मुखनिरीक्षकः, लालाटिकः, कालक्षेपकः, कार्य्यपुटः.

IDLY, *adv.* अलसवत्, अलसं, आलस्येन, सालस्यं, उदासीनवत्.—(Vainly) वृथा, मुधा, असम्बद्धं, निरर्थकं.

IDOL, *s.* देवताप्रतिमा -मानं, देवप्रतिमा, देवतामूर्त्तिः *f.*, देवमूर्त्तिः *f.*, देवता, दैवतः -तं, प्रतिमा -मानं, विग्रहः, देवताविग्रहः, देवताप्रतिमूर्त्तिः *f.*, ठक्कुरः, पुत्तलिका; 'attendant on an idol,' देवलः, देवाजीवी *m.* (न्), देवाजीवः, प्रतिमापरिचारकः.

IDOLATER, *s.* देवतार्च्चकः, देवताभ्यर्च्चकः, देवार्च्चकः, देवतापूजकः, प्रतिमापूजकः, देवप्रतिमापूजकः, देवतोपासकः, देवतासेवी *m.* (न्), विग्रहसेवी, प्रतिमासेवी *m.* (न्) -सेविता *m.* (तृ).

IDOLATRESS, *s.* देवतार्च्चिका, देवताभ्यर्च्चिका, प्रतिमापूजयित्री, देवतापूजिका, देवतोपासिका, प्रतिमासेविनी, प्रतिमासेवित्री.

To IDOLATRIZE, *v. n.* देवताः पूज् (c. 10. पूजयति -यितुं), प्रतिमाः पूज् or अर्च्च् (c. 1. अर्च्चति -र्च्चितुं) or अभ्यर्च्च्, देवतार्च्चनं कृ, प्रतिमापूजां कृ.

IDOLATROUS, *a.* देवतार्च्चकः -का -कं, प्रतिमापूजकः -का -कं, देवप्रतिमापूजकः -का -कं, प्रतिमापूजाविशिष्टः -ष्टा -ष्टं, प्रतिमापूजासम्बन्धी -न्धिनी -न्धि (न्).

IDOLATRY, *s.* देवतार्च्चनं -ना, देवताभ्यर्च्चनं -ना, देवताभ्यर्च्चा, देवार्च्चा, देवतापूजा, प्रतिमापूजा, देवप्रतिमापूजा, देवतोपासना, प्रतिमासेवा, विग्रहपूजा, मूर्त्तिसेवा, देवताराधना -नं, देवतोपचर्य्या.

IDOLIST, *s.* प्रतिमापूजकः, मूर्त्तिपूजयिता *m.* (तृ), प्रतिमानसेवी *m.* (न्).

To IDOLIZE, *v. a.* अतिप्रेम कृ, अत्यनुरागवान् -वती -वत् or अत्यन्तानुरक्तः -क्ता -क्तं भू or सम्, [illegible] एकान्ततः प्री (c. 4. प्रीयते, प्रेतुं) all with instr. or loc. c., देववत् पूज् (c. 10. पूजयति -यितुं) or भज् (c. 1. भजते, भक्तुं).

IDONEOUS, *a.* युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं.

IDYL, *s.* पशुपालनादिविषयम् अबहुश्लोकं क्षुद्रकाव्यं.

IF, *conj.* यदि, चेत् usually used with the indicative; as, 'if he live he will behold prosperity,' यदि जीवति भद्राणि पश्यति; 'if there be need of me,' यदि मया प्रयोजनम् अस्ति; 'if avarice were abandoned, who would be poor?' तृष्णा चेत् परित्यक्ता को दरिद्रः.—(As if) इव.—(If so) यद्येवं.—(If not) यदि न, न चेत्, नो चेत्, न वा.

IGNEOUS, *a.* आग्नेयः -यी -यं, अग्निमयः -यी -यं, अग्निमान् -मती -मत् (त्), अग्नितुल्यः -ल्या -ल्यं, अग्निस्वभावः -वा -वं, कार्शानवः -वी -वं.

To IGNIFY, *v. a.* अग्निसात्कृ, अग्निरूपं -पां -पं कृ, अग्निवत् कृ.

IGNIS-FATUUS, *s.* मिथ्याग्निः *m.*, मिथ्यादीप्तिः *f.*, मिथ्याद्युतिः *f.*, पिशाचदीपिका

To IGNITE, *v. a.* ज्वल् (c. 10. ज्वालयति, ज्वलयति -यितुं), प्रज्वल्, संज्वल्, समिन्ध् (c. 7. -इन्द्धे -इन्धितुं), दीप् (c. 10. दीपयति -यितुं), प्रदीप्, सन्दीप्, आदीप्, उद्दीप्, सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), दह् (c. 1. दहति, दग्धुं), तप् (c. 10. तापयति -यितुं), अग्निसात्कृ, ज्योतिस्सात्कृ.

To IGNITE, *v. n.* समिन्ध् in pass. (-इध्यते), अग्निसात्भू, दीप् (c. 4. दीप्यते दीपितुं), सन्दीप्, प्रदीप्, ज्वल् (c. 1. ज्वलति -लितुं), प्रज्वल्, दह् (c. 4. दह्यति, दग्धुं), सन्धुक्ष् (c. 1. -धुक्षते -क्षितुं), अग्निसदीप्तः -प्ता -प्तं भू.

IGNITED, *p. p.* समिद्धः -द्धा -द्धं, इद्धः -द्धा -द्धं, ज्वलितः -ता -तं, प्रज्वालितः -ता -तं, दीपितः -ता -तं, उद्दीप्तः -प्ता -प्तं, प्रदीप्तः -प्ता -प्तं, सन्धुक्षितः -ता -तं, समाप्तः -प्ता -प्तं.

IGNITIBLE, *a.* दीपनीयः -या -यं, दीप्यः -प्या -प्यं, ज्वलनीयः -या -यं, ज्वलनशीलः -ला -लं, दाह्यः -ह्या -ह्यं.

IGNITION, *s.* इन्धनं, समिन्धनं, ज्वलनं, दीपनं, उद्दीपनं, दहनं, तापः.

IGNOBLE, *a.* (Of low birth) अकुलीनः -ना -नं, दुष्कुलीनः -ना -नं, अकुलः -ला -लं, हीनजातिः -तिः -ति, न्यग्जातिः -तिः -ति, अपकृष्टजातिः -तिः -ति.—(Mean, base) नीचः -चा -चं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं, अधमः -मा -मं, खलः -ला -लं, अनार्य्यः -र्य्या -र्य्यं, कदर्य्यः -र्य्या -र्य्यं, कृपणः -णा -णं, कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, दीनः -ना -नं, जघन्यः -न्या -न्यं, प्राकृतः -ती -तं, हीनः -ना -नं.—(Disgraceful) अकीर्त्तिकरः -री -रं.

IGNOBLY, *adv.* अकुलीनवत्, अपकृष्टवत्, नीचवत्, हीनजातिवत्, अनार्य्यवत्, अनार्य्यं, खलवत्, कृपणवत्, अधमजनवत्, अपकृष्टं, कृपणं, कुत्सितं, सदैन्यं, कदर्य्यं.

IGNOMINIOUS, *a.* अकीर्त्तिकरः -री -रं, अपयशस्करः -री -रं, अयशस्यः -स्या -स्यं, अयशस्वी -स्विनी -स्वि (न्), गर्हितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, कलङ्ककरः -री -रं, कलङ्की -ङ्किनी -ङ्कि (न्), लज्जाकरः -री -रं, अपमानकरः -री -रं, वाच्यः -च्या -च्यं, कुत्सितः -ता -तं, कदर्य्यः -र्य्या -र्य्यं, अपकृष्टः -ष्टा -ष्टं, अनार्य्यः -र्य्या -र्य्यं.

IGNOMINIOUSLY, *adv.* गर्हितं, अयशस्यं, सापमानं, कदर्य्यं, कुत्सितं, अनार्य्यं.

IGNOMINY, *s.* अकीर्त्तिः *f.*, अयशस् *n.*, अपकीर्त्तिः *f.*, अपयशस्, अपमानं, अख्यातिः *f.*, कुख्यातिः *f.*, यशोहानिः *f.*, कीर्त्तिहानिः *f.* मर्य्यादाहानिः *f.*, तेजोहानिः *f.*, कलङ्कः, अपकलङ्कः, अपकर्षः, अपध्वंसः, अवमानं, अवज्ञा, परिभवः, तिरस्कारः, अप्रतिष्ठा, अमर्य्यादा.

IGNORAMUS, *s.* अज्ञः, अज्ञानी *m.* (न्), निर्बुद्धिः *m.*, निर्बोधः, अबुद्धिमान् *m.* (त्).

IGNORANCE, *s.* अज्ञानं -नता, अज्ञता, अनभिज्ञता -त्वं, अनभिज्ञानं -नत्वं, अविज्ञता, ज्ञानाभावः, प्रज्ञाहीनता, ज्ञानहीनता, अबोधः -धता, अबुद्धिः *f.*, अविद्या, अज्ञानित्वं, निर्बुद्धिता, बुद्धिहीनता; 'spiritual ignorance,' मोहः, अज्ञानं, अविद्या, अहम्मतिः *f.*

IGNORANT, *a.* अज्ञानः -ना -नं, अज्ञानी -निनी -नि (न्), अज्ञः -ज्ञा -ज्ञं, अनभिज्ञः -ज्ञा -ज्ञं, अविज्ञः -ज्ञा -ज्ञं, अप्राज्ञः -ज्ञा -ज्ञं, अबोधः -धा -धं, अबुधः -धा -धं, ज्ञानहीनः -ना -नं, प्रज्ञाहीनः -ना -नं, विद्याहीनः -ना -नं, विद्याविहीनः -ना -नं, विद्यारहितः -ता -तं, विद्याशून्यः -न्या -न्यं, बोधहीनः -ना -नं, निर्बोधः -धा -धं, निर्बुद्धिः -द्धिः -द्धि, दुर्बुद्धिः -द्धिः -द्धि, अबुद्धिमान् -मती -मत् (त्), दुर्मतिः -तिः -ति, अविपश्चित्, अविद्वान् -दुषी -द्वत् (स्), अविद्यः -द्या -द्यं, अकोविदः -दा -दं, अव्युत्पन्नः -न्ना -न्नं, अश्रुतः -ता -तं, वैधेयः -यी -यं.

IGNORANTLY, *adv.* अज्ञानतस्, अज्ञानात्, अज्ञानेन, अज्ञानपूर्व्वं, अबोधपूर्व्वं.

IGUANA, *s.* गोधारः, गौधेयः, गौधेरः, गोधा, गोधिका, गोधिः *m.*, गोधिकात्मजः, निहाका, नक्रः.

ILIAC, *a.* आन्त्रिकः -की -कं, नाडिसम्बन्धी -न्धिनी -न्धि (न्); 'iliac-passion,' उदावर्त्तः, शूलव्याधिः *m.*, शूलरोगः, अन्त्रशूलं.

ILL, *a.* (Bad, evil) दुष्टः -ष्टा -ष्टं, पापः -पा -पं, खलः -ला -लं, मन्दः -न्दा -न्दं, कदर्य्यः -र्य्या -र्य्यं, निर्गुणः -णा -णं, कुत्सितः -ता -तं, नीचः -चा -चं, अधमः -मा -मं, शठः -ठा -ठं, अभद्रः -द्रा -द्रं, असाधुः -धुः -धु, असन् -सती -सत् (त्), असारः -रा -रं, अधार्म्मिकः -की -कं; 'ill,' as a general word, is often expressed by दुर्, कु, अप or वि; as, 'ill conduct,' दुर्नयः, कुकर्म्म *n.* (न्), अपकर्म्म *n.*, विकर्म्म *n.*; 'an ill road,' दुरध्वः, कुपथं, विमार्गः, कदध्वा *m.* (न्); 'ill policy,' अनीतिः *f.*, दुर्नीतिः *f.*; 'ill luck,' दुर्भाग्यं, दुर्दैवं.—(Unwell, sick) अस्वस्थः -स्था -स्थं, अस्वस्थशरीरः -रा -रं, असुस्थशरीरः -रा -रं, असुस्थः -स्था -स्थं, असुस्थितः -ता -तं, रोगी -गिणी -गि (न्), सरोगः -गा -गं, रोगग्रस्तः -स्ता -स्तं, रोगान्वितः -ता -तं, रोगवान् -वती -वत् (त्), रोगार्त्तः -र्त्ता -र्त्तं, व्याधितः -ता -तं, व्याधियुक्तः -क्ता -क्तं, आमयः -या -यं, अमी -मिनी -मि (न्), विकारी -रिणी -रि (न्). Expressed also by पीडितः -ता -तं, आतुरः -रा -रं, आर्त्तः -र्त्ता -र्त्तं, ग्रस्तः -स्ता -स्तं in comp.; as, 'ill with fever,' ज्वरपीडितः -ता -तं, ज्वरातुरः -रा -रं, ज्वरग्रस्तः -स्ता -स्तं, सज्वरः -रा -रं.

ILL, *s.* (Evil, wickedness) दुष्टता, पापं, दोषः, व्यसनं -निता, दौष्ट्यं, शाठ्यं, शठता, खलता, मन्दता, असाधुता, अधर्म्मः, दुराचारत्वं, भ्रष्टता, कुसृतिः *f.*—(Distress, calamity) अपायः, अनिष्टं, दुःखं, अशुभं, अकुशलं, दुर्गतिः *f.*, दौर्गत्यं, अभद्रं, अरिष्टं, अहितं, व्यसनं, उत्पातः, विपद् *f.*, आपद् *f.*, विपत्तिः *f.*, अनिष्टपातः, क्लेशः, कष्टं, दुर्दशा, दुरवस्था.—(Disadvantage, loss, injury) अनर्थः, अपायः, अहितं, अपचयः, अपकारः, अपकृतं, क्षतिः *f.*, हानिः *f.*, क्षयः, नाशः.—(Disease, pain) रोगः, व्याधिः *m.*, आमयः, पीडा, दुःखं, क्लेशः, कष्टं, आर्त्तिः *f.*, उपतापः, तापः, अस्वास्थ्यं; 'boding ill,' अनिष्टसूचकः -का -कं; 'designing ill,' द्रोहचिन्तकः -का -कं.

ILL, *adv.* (Not well, badly) दुष्टु, दुष्टं, असम्यक्, [illegible] or expressed by दुर्, वि, अ, कु, अप, दुष्ट, पाप, &c. prefixed; as, 'ill-intentioned,' दुराशयः -या -यं, दुष्टबुद्धिः [illegible], पापाशयः -या -यं; 'ill-done,' दुष्कृतः -ता -तं, अपकृतः -ता -तं; 'ill-behaved,' दुःशीलः -ला -लं, कुशीलः -ला -लं, दुर्वृत्तः -त्ता -त्तं; 'ill-natured,' दुष्प्रकृतिः -तिः -ति; 'ill-fated,' दुर्दैवग्रस्तः -स्ता -स्तं, दुर्दैवोपहतः -ता -तं, दुर्भाग्यः -ग्या -ग्यं; 'ill-managed,' दुर्णीतः -ता -तं; 'ill-conditioned,' दुःस्थः -स्था -स्थं, दुःस्थितः -ता -तं; 'ill at ease,' अनिर्वृतः -ता -तं; 'ill-grounded,' अमूलः -ला -लं -लकः -का -कं; 'ill-ordered,' दुष्क्रमः -मा -मं, अक्रमः -मा -मं; 'ill-regulated,' अव्यवस्थितः -ता -तं; 'ill-qualified,' अयुक्तः -क्ता -क्तं, अयोग्यः -ग्या -ग्यं; 'ill-shaped,' कुरूपः -पा -पं, अपरूपः -पा -पं, विरूपः -पा -पी -पं; 'ill-sounding,' विस्वरः -रा -रं, अस्वरः -रा -रं; 'ill-treated,' अपकृतः -ता -तं; 'ending ill, turning out ill,' दुरन्तः -न्ता -न्तं, दुष्परिणामः -मा -मं.—(Not well in health) अस्वस्थं, अस्वास्थ्येन, असुस्थं; 'to be ill,' अस्वस्थः -स्था -स्थं भू. *See* ILL, *a.* (Not easily) दुःखेन, कष्टेन, कष्टं, कृच्छ्रेण, कठिनं, विषमं.

ILL-ADVISED, *a.* असमीक्ष्य कृतः -ता -तं, अनालोचितः -ता -तं, अपरीक्षितः -ता -तं.

ILL-AFFECTED, *a.* अहितः -ता -तं, विरक्तः -क्ता -क्तं, द्रोहबुद्धिः -द्धिः -द्धि, अहितैषी -षिणी -षि (न्), अपकारार्थी -र्थिनी -र्थि (न्); 'to be ill-affected,' विरक्तीभू, अभिद्रुह् (c. 4. -द्रुह्यति -द्रोग्धुं).

ILLACERABLE, *a.* अविदार्य्यः -र्य्या -र्य्यं, अविदारणीयः -या -यं, अच्छेदनीयः -या -यं.

ILLAPSE, *s.* निपतनं, प्रपतनं, प्रवेशः, अकस्माद् आक्रमणं.

To ILLAQUEATE, *v. a.* उन्माथे or पाशे पत् (c. 10. पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाश (nom. पाशयति -यितुं), पाशीकृ.

ILLAQUEATION, *s.* उन्माथे पातनं, जाले बन्धनं, पाशीकरणं.

ILL-ARRANGED, *a.* दुष्क्रमः -मा -मं, दुर्विरचितः -ता -तं, दुर्विहितः -ता -तं.

ILLATION, *s.* अनुमानं, अनुमितिः *f.*, अपवाहः, अपोहः -हनं, अभ्यूहः.

ILLATIVE, *a.* आनुमानिकः -की -कं, आनुषङ्गिकः -की -कं, यौक्तिकः -की -कं.

ILLATIVELY, *adv.* अनुमानेन, अनुमानतस्, प्रयोगतस्, अपवाहेन.

ILLAUDABLE, *a.* अप्रशंसनीयः -या -यं, अश्लाघ्यः -घ्या -घ्यं, अश्लाघनीयः -या -यं.

ILL-BEHAVED, *a.* *See* ILL-BRED.

ILL-BRED, *a.* दुर्विनीतः -ता -तं, अविनीतः -ता -तं, अनीतः -ता -तं, दुर्विनयः -या -यं, अविनयः -या -यं, विनयरोधी -धिनी -धि (न्), विनयप्रमाथी -थिनी -थि (न्), विनयापेतः -ता -तं, अशिष्टः -ष्टा -ष्टं, विशीलः -ला -लं, कुशीलः -ला -लं, दुःशीलः -ला -लं, असभ्यः -भ्या -भ्यं, दुराचारः -रा -रं, दुश्चेष्टितः -ता -तं, दुर्वृत्तः -त्ता -त्तं, व्यभिचारी -रिणी -रि (न्), असम्यक्कारी &c.

ILL-BREEDING, *s.* अविनयः, दुर्विनीतता, कुशीलता, दुःशीलता, अशिष्टता, असभ्यता, विनयभङ्गः, शीलवञ्चना.

ILL-CONTRIVED, *a.* दुर्घटितः -ता -तं, दुर्णीतः -ता -तं, अपक्कः -क्का -क्कं.

ILL-CONDITIONED, *a.* दुःस्थः -स्था -स्थं, दुःस्थितः -ता -तं, दुर्वृत्तिः -त्तिः -त्ति.

ILL-CONDUCTED, *a.* दुर्णीतः -ता -तं, दुर्घटितः -ता -तं, असम्यग् घटितः -ता -तं.

ILL-DRESSED, *a.* दुर्वासाः -साः -सः (स्), कुवेष्टितः -ता -तं, कुप्रावृतः -ता -तं.

ILLEGAL, *a.* स्मृतिविरुद्धः -द्धा -द्धं, व्यवहारविरुद्धः -द्धा -द्धं, नियमविरुद्धः -द्धा -द्धं, व्यवस्थाविरुद्धः -द्धा -द्धं, स्मृत्यपेतः -ता -तं, अस्मार्त्तः -र्त्ती -र्त्तं, शास्त्रविरुद्धः -द्धा -द्धं, धर्म्मरोधी -धिनी -धि (न्), अधर्म्यः -र्म्या -र्म्यं, निषिद्धः -द्धा -द्धं, अव्यवस्थितः -ता -तं, अशास्त्रिकः -का -कं, अशास्त्रीयः -या -यं, अवैधः -धी -धं, अविधिः -धिः -धि, विधिभञ्जकः -का -कं.

ILLEGALITY, *s.* स्मृतिविरोधः -विरुद्धता, व्यवहारविरोधः, नियमविरोधः, शास्त्रविरोधः, अस्मृतिः *f.*, अधर्म्यता, धर्म्मविरोधः, व्यवस्थाविरोधः, अव्यवस्था, विकर्म्म *n.* (न्), विकर्म्मक्रिया, व्यवस्थातिक्रमः, व्यवहारातिक्रमः, नियमभङ्गः, विधिभङ्गः, व्यवस्थाभङ्गः.

ILLEGALLY, *adv.* स्मृतिविरोधेन, व्यवहारविरुद्धं, नियमविरुद्धं, शास्त्रविरोधेन, धर्म्मविरुद्धं; 'acting illegally,' विकर्म्मकृत् *m.f.n.*, विकर्म्मिकः -की -कं.

ILLEGIBILITY, *s.* अस्पष्टता, अव्यक्तत्वं, अस्पष्टाक्षरत्वं, दुर्वाच्यता.

ILLEGIBLE, *a.* अस्पष्टाक्षरः -रा -रं, अव्यक्ताक्षरः -रा -रं, दुर्वाच्यः -च्या -च्यं, अस्पष्टवर्णः -र्णा -र्णं.

ILLEGITIMACY, *s.* अनौरसता, विजातता, विजन्म *n.* (न्), वैजात्यं, अनभिजातत्वं, जारजत्वं, जारजातता, उपस्त्रीजातत्वं, दासीजातत्वं, जन्मवैलक्षण्यं.

ILLEGITIMATE, *a.* विजातः -ता -तं, विजनितः -ता -तं, विजन्मा -न्मा -न्म (न्), विजातीयः -या -यं, अधर्म्मजः -जा -जं, अनभिजातः -ता -तं, उपस्त्रीजातः &c., जारजातः &c., जारजः -जा -जं, असतीप्रसूतः -ता -तं, कृष्णपक्षजः -जा -जं, कृष्णपक्षीयः -या -यं; 'an illegitimate child,' अनौरसः -सी, कुण्डः -ण्डी *m.* (न्), उपस्त्रीसुतः -ता, उपस्त्रीपुत्रः -त्री, जारजः -जा, दासीपुत्रः, कौलटेरः -रा, कौलटेयः -यी, कौलटिनेयः -यी, बन्धुलः, बान्धकिनेयः; 'of a widow,' गोलकः.—(Spurious) कृत्रिमः -मा -मं, कल्पितः -ता -तं.—(Unlawful) व्यवहारविरुद्धः -द्धा -द्धं, अव्यवहारिकः -की -कं, नियमविरुद्धः -द्धा -द्धं, अधर्म्यः -र्म्या -र्म्यं, निषिद्धः -द्धा -द्धं.

ILLEGITIMATELY, *adv.* विजन्मना, जन्मवैलक्षण्येन, वैजात्येन, कुण्डवत्, अधर्म्मेण.—(Unlawfully) व्यवहारविरुद्धं, नियमविरुद्धं.

ILL-FAME, *s.* अपयशस् *n.*, अयशस् *n.*, अकीर्त्तिः *f.*, अख्यातिः *f.*, अप्रतिष्ठा.

ILL-FATED, *a.* दैवोपहतः -ता -तं, हतदैवः -वी -वं, दुर्दैवग्रस्तः -स्ता -स्तं, दुर्भाग्यः -ग्या -ग्यं, उपहतकः -का -कं.

ILL-FAVORED, *a.* कुरूपः -पा -पी -पं, अपरूपः -पी -पं, कदाकारः -रा -रं, कुत्सितरूपः -पी -पं, असुन्दरः -री -रं, दुर्दर्शनः -ना -नं, अपलक्षणी -णिनी -णि (न्).

ILL-FITTED, *a.* अयोग्यः -ग्या -ग्यं, अयुक्तः -क्ता -क्तं, अक्षमः -मा -मं.

ILL-FORMED, *a.* कुरूपी -पिणी -पि (न्), विरूपः -पी -पं, अपरूपः -पी -पं.

ILL-GOTTEN, *a.* द्रोहार्ज्जितः -ता -तं, अन्यायोपार्ज्जितः -ता -तं, वृजिनार्ज्जितः -ता -तं.

ILLIBERAL, *a.* अनुदारः -रा -रं, कृपणः -णा -णं, अदानशीलः -ला -लं, अत्यागशीलः -ला -लं, अदाता -त्री -तृ (तृ), अवदान्यः -न्या -न्यं, कुत्सितः -ता -तं, मत्सरी -रिणी -रि (न्), कृपणबुद्धिः -द्धिः -द्धि, कृपणधीः -धीः -धि, कृपणचेताः -ताः -तः (स्), कृपणस्वभावः -वा -वं, हीनचेताः &c., नीचमनाः -नाः -नः (स्).

ILLIBERALITY, *s.* कार्पण्यं, कृपणता, अनौदार्य्यं, अनुदारता, अदानशीलता, बुद्धिकार्पण्यं, स्वभावकार्पण्यं, कृपणबुद्धित्वं, स्वभावदीनता, स्वभावदैन्यं, बुद्धिनीचता, अत्यागशीलता, अवदान्यता, मात्सर्य्यं.

ILLIBERALLY, *adv.* अनुदारं, कृपणं, कार्पण्येन, सकार्पण्यं, कृपणवत्.

ILLICIT, *a.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, अधर्म्यः -र्म्या -र्म्यं, धर्म्मविरुद्धः -द्धा -द्धं, धर्म्मरोधी -धिनी -धि (न्), नियमविरुद्धः -द्धा -द्धं, व्यवहारविरुद्धः -द्धा -द्धं, अव्यवहारिकः -की -कं, निवारणीयः -या -यं, निवार्य्यः -र्य्या -र्य्यं.

ILLIMITABLE, *a.* अनन्त्यः -न्त्या -न्त्यं, अनन्तः -न्ता -न्तं, अनन्तवान् -वती -वत् (त्), अप्रमेयः -या -यं, अमेयः -या -यं.

ILLIMITED, *a.* अनन्तः -न्ता -न्तं -न्तकः -का -कं, अमितः -ता -तं, अपरिमितः -ता -तं, निरवधिः -धिः -धि, अपर्य्यन्तः -न्ता -न्तं, अमर्य्यादः -दा -दं, अशेषः -षा -षं, असीमकः -का -कं.

ILLITERATE, *a.* निरक्षरः -रा -रं, अनक्षरः -रा -रं, अशिक्षितः -ता -तं, विद्याहीनः -ना -नं, ज्ञानहीनः -ना -नं, अपण्डितः -ता -तं, अप्राज्ञः -ज्ञा -ज्ञं, अकृतबुद्धिः -द्धिः -द्धि, असंस्कृतबुद्धिः -द्धिः -द्धि, अकृतः -ता -तं, अविद्यः -द्या -द्यं.

ILLITERATENESS, *s.* अपाण्डित्यं, विद्याहीनता, विद्याभावः, अप्राज्ञता, अविद्या, अशिक्षितत्वं, अकृतबुद्धित्वं.

ILL-JUDGED, *a.* अविचार्य्य or अविमृश्य or अविवेचनपूर्व्वं कृतः -ता -तं.

ILL-JUDGING, *a.* विवेकशून्यः -न्या -न्यं, अविवेकी -किनी -कि (न्).

ILL-LOOKING, *a.* दुर्दर्शनः -ना -नं, कुदर्शनः -ना -नं, कुरूपः -पी -पं.

ILL-LUCK, *s.* दुर्दैवं, दुर्भाग्यं, दौर्भाग्यं, दुर्गतिः *f.*, दौर्गत्यं, अमङ्गलं, अकुशलं, अभद्रं, अरिष्टं, व्यसनं, [illegible] विपद् *f.*, दुरदृष्टं, दुर्जातं, अनिष्टपातः, अलक्ष्मीः.

ILL-MANNERED, *a.* कुशीलः -ला -लं, वामशीलः -ला -लं, दुःशीलः -ला -लं, विशीलः -ला -लं, दुर्विनीतः -ता -तं, दुर्विनयः -या -यं, दुराचारः -रा -रं, असत्कृतः -ता -तं.

ILL-NATURE, *s.* भावदुष्टता, कुशीलता, वामशीलता, दुःशीलता, दौःशील्यं, भावप्रतीपता, भावकार्कश्यं, स्वभाववक्रता, कर्कशभावत्वं, निकृतिः *f.*, प्रकृतिवक्रता.

ILL-NATURED, *a.* दुष्प्रकृतिः -तिः -ति, दुष्टप्रकृतिः -तिः -ति, दुष्टस्वभावः -वा -वं, कर्कशभावः -वा -वं, प्रतीपस्वभावः -वा -वं, वक्रप्रकृतिः -तिः -ति, दुःशीलः -ला -लं, कुशीलः -ला -लं, वामशीलः -ला -लं, कटुस्वभावः -वा -वं, नैकृतिकः -की -कं.

ILL-NATUREDLY, *adv.* स्वभावकार्कश्यात्, प्रकृति[illegible]त्वात्, कर्कशं, वामशीलत्वात्.

ILLNESS, *s.* रोगः, व्याधिः *m.*, रोगिता, आमयः, रुक् *f.* (ज्), रुजा, पीडा, अस्वास्थ्यं, अस्वस्थता, असुस्थता, क्लेशः, दुःखं, रुग्णता, आर्त्तिः *f.*, उपतापः, कष्टं, विकारः, विकृतिः *f.*, विकरः, अमः, अमसः, तापः; 'dangerous illness,' सन्निपातकः.

ILLOGICAL, *a.* न्यायविरुद्धः -द्धा -द्धं, न्यायविपरीतः -ता -तं, अन्यायी -यिनी -यि (न्), अन्याय्यः -य्या -य्यं, अन्यायानुसारी -रिणी -रि (न्), अन्यायसिद्धः -द्धा -द्धं, अयुक्तिसिद्धः -द्धा -द्धं, अनानुमानिकः -की -कं, अतार्किकः -की -कं; 'illogical conclusion,' अविनिगमः.

ILLOGICALLY, *adv.* न्यायविरुद्धं, न्यायविरोधेन, अन्यायानुसारेण, अयुक्त्या.

ILL-OMENED, *a.* अनिष्टलक्षणः -णा -णं, अनिष्टशकुनः -ना -नं, अशस्तः -स्ता -स्तं.

ILL-STARRED, *a.* हतदैवः -वा -वं, दैवोपहतः -ता -तं, उपहतकः -का -कं, दुर्भाग्यः -ग्या -ग्यं, मन्दभाग्यः -ग्या -ग्यं.

ILL-TEMPERED, *a.* दुष्प्रकृतिः -तिः -ति, कर्कशभावः -वा -वं. *See* ILL-NATURED.

ILL-TIMED, *a.* अप्राप्तावसरः -रा -रं, अप्राप्तकालः -ला -लं, अकालिकः -की -कं, असामयिकः -की -कं, अप्राप्तसमयः -या -यं, अनवसरः -रा -रं.

ILL-TRAINED, *a.* दुर्विनीतः -ता -तं, अविनीतः -ता -तं, अशिक्षितः -ता -तं.

To **ILL-TREAT**, *v. a.* अपकृ, अपकारं कृ, द्रोहं कृ, अर्द् (c. 10. अर्दयति -यितुं).

ILL-TREATED, *p. p.* अपकृतः -ता -तं, कृतापकारः -रा -रं, पीडितः -ता -तं, अर्दितः -ता -तं.

ILL-TURN, *s.* अपकृतं, अपकारः, अप्रियं, अहितं, हिंसा, द्रोहः, क्षतिः *f.*

To **ILLUDE**, *v. a.* वञ्च् (c. 10. वञ्चयते -यितुं), प्रवञ्च्, मुह् (c. 10. मोहयति -यितुं), छल् (c. 10. छलयति -यितुं), प्रतॄ (c. 10. -तारयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), प्रलुभ् (c. 10. -लोभयति -यितुं).

ILLUDED, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, वञ्चितः -ता -तं.

To **ILLUME, ILLUMINE, ILLUMINATE**, *v. a.* द्युत् (c. 10. द्योतयति -यितुं), प्रद्युत्, उद्द्युत्, विद्युत्, प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, दीप् (c. 10. दीपयति -यितुं), विदीप्, उद्दीप्, प्रदीप्, विराज् (c. 10. -राजयति -यितुं), भास् (c. 10. भासयति -यितुं), प्रभास्, उद्भास्, अवभास्, भ्राज् (c. 10. भ्राजयति -यितुं), रञ्ज् (c. 10. रञ्जयति -यितुं), तेजसा रञ्ज्, विमल (nom. विमलयति -यितुं), विमलीकृ.—(Illuminate a manuscript) पत्रं रञ्ज्.

ILLUMINATED, ILLUMINED, *p. p.* द्योतितः -ता -तं, प्रद्योतितः -ता -तं, उद्द्योतितः -ता -तं, प्रकाशितः -ता -तं, विकाशितः -ता -तं, दीपितः -ता -तं, आदीपितः -ता -तं, उद्दीपितः -ता -तं, प्रदीपितः -ता -तं, राजितः -ता -तं, विराजितः -ता -तं, उज्ज्वलितः -ता -तं, भासितः -ता -तं, अवभासितः -ता -तं, उद्भासितः -ता -तं, चकासितः -ता -तं, रञ्जितः -ता -तं.

ILLUMINATION, *s.* द्योतनं, प्रद्योतनं, उद्द्योतः, द्युतिः *f.*, प्रकाशनं, विकाशनं, दीपनं, दीप्तिः *f.*, प्रदीपनं, प्रदीप्तिः *f.*, उद्दीपनं, उज्ज्वलनं, उज्ज्वलता, उद्भासः, भ्राजिष्णुता, प्रकाशता.—(Rows of lights displayed in token of joy) उत्सवकाले हर्षसूचका दीपमाला -लिका or दीपशृङ्खला or दीपसमूहः.—(Of a manuscript) पत्ररञ्जनं, कलधौतलिपिः *f.*

ILLUMINATOR, *s.* दीपकः, प्रदीपकः, प्रकाशकः, द्युतिकरः, दीप्तिकर्त्ता *m.* (र्तृ); 'of a manuscript,' पत्ररञ्जकः.

ILLUSION, *s.* माया, मोहः, व्यामोहः, भ्रमः, भ्रान्तिः *f.*, विभ्रमः, मतिविभ्रमः, आभासः, प्रपञ्चः, इन्द्रजालं, जालं, अलीकता, कूटः, अनृतं, आवरणं, अविद्या; 'power of illusion,' मायाशक्तिः *f.*, आवरणशक्तिः *f.*

ILLUSIVE, ILLUSORY, *a.* मायी -यिनी -यि (न्), मायिकः -की -कं, मायावी -विनी -वि (न्), मायामयः -यी -यं, मोही -हिनी -हि (न्), जाली -लिनी -लि (न्), इन्द्रजालिकः -की -कं, ऐन्द्रजालिकः -की -कं, भ्रमी -मिणी -मि (न्), भ्रान्तिजनकः -का -कं, वञ्चकः -का -कं, अलीकः -का -कं.

To **ILLUSTRATE**, *v. a.* (Make clear, brighten) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, शुभ् (c. 10. शोभयति -यितुं), विमल (nom. विमलयति -यितुं), विमलीकृ, द्युत् (c. 10. द्योतयति -यितुं), दीप् (c. 10. दीपयति -यितुं).—(Elucidate, explain) व्याख्या (c. 2. -ख्याति -तुं), स्पष्टीकृ, व्यक्तीकृ, व्याकृ, सुस्पष्टीकृ, स्पष्ट (nom. स्पष्टयति -यितुं), व्याहृ (c. 1. -हरति -हर्तुं), उदाहृ, परिशुध् (c. 10. -शोधयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), विवरणं कृ, प्रकाश्, दृष्टान्तीकृ, दृष्टान्तेन or निदर्शनेन व्याख्या or प्रकाश्.

ILLUSTRATED, *p. p.* प्रकाशितः -ता -तं, स्पष्टीकृतः -ता -तं, व्याख्यातः -ता -तं, उदाहृतः -ता -तं, समुदाहृतः -ता -तं, द्योतितः -ता -तं, व्याकृतः -ता -तं, निरूपितः -ता -तं, वर्णितः -ता -तं, दार्ष्टान्तिकः -की -कं, उपमितः -ता -तं.

ILLUSTRATION, *s.* उदाहरणं, उदाहारः, समुदाहरणं, निदर्शनं, दृष्टान्तः, उत्प्रेक्षा, उद्देशः, उपोद्घातः, व्याख्या, प्रदर्शनं; 'for an illustration,' निदर्शनार्थं, प्रदर्शनार्थं.

ILLUSTRATIVE, *a.* प्रकाशकः -का -कं, उद्देशकः -का -कं, दार्ष्टान्तिकः -की -कं.

ILLUSTRATIVELY, *adv.* निदर्शनार्थं, प्रदर्शनार्थं, दृष्टान्तक्रमेण, उदाहरणार्थं.

ILLUSTRATOR, *a.* प्रकाशकः, अर्थप्रकाशकः, उद्देशकः, अर्थव्याख्याता *m.* (तृ), अर्थप्रदर्शकः, निदर्शनकृत्, दृष्टान्तकारी *m.* (न्), उदाहर्त्ता *m.* (र्तृ).

ILLUSTRIOUS, *a.* विश्रुतः -ता -तं, ख्यातः -ता -तं, विख्यातः -ता -तं, सुख्यातः -ता -तं, यशस्वी -स्विनी -स्वि (न्), महायशाः -शाः -शः (स्), महायशस्कः -स्का -स्कं, प्रथितः -ता -तं, प्रसिद्धः -द्धा -द्धं, कीर्त्तिमान् -मती -मत् (त्), कीर्त्तितः -ता -तं, श्रीमान् -मती -मत् (त्), दीप्तिमान् &c., यशस्वान् -स्वती -स्वत् (त्), पृथुप्रथः -था -थं, प्रतिपत्तिमान् -मती -मत् (त्), प्रतिष्ठः -ष्ठा -ष्ठं, प्रतिष्ठान्वितः -ता -तं, सुप्रतिष्ठः -ष्ठा -ष्ठं, लोकविश्रुतः -ता -तं, परिख्यातः -ता -तं, लोकप्रथितः -ता -तं, विशालः -ला -लं, प्रतीतः -ता -तं, विज्ञातः -ता -तं, द्वात्रिंशल्लक्षणोपेतः -ता -तं, लब्धनामा -मा -म (न्).—(Eminent) उत्कृष्टः -ष्टा -ष्टं, प्रमुखः -खा -खं, महाभागः -गा -गं, विशिष्टः -ष्टा -ष्टं, महान् -हती -हत् (त्), श्लिष्टः -ष्टा -ष्टं; 'rendering illustrious,' यशस्करः -री -रं, यशस्यः -स्या -स्यं, कीर्त्तिकरः -री -रं.

ILLUSTRIOUSLY, *adv.* महायशसा, महाकीर्त्तिपूर्वं, उत्कृष्टं, विशिष्टं, विश्रुतं, प्रथितं, प्रसिद्धं, यशस्यं.

ILLUSTRIOUSNESS, *s.* विश्रुतिः *f.*, कीर्त्तिमत्त्वं, ख्यातिमत्त्वं, यशस्विता, उत्कृष्टता.

ILL-WILL, *s.* दुष्टभावः, दुष्टबुद्धिः *f.*, द्रोहबुद्धिः *f.*, दुर्बुद्धिः *f.*, द्रोहचिन्तनं, द्रोहः, मात्सर्यं, असूया, अभ्यसूया, द्वेषः, अहितत्वं, अप्रीतिः *f.*

IMAGE, *s.* प्रतिमा, प्रतिमानं, प्रतिरूपं, प्रतिमूर्त्तिः *f.*, मूर्त्तिः *f.*, प्रतिकृतिः *f.*, प्रतिकायः, उपमा -मानं, प्रतियातना, प्रतिच्छन्दः, प्रतिनिधिः *m.*, अर्चा, विग्रहः.—(Reflected image) प्रतिबिम्बं, प्रतिच्छाया, बिम्बः -म्बं, प्रतिच्छन्दः -न्दकं.—(Idol) देवताप्रतिमा.—(Iron image) लोहप्रतिमा, सूर्मी, स्थूणा.—(Mental image) मनःकल्पना, मनःसङ्कल्पः, मनसिजं. 'image maker,' प्रतिमाकारः, उपमाता *m.* (तृ); 'a son the image of his father,' पितृरूपः पुत्रः.

To **IMAGE**, *v. a.* (Form an image of) बिम्ब (nom. बिम्बयति -यितुं), प्रतिबिम्ब, प्रतिमानं कृ, प्रतिरूपं कृ, प्रतिमूर्त्तिं कृ.—(In the mind) मनसा क्लृप् (c. 10. कल्पयति -यितुं) or संक्लृप्.

IMAGED, *p. p.* बिम्बितः -ता -तं, प्रतिबिम्बितः -ता -तं, बिम्बगतः -ता -तं, बिम्बागतः -ता -तं, कल्पितः -ता -तं; 'in the water,' जलप्रतिबिम्बितः -ता -तं; 'in the mind,' मनःकल्पितः -ता -तं.

IMAGERY, *s.* (Forms of the fancy) मनःकल्पना, मनःकल्पितं, कल्पना, मनःसङ्कल्पः, मनोवासना, मनःसृष्टिः *f.*, मनःपरिकल्पनं, मनोवासना, वासनाकल्पितं.—(Figurative style) व्यञ्जनावृत्तिः *f.*, व्यञ्जनं, व्यङ्ग्यः, उपलक्षणं, लक्षणा, निदर्शनं.

IMAGE-WORSHIP, *s.* प्रतिमापूजा, देवताभ्यर्चा, प्रतिमासेवा, मूर्त्तिसेवा.

IMAGINABLE, *a.* विभावनीयः -या -यं, विभाव्यः -व्या -व्यं, भावनीयः -या -यं, मनन्यः -न्या -न्यं, बोध्यः -ध्या -ध्यं, बोधनीयः -या -यं, मनःकल्पनीयः -या -यं, मनसा कल्पनीयः -या -यं, चिन्तनीयः -या -यं, चिन्त्यः -न्त्या -न्त्यं, बोधगम्यः -म्या -म्यं, सम्भावनीयः -या -यं.

IMAGINARY, *a.* मनःकल्पितः -ता -तं, वासनाकल्पितः -ता -तं, बुद्धिकल्पितः -ता -तं, मनसा कल्पितः -ता -तं, काल्पनिकः -की -कं, मनसिजः -जा -जं, मनोजः -जा -जं, मनोभवः -वा -वं, मानसिकः -की -कं, मनोगतः -ता -तं, सङ्कल्पजः -जा -जं, मनःसृष्टः -ष्टा -ष्टं, मनोरथसृष्टः -ष्टा -ष्टं,

चिन्तामात्रकल्पित: -ता -तं, चिन्तामात्रेण परिकल्पित: -ता -तं, चिन्ताभव: -वा -वं, अमूलक: -का -कं, मायामय: -यी -यं, असत्य: -त्या -त्यं.

IMAGINATION, *s.* भावना -नं, विभावना -नं, सङ्कल्प:, कल्पना, मन:कल्पना, वासना, चिन्ता.—(Idea) बुद्धि: *f.*, मति: *f.*, मनोगतं, मन:कल्पितं, मनसिजं, मनोजं, बोध:.—(Faculty of conception) कल्पनाशक्ति: *f.*, भावनाशक्ति: *f.*, विभावनाशक्ति: *f.*, उपलब्धि: *f.*, अनुभव:.

IMAGINATIVE, *a.* विभावक: -का -कं, कल्पक: -का -कं, परिकल्पक: -का -कं, काल्पनिक: -की -कं, भावनापर: -रा -रं, वासनापर: -रा -रं, विभावनशील: -ला -लं.

To IMAGINE, *v. a.* (Form in the mind) मनसा क्लृप् (c. 10. कल्पयति -यितुं) or संक्लृप् or परिक्लृप् or भू (c. 10. भावयति -यितुं) or विभू or सम्भू, मनसा सृज् (c. 6. सृजति, स्रष्टुं) or कृ.

To IMAGINE, *v. n.* (Think, conceive) मन् (c. 4. मन्यते, मन्तुं), चिन्त् (c. 10. चिन्तयति -यितुं), भू (c. 10. भावयति -यितुं), विभू, सम्भू, बुध् (c. 1. बोधति -धितुं), तर्क् (c. 10. तर्कयति -यितुं), ध्यै (c. 1. ध्यायति, ध्यातुं), अवगम् (c. 1. -गच्छति -गन्तुं), उपलभ् (c. 1. -लभते -लब्धुं), अवे (c. 2. अवैति -तुं, rt. इ), अनुभू; 'I imagine,' मन्ये, 'don't imagine,' मैवं मंस्था:.

IMAGINED, *p. p.* चिन्तित: -ता -तं, भावित: -ता -तं, विभावित: -ता -तं, मत: -ता -तं, मन:कल्पित: -ता -तं, मनसा कल्पित: -ता -तं, वासनाकल्पित: -ता -तं, मन:सृष्ट: -ष्टा -ष्टं, बुद्ध: -द्धा -द्धं, उपलब्ध: -ब्धा -ब्धं, अवगत: -ता -तं, मनोगत: -ता -तं, अनुभूत: -ता -तं.

IMBALM, IMBARGO, IMBARK. *See* EMBALM, &c.

IMBECILE, *a.* दुर्बल: -ला -लं, अल्पबल: -ला -लं, कृपण: -णा -णं, क्षीणबल: -ला -लं, अल्पशक्ति: -क्ति: -क्ति, क्लीव: -वा -वं.—(In mind) न्यूनबुद्धि: -द्धि: -द्धि, न्यूनधी: -धी: -धि, अल्पबुद्धि: -द्धि: -द्धि, बालिशमति: -ति: -ति, कृपणबुद्धि: &c.

IMBECILITY, *s.* दौर्बल्यं, दुर्बलता, कार्पण्यं, कृपणता, क्लीवता, क्लैब्यं, अतेजस् *n.*, अयोग्यता, बालिश्यं.—(Mental) बुद्धिन्यूनता, न्यूनबुद्धित्वं, अल्पबुद्धित्वं, बालिशमतित्वं, बुद्धिकार्पण्यं.

IMBEDDED, *a.* अन्तर्गत: -ता -तं, निहित: -ता -तं, निविष्ट: -ष्टा -ष्टं; 'in rocks,' पाषाणान्तर्गत: -ता -तं.

To IMBIBE, *v. a.* निपा (c. 1. -पिबति -पातुं), उत्पा, आपा, शुष् (c. 10. शोषयति -यितुं), उच्छुष्, ग्रस् (c. 1. ग्रसते -सितुं); 'water is imbibed,' पयो निपीयते.—(Receive in the mind) मनसा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or उपलभ् (c. 1. -लभते -लब्धुं).

IMBIBED, *p. p.* निपीत: -ता -तं, आपीत: -ता -तं, उपलब्ध: -ब्धा -ब्धं.

To IMBITTER, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), दुःखं जन् (c. 10. जनयति -यितुं), निरानन्दं -न्दां -न्दं कृ, सदुःखं -खां -खं कृ, दुःखमयं -यीं -यं कृ, उग्रीकृ, कटूकृ, तिग्मीकृ, तीव्रीकृ, कठोरीकृ, निष्ठुरीकृ.

IMBODIED, IMBODY, IMBOLDEN. *See* EMBODIED, &c.

To IMBORDER, *v. a.* प्रान्त (nom. प्रान्तयति -यितुं), पर्य्यन्तं कृ, सीमां कृ.

To IMBOSOM, *v. a.* (Hold in the bosom) क्रोडीकृ, क्रोडे कृ, अङ्के कृ or रक्ष् (c. 1. रक्षति -क्षितुं) or पाल् (c. 10. पालयति -यितुं), भुजाभ्यां पीड् (c. 10. पीडयति -यितुं), भुजापीडं कृ.—(Inclose, surround) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिगम् (c. 1. -गच्छति -गन्तुं), परिसृ (c. 1. -सरति -सर्त्तुं).

IMBOSOMED, *p. p.* क्रोडीकृत: -ता -तं, अन्तर्गत: -ता -तं, परिवेष्टित: -ता -तं.

To IMBROWN, *v. a.* कपिश (nom. कपिशयति -यितुं), कपिशीकृ, श्यावीकृ, पिङ्गलीकृ, ताम्रीकृ, ताम्रवर्णं -र्णां -र्णं कृ, आताम्रं -म्रां -म्रं कृ.

IMBROWNED, *p. p.* कपिशित: -ता -तं, कपिशीकृत: -ता -तं, पिङ्गलीकृत: -ता -तं.

To IMBRUE, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), क्लिद् (c. 10. क्लेदयति -यितुं), उक्ष् (c. 1. उक्षति -क्षितुं), समुक्ष्, अभ्युक्ष्, लिप् (c. 6. लिम्पति, लेप्तुं), अञ्ज् (c. 7. अनक्ति, अंक्तुं).

IMBRUED, *p. p.* (In blood) असृग्लिप्त: -प्ता -प्तं, शोणिताक्त: -क्ता -क्तं, शोणितोक्षित: -ता -तं, रक्तक्लिन्न: -न्ना -न्नं, रक्ताक्त: -क्ता -क्तं.

To IMBUE, *v. a.* (Dye) रञ्ज् (c. 10. रञ्जयति -यितुं), अभिरञ्ज्.—(Cause to learn) उपदिश् (c. 6. -दिशति -देष्टुं), शिक्ष् (c. 10. शिक्षयति -यितुं).

IMBUED, *p. p.* रञ्जित: -ता -तं, शिक्षित: -ता -तं, उपदिष्ट: -ष्टा -ष्टं.

IMITABLE, *a.* अनुकरणीय: -या -यं, अनुगम्य: -म्या -म्यं, अनुगमनीय: -या -यं, अनुकार्य्य: -र्य्या -र्य्यं, अनुवर्त्तनीय: -या -यं, अनुवृत्य: -त्या -त्यं.

To IMITATE, *v. a.* अनुकृ (c. 8. -करोति -कुरुते -कर्त्तुं), अनुगम् (c. 1. -गच्छति -गन्तुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), समनुवृत्, अनुया (c. 2. -याति -तुं), समनुया, अनुसृ (c. 1. -सरति -सर्त्तुं), अनुव्रज् (c. 1. -व्रजति -जितुं), अनुहृ (c. 1. -हरति -ते -हर्त्तुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अनुचर् (c. 1. -चरति -रितुं), अन्वि (c. 2. -एति -तुं), विडम्ब् (c. 10. -डम्बयति -यितुं).

IMITATED, *p. p.* अनुकृत: -ता -तं, अनुगत: -ता -तं, अनुवृत्त: -त्ता -त्तं.

IMITATION, *s.* अनुकार:, अनुकरणं, अनुक्रिया, अनुकृति: *f.*, अनुकर्म्म *n.* (न्), अनुगम:, अनुगति: *f.*, अनुवृत्ति: *f.*, अनुवर्त्तनं, अनुसरणं, अनुहार:, अनुसृष्टि: *f.*, अनुष्ठानं, विडम्बनं -ना.—(A copy, resemblance) प्रतिरूपं, अनुरूपं, आदर्श:, सादृश्यं, औपम्यं, उपमा, प्रतिमानं.

IMITATIVE, *a.* अनुकारी -रिणी -रि (न्), अनुकरणशील: -ला -लं, अनुगामी -मिनी -मि (न्), अनुगमनशील: -ला -लं, अनुगतिक: -की -कं, गतानुगतिक: -की -कं.

IMITATOR, *s.* अनुकारी *m.* (न्), अनुकारक:, अनुकर्त्ता *m.* (र्त्तृ), अनुगामी *m.* (न्), अनुगतिक:, अनुयायी *m.* (न्), अनुवर्त्ती *m.* (न्), अनुचारी *m.* (न्), गतानुगतिक:.

IMMACULATE, *a.* अकल्मष: -षा -षं, निष्कल्मष: -षा -षं, अकल्मष: -षा -षं, निष्कलङ्क: -ङ्का -ङ्कं, [illegible] -न: (स), निर्मल: -ला -लं, विमल: -ला -लं, निर्दोष: -षा -षं, निरपराध: -धा -धं, अनिन्द्य: -न्द्या -न्द्यं.

IMMANENT, *a.* निष्ठ: -ष्ठा -ष्ठं, अन्तर्भव: -वा -वं, अन्तरस्थ: -स्था -स्थं.

IMMANITY, *s.* क्रूरता, दारुणता, क्रौर्य्यं, दारुण्यं, निष्ठुरता, नैष्ठुर्य्यं.

IMMARCESSIBLE, *a.* अम्लानी -निनी -नि (न्), अम्लानि: -नि: -नि, अनश्वर: -रा -रं, अविनश्वर: -रा -रं, अव्यय: -या -यं, अनाश्य: -श्या -श्यं, अजर: -रा -रं.

To IMMASK, *v. a.* कपटवेशेन or छद्मवेशेन छद् (c. 10. छादयति -यितुं), or आकारगोपनं कृ, विडम्ब् (c. 10. -डम्बयति -यितुं).

IMMATERIAL, *a.* (Incorporeal, not consisting of matter) अमूर्त्तिक: -का -कं, अमूर्त्त: -र्त्ता -र्त्तं, अमूर्त्तिमान् -मती -मत् (त्), अमूर्त्तिमय: -यी -यं, अशरीरी -रिणी -रि (न्), अशारीरिक: -की -कं, अदैहिक: -की -कं, अदेही -हिनी -हि (न्), अवास्तव: -वी -वं, आत्मीय: -या -यं, आत्मिक: -की -कं, निरवयव: -वा -वं.—(Unimportant) अगुरु: -र्वी -रु, लघु: -घु: -घु, अल्पार्थ: -र्था -र्थं, अगुर्वर्थ: -र्था -र्थं, लघ्वर्थ: -र्था -र्थं, अनावश्यक: -की -कं, अल्पप्रभाव: -वा -वं, निष्प्रयोजन: -ना -नं.

IMMATERIALISM, *s.* देहभिन्नात्मवाद:, आत्मास्तित्ववाद:, आत्मास्तित्वमतं.

IMMATERIALIST, *s.* अमूर्त्तिवादी *m.* (न्), निराकारवादी *m.*, आत्मवादी.

IMMATERIALITY, *s.* अमूर्त्ति: *f.*, अमूर्त्तिमत्त्वं, मूर्त्तिहीनता, अशरीरिता, निरवयवत्वं, आत्मता -त्वं, अपाञ्चभौतिकता, निराकारत्वं, अमावयवत्वं.

IMMATERIALLY, *adv.* अनावश्यकं, अल्पप्रभावेण, लघु, निष्प्रयोजनं.

IMMATURE, *a.* अपक्व: -क्वा -क्वं, अपरिपक्व: -क्वा -क्वं, अपक्लिम: -मा -मं, अविपक्लिम: -मा -मं, अपरिणत: -ता -तं, अपाक: -का -कं, अप्रौढ: -ढा -ढं, अपूर्ण: -र्णा -र्णं, अपूर्णकाल: -ला -लं, असम्पूर्ण: -र्णा -र्णं, असम्पूर्ण-

काल: -ला -लं, असम्पन्न: -न्ना -न्नं, असिद्ध: -द्धा -द्धं, आपक्क: -क्का -क्कं, अतिशीघ्र: -घ्रा -घ्रं, अपुष्कल: -ला -लं, अप्राप्तयौवन: -ना -नं.

IMMATURELY, *adv.* अपक्कं, अपरिपक्कं, प्राक्‌परिपाकात्, परिपाकात्पूर्व्वं, प्राक्‌पूर्व्वकालात्, पूर्णकालात्पूर्व्वं, अतिशीघ्रं.

IMMATURENESS, IMMATURITY, *s.* अपक्कता, अपरिपक्कता, अपक्कि: *f.*, अपाक:, अपरिपाक:, अविपाक:, अपरिणतत्वं, अपरिणाम:, अपरिणति: *f.*, अप्रौढता, अपूर्णता, असम्पूर्णता, असिद्धता, असिद्धि: *f.*, असम्पन्नता, अपुष्कलता, अपौष्कल्यं.

IMMEASURABLE, *a.* अप्रमेय: -या -यं, अपरिमेय: -या -यं, अमेय: -या -यं, दुष्प्रमेय: -या -यं, अपरिमाण: -णा -णं, अपरिमित: -ता -तं, अमित: -ता -तं.

IMMEASURABLENESS, *s.* अप्रमेयता, अपरिमेयत्वं, अमेयता, दुष्प्रमेयत्वं.

IMMEASURABLY, *adv.* अप्रमेयं, अपरिमेयं, अपरिमितं, अत्यन्तं.

IMMEDIATE, *a.* (Proximate) उपस्थ: -स्था -स्थं, उपस्थायी -यिनी -यि (न्), उपस्थित: -ता -तं, सन्निहित: -ता -तं, अन्तिक: -का -कं, आसन्न: -न्ना -न्नं, निकट: -टा -टं.—(Without a medium or intervention) अनन्तर: -रा -रं, अव्यवहित: -ता -तं, अव्यवधान: -ना -नं, निरन्तर: -रा -रं.—(Without the intervention of time, instant) साद्यस्क: -स्की -स्कं, सद्यस्क: -स्का -स्कं, तात्कालिक: -की -कं, साम्प्रतिक: -की -कं, वर्त्तमान: -ना -नं, आकालिक: -की -कं, अचिर: -रा -रं, शीघ्र: -घ्रा -घ्रं, क्षणान्तर: -रा -रं.—(Direct) अवक्र: -क्रा -क्रं, अजिह्म: -ह्मा -ह्मं, अकुटिल: -ला -लं.

IMMEDIATELY, *adv.* सद्यस्, सपदि, आपाततस्, अनन्तरं, तत्क्षणात्, तत्काले, तत्क्षणे, झटिति, क्षणान्तरं, सम्प्रति, वर्त्तमानकाले, द्राक्, शीघ्रं, आशु, अकालक्षेपेण, अविलम्बितं; 'immediately after,' अनन्तरं, समनन्तरं; 'immediately on,' is expressed by मात्रात्; as, 'immediately on leaving the ship,' नौकातो निर्गममात्रात्; 'immediately on laying hands,' हस्तार्पणमात्रात्.

IMMEDIATENESS, *s.* आनन्तर्य्यं, नैरन्तर्य्यं, साद्यस्कता, सद्यस्कत्वं, शीघ्रता.

IMMEDICABLE, *a.* अचिकित्स्य: -त्स्या -त्स्यं, दुरुपचार: -रा -रं, औषधिपघातिग: -गा -गं.

IMMELODIOUS, *a.* विस्वर: -रा -रं, अस्वर: -रा -रं, कुस्वर: -रा -रं.

IMMEMORABLE, *a.* अस्मरणीय: -या -यं, अस्मर्त्तव्य: -व्या -व्यं, स्मरणायोग्य: -ग्या -ग्यं.

IMMEMORIAL, *a.* (Beyond memory) स्मरणातिग: -गा -गं, स्मृत्यतिग: -गा -गं, स्मरणातिक्रान्त: -न्ता -न्तं, अतिस्मृति: -ति: -ति, अत्यार्षः -र्षी -र्षं, जनश्रुत्यतिग: -गा -गं, अतिप्राचीन: -ना -नं, विस्मरणीय: -या -यं; 'immemorial succession,' अनादिपरम्परा, अनागम:.

IMMENSE, *a.* (Unlimited) अत्यन्त: -न्ता -न्तं, अनन्त: -न्ता -न्तं, अपरिमित: -ता -तं, अपरिमाण: -णा -णं, अमित: -ता -तं, अप्रमेय: -या -यं, अपरिमेय: -या -यं, अमेय: -या -यं, दुष्प्रमेय: -या -यं, अतिमर्य्याद: -दा -दं, अतिमात्र: -त्रा -त्रं, आत्यन्तिक: -की -कं, नितान्त: -न्ता -न्तं.—(Very great) सुमहान् -हती -हत् (त्), अतिमहान् &c., अतिबृहन् -हती -हत् (त्); 'in bulk,' बृहच्छरीर: -रा -रं, बृहत्काय: -या -यं, अपरिमितशरीर: -रा -रं.

IMMENSELY, *adv.* अत्यन्तं, अतिमात्रं, अपरिमितं, नितान्तं, अतिशयेन, सुमहत्.

IMMENSITY, *s.* (Unlimited extension) अमितता, अपरिमितत्वं, अपरिमाणत्वं, अप्रमेयता, अमेयता.—(Infinity) अत्यन्तता, अनन्तता, आनन्त्यं, आत्यन्तिकत्वं.—(Vastness of size) सुमहत्त्वं, सुबृहत्त्वं, शरीरबृहत्त्वं.—(Infinite space) महाकाशं.

To IMMERGE, *v. a.* निमज्ज् (c. 10. -मज्जयति -यितुं), मज्ज्, अवगाह् (c. 10. -गाहयति -यितुं), आप्लु (c. 10. -प्लावयति -यितुं), स्ना in caus. (स्नापयति, स्नपयति -यितुं), जलं प्रविश् (c. 10. -वेशयति -यितुं), जले निविश्.

To IMMERGE, *v. n.* (Immerse one's self) निमज्ज् (c. 6. -मज्जति -ज्जितुं -मंक्तुं), मज्ज्, अवगाह् (c. 1. -गाहते -हितुं -गाढुं), व्यवगाह्, विगाह्, आप्लु (c. 1. -प्लवते -प्लोतुं), स्ना (c. 2. स्नाति -तुं), जलं प्रविश् (c. 6. -विशति -वेष्टुं).

To IMMERSE, *v. a.* See *To* IMMERGE.

IMMERSED, *p. p.* मग्न: -ग्ना -ग्नं, निमग्न: -ग्ना -ग्नं, प्रमग्न: -ग्ना -ग्नं, निमज्जमान: -ना -नं, अवगाहित: -ता -तं, अवगाढ: -ढा -ढं, विगाढ: -ढा -ढं, गाहित: -ता -तं, आप्लुत: -ता -तं, निष्णात: -ता -तं, निवेशित: -ता -तं, निविष्ट: -ष्टा -ष्टं, अभिनिविष्ट: -ष्टा -ष्टं, अभिनिवेशित: -ता -तं, लीन: -ना -नं, निष्ठ: -ष्ठा -ष्ठं, निष्ठित: -ता -तं, निष्ण: -ष्णा -ष्णं; 'immersed in sorrow,' शोकसागरमग्न: -ग्ना -ग्नं, शोकमग्न: -ग्ना -ग्नं; 'immersed in business,' कार्य्यनिष्ठ: -ष्ठा -ष्ठं, कर्म्मनिविष्ट: -ष्टा -ष्टं.

IMMERSION, *s.* निमज्जनं, मज्जनं, प्रमज्जनं, अवगाहनं, विगाह: -हनं, आप्लव:, आप्लाव: -वनं, स्नानं, जलप्रवेश:, जलान्त:प्रवेश:, अभिषेक:, निष्णानं.

IMMETHODICAL, *a.* अक्रमक: -का -कं -मिक: -का -कं, अव्यवस्थित: -ता -तं, क्रमहीन: -ना -नं, क्रमविरुद्ध: -द्धा -द्धं, अपर्य्याय: -या -यं.

IMMETHODICALLY, *adv.* अक्रमेण, क्रमेण विना, क्रमविरुद्धं, अक्रमतस्, अपर्य्यायतस्.

IMMETHODICALNESS, *s.* अक्रम:, क्रमहीनता, अव्यवस्थितत्वं, अपर्य्याय:.

IMMIGRANT, *s.* एकदेशत्यागानन्तरं देशान्तराधिनिवासु: *m.* or देशान्तराधिवासी *m.* (न्), अन्यदेशनिवासु: *m.*

To IMMIGRATE, *v. n.* एकदेशं त्यक्त्वा देशान्तरे वस् (c. 1. वसति, वस्तुं) or अधिवस् with acc. c., or अध्यास् (c. 2. -आस्ते -आसितुं), अन्यदेशाधिवासनार्थम् एकदेशं त्यज् (c. 1. त्यजति, त्यक्तुं).

IMMIGRATION, *s.* देशान्तराधिवासनं, प्रदेशाधिवासनं, देशत्याग:.

IMMINENT, *a.* उपस्थायी -यिनी -यि (न्), उपस्थित: -ता -तं, उपस्थ: -स्था -स्थं, समुपस्थित: -ता -तं, समुपगत: -ता -तं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., आसन्नवर्त्ती &c., उपनत: -ता -तं; 'imminent death,' कुपितान्तक: -का -कं.

To IMMINGLE, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), विमिश्र्, सम्मिश्र्, मिश्रीकृ, एकीकृ.

IMMINGLED, *p.p.* मिश्रित: -ता -तं, सन्निपतित: -ता -तं, संसृष्ट: -ष्टा -ष्टं.

IMMINUTION, *s.* ह्रास:, क्षय:, हानि: *f.*, न्यूनता, अपचय:.

IMMISCIBILITY, *s.* अमिश्रणीयता, अयोजनीयता, अयाव्यता, मिश्रणाक्षमता.

IMMISCIBLE, *a.* अमिश्रणीय: -या -यं, अयोजनीय: -या -यं, अयाव्य: -व्या -व्यं.

IMMISSION, *s.* निक्षेपणं, न्यसनं, प्रवेशनं, निवेशनं, प्रवेशकरणं.

To IMMIT, *v. a.* निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निविश् (c. 10. -वेशयति -यितुं).

IMMITIGABLE, *a.* अशमनीय: -या -यं, अशाम्य: -म्या -म्यं, अनुपशम्य: -म्या -म्यं.

IMMITTED, *p. p.* निक्षिप्त: -प्ता -प्तं, निवेशित: -ता -तं, प्रवेशित: -ता -तं.

To IMMIX, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), विमिश्र्, मिश्रीकृ, सम्मिश्रीकृ.

IMMOBILITY, *s.* निश्चलत्वं, अचलत्वं, स्थिरता, स्थैर्य्यं, स्थावरत्वं, व्यवस्थिति: *f.*, अवस्थिति: *f.*, संस्थिति: *f.*, स्थायित्वं, स्थाणुता, अकम्प:.

IMMODERATE, *a.* अपरिमित: -ता -तं, अत्यन्त: -न्ता -न्तं, अतिमात्र: -त्रा -त्रं, अतिमर्य्याद: -दा -दं, अमित: -ता -तं, अपरिमाण: -णा -णं, नितान्त: -न्ता -न्तं, अतिमित: -ता -तं, अधिक: -का -कं, अमर्य्याद: -दा -दं, आत्यन्तिक: -की -कं, सु or अति or अतिशय prefixed.

IMMODERATELY, *adv.* अपरिमितं, अत्यन्तं, अतिमात्रं, नितान्तं, अतिशयेन, अतिमर्य्यादं, अत्यर्थं, अति or सु or अतिशय prefixed.

IMMODERATION, *s.* अपरिमितत्वं, अमितत्वं, मर्य्यादातिक्रम:, अमर्य्यादा.

IMMODEST, *a.* निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, त्रपाहीनः -ना -नं, व्रीडाहीनः -ना -नं, अविनीतः -ता -तं, अलज्जः -ज्जा -ज्जं, विलज्जः -ज्जा -ज्जं, अनिभृतः -ता -तं, वियातः -ता -तं, प्रगल्भः -ल्भा -ल्भं, धृष्टः -ष्टा -ष्टं.—(Impure, obscene) अशुद्धः -द्धा -द्धं, अशुचिः -चिः -चि, अवाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं.—(Unchaste) असद्वृत्तः -त्ता -त्तं, असाधुवृत्तः -त्ता -त्तं, व्यसनी -निनी -नि (न्), व्यभिचारी -रिणी -रि (न्), पांशुलः -ला -लं; 'an immodest woman,' बन्धकी, असती, पुंश्चली, असाध्वी, कुलटा, अभिसारिका, धर्षिणी.

IMMODESTLY, *adv.* अविनीतं, निर्लज्जं, वैयात्येन, अशुद्धं, प्रगल्भं, विनयविरोधेन, धृष्टवत्, अशुचि.

IMMODESTY, *s.* निर्लज्जत्वं, लज्जाहीनता, अलज्जा, अविनयः, अविनीतत्वं, वैयात्यं, प्रगल्भता, प्रागल्भ्यं, धृष्टता, अशुद्धता, अशुचिता, गर्ह्यता; 'in a woman,' पौंश्चल्यं, असतीत्वं, असाध्वीत्वं.

To IMMOLATE, *v. a.* क्रतौ हन् (c. 2. हन्ति -न्तुं), उपहारार्थं हन्, उत्सर्गार्थं हन् or शस् (c. 1. शसति -सितुं) or विशस् or प्रमी in caus. (मापयति -यितुं), or उपहृ or उपहारीकृ or प्रोक्ष् (c. 1. -उक्षति -क्षितुं), उत्सर्गपूर्व्वं हन्, घातयित्वा उत्सर्गं कृ, हत्वा उत्सृज् (c. 6. -सृजति -स्रष्टुं), बलिं कृ, बलिदानं कृ.

IMMOLATED, *p. p.* उपहारार्थं हतः -ता -तं or प्रमीतः -ता -तं or शसितः -ता -तं, उपहृतः -ता -तं, उपहारीकृतः -ता -तं, प्रोक्षितः -ता -तं.

IMMOLATION, *s.* उपहारार्थं घातः or घातनं or निहननं, उत्सर्गार्थं मारणं or प्रमापणं or विशसनं or शसनं, शमनं, ससनं, प्रोक्षणं, परम्पराकं, उपहारः, उपहरणं, उत्सर्गकरणं, बलिदानं.

IMMORAL, *a.* निर्धर्म्मः -र्म्मा -र्म्मं -र्म्मा -र्म्मा -र्म्म (न्), अधार्म्मिकः -की -कं, धर्म्मविरुद्धः -द्धा -द्धं, धर्म्मापेतः -ता -तं, धर्म्मरोधी -धिनी -धि (न्), अधर्म्मी -र्म्मिणी -र्म्मि (न्), कुधर्म्मा -र्म्मा -र्म्म (न्), अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, अशुचिः -चिः -चि, कुशीलः -ला -लं, विशीलः -ला -लं, दुःशीलः -ला -लं, दुश्चरित्रः -त्रा -त्रं, असच्चरित्रः -त्रा -त्रं, असत्कर्म्मा -र्म्मा -र्म्म (न्), दुष्टः -ष्टा -ष्टं, कर्म्मदुष्टः -ष्टा -ष्टं, दुर्वृत्तः -त्ता -त्तं, व्यभिचारी -रिणी -रि (न्), पापी -पिनी -पि (न्), पापकर्म्मा &c., व्यसनी -निनी -नि (न्), कुचरितः -ता -तं, अधर्म्मचारी -रिणी -रि (न्).

IMMORALITY, *s.* अधर्म्मः, अधर्म्मत्वं -ता, निर्धर्म्मत्वं, अधार्म्मिकत्वं, असाधुत्वं, अपुण्यता, अशुचिता, दुष्टता, दुर्वृत्तत्वं, व्यसनिता, व्यसनं, कुशीलता, दुश्चरित्रता, अधर्म्मचारित्वं, दुःशीलता, दौःशील्यं, व्यभिचारः.

IMMORTAL, *a.* (Exempt from death) अमरः -री -रं, अमर्त्यः -र्त्या -र्त्यं, सदाजीवी -विनी -वि (न्), सदास्थायी -यिनी -यि (न्), मरणरहितः -ता -तं.—(Imperishable) निर्जरः -रा -रं, अजरः -रा -रं, अक्षयः -या -यं, अनश्वरः -रा -रं, अनाश्यः -श्या -श्यं, अविनाशी -शिनी -शि (न्), निरपायः -या -यं.—(Eternal) अनन्तः -न्ता -न्तं, नित्यः -त्या -त्यं, सनातनः -नी -नं, सदातनः -नी -नं, शाश्वतः -ती -तं, अनाद्यन्तः -न्ता -न्तं, सर्व्वकालीनः -ना -नं, अनन्तकालस्थायी -यिनी -यि (न्).

IMMORTALITY, *s.* अमरता -त्वं, अमर्त्यता, निर्जरता -त्वं, अजरता -त्वं, अक्षयता, अनश्वरता, अनाश्यता, अनन्तता, आनन्त्यं, अनन्त्यं, सदास्थायित्वं, नित्यता.

To IMMORTALIZE, *v. a.* अमरीकृ, निर्जरीकृ, अनश्वरीकृ, अक्षयीकृ, शाश्वतीकृ, नित्यीकृ, आनन्त्यं कृ or जन् (c. 10. जनयति -यितुं).

IMMORTALLY, *adv.* अमरं, अमरत्वेन, अमरवत्, अमर्त्यवत्, निर्जरं, अजरं, अक्षयं, अनश्वरं, अनन्तकाले -लं, अनन्तं, आनन्त्येन, सनातनं, शाश्वतं, निरपायं, अविनाशेन.

IMMOVABILITY, *s.* अचलता -त्वं, निश्चलत्वं, स्थावरत्वं, स्थिरता, अचरिष्णुता, स्तब्धता.

Intrepidly, *adv.* सवीर्य्यं, महावीर्य्येण, वीरवत्, शूरवत्, शौर्य्येण, सशौर्य्यं, सविक्रमं, सपराक्रमं, निर्भयं, अभीतवत्, साहसपूर्व्वं.

Intricacy, *s.* असरलता, असारल्यं, क्लिष्टता, दुःशोधनीयता, दुःशोध्यता, कठिनता, काठिन्यं, समस्तता, व्यस्तता, सङ्कुलता, वक्रत्वं, कुटिलत्वं, कौटिल्यं, विषमता, वैषम्यं, आकुञ्चितत्वं.

Intricate, *a.* असरलः -ला -लं, क्लिष्टः -ष्टा -ष्टं, दुःशोधनीयः -या -यं, दुःसंशोधनीयः -या -यं, दुःशोध्यः -ध्या -ध्यं, अपरिशोध्यः -ध्या -ध्यं, कठिनः -ना -नं, समस्तः -स्ता -स्तं, व्यस्तः -स्ता -स्तं, मिश्रितः -ता -तं, नानाप्रकारः -रा -रं, सङ्कुलः -ला -लं, वक्रः -क्रा -क्रं, कुटिलः -ला -लं, कुञ्चितः -ता -तं, आकुञ्चितः -ता -तं, विषमः -मा -मं.—(Obscure) दुर्ज्ञेयः -या -यं, अस्पष्टार्थः -र्था -र्थं, नानार्थः &c., गूढः -ढा -ढं.

Intricately, *adv.* असरलं, दुःशोधनीयं, कठिनं, काठिन्येन, सङ्कुलं, कुटिलं.

Intricateness, *s.* *See* **Intricacy**.

Intrigue, *s.* वैदग्ध्यप्रयोगः, विदग्धयोगः, कपटप्रयोगः, विदग्धकल्पना, कुयुक्तिः *f.*, कुप्रयुक्तिः *f.*, कुकल्पना, विदग्धमन्त्रणा, विदग्धपरामर्शः, विदग्धनीतिः *f.*, वैदग्ध्यं, विदग्धता, कपटप्रबन्धः, सङ्कल्पः.—(Amour) कामचरित्रं.

To **Intrigue**, *v. n.* वैदग्ध्यप्रयोगं कृ, कपटप्रयोगं कृ, कुप्रयोगं कृ, विदग्धकल्पनां कृ, कपटप्रबन्धं कृ, वैदग्ध्यं कृ.

Intriguer, *s.* विदग्धनायकः, विदग्धप्रयोजकः, विदग्धजनः.

Intrinsic, **intrinsical**, *a.* (Internal) अन्तरस्थः -स्था -स्थं, अन्तर्भूतः -ता -तं, आन्तरिकः -की -कं, आभ्यन्तरः -री -रं.—(Genuine, real) वास्तवः -वी -वं -विकः -की -कं, प्रकृतः -ता -तं, सत्यः -त्या -त्यं, यथार्थः -र्था -र्थं, सारः -रा -रं, अकृत्रिमः -मा -मं.—(Essential) स्वाभाविकः -की -कं, प्राकृतिकः -की -कं, सांसिद्धिकः -की -कं.

Intrinsically, *adv.* स्वभावतस्, स्वभावेन, प्रकृतितस्, वस्तुतस्, जातितस्, सारतस्, तत्त्वतस्, भावतस्.

To **Introduce**, *v. a.* (To the presence of) प्रविश् (c. 10. -वेशयति -यितुं), दर्शनं कृ in caus. (कारयति -यितुं), प्रवेशनं कृ.—(Bring into use) प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रचल् (c. 10. -चालयति -यितुं), प्रचलीकृ, प्रचर् (c. 10. -चारयति -यितुं), स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा.—(Cause to enter) प्रविश् or निविश् or आविश् or समाविश् in caus.—(Conduct, bring) आनी (c. 1. -नयति -नेतुं), उपानी,

आवह् (c. 1. -वहति -वोढुं), आगम् (c. 10. -गमयति -यितुं), गम्.—(Begin) आरभ् (c. 1. -रभते -रब्धुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं).

INTRODUCED, *p. p.* (To the presence of) प्रवेशितः -ता -तं.—(Brought into use) प्रवर्त्तितः -ता -तं, प्रचालितः -ता -तं, परिचालितः -ता -तं, प्रचलितः -ता -तं, प्रचलीकृतः -ता -तं, प्रचारितः -ता -तं.—(Brought in) आनीतः -ता -तं.—(Made to enter) निवेशितः -ता -तं, प्रवेशितः -ता -तं, प्रविष्टः -ष्टा -ष्टं, निविष्टः -ष्टा -ष्टं.—(In legal process) प्रत्याकलितः -ता -तं.

INTRODUCER, *s.* प्रवेशकः, निवेशकः.—(One who brings into use) प्रवर्त्तकः, प्रथमस्थापकः, प्रतिष्ठापकः, आरम्भकः.

INTRODUCTION, *s.* (Ushering into the presence of) प्रवेशनं, प्रवेशकरणं.—(Making persons known to each other) अन्योन्यपरिचयकरणं; 'letter of introduction,' अन्योन्यपरिचयप्रार्थनार्थं पत्रं.—(Bringing in) आनयनं, उपनयनं, आवहनं.—(Bringing into use) प्रवर्त्तनं, स्थापनं, प्रतिष्ठापनं, प्रचारः.—(Insertion, causing to enter) निवेशनं, प्रवेशनं, आवेशनं, समावेशनं, प्रसङ्गः.—(Preface) प्रस्तावना -नं, प्रस्तावः, आभाषः, आरम्भः, उपोद्घातः, उपन्यासः, प्रकरणं.—(Exordium) वाक्यारम्भः, वाङ्मुखं, परिभाषा, आभाषः, प्रारम्भः, वन्दना.

INTRODUCTORY, INTRODUCTIVE, *a.* प्रावेशिकः -की -कं, प्रवेशकः -का -कं.—(Preliminary) आरम्भकः -का -कं, प्रारम्भकः -का -कं, प्राथमिकः -की -कं.—(Prefatory) पारिभाषिकः -की -कं, प्रस्तावनारूपः -पा -पं, उपोद्घातरूपः -पा -पं.

INTROGRESSION, *s.* प्रवेशः -शनं, निवेशः -शनं, अन्तर्गमनं, अन्तरागमनं.

INTROMISSION, *s.* प्रवेशनं, प्रवेशकरणं, निवेशनं, अन्तःक्षेपणं.

To INTROMIT, *v. a.* प्रविश् (c. 10. -वेशयति -यितुं), प्रवेशद्वारं भू, प्रवेशसाधनं भू.

INTROSPECTION, *s.* अन्तरालोकनं, अन्तरवलोकनं, अन्तर्दर्शनं, अन्तर्दृष्टिः *f.*

INTROSPECTIVE, *a.* अन्तर्दर्शी -र्शिनी -र्शि (न्), अन्तर्दृष्टिः -ष्टिः -ष्टि.

To INTROVERT, *v. a.* अन्तर्मुखं -खां -खीं -खं कृ, अन्तर्मुखीकृ.

To INTRUDE, *v. n.* अन्यायतः or अनधिकारपूर्वं प्रविश् (c. 6. -विशति -वेष्टुं), अनाहूतः प्रविश् or आविश् or प्रसृप् (c. 1. -सर्पति -सर्प्तुं) or आगम् (c. 1. -गच्छति, गन्तुं), धर्षेण प्रविश् or आक्रम् (c. 1. -क्रामति -क्रमितुं) or अभिक्रम्, चर्च् (c. 1. चर्चति -र्चितुं), चर्चां कृ.

INTRUDER, *s.* अनाहूतप्रवेशकः, अन्यायतः or अनधिकारपूर्वं प्रवेशकः or प्रसर्पकः, अनाहूतागन्ता *m.* (न्), आगन्तुकः, अनधिकारी, चर्चकः, चर्चाकारी *m.* (न्).

INTRUSION, *s.* अनधिकारपूर्वः प्रवेशः, अनधिकारपूर्वं प्रवेशनं, अनाहूतप्रवेशनं, अनाहूतागमनं.

INTRUSIVE, *a.* पराधिकारचर्चकः -का -कं, चर्चाशीलः -ला -लं, धृष्टः -ष्टा -ष्टं, धर्षी -र्षिणी -र्षि (न्), प्रगल्भः -ल्भा -ल्भं.

To INTRUST, *v. a.* (Commit) ऋ in caus. (-अर्पयति -यितुं), समृ, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विनिक्षिप्, न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्, न्यासीकृ, नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), प्रतिपद् (c. 10. -पादयति -यितुं), परिदा (c. 3. -ददाति -दातुं), प्रणिधा.—(Place trust in) विश्वस् (c. 2. -श्वसिति -तुं), विश्वासं कृ, प्रत्ययं कृ.

INTRUSTED, *p. p.* अर्पितः -ता -तं, समर्पितः -ता -तं, निक्षिप्तः -प्ता -प्तं, न्यस्तः -स्ता -स्तं, न्यासीकृतः -ता -तं, नियोजितः -ता -तं, प्रतिपादितः -ता -तं, प्रणिहितः -ता -तं.

INTUITION, *s.* सहजज्ञानं, साहजिकज्ञानं, अन्तर्ज्ञानं, तात्कालिकज्ञानं, प्रमाणनिरपेक्षज्ञानं, अप्रामाणिकज्ञानं, विचारनिरपेक्षज्ञानं, सहजोपलब्धज्ञानं, अविचारपूर्वं ज्ञानं, अयत्नज्ञानं.

INTUITIVE, *a.* (Seen without arguments) अन्तर्ज्ञानोपलब्धः -ब्धा -ब्धं, सहजज्ञानोपलब्धः &c., अन्तर्ज्ञानोपलभ्यः -भ्या -भ्यं, प्रमाणनिरपेक्षज्ञेयः -या -यं, सहजज्ञेयः -या -यं, अविचारपूर्वम् उपलभ्यः -भ्या -भ्यं, अविचार्य ज्ञेयः -या -यं.—(Seeing without arguments) अन्तर्ज्ञानी -निनी -नि (न्), सहजज्ञः -ज्ञा -ज्ञं, प्रमाणनिरपेक्षज्ञः -ज्ञा -ज्ञं.

INTUITIVELY, *adv.* सहजज्ञानात्, अन्तर्ज्ञानेन, तात्कालिकज्ञानात्, प्रमाणनिरपेक्षं, विचारनिरपेक्षं, अविचारपूर्वं.

INTUMESCENCE, INTURGESCENCE, *s.* शोथः, स्फीतिः *f.*, स्फीतता -त्वं, शोफः, श्वयथुः *m.*, आध्मानं.

To INTWINE, INTWIST, *v. a.* ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं), गुफ् (c. 6. गुफति -फितुं), गुम्फ् (c. 6. गुम्फति -म्फितुं), रच् (c. 10. रचयति -यितुं), विरच्.

INUENDO, *s.* *See* INNUENDO.

To INUMBRATE, *v. a.* छायां कृ, छायया छद् (c. 10. छादयति -यितुं), प्रच्छद्.

INUNCTION, *s.* अभ्यञ्जनं, अञ्जनं, अभ्यङ्गः, प्रदेहः, आलेपनं, विलेपनं.

To INUNDATE, *v. a.* जलेन प्लु (c. 10. प्लावयति -यितुं) or आप्लु or परिप्लु or सम्प्लु, जलप्लुतं -तां कृ, जलप्लावितं -तां कृ, जलव्याप्तं -प्तां कृ, जलप्लावनं कृ, जलप्रलयं कृ; 'is inundated,' प्लाव्यते.

INUNDATED, *p. p.* जलप्लावितः -ता -तं, आप्लावितः -ता -तं, जलप्लुतः -ता -तं, आप्लुतः -ता -तं, जलव्याप्तः -प्ता -प्तं, परिप्लुतः -ता -तं, जलमयः -यी -यं, उत्तरङ्गः -ङ्गा -ङ्गं.

INUNDATION, *s.* जलप्लावः -वनं, आप्लावः -वनं, जलाप्लावनं, जलप्रलयः, तोयविप्लवः, जलविप्लवः, सलिलोपप्लवः, जलोच्छ्वासः, जलवेगः, जलपरिप्लवः, परिप्लवः, जलौघः, ओघः, जलवृद्धिः *f.*, परीवाहः, परिवाहः, विदारः, स्रोतस् *n.*, वन्या.

INURBANITY, *s.* अविनयः, अविनीतता, अशिष्टता, असभ्यता, अदाक्षिण्यं.

To INURE, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासं कृ, अभ्यस्तं -स्तां -स्तं कृ, शिक्ष् (c. 10. शिक्षयति -यितुं), नित्याभ्यासं कृ.—(Harden by constant practice) नित्याभ्यासेन कठिनीकृ or कठोरीकृ.

INURED, *p. p.* अभ्यस्तः -स्ता -स्तं, कृताभ्यासः -सा -सं, शिक्षितः -ता -तं, नित्याभ्यासेन कठिनीभूतः -ता -तं; 'inured to fatigue,' जितश्रमः -मा -मं.

INUREMENT, *s.* अभ्यासः, नित्याभ्यासः, निरन्तराभ्यासः, व्यवहारः, शिक्षा.

To INURN, *v. a.* समाधौ निधा (c. 3. -दधाति -धातुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

INUSTION, *s.* दाहः, दाहनं, दहनं, तप्तलोहेन दाहनं.

INUTILITY, *s.* व्यर्थता, वैयर्थ्यं, विफलता, वैफल्यं, निरर्थकत्वं, अनर्थकत्वं, अनुपयोगः -गिता, निरुपयोगः -गिता, अयोग्यता -त्वं.

INUTTERABLE, *a.* अवाच्यः -च्या -च्यं, अवचनीयः -या -यं, अनिर्वचनीयः -या -यं, अनुच्चारणीयः -या -यं, अनुच्चार्यः -र्या -र्यं, अकथ्यः -थ्या -थ्यं.

To INVADE, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), अभिक्रम्, अधिक्रम्, उपक्रम्, उपाक्रम्, अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), आस्कन्द्, समास्कन्द्, समवस्कन्द्, आसद् (c. 10. -सादयति -यितुं), समासद्, अभिद्रु (c. 1. -द्रवति -द्रोतुं), उपद्रु, समाद्रु, अभिप्रया (c. 2. -याति -तुं), अभिसृ (c. 1. -सरति -सर्त्तुं), अवस्कन्दं कृ, उपद्रवं कृ, उपप्लवं कृ, अभिनिर्याणं कृ, अभियोगं कृ; 'invade a country,' देशम् आक्रम्, देशाक्रमणं कृ, लोप्त्रार्थं or द्रोहकरणार्थं देशं प्रविश् (c. 6. -विशति -वेष्टुं).

INVADED, *p. p.* आक्रान्तः -न्ता -न्तं, उपद्रुतः -ता -तं, कृतावस्कन्दः -न्दा -न्दं, अवस्कन्दितः -ता -तं, उपप्लुतः -ता -तं, कृतोपद्रवः -वा -वं.

INVADER, *s.* आक्रामकः, देशाक्रामकः, आक्रमणकारी *m.* (न्), अवस्कन्दकृत् *m.*

IN VAIN, *adv.* वृथा, मुधा. *See* VAINLY.

INVALESCENSE, *s.* स्वास्थ्यं, स्वस्थता, आरोग्यं, शरीरकुशलं.

INVALID, *a.* (Of no force) निर्बलः -ला -लं, बलहीनः -ना -नं, शक्तिहीनः -ना -नं, अनिष्पन्नः -न्ना -न्नं, व्यर्थः -र्था -र्थं, मोघः -घा -घं, निष्फलः -ला -लं, विफलः -ला -लं, अप्रमाणः -णा -णं, निष्प्रमाणः -णा -णं, निष्प्रभावः -वा -वं, प्रभावहीनः -ना -नं, निस्तेजाः -जाः -जः (स्), लुप्तः -प्ता -प्तं, लघुः -घुः -घु, लघुप्रमाणः -णा -णं.

INVALID, *s.* (A sick or infirm person) रोगी *m.* -गिणी *f.*, रोगवान् *m.* -वती *f.*, रोगार्त्तः -र्त्ता, सरोगः -गा, अस्वस्थशरीरः -रा, अस्वस्थः -स्था, जन्मरोगी *m.* -गिणी, जरी *m.* -रिणी.

To INVALIDATE, *v. a.* अधरीकृ, मोघीकृ, व्यर्थीकृ, निष्फलीकृ, निष्फल (nom. निष्फलयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), मुधा कृ, वृथा कृ, मुधा विधा (c. 3. -दधाति -धातुं), निर्बलीकृ, निष्प्रभावीकृ, लघूकृ.

INVALIDATED, *p. p.* अधरीकृतः -ता -तं, अनिष्पन्नः -न्ना -न्नं, निर्बलीकृतः -ता -तं.

INVALIDITY, *s.* निर्बलता, बलहीनता, अनिष्पत्तिः *f.*, अनिष्पन्नता, व्यर्थता, मोघता, निष्फलता, विफलता, निष्प्रभावत्वं, प्रभावहीनता, शक्तिहीनता, दुर्बलता, दौर्बल्यं, अप्रामाण्यं, लघुत्वं, लाघवं.

INVALUABLE, *a.* अनर्घ्यः -र्घ्या -र्घ्यं, अमूल्यः -ल्या -ल्यं, अनर्घः -घा -घं, मूल्यातीतः -ता -तं, मूल्यातिगः -गा -गं, अतिमूल्यः -ल्या -ल्यं, अनुत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, बहुमूल्यकः -का -कं.

INVALUABLENESS, *s.* अनर्घ्यता -त्वं, अमूल्यता -त्वं, अनर्घत्वं, अत्युत्कृष्टत्वं.

INVARIABLE, *a.* अविकार्य्यः -र्य्या -र्य्यं, निर्विकारः -रा -रं, अविकारः -रा -रं, अविक्रियः -या -यं, नित्यः -त्या -त्यं, नैत्यिकः -की -कं, स्थिरः -रा -रं, सुस्थिरः -रा -रं, नियतः -ता -तं, अचलः -ला -लं, अचञ्चलः -ला -लं, अविकल्पः -ल्पा -ल्पं, निर्विकल्पः -ल्पा -ल्पं, व्यवस्थितः -ता -तं, धृतिमान् -मती -मत् (त्), अपरिवर्त्तनीयः -या -यं.

INVARIABLENESS, *s.* अविकार्य्यता -त्वं, निर्विकारत्वं, अविकारत्वं, नित्यता, नैत्यिकत्वं, स्थिरता, सुस्थैर्य्यं, सुस्थिरता.

INVARIABLY, *adv.* नित्यं, नित्यदा, सर्व्वदा, सततं, नियतं, निर्विकारं, सुस्थिरं.

INVASION, *s.* आक्रमणं, आक्रमः, अभिक्रमः -मणं, अधिक्रमः -मणं, आक्रान्तिः *f.*, अवस्कन्दः, अभिमर्द्दः, उपद्रवः, उपप्लवः, अभिनिर्याणं, प्रयाणं, अभियोगः, दिग्विजयक्रमः; 'of a country,' देशाक्रमणं.

INVASIVE, *a.* आक्रामकः -का -कं, अभिक्रामकः &c., उपद्रवी -विणी -वि (न्).

INVECTIVE, *s.* क्षेपः, अवक्षेपः, आक्षेपः, निन्दोक्तिः *f.*, निन्दावाक्यं, निन्दा, भर्त्सनवाक्यं, भर्त्सना, निर्भर्त्सनं -ना, अपवादः, परीवादः, परिभाषणं, दुर्वाक्यं, वाक्पारुष्यं, धिक्पारुष्यं, धिक्क्रिया, दुरुक्तं, तिरस्कारवाक्यं, तिरस्कारः, कुत्सावाक्यं, गर्हा, कटुवाक्यं, प्रतिकूलार्थं वचः.

INVECTIVE, *a.* निन्दकः -का -कं, निन्दामयः -यी -यं, निन्दाकरः -री -रं, निन्दात्मकः -का -कं, कुत्सावादी -दिनी -दि (न्), अपवादी &c., अपवादकः -का -कं.

To INVEIGH, *v. a.* अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधिक्षिप्, परिक्षिप्, आक्षिप्, क्षिप्, निन्द् (c. 1. निन्दति -न्दितुं), प्रणिन्द्, विनिन्द्, अपवद् (c. 1. -वदति -ते -दितुं), परिवद्, भर्त्स् (c. 10. भर्त्सयति -यितुं), निर्भर्त्स्, अपभर्त्स्, अवगुर् (c. 6. -गुरते -रितुं), अभिशप् (c. 1. -शपति -शप्तुं), परिशप्, गर्ह् (c. 1. गर्हते -र्हितुं, c. 10. गर्हयति -ते -यितुं), विगर्ह्, परिगर्ह्, तिरस्कृ, धिक्कृ, दुर्वाक्यं वद्, निन्दावाक्यं वद्, उपालभ् (c. 1. -लभते -लब्धुं).

To INVEIGLE, *v. a.* प्रलुभ् (c. 10. -लोभयति -यितुं), परिलुभ्, लुभ्, लल् (c. 10. लालयति -यितुं), मधुरवचोभिः or चाटूक्त्या or चाटुकारेण प्रलुभ् or लल् or सान्त्व् (c. 10. सान्त्वयति -यितुं) or आकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं) or प्रलभ् (c. 1. -लभते -लब्धुं) or मुह् (c. 10. मोहयति -यितुं), लालनं कृ, वञ्च् (c. 10. वञ्चयति -यितुं).

INVEIGLED, *p. p.* लालितः -ता -तं, प्रलोभितः -ता -तं, चाटुकारेणाकृष्टः -ष्टा -ष्टं.

INVEIGLER, *s.* प्रलोभकः, विलोभकः, लाली *m.* (न्), लालनकारी *m.* (न्), आकर्षकः, मोही *m.* (न्), विमोही *m.*, मोहकः, लोभदर्शकः, प्रलम्भकारी *m.*

INVEIGLING, INVEIGLEMENT, *s.* प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, लालनं, मोहनं, विमोहनं, लोभदर्शनं, वञ्चनं -ना, प्रवञ्चना, प्रतारणा, प्रलम्भः.

To INVENT, *v. a.* कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, रच् (c. 10. रचयति -यितुं), विरच्, सृज् (c. 6. सृजति, स्रष्टुं), विधा (c. 3. -दधाति -धातुं), घट् (c. 10. घटयति -यितुं), निर्मा (c. 2. -माति, c. 3. -मिमीते -मातुं), विनिर्मा, परिकल्पनां कृ.—(In the mind) मनसा कॢप् or परिकॢप् or सृज्, स्वमनसा कॢप्.—(Devise a plan) उपायं प्रचिन्त् (c. 10. -चिन्तयति -यितुं) or परिचिन्त्.—(Fabricate falsely) मिथ्या कॢप् or सृज्.—(Find out) निरूप् (c. 10. -रूपयति -यितुं).

INVENTED, *p. p.* कल्पितः -ता -तं, परिकल्पितः -ता -तं, कॢप्तः -प्ता -प्तं, मनःकल्पितः -ता -तं, मनःसृष्टः -ष्टा -ष्टं, रचितः -ता -तं, विरचितः -ता -तं, घटितः -ता -तं, निर्मितः -ता -तं.—(Devised) प्रचिन्तितः -ता -तं, घटितः -ता -तं.—(Fabricated, factitious) मिथ्याकल्पितः -ता -तं, काल्पनिकः -की -कं, कृत्रिमः -मा -मं, कृतकः -का -कं.—(Found out) निरूपितः -ता -तं.

INVENTION, *s.* (The act) कल्पना -नं, परिकल्पना -नं, कॢप्तिः *f.*, रचना, विरचना, सृष्टिः *f.*, निर्माणं, घटनं, निरूपणं.—(Power of invention, ingenuity) कल्पनाशक्तिः *f.*, कल्पना, युक्तिः *f.*, सुयुक्तिः *f.*, उपायज्ञानं, उपायज्ञत्वं.—(That which is invented) कल्पितं, परिकल्पितं, कल्पना, कॢप्तिः *f.*—(Fabrication, fiction) मिथ्याकल्पना, मिथ्याकल्पितं, मनःकल्पितं, मनःसृष्टिः *f.*; 'invention of one's own brain,' स्वकपोलकल्पितं.

INVENTIVE, *a.* कल्पकः -का -कं, उपायज्ञः -ज्ञा -ज्ञं, उपायी -यिनी -यि (न्), युक्तिमान् -मती -मत् (त्), चतुरः -रा -रं, कुशलः -ला -लं, उपायकुशलः -ला -लं, सुप्रयोगवान् &c.

INVENTIVENESS, *s.* उपायज्ञत्वं, युक्तिः *f.*, युक्तिमत्त्वं, सुयुक्तिः *f.*

INVENTOR, *s.* कल्पकः, परिकल्पकः, कल्पयिता *m.* (तृ), स्रष्टा *m.* (ष्टृ), निर्माता *m.* (तृ), विधायी *m.* (न्), विधाता *m.* (तृ), रचकः, विरचकः, निरूपकः, निरूपयिता *m.* (तृ).

INVENTORY, *s.* गृहोपस्करपरिसंख्या, गृहभाण्डपरिगणना, अस्थावरद्रव्यसंख्यापत्रं, अस्थावरवस्तुगणनापत्रं, गृहवस्तुपरिसंख्या, गृहसामग्र्यपरिगणना.

To INVENTORY, *v. a.* गृहोपस्करादि परिसंख्या (c. 2. -ख्याति -तुं) or परिगण् (c. 10. -गणयति -यितुं).

INVENTRESS, *s.* कल्पिका, परिकल्पिका, कल्पयित्री, निरूपयित्री.

INVERSE, *a.* व्यस्तः -स्ता -स्तं, विपरीतः -ता -तं, विपर्य्यस्तः -स्ता -स्तं, पर्य्यस्तः -स्ता -स्तं, व्यस्तः -स्ता -स्तं, विलोमः -मा -मं, प्रतिलोमः -मा -मं, व्यतिक्रान्तः -न्ता -न्तं, प्रतिकूलः -ला -लं, प्रतीपः -पा -पं, विप्रतीपः -पा -पं, प्रसव्यः -व्या -व्यं, अपसव्यः -व्या -व्यं; 'Rule of three inverse,' विलोमत्रैराशिकं, व्यस्तत्रैराशिकं; 'in inverse ratio,' विपर्य्ययेण.

INVERSELY, *adv.* विपर्य्ययेण, व्यत्यासेन, व्युत्क्रमेण, विपरीतं, पर्य्यासेन.

INVERSION, *s.* विपर्य्ययः, विपर्य्यायः, व्यत्यासः, विपर्य्यासः, पर्य्यासः, व्युत्क्रमः, व्यतिक्रमः, विपरीतता, वैपरीत्यं, प्रतिकूलता, प्रातिकूल्यं, विलोमता, प्रतिलोमता, प्रातिलोम्यं, व्यत्ययः, व्यस्तता, व्यस्तता, विप्रतीपता, प्रतीपता, प्रपञ्चः, प्रसव्यत्वं; 'rule of inversion in arithmetic,' विलोमक्रिया, व्यस्तविधिः *m.*

To INVERT, *v. a.* विपर्य्यस् (c. 4. -अस्यति -असितुं), पर्य्यस्, व्यत्यस्, विप-

रीतीकृ, वैपरीत्यं कृ, विपर्य्ययं कृ, व्यत्यस्तं -स्तां कृ, विपर्य्यस्तं -स्तां कृ, प्रतिकूलीकृ, विलोमीकृ.—(Turn upside down) अधोमुखीकृ, अधोमुखं -खां कृ, अधःकृ, अधरोत्तरीकृ, ऊर्द्ध्वाधरीकृ, अपवृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्; 'invert the glass in water,' पात्रम् अधोमुखं जले स्थापय.

INVERTED, *p. p.* विपर्य्यस्तः -स्ता -स्तं, व्यत्यस्तः -स्ता -स्तं, पर्य्यस्तः -स्ता -स्तं, व्यस्तः -स्ता -स्तं, विपरीतः -ता -तं, व्यतिक्रान्तः -न्ता -न्तं, व्युत्क्रान्तः -न्ता -न्तं, विलोमः -मा -मं, प्रतिलोमः -मा -मं, प्रतिकूलः -ला -लं, प्रसव्यः -व्या -व्यं, प्रतिसव्यः -व्या -व्यं.—(Turned upside down) अधोमुखीकृतः -ता -तं, अधोमुखः -खा -खं, अधःकृतः -ता -तं, अधरोत्तरः -रा -रं, अपवृत्तः -त्ता -त्तं.

To INVEST, *v. a.* (Dress, clothe) वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, प्रवेष्ट्, आछद् (c. 10. -छादयति -यितुं), प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं), संव्ये (c. 1. -व्ययति -व्यातुं), परिव्ये, परिधा in caus. (-धापयति -यितुं), वस् (c. 10. वासयति -यितुं), विवस्.—(Invest with office) अधिकारे नियुज् (c. 7. -युनक्ति -युंक्ते, c. 10. योजयति -यितुं), अधिकारं प्रविश् (c. 10. -वेशयति -यितुं), अधिकारयुक्तं -क्तां कृ, अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), संस्कारपूर्व्वम् अधिकारप्रवेशं कृ.—(Adorn) अलङ्कृ, भूष् (c. 10. भूषयति -यितुं), विभूष्.—(Indue, place in possession) युक्तं -क्तां कृ, सम्पन्नं -न्नां कृ, विशिष्टं -ष्टां कृ, उपेतं -तां कृ, अन्वितं -तां कृ, नियुज्, युज्.—(Inclose, besiege) परिवेष्ट्, उद्वेष्ट्, समन्तात् रुध् (c. 7. रुणद्धि, रोद्धुं) or उपरुध् or अवरुध्.—(Invest money) क्षेत्रगृहादि क्रीत्वा धनं प्रयुज्, धनप्रयोगं कृ.

INVESTED, *p. p.* (Clothed) वेष्टितः -ता -तं, आच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, परिहितः -ता -तं, संवीतः -ता -तं, आश्लिष्टः -ष्टा -ष्टं.—(With office) अधिकारे नियुक्तः -क्ता -क्तं, पदयुक्तः -क्ता -क्तं, पदविशिष्टः -ष्टा -ष्टं.—(Indued, placed in possession) युक्तः -क्ता -क्तं. *See To* INVEST.—(Closed, besieged) परिवेष्टितः -ता -तं, उद्वेष्टितः -ता -तं, रुद्धः -द्धा -द्धं, समन्तादुपरुद्धः -द्धा -द्धं, पर्य्यवष्टब्धः -ब्धा -ब्धं, बाधितः -ता -तं.—(As money) प्रयुक्तः -क्ता -क्तं.

INVESTIGABLE, *a.* निरूपणीयः -या -यं, निरूप्यः -प्या -प्यं, विचारणीयः -या -यं, विचार्य्यः -र्य्या -र्य्यं, अनुसन्धेयः -या -यं, निर्णेयः -या -यं, विचारयोग्यः -ग्या -ग्यं.

To INVESTIGATE, *v. a.* निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं), समीक्ष्, अवेक्ष्, निरीक्ष्, विचर् (c. 10. -चारयति -यितुं), ज्ञा in des. (जिज्ञासते -सितुं), अन्विष् (c. 4. -इष्यति -एषितुं), अन्वेष् (c. 1. -एषते -षितुं), आलोच् (c. 10. -लोचयति -यितुं), आलोक् (c. 10. -लोकयति -यितुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विमृश् (c. 6. -मृशति -मष्टुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), विनिश्चि, विभू (c. 10. -भावयति -यितुं), चर्च् (c. 1. चर्चति -र्चितुं), मार्ग् (c. 10. मार्गयति -यितुं), मन् in des. (मीमांसते -सितुं), अभिनिध्यै (c. 1. -ध्यायति -ध्यातुं), विवेचनां कृ.

INVESTIGATED, *p. p.* निरूपितः -ता -तं, परीक्षितः -ता -तं, निरीक्षितः -ता -तं, अवेक्षितः -ता -तं, विचारितः -ता -तं, जिज्ञासितः -ता -तं, अन्वेषितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, निर्णीतः -ता -तं, आलोचितः -ता -तं, चर्चितः -ता -तं.

INVESTIGATING, *part.* निरूपयन् -यन्ती -यत् (त्), परीक्षकः -का -कं, अन्वेषी -षिणी -षि (न्), अनुसन्धानी -निनी -नि (न्), अनुसन्धायी &c., विचारी &c.

INVESTIGATION, *s.* निरूपणं, अनुसन्धानं, परीक्षा -क्षणं, विचारः -रणं -णा, जिज्ञासा, अन्वेषणं -णा, निरीक्षणं, अवेक्षा -क्षणं, समीक्षणं, संवीक्षणं, प्रसमीक्षा, निर्णयः, निश्चयः, अनुयोगः, विवेचना, विवेकः, चर्चा, विमर्शः, निरूपत्वं, परीष्टिः *f.*; 'under investigation,' निश्चीयमानः -ना -नं, विचार्य्यमाणः -णा -णं, निरूप्यमाणः -णा -णं.

INVESTIGATOR, *s.* परीक्षकः, विचारकः, निरूपयिता *m.* (तृ), अनुसन्धायी *m.* (न्), अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), निर्णेता *m.* (तृ), चर्चाकारी *m.* (न्).

INVESTITURE, *s.* (Investing with any office) प्रतिष्ठापनं, प्रतिष्ठा, अभिषेकः, अभिषेचनं, अधिकारप्रवेशकरणं, पदस्थापनं -ना.—(With the sacrificial cord, or yajnopavita) उपनयः -यनं, आनयः -यनं, मौञ्जीबन्धनं, पवित्रारोपणं.

INVESTMENT, *s.* (Clothes) परिधानं, आच्छादनं, वस्त्रं.—(Besieging, surrounding) अवरोधः -धनं, प्रतिरोधः, रोधः, वेष्टनं, परिवेष्टनं -वेष्टः, उद्वेष्टः, पर्य्यवष्टम्भनं.—(Laying out money) धनप्रयोगः.

INVETERACY, *s.* बद्धमूलता, निर्बन्धः, अभिनिवेशः, दृढता, स्थिरता, अभिनिविष्टता, चिरकालिकत्वं, बहुकालिकत्वं.

INVETERATE, *a.* बद्धमूलः -ला -लं, दृढमूलः -ला -लं, दृढः -ढा -ढं, स्थिरः -रा -रं, निर्बद्धः -द्धा -द्धं, चिरस्थायी -यिनी -यि (न्), बहुकालिकः -की -कं, चिरकालिकः -की -कं, चिरकालीनः -ना -नं, अभिनिविष्टः -ष्टा -ष्टं; 'inveterate hatred,' बद्धवैरं, अच्युतवैरं; 'an inveterate fool,' प्रतिनिविष्टमूर्खः.

INVETERATENESS, *s.* *See* INVETERACY.

INVIDIOUS, *a.* (Envious) मत्सरी -रिणी -रि (न्), समत्सरः -रा -रं, ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्), ईर्ष्यालुः -लुः -लु.—(Likely to provoke envy or ill-will) ईर्ष्याकरः -रा -रं, ईर्ष्याजनकः -का -कं, असूयाजनकः -का -कं, असूयोत्पादकः -का -कं, मात्सर्य्यजनकः -का -कं, मत्सरावहः -हा -हं, द्वेषजनकः -का -कं, द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, कुत्सितः -ता -तं, अप्रीतिजनकः -का -कं.

INVIDIOUSLY, *adv.* (Enviously) समत्सरं, समात्सर्य्यं, सासूयं, सेर्ष्यं.—(In a manner so as to provoke hatred) यथा द्वेषः or असूया जायते तथा, यथा मात्सर्य्यम् उत्पद्यते तथा.

INVIDIOUSNESS, *s.* द्वेषजनकत्वं, असूयाजनकत्वं, ईर्ष्याजनकत्वं.

To INVIGORATE, *v. a.* बलं वृध् (c. 10. वर्धयति -यितुं), तेजो वृध् or कृ or दा, वीर्य्यं or सत्त्वं वृध् or दा, अग्निं or रुचिं दा or वृध्, सबलं -लां कृ, सबलीकृ, सवीर्य्यं -र्य्यां कृ, पुष् (c. 10. पोषयति -यितुं), पुष्टिं कृ or दा or वृध्, आप्यै (c. 10. -प्याययति -यितुं), समाप्यै, दीप् (c. 10. दीपयति -यितुं).

INVIGORATED, *p. p.* वर्धितबलः -ला -लं, वर्धिततेजाः -जाः -जः (स्), वृद्धसत्त्वः -त्त्वा -त्त्वं, तेजितः -ता -तं, पुष्टः -ष्टा -ष्टं, दीपितः -ता -तं, प्रदीप्तः -प्ता -प्तं, आप्यायितः -ता -तं.

INVIGORATING, *a.* बलवर्धकः -का -कं, बलवर्धी -र्धिनी -र्धि (न्), तेजस्करः -रा -रं, तेजोवर्धकः -का -कं, पुष्टिदः -दा -दं, पुष्टिकारकः -का -कं, पौष्टिकः -की -कं, वीर्य्यदः -दा -दं, सत्त्ववर्धकः &c., दीपकः -का -कं.

INVIGORATION, *s.* (The act) बलवर्धनं, तेजोवर्धनं, सत्त्ववर्धनं, पुष्टिकरणं.—(State) बलवृद्धिः *f.*, तेजोवृद्धिः *f.*

INVINCIBLE, *a.* अजेयः -या -यं, अजय्यः -य्या -य्यं, दुर्जयः -या -यं, दुर्जेयः -या -यं, अदम्यः -म्या -म्यं, अदमनीयः -या -यं, अपराजेयः -या -यं, अपराजेतव्यः -व्या -व्यं, अपराजितः -ता -तं, अपराभाव्यः -व्या -व्यं, अप्रधृष्यः -ष्या -ष्यं, सर्व्वजित् *m. f. n.*

INVINCIBLENESS, *s.* अजेयता -त्वं, दुर्जेयता, अपराजेयत्वं, अदम्यता.

INVINCIBLY, *adv.* अजेयं, अपराजेयं, अदमनीयं, यथा जेतुं न शक्यते.

INVIOLABLE, *a.* (Not to be broken) अलंघ्यः -घ्या -घ्यं, अलंघनीयः -या -यं, अभेद्यः -द्या -द्यं, अनतिक्रमणीयः -या -यं, अनतिक्रम्यः -म्या

-म्यं, अभङ्गुः -ङ्गा -ङ्गुं, भङ्गायोग्यः -ग्या -ग्यं.—(Not to be treated irreverently, not to be hurt) अलंघनीयः -या -यं, अनुल्लंघनीयः -या -यं, अबाध्यः -ध्या -ध्यं, अबाधनीयः -या -यं, अनपकार्य्यः -र्य्या -र्य्यं, विकारानर्हः -र्हा -र्हं.—(Not to be put to death) अवध्यः -ध्या -ध्यं, अघ्नः -घ्ना -घ्नं. These last are used in reference to an ambassador or herald.

INVIOLABLENESS, INVIOLABILITY, *s.* अलंघ्यता -त्वं, अलंघनीयता -त्वं, अभेद्यता, अनतिक्रमणीयता, अबाध्यत्वं.—(Of an ambassador or herald) अवध्यता -त्वं, अवध्यभावः.

INVIOLABLY, *adv.* अलंघनीयं, अभङ्गेन, यथा न भिद्यते तथाप्रकारेण.

INVIOLATE, *a.* अलंघितः -ता -तं, अभग्नः -ग्ना -ग्नं, अक्षतः -ता -तं, अखण्डः -ण्डा -ण्डं, अभङ्गुः -ङ्गा -ङ्गुं, अभेदितः -ता -तं, अभिन्नः -न्ना -न्नं, अबाधितः -ता -तं.

INVIOUS, *a.* दुर्गमः -मा -मं, अगम्यः -म्या -म्यं, अगमनीयः -या -यं, दुरत्ययः -या -यं, गहनः -ना -नं, सबाधः -धा -धं, गत्पूनः -ना -नं.

To INVISCATE, *v. a.* चूर्णादिना श्यानद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं).

INVISIBILITY, INVISIBLENESS, *s.* अदृश्यता -त्वं, अलक्ष्यता -त्वं, परोक्षता, अलोकनीयत्वं, दृष्ट्यगोचरता, अप्रत्यक्षता, दुर्दृश्यता, दुर्दर्शत्वं, दुर्लक्ष्यता -त्वं, अदर्शनं, परोक्षं, अलोकनं, अन्तर्द्धा -र्द्धानं -र्द्धिः *m.*, अन्तर्हितत्वं, अविषयः.

INVISIBLE, *a.* अदृश्यः -श्या -श्यं, अदर्शनीयः -या -यं, अलक्ष्यः -क्ष्या -क्ष्यं, अप्रत्यक्षः -क्षा -क्षं, दृष्ट्यगोचरः -रा -रं, दृग्गोचरः -रा -रं, अलोकनीयः -या -यं, अप्रेक्षणीयः -या -यं, परोक्षः -क्षा -क्षं, दुर्दृश्यः -श्या -श्यं, दुर्दर्शः -र्शा -र्शं, दुर्लक्ष्यः -क्ष्या -क्ष्यं, दुर्लक्षः -क्षा -क्षं, असमक्षः -क्षी -क्षं, दृष्ट्यविषयः -या -यं, अचक्षुर्ग्राह्यः -ह्या -ह्यं, दर्शनातीतः -ता -तं, दर्शनपथातीतः -ता -तं, अनालोक्यः -क्या -क्यं, अदृष्टरूपः -पा -पं, अन्तर्हितः -ता -तं, तिरोहितः -ता -तं, अन्तरितः -ता -तं, प्रकाशेतरः -रा -रं, अरूपः -पा -पं, अचाक्षुषः -षी -षं, असाक्षात् indec.: 'to become invisible,' अन्तर्धा in pass. (-धीयते), तिरोधा.

INVISIBLY, *adv.* अदर्शनीयं, अप्रत्यक्षं -क्षेण -क्षतस्, परोक्षं -क्षेण, असाक्षात्, अप्रकाशं, अप्रादुस्, असमक्षं, अदृष्टरूपेण, दुर्दर्शं, दृष्ट्यगोचरेण; 'moving invisibly,' अलक्ष्यगतिः -तिः -ति.

INVITATION, *s.* निमन्त्रणं, आमन्त्रणं, आह्वानं, आह्वयः, आहूतिः *f.*, आवाहनं, आकारणं, केतनं, सङ्केतः; 'invitation to dinner,' भोजनार्थं निमन्त्रणं.

INVITATORY, *a.* निमन्त्रयिता -त्री -तृ (तृ), आमन्त्रयिता &c., आह्वानार्थकः -का -कं.

To INVITE, *v. a.* निमन्त्र् (c. 10. -मन्त्रयति -यितुं), आमन्त्र्, उपनिमन्त्र्, सन्निमन्त्र्, आह्वे (c. 1. -ह्वयति -ह्वातुं), समाह्वे, उपह्वे, केत् (c. 10. केतयति -यितुं), सङ्केत्, अभ्यर्थ् (c. 10. -अर्थयते -ति -यितुं), आकृ (c. 10. -कारयति -यितुं), आवह् (c. 10. -वाहयति -यितुं), सङ्केतं कृ, 'invite to dine,' भोजनार्थं or भोजनाय निमन्त्र्.—(Allure) आकृष् (c. 1. -कर्षति -क्रष्टुं), प्रलुभ् (c. 10. -लोभयति -यितुं).

INVITED, *p. p.* निमन्त्रितः -ता -तं, आमन्त्रितः -ता -तं, आहूतः -ता -तं, केतितः -ता -तं, अभ्यर्थितः -ता -तं, आवाहितः -ता -तं, आकारितः -ता -तं; 'invited to dine,' भोजनार्थं निमन्त्रितः -ता -तं; 'the persons invited,' निमन्त्रणीयजनाः *m. pl.*, निमन्त्रिताः *m. pl.*—(Allured) आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं.

INVITING, *a.* (Alluring) आकर्षकः -का -कं, आकर्षी -र्षिणी -र्षि (न्).

To INVOCATE, *v. a.* *See* *To* INVOKE.

INVOCATION, *s.* आह्वानं, आह्वयः, आहूतिः *f.*, प्रह्वायः, अभिमन्त्रणं, आमन्त्रणं, अनुकर्षणं, उपहवः, नामग्रहणं, नामस्मरणं, नामोच्चारणं, आवाहनं.

INVOICE, *s.* बीजकं, वाणिजभाषायां समर्पितद्रव्यपरिसंख्यापत्रं.

To INVOKE, *v. a.* ह्वे (c. 1. ह्वयति -ह्वातुं), आह्वे, उपह्वे, प्रह्वे, विह्वे, अभिमन्त्र् (c. 10. -मन्त्रयति -यितुं), आमन्त्र्, आवद् (c. 1. -वदति -दितुं), अभिवद्, आवच् (c. 2. -वक्ति -क्तुं), अभिवच्, प्रार्थ् (c. 10. प्रार्थयति -यितुं), अनुकृष् (c. 1. -कर्षति -क्रष्टुं), आह्वानं कृ.—(Call on by name) सम्बोधनं कृ, नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or स्मृ (c. 1. स्मरति, स्मर्त्तुं), नामग्रहणं कृ, आवाहनं कृ.—(Invoke blessings) आशास् (c. 2. -शास्ते -शासितुं).

INVOKED, *p. p.* आहूतः -ता -तं, आमन्त्रितः -ता -तं, आवाहितः -ता -तं.

INVOLUNTARILY, *adv.* अनिच्छातस्, अकामतस्, अनिकामतस्, अनिच्छापूर्व्वं, अकामपूर्व्वं, अमतिपूर्व्वं, अबुद्धिपूर्व्वं, अबोधपूर्व्वं, असन्तोषेण, असन्तोषपूर्व्वं, अज्ञानतस्, अज्ञानपूर्व्वं, निष्कामं.

INVOLUNTARY, *a.* अनैच्छिकः -की -कं, अनिच्छापूर्व्वः -र्व्वा -र्व्वं, अकामिकः -का -कं, अनभिकामिकः -का -कं, अकाम्यः -म्या -म्यं, अबुद्धिपूर्व्वः -र्व्वा -र्व्वं, असन्तोषपूर्व्वः -र्व्वा -र्व्वं, अज्ञानपूर्व्वः -र्व्वा -र्व्वं, अमतिपूर्व्वः -र्व्वा -र्व्वं, अस्वेच्छाजातः -ता -तं, अवशः -शा -शं, अनिच्छाधीनः -ना -नं, इच्छावाह्यः -ह्या -ह्यं.—(Not having will, unwilling) अकामः -मा -मं, निष्कामः -मा -मं, अनिच्छुः -च्छुः -च्छु.

INVOLUTION, *s.* (Act of involving or enveloping) आवेष्टनं, परिवेष्टनं, वेष्टनं, आवरणं, आच्छादनं.—(State of being entangled) आश्लिष्टता, अन्योन्यसंश्लेषः, अन्योन्यसंलग्नता, ग्रन्थिलत्वं, जटिलत्वं, सङ्कीर्णता, व्यतिकरः.

To INVOLVE, *v. a.* (Envelop) आवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिवेष्ट्, संवेष्ट्, आछद् (c. 10. -छादयति -यितुं), आवृ (c. 5. -वृणोति -वरितुं -रीतुं), परिवृ; 'is involved,' आव्रियते.—(Implicate, connect, join) सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), अनुबन्ध्, बन्ध्, संश्लिष् (c. 10. -श्लेषयति -यितुं), आश्लिष्, परिश्लिष्, संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), संसृज् (c. 6. -सृजति -स्रष्टुं); 'he is involved in many crimes,' बहुपापैः सम्बध्यते or लिप्यते.—(Comprise) परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अन्तर्गण् (c. 10. -गणयति -यितुं), परिसमाप् (c. 5. -आप्नोति -आप्तुं).

INVOLVED, *p. p.* (Enveloped) आवेष्टितः -ता -तं, परिवेष्टितः -ता -तं, वेष्टितः -ता -तं, आवृतः -ता -तं, आच्छादितः -ता -तं, आच्छन्नः -न्ना -न्नं, समाच्छन्नः -न्ना -न्नं, व्याप्तः -प्ता -प्तं.—(Comprised, included) अन्तर्गतः -ता -तं, अन्तर्गणितः -ता -तं, परिगृहीतः -ता -तं, समाविष्टः -ष्टा -ष्टं, आकलितः -ता -तं, सहितः -ता -तं, प्रतिष्ठितः -ता -तं, अवान्तरः -रा -रं, गर्भः -र्भा -र्भं in comp.—(Implicated, connected) सम्बद्धः -द्धा -द्धं, अनुबद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, बद्धः -द्धा -द्धं, संसृष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, अनुषक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, ग्रस्तः -स्ता -स्तं, लिप्तः -प्ता -प्तं; 'involved in crime,' पापसम्बद्धः -द्धा -द्धं, पापलिप्तः -प्ता -प्तं; 'in calamity,' विपद्ग्रस्तः -स्ता -स्तं; 'in debt,' ऋणग्रस्तः -स्ता -स्तं.—(Implied) ध्वनितः -ता -तं, फलितः -ता -तं; 'involved meaning,' फलितार्थः, ध्वनितार्थः.—(Confused, not clear) अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, अभिन्नः -न्ना -न्नं.

INVULNERABLE, *a.* अभेद्यदेहः -हा -हं, अवेध्यदेहः -हा -हं, अछेद्यदेहः -हा -हं, अप्रहार्य्यदेहः, -हा -हं, अनाघातनीयः -या -यं, असम्भाव्यक्षतः -ता -तं, अशक्यक्षतः -ता -तं, क्षताक्षमः -मा -मं, आघाताक्षमः -मा -मं, वज्रदेहः -हा -हं, वज्रशरीरः -रा -रं.

INVULNERABLENESS, *s.* अभेद्यता, अवेध्यता, अछेद्यता, अघातनीयत्वं.

INWARD, *a.* अन्तरस्थः -स्था -स्थं, अन्तःस्थः -स्था -स्थं, आन्तरः -री -रं, आन्तरिकः -की -कं, अन्तर्भूतः -ता -तं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्भवः -वा -वं, अन्तर्गतः -ता -तं, अभ्यन्तरः -रा -रं, आभ्यन्तरः -री -रं, अन्तरतमः

-मा -मत्, अन्तरङ्गः -ङ्गा -ङ्गं. Often expressed by अन्तर् in comp.; as, 'inward heat,' अन्तर्दाहः; 'inward spirit,' अन्तरात्मा *m.* (न्), अन्तःकरणं, अन्तःप्रकृतिः *f.*; 'inward consciousness,' अन्तःसंज्ञा; 'inward purity,' अन्तःशौचं; 'inward discipline,' अन्तर्यमनं, अन्तःकरणसंयमः, दमः; 'inward meditation,' अन्तर्भावना.

INWARDLY, *adv.* अन्तर्, अन्तरे -रेण, अभ्यन्तरेण; 'inwardly bad,' अन्तर्दुष्टः -ष्टा -ष्टं.—(In the heart, secretly) अन्तःकरणेन, मनसा, निभृतं, सुनिभृतं.

INWARDS, *s. pl.* अन्त्राणि *n. pl.*, अन्तर्नाड्यः *f. pl.*, उदरं.

To INWEAVE, *v. a.* ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं). *See To* INTERWEAVE.

To INWRAP, *v. a.* आवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिवेष्ट्, आछद् (c. 10. -छादयति -यितुं), अवगुण्ठ् (c. 10. -गुण्ठयति -यितुं).

To INWREATHE, *v. a.* मालया परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), मालायुक्तं -क्तां कृ.

INWROUGHT, *p. p.* खचितः -ता -तं, जडितः -ता -तं, लुरितः -ता -तं.

IOTA, *s.* लवलेशः, लेशः, विन्दुः *m.*, विन्दुमात्रं, तिलमात्रं.

IRASCIBLE, *a.* शीघ्रकोपी -पिनी -पि (न्), शीघ्रक्रोधी -धिनी -धि (न्), सुलभकोपः -पा -पं, क्रोधशीलः -ला -लं, कोपी -पिनी -पि (न्), क्रोधी &c., क्रोधिष्ठः -ष्ठा -ष्ठं, कोपिष्ठः -ष्ठा -ष्ठं, चण्डः -ण्डा -ण्डं, चण्डस्वभावः -वा -वं, पित्तवेगी -गिनी -गि (न्), पित्तस्वभावः -वा -वं, सन्तापी -पिनी -पि (न्).

IRASCIBLENESS, *s.* शीघ्रकोपित्वं, क्रोधशीलता, स्वभावचण्डता, पित्तस्वभावः, क्रोधस्वभावः, पित्तप्रकृतिः *f.*

IRATE, *a.* क्रुद्धः -द्धा -द्धं, कुपितः -ता -तं, क्रोधी -धिनी -धि (न्).

IRE, *s.* क्रोधः, कोपः, अमर्षः, रोषः, मन्युः *m.*, संरम्भः, सन्तापः.

IREFUL, *a.* क्रोधी -धिनी -धि (न्), कोपी -पिनी -पि (न्), क्रुद्धः -द्धा -द्धं, सकोपः -पा -पं, समन्युः -न्युः -न्यु, संरम्भी -म्भिणी -म्भि (न्).

IREFULLY, *adv.* सकोपं, सक्रोधं, सरोषं, सामर्षं, कोपेन, क्रोधेन.

IRIS, *s.* (Rainbow) इन्द्रायुधं, इन्द्रधनुस् *n.* (Of the eye) नेत्रतारकामण्डलं, कनीनिकामण्डलं, कनीनिकापरिधिः *m.*, तारामण्डलं, उपतारा.—(Plant) गोलोमी, श्वेतदूर्वा, भूतकेशः.

To IRK, *v. a.* आयस् (c. 10. -यासयति -यितुं), दुःख् (c. 10. दुःखयति -यितुं), खिद् (c. 10. खेदयति -यितुं), पीड् (c. 10. पीडयति -यि °), बाध् (c. 1. बाधते -धितुं).

IRKSOME, *a.* खेदजनकः -का -कं, क्लेशकरः -री -रं, क्लेशदः -दा -दं, दुःखदः -दा -दं, दुःखकरः -री -रं, आयासहेतुकः -का -कं, कष्टकरः -री -रं, कष्टः -ष्टा -ष्टं, श्रमजनकः -का -कं, गुरुः -र्वी -रु.

IRKSOMENESS, *s.* खेदजनकत्वं, क्लेशजनकत्वं, क्लेशकत्वं, कष्टत्वं, गुरुता.

IRON, *s.* लोहं -हः, अयस् *n.*, आयसं, लौहं -हः, कृष्णायसं, कालायसं, कृष्णं, कालं, तीक्ष्णं, शस्त्रकं, पिण्डं, अश्मसारः, गिरिजं, गिरिसारः, शिलाजं, शिलात्मजं, निशितं, कान्तं, दृढं, मलीमसः; 'green sulphate of iron,' धातुशेखरः, पुष्पकासीशः, नयनौषधं, कासीसं, काशीशं, हंसलोमशं; 'red sulphate of iron,' धातुकासीशः; 'pyritic iron-ore,' स्वर्णमाक्षिकं, विटमाक्षिकं, सुवर्णमुखी; 'iron-filings,' लोहचूर्णं; 'rust of iron,' मण्डूरं, सिंहानं, अयोमलं. *See* RUST; 'sulphuret of iron,' पांशुकासीसं, ताप्यं, धातुमाक्षिकं; 'tipped with iron,' अयोमुखः -खा -खं, अयोग्रः -ग्रा -ग्रं, लोहाग्रः -ग्रा -ग्रं; 'wrought iron,' कुशी.—(Smoothing iron) वस्त्रादिश्लक्ष्णीकरणार्थं लोहयन्त्रं.—(Fetter) लोहबन्धः -न्धं -न्धनं.

IRON, *a.* (Made of iron) लौहः -ही -हं, लोहमयः -यी -यं, लोहलः -ला -लं, आयसः -सी -सं, अयोमयः -यी -यं, अयस्मयः -यी -यं, लोहात्मकः -का -कं, लोह in comp.: as, 'an iron arrow,' लोहनालः; 'iron-image,' लोहप्रतिमा; 'iron armour,' लोहवर्म्म *n.* (न्); 'iron pike,' लोहशङ्कुः *m.*; 'iron medicine,' लोहभस्म *n.* (न्); 'iron-toothed,' अयोदन् -दती -दत् (त्); 'having an iron constitution,' वज्रदेहः -हा -हं.

To IRON, *v. a.* (Smooth with an iron) लोहयन्त्रेण श्लक्ष्णीकृ.—(Fetter) शृङ्खलया बन्ध् (c. 9. बध्नाति, बन्द्धुं), शृङ्खल (nom. शृङ्खलयति -यितुं).

IRON-BAR, *s.* कुशी, लोहकुशी, लोहपिण्डः -ण्डं.

IRON-FILINGS, *s. pl.* लोहचूर्णं, लोहकिट्टं, लोहजं.

IRON-FISTED, *a.* वज्रमुष्टिः -ष्टिः -ष्टि, लोहमुष्टिः -ष्टिः -ष्टि.

IRON-FOUNDER, *s.* लोहकारः, अयस्कारः, व्योकारः.

IRON-FOUNDERY, *s.* लोहविलयनशाला, कुप्यशाला, सन्धानी.

IRON-HEARTED, *a.* अयोहृदयः -या -यं, वज्रहृदयः -या -यं, लोहहृदयः -या -यं.

IRON-MOLD, *s.* लोहचिह्नं, लोहाङ्कः, लोहकलङ्कः.

IRON-MONGER, *s.* लोहकारः, लोहद्रव्यविक्रेता *m.* (तृ) -विक्रयी *m.* (न्), लोहभाण्डविक्रयी *m.*, पिठरकटाहादिभाण्डविक्रेता *m.*

IRON-MONGERY, *s.* लोहद्रव्याणि *n. pl.*, लौहभाण्डानि *n. pl.*, लोहमयद्रव्याणि, पिठरकटाहादीनि लोहनिर्म्मितभाण्डानि.

IRONICAL, *a.* मृषावादी -दिनी -दि (न्), विकत्थनः -ना -नं, साक्षेपः -पा -पं, सव्यङ्गनः -ना -नं, उपरोधी -धिनी -धि (न्), औपरोधिकः -की -कं, उपरोधात्मकः -का -कं, अवक्षेपकः -का -कं.

IRONICALLY, *adv.* सविकत्थनं, साक्षेपं, सव्यङ्गनं, विपरीतलक्षणापूर्व्वं, निह्नवेन, सनिह्नवं, सोल्लुण्ठनं, मृषावादेन, मृषा.

IRONY, *s.* (Speech expressing one thing and meaning another) व्याजोक्तिः *f.*, व्यञ्जना, व्यंग्यः, साक्षेपः, अवक्षेपः, विपरीतलक्षणा, उपरोधः.—(Ironical praise) व्याजस्तुतिः *f.*, निन्दास्तुतिः *f.* व्याजनिन्दा, विकत्था -त्थनं, सोत्प्रासः, सोल्लुण्ठं -ण्ठनं, मृषावादः, अन्यथालोचं.—(Disclaimer) निह्नवः, निह्नुतिः *f.*, अपह्नवः, अपलापः, अवहित्था.

IRONY, *a.* (Made of iron) लौहिकः -की -कं, लोहमयः -यी -यं, अयोमयः &c.

IRRADIANCE, IRRADIANCY, *s.* दीप्तिः *f.* द्युतिः *f.*, प्रभा, कान्तिः *f.*, तेजस्.

To IRRADIATE, *v. a.* प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, दीप् (c. 10. दीपयति -यितुं), विदीप्, प्रदीप्, उद्दीप्, द्युत् (c. 10. द्योतयति -यितुं), विद्युत्, प्रद्युत्, विराज् (c. 10. राजयति -यितुं).

IRRADIATED, *p. p.* प्रकाशितः -ता -तं, विकाशितः -ता -तं, दीपितः -ता -तं, प्रदीपितः -ता -तं, राजितः -ता -तं, विराजितः -ता -तं, द्योतितः -ता -तं.

IRRADIATION, *s.* प्रकाशनं, विकाशनं, दीपनं, प्रदीपनं, उद्दीपनं, दीप्तिः *f.*, प्रदीप्तिः *f.*, द्योतनं, प्रद्योतनं, उद्द्योतः -तनं, द्युतिः *f.*, उज्ज्वलनं, उज्ज्वलता, उद्भासः, प्रकाशता.

IRRATIONAL, *a.* (Void of reason) बुद्धिहीनः -ना -नं, बुद्धिरहितः -ता -तं, निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, अबुद्धिमान् -मती -मत् (त्), ज्ञानहीनः -ना -नं, ज्ञानशक्तिरहितः -ता -तं, अज्ञानी -निनी -नि (न्), प्रज्ञाहीनः -ना -नं, अचेतनः -ना -नं, चैतन्यरहितः -ता -तं, अचिन्तः -न्ता -न्तं, निश्चिन्तः -न्ता -न्तं, चिन्ताशून्यः -न्या -न्यं, पशुधर्म्मा -र्म्मा -र्म्म (न्), पशुस्वभावः -वा -वं, पशुसमानः -ना -नं.—(Contrary to reason, absurd) अन्याय्यः -य्या -य्यं, न्यायविरुद्धः -द्धा -द्धं, अन्यायी -यिनी -यि (न्), असम्बद्धः -द्धा -द्धं, असङ्गतः -ता -तं, अतर्कितः -ता -तं, अतार्किकः -की -कं, अयुक्तिकः -का -कं, अयुक्तिसिद्धः -द्धा -द्धं, युक्तिविरुद्धः -द्धा -द्धं, अयुक्तः -क्ता -क्तं, असमञ्जसः -सा -सं, अनर्थकः -का -कं.

IRRATIONALITY, *s.* बुद्धिहीनता, ज्ञानहीनता, निर्बुद्धित्वं, अन्याय्यता.

IRRATIONALLY, *adv.* न्यायविरोधेन, असङ्गतं, असम्बद्धं, अतर्कितं, पशुवत्.

IRRECLAIMABLE, *a.* दुष्कर्म्मानिवर्त्तयितव्यः -व्या -व्यं, कुकर्म्मापरावर्त्तनीयः

-या -यं, अशक्यविप्रतीसारः -रा -रं, उपदेशवहिर्भूतः -ता -तं, अनुद्धार्य्यः -र्य्या -र्य्यं, अशोधनीयः -या -यं.

IRRECONCILABLE, *a.* (Not to be brought to amity) असन्धेयः -या -यं, असन्धातव्यः -व्या -व्यं, असमाधेयः -या -यं, अशमनीयः -या -यं, अशाम्यः -म्या -म्यं, अशक्यशमः -मा -मं.—(That cannot be made to agree, inconsistent) असङ्गतः -ता -तं, परस्परविरुद्धः -द्धा -द्धं -विरोधी -धिनी -धि (न्), परस्परपराहतः -ता -तं, विसङ्गतः -ता -तं, असदृशः -शी -शं, असम्भावनीयः -या -यं, असम्भाव्यः -व्या -व्यं, अन्योन्यविपरीतः -ता -तं, असमञ्जसः -सा -सं.

IRRECONCILABLENESS, *s.* असङ्गतिः *f.*, परस्परविरोधः, अन्योन्यविपरीतता.

IRRECOVERABLE, *a.* असमाहार्य्यः -र्य्या -र्य्यं, अपुनःप्राप्यः -प्या -प्यं, पुनरप्राप्यः -प्या -प्यं, अपुनर्लभ्यः -भ्या -भ्यं, पुनरलभ्यः -भ्या -भ्यं, अपुनरादेयः -या -यं, अनावाप्यः -प्या -प्यं, अनुद्धरणीयः -या -यं.

IRRECOVERABLY, *adv.* असमाहार्य्यं, अनुद्धरणीयं, यथा उद्धर्त्तुं न शक्यते तथा.

IRREFRAGABLE, *a.* अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं, अप्रत्याख्येयः -या -यं, अबाध्यः -ध्या -ध्यं, अविवदनीयः -या -यं, असन्दिग्धः -ग्धा -ग्धं, सुनिश्चितः -ता -तं, वज्रप्रमाणः -णा -णं, दृढप्रमाणः -णा -णं.

IRREFRAGABLENESS, *s.* अखण्डनीयता, अखण्ड्यता, अबाध्यत्वं.

IRREFRAGABLY, *adv.* अखण्डनीयं, यथा खण्डनं कर्त्तुं न शक्यते तथा.

IRREFUTABLE, *a.* अखण्डनीयः -या -यं, अखण्डितव्यः -व्या -व्यं, अशक्यखण्डनः -ना -नं, खण्डनाशक्यः -क्या -क्यं, अनिरसनीयः -या -यं.

IRREGULAR, *a.* विधिविरुद्धः -द्धा -द्धं, विधिभञ्जकः -का -कं, विधिहीनः -ना -नं, अविधिः -धिः -धि, अवैधः -धी -धं, अवैधिकः -की -कं, विधिघ्नः -घ्नी -घ्नं, नियमविरुद्धः -द्धा -द्धं, अयथाविधिः -धिः -धि, शास्त्रविरुद्धः -द्धा -द्धं, उत्सूत्रः -त्रा -त्रं, विसूत्रः -त्रा -त्रं.—(Immethodical) अक्रमकः -का -कं -मिकः -का -कं, क्रमविरुद्धः -द्धा -द्धं, क्रमहीनः -ना -नं, क्रमशून्यः -न्या -न्यं, क्रमरहितः -ता -तं, क्रमवाह्यः -ह्या -ह्यं, अव्यवस्थितः -ता -तं, असंस्थितः -ता -तं, अपर्य्यायः -या -यं, उच्छृङ्खलः -ला -लं.—(In conduct) व्यभिचारी -रिणी -रि (न्), अमर्य्यादः -दा -दं, उत्क्रान्तमर्य्यादः -दा -दं, धर्म्मरोधी -धिनी -धि (न्), धर्म्मविरुद्धः -द्धा -द्धं, विपथगामी -मिनी -मि (न्), अपथगामी &c., अपथवर्त्ती -र्त्तिनी -र्त्ति (न्), अन्यथाचारी &c., आचारवर्जितः -ता -तं, कुचरितः -ता -तं.—(In grammar, to be excepted) वर्ज्जनीयः -या -यं, निपातितः -ता -तं, निपातनीयः -या -यं.—(Uneven, unequal) विषमः -मा -मं, असमः -मा -मं; 'irregular fever,' विषमज्वरः.—(In shape) विरूपः -पा -पी -पं.

IRREGULARITY, *s.* अविधिः *m.*, अविधानं, अविधिता, विधिविरोधः, विधिभङ्गः, अवैधत्वं, उत्सूत्रता, विसूत्रता, शास्त्रविरोधः, नियमविरोधः, अनियमः, अक्रमः, उत्क्रमः, व्यतिक्रमः, क्रमविरोधः, अव्यवस्था, अपरिपाटिः *f.*—(In conduct) व्यभिचारः, विपथगमनं, कुपथगमनं, अपथः, कुपथः, अधर्म्मः -र्म्मत्वं, अनाचारः.—(In grammar, exception) निपातः -तनं, वर्ज्जनं, निषेधः.—(Unevenness) विषमता, वैषम्यं, विषमं, असमता; 'irregularity in diet,' कुपथ्यं, अपथ्यं.

IRREGULARLY, *adv.* अविधितस्, अविधानतस्, अविधिवत्, विधिविरुद्धं, विधिविरोधेन, नियमविरुद्धं, अनियमतस्, अयथाविधि, अक्रमेण, क्रमविरुद्धं, विसूत्रं, अव्यवस्थितं, अयथाशास्त्रं.

IRRELATIVE, *a.* असम्बन्धी -न्धिनी -न्धि (न्), निःसम्बन्धः -न्धा -न्धं, सम्बन्धहीनः -ना -नं, असङ्गः -ङ्गा -ङ्गं, निःसङ्गः -ङ्गा -ङ्गं, अविषयकः -का -कं, अनानुषङ्गिकः -की -कं.

IRRELEVANCY, *s.* अप्रासङ्गिकत्वं, अप्रस्तुतता, अप्रसङ्गः, अविषयत्वं, निर्विषयता, अनन्वयः, अन्वयाभावः, असम्बन्धः, असम्पर्कः, असङ्गतत्वं, अप्रयुक्तिः *f.*

IRRELEVANT, *a.* अप्रासङ्गिकः -की -कं, अप्रस्तुतः -ता -तं, निर्विषयः -या -यं, अनन्वितः -ता -तं, असम्बन्धी -न्धिनी -न्धि (न्), अप्रसक्तः -क्ता -क्तं, प्रसङ्गवाह्यः -ह्या -ह्यं, प्रस्तुतवहिर्भूतः -ता -तं, असङ्गतः -ता -तं, अप्रकृतः -ता -तं, अप्राकरणिकः -की -कं, असम्पर्कीयः -या -यं, अनुपपन्नः -न्ना -न्नं, अप्रयुक्तः -क्ता -क्तं, अयौक्तिकः -की -कं.

IRRELEVANTLY, *adv.* अप्रस्तुतं, निर्विषयं, प्रस्तुतवहिस्, असम्बद्धं, असम्बन्धेन, असङ्गतं, अप्रयुक्तं, असम्पर्केण, अप्रसक्तं.

IRRELIGION, *s.* अधर्म्मः -र्म्मत्वं, वैधर्म्यं, निर्धर्म्मत्वं, धर्म्मलोपः, धर्म्महीनता, अपूजा, अभक्तिः *f.*, भक्तिहीनता, अभक्तत्वं, देवनिन्दा, अपुण्यत्वं, दुष्टता, पापिष्ठत्वं, सपापत्वं, दुष्कृतं.

IRRELIGIOUS, *a.* अधर्म्मी -र्म्मिणी -र्म्मि (न्), अधार्म्मिकः -की -कं, निर्धर्म्मः -र्म्मा -र्म्मं, अधर्म्मिष्ठः -ष्ठा -ष्ठं, धर्म्महीनः -ना -नं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), अपूजकः -का -कं, अभक्तः -क्ता -क्तं, भक्तिहीनः -ना -नं, देवनिन्दकः -का -कं, दुष्टः -ष्टा -ष्टं, अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, पापी -पिनी -पि (न्).

IRRELIGIOUSLY, *adv.* अधर्म्मतस्, अधर्म्मेण, अधार्म्मिकवत्, अपुण्यवत्, पापिष्ठं.

IRREMEABLE, *a.* अपुनरागम्यः -म्या -म्यं, अप्रत्यागम्यः &c., अपरावर्त्त्यः -र्त्त्या -र्त्त्यं.

IRREMEDIABLE, *a.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अशक्यप्रतीकारः -रा -रं, अप्रतिकारः -रा -रं, अविद्यमानप्रतीकारः -रा -रं, निरुपायः -या -यं, अनुपायः -या -यं, निरुपायी -यिनी -यि (न्), उपायहीनः -ना -नं, उपायातीतः -ता -तं, अशक्योपायः -या -यं, अचिकित्स्यः -त्स्या -त्स्यं, अचिकित्सनीयः -या -यं, चिकित्सितुम् अशक्यः -क्या -क्यं, असमाधेयः -या -यं, अप्रतिसमाधेयः -या -यं.

IRREMEDIABLENESS, *s.* निरुपायत्वं, अप्रतिकार्य्यत्वं, प्रतीकारहीनता, असमाधेयता.

IRREMEDIABLY, *adv.* निरुपायं, यथा प्रतिकर्त्तुं न शक्यते तथाप्रकारेण, यथा उपायो न विद्यते तथा.

IRREMISSIBLE, *a.* अक्षन्तव्यः -व्या -व्यं, अमोचनीयः -या -यं, क्षमानर्हः -र्हा -र्हं.

IRREMOVABLE, *a.* अनपादेयः -या -यं, अनपहरणीयः -या -यं, अपरिहार्य्यः -र्य्या -र्य्यं, अनिःसारणीयः -या -यं, अनपनेतव्यः -व्या -व्यं, अचलः -ला -लं, स्थिरः -रा -रं.

IRREPARABLE, *a.* असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, असन्धेयः -या -यं, असमाधेयः -या -यं, अप्रतिसमाधेयः -या -यं, अप्रतिकार्य्यः -र्य्या -र्य्यं, अप्रतिकारः -रा -रं, अशक्यप्रतीकारः -रा -रं, अचिकित्सनीयः -या -यं, अनुद्धार्य्यः -र्य्या -र्य्यं, अनुद्धरणीयः -या -यं.

IRREPARABLENESS, *s.* असाध्यता, अप्रतिकार्य्यत्वं, असमाधेयता, अनुद्धार्य्यत्वं.

IRREPARABLY, *adv.* असाधनीयं, यथा प्रतिकारो न विद्यते तथा, अचिकित्सनीयं, अप्रतिसमाधेयं.

IRREPREHENSIBLE, *a.* अनिन्द्यः -न्द्या -न्द्यं, अनिन्दनीयः -या -यं, निर्दोषः -षा -षं, दोषशून्यः -न्या -न्यं, अगर्ह्यः -र्ह्या -र्ह्यं, अविगर्ह्यः -र्ह्या -र्ह्यं.

IRREPREHENSIBLENESS, *s.* अनिन्द्यता, अनिन्दनीयता, दोषशून्यता, निर्दोषत्वं.

IRREPREHENSIBLY, *adv.* अनिन्दनीयं, निरपराधं, अनपराधेन, दोषं विना.

IRREPRESSIBLE, *a.* अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -हा -हं, अनियन्तव्यः -व्या -व्यं, अनिवार्य्यः -र्य्या -र्य्यं, असंहरणीयः -या -यं, अयन्त्रणीयः -या -यं.

IRREPROACHABLE, *a.* अनिन्द्यः -न्द्या -न्द्यं, अनिन्दनीयः -या -यं, अनिन्दितः -ता -तं, अगर्ह्यः -र्ह्या -र्ह्यं, अविगर्ह्यः &c., अविगर्हितः -ता -तं, अपरिवाद्यः -द्या -द्यं, अनपवाद्यः -द्या -द्यं, अनवद्यः -द्या -द्यं, निरवद्यः -द्या -द्यं, निर्दोषः -षा -षं, निरपराधः -धा -धं, अपरिभाषणीयः -या -यं, अकुत्सितः -ता -तं, अनवगीतः -ता -तं, निष्कलङ्कः -ङ्का -ङ्कं, अदूष्यः -ष्या -ष्यं, अवाच्यः -च्या -च्यं, निर्वाच्यः -च्या -च्यं, अवचनीयः -या -यं, अदुर्वृत्तः -त्ता -त्तं.

IRREPROACHABLENESS, *s.* अनिन्द्यता, अनिन्दनीयता, अगर्ह्यत्वं, अपरिवाद्यता.

IRREPROACHABLY, *adv.* अनिन्दनीयं, अनिन्दितं, अगर्हणीयं, अविगर्हितं.

IRRESISTIBLE, *a.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अप्रतीकार्य्यः &c., अनिवार्य्य

-र्य्या -र्य्यं, अनिवारणीयः -या -यं, अनिवारः -रा -रं, दुर्निवारः -रा -रं, अवार्य्यः -र्य्या -र्य्यं, निर्वार्य्यः -र्य्या -र्य्यं, अनवग्रहः -हा -हं, दुर्निग्रहः -हा -हं, असंहार्य्यः -र्य्या -र्य्यं, दुर्धरः -रा -रं, निर्धारणीयः -या -यं, निर्धार्य्यः -र्य्या -र्य्यं, अबाध्यः -ध्या -ध्यं, अबाधनीयः -या -यं, अनतिक्रमणीयः -या -यं, अप्रतिहतः -ता -तं, अप्रतिद्वन्द्वः -न्द्वा -न्द्वं, सर्व्वदमनः -ना -नं.

Irresistibleness, *s.* अप्रतिकार्य्यत्वं, अनिवार्य्यता, अनिवारणीयता, अवारणीयत्वं, दुर्निग्रहत्वं, अबाध्यत्वं.

Irresistibly, *adv.* अनिवारणीयं, अवारणीयं, अप्रतिकार्य्यं, दुर्निग्रहं, यथा निवारयितुं न शक्यते तथाप्रकारेण.

Irresolute, *a.* अस्थिरमतिः -तिः -ति, अस्थिरचित्तः -त्ता -त्तं, अस्थिरबुद्धिः -द्धिः -द्धि, अस्थिरमनस्कः -स्का -स्कं, चञ्चलबुद्धिः -द्धिः -द्धि, चञ्चलवृत्तिः -त्तिः -त्ति, चलचित्तः -त्ता -त्तं, विकल्पशीलः -ला -लं, विकल्पयन् -यन्ती -यत् (त्), संशयात्मा -त्मा -त्म (न्), सन्दिग्धमतिः -तिः -ति, संशयापन्नमानसः -सा -सं, चपलात्मकः -का -कं, अधीरः -रा -रं, अदृढमनस्कः -स्का -स्कं, अनवस्थितः -ता -तं, धैर्य्यहीनः -ना -नं, तरलः -ला -लं.

Irresolutely, *adv.* अस्थिरं, अधीरं, स्थैर्य्यपूर्व्वं, धैर्य्यपूर्व्वं, अधैर्य्येण, अस्थैर्य्येण, अस्थिरचेतसा, चञ्चलबुद्ध्या, विकल्पशीलत्वात्, चञ्चलं, चपलवत्.

Irresolution, *s.* अस्थैर्य्यं, अस्थिरता, अधैर्य्यं, अधीरता, चित्तास्थैर्य्यं, विकल्पशीलता, बुद्धिचाञ्चल्यं, चञ्चलबुद्धिः *f.*, अस्थिरबुद्धिः *f.*, चलचित्तता, चञ्चलत्वं, अदृढता, अधृतिः *f.*, अधारणा, चपलता, चापल्यं, अनवस्थितिः *f.*

Irrespective, *a.* निरपेक्षः -क्षा -क्षं, अनपेक्षः -क्षा -क्षं, अपेक्षाहीनः -ना -नं, निर्व्यपेक्षः -क्षा -क्षं, अप्रतीक्षकः -का -कं.

Irrespectively, *adv.* निरपेक्षं, अनपेक्षं, अनपेक्ष्य, अप्रतीक्ष्य, अनुद्दिश्य.

Irresponsibility, *s.* अनुयोगानधीनता, अपृच्छाधीनता, प्रश्नायोग्यत्वं, अननुयोज्यता.

Irresponsible, *a.* अननुयोगाधीनः -ना -नं, अनुयोगानधीनः -ना -नं, अपृच्छाधीनः -ना -नं, अप्रश्नयोग्यः -ग्या -ग्यं, पृच्छानर्हः -र्हा -र्हं, अननुयोज्यः -ज्या -ज्यं, अननुयोक्तव्यः -व्या -व्यं.

Irrestrainable, *a.* अनिवार्य्यः -र्य्या -र्य्यं, अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -हा -हं, अनिवर्त्तयितव्यः -व्या -व्यं, अनिवर्त्तनीयः -या -यं.

Irretrievable, *a.* अपुनःप्राप्यः -प्या -प्यं, पुनरप्राप्यः -प्या -प्यं, अपुनर्लभ्यः -भ्या -भ्यं, पुनरलभ्यः -भ्या -भ्यं, अनुद्धरणीयः -या -यं, अनुद्धार्य्यः -र्य्या -र्य्यं, असमाहार्य्यः -र्य्या -र्य्यं, अप्रतिसमाधेयः -या -यं.

Irretrievableness, *s.* अपुनःप्राप्यता, अनुद्धरणीयता, अप्रतिसमाधेयत्वं.

Irretrievably, *adv.* अनुद्धरणीयं, यथा प्रतिसमाधातुं न शक्यते तथा.

Irreverence, *s.* अपूजा, अपमानं, अवमानं, अनादरः, अवज्ञानं, अवज्ञा, असम्मानं, परिभवः, परिभूतिः *f.*, परिभावः, अवधीरणा, उपेक्षा, अमर्य्यादा.

Irreverent, *a.* अपूजकः -का -कं, अपमानी -निनी -नि (न्), अवमानी &c., अपमानकारी &c., अवज्ञाकारी &c., अनादरकारी &c., परिभावी -विनी -वि (न्), अनादरी -रिणी -रि (न्), अनादरबुद्धिः -द्धिः -द्धि.

Irreverently, *adv.* अपूजया, अवज्ञापूर्व्वं, सावमानं, सावज्ञानं, अनादरेण.

Irreversible, *a.* अपरावर्त्यः -र्त्या -र्त्यं, अपरावर्त्तनीयः -या -यं, अनिवर्त्यः -र्त्या -र्त्यं, अनिवर्त्तनीयः -या -यं, परावर्त्तनाशक्यः -क्या -क्यं, परावर्त्तनार्हः -र्हा -र्हं, अलोप्यः -प्या -प्यं, अलोपनीयः -या -यं, अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं.

Irreversibleness, *s.* अपरावर्त्यत्वं, अपरावर्त्तनीयता, अलोप्यता, अखण्ड्यत्वं.

Irreversibly, *adv.* अपरावर्त्तनीयं, यथा परावर्त्तितुं न शक्यते तथा.

Irrevocable, *a.* अपरावर्त्यः -र्त्या -र्त्यं, अविकार्य्यः -र्य्या -र्य्यं, अनन्यथाकरणीयः -या -यं.

Irrevocably, *adv.* अपरावर्त्तनीयं, अपरिवर्त्तनीयं, अनन्यथाकरणीयं.

To irrigate, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अभिषिच्, अवसिच्, जलेन प्लु (c. 10. प्लावयति -यितुं) or क्लिद् (c. 10. क्लेदयति -यितुं) or अभ्युक्ष् (c. 1. -उक्षति -क्षितुं) or प्रोक्ष्, अभिवृष् (c. 1. -वर्षति -र्षितुं) प्रणालिकासेचनं कृ.

Irrigated, *p. p.* सिक्तः -क्ता -क्तं, जलसिक्तः &c., सलिलाभिषिक्तः &c., जलप्लावितः -ता -तं, समुक्षितः -ता -तं.

Irrigation, *s.* सेकः, सेचनं, सिञ्चनं, निषेकः, अवसेकः, अवसेचनं, जलप्लावनं, क्लेदनं, अभ्युक्षणं, प्रोक्षणं, प्रणालिकासिञ्चनं.

Irriguous, *a.* जलसिक्तः -क्ता -क्तं, सिक्तः -क्ता -क्तं, जलाढ्यः -ढ्या -ढ्यं, अनूपः -पा -पं, बहूदकः -का -कं, सजलः -ला -लं, आर्द्रः -र्द्रा -र्द्रं, समुन्नः -न्ना -न्नं.

Irrision, *s.* उपहासः, अवहासः, अपहासः, परिहासः, हास्यं, अवहेला.

Irritability, *s.* शीघ्रकोपित्वं, कोपशीलता, क्रोधशीलता, सुक्रोधनीयता, चण्डस्वभावः, उच्चण्डता, सुखोत्तापनीयत्वं.

Irritable, *a.* (Easily made angry) शीघ्रकोपी -पिनी -पि (न्), सुलभकोपः -पा -पं, सुलभक्रोधः -धा -धं, शीघ्रक्रोधी &c., सुलभमन्युः -न्युः -न्यु, सुक्रोधनीयः -या -यं, सुप्रकोपणीयः -या -यं, कोपशीलः -ला -लं, क्रोधशीलः -ला -लं, सन्तापशीलः -ला -लं, कोपिष्ठः -ष्ठा -ष्ठं, क्रोधिष्ठः -ष्ठा -ष्ठं, चण्डस्वभावः -वा -वं, पित्तस्वभावः -वा -वं, पित्तवेगी -गिनी -गि (न्), उच्चण्डः -ण्डा -ण्डं, उग्रस्वभावः -वा -वं. —(Easily excited) शीघ्रोत्तेजनीयः -या -यं, सुखोत्तापनीयः -या -यं.

To irritate, *v. a.* कुप् (c. 10. कोपयति -यितुं), प्रकुप्, सङ्कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), कोपं जन् (c. 10. जनयति -यितुं), क्रोधं जन्. —(Excite) उत्तप् (c. 10. -तापयति -यितुं), सन्तप्, उत्तिज् (c. 10. -तेजयति -यितुं).

Irritated, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः -ता -तं, कुपितः -ता -तं, जातकोपः -पा -पं, जातक्रोधः -धा -धं, जातामर्षः -र्षा -र्षं, उपजातक्रोधः -धा -धं, रूढमन्युः -न्युः -न्यु. —(Excited) उत्तेजितः -ता -तं, समुत्तेजितः -ता -तं, उत्तापितः -ता -तं, उत्तप्तः -प्ता -प्तं.

[illegible] *a.* कोपजनकः -का -कं, क्रोधजनकः -का -कं, उत्तापकः -का -कं, सन्तापकः -का -कं, चित्तोत्तापकारी -रिणी -रि (न्).

Irritation, *s.* (The act) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं. —(State) कोपः, क्रोधः, अमर्षः, विमर्षः, मन्युः *m.*, क्रोधावेशः, क्रुद्धता, रागावेशः. —(Excitement) उत्तापः, उत्तप्तता, सन्तापः, सन्तप्तता, उत्तेजनं, समुत्तेजनं, दाहः; 'irritation of the throat,' कार्शं, क्षवथुः *m.*

Irritative, *a.* उत्तापकः -का -कं, सन्तापकः -का -कं, दाहजनकः -का -कं.

Irruption, *s.* अवस्कन्दः -न्दनं, उपद्रवः, अभिद्रवः, उपप्लवः, विप्लवः, अभिक्रमः -मणं, आक्रमः, अभिमर्दः, अभिग्रहः, अवलुम्पनं; 'to make an irruption,' अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), समवस्कन्द्, आस्कन्द्, उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिद्रु, समाद्रु, अभिधाव् (c. 1. -धावति -वितुं).

Ischuretic, *a.* मूत्रावरोधघ्नः -घ्नी -घ्नं, मूत्रावष्टम्भनाशकः -का -कं.

Ischury, *s.* मूत्रावरोधः, मूत्रावष्टम्भः, मूत्रकृच्छ्रं, विष्टम्भः, मूत्रानुबन्धः, विबन्धः, आनाहः.

Isinglass, *s.* अभ्रं -भ्रकं, मत्स्यान्त्रनिर्म्मितम् अतिसंलग्नभावं श्यानद्रव्यं.

Island, *s.* द्वीपः -पं, अन्तरीपं, उपद्वीपं, पयोगडं; 'one of alluvial formation,' पुलिनं.

Island, *a.* द्वीप्यः -प्या -प्यं, द्वैप्यः -प्यी -प्यं, द्वैपः -पी -पं, द्वीपसम्बन्धी -न्धिनी -न्धि (न्), द्वीपस्थः -स्था -स्थं.

Islander, *s.* द्वीपवासी *m.* (न्), द्वीपनिवासी *m.*, द्वीपी *m.* (न्), द्वीपस्थः, द्वीपग्रामः, द्वैपः, द्वीप्यः.

Isle, *s.* द्वीपः -पं, अन्तरीपं. *See* Island.

Islet, *s.* क्षुद्रद्वीपः -पं, अल्पद्वीपः -पं, उपद्वीपः -पं.

Isochronal, isochronous, *a.* समकालिकः -की -कं, समसंख्यकालः -ला -लं.

To ISOLATE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवच्छिद्, अन्यभेदं कृ, अन्यविभेदं कृ, अन्यवियोगं कृ, परविश्लेषं कृ, पृथक् स्था in caus. (स्थापयति -यितुं). *See To* INSULATE.

ISOLATED, *p. p.* असङ्गः -ङ्गा -ङ्गं, निःसङ्गः -ङ्गा -ङ्गं, गतसङ्गः -ङ्गा -ङ्गं, वियुक्तः -क्ता -क्तं, विभिन्नः -न्ना -न्नं, परविभिन्नः -न्ना -न्नं, अन्यविश्लिष्टः -ष्टा -ष्टं, व्यासक्तः -क्ता -क्तं, अनन्यसंसक्तः -क्ता -क्तं, अन्यासक्तः -क्ता -क्तं, पृथक्स्थितः -ता -तं, स्वतन्त्रः -न्त्रा -न्त्रं. *See* INSULATED.

ISOLATION, *s.* असङ्गः, परवियोगः, परविभेदः, विच्छेदः, अवच्छेदः, व्यासङ्गः, विभिन्नता, पृथक्त्वं. *See* INSULATION.

ISOSCELES, *a.* समद्विभुजः -जा -जं, समद्विबाहुः -हुः -हु, समद्विपार्श्वः -र्श्वा -र्श्वं; 'isosceles triangle,' समद्विबाहुकत्रिभुजः, तुल्यद्विबाहुकत्रिभुजः द्विसमत्रिभुजः -जा; 'angles at the base of an isosceles triangle,' तुल्यद्विबाहुकत्रिभुजस्य भूलग्नकोणौ *m.* du.

ISSUE, *s.* (Egress) निःसरणं, निस्सरणं, निर्गमः, निर्गतिः *f.*, निर्याणं, निष्क्रमणं, विनिर्गमः, बहिर्गमनं, बहिस्सरणं, निःसारः -रणं, अपसारः, अपसरणं, प्रवहः.—(Event, consequence, last result) गतिः *f.*, उद्वृत्तं, अनुवृत्तं, संवृत्तं, उत्पन्नं, फलं, फलमुत्तरं, परिणामः, शेषः, अन्तः, सिद्धिः *f.*, प्रयुक्तिः *f.*, अन्वयः, निष्पन्नं; 'happy issue,' सद्गतिः *f.*, शुभगतिः *f.*, शुभफलं; 'expectation of a favourable issue,' शुभफलाकांक्षा.—(Progeny) प्रजा, अपत्यं, सन्तानं, सन्ततिः *f.*, अन्वयः, तनुः *m.*—(Flux) आमातिसारः, रक्तातिसारः, रक्तशुद्धिः *f.*—(Ulcer, fontanel) कृत्रिमव्रणः.

To ISSUE, *v. n.* (Flow out) प्रस्रु (c. 1. -स्रवति -स्रोतुं), निःस्रु, स्रु.—(Pass out, go out) निःसृ (c. 1. -सरति -सर्त्तुं), विनिःसृ, निर्गम् (c. 1. -गच्छति -गन्तुं), विनिर्गम्, निर्या (c. 2. -याति -तुं), विनिर्या, निष्क्रम् (c. 1. -क्रामति -क्रमितुं), विनिष्क्रम्, अभिनिष्क्रम्, निश्चर् (c. 1 -चरति -रितुं), विनिश्चर्, निरि (c. 2. -एति -तुं), बहिर्गम्.—(Proceed, arise) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रभू.—(Close, end) निष्पद्, विगम्, समाप् in pass. (-आप्यते), निवृत्, अपया.

To ISSUE, *v. a.* (Send out) निःसृ (c. 10. -सारयति -यितुं), प्रचल् (c. 10. -चालयति -यितुं), प्रचर् (c. 10. -चारयति -यितुं), प्रचलीकृ.—(Make public) प्रकाश् (c. 10. -काशयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), घुष् (c. 10. घोषयति -यितुं), विघुष्, प्रसिद्धीकृ.

ISSUED, *p. p.* निःसृतः -ता -तं, निर्गतः -ता -तं, प्रसृतः -ता -तं, उत्पन्नः -न्ना -न्नं.

ISSUELESS, *s.* असन्तानः -ना -नं, अनपत्यः -त्या -त्यं, अप्रजः -जा -जं, अप्रसूतः -ता -तं, निःसन्तानः -ना -नं, निरन्वयः -या -यं, निर्वंशः -शा -शं.

ISTHMUS, *s.* संयोगभूमिः *f.*, योगभूमिः *f.*, सम्बन्धभूमिः *f.*

IT, *pron.* तद्, एतद्, इदं. Sometimes 'it' is not expressed, but is inherent in the verb; as, 'it is well ascertained that the figure of the earth is globular,' पृथिवी गोलाकारा भवति इति सुनिश्चितं.

ITALIAN, *a.* इटालिदेशसम्बन्धी -न्धिनी -न्धि (न्), इटालिदेशजः -जा -जं, इटालिदेशीयः -या -यं, इटालिदेशस्थः -स्था -स्थं.

ITALICS, *s. pl.* इटालिक्संज्ञको मुद्राक्षरविशेषः.

ITCH, *s.* (The disease) कण्डूः *f.*, कण्डुः *f.*, खर्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकच्छुः *f.*, सूकण्डुः *f.*, खसः, पाम *n.* -मा *f.* (न्), कण्डूतिः *f.*—(An itching) कण्डूतिः *f.*, कण्डूयनं, कण्डूया.—(Eager desire) अतिस्पृहा, अत्यपेक्षा, अत्यभिलाषः.

To ITCH, *v. n.* कण्डू (nom. कण्डूयति -ते), कण्डूयां कृ, कण्डूतिं कृ, स्पन्द् (c. 1. स्पन्दते -न्दितुं), स्फुर् (c. 6. स्फुरति -रितुं), कण्डूलः -ला -लं भू.—(Desire eagerly) अतिशयेन इष् (c. 6. इच्छति, एषितुं) or अभिलष् (c. 1. -लषति -षितुं), गृध् (c. 4. गृध्यति, गर्धितुं).

ITCHY, *a.* कण्डूलः -ला -लं, कच्छुरः -रा -रं, कण्डुरोगी -गिणी -गि (न्), पामनः -ना -नं.

ITEM, *adv.* (Also) अपरञ्च, अपिच, अथच, चैव, पुनरपि.

ITEM, *s.* (Article, separate particular) पदं, विषयः, प्रकरणं, अधिकरणं.

To ITERATE, *v. a.* (Utter again) पुनर् वद् (c. 1. वदति -दितुं), मुहुर् वद्, अनुवद्, पुनरुक्तिं कृ.—(Do again) पुनः कृ, मुहुः कृ, पुनःपुनः कृ.

ITERATION, *s.* पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनर्वचनं, अनुवादः, मुहुर्भाषा.—(Doing again) पुनःकरणं, पुनरावृत्तिः *f.*, द्विरावृत्तिः *f.*

ITERATIVE, *a.* पुनर्वादी -दिनी -दि (न्), पुनःकारी -रिणी -रि (न्).

ITINERANT, *a.* अटमानः -ना -नं, पर्यटनकारी -रिणी -रि (न्), अध्वगः -गा -गं -गामी -मिनी -मि (न्), भ्रमणकारी &c., परिभ्रमी -मिणी -मि (न्), अवनिचरः -रा -रं, यात्रिकः -की -कं, चक्राटः -टा -टं.

ITINERARY, *s.* मार्गवृत्तान्तपुस्तकं, मार्गक्रमणलेखः, प्रवासवृत्तान्तलेखः.

To ITINERATE, *v. n.* देशभ्रमणं कृ, देशपर्यटनं कृ, परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), पर्यट् (c. 1. -अटति -टितुं).

ITS, *pron.* तदीयः -या -यं, तस्य gen. c. (तद्), अस्य gen. c. (इदं).

ITSELF, *pron.* तद् एतद्, स्वयं.

IVORY, *s.* हस्तिदन्तः, करिदन्तः, गजदन्तः, दन्तिदन्तः -न्तौ.

IVORY, *a.* दान्तः -न्ती -न्तं, हस्तिदन्ती -न्तिनी -न्ति (न्), हस्तिदन्तनिर्म्मितः -ता -तं, दन्तिदन्तमयः -यी -यं.

IVY, *s.* वृक्षगृहादिरोही लताविशेषः, तरुरुहा, तरुरोहिणी.

J.

To JABBER, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प्, त्वरितं वद् (c. 1 वदति -दितुं), अव्यक्तं or अस्पष्टं वद्, वद् in freq. (वावद्यते), प्रलप् (c. 1. -लपति -पितुं), चटचट (nom. चटचटायते), अनर्थकवचनं कृ.

JABBERER, *s.* जल्पकः, जल्पाकः, जल्पी *m.* (न्), उपजल्पी *m.*, वाचालः, वाचाटः, वावदूकः, बहुभाषी *m.* (न्), अस्पष्टवक्ता *m.* (क्तृ).

JABBERING, *s.* जल्पः -ल्पनं, प्रजल्पः, जल्पितं, वावदूकता, प्रलापः, विप्रलापः, प्रलपितं, त्वरितवचनं, अस्पष्टवचनं, अव्यक्तवचनं, निरर्थकवचनं.

JACK, *s.* (Instrument for pulling off boots) पादुकानिष्कर्षणयन्त्रं.—(Instrument for turning a spit) यन्त्रं यद्वारेण पाकशूलः परिवर्त्तते.—(A fish) जलसूचिः *m.*—(Coat of mail) कवचः -चं, तनुत्रं.—(Horse, wooden frame) मञ्चः, वृषः, उपस्तम्भः, आधारः.—(Male of certain animals) expressed by पुं prefixed.—(Flag at the end of a bow-sprit) नौकाग्रबहिःप्रलम्बो ध्वजपटः.—(Bread-fruit tree) पनसः, पनसनालिका, कण्टकिफलः.

JACK-A-LANTERN, *s.* पिशाचदीपिका, भूतदीपिका, मिथ्यादीप्तिः *f.*

JACKAL, *s.* शृगालः, सृगालः, जम्बुकः, जम्बूकः, गोमायुः *m.*, वञ्चकः, क्रोष्टा *m.* (ष्टु), गोमी *m.* (न्), क्रव्या *m.* (न्), भूरिमायः, घोरवासनः, ह्रूरवः, मृगभीरुः *m.*, फेरः, फेरण्डः, फेरवः.—(Female) शृगाली, क्रोष्ट्री, शिवा.

JACKANAPES, *s.* वानरवृत्तिः *m.*, कपिस्वभावः, मर्कटशीलः, वानरचरित्रः.

JACKASS, *s.* गर्द्दभः, रासभः, खरः, धूसरः, चक्रीवान् *m.* (त्), बालेयः.

JACK-BOOTS, *s. pl.* चर्म्मनिर्म्मितं जङ्घोत्तरीयं or जङ्घात्राणं, बृहत्पादुका.

JACK-DAW, *s.* काकजातीयः पक्षिभेदः, काकविशेषः, काकः, वायसः.

JACKET, *s.* कञ्चुकः, कञ्चुलिका, निचोलः -लकः, चोलः -लकः, निचुलः, अङ्गिका, कूर्पासकः.

JACK-KETCH, *s.* घातुकपुरुषः, दण्डपाशिकः, मृतपाः *m.*, उद्बन्धकः.

JACK-PUDDING, *s.* भण्डः, भाण्डः, वैहासिकः, परिहासवेदी *m.* (न्), विदूषकः.

Jacobin, *s.* हीनवर्णपक्षपाती *m.* (न्), राजद्रोही *m.* (न्), राजयुध्वा *m.* (न्).

Jacob's-staff, *s.* (Pilgrim's staff) कार्पटिकदण्डः, कार्पटिकयष्टिः *m.f.* —(A staff concealing a weapon) कूटायुधं, कूटास्त्रं, अन्तर्गुप्तनिशितास्त्रो बहिःकाष्ठमयो दण्डः.

Jade, *s.* (Sorry horse) कदश्वः, अश्वतरः, अश्वकः.—(A name of reproach for a woman) बन्धकी, कुलटा, भ्रष्टा, पापीयसी. *See* Jadish.

To jade, *v. a.* खिद् (c. 10. खेदयति -यितुं), आयस् (c. 10. -यासयति -यितुं), श्रम् (c. 10. श्रमयति -यितुं), क्लम् (c. 10. क्लमयति -यितुं), सद् (c. 10. सादयति -यितुं), अवसद्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), तप् (c. 10. तापयति -यितुं), कृष् (c. 10. कर्षयति -यितुं), कष्टं कृ.

To jade, *v. n.* (Become weary) खिद् in pass. (खिद्यते), आयस् (c. 4. -यस्यति -यसितुं), श्रम् (c. 4. श्राम्यति, श्रमितुं), क्लम् (c. 4. क्लाम्यति, क्लमितुं), सद् (c. 1. सीदति, सत्तुं), अवसद्, कष्ट (nom. कष्टायते).

Jaded, *p.p.* खिन्नः -न्ना -न्नं, खेदितः -ता -तं, श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, श्रमार्तः -र्ता -र्तं, क्लिष्टः -ष्टा -ष्टं, ग्लानः -ना -नं.

Jadish, *a.* (Bad) दुष्टः -ष्टा -ष्टं, पापीयान् -यसी -यः (स्), कुत्सितः -ता -तं, कु or कद् or दुर् prefixed.—(Unchaste, applied to a woman) बन्धकी, असती, असाध्वी, व्यभिचारिणी, पुंश्चली, धृष्टा, धर्षिणी, अविनीता, कामगा.

Jag, jagg, *s.* (Notch) छेदः, अवच्छेदः, विच्छेदः, भङ्गः, दन्तः, क्रकचदन्तरूपो भङ्गः or छेदः.

To jagg, *v. a.* जर्जरीकृ, क्रकचदन्तरूपेण छिद् (c. 7. छिनत्ति, छेत्तुं) or विछिद् or अवछिद्, छेदं कृ, अवच्छेदं कृ, क्रकचरूपेण भङ्गुरं -रां -रं कृ, or भङ्गुरीकृ or जर्जरं -रां -रं कृ, जर्जरीकं -कां -कं कृ.

Jagged, *p. p. a.* जर्जरः -रा -रं, जर्जरीकः -का -कं, क्रकचदन्तरूपेण विच्छिन्नः -न्ना -न्नं or दन्तुरः -रा -रं or दन्ती -न्तिनी -न्ति (न्), अनुक्रकचः -चा -चं, क्रकचधाराकारः -रा -रं, भङ्गुरः -रा -रं, विषमधारः -रा -रं.

Jaggedness, *s.* जर्जरता, जर्जरीकता, दन्तुरत्वं, भङ्गुरत्वं.

Jaggy, *a.* दन्तुरः -रा -रं, अनुक्रकचः -चा -चं. *See* Jagged.

Jail, *s.* कारा, कारागारं, कारागृहं, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, निरोधस्थानं, बन्दिशाला, गुप्तिः *f.*, चारः.

Jailer, *s.* कारारक्षकः, कारागृहाध्यक्षः, कारागाराधिपतिः *m.*, बन्धनालयरक्षकः, गुप्तिपालकः, बन्दिपालः.

Jakes, *s.* शौचकूपः, पायुक्षालनवेश्म *n.* (न्), अवस्करस्थानं.

Jam, *s.* मिष्टफलं, मिष्टान्नं, खाद्यन्नं, सन्धितफलं, सन्धितं.

To jam, *v. a.* सम्पीड् (c. 10. -पीडयति -यितुं), सम्मृद् (c. 9. -मृद्नाति -मर्द्दितुं), सम्बाध् (c. 1. -बाधते -धितुं), सङ्कुलीकृ, सङ्कटीकृ.

Jamb, *s.* उपस्तम्भः, अवष्टम्भः -म्भनं, स्तम्भः, गृहस्तम्भः, आधारः.

Jammed, *p. p.* सम्पीडितः -ता -तं, सम्मर्द्दितः -ता -तं, सम्बाधः -धा -धं, सङ्कुलः -ला -लं, सङ्कटः -टा -टं, घर्षितः -ता -तं.

To jangle, *v. n.* वाग्युद्धं कृ, वाक्कलहं कृ, विवद् (c. 1. -वदते -दितुं), विप्रलापं कृ, व्यवक्रोशनं कृ, विरोधोक्तिं कृ, कलह (nom. कलहायते).

Jangle, *s.* (Wrangling) वाग्युद्धं, वाक्कलहः, विप्रलापः, व्यवक्रोशनं.—(Discordant sound) झञ्झा -झनं.

Jangler, *s.* वाक्कलहकारी *m.* (न्), वाग्युद्धप्रियः, व्यवक्रोशनप्रियः.

Jangling, *s.* (Wrangling) वाक्कलहः, व्यवक्रोशनं, विवादः.—(Discordant sound) झञ्झा -झनं, झः, कर्कशस्वनः.

Janitor, *s.* द्वारपालः, द्वाररक्षकः, द्वारस्थः, प्रतिहारः, प्रतीहारः.

Jantily, *adv.* चपलं, चापल्येन, चपलशीलत्वात्, लघु, लघुस्वभावात्.

Jantiness, *s.* चापल्यं, चपलशीलता, लघुता, लघुस्वभावत्वं.

Janty, *a.* चपलः -ला -लं, चपलशीलः -ला -लं, लघुस्वभावः -वा -वं.

January, *s.* पौषमाघं, पौषः, माघः, उत्तरपौषः, पूर्वमाघः, पुष्यः, तैषः, तिष्यः -ष्यकः, प्रथममासः.

Japan, *s.* जापान्नामा चित्रकुङ्कुमविशेषः.

To jar, *v. n.* (Make a grating sound) कर्कशशब्दं कृ, झञ्झा (nom. झञ्झायते), परस्परघर्षणजं झञ्झाशब्दं कृ.—(Clash) सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), परस्परसमाघातं कृ, परस्परसङ्घट्टनं कृ.—(Quarrel) विवद् (c. 1. -वदते -दितुं), कलह (nom. कलहायते).

Jar, *s.* (Grating sound) कर्कशशब्दः, परस्परघर्षणजः कटुशब्दः, परस्परसङ्घट्टनजो झञ्झाशब्दः, झञ्झनं.—(Clash) सङ्घट्टः -ट्टनं, समाघातः, परस्परसमाघातः, परस्परविरोधः.—(An earthen vessel) घटः, कुम्भः, कलशः -शी -शं, मणिकं, अलिञ्जरः, आलुः *f.*, कर्करी, कुण्डी, मृत्तिकापात्रं, मृद्भाण्डं, मृण्मयपात्रं, उदपात्रं, जलपात्रं.—(Bottom of a jar) सूर्य्यग्रहः.—(A little open, half open, said of a door) ईषदुद्घाटितः -ता -तं, अर्द्धोद्घाटितः -ता -तं.

Jargon, *s.* अनर्थकभाषा, असम्बद्धभाषा, पिशाचभाषा, राक्षसी भाषा, मिश्रितभाषा.

Jarring, *part.* or *a.* परस्परपराहतः -ता -तं, परस्परविरोधी -धिनी -धि (न्), अन्योन्यविरुद्धः -द्धा -द्धं.—(Making a harsh sound) कर्कशशब्दकारी -रिणी -रि (न्).

Jasmin, *s.* कुन्दः -न्दं, जाती -तिः *f.*, झाटी -टा, जातीकुसुमं, मालती, यूथी, यूथिका, स्वर्णयूथी, मल्लिका, जीवनी, सुगन्धः, माधुरं, सुमनाः *f.* (स्), मकरन्दः, मुद्गरः; 'double jasmin,' शिशुगन्धा; 'relating to the jasmin,' कौन्दः -न्दी -न्दं; 'the jasmin creeper,' कौन्दी लता.

Jasper, *s.* सूर्य्यकान्तः, जाम्बराख्यो मणिविशेषः.

Jaundice, *s.* पाण्डुः *m.*, पाण्डुरोगः, पाण्डुरः, पाण्डुकः, कामला -लः, कुम्भकामला, हलीमकं; 'incipient jaundice,' पाण्डुच्छाया.

Jaundiced, *a.* (Having the jaundice) पाण्डुरोगी -गिणी -गि (न्), पाण्डुरोगग्रस्तः -स्ता -स्तं.—(Prejudiced) साचीकृतः -ता -तं, वक्रदृष्टिः -ष्टिः -ष्टि.

To jaunt, *v. n.* परिभ्रमणं कृ, पर्य्यटनं कृ, विहारं कृ, विहारार्थम् इतस्ततः परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), विहृ (c. 1. -हरति -हर्त्तुं), विहारार्थं पर्य्यट् (c. 1. -अटति -टितुं).

Jaunt, *s.* विहारः, विहरणं, भ्रमणं, विहारार्थं परिभ्रमणं or पर्य्यटनं.

Jauntiness, *s.* *See* Jantiness.

Javelin, *s.* शल्यं, शलाका, शङ्कुः *m.*, प्रासः, क्षिपणिः *m.*, शक्तिः *f.*, पाणिमुक्तं, करमुक्तं, मुक्तकं, मुक्तामुक्तं, शूलः -लं, अस्त्रं, दूरवेधी *m.* (न्), कासूतरी.

Jaw, *s.* हनुः *m. f.*, हनूः *f.*; 'the lower jaw,' पीचं, कुञ्जः, चिबुकं, चिबुः *m.*; 'big-jawed,' महाहनुः -नुः -नु; 'locked jaw,' हनुग्रहः, हनुस्तम्भः; 'jaw-tooth,' दाढा, दंष्ट्रा.—(Mouth) मुखं, वक्त्रं; 'jaws of death,' मृत्युवक्त्रं.—(Scolding, abuse) आक्रोशः, क्रुष्टं, तर्ज्जनं, वाक्पारुष्यं, भर्त्सनं.

To jaw, *v. n.* (Scold) आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), तर्ज् (c. 10. तर्ज्जयति -यितुं).

Jaw-bone, *s.* हन्वस्थि *n.*, चिबुकास्थि *n.*, पीचास्थि *n.*

Jawed, *a.* हनुमान् -मती -मत् (त्), हनूमान् &c., हनुविशिष्टः -ष्टा -ष्टं.

Jay, *s.* चाषः, चासः, मणिकण्ठः, नीलकण्ठः, किकिः *m.*, किकिदिविः *m.*, किकीदिवः, किकीदीविः *m.*, चालः.

Jealous, *a.* (Apprehensive of rivalship, uneasy at another's success) मत्सरी -रिणी -रि (न्), मत्सरः -रा -रं, समत्सरः -रा -रं,

परगुणमत्सरः -रा -रं, परोत्कर्षद्वेषी -षिणी -षि (न्), परोत्कर्षासहनः -ना -नं, परोत्कर्षासूयकः -का -कं, परोत्कर्षशङ्की -ङ्किनी -ङ्कि (न्), अन्यशुभाशङ्की -ङ्किनी -ङ्कि (न्), परप्रशंसासहनः -ना -नं, परशुभामर्षणः -णा -णं, ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्) सेर्ष्यः -र्ष्या -र्ष्यं, सासूयकः -का -कं, साभ्यसूयः -या -यं, कृतेर्ष्यः -र्ष्या -र्ष्यं, स्पर्धी -र्धिनी -र्धि (न्), वक्रदृष्टिः -ष्टिः -ष्टि.—(Suspicious in love) प्रेमविपर्य्यासशङ्की &c., प्रेमसंशयी -यिनी -यि (न्), प्रेमशङ्की &c., प्रेमव्यत्ययाशङ्की, प्रीतिविपर्य्ययाशङ्की &c.; 'a husband of a wife,' परपुरुषाशङ्की, परपुरुषशङ्कितः, जारशङ्कितः; 'a wife of a husband,' परस्त्रीशङ्किता, परस्त्रीशङ्किनी.—(Suspiciously fearful) शङ्काशीलः -ला -लं, शङ्कास्वभावः -वा -वं.—(Careful for the honour of) अभिमानी -निनी -नि (न्), कृताभिमानः -ना -नं, कृतादरः -रा -रं, साभिमानः -ना -नं, आदृतः -ता -तं.

JEALOUSLY, *adv.* समत्सरं, मात्सर्य्येण, सेर्ष्यं, असूयया, सासूयं, साभ्यसूयं, परोत्कर्षासूयया, परोत्कर्षशङ्कया, प्रेमविपर्य्यासशङ्कया, शङ्काशीलवत्, वक्रदृष्ट्या, स्पर्धया.

JEALOUSY, JEALOUSNESS, *s.* मात्सर्य्यं, मत्सरः -रता, ईर्ष्या, असूया, स्पर्धा, परगुणमात्सर्य्यं, परोत्कर्षासहिष्णुता, परोत्कर्षद्वेषः, परोत्कर्षासूया, परोत्कर्षशङ्का, परप्रशंसासहनं, परशुभाशङ्का, अन्यशुभद्वेषः, सापत्न्यं, सापत्नभावः, दृष्टिवक्रता.—(Suspiciousness in love) प्रेमशङ्का, प्रीतिशङ्का, प्रेमसंशयः, प्रेमविपर्य्यासशङ्का, प्रेमव्यत्ययशङ्का, प्रीतिव्यत्यासशङ्का; 'of a husband respecting a wife,' परपुरुषशङ्का, व्यभिचारशङ्का, अन्यपुरुषाशङ्का, जारशङ्का; 'of a wife respecting a husband,' परस्त्रीशङ्का.—(Suspicious fear) शङ्का, शङ्काशीलता.—(Concern for the honour of) अभिमानचिन्ता.

To JEER, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, अवहासभूमिं कृ, अपहासास्पदीकृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ, गर्ह् (c. 1. गर्हते -र्हितुं), अवगर्ह्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं).

JEER, *s.* उपहासः, अवहासः, अपहासः, परिहासः, क्षेपः, अवक्षेपः, अवज्ञा, अपमानं, अवहेला, व्यञ्जनं -ना, व्यंग्यः.

JEERER, *s.* उपहासकः, परिहासकर्त्ता *m.* (र्तृ), क्षेपकः, अवक्षेपकः.

JEERINGLY, *adv.* उपहासेन, सोपहासं, परिहासेन, सावक्षेपं, हास्यपूर्व्वं.

JEJUNE, *a.* रूक्षः -क्षा -क्षं, रूक्षः -क्षा -क्षं, नीरसः -सा -सं, विरसः -सा -सं, रसहीनः -ना -नं, शुष्कः -ष्का -ष्कं, शून्यः -न्या -न्यं, निःसारः -रा -रं, निःसत्त्वः -त्त्वा -त्त्वं.

JEJUNENESS, *s.* रूक्षता, रौक्ष्यं, नीरसता, विरसता, रसाभावः, शुष्कता, शून्यता, सारहीनता, सत्त्वहीनता.

JELLY, *s.* (Of animal substance) मांसघननिष्क्वाथः, क्वथितमांसनिर्म्मितो घनीभूतः स्वच्छरसः, मांसस्य श्यानरसः or घनरसः.—(Of fruit) फलानां शर्करादिना सह निष्क्वथितानां घनरसः, फलपाकः.—(Glutinous substance) श्यानद्रव्यं, सान्द्रद्रव्यं.

JENNET, *s.* *See* GENET.

To JEOPARD, *v. a.* संशयस्थं -स्थां कृ, संशयितं -तां कृ, सन्देहस्थं -स्थां कृ, शङ्कास्थं -स्थां कृ, संशयापन्नं -न्नां कृ, सन्देहदोलस्थं -स्थां कृ, भयस्थं -स्थां कृ, शङ्कास्पदीकृ; 'one who jeopards his life,' संशयितजीवितः.

JEOPARDED, *p. p.* संशयितः -ता -तं, संशयङ्गमितः -ता -तं, शङ्कास्पदीकृतः -ता -तं.

JEOPARDOUS, *a.* सांशयिकः -की -कं, सन्दिग्धः -ग्धा -ग्धं, भयाक्रान्तः -न्ता -न्तं.

JEOPARDY, *s.* (Hazard) संशयः, शङ्का, सन्देहः, भयं, विकल्पः, आतङ्कः, भयहेतुः *m.*; 'any thing exposed to jeopardy,' भयस्थानं, संशयस्थानं, शङ्कास्पदं; 'jeopardy of life,' जीवितसंशयः, प्राणसन्देहः, प्राणनाशसंशयः, प्राणबाधः; 'brought into jeopardy,' संशयितः -ता -तं; 'to be in jeopardy,' संशयस्थः -स्था -स्थं भू, शङ्कास्पदीभू.

To JERK, *v. a.* (Give a sharp or sudden twitch or push) लघुप्रहारं कृ, लघ्वाघातं कृ, आकस्मिकप्रहारं कृ, लघुप्रहारेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं).—(Throw with a sharp sudden motion, or by stopping the arm half way) लघुप्रहारेण or आकस्मिकप्रहारेण क्षिप् (c. 6. क्षिपति, क्षेप्तुं), बाहुवेगम् अर्द्धेन स्तम्भयित्वा क्षिप्, अकस्मात् क्षिप्.

JERK, *s.* लघुप्रहारः, लघ्वाघातः, आकस्मिकप्रहारः, लघुक्षेपः, आकस्मिकक्षेपः, लघुप्रहारेण क्षेपः, बाहुवेगस्तम्भनपूर्व्वः क्षेपः.

JERKIN, *s.* कञ्चुकः, कञ्चुलिका, अङ्गिका, कूर्पासकः, क्षुद्रनिचोलः.

JESSAMINE, *s.* *See* JASMIN.

JEST, *s.* हास्यं, परिहासः, परीहासः, हासिका, नर्म्म (न्), परिहासवाक्यं, परिहासोक्तिः *f.*, विनोदोक्तिः *f.*, विनोदभाषणं, क्षेपः, लालिका, टट्टरी, व्याहारः.—(Object of laughter) उपहासस्थानं, उपहासास्पदं, हास्यास्पदं, उपहासपात्रं, विनोदास्पदं.—(Fun) खेला, क्रीडा, कौतुकं, केलिः *m. f.*; 'in jest,' परिहासेन.

To JEST, *v. n.* हस् (c. 1. हसति -सितुं), विहस्, प्रहस्, सम्प्रहस्, संविहस्, परिहासं कृ, विनोदं कृ, परिहासवाक्यं वद् (c. 1. वदति -दितुं), विनोदवाक्यं वद्, भण्ड् (c. 1. भण्डते -ण्डितुं), क्रीड् (c. 1. क्रीडति -ते -डितुं), प्रक्रीड्, विक्रीड्, परिक्रीड्, विलस् (c. 1. -लसति -सितुं), खेला (nom. खेलायति); 'speak in jest,' परिहासेन वद्.

JESTER, *s.* परिहासकारी *m.* (न्), परिहासवेदी *m.* (न्), हास्यकारी *m.*, विनोदकारी *m.*, विनोदभाषी *m.* (न्), वैहासिकः, विदूषकः.—(Buffoon) भण्डः, वैहासिकः, चाटुपटुः *m.*, चाटुवटुः *m.*, रङ्गणः, नटः, क्रीडामृगः.—(Companion of a king) नर्म्मसचिवः, विदूषकः, नर्म्मदः, राजविनोदी *m.* (न्).

JESTING, *s.* परिहासकरणं, नर्म्मकरणं, नर्म्मद्युतिः *f.*, विनोदः, भाण्डं.

JESTINGLY, *adv.* परिहासेन, हास्येन, परिहासमात्रेण, विनोदेन, विनोदार्थं.

JET, *s.* (Spouting of water) जलोत्क्षेपः, जलोत्सेकः.—(Black stone) कृष्णप्रस्तरः, कृष्णवर्णः प्रस्तरविशेषः.

JET-BLACK, *s.* घनकृष्णः -ष्णा -ष्णं, सुकृष्णः -ष्णा -ष्णं, अतिकृष्णः -ष्णा -ष्णं.

JETSAM, JETSON, JETTISON, *s.* नौव्यसनकाले नौकालघुकरणार्थं समुद्रमध्ये क्षिप्तद्रव्याणि.

JETTY, *s.* भूमिवहिर्गतः समुद्रस्थसेतुः, काष्ठस्तम्भनिर्म्मितः क्षुद्रसेतुः.

JETTY, *a.* (Black as jet) कृष्णवर्णः -र्णा -र्णं, कृष्णप्रस्तरसवर्णः -र्णा -र्णं.

JEW, *s.* यिहुदीयः, यिहुदीयदेशजः, यिहुदीयदेशवासी *m.* (न्).

JEWEL, *s.* (Precious stone) मणिः *m. f.*, मणी, रत्नं, प्रस्तरः, मणिरत्नं, चारुशिला; 'jewel in a snake's head,' फणामणिः; 'necklace of jewels,' मणिमाला, रत्नावलिः *f.*; 'having jewels in the ears,' मणिकर्णः -र्णा -र्णं.—(A term of endearment) रत्नं; 'a jewel of a woman,' स्त्रीरत्नं.

JEWEL-HOUSE, JEWEL-OFFICE, *s.* मणिशाला, रत्नशाला, राजकीयरत्नागारं.

JEWEL-MINE, *s.* रत्नाकरः, रत्नखनिः *f.*, मणिभूमिः *f.*, रत्नभूमिः.

JEWELLED, *p. p.* or *a.* रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), मणिखचितः -ता -तं, रत्नमयः -यी -यं, मणिमयः -यी -यं, मणिशः -शा -शं.

JEWELLER, *s.* मणिकारः, रत्नकारः -रकः, रत्नजीवी *m.* (न्), वैकटिकः; 'jeweller's shop,' रत्नशाला.

JEWELRY, *s.* रत्नानि *n. pl.*, रत्नादि भूषणं or अलङ्कारः, कोशः, कोषः.

JEWESS, *s.* यिहुदीया, यिहुदीया स्त्री, यिहुदीयदेशजा.

JEWISH, *a.* यिहुदीयः -या -यं, यिहुदीयदेशसम्बन्धी -न्धिनी -न्धि (न्), यिहुदीयधर्म्मा -र्म्मा -र्म्म (न्).

JEW'S HARP, *s.* मुखवाद्यं, वक्त्रतालः -लं.

JIB, *s.* नौकाग्रस्थवसनं, अग्रस्थवसनं, नौकाग्रवहिःस्थं वातवसनं.

JIFFY, *s.* निमेषः, क्षणः, पलं; 'in a jiffy,' निमेषमात्रेण, एकपदे, सपदि.

JIG, *s.* लघुनृत्यं, लघुनर्त्तनं, लघुतालसहितो नृत्यविशेषः.

To JIG, *v. n.* पूर्व्वोक्तप्रकारेण नृत् (c. 4. नृत्यति, नर्त्तितुं), लघु नृत्.

JILT, *s.* प्रतारिका, वञ्चिका, विप्रलम्भिका, सङ्केतलंघिनी, सङ्केतितान्यगामिनी, चपला, चपलशीला, एकपुरुषम् आश्वासयित्वा अन्यं गच्छति or गृह्णाति या स्त्री, प्रेमसिद्ध्याशां जनयित्वा खण्डयति या स्त्री.

To JILT, *v. a.* or *n.* प्रेमविषये एकपुरुषम् आश्वासयित्वा अन्यं गम् (c. 1. गच्छति, गन्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रेमसिद्ध्याशां जनयित्वा खण्ड् (c. 10. खण्डयति -यितुं), सङ्केतं लंघ् (c. 10. लंघयति -यितुं), प्रेमविषये वञ्च् (c. 10. वञ्चयते -ति -यितुं) or प्रतृ (c. 10. -तारयति -यितुं) or विप्रलभ् (c. 1. -लभते -लब्धुं).

JILTED, *p. p.* खण्डितः -ता -तं, खण्डितप्रेमसिद्ध्याशः -शा -शं.

To JINGLE, *v. n.* शिञ्ज् (c. 2. शिंक्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), क्रणक्रण (nom. क्रणक्रणायते), किङ्किण (nom. किङ्किणायते), झञ्झनं कृ, विरु (c. 2. -रौति -रवितुं).

JINGLE, *s.* शिञ्जा -ञ्जः, शिञ्जितं, आशिञ्जितं, झञ्झनं, झञ्झा, झनत्कारः, झङ्कारः, झं, क्वणनं, क्वणितं, किङ्किणिशब्दः, क्रणक्रणशब्दः.

JINGLING, *part.* or *a.* शिञ्जी -ञ्जिनी -ञ्जि (न्), झञ्झनकारी -रिणी -रि (न्), क्वणन् -णन्ती -णत् (त्), क्वणितः -ता -तं.

JOB, *s.* (Piece of work) कर्म्म *m.* (न्), कार्य्यं, कृत्यं, क्रिया, व्यापारः. —(Mean business) क्षुद्रकर्म्म *n.*, नीचकर्म्म *n.*, अधमक्रिया.—(Work done for private profit or ends) स्वार्थप्रयुक्तं कर्म्म, स्ववृद्ध्यर्थं कर्म्म, स्वार्थमात्रापेक्षकं कर्म्म, स्वार्थमात्रोद्देशकं कर्म्म or कार्य्यं, स्वार्थकर्म्म *n.*

To JOB, *v. n.* क्षुद्रकर्म्म कृ, नीचकर्म्म कृ, स्वार्थप्रयुक्तं कर्म्म कृ, स्वार्थमात्रमपेक्ष्य or स्वार्थमात्रमुद्दिश्य कार्य्यं कृ.—(Buy and sell as a broker) परार्थं क्रयविक्रयं कृ or पण् (c. 1. पणते -णितुं, पणायति -यितुं), पणायां कृ, —(Deal in, hire) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), प्रयोगं कृ.

JOBBER, *s.* (One who does small jobs) क्षुद्रकर्म्मकारी *m.* (न्), नीचकर्म्मकृत्, तुच्छकर्म्मव्यवसायी *m.* (न्), अल्पकर्म्मव्यापारी *m.*—(Broker) परार्थं क्रयविक्रयकारी *m.* or क्रयविक्रयप्रयोजकः, घटकः.—(One who does a work for his own ends) स्वार्थप्रयुक्तकर्म्मव्यवसायी *m.*, स्वार्थप्रवर्त्तकः, स्ववृद्ध्यर्थं कार्य्यव्यापारी.—(Dealer) क्रयविक्रयिकः, पणिकः, विपणी *m.* (न्).

JOBBING, *s.* क्षुद्रकर्म्मव्यवसायः, नीचकर्म्मप्रवृत्तिः *f.*, स्वार्थप्रयुक्तकार्य्यप्रवृत्तिः *f.*, स्वार्थप्रवर्त्तनं, स्ववृद्धिप्रवर्त्तनं.

JOB-HORSE, *s.* पण्याश्वः, प्रयोज्यवाजी *m.* (न्), भाटकीयवाजी *m.*, अश्वकः.

JOCKEY, *s.* अश्वविद् *m.*, अश्वशिक्षकः, अश्वप्रेरकः, अश्वारूढः, अश्वशिक्षाजीवी *m.* (न्), अश्वोपजीवी *m.* (न्), अश्वज्ञः, हयज्ञः, अश्वविद्याविशारदः, हयविद्याविशारदः, अश्वकोविदः.

To JOCKEY, *v. a.* अश्वशिक्षकवत् प्रतृ (c. 10. -तारयति -यितुं) or वञ्च् (c. 10. वञ्चयते -ति -यितुं) or प्रलभ् (c. 1. -लभते -लब्धुं).

JOCKEYISM, JOCKEYSHIP, *s.* अश्वविद्या, अश्वारोहणविद्या, अश्वशिक्षा.

JOCOSE, *a.* परिहासशीलः -ला -लं, परिहासकः -का -कं, प्रहासी -सिनी -सि (न्), रसिकः -का -कं, रसी -सिनी -सि (न्), सरसः -सा -सं, कौतुकी -किनी -कि (न्), सकौतुकः -का -कं, विनोदी -दिनी -दि (न्). *See* JOCULAR.

JOCOSELY, *adv.* परिहासेन, प्रहासेन, सरसं, सकौतुकं, रसिकवत्.

JOCOSENESS, *s.* परिहासशीलता, प्रहासः, रसिकत्वं, सरसता, कौतुकं.

JOCULAR, *a.* परिहासकः -का -कं, रसिकः -का -कं, विनोदी -दिनी -दि (न्), विनोदकारी -रिणी -रि (न्), हास्यकारी &c., विनोदात्मकः -का -कं, हास्यावहः -हा -हं. *See* JOCOSE.

JOCULARITY, *s.* परिहासकत्वं, प्रहसनं, प्रहसितं, हासिका, रसिकता, विनोदः, कौतुकं, उल्लसता, हर्षः, उल्लासः.

JOCULARLY, *adv.* परिहासेन, सकौतुकं, विनोदार्थं, हर्षेण, हृष्टवत्.

JOCUND, *a.* प्रमोदी -दिनी -दि (न्), उल्लसः -सा -सं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, आनन्दी -न्दिनी -न्दि (न्), आनन्दवृत्तिः -त्तिः -त्ति.

JOCUNDITY, *s.* उल्लसता, प्रहर्षः, आनन्दः, मुदा, हृष्टचित्तत्वं.

JOCUNDLY, *adv.* हर्षेण, सहर्षं, प्रमोदेन, सानन्दं, उल्लासेन, हृष्टवत्.

To JOG, *v. a.* अरत्निना तड् (c. 10. ताडयति -यितुं) or चल् (c. 10. चालयति -यितुं), ईषत् तड् or चल्, इङ्गितं कृ.

To JOG, *v. n.* (Jog on slowly) शनैः शनैः or मन्दं मन्दं or क्रमे क्रमे चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं) or सृ (c. 1. सरति, सर्त्तुं).

JOG, JOGGING, *s.* चालनं, ईषच्चालनं, ईषत्क्षोभः, ईषदाघातः, ईषत्प्रहारः, ईषत्ताडनं, इङ्गितं.

To JOGGLE, JOGGLING. *See* JOG, JOGGING.

To JOIN, *v. a.* युज् (c. 7. युनक्ति, युंक्ते, योक्तुं, c. 10. योजयति -यितुं), संयुज्, आयुज्, समायुज्, सन्धा (c. 3. -दधाति -धातुं), उपसन्धा, सन्नह् (c. 9. -बध्नाति -बन्द्धुं), संश्लिष (c. 10. -श्लेषयति -यितुं), श्लिष, संहन् (c. 2. -हन्ति -न्तुं), सङ्गम् (c. 10. -गमयति -यितुं), संलग्नीकृ, एकीकृ, एकत्र कृ. —(Tie together) ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रन्थितुं), योक्त्र (nom. योक्त्रयति -यितुं).

To JOIN, *v. n.* (Be in contact, unite) संयुज् in pass. (-युज्यते), समायुज्, सन्धा in pass. (-धीयते), संश्लिष in pass. (-श्लिष्यते), संहन् in pass. (-हन्यते), सङ्गम् (c. 1. -गच्छति -गन्तुं), समे (समेति -तुं, rt. इ), संलग्नीभू, एकीभू, संसक्तीभू, एकत्र भू, सम्मिल् (c. 6. -मिलति -मीलितुं).

JOINED, *p. p.* युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, संयोजितः -ता -तं, समायुक्तः -क्ता -क्तं, संयुतः -ता -तं, संमिलितः -ता -तं, समायुतः -ता -तं, युतः -ता -तं, संश्लिष्टः -ष्टा -ष्टं, श्लिष्टः -ष्टा -ष्टं, संहृतः -ता -तं, अभिसंहृतः -ता -तं, संसक्तः -क्ता -क्तं, समासक्तः -क्ता -क्तं, सम्बद्धः -द्धा -द्धं, बद्धः -द्धा -द्धं, लग्नः -ग्ना -ग्नं, संलग्नः -ग्ना -ग्नं, विलग्नः -ग्ना -ग्नं, संहितः -ता -तं, सन्धितः -ता -तं, उपाहितः -ता -तं, सङ्गतः -ता -तं, समितः -ता -तं, मिलितः -ता -तं, एकीकृतः -ता -तं, घटितः -ता -तं; 'with joined hands,' संश्लिष्टाभ्यां पाणिभ्यां, बद्धाञ्जलिः -लिः -लि, अवहिताञ्जलिः -लिः -लि, अभिगृहीतपाणिः -णिः -णि.

JOINER, *s.* सूत्रधारः, काष्ठतक्षकः, तक्षकः, तक्षा *m.* (न्), त्वष्टा *m.* (ष्टृ).

JOINERY, *s.* काष्ठतक्षणं, त्वष्टिः *f.*, तक्षणं, सूत्रधारकर्म्म *n.* (न्), तक्षकक्रिया.

JOINING, *s.* संयोगः, योगः, सन्धानं, सन्धिः *m.*, श्लेषः, संश्लेषः, संघातः, सङ्गः, सङ्गमः, समागमः, समासक्तिः *f.*, संसक्तिः.

JOINT, *s.* (Of the body) सन्धिः *m.*, ग्रन्थिः *m.*, अस्थिसन्धिः *m.*, अस्थिग्रन्थिः *m.*, परुग्रन्थिः *m.*, पर्व्व *n.* (न्), अस्थिपर्व्व *n.*, मर्म्म *n.* (न्), काण्डः -ण्डं, जीवस्थानं, परुस् ind.; 'the knee-joint,' जानुसन्धिः *m.*, जङ्घोरुसन्धिः; 'the thigh-joint,' ऊरुपर्व्व *n.*; 'the thumb-joint,' अङ्गुष्ठपर्व्व *n.*; 'of the neck,' ग्रीवासन्धिः *m.*, सन्धिः; 'of the shoulder,' विरु *n.*; 'to put out of joint,' विसन्धीकृ.—(Knot of a plant) ग्रन्थिः *m.*, पर्व्व *n.* (न्).

JOINT, *a.* (Shared by two or more) संविभक्तः -क्ता -क्तं, अविभक्तः -क्ता -क्तं, संश्रितः -ता -तं, साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, अनेकस्वामिकः -का -कं, usually expressed by सह in comp.; as, 'joint proprietor,' सहस्वामी *m.* (न्), सहाधिकारी *m.* (न्); 'joint

possessor,' सहभोजी *m.* (न्); 'joint-heir,' समाधिकारी.—(United in the same office) एकाधिकारी *m.* (न्), एककार्य्यकारी *m.* (न्), सद्वितीयः -या -यं.—(Combined) सङ्घातवान् -वती -वत् (त्), सम्भूयकारी -रिणी -रि (न्).

To JOINT, *v. a.* (Form with joints) सन्धिविशिष्टं -ष्टां कृ, ग्रन्थियुक्तं -क्तां कृ.—(Divide in the joints) सन्धिभेदं कृ, सन्धिभङ्गं कृ.

JOINTED, *p. p.* or *a.* (Formed with joints) ग्रन्थिलः -ला -लं, ग्रन्थिमान् -मती -मत् (त्), सन्धिविशिष्टः -ष्टा -ष्टं, सन्धियुक्तः -क्ता -क्तं.—(Divided in the joints) भिन्नसन्धिः -न्धिः -न्धि, विसन्धितः -ता -तं.

JOINT-HEIR, *s.* समांशी *m.* (न्), समभागी *m.* (न्), समाधिकारी *m.* (न्), समांशहारी *m.* (न्), भागी *m.* (न्), संविभागी, भागहरः, समभागहारी *m.*, भागधेयः, सहाधिकारी *m.* *See* COHEIR.

JOINTLY, *adv.* संयोगतस्, योगतस्, सहितं, समं, सह, सम्भूय, एकचित्तीभूय, अपृथक्, युगपत्, सार्द्धं.

JOINTURE, *s.* विधवाधनं, स्त्रीधनं, स्त्रीवृत्तिः *f.*, भर्तृदत्तं, स्वामिदत्तं.

JOIST, *s.* गृहतलालम्बी दीर्घदारुः, हर्म्यतलोत्तम्भकं दीर्घकाष्ठं.

JOKE, *s.* परिहासः, हास्यं, हासिका, परिहासवाक्यं, परिहासोक्तिः *f.*, रसः, रसिकवाक्यं, नर्म्म *n.* (न्), विनोदः, विनोदोक्तिः *f.*, लालिका, क्षेपः, ठट्ठरी, व्याहारः, प्रपञ्चः, कौतुकं; 'in joke,' परिहासेन; 'jokes to the bridegroom,' जम्बूलः.

To JOKE, *v. a.* हस् (c. 1. हसति -सितुं), प्रहस्, विहस्, संविहस्, व्यतिहस्, सम्प्रहस्, परिहस्, परिहासं कृ, हास्यं कृ, परिहासवाक्यं वद् (c. 1. वदति -दितुं), विनोदं कृ, विनोदवाक्यं वद्, भण्ड् (c. 1. भण्डते -ण्डितुं), विलस् (c. 1. -लसति -सितुं), खेला (nom. खेलायति), नर्म्म कृ; 'speak in joke,' परिहासेन वद्.

JOKER, *s.* परिहासवेदी *m.* (न्), परिहासकः, हास्यकारी *m.* (न्), विनोदभाषी *m.* (न्), वैहासिकः, विदूषकः, विलासी *m.* (न्).

JOLE, *s.* गण्डः -ण्डं, कपोलः, गण्डस्थलः -ली; 'cheek by jole,' गण्डागण्डि.

JOLLITY, JOLLINESS, *s.* उत्सवकरणं, उत्सवः, समुत्सवः, उल्लसता, उल्लासः, आनन्दः, आह्लादः, हर्षः, प्रहर्षः, प्रमोदः, प्रहसनं, प्रहासः, प्रहसितं, प्रहृष्टता, प्रफुल्लता, सानन्दता, आमोदः, मुदा.

JOLLY, *a.* उत्सवकारी -रिणी -रि (न्), सोत्सवः -वा -वं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, हृष्टहृदयः -या -यं, हर्षणः -णा -णं, उल्लसः -सा -सं, उल्लसितः -ता -तं, उल्लासी -सिनी -सि (न्), प्रहासी -सिनी -सि (न्), प्रमोदी -दिनी -दि (न्), मुदितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, हासी &c., परिहासशीलः -ला -लं, विलासी -सिनी -सि (न्), कृतकौतुकः -का -कं, सुमनाः -नाः -नः (स्).

JOLLY-BOAT, *s.* वृहन्नौकासम्बन्धिनी क्षुद्रनौका.

To JOLT, *v. a.* क्षुभ् (c. 10. क्षोभयति -यितुं), क्षोभं कृ, विषमभूमिगमनप्रयुक्तं क्षोभं कृ, आकस्मिकक्षोभं कृ.

To JOLT, *v. n.* विषमभूमिगमनत्वात् क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं).

JOLT, *s.* क्षोभः, रथक्षोभः, विषमभूमिगमनप्रयुक्तः क्षोभः, आकस्मिकक्षोभः.

JOLTED, *p.p.* क्षुब्धः -ब्धा -ब्धं, विक्षुब्धः -ब्धा -ब्धं, क्षोभितः -ता -तं.

JOLTHEAD, *s.* स्थूलबुद्धिः *m.*, मन्दबुद्धिः *m.*, मूर्खः, वटुकः.

JONQUIL, *s.* उत्पलजातीयो नानावर्णः पुष्पभेदः.

To JOSTLE, *v. a.* जनसम्मर्द्दे स्कन्धेन ताडयित्वा क्षुभ् (c. 10. क्षोभयति -यितुं) or निरस् (c. 4. -अस्यति -असितुं) or निःसृ (c. 10. -सारयति -यितुं) or निराकृ or सम्बाध् (c. 1. -बाधते -धितुं).

JOSTLING, *s.* जनसम्मर्द्दे परस्परसंक्षोभः or परस्परसमाघातः, परस्परघर्षणं, परस्परसम्मर्द्दः, स्कन्धताडनं, प्रतिघातः.

JOT, *s.* लवः, लवमात्रं, कणमात्रं, बिन्दुमात्रं, लवलेशः, लेशः, अणुः *m.*, परमाणुः *m.*, कणिका, रजःकणः, तिलमात्रं.

To JOT, *v. a.* स्मरणार्थं किञ्चिद् लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्.

JOTTING, *s.* स्मरणार्थं किञ्चिल्लिखनं, स्मरणार्थलिखितं.

JOURNAL, *a.* (Diary) दिनवृत्तपत्रं, दिनव्यवहारलेख्यं, आह्निकव्यवहारपुस्तकं, दिनचर्य्यालेखः, दैनिकवृत्तान्तपुस्तकं, दिनचरित्रलेखः, आह्निकपत्रकं, दैनिकपत्रकं, पञ्जिका, पञ्जिः -ञ्जी *f.*, पदभञ्जिका.—(Newspaper published daily) प्रतिदिनं प्रकाशीकृतं समाचारपत्रं, वार्त्तापत्रं, वाचिकपत्रं.

JOURNALIST, *s.* आह्निकपत्रलेखकः, दैनिकपत्रलिख् *m.* (ख्).—(Conductor of a newspaper) समाचारपत्रप्रकाशकः, वार्त्तापत्रलेखकः.

JOURNEY, *s.* अध्वा *m.* (न्), अध्वगमनं, मार्गः, मार्गगमनं, मार्गक्रमणं, यात्रा, यात्राकरणं, यानं, प्रयाणं, प्रस्थानं, प्रस्थितिः *f.*, व्रज्या, भ्रमणं, देशभ्रमणं, पर्यटनं, प्रवासः, प्रवासगमनं; 'a long journey,' दीर्घाध्वा *m.* -ध्व *n.* (न्); 'a day's journey,' एकाहगमः -मनं; 'to return from a journey,' प्रवासाद् आगम् (c. 1. -गच्छति -गन्तुं); 'a pleasant journey to you,' शिवास् ते पन्थानः सन्तु.

To JOURNEY, *v. n.* अध्वना or मार्गेण गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं), मार्गगमनं कृ, अध्वगमनं कृ, यात्रां कृ, देशभ्रमणं कृ, देशाद्देशं भ्रम (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम् or पर्यट् (c. 1. -अटति -टितुं).

JOURNEYER, *s.* अध्वगः -गामी *m.* (न्), अध्वनीनः, अध्वन्यः, यात्रिकः, यायी *m.* (न्), पथिकः, सारणिकः, पादविकः.

JOURNEYING, *s.* अध्वगमनं, मार्गगमनं, यात्राकरणं, देशभ्रमणं.

JOURNEYMAN, *s.* वेतनार्थं कर्म्मकारः or कर्म्मकरः or शिल्पकारः or शिल्पकर्म्मकरः, हस्तकर्म्मकारः, वैतनिकः, वेतनार्थी *m.* (न्), व्रातीनः.

JOURNEY-WORK, *s.* शिल्पकर्म्म *n.* (न्), हस्तकर्म्म *n.*, वैतनिककर्म्म *n.*, शिल्पं.

JOVE, *s.* (The god). *See* INDRA.

JOVIAL, *a.* उत्सवकारी -रिणी -रि (न्), नित्योत्सवी -विनी -वि (न्), सदोत्सवी &c., कृतोत्सवः -वा -वं, उल्लासी -सिनी -सि (न्), सदानन्दी -न्दिनी -न्दि (न्), प्रहृष्टः -ष्टा -ष्टं, परिहासशीलः -ला -लं, सदाप्रमोदी -दिनी -दि (न्), उत्सवप्रियः -या -यं.

JOVIALLY, *adv.* सोत्सवं, महोत्सवेन, सदानन्दपूर्व्वं, उल्लसवत्, प्रहृष्टवत्.

JOVIALITY, JOVIALNESS, *s.* उत्सवकरणं, नित्योत्सवः, सदानन्दः, नित्यानन्दः, उल्लसता, नित्योल्लासः, हर्षः, प्रहर्षः, आह्लादः, प्रहसनं, हास्यं, प्रहासः, प्रहृष्टता.

JOWL, *s.* (Cheek) गण्डः, कपोलः. *See* JOLE.

JOWLER, *s.* मृगव्यकुक्कुरः, मृगव्यश्वा *m.* (न्), मृगदंशकः.

JOY, *s.* आनन्दः, हर्षः, आह्लादः, प्रह्लादः, प्रमोदः, आमोदः, नन्दः, ह्लादः -दनं, मोदः, मुदा, मुद् *f.*, हृष्टिः *f.*, हृष्टता, प्रहर्षः, प्रहृष्टता, मदः, प्रमदः, मादः, तुष्टिः *f.*, तोषः, परितोषः, सन्तोषः, सन्तुष्टिः *f.*, विलासः, उल्लासः, उल्लसता -त्वं, प्रफुल्लता, प्रीतिः *f.*, प्रीतता, सुखं, सौख्यं, चित्तप्रसन्नता, शर्म्म *n.* (न्), नन्दथुः *m.*, धन्यता, आनन्दथुः *m.*, उत्सवः, रभसः, उत्साहः.—(The cause of joy) नन्दनः -ना -नं, आनन्ददः -दा -दं; 'joy and sorrow,' हर्षोद्वेगं.

To JOY, *v. n.* नन्द् (c. 1. नन्दति -न्दितुं), आनन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), ह्लाद् (c. 1. ह्लादते -दितुं), उल्लस् (c. 1. -लसति -सितुं), रम् (c. 4. रमते, रन्तुं), तुष् (c. 4. तुष्यति, तोष्टुं), मद् (c. 4. माद्यति, मदितुं).

To JOY, *v. a.* (Cause joy) नन्द् (c. 10. नन्दयति -यितुं), हृष् (c. 10. हर्षयति -यितुं), प्रहृष्.—(Give one joy, congratulate) अभिनन्द्, अभिवन्द् (c. 1. -वन्दते -न्दितुं), धन्यवादं कृ. *See* *To* CONGRATULATE.

JOYFUL, *a.* आनन्दी -न्दिनी -न्दि (न्), आनन्दितः -ता -तं, सानन्दः -न्दा

-न्दं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टमानसः -सा -सं, हृष्टहृदयः -या -यं, प्रहर्षितः -ता -तं, हर्षितः -ता -तं, प्रहर्षणः -णा -णं, हर्षमाणः -णा -णं, हर्षणः -णा -णं, आह्लादी -दिनी -दि (न्), ह्लादी &c., प्रह्लादितः -ता -तं, आह्लादितः -ता -तं, ह्लादितः -ता -तं, प्रमोदी -दिनी -दि (न्), प्रमुदितः -ता -तं, मुदितः -ता -तं, मुदान्वितः -ता -तं, हर्षान्वितः -ता -तं, प्रमुद् *m.f.n.*, प्रफुल्लः -ल्ला -ल्लं, हर्षयुक्तः -क्ता -क्तं, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, उल्लसः -सा -सं, उल्लासी -सिनी -सि (न्), उल्लसितः -ता -तं, प्रीतः -ता -तं, प्रह्वः -ह्वा -ह्वं, आनन्दमयः -यी -यं, हर्षाक्रान्तः -न्ता -न्तं, हर्षाविष्टः -ष्टा -ष्टं, सुखी -खिनी -खि (न्), मत्तः -त्ता -त्तं, विशोकः -का -कं.—(Causing joy) हर्षकः -का -कं, हर्षदः -दा -दं, हर्षावहः -हा -हं, आनन्ददः -दा -दं, आनन्दकरः -री -रं, मोदकः -का -कं, सुभगः -गा -गं.

JOYFULLY, *adv.* सानन्दं, सहर्षं, साह्लादं, हर्षेण, प्रहर्षेण, प्रह्लादेन, प्रमोदेन, सामोदं, उल्लासेन, सोल्लासं, आनन्दपूर्व्वं, हृष्टमनसा, हृष्टवत्, सन्तोषेण.

JOYFULNESS, *s.* सानन्दत्वं, हृष्टता, प्रहृष्टता, प्रफुल्लता, आनन्दः. *See* JOY.

JOYLESS, *a.* निरानन्दः -न्दा -न्दं, आनन्दहीनः -ना -नं, आनन्दशून्यः -न्या -न्यं, अहर्षः -र्षा -र्षं, अहृष्टः -ष्टा -ष्टं, अहर्षितः -ता -तं, हर्षहीनः -ना -नं, आह्लादहीनः -ना -नं, निराह्लादः -दा -दं, अनाह्लादी -दिनी -दि (न्), असुखी -खिनी -खि (न्), असुखः -खा -खं.—(Giving no joy) असुखदः -दा -दं, असुखावहः -हा -हं, अनानन्ददः -दा -दं, अहर्षदः -दा -दं.

JOYLESSNESS, *s.* निरानन्दत्वं, आनन्दहीनता, निराह्लादत्वं, हर्षशून्यता.

JOYOUS, *a.* आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, प्रहृष्टः -ष्टा -ष्टं, आनन्दवृत्तिः -त्तिः -त्ति, प्रसन्नचित्तः -त्ता -त्तं, उल्लासी -सिनी -सि (न्). *See* JOYFUL.

JOYOUSLY, *adv.* सानन्दं, सहर्षं, साह्लादं, हृष्टचेतसा, प्रसन्नमनसा.

JOYOUSNESS, *s.* हृष्टता, प्रहृष्टता, सानन्दत्वं, चित्तप्रसन्नता, प्रफुल्लता.

JUBILANT, *a.* जयशब्दकारी -रिणी -रि (न्), जयशब्दोच्चारी -रिणी -रि (न्), जयध्वनिकारी &c., जयप्रशंसाकारी &c., जयशब्दघोषी -षिणी -षि (न्).

JUBILEE, *s.* महोत्सवः, महोत्सवकालः, समुत्सवः, उत्सवः, उत्सवकालः.

JUCUNDITY, *s.* रम्यता, रमणीयता, प्रियता, नन्दकत्वं, कान्तत्वं.

JUDAIC, JUDAICAL, *a.* यिहुदीयः -या -यं, यिहुदीयव्यवहारः -रा -रं

JUDGE, *s.* (Officer who hears and determines causes) धर्म्माध्यक्षः, धर्म्माधिकारी *m.* (न्), न्यायाधीशः, न्यायाधिपतिः *m.*, प्राड्विवाकः, विचारकर्त्ता *m.* (र्तृ), विचारकः, दण्डनायकः, व्यवहर्त्ता *m.* (र्तृ), अक्षदर्शकः, आक्षपाटिकः, स्थेयः, आधिकरणिकः, निर्णेता *m.* (तृ), निर्णयकारः.—(One who has skill to decide on the merits of any thing, a connoisseur) गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः, अभिज्ञः, विज्ञः, ज्ञानी *m.* (न्), परीक्षकः, तद्विद् *m.*, रसज्ञः, विवेकी *m.* (न्), विवेचकः, विवेकदृश्वा *m.* (न्), परिच्छेदकः.

To JUDGE, *v. n.* (Form an opinion, determine) विचर् (c. 10. -चारयति -यितुं), विचारं कृ, निर्णी (c. 1. -णयति -णेतुं), निर्णयं कृ, निश्चि (c. 5. -चिनोति -चेतुं), निश्चयं कृ, निधृ (c. 10. -धारयति -यितुं), अवधृ, निर्धारणं कृ.—(Weigh, consider, deliberate) मनसा विचर्, वितर्क् (c. 10. -तर्कयति -यितुं), वितर्कं कृ, विमृश् (c. 6. -मृशति -मर्ष्टुं), विगण् (c. 10. -गणयति -यितुं), विकॢप् (c. 10. -कल्पयति -यितुं), समर्थ (nom. समर्थयति -यितुं), समर्थनां कृ, मनसा विवेचनं कृ.—(Discriminate) विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), परिछिद् (c. 7. -छिनत्ति -छेत्तुं), विविच् (c. 7. -विनक्ति -वेक्तुं, c. 10. -वेचयति -यितुं), विभू (c. 10. -भावयति -यितुं), विचर्, विवेकं कृ, परिच्छेदं कृ.—(Examine) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ.—(Determine causes judicially, pass sentence) विचर्, विचारं कृ, निर्णी, निर्णयं कृ, प्रणयनं कृ, व्यवहारदर्शनं कृ, तीर् (c. 10. तीरयति -यितुं), न्यायं कृ.

To JUDGE, *v. a.* (Examine, bring under investigation) परीक्ष् (c. 1. -ईक्षते -क्षितुं), अनुसन्धा (c. 3. -दधाति -धातुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), परीक्षितं -तां कृ.—(Judicially) विचर् (c. 10. -चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), तीर् (c. 10. तीरयति -यितुं), विचारणं कृ, निर्णयं कृ.—(Censure, impute fault) निन्द् (c. 1. निन्दति -न्दितुं), दोषीकृ, दोषारोपणं कृ, अपवद् (c. 1. -वदति -दितुं), दोषप्रसङ्गं कृ.—(Consider, reckon) तर्क् (c. 10. तर्कयति -यितुं), मन् (c. 4. मन्यते, मन्तुं).

JUDGESHIP, *s.* धर्म्माध्यक्षत्वं, न्यायाधीशत्वं, धर्म्माधिकारः -रिता.

JUDGMENT, *s.* (Discrimination) विवेकः, विवेचनं, परिच्छेदः, विचारः -रणं -णा, विज्ञानं, विभावनं, विवेकदृश्वत्वं, अवबोधः, विचितिः *f.*—(Exercise of judgment after deliberation) विचारः -रणं -णा, विवेचना, सम्प्रधारणा.—(Knowledge derived from the comparison of ideas) अनुभवः, अनुभूतिः, अनुमानं, अनुमितिः *f.*, तर्कः, परामर्शः, ज्ञानं.—(Notion, opinion) बुद्धिः *f.*, मतिः *f.*, मतं, सङ्कल्पः, बोधः; 'according to one's judgment,' यथाबुद्धि, यथामति.—(The faculty concerned in weighing the merits or advantages of any thing) गुणागुणविषयका बुद्धिः, हिताहितविषयका बुद्धिः or धीशक्तिः.—(Determination, decision) निर्णयः, निश्चयः, निश्चितं, विचारः, सङ्कल्पः, निर्धारणं, अवधारणं, निष्पत्तिः *f.*—(Judicial sentence) निर्णयपादः, निर्णयः, विचारः, दण्डाज्ञा, आधर्षणं, तीरणं, तीरितं.—(Divine ordinance) ईश्वरविधिः *m.*, ईश्वरविधानं, ईश्वरनियमः, ईश्वरशासनं.

JUDGMENT-DAY, *s.* विचारदिनं, विचारदिवसः, न्यायकरणदिवसः.

JUDGMENT-HALL, *s.* विचारसभा, धर्म्मसभा, न्यायसभा, विचारशाला.

JUDGMENT-SEAT, *s.* धर्म्मासनं, न्यायासनं, विचारासनं.

JUDICATORY, *s.* (Court of justice) धर्म्मसभा, विचारसभा, विचारस्थानं, न्यायसभा, व्यवहारमण्डपः, व्यवहारदर्शनशाला, राजद्वारं, धर्म्माधिकरणं, न्यायागारं, सदस् *n.*

JUDICATURE, *s.* (Power of administering justice) व्यवहारदर्शनाधिकारः, विचाराध्यक्षता, न्यायाधिकारः, न्यायकरणाधिकारः, धर्म्माधिकरणं, विचारकरणाधिकारः; 'simple judicature,' व्यवहारमातृका.—(Court of judicature) धर्म्मसभा. *See* JUDICATORY.

JUDICIAL, *a.* (Pertaining to the practice of courts of justice) व्यावहारिकः -की -कं, व्यवहारिकः -की -कं, व्यवहारी -रिणी -रि (न्), व्यवहारसम्बन्धी -न्धिनी -न्धि (न्), व्यवहारविषयः -या -यं; 'judicial proceedings or investigation,' व्यवहारः, व्यवहारदर्शनं, क्रिया, विचारः.—(Pertaining to the administration of justice) व्यवहारदर्शनसम्बन्धी &c., न्यायकरणसम्बन्धी &c.—(Proceeding from court of justice) व्यवहारदर्शनप्रयुक्तः -क्ता -क्तं, न्यायदर्शनप्रयुक्तः -क्ता -क्तं.—(Inflicted as a penalty) दण्डरूपः -पा -पं, शिक्षाहेतुकः -का -कं.

JUDICIALLY, *adv.* विचारानुसारेण, विचारानुक्रमेण, धर्म्मानुसारात्, व्यवहारानुक्रमेण, यथाव्यवहारं, विचारसभासकाशात्.

JUDICIARY, *a.* विचारकः -का -कं, व्यावहारिकः -की -कं, निर्णायकः -का -कं, व्यवहारदर्शनसम्बन्धी -न्धिनी -न्धि (न्), धर्म्मसभासम्बन्धी &c.

JUDICIOUS, *a.* (According to sound judgment) विवेकानुसारी -रिणी -रि (न्), सुयुक्तः -क्ता -क्तं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, यथोचितः -ता -तं, उचितः -ता -तं, समञ्जसः -सा -सं, न्याय्यः -य्या -य्यं, सङ्गतः -ता -तं, सविवेकः -का -कं.—(Acting with judgment,

possessing judgment, said of persons) विवेकी -किनी -कि (न्), विवेकदृश्वा -श्वा -श्व (न्), बुद्धिमान् -मती -मत् (त्), मतिमान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, विज्ञः -ज्ञा -ज्ञं, प्राज्ञः -ज्ञा -ज्ञं, मनस्वी -स्विनी -स्वि (न्), विमृश्यकारी -रिणी -रि (न्), समीक्ष्यकारी &c., ज्ञानी -निनी -नि (न्), विशेषज्ञः -ज्ञा -ज्ञं, हिताहितदर्शी &c., सदसद्दर्शी &c., सुपरिच्छेदकः -का -कं, उचितज्ञः -ज्ञा -ज्ञं.

JUDICIOUSLY, *adv.* विवेकानुसारेण, सविवेकं, विज्ञवत्, प्राज्ञवत्, नीतिज्ञवत्, सपरिच्छेदं, विद्वज्जनवत्, बुधवत्, युक्तं, यथोचितं, समञ्जसं, सम्यक्, सुष्ठु, सुविमृश्य, सुविचार्य्य.

JUDICIOUSNESS, *s.* युक्तता, उपयुक्तता, सविवेकत्वं, बुद्धिमत्त्वं, विज्ञता.

JUG, *s.* कुम्भः, मृत्कांश्यं, मृत्कांस्यं, कांस्यं, कंसः -सं, कंशः, मृद्भाण्डं, घुटग्रीवः, कलशः, कलसः, जलपात्रं, उदपात्रं.

To JUGGLE, *v. a.* (Play tricks by sleight of hand) मायां कृ, इन्द्रियमायां कृ, दृष्टिमायां कृ, इन्द्रियमोहं कृ, दृष्टिमोहं कृ, कुहकं कृ, इन्द्रियजालं कृ, हस्तलाघवं कृ, कुसृतिं कृ, दृष्टिबन्धनं कृ.—(Deceive by trick) मुह् (c. 10. मोहयति -यितुं), छल् (c. 10. छलयति -यितुं), वञ्च् (c. 10. वञ्चयते -ति -यितुं).

JUGGLE, *s.* माया, मोहः, कुहकः, छलं, कूटता, कूटः, वञ्चनं.

JUGGLER, *s.* मायी *m.* (न्), मायाकारः, मायाजीवी *m.* (न्), मायावी *m.* (न्), कुहककारः, कुहकजीवी *m.*, कुहकः, इन्द्रजालिकः, ऐन्द्रजालिकः, इन्द्रियमोही *m.* (न्), प्रतिहारः -रकः, प्रातिहारिकः -रकः, कौसृतिकः, योगी *m.* (न्), सम्प्रयोगी *m.*, अभिचारविद् *m.*, शौभिकः, आहितुण्डिकः; 'female juggler,' माया, मायिनी, मायाजीविनी, शाम्बरी.

JUGGLERY, JUGGLING, *s.* (Legerdemain) हस्तलाघवं, हस्तचापल्यं, माया, कुहकः, कुहकवृत्तिः *f.*, इन्द्रजालं, इन्द्रियमोहः, कुसृतिः *f.*, दृष्टिमोहः, दृष्टिबन्धः, अभिचारः, जालं, योगः, सम्प्रयोगः.—(Trickery) कूटता, छलं, वञ्चना.

JUGULAR, *a.* कण्ठ्यः -ण्ठ्या -ण्ठ्यं, कण्ठसम्बन्धी &c., कण्ठस्थः -स्था -स्थं, ग्रीवासम्बन्धीयः -या -यं.

JUICE, *s.* रसः, द्रवः, निर्यासः, सारः, सुधा, आसवः, नीरं, मज्जा, स्वेदः.—(From the elephant's temples) मदः, दानं, हस्तिमदः, गण्डकुसुमं; 'its issue from the forehead,' मदप्रयोगः.

JUICELESS, *a.* नीरसः -सा -सं, विरसः -सा -सं, अरसः -सा -सं, निरसः -सा -सं, रसहीनः -ना -नं, रसशून्यः -न्या -न्यं, असारः -रा -रं, निस्सारः -रा -रं, सारवर्जितः -ता -तं, शुष्कः -ष्का -ष्कं, पिच्छनीरः -रा -रं.

JUICINESS, *s.* सरसता, रसवत्त्वं, रसिकत्वं, रसबाहुल्यं, बहुरसत्वं.

JUICY, *a.* सरसः -सा -सं, रसवान् -वती -वत् (त्), रसी -सिनी -सि (न्), रसिकः -का -कं, रसाढ्यः -ढ्या -ढ्यं, रस्यः -स्या -स्यं, बहुरसः -सा -सं, सारवान् &c., बहुसारः -रा -रं.

JUJUBE, *s.* (The tree) बदरः -री *f.* -रिः *m.*, बदरिकः, वदरिकः, राजबदरः, कर्कन्धूः *m.f.* -न्धुः, कोलिः -ली *f.*, कुवोलं, सौवीरं, कर्कशी -शिका, कुवलः; 'the fruit,' बदरं.

JULY, *s.* आषाढः -ढकः, श्रावणः -णिकः, उत्तराषाढः, पूर्व्वश्रावणः, आषाढश्रावणं, सप्तममासः.

To JUMBLE, *v. a.* सम्मिश्र् (c. 10. -मिश्रयति -यितुं), सम्मिश्रीकृ, व्यामिश्र्, मिश्र्, सङ्कॄ (c. 6. -किरति -करितुं -रीतुं), सङ्करीकृ, सङ्कीर्णीकृ, सङ्कुलीकृ, अस्तव्यस्तीकृ, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षिप्.

To JUMBLE, *v. n.* (Be jumbled) सम्मिश्रीभू, सङ्कॄ in pass. (-कीर्य्यते), सङ्कीर्णीभू, सङ्करीभू, सङ्कुलीभू, सम्मिश्रितः -ता -तं भू.

JUMBLE, *s.* सम्मिश्रणं, मिश्रणं, सङ्करः, साङ्कर्य्यं, सङ्कीर्णत्वं, अस्तव्यस्तता, सङ्कुलता, सन्निपातः, संक्षोभः, व्यतिकरः, सङ्कुलनं.

JUMBLED, *p. p.* सम्मिश्रितः -ता -तं, सम्मिश्रः -श्रा -श्रं, सम्मिश्रीकृतः -ता -तं, मिश्रितः -ता -तं, सङ्करीकृतः -ता -तं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, अस्तव्यस्तः -स्ता -स्तं, सन्निपतितः -ता -तं, संक्षुब्धः -ब्धा -ब्धं.

JUMNÁ, *s.* (A river which rises in a mountain called Kalinda, in the Himalaya range, and, after a course of 378 miles, falls into the Ganges below Allahabad; she is daughter of the sun and sister of Yama) यमुना, कालिन्दी, कलिन्दकन्या, कलिन्दनन्दिनी, कलिन्दशैलजाता.—(As daughter of the sun) सूर्य्यजा, सूर्य्यतनया, सूर्य्यपुत्री, दैवाकरी.—(As sister of Yama) यमस्वसा *f.* (सृ), यमभगिनी.—(Of a dark blue colour) श्यामा.

To JUMP, *v. a.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्, स्कन्द् (c. 1. स्कन्दते, स्कन्तुं), कम्पं कृ; 'to jump over,' लङ्घ् (c. 10. लङ्घयति -यितुं), अभिलङ्घ्; 'to jump over a wall,' प्राकारलङ्घनं कृ; 'jump up,' उत्प्लु, समुत्प्लु, उत्पत् (c. 1. -पतति -तितुं), प्रोत्पत्, उत्सृप् (c. 1. -सर्पति -सर्प्तुं); 'jump down,' अवप्लु, अवस्कन्द्; 'to jump out from,' प्रस्कन्द्; 'to jump about,' नृत् (c. 4. नृत्यति नर्त्तितुं); 'having jumped up,' उत्प्लुत्य.

JUMP, *s.* प्लवः, प्लवनं, प्लुतं, उत्प्लवनं, उत्प्लुतं, कम्पः -म्पा, वल्गितं, उत्फालः, उत्पतनं, उत्सर्पणं, अवस्कन्दः.

JUMPED, *p. p.* प्लुतः -ता -तं, उत्प्लुतः -ता -तं, वल्गितः -ता -तं, उत्पतितः -ता -तं.

JUMPER, *s.* प्लवकः, प्लवनकारी *m.* (न्), कम्पकारी *m.*, कम्पी *m.* (न्), उत्प्लवकः, उत्पतिता *m.* (तृ); 'going by jumps,' प्लवगः -गतिः *m.*

JUMPING, *s.* (Act of jumping) प्लवनं, उत्प्लवनं, उत्पतनं, उत्सर्पणं.

JUMPING, *part.* प्लवमानः -ना -नं, वल्गन् -ल्गन्ती -ल्गत् (त्), उत्पतिष्णुः -ष्णुः -ष्णु, उत्पतिता -त्री -तृ (तृ).

JUNCATE, *s.* किलाटपिष्टकः, दधिशर्करादिमयो मोदकः, मिष्टान्नं.

JUNCOUS, *a.* दर्भविकीर्णः -र्णा -र्णं, नडकीयः -या -यं.

JUNCTION, *s.* योगः, संयोगः, संयोजनं, समायोगः, सम्प्रयोगः, युक्तिः *f.*, सन्धिः *m.*, सन्धानं, श्लेषः, संश्लेषः, सङ्गः -ङ्गमः -ङ्गतिः *f.* -तं, समागमः, संहतिः *f.*, संघातः, संसक्तिः *f.*, समासक्तिः *f.*, संसृष्टिः *f.*, संसर्गः, मेलनं, सम्पर्कः, सम्बन्धः, सक्तिः *f.*, आसक्तिः *f.*, प्रसक्तिः *f.*—(Point of union) सन्धिस्थानं.

JUNCTURE, *s.* (Point of time, crisis) लग्नं, सन्धिः *m.*, कालसन्धिः *m.*, सन्धिवेला, समयः, वेला, कालः, प्रसङ्गः, अवकाशः.—(Joint, articulation) सन्धिः *m.*, ग्रन्थिः *m.*—(Seam) सीवनं.

JUNE, *s.* ज्येष्ठः, आषाढः -ढकः, ज्यैष्ठः, ज्येष्ठामूलीयः, पूर्व्वाषाढः, उत्तरज्येष्ठः, ज्येष्ठाषाढकं.

JUNGLE, *s.* जङ्गलं, जाङ्गलं, प्रस्तारः, जङ्गलस्थानं, गुल्मावृतस्थानं.

JUNGLY, *a.* जाङ्गलः -ली -लं, जङ्गली -लिनी -लि (न्), प्रस्तारी &c.

JUNIOR, *a.* अवरः -रा -रं, अवरवयस्कः -स्का -स्कं, अवरवयाः -याः -यः (स्), अवरजः -जा -जं, अवरजातः -ता -तं, अनुजः -जा -जं, अनुजातः -ता -तं, अनुजन्मा -न्मा -न्म (न्), जघन्यजः -जा -जं, यवीयान् -यसी -यः (स्), कनीयान् -यसी -यः (स्), यविष्ठः -ष्ठा -ष्ठं, कनिष्ठः -ष्ठा -ष्ठं.

JUNIPER, *s.* वृषिपराख्यो वृक्षप्रभेदः.

JUNK, *s.* चीनदेशीयो वृहन्नौकाविशेषः, चीननौका.—(Pieces of old cable) जीर्णरज्जुखण्डाः *m. pl.*

JUNKET, *s.* निभृते कृतं परमान्नभोजनं or उत्तमांशभोजनं or सहभोजनं, छलेन कृतो महोत्सवः, निभृतोत्सवः.

To JUNKET, *v. n.* निभृतोत्सवं कृ, निभृते or छलेन सहभोजनं कृ or उत्सवं कृ.

JUNTA, JUNTO, *s.* (Council) सभा, समाजः, शिष्टसभा, महासभा.—(Cabal) गोपनीयकर्म्मसाधनार्थं कतिपयजनसंसर्गः, कुसंसर्गः.

JUPITER, *s.* (The planet) वृहस्पतिः *m.*, गुरुः *m.*, वाक्पतिः *m.*, ग्रहराजः. *See* VRIHASPATI. (The god). *See* INDRA.

JURIDICAL, *a.* धर्म्मसभासम्बन्धी &c., विचारसभासम्बन्धी &c., न्यायसभासम्बन्धी &c., व्यावहारिकः -की -कं, व्यवहारिकः -की -कं.

JURIDICALLY, *adv.* विचारानुसारेण, व्यवहारानुसारेण, धर्म्मानुसारात्, यथाव्यवहारं, यथान्यायं.

JURISCONSULT, *s.* स्मृतिशास्त्रज्ञः, धर्म्मशास्त्रज्ञः, व्यवहारपण्डितः, व्यवहारसचिवः, व्यवस्थाज्ञः, धर्म्मप्रवक्ता *m.* (क्तृ).

JURISDICTION, *s.* अधिकारः -रिता, विचारकरणाधिकारः, न्यायकरणाधिकारः, आधिपत्यं, प्रभुत्वं, व्यवहारदर्शनाधिकारः, धर्म्माधिकारः.

JURISPRUDENCE, *s.* व्यवहारः, व्यवहारशास्त्रं, व्यवहारविधिः *m.*, व्यवहारज्ञानं, व्यवहारविद्या, धर्म्मशास्त्रं, स्मृतिशास्त्रं; 'a title or head of jurisprudence,' व्यवहारविषयः, व्यवहारमार्गः, व्यवहारस्थानं, व्यवहारपदं.

JURISPRUDENT, *a.* व्यवहारज्ञः -ज्ञा -ज्ञं, व्यवहारशास्त्रज्ञः &c., स्मृतिशास्त्रज्ञः &c., धर्म्मशास्त्रज्ञः &c., व्यवहारपण्डितः -ता -तं.

JURIST, *s.* धर्म्मशास्त्री *m.* (न्), धर्म्मज्ञः, व्यवहारवेत्ता *m.* (त्तृ), स्मृतिज्ञः.

JUROR, *s.* शापितजनः, शापितपुरुषः, धर्म्मसभायां सुविचारार्थं शापितः प्रमाणपुरुषः or स्थेयः or मध्यस्थः.

JURY, *s.* धर्म्मसभायां सुविचारार्थं शापितानां द्वादशप्रमाणपुरुषाणां गणः, शापितप्रमाणपुरुषपंक्तिः *f.*, स्थेयगणः.

JURYMAN, *s.* सुविचारार्थं शापितः प्रमाणपुरुषः. *See* JUROR.

JUST, *a.* (Upright, honest, equitable) न्यायाचारः -रा -रं -री -रिणी -रि (न्), न्यायी -यिनी -यि (न्), न्यायवृत्तिः -त्तिः -त्ति, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), न्यायकारी -रिणी -रि (न्), धार्म्मिकः -की -कं, धर्म्मकारी &c., न्यायशीलः -ला -लं, न्यायपरः -रा -रं, धर्म्मी -र्म्मिणी -र्म्मि (न्), शुचिः -चिः -चि, सात्त्विकः -की -कं, महासत्त्वः -त्त्वा -त्त्वं, सच्चरितः -ता -तं, साधुः -धुः -ध्वी -धु, साधुवृत्तिः -त्तिः -त्ति, ऋजुः -जुः -जु, विमलात्मा -त्मा -त्म (न्), मायाहीनः -ना -नं, नीतिमान् -मती -मत् (त्), निष्कपटः -टा -टं, निर्व्यलीकः -का -कं, अकुटव्यवहारः -रा -रं.—(According to equity) न्याय्यः -य्या -य्यं, यथान्यायः -या -यं, न्यायानुसारी -रिणी -रि (न्), यथानीतिः -तिः -ति, याथार्थिकः -की -कं, तात्त्विकः -की -कं, न्यायसिद्धः -द्धा -द्धं.—(Exact, correct, right, proper) यथार्थः -र्था -र्थं, याथार्थिकः -की -कं, समञ्जसः -सा -सं, अञ्जसः -सा -सं, शुद्धः -द्धा -द्धं, सत्यः -त्या -त्यं, तथ्यः -थ्या -थ्यं, सम्यङ् समीची सम्यक्, युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, सङ्गतः -ता -तं.—(Impartial, fair) विपक्षपातः -ता -तं, समदर्शी -र्शिनी -र्शि (न्), समः -मा -मं, समानवृत्तिः -त्तिः -त्ति, धर्म्यः -र्म्या -र्म्यं.—(Full) अन्यूनः -ना -नं, अविकलः -ला -लं, सम्पूर्णः -र्णा -र्णं.

JUST, *adv.* (Close, near to, in reference to place) निकटे, समीपं, उपान्ते, अन्तिके, अभितस्.—(Nearly in time, almost) प्रायस्, प्रायशस्, भूयिष्ठं, कल्पः; 'just dead,' मृतप्रायः, मृतकल्पः or expressed by the desid. adj. मुमूर्षुः; 'just going,' जिगमिषुः -षुः -षु; 'just finished,' समाप्तभूयिष्ठः -ष्ठा -ष्ठं.—(In the instant, just now) सद्यस्, मात्रं; 'just heated,' सद्यस्तप्तः -प्ता -प्तं; 'just born,' सद्योजातः -ता -तं, जातमात्रः -त्री -त्रं; 'just dead,' सद्योमृतः -ता -तं; 'just done,' सद्यःकृतः -ता -तं.—(Exactly) यथार्थं, युक्तं, सम्यक्, यथावत्, अञ्जसा, समञ्जसं, यथातथं, तावत्; 'just so far, just so much,' तावन्मात्रं, तदन्तं; 'just so,' युक्तं, युज्यते, एवमेव, तथैव; 'just the same, neither more nor less,' नाधिकं न च न्यूनं; 'just as,' यद्वत्, यत्प्रकारेण.—(Merely, barely) मात्रं, कष्टेन, कृच्छ्रेण. 'Just' is often used redundantly, in which case it is expressed by तावत्; as, 'just wait a moment,' तिष्ठ तावत् मुहूर्त्तं.

JUST, *s.* (A tournement) सादिनां or अश्वारोहिणां क्रीडायुद्धं.

To JUST, *v. n.* पूर्व्वोक्तक्रीडायुद्धं कृ, पूर्व्वोक्तप्रकारेण परस्परसमाघातं कृ.

JUSTICE, *s.* (The virtue which consists in giving what is due, integrity, honesty) धर्म्मः, न्यायः, नीतिः *f.*, नयः, धर्म्मन्यायः, न्यायशीलता, न्यायिता, न्यायाचारता, धार्म्मिकत्वं, ऋजुता, शुचिता, साधुता.—(Equity, agreeableness to right) न्याय्यत्वं -ता, न्यायता, युक्तिः *f.*, योग्यता, उपयुक्तता, यथायोग्यता, यथार्थता, याथार्थ्यं, सामञ्जस्यं, सम्यक्त्वं.—(Right application of justice, redress of wrong) न्यायः, दण्डः, दण्डयोगः.—(Impartiality) साम्यं, समता, सर्व्वसमता, अपक्षपातः.—(Merited punishment, retribution) उपयुक्तदण्डः, न्याय्यदण्डः, यथापराधदण्डः, यथापराधशासनं, योग्यशिक्षा, प्रतिक्रिया.—(One who administers justice) धर्म्माधिकारी *m.* (न्), धर्म्माध्यक्षः, न्यायाधिकारी *m.*, दण्डनायकः; 'administration of justice,' न्यायप्रणयनं, न्यायकरणं, न्यायदर्शनं, व्यवहारदर्शनं; 'court of justice,' धर्म्मसभा. *See* JUDICATORY.

JUSTICESHIP, *s.* धर्म्माध्यक्षता -त्वं, न्यायाधीशत्वं, धर्म्माधिकारः -रिता.

JUSTICIABLE, *a.* व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहर्त्तव्यः -व्या -व्यं.

JUSTICIARY, *s.* न्यायाध्यक्षः, न्यायदर्शी *m.* (न्), न्यायप्रणेता *m.* (तृ). *See* JUDGE.

JUSTIFIABLE, *a.* निरसनीयदोषः -षा -षं, निराकरणीयदोषः -षा -षं, आरोपितदोषमोचनीयः -या -यं, शोधनीयदोषः -षा -षं, शोधनीयः -या -यं, परिशोधनीयः -या -यं, शोध्यः -ध्या -ध्यं, खण्डनीयदोषारोपः -पा -पं, अनारोपणीयदोषः -षा -षं, दोषनिरासशक्यः -क्या -क्यं, परिशुद्धिक्षमः -मा -मं, निवारणीयदोषः -षा -षं, मार्ज्जनीयदोषः -षा -षं, दोषमोचनीयः -या -यं, यथान्यायः -या -यं, रक्षणीयः -या -यं.

JUSTIFIABLENESS, *s.* शोधनीयत्वं, शोध्यता, परिशुद्धिक्षमता, दोषमोच्यता.

JUSTIFIABLY, *adv.* [illegible], यथा दोषो निरसितुं शक्यते तथा.

To LAP, *v. a.* (Fold) पुटीकृ, व्यावृत् (c. 10. -वर्त्तयति -यितुं), विपरिवृत्, व्यावर्त्तनं कृ.—(Wrap, infold) वेष्ट् (c. 1. वेष्टते -ष्टितुं), आवेष्ट्, परिवेष्ट्, कोशेन परिवेष्ट्.—(Lick up) लिह् (c. 2. लेढि, लीढे, लेढुं), आलिह्, संलिह्, परिसंलिह्, जिह्वास्वादं कृ, जिह्वालेहनं कृ.

To LAP, *v. n.* (Be turned over) व्यावृत् (c. 1. -वर्त्तते -र्त्तितुं), विपरिवृत्.

LAP-DOG, *s.* अङ्ककुक्कुरः, अङ्के पालनीयः क्षुद्रकुक्कुरः, अङ्कपालनयोग्यः क्षुद्रकुक्कुरः, अङ्कपालितकुक्कुरः.

LAP-FUL, *s.* अङ्कपूरणं, क्रोडपूरणं, अङ्कपूरकं, अङ्कभरकं.

LAPIDARIOUS, *a.* प्रस्तरमयः -यी -यं, मणिमयः &c., शिलामयः &c.

LAPIDARY, *s.* मणिकारः, रत्नकारः, मणिपरिष्कारकः, रत्नपरिष्कारकः, प्रस्तरच्छिद् *m.*, रत्नोपजीवी *m.* (न्), रत्नविक्रयी *m.* (न्), मणिविक्रेता *m.* (तृ).

To LAPIDATE, *v. a.* प्रस्तरप्रक्षेपेण or प्रस्तराघातेन हन् (c. 2. हन्ति -न्तुं) or व्यापद् (c. 10. -पादयति -यितुं).

LAPIDATION, *s.* प्रस्तराघातेन or पाषाणप्रक्षेपेण हननं or व्यापादनं or मारणं.

LAPIDEOUS, *a.* पाषाणमयः -यी -यं, शिलेयः -यी -यं, आश्मिकः -की -कं.

LAPIDESCENCE, *s.* पाषाणभूयं, प्रस्तरभूयं, शिलाभूयं.

LAPIDIFICATION, *s.* पाषाणभावकरणं, प्रस्तरीकरणं, पाषाणीकरणं.

LAPIS-LAZULI, *s.* वैदूर्य्यं, विदूरजं, नीलोपलः -लं, असितोपलः, असिताश्मा *m.* (न्), बालराजः, बालसूर्य्यं, बालवायजं, अभ्ररोहं, गन्धर्कः.

LAPLING, *s.* विषयसेवी *m.* (न्), विषयोपभोगासक्तः, कामम्भरिः *m.*

LAPPET, *s.* वस्त्राञ्चलः -लं, वसनान्तः, वसनाञ्चलः, वसनदशा, वस्तिः *m.*

LAPSE, *s.* (Flow, course) गतिः *f.*, प्रवाहः, प्रवृत्तिः *f.*; 'lapse of time,' कालगतिः *f.*—(Passing away) अत्ययः, अतिक्रमः, प्रतीतिः *f.*—(Falling) पातः, पतनं, च्युतिः *f.*, च्यवनं, भ्रंशः, प्रभ्रंशः, ध्वंसः.—(Error) भ्रमः, प्रमादः, स्खलनं, स्खलितं.

To LAPSE, *v. n.* (Pass slowly away) शनैः शनैः or क्रमे क्रमे अती (c. 2. अत्येति -तुं, rt. इ) or व्यती or अतिक्रम् (c. 4. -क्राम्यति, c. 1. -क्रामति -क्रमितुं) or अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं) or प्रवृत् or वृत्.—(Pass on by degrees) क्रमेण गम् (c. 1. गच्छति, गन्तुं) or प्रगम् or या (c. 2. याति -तुं) or प्रया or सृप् (c. 1. सर्पति, सर्प्तुं) or प्रसृप्.—(Fall in moral conduct) भ्रंश् (c. 4. -भ्रश्यति, भ्रंशितुं), विभ्रंश्, च्यु (c. 1. च्यवते, च्योतुं), विच्यु, विचल् (c. 1. -चलति -लितुं), उत्क्रम्, व्युत्क्रम्.—(Slip, make a mistake) स्खल् (c. 1. स्खलति -लितुं), प्रस्खल्, भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), प्रमादं कृ, दोषं कृ.—(Pass from one proprietor to another) सङ्क्रम्, उपसङ्क्रम्, अपवृत्.

LAPSED, *p. p.* (Fallen) भ्रष्टः -ष्टा -ष्टं, प्रभ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, पतितः -ता -तं.—(Passed from one proprietor to another) सङ्क्रान्तः -न्ता -न्तं, उपसङ्क्रान्तः -न्ता -न्तं, सङ्क्रामितः -ता -तं, अपवृत्तः -त्ता -त्तं, परहस्तगतः -ता -तं; 'lost by time,' वेलाहीनः -ना -नं.

LAPSIDED, *a.* *See* LOPSIDED.

LAPSUS LINGUÆ, *s.* जिह्वादोषः, मुखदोषः, वाग्दोषः; 'a lapsus of the hand or pen,' हस्तदोषः.

LAPWING, *s.* (A bird) टिट्टिभः -भकः, टिट्टिभकः, कोयष्टिः *m.* -ष्टिकः, पङ्ककीरः, शिञ्जरी *m.* (न्).

LAR, *s.* (A household deity) कुलदेवता, गृहदेवता.

LARBOARD, *s.* (Left hand side of a ship) नावो वामपार्श्वः or वामभागः.

LARCENY, *s.* स्तेयं, चौर्य्यं, चौरं, स्तैनं, स्तैन्यं, चौर्य्यकर्म्म *n.* (न्), तस्करता, तास्कर्य्यं, चौरिका, चुरा, परद्रव्यापहारः.

LARCH, *s.* देवदारुजातीयो वृक्षभेदः.

LARD, *s.* शूकरमेदस् *n.*, शूकरवसा, शूकरमांससारः, शूकरमांसस्नेहः.—(Bacon) शूकरमांसं, शूकरस्य शुष्कमांसं, वल्लूरं.

To LARD, *v. a.* शूकरमेदसा पॄ (c. 10. पूरयति -यितुं), शूकरमांसस्नेहं मध्ये निविश् (c. 10. -वेशयति -यितुं) or अन्तर् निविश्.—(Fatten) पी in caus. (पाययति -यितुं), आप्यै, पुष् in caus. (पोषयति -यितुं), पुष्टीकृ.—(Interlard, mix) विमिश्र् (c. 10. -मिश्रयति -यितुं), सम्मिश्र्, सम्मिश्रीकृ, मिश्र्.

LARDER, *s.* खाद्यमांसागारं, भक्ष्यमांसागारं, मांसरक्षणगृहं, भोज्यमांसशाला, भोजनागारं, खाद्यद्रव्यागारं.

LARES, *s.* कुलदेवताः *f. pl.*, गृहदेवताः *f. pl.*, गृह्या देवताः *f. pl.*

LARGE, *a.* (Big, bulky in size) बृहन् -हती -हत् (त्), विपुलः -ला -लं, विशालः -ला -लं, पृथुः -थुः -थ्वी -थु, पृथुलः -ला -लं, स्थूलः -ला -लं, बृहत्कायः -या -यं, महाकायः -या -यं, महान् -हती -हत् (त्), महा in comp., बृहत् in comp., उरुः -रुः -र्वी -रु, विकटः -टा -टं, पिशङ्कटः -टा -टी -टं, गुरुः -र्वी -रु, परिवृढः -ढा -ढं, वृढः -ढा -ढं, बहुः -हु -हु, भस्वरः -रा -रं, मन्दरः -रा -रं, वाष्कलः -ला -लं, भभुः -भुः -भु.—(Extensive, wide) विपुलः -ला -लं, विस्तीर्णः -र्णा -र्णं, विशालः -ला -लं, आयतः -ता -तं, उरुः -रु -र्वी.—(Abundant,

copious) प्रचुरः -रा -रं, विपुलः -ला -लं, पुष्कलः -ला -लं, बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, भूरिः -रिः -रि, प्रचेष्टः -ष्टा -ष्टं.—(Fat) पीनः -ना -नं, पीवरः -रा -रं, पीवा -वा -व (न्), पुष्टः -ष्टा -ष्टं.—(Having a large body) बृहच्छरीरः -रा -रं, पृथुशरीरः -रा -रं, स्थूलशरीरः -रा -रं, विकटशरीरः -रा -रं, बृहत्कायः -या -यं, बृहदङ्गः -ङ्गा -ङ्गं, स्थूलकायः -या -यं; 'larger,' बृहत्तरः -रा -रं, उरुतरः -रा -रं, वरीयान् -यसी -यः (स्), महत्तरः -रा -रं, अधिकः -का -कं; 'largest,' वरिष्ठः -ष्ठा -ष्ठं, बृहत्तमः -मा -मं; 'at large, without restraint,' निर्यन्त्रितं, निर्यन्त्रणं, निर्विघ्नं, निरवरोधेन, अनिवारितं, स्वेच्छया; 'at large, diffusely,' विस्तरशस्, विस्तरेण, सुविस्तरं.

Large-headed, *a.* स्थूलशिराः -राः -रः (स्), बृहच्छिराः &c., बृहच्छीर्षः -र्षा -र्षं, स्थौलशीर्षः -र्षा -र्षं, बृहन्मस्तकः -का -कं, स्थूलमस्तकः -का -कं.

Large-limbed, *a.* बृहदङ्गः -ङ्गी -ङ्गं, स्थूलाङ्गः -ङ्गी -ङ्गं, पृथ्वङ्गः -ङ्गी -ङ्गं.

Largely, *adv.* प्रचुरं, प्राचुर्येण, विपुलं, बाहुल्येन, बहु, भूरि, पुष्कलं, वैपुल्येन, विस्तरशस्, विस्तरेण.

Largeness, *s.* बृहत्त्वं, विपुलता, वैपुल्यं, विशालता, स्थूलता, स्थौल्यं, पृथुता -त्वं, पार्थवं, महत्त्वं, उरुता, विकटत्वं, वैकट्यं, प्रथिमा *m.* (न्), परिप्रथिमा.—(Extent) विस्तीर्णता, विस्तारः, विस्तृतिः *f.*, आयतिः *f.*—(Amplitude, abundance) प्राचुर्यं, प्रचुरता -त्वं, बाहुल्यं, बहुत्वं, पुष्कलता.—(Fatness) पीनता, पीवरत्वं, पुष्टता.—(Largeness of body) शरीरबृहत्त्वं, शरीरपृथुता, स्थूलशरीरत्वं.

Largess, *s.* वितरणं, विसर्जनं, विश्राणनं, प्रदानं, त्यागः, पारितोषिकं.

Largo, *s.* (Slow time in music) विलम्बितं, तत्त्वं, विलम्बितवृत्तिः *f.*

Lark, *s.* (The bird) भरद्वाजः, भारद्वाजः -जकः, भारयः, व्याघ्राटः, भरतपक्षी *m.* (न्).

Larum, *s.* (Noise giving notice of danger) आसन्नभयघोषणा, आसन्नभयसूचकघोषः.—(Alarm-bell) आसन्नभयसूचकघण्टा.

Larva, larve, *s.* कीटः, कीटडिम्भः, कृमिः *m.*, कोशस्थः.

Laryngotomy, *s.* कण्ठनालच्छेदः -दनं, कृकच्छेदनं.

Larynx, *s.* कण्ठनालः -ली, कण्ठनाडिः -डी, कृकः.

Lascar, *s.* नाविकः, पोतवाहः, निर्यामः, समुद्रयायी *m.* (न्).

Lascivious, *a.* कामुकः -का -कं, कामी -मिनी -मि (न्), रतार्थी -र्थिनी -र्थि (न्), सुरतार्थी &c., रतासक्तः -क्ता -क्तं, रतिकर्म्मासक्तः &c., कामासक्तः &c., व्यवायी -यिनी -यि (न्), कामलः -ला -लं, कामनः -ना -नं, कमनः -ना -नं, कामकेलिः -लिः -लि, भोगासक्तः -क्ता -क्तं, कामप्रवणः -णा -णं, अतलः -ला -लं, तरलः -ला -लं, अनुकः -का -कं, अभीकः -का -कं, स्त्रीव्यसनी *m.* (न्), स्त्रीलम्पटः, लम्पटः.—(Proceeding from lust) कामहेतुकः -का -कं, काममूलकः -का -कं, कामसूचकः -का -कं.

Lasciviously, *adv.* कामुकवत्, सकामं, लम्पटवत्, स्त्रीलम्पटवत्, कामासक्तवत्, रतासक्तवत्, तरलं, तरलवत्, कामपूर्व्वं, कामबुद्ध्या.

Lasciviousness, *s.* कामुकत्वं, सकामत्वं, कामासक्तिः *f.*, रतासक्तिः *f.*, रतार्थित्वं, लम्पटत्वं -ता, लाम्पट्यं, तरलता, तारल्यं, भोगासक्तिः *f.*, व्यवायः, व्यवायासक्तिः *f.*, वैयात्यं, हेला -लनं.

Lash, *s.* (Thong) कशा, कशा, प्रतिष्कषः -शः, चलितकः, चर्म्मबन्धः, चर्म्मरज्जुः *m.f.*, वरत्रा, नध्री, वध्री, वध्री, वार्ध्री -ध्री.—(Stroke with a whip) कशाघातः, कशाप्रहारः, कशाताडनं.—(Stroke of satire) वाग्दण्डः *f.*

To lash, *v. a.* (Strike with a lash) कशया or चर्म्मरज्ज्वा तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -र्त्तुं), कशय (nom. कशयति -यितुं), कशाघातं कृ.—(Beat, shake about) धू (c. 5. -धूनोति -धवितुं), धू, विचल् (c. 10. -चालयति -यितुं); 'he lashes his tail,' पुच्छं धूनोति.—(Tie or bind with a rope) रज्जुना or रज्ज्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं), रज्जुबद्धं -द्धां -द्धं कृ.—(Censure with severity) अरुन्तुदवाचा or तीक्ष्णवाक्यैः or तिग्मवाचा निन्द् (c. 1. निन्दति -न्दितुं).

To lash, *v. n.* कशाघातं कृ, कशाताडनं कृ.—(Lash out, run into excess) मर्य्यादाम् अतिक्रम् (c. 1. -क्रामति -क्रमितुं), उत्क्रम्, व्युत्क्रम्, अवधिम् अतिचर् (c. 1. -चरति -रितुं).

Lashed, *p. p.* कशाहतः -ता -तं, कशाताडितः -ता -तं; 'worthy of being lashed,' कश्यः -श्या -श्यं, कशार्हः -र्हा -र्हं.—(Made fast) रज्जुबद्धः -द्धा -द्धं.

Lass, *s.* तरुणी, कुमारी, कन्या, बाला -लिका, दारिका, पुत्री.

Lassitude, *s.* ग्लानिः *f.*, ग्लानता, अवसादः, सादः, अवसन्नता, विषादः, विषण्णता, तन्द्रा -न्द्री -न्द्रिका -न्द्रिः *f.*, खेदः, प्रमीला, अङ्गशैथिल्यं, अङ्गशिथिलता, मन्दता, मान्द्यं, क्लान्तिः *f.*, क्लामता, ग्लानिः *f.*, श्रान्तिः *f.*, परिश्रान्तिः, क्लमः.

Lasso, *s.* पाशः, पाशरज्जुः *m.f.*, पाशबन्धः, वागुरा.

Last, *a.* (Final) अन्तिमः -मा -मं, अन्त्यः -न्त्या -न्त्यं, अन्त in comp., शेष in comp., अवरः -रा -रं, चरमः -मा -मं, अवरतमः -मा -मं.—(Hindmost) पश्चिमः -मा -मं, जघन्यः -न्या -न्यं, अवरः -रा -रं, पाश्चात्यः -त्या -त्यं, पश्चातीयः -या -यं.—(Next before the present) गतः -ता -तं, अतीतः -ता -तं, भूतः -ता -तं.—(Last but one) उपान्तः -न्ता -न्तं, उपान्तिकः -की -कं, उपान्त्यः -न्त्या -न्त्यं.—(Extreme) परमः -मा -मं, अत्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, उत्तमः -मा -मं.—(Lowest) अधमः -मा -मं, अवरः -रा -रं, अधरः -रा -रं, अवमः -मा -मं, अपकृष्टः -ष्टा -ष्टं; 'come last,' अवरागतः -ता -तं, चरमागतः -ता -तं; 'born last,' अवरजः -जा -जं, जघन्यजः -जा -जं; 'last state,' शेषावस्था, शेषदशा, परिणामः; 'last past,' शेषभागः; 'last part of the night,' शेषरात्रिः *f.*; 'last half,' अवरार्द्धं, पश्चार्द्धं; 'last night,' गतरात्रिः *f.*; 'last month,' गतमासः; 'last year,' गतवत्सरः, परुत्; 'belonging to last year,' परुत्नः -त्ना -त्नं. 'year before last,' परारि; 'belonging to the year before last,' परारित्नः -त्ना -त्नं; 'at last,' शेषे, अन्ते, शेषतस्, अवशेषे, अन्ततस्, अनन्तरं, चिरकालात्परं, दीर्घकालात्परं, चरमं; 'to the last,' शेषं यावत्.

Last, *adv.* अवरं, चरमं, अन्ततस्, अन्ते, शेषतस्, पश्चात्, अवरस्तात्, अवस्तात्; 'come last,' अवरागतः -ता -तं, चरमागतः -ता -तं; 'born last,' अवरजः -जा -जं, जघन्यजः -जा -जं.

Last, *s.* (Of a shoe) काष्ठमयः पादुकासंस्कारः or पादुकाकारः.

To last, *v. n.* स्था (c. 1. तिष्ठति -ते, स्थातुं), संस्था, पर्य्यवस्था, स्थिरीभू, चिरस्थायी -यिनी -यि भू.

Lasting, *a.* स्थायी -यिनी -यि (न्), चिरस्थायी &c., दीर्घकालस्थायी &c., चिरकालस्थायी &c., चिरकालिकः -का -कं, स्थिरः -रा -रं, स्थावरः -रा -रं, संस्थः -स्था -स्थं, स्थितिमान् -मती -मत् (त्), अनपायी -यिनी -यि (न्), नित्यस्थायी &c., नित्यः -त्या -त्यं, ध्रुवः -वा -वं, शाश्वतः -ती -तं, अविसर्गी -र्गिणी -र्गि (न्), अजरः -रा -रं, अक्षयः -या -यं, चिरन्तनः -नी -नं.

Lastingness, *s.* स्थायित्वं, चिरस्थायित्वं, स्थिरता, स्थितिः *f.*, संस्थितिः *f.*, स्थावरत्वं, नित्यता, अजरत्वं, अनपायः, ध्रुवता, ध्रौव्यं.

Lastly, *adv.* अन्ततस्, अन्ते, शेषतस्, शेषे, अवशेषे -षतस्, अवरस्तात्.

Last-mentioned, *a.* उत्तरोक्तः -क्ता -क्तं, अपरोक्तः -क्ता -क्तं, अवरोक्तः -क्ता -क्तं.

Latch, *s.* तालकं, तालः, तालयन्त्रं, अर्गलः -ला -ली, कीलः, कपाटबन्धनी, द्वारबन्धनी, द्वारयन्त्रं.

To LATCH, *v. a.* तालकादिना द्वारं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

LATCHET, *s.* पादुकाबन्धनं -नी, पादुकाबन्धः, पादुकायोक्त्रं.

LATE, *a.* (After the usual time, tardy) कालातीतः -ता -तं, समयातीतः -ता -तं, अतीतकालः -ला -लं, कालातिक्रान्तः -न्ता -न्तं, अतिक्रान्तकालः -ला -लं, वेलातीतः -ता -तं, विलम्बागतः -ता -तं, विलम्बेनागतः -ता -तं, विलम्बितः -ता -तं, मन्दः -न्दा -न्दं, चिरकालीनः -ना -नं, चिरकालादागतः -ता -तं, अतिकालः -ला -लं.—(Far advanced towards the close) अवसन्नः -न्ना -न्नं, अवसितः -ता -तं, परिणतः -ता -तं; 'at a late hour of the day,' अवसन्ने दिवसे, अपराह्णे, पराह्णे; 'at a late hour of the night,' अवसन्नायां रात्रौ, अपररात्रौ, रात्रिमध्ये, शेषरात्रौ; 'at a late period of life,' परिणते वयसि.—(Ripening after the time) नियमितकालात् परं or उपयुक्तकालात् परं पक्वः -क्वा -क्वं or परिणतः -ता -तं.—(Recent) नूतनः -ना -नं, नवः -वा -वं, अभिनवः -वा -वं, अचिरः -रा -रं, आधुनिकः -की -कं, अधुनातनः -नी -नं, इदानीन्तनः -नी -नं, सद्यस्कः -स्का -स्कं, सद्यस्कालीनः -ना -नं, अर्वाचीनः -ना -नं, अप्राचीनः -ना -नं, प्रत्यग्रः -ग्रा -ग्रं, वर्त्तमानकालीनः -ना -नं, अव्यवहितदीर्घकालः -ला -लं.—(Past, gone) अतीतः -ता -तं, व्यतीतः -ता -तं, गतः -ता -तं, भूतः -ता -तं.—(Former) प्राक्तनः -नी -नं, पूर्व्वतनः -नी -नं, पौर्व्विकः -की -कं.

LATE, *adv.* (After the usual time, after delay) विलम्बेन, विलम्बात्, चिरकाले -लात्, अतिकालं, अतिसमयं, अतीतकालं, मन्दं, विलम्बितं, चिरात् -रेण; 'come late,' विलम्बागतः -ता -तं, विलम्बेनागतः &c., चिरादागतः &c., चिरकालादागतः &c.; 'ripening late,' उपयुक्तकालात् परं पक्वः -क्वा -क्वं; 'late at night,' अवसन्नायां रात्रौ, रात्रिमध्ये, मध्यरात्रं, अपररात्रं, महानिशायां; 'late in the day,' अपराह्णे, पराह्णे, अवसन्ने दिवसे; 'late in life,' परिणते वयसि.—(Not long ago, recently) नूतनं, अव्यवहितदीर्घकाले, अव्यवहितपूर्व्वकाले; 'too late in the evening,' अतिसायं; 'too late in the day,' अतिपराह्णे; 'too late in life,' अतिपरिणतवयसि, सुपरिणतवयसि.

LATEEN, *s.* लतीन्‌नामा त्रिभुजाकारो वातवसनविशेषः.

LATELY, *adv.* अव्यवहितदीर्घकाले, अव्यवहितपूर्व्वकाले, नूतनं, अर्वाक्, अर्वाक्काले, नूतनकाले, सद्यस्काले, अधुनातनकाले, इदानीन्तनकाले, अपुरा, अप्राक्काले, प्रत्यग्रं.

LATENESS, *s.* कालातीतता, अतीतकालत्वं, कालातिक्रान्तता, अतिकालता, चिरकालीनता, कालातिक्रमः, परिणतिः *f.*, परिणामः.

LATENT, *a.* गूढः -ढा -ढं, गुप्तः -प्ता -प्तं, निगूढः -ढा -ढं, छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, अदृष्टः -ष्टा -ष्टं, अदृश्यः -श्या -श्यं, गुह्यः -ह्या -ह्यं, निभृतः -ता -तं, रहस्यः -स्या -स्यं, अन्तर्हितः -ता -तं, अप्रत्यक्षः -क्षा -क्षं, अप्रकटः -टा -टं, अप्रकाशः -शा -शं; 'as a disease,' अन्तर्गतः -ता -तं, धातुस्थः -स्था -स्थं.

LATER, *a.* उत्तरः -रा -रं, परः -रा -रं, अपरः -रा -रं, पाश्चात्यः -त्या -त्यं.

LATERAL, *a.* पार्श्विकः -की -कं, पार्श्वीयः -या -यं, पार्श्वी -र्श्विनी -र्श्वि, पार्श्वतीयः -या -यं, अनुपार्श्वः -र्श्वा -र्श्वं, पार्श्वस्थः -स्था -स्थं, पार्श्वसम्बन्धी -न्धिनी -न्धि (न्).

LATERALLY, *adv.* पार्श्वतस्, पार्श्वे, अनुपार्श्वं, पार्श्वभागे, पार्श्वदिशि.

LATH, *s.* सूक्ष्मफलकः -कं, सूक्ष्मकाष्ठं, सूक्ष्मदारुः *m.*, दीर्घकाष्ठं, दीर्घफलकः -कं, तनुफलकः -कं, काष्ठफलकः.

To LATH, *v. a.* सूक्ष्मफलकैर् आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or आस्तॄ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), फलक (nom. फलकयति -यितुं).

LATHE, *s.* भ्रमः, भ्रमिः *f.*, कुन्दः, चक्रं, चक्रयन्त्रं, यन्त्रकः.

LATHER, *s.* अञ्जनफेनः, अभ्यञ्जनफेनः, मार्ज्जनतैलफेनः, मार्ज्जनलेपफेनः.

To LATHER, *v. a.* अञ्जनफेनेन लिप् (c. 6. लिम्पति, लेप्तुं), फेनलिप्तं -प्तां कृ.

To LATHER, *v. n.* फेन (nom. फेनायते -यितुं), फेनलः -ला -लं भू.

LATHY, *a.* काष्ठफलकवत् तनुः -नुः -न्वी -नु, सूक्ष्मः -क्ष्मा -क्ष्मं.

LATIFOLIOUS, *a.* पृथुपत्रः -त्रा -त्रं, पृथुपर्णः -र्णा -र्णं.

LATIN, *s.* (The language) लातिन्‌नाम्नी भाषा, लातिन्‌भाषा.

LATINISM, *s.* लातिन्‌भाषानुसारिणी वाग्वृत्तिः, लातिन्‌भाषासम्प्रदायः.

LATINITY, *s.* लातिन्‌भाषायाः शुद्धता or विशुद्धिः *f.*

LATITANCY, *s.* गुप्तता, गूढता, गुप्तभावः, प्रच्छन्नता, अप्रकाशता.

LATITANT, *a.* गुप्तः -प्ता -प्तं, गूढः -ढा -ढं, प्रच्छन्नः -न्ना -न्नं, निभृतः -ता -तं.

LATITUDE, *s.* (Terrestrial) अक्षः, फलः, विषुवद्‌वृत्तान्तरं, विषुवरेखान्तरं.—(Celestial) विक्षेपः, शरः; 'a degree of latitude,' अक्षभागः, अक्षांशः; 'opposite degrees of latitude,' अनुपातः; 'latitude of a planet,' पतनं; 'argument of latitude,' अक्षकर्णः; 'circle or parallel of latitude,' अक्षवृत्तं, अक्षांशवृत्तं, स्वदेशपरिधिः *m.*, स्वदेशमध्यपरिधिः *m.*; 'having no latitude,' निरक्षः -क्षा -क्षं.—(Breadth) पृथुता, प्रथिमा *m.* (न्), विस्तृतिः *f.*, प्रस्थः.—(Laxity) शैथिल्यं, शिथिलता -त्वं, अनिर्बन्धः, निर्बन्धहीनता, नियमातिक्रमः, नियमोपेक्षा, अधृतिः *f.*

LATITUDINAL, *a.* अनुप्रस्थः -स्था -स्थं, अन्वायतनः -ना -नं, अक्षीयः -या -यं.

LATITUDINARIAN, *a.* शिथिलः -ला -लं, निर्बन्धहीनः -ना -नं, अधृतिमान् -मती -मत् (त्), शास्त्रशैथिल्यानुयायी -यिनी -यि (न्), नियमातिक्रमी -मिणी -मि (न्), नियमोपेक्षकः -का -कं, मतशैथिल्यावलम्बी -म्बिनी -म्बि (न्), शिथिलबुद्धिः -द्धिः -द्धि.

LATITUDINARIANISM, *s.* मतशैथिल्यं, शैथिल्यं, शिथिलता -त्वं, शिथिलबुद्धित्वं, अनिर्बन्धः, निर्बन्धहीनता, नियमातिक्रमः, निर्बन्धोपेक्षा, अधृतिः *f.*

LATRANT, *a.* भषकः -का -कं, रावी -विणी -वि (न्), रुतकारी &c.

LATROCINY, *s.* स्तेयं, चौर्य्यं, चौर्य्यं. *See* LARCENY.

LATTEN, *s.* कांस्यं, रीतिः *f.*, पित्तलं.—(Sheet tin) त्रपुपत्रं.

LATTER, *a.* (Opposed to former) उत्तरः -रा -रं, अपरः -रा -रं, परः -रा -रं, अवरः -रा -रं, पश्चिमः -मा -मं, चरमः -मा -मं, जघन्यः -न्या -न्यं, पाश्चात्यः -त्या -त्यं, पश्चातीयः -या -यं, अन्तिमः -मा -मं, अन्त्यः -न्त्या -न्त्यं; 'the latter,' अपरं; 'former and latter,' पूर्व्वापरं.—(Last-mentioned) उत्तरोक्तः -क्ता -क्तं, अपरोक्तः -क्ता -क्तं.—(Modern) नूतनः -ना -नं, आधुनिकः -की -कं, अर्व्वाचीनः -ना -नं, अप्राचीनः -ना -नं; 'in the latter part of the day,' अपराह्णे, पराह्णे.

LATTERLY, *adv.* अव्यवहितपूर्व्वकाले, नूतनकाले, अर्वाक्, अर्वाक्काले, अर्वाचीनकाले, अधुनातनकाले, इदानीन्तनकाले.

LATTICE, *s.* (Window) जालं -लिका, जालकः, गवाक्षजालं, वातायनं, प्रच्छन्नं, वधूशयनं.

LATTICE-WORK, *s.* जालकर्म्म *n.* (न्), जालं, व्यस्तरेखाविशिष्टं कर्म्म.

LAUD, *s.* प्रशंसा, श्लाघा, स्तुतिः *f.*, स्तुतिवादः, वन्दना, यशोवर्णना, ईडा.

To LAUD, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), स्तु (c. 2. स्तौति, स्तोतुं), अभिष्टु, संस्तु, श्लाघ् (c. 1. श्लाघते -घितुं, c. 10. श्लाघयति -यितुं), कॄत् (c. 10. कीर्त्तयति -यितुं), वन्द् (c. 1. वन्दते -न्दितुं).

LAUDABLE, *a.* श्लाघ्यः -घ्या -घ्यं, श्लाघनीयः -या -यं, प्रशंसनीयः -या -यं, प्रशस्यः -स्या -स्यं, प्रशस्तः -स्ता -स्तं, स्तुत्यः -त्या -त्यं, स्तोतव्यः -व्या -व्यं, स्तवनीयः -या -यं, वन्द्यः -न्द्या -न्द्यं, वन्दनीयः -या -यं, कीर्त्तनीयः -या -यं, वर्णनीयः -या -यं, ईड्यः -ड्या -ड्यं, गेयः -या -यं, उपलभ्यः -भ्या -भ्यं, प्रशंसार्हः -र्हा -र्हं, श्लाघार्हः &c., स्तवार्हः &c.

LAUDABLENESS, *s.* श्लाघ्यता, श्लाघनीयता, प्रशस्यत्वं, प्रशस्तता, वन्द्यता.

LAUDABLY, *adv.* श्लाघनीयं, प्रशस्तं, यथा प्रशंसाम् अर्हति तथा.

LAUDANUM, *s.* अफेनरसः, अहिफेनरसः, खस्खसरसः.

LAUDATION, *s.* प्रशंसनं, श्लाघाकरणं, स्तुतिकरणं, कीर्त्तनं, गुणोत्कीर्त्तनं.

LAUDATORY, *a.* स्तुतिमयः -यी -यं, स्तुतिरूपः -पा -पं, श्लाघामयः -यी -यं, प्रशंसामयः -यी -यं, प्रशंसाकारः -री -रं, स्तुतिपाठकः -का -कं, श्लाघकः -का -कं, गुणप्रकाशकः -का -कं, कीर्त्तिप्रकाशकः -का -कं, वन्दारुः -रुः -रु.

LAUDED, *p.p.* प्रशंसितः -ता -तं, स्तुतः -ता -तं, अभिष्टुतः -ता -तं, श्लाघितः -ता -तं.

LAUDER, *s.* प्रशंसकः, स्तोता *m.* (तृ), स्तुतिपाठकः, वन्दी *m.* (न्), वर्णकः.

To LAUGH, *v. n.* हस् (c. 1. हसति -सितुं), प्रहस्, विहस्, सम्प्रहस्, स्मि (c. 1. स्मयते, स्मेतुं), हासं कृ, हसनं कृ, हास्यं कृ, तक् (c. 1. तकति -कितुं), कक्ख् (c. 1. कक्खति -क्खितुं), कख् or कक्ख् (c. 1. कखति -खितुं), 'to laugh violently,' अतिहस्, अत्यन्तं हस्, अतिहासं कृ, अट्टहासं कृ, महाहासं कृ, आच्छुरितं कृ; 'to laugh in one's sleeve,' अन्तर्हासं कृ, उच्चयनं कृ; 'to laugh at,' अवहस्, अपहस्, उपहस्, उत्स्मि, अभिस्मि, अवहासभूमिं कृ, अपहासास्पदं कृ. *See To* DERIDE.

LAUGH, *s.* हासः, हसनं, हसितं, हास्यं, हसः, विहसितं, प्रहसितं, परिहासः, प्रहासः, उपहसितं, स्मितं, हः, हा, हं; 'a horse-laugh,' अट्टहासः, अट्टहसितं, आच्छुरितं -तकं, अवच्छुरितं, सोत्प्रासः; 'an inward laugh,' अन्तर्हासः, उच्चयनं.

LAUGHABLE, *a.* हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, अवहास्यः -स्या -स्यं, परिहास्यः &c., हासकरः -री -रं, हास्यजनकः -का -कं, हस्योत्पादकः -का -कं, तक्यः -क्या -क्यं.

LAUGHABLENESS, *s.* हास्यता -त्वं, उपहास्यता, हासजनकत्वं.

LAUGHABLY, *adv.* उपहास्यप्रकारेण, यथा हासो जायते तथाप्रकारेण.

LAUGHER, *s.* हासकः, हासी *m.* (न्), उपहासकः, परिहासकः, हासकर्त्ता *m.* (र्तृ), हसनकृत्, प्रहसनकृत्.

LAUGHING, *a.* हास्यमुखः -खी -खं, हास्यवदनः -ना -नं, सुहसाननः -ना -नं, स्मेरमुखः -खी -खं, हास्यप्रियः -या -यं.

LAUGHINGLY, *adv.* सहासं, सहास्यं, सहसितं, सस्मितं, परिहासेन, विहस्य.

LAUGHING-STOCK, *s.* हास्यास्पदं, उपहासस्थानं, उपहासास्पदं, अपहासास्पदं, हास्यभूमिः *f.*, अवहासभूमिः *f.*, उपहासभूमिः, उपहासविषयः, अवहासविषयः.

LAUGHTER, *s.* हासः, हसनं, हसितं, हास्यं, प्रहसितं, विहसितं, उपहसितं, प्रहासः, परिहासः, हसः; 'loud or violent laughter,' प्रहासः, प्रहसनं, अतिहासः, अतिहसितं, महाहासः, अट्टहासः, आच्छुरितकं. *See* LAUGH.

To LAUNCH, *v. a.* (A ship) नावं मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं) or स्थलाद् मुक्त्वा जलं प्रविश् (c. 10. -वेशयति -यितुं), स्थलस्थनावं चल् (c. 10. चालयति -यितुं) or प्रचल् or वह् (c. 10. वाहयति -यितुं) or भास् (c. 10. भासयति -यितुं).

To LAUNCH, *v. n.* जलं प्रविश् (c. 6. -विशति -वेष्टुं), मुच् in pass. (मुच्यते).

LAUNCH, *s.* नौमुक्तिः *f.*, नौमोचनं, स्थलस्थनौकामुक्तिः *f.*, जलप्रवेशनं.

LAUNCHED, *p.p.* स्थलमुक्तः -क्ता -क्तं, जलप्रवेशितः -ता -तं, जलप्रविष्टः -ष्टा -ष्टं.

LAUNDER, LAUNDRESS, *s.* वस्त्ररजकी, वस्त्रधावकी, वस्त्रनिर्णेजकी.

LAUNDERER, *s.* रजकः, वस्त्ररजकः, वस्त्रधावकः, वस्त्रनिर्णेजकः.

LAUNDRY, *s.* वस्त्रधावनशाला, निर्णेजकगृहं, वस्त्रमार्जनशाला.

LAUREATE, *a.* वस्त्रमाल्यवृक्षपत्रशोभितः -ता -तं, लारेलाख्यवृक्षपत्रभूषितः -ता -तं, मानसूचकमालाभूषितः -ता -तं.

LAUREL, *s.* लारेलाख्यो वृक्षभेदः, श्यामवृक्षविशेषः.

LAURELLED, *s.* पूर्व्वोक्तवृक्षपत्रभूषितः -ता -तं, मालाभूषितः -ता -तं.

LAVA, *s.* ज्वालामुखीनिर्गतद्रवः, आग्नेयपर्व्वतनिर्गतद्रवः.

LAVATION, *s.* धावनं, प्रक्षालनं, स्नानं, मार्जनं, निर्णेकः, मलापकर्षणं.

LAVATORY, *s.* धावनस्थानं, धावनशाला, प्रक्षालनस्थानं, मार्जनशाला.

To LAVE, *v. a.* धाव् (c. 1. धावति -वितुं, c. 10. धावयति -यितुं), प्रधाव्, क्षल् (c. 10. क्षालयति -यितुं), प्रक्षल्, स्ना in caus. (स्नापयति, स्नपयति -यितुं).

To LAVE, *v. n.* स्ना (c. 2. स्नाति -तुं), जले निमज्ज् (c. 6. -मज्जति -मज्जितुं).

LAVEMENT, *s.* (Clyster) वस्तिः *m.f.*, नेत्रं. *See* CLYSTER.

LAVENDER, *s.* लावेन्द्राख्यः सुगन्धीयौषधिभेदः or सुगन्धितृणभेदः.

LAVER, *s.* प्रक्षालनपात्रं, धावनपात्रं, जलाधारः, द्रोणी.

LAVISH, *a.* (Prodigal) अतिव्ययी -यिनी -यि (न्), अपव्ययी &c., व्ययशीलः -ला -लं, अपरिमितव्ययः -या -यं, मुक्तहस्तः -स्ता -स्तं, अपचेता -त्री -तृ (तृ), उत्सर्गी -र्गिणी -र्गि (न्), अत्युत्सर्गी &c., अतिदाता -त्री -तृ (तृ), अतित्यागी -गिनी -गि (न्), बहुप्रदः -दा -दं.—(Copious, unrestrained) अपरिमितः -ता -तं, अतिरिक्तः -क्ता -क्तं, अति prefixed; 'lavish expenditure,' अतिव्ययः, अपरिमितव्ययः.

To LAVISH, *v. a.* अपरिमितं or अपरिमाणेन व्यय् (c. 1. व्ययति, c. 10. व्यययति -यितुं, rt. इ) or व्ययीकृ, अपरिमितव्ययं कृ, अतिव्ययं कृ, मुक्तहस्तेन दा (c. 3. ददाति, दातुं) or विसृज् (c. 6. -सृजति -स्रष्टुं) or उत्सृज् or त्यज् (c. 1. त्यजति, त्यक्तुं) or अपचि (c. 5. -चिनोति -चेतुं) or वितृ (c. 1. -तरति -रितुं -रीतुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

LAVISHED, *p.p.* व्ययितः -ता -तं, विसर्जितः -ता -तं, अपचितः -ता -तं, मुक्तहस्तेन दत्तः -त्ता -त्तं or प्रदत्तः -त्ता -त्तं, अतिबाहुल्येन विश्राणितः -ता -तं or वितीर्णः -र्णा -र्णं.

LAVISHER, *s.* अतिव्ययी *m.* (न्), अपरिमितव्ययी *m.*, अत्युत्सर्गी *m.* (न्), अतिदाता *m.* (तृ).

LAVISHLY, *adv.* अतिव्ययेन, अपरिमितव्ययेन, महाव्ययेन, अपरिमितं, अपरिमाणेन, मुक्तहस्तेन, अत्युत्सर्गेण, अकार्पण्येन, अबाहुल्येन.

LAVISHMENT, LAVISHNESS, *s.* अतिव्ययः, अपरिमितव्ययः, अपव्ययः, महान् व्ययः, अत्युत्सर्गः, अतिसर्जनं, अतित्यागः, अतिमोक्षणं, अतिदानं, मुक्तहस्तत्वं, बहुप्रदत्वं, अकार्पण्यं.

LAW, *s.* (Ordinance, decree, statute of a state) व्यवस्था, शासनं, विधिः *m.*, विधानं, नियमः, अनुशासनं, सूत्रं, निदर्शनं, नियोगः, राजाज्ञा, आदेशः, निदेशः, व्यवस्थापत्रं, शासनपत्रं, चोदना, उक्तवाक्यं.—(The rules by which judicature is regulated, jurisprudence) धर्म्मः, स्मृतिः *f.*, व्यवहारः, आचारः, व्यवहारविधिः *m.*, व्यवहारशास्त्रं, धर्म्मशास्त्रं, धर्म्मविधिः *m.*; 'a code of laws,' धर्म्मसंहिता, धर्म्मशास्त्रं, व्यवहारविधिः *m.*; 'a work on law,' स्मृतिशास्त्रं; 'criminal law,' दण्डविधिः *m.*, दण्डनीतिः *f.*; 'administration of the law,' धर्म्मप्रणयनं, धर्म्माधिकरणं; 'court of law,' धर्म्मसभा, 'matter cognizable by law,' व्यवहारविषयः, व्यवहारपदं; 'to go to law,' विवादं गम् (c. 1. गच्छति, गन्तुं), विवद् (c. 1. -वदते -दितुं), व्यवहृ (c. 1. -हरति -हर्त्तुं); 'knowledge of law,' धर्म्मज्ञानं; 'learned in the law,' धर्म्मज्ञः, स्मृतिशास्त्रज्ञः, व्यवहारपण्डितः; 'breaking a law,' व्यवस्थातिक्रमः, व्यवस्थालङ्घनं, व्यवस्थातिवर्त्तनं.—(Legal process) व्यवहारः, व्यवहारमार्गः.—(Rule of action) नियमः, विधिः *m.*, विधानं, मर्य्यादा, स्थितिः *f.*, कार्य्याकार्य्यनियमः, कर्त्तव्याकर्त्तव्यनियमः, विधिनिषेधनियमः.—(Principle, rule of science, &c.) नियमः, सूत्रं, विधिः *m.*, स्थितिः *f.*, तत्त्वं, उक्तवाक्यं, न्यायः, उत्सर्गः.—(Conformity to law, right) धर्म्मः, धर्म्मानुसारः, न्यायः, नीतिः *f.*—(The law of works, considered as a yoke of bondage) कर्म्ममार्गः, प्रवृत्तिमार्गः, कर्म्मबन्धः -न्धनं.

LAW-BREAKER, *s.* व्यवस्थातिक्रमी *m.* (न्), व्यवस्थातिवर्त्ती *m.* (न्), व्यवस्थालङ्घी *m.* (न्), व्यवस्थाभेदी *m.*, व्यवस्थालोपी *m.*

LAWFUL, *a.* (Conformable to law) धर्म्यः -र्म्या -र्म्यं, धर्म्मानुसारी -रिणी -रि (न्), धर्म्मानुयायी -यिनी -यि (न्), धर्म्मशास्त्रसम्मतः -ता -तं, स्मृतिशास्त्रसम्मतः &c., धर्म्मशास्त्रानुगतः &c., धर्म्मशास्त्रानुरूपः -पा -पं, व्यवस्थानुसारी &c., राज्यनियमसम्मतः &c., व्यवहारानुसारी &c., व्यावहारिकः -की -कं, स्मृतिशास्त्रानुसारी &c., स्मार्त्तः -र्त्ती -र्त्तं, शास्त्रीयः -या -यं, आचारिकः -की -कं, आचारी -रिणी -रि (न्), न्यायानुसारी &c., राज्यव्यवस्थानुयायी &c., सौत्रः -त्री -त्रं.—(Constituted by law) धर्म्मशास्त्रप्रोक्तः -क्ता -क्तं, स्मृतिशास्त्रप्रोक्तः &c., व्यवहारविधिप्रोक्तः &c., स्मृत्युक्तः &c., स्मृतिशास्त्रविहितः -ता -तं, शास्त्रोक्तः &c.—(Not forbidden) अनिषिद्धः -द्धा -द्धं, शास्त्रानिषिद्धः -द्धा -द्धं, धर्म्माविरोधी -धिनी -धि (न्).—(Rightful) न्यायी -यिनी -यि (न्), न्याय्यः -य्या -य्यं, यथान्यायः -या -यं; 'lawful wife,' धर्म्मपत्नी; 'by lawful means,' धर्म्मोपायेन; 'lawful and unlawful food,' भक्ष्याभक्ष्यं.

LAWFULLY, *adv.* धर्म्मेण, धर्म्मतस्, धर्म्मानुसारेण -रात्, धर्म्मशास्त्रानुसारेण, स्मृतिशास्त्रानुसारेण, व्यवहारविध्यनुसारेण, व्यवस्थानुरूपेण, राज्यनियमानुरूपेण, न्यायतस्, न्यायानुसारेण, यथान्यायं, न्याय्यं.

LAWFULNESS, *s.* धर्म्यत्वं, धर्म्मानुसारित्वं, धर्म्मानुसारः, धर्म्मशास्त्रानुसारिता, स्मृतिशास्त्रानुयायिता, धर्म्मशास्त्रानुकूल्यं, न्यायानुसारः -रिता, न्याय्यत्वं.

LAWGIVER, *s.* स्मृतिकारः, व्यवस्थाकारः -रकः, विधिस्थापकः, विधिकर्त्ता *m.* (र्त्तृ), व्यवस्थाकर्त्ता *m.*, विधिप्रवर्त्तकः, व्यवस्थापकः, शासिता *m.* (तृ), विचारयिता *m.* (तृ), प्रयोजकः, शास्त्रकर्त्ता *m.*, धर्म्मशास्त्ररचकः, विधिदाता *m.* (तृ), विधिदायकः, विधायी *m.* (न्), विधायकः.

LAWLESS, *a.* (Not subject to law, said of persons) दुराचारः -रा -रं, अनाचारी -रिणी -रि (न्), आचारभ्रष्टः -ष्टा -ष्टं, निराचारः -रा -रं, आचारहीनः -ना -नं, आचारवर्जितः -ता -तं, निर्म्मर्य्यादः -दा -दं, अमर्य्यादः -दा -दं, मर्य्यादातिवर्त्ती -र्त्तिनी -र्त्ति (न्), मर्य्यादातिचारी &c., मर्य्यादातिक्रमी &c., अतिक्रान्तमर्य्यादः -दा -दं, त्यक्तमर्य्यादः -दा -दं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), धर्म्मभ्रष्टः -ष्टा -ष्टं, कामाचारी &c., यथेष्टाचारी &c., स्वेच्छाचारी &c., कामवृत्तः -त्ता -त्तं, स्वैरगतिः -तिः -ति, अशिष्टः -ष्टा -ष्टं, अवशः -शा -शं, अनियतः -ता -तं, उच्छृङ्खलः -ला -लं, शास्त्रातिवर्त्ती &c., व्यवस्थातिवर्त्ती &c., व्यवस्थातिक्रमी &c.—(Contrary to law) धर्म्मविरुद्धः -द्धा -द्धं, स्मृतिविरुद्धः &c., व्यवहारविरुद्धः &c., व्यवस्थाविरुद्धः &c., धर्म्मरोधी -धिनी -धि (न्), अधर्म्यः -र्म्या -र्म्यं, अस्मार्त्तः -र्त्ती -र्त्तं, अव्यवस्थितः -ता -तं. *See* ILLEGAL.

LAWLESSLY, *adv.* धर्म्मविरोधेन, स्मृतिविरोधेन, व्यवहारविरुद्धं, आचारविरोधेन, दुराचारवत्, धर्म्मभ्रष्टवत्, अशिष्टवत्, अवशं, उच्छृङ्खलं.

LAWLESSNESS, *s.* दुराचारत्वं, आचारभ्रष्टता, मर्य्यादातिवर्त्तनं, मर्य्यादातिक्रमः, अमर्य्यादा, अनाचारः, व्यभिचारः, व्यतिक्रमः, कामाचारित्वं, कामवृत्तता, नियमातिक्रमः, व्यवस्थातिक्रमः, नियमातिवर्त्तनं, व्यवस्थातिवर्त्तनं, उच्छृङ्खलत्वं.

LAWN, *s.* (Space of ground covered with grass) तृणावृतो भूमिभागः, शाद्वलस्थलं, शाड्वलस्थलं, हरितस्थलं, तृणावृतस्थलं.—(Fine linen) अंशुकं, दुकूलं.

LAW-SUIT, *s.* अर्थः, विवादः, व्यवहारः, कार्य्यं, अक्षः, वादः, व्यवहारार्थः.

LAWYER, *s.* धर्म्मज्ञः, धर्म्मशास्त्रज्ञः, धर्म्मशास्त्रवेत्ता *m.* (त्तृ), स्मृतिशास्त्रज्ञः, व्यवहारपण्डितः, व्यवस्थापकः, व्यवस्थानिरूपकः, आचारज्ञः, व्यवहारसचिवः.

LAX, *a.* (Loose) शिथिलः -ला -लं, श्लथः -था -थं, प्रश्लथः -था -थं, विगलितः -ता -तं, स्रस्तः -स्ता -स्तं, अबद्धः -द्धा -द्धं.—(In morals) अनवस्थः -स्था -स्थं, दुराचारः -रा -रं, अनाचारी -रिणी -रि (न्), धर्म्मभ्रष्टः -ष्टा -ष्टं, कर्म्मभ्रष्टः &c., व्यभिचारी &c.—(In the bowels) मृदुकोष्ठः -ष्ठा -ष्ठं, अबद्धकोष्ठः -ष्ठा -ष्ठं.—(In discipline) अतीक्ष्णदण्डः -ण्डा -ण्डं, शिथिलदण्डः -ण्डा -ण्डं.

LAX, *s.* (Diarrhœa) सारणः, अतिसारः, प्रवाहिका, विरेकः.

LAXATIVE, *a.* मलावष्टम्भघ्नः -घ्नी -घ्नं, मलावरोधनाशकः -का -कं, सारकः -का -कं, कोष्ठविस्रंसनः -ना -नं, रेचकः -की -कं, विरेचकः -की -कं.

LAXATIVE, *s.* विस्रंसनं, रेचकः, मलसारकम् औषधीयद्रव्यं.

LAXITY, LAXNESS, *s.* (Looseness) शैथिल्यं, शिथिलता -त्वं, श्लथत्वं, प्रश्लथः, विस्रंसः, विस्रस्तता, अधृतिः *f.*, अबद्धता.—(In morals) अनवस्थितिः *f.*, अनवस्थता, व्यभिचारः, अनाचारः, आचारभ्रष्टता, मर्य्यादातिक्रमः, व्यतिक्रमः, इन्द्रियासंयमः.—(In discipline) दण्डातीक्ष्ण्यं, दण्डशैथिल्यं.—(Of the bowels) अतिसारः, सारणः, कोष्ठमृदुता.

To **LAY**, *v. a.* (Place, set) धा (c. 3. दधाति, धातुं), निधा, आधा, न्यस् (c. 4. -अस्यति -असितुं), स्था in caus. (स्थापयति -यितुं), निविश् (c. 10. -वेशयति -यितुं), आरुह् in caus. (-रोपयति -यितुं), ऋ in caus. (अर्पयति -यितुं), दा (c. 3. ददाति, दातुं), धृ (c. 1. धरति, धर्त्तुं), कृ; 'he lays the cup on the ground,' पात्रं भूमौ निदधाति or न्यस्यति; 'he lays the goat on his shoulders,' छागं स्कन्धे or स्कन्धेन करोति; 'lay your hand on my shoulder,' मत्स्कन्धे हस्तं देहि.—(Place in order) विन्यस्, विधा, संविधा, प्रतिविधा, विरच् (c. 10. -रचयति -यितुं), क्रमेण स्था.—(Beat down) पत् (c. 10. पातयति -यितुं), निपत्.—(Spread) आस्तॄ (c. 9. -स्तृणाति. c. 5. -स्तृणोति -स्तरितुं -रीतुं), विस्तृ; 'to lay snares,' जालं विस्तृ; 'he lays sacred grass over the ground,' भूमिं कुशैर् आस्तृणाति.—(Spread on a surface) लिप् (c. 6. -लिम्पति, लेप्तुं) with acc. and instr. c.—(Still, quiet, calm) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्.—(Lay a wager) पण् (c. 1. पणते -णितुं), विपण्, निक्षिप् (c. 6. -क्षिपति क्षेप्तुं), पणं कृ, प्रतिज्ञां कृ.—(Lay eggs) अण्डानि सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु.—(Lay the blame) कस्मिंश्चिद् दोषम् आरुह् or क्षिप्, दोषारोपणं कृ, दोषप्रसङ्गं कृ.—(Apply) आधा, न्यस्, संयुज् (c. 10. -योजयति -यितुं), ऋ in caus.—(Impose) न्यस्, निविश्, नियुज्, आरुह् in caus.—(Lay a command) आदेशं कृ, आज्ञां कृ, नियुज्.—(Lay an ambush) पराक्रमणार्थं सैन्यं निभृते स्था in caus.—(Lay a plot, scheme) कपटप्रबन्धं कृ, सङ्कल्पं कृ, उपायं प्रचिन्त् (c. 10. -चिन्तयति -यितुं) or घट् (c. 1. घटते -टितुं) or विधा or प्रयुज्.—(Lay siege) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), रुध् (c. 7. रुणद्धि, रोद्धुं), अवरुध्, उपरुध्.—(Lay waste) उपद्रु (c. 1. -द्रवति -द्रोतुं), उपप्लु (c. 1. -प्लवते -प्लोतुं), बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, निर्दह् (c. 1. -दहति -दग्धुं), दह्, निर्जनीकृ.—(Lay aside) न्यस्, सन्न्यस्, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, सन्त्यज्, हा (c. 3. जहाति, हातुं), अपहा, उत्सृज् (c. 6. -सृजति -स्रष्टुं), उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, अपहृ (c. 1. -हरति -हर्त्तुं), अवमुच् (c. 6. -मुञ्चति -मोक्तुं); 'one who has laid aside his anger,' त्यक्तकोपः -पा -पं.—(Lay before) प्रस्तृ (c. 10. -स्तारयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), उपन्यस्, ऋ in caus.—(Lay by) सन्न्यस्, परिरक्ष् (c. 1. -रक्षति -क्षितुं), रक्ष्, निधा, निधिं कृ; 'he lays by the food left by the crows,' काकेभ्यः शिष्टं मांसं रक्षति.—(Lay down, deposit) न्यस्, उपन्यस्, प्रतिन्यस्, निक्षिप्, निधा, अवधा, न्यासीकृ.—(Lay down, give up) त्यज्, परित्यज्, विमुच्, विहा.—(Lay down, put down, cause to lie down) निधा, शी (c. 10. शाययति -यितुं), उपविश्, निविश्.—(Lay one's self down) शी (c. 2. शेते, शयितुं), संविश् (c. 6. -विशति -वेष्टुं), शयनं कृ.—(Lay hold of) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), परिग्रह्,

सङ्ग्रह्, हस्तेन सद्, धृ (c. 1. धरति, धर्तुं), हस्तेन धृ.—(Lay in) सञ्चयं, सञ्चयं कृ, सञ्चयं कृ, पर्य्याहारं कृ, सचि (c. 5. -चिनोति -चेतुं); 'lay in a store of grain,' धान्यसङ्ग्रहं कृ.—(Lay on) घट् (c. 10. घातयति -यितुं), प्रयुज्, नियुज्, क्षिप् in caus.; 'lay on blows,' दण्डं धा.—(Lay open) विवृ (c. 5. -वृणोति -वुते -वरितुं -रीतुं), अपवृ, प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, व्यक्तीकृ.—(Lay out money, expend) व्यय् (c. 10. व्ययति -यितुं, rt. इ), व्ययीकृ, विनियुज् (c. 7. -युंक्ते -योक्तुं), उपयुज्.—(Lay out, display) प्रसृ (c. 10. -सारयति -यितुं), प्रकाश्, प्रकटीकृ.—(Lay out, dispose in order) विन्यस्, विरच्, सुपर्य्याप्तं -प्तां कृ, परिकॢप् (c. 10. -कल्पयति -यितुं), क्रमेण स्था.—(Lay one's self out) आत्मानं चेष्ट् (c. 1. चेष्टते -ष्टितुं), यत् (c. 1. यतते -तितुं), यत्नं कृ.—(Lay out, spread out) आस्तॄ, विस्तॄ.—(Lay to a ship) नौगतिरोधं कृ.—(Lay up) निधा (c. 3. or c. 10. -धापयति -यितुं). *See* Lay by, lay in. 'A king should lay up treasure,' राज्ञा निधिर् निधातव्यः.—(To be laid up) रोगोपहतत्वात् शयनाद् उत्थातुं or शयनगृहाद् निर्गन्तुम् अक्षमः -मा -मं भू.—(Lay the dust) मार्गरेणुं सिच् (c. 6. सिञ्चति, सेक्तुं) or संसिच्.—(Lay down life) प्राणान् त्यज् or मुच् or न्यस्.

To lay, *v. n.* (Produce eggs) अण्डानि सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं) or उत्पद् (c. 10. -पादयति -यितुं).

Lay, *s.* (Stratum, layer) स्तरः, आस्तरणं, आस्तरः, फलकः -कं, पुटः. —(Song) गीतं, गानं, कविता, काव्यं.

Lay, *a.* (Not clerical) गृहस्थवर्गसम्बन्धी -न्धिनी -न्धि (न्), गृहस्थी -स्थिनी -स्थि (न्), गार्हस्थिकः -की -कं, पुरोहितवर्गभिन्नः -न्ना -न्नं, पौरोहित्यभिन्नः -न्ना -न्नं, धर्म्मपदस्थभिन्नः -न्ना -न्नं, धर्म्मपदस्थातिरिक्तः -क्ता -क्तं, सामान्यलोकसम्बन्धी &c., साधारणलोकसम्बन्धी &c., धर्म्माधिकार-दीक्षाहीनः -ना -नं, अजातधर्म्माधिकारदीक्षः -क्षा -क्षं.

Layer, *s.* (Stratum) आस्तरणं, आस्तरः, स्तरः, फलकः -कं, पार्थिवं-शपुटः; 'layer of rock,' शिलाफलकं.—(Young twig, shoot) पल्लवः, किसलयः, प्ररोहः.

Lay-figure, *s.* चित्रकर्म्मणि प्रयुक्ता काष्ठनिर्म्मिता पुरुषाकारा मूर्त्तिः.

Lay-man, *s.* गृहस्थः, सामान्यलोकः, सामान्यजनः, साधारणलोकः, साधारणपदस्थः, सामान्यपदस्थः, दीक्षाहीनः, अदीक्षितः, अजातदीक्षः.

Lay-stall, *s.* पुरीषराशिः *m.*, शकृद्राशिः *m.*, अमेध्यराशिः, अवस्करचयः.

Lazar, *s.* कुष्ठी *m.* (न्), श्वित्री *m.* (न्), दुश्चर्म्मा *m.* (न्), त्वग्रोगी *m.* (न्), त्वग्रोगोपहतः, त्वग्व्याधिग्रस्तः, चर्म्मरोगोपहतः, चर्म्मरोगदूषितः.

Lazar-house, lazaretto, *s.* कुष्ठिशाला, त्वग्रोगदूषितशाला, त्वग्रोगि-शाला, चर्म्मरोगिशाला, रोगप्रतीकारशाला, रोगसम्पर्कदूषितानां or रोगसंसर्गदूषितानां रक्षणशाला.

Lazar-like, lazarly, *a.* त्वग्व्याधी -धिनी -धि (न्). *See* Lazar.

Lazaroni, *s.* अलसजनः, अलसलोकः, दरिद्रजनः, निर्व्यापारजनः.

Lazily, *adv.* अलसवत्, आलस्येन, सालस्यं, अलसं, मन्दं, मन्दं मन्दं, मन्दगत्या, सनामं, अनुद्योगेन, जडवत्, सजाड्यं, शाम्येन.

Laziness, *s.* आलस्यं, अलसता -त्वं, मन्दता, मान्द्यं, अलसशीलता, आलस्यशीलता, अनुद्योगः -गिता, अनुद्योगशीलता, उद्योगद्वेषः, कार्य्यद्वेषः, उत्साहद्वेषः, उत्साहविमुखता, उद्योगवैमुख्यं, कर्म्मपराङ्मुखता, अव्यवसायः, कुण्ठता, अनुत्थता, जडता, जाड्यं, तन्द्रिका, तन्द्रालुता, क्लीबता, क्लैब्यं.

Lazuli, *s.* वैदूर्य्यं, विदूरजं. *See* Lapis lazuli.

Lazy, *a.* अलसः -सा -सं, आलस्यः -स्या -स्यं, आलस्यशीलः -ला -लं, मन्दः -न्दा -न्दं, सालसः -सा -सं, मन्थरः -रा -रं, अनुद्योगशीलः -ला -लं, उद्योगद्वेषी -षिणी -षि (न्), उद्योगविमुखः -खा -खं, उद्योगपराङ्मुखः -खा -खं, उत्साहविमुखः &c., अकर्म्मशीलः -ला -लं, निरुद्योगः -गा -गं, अनुद्योगी -गिनी -गि (न्), अनुद्योगः &c., निरुत्साहः -हा -हं, -ही -हिनी -हि (न्), व्यवसायविमुखः &c., अव्यवसायी &c., अव्यवसायशीलः &c., अनायासः -सी -सं, कुण्ठः -ण्ठा -ण्ठं, जडः -डा -डं, क्लीबः -बा -बं, अनुत्थः -त्था -त्थं, क्लीबः -बा -बं, तन्द्रालुः -लुः -लु, मन्दगतिः -तिः -ति; 'lazy fellow,' कुन्दपरिसृकः, कुन्दपरिसारी, क्लीबकः.

Lea, ley, *s.* यावसभूमिः *f.*, यवसीयभूमिः *f.*, यवसावृतो भूमिभागः.

Lead, *s.* (The metal) सीसं, सीसकं, सीसपत्रकं, नागं, वप्रं, योगेष्टं, वपुः *n.*, त्रपुस् *n.*, वङ्गं, कुवङ्गं, पिच्चटं, शिरावृत्तं, तमरं, जडं, चीनं, बहुमलं, यामुनेष्टकं, परिपिष्टकं, सिन्दूरकारणं, तारशुद्धिकरं; 'red-lead,' सिन्दूरं -रिका, नागसम्भवं, नागजं, नागरक्तं, नागगर्भः, शोणं, सौभाग्यं, रक्तचूर्णं, रक्तबालुकं, रक्तरेणुः *m.*, शृङ्गारं, शृङ्गारभूषणं; 'marked with red-lead,' सिन्दूरतिलकः -का -कं.—(Plummet) लम्बः -म्बकः, लम्बसीसकं.

To lead, *v. a.* (Conduct, guide) नी (c. 1. नयति, नेतुं), आनी, समानी, उपानी, गम् (c. 10. गमयति -यितुं), प्राप् (c. 10. -आपयति -यितुं) with two acc. c.—(Show the way) मार्गं or पथं दृश् (c. 10. दर्शयति -यितुं) or आदिश् (c. 10. -देशयति -यितुं) or निर्दिश्.—(Lead by the hand) हस्तेन नी.—(Direct) निर्दिश्, उपदिश्, उद्दिश्, आदिश्.—(Draw, entice, allure) आकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं), समाकृष्, कृष्, प्रलुभ् (c. 10. -लोभयति -यितुं), परिलुभ्.—(Induce, influence) अनुनी, आनी, प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रेर् (c. 10. -ईरयति -यितुं), प्रोत्सह् (c. 10. -साहयति -यितुं), नियुज् (c. 10. -योजयति -यितुं), प्रयुज्.—(Pass time) कालं नी or वृत् (c. 10. वर्त्तयति -यितुं) or प्रवृत् or या in caus. (यापयति -यितुं) or गम् in caus.—(Lead forth, lead up) उन्नी, उत्कृष्, प्रकृष्, उन्नम् in caus. —(Lead back) प्रत्यानी, निवृत् in caus.

To lead, *v. n.* (Go before) अग्रे or अग्रतः सृ (c. 1. सरति, सर्तुं) गम् (c. 1. गच्छति, गन्तुं), पुरः or पुरतो गम् or चर् (c. 1. चरति -रितुं), अग्रे स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), मुख्यः -ख्या -ख्यं भू, मुख्यतो वृत् or स्था.—(Lead to, bring about) आवह् (c. 1. -वहति -वोढुं), उत्पद् (c. 10. -पादयति -यितुं).

Lead, *s.* (Precedence, guidance) पुरोगतिः *f.*, अग्रगतिः *f.*, अग्रगमनं, पुरोगमनं, अग्रसरणं, अग्रयाणं, प्राग्गमनं, पुरतःसरणं, पुरतोगमनं, नेतृत्वं, नायकत्वं, नयः -यनं, मुख्यत्वं -ता, प्रष्ठत्वं; to take the lead.' *See* *To* lead, *v. n.*

Leaded, *p. p.* or *a.* सीसकयुक्तः -क्ता -क्तं, सीसकावृतः -ता -तं, सीसकबद्धः -द्धा -द्धं.

Leaden, *a.* सैसकः -की -कं, सीसमयः -यी -यं, सीसनिर्म्मितः -ता -तं.

Leader, *s.* (Guide, conductor) नेता *m.* (तृ), नायकः, नेयः, विनेता *m.*, पथदर्शकः, मार्गदर्शकः, मार्गनिर्देष्टा *m.* (ष्टृ), पथनिर्देशकः, मार्गदेष्टा *m.*, मार्गोपदेशी *m.* (न्), उपदेष्टा *m.*, प्रचारकः.—(Chief) मुख्यः, मुख्यकः, प्रमुखः, अधिपः, अधिष्ठाता *m.* (तृ), ईश्वरः, पतिः *m.*—(One who goes first) पुरोगः -गमः, पुरोगामी *m.* (न्), पुरोगतिः *m.*, अग्रगः, अग्रसरः, अग्रेसरः -रिकः, अग्रतःसरः, पुरःसरः, पुरस्सरः, अग्रगामी, प्रष्ठः, शिरोवर्त्ती *m.* (न्), शिरस्थः.—(Of an army) सेनापतिः, सेनानीः *m.*, सेनापतिः *m.*, सेनाधिपः, सेनाध्यक्षः, दण्डनायकः, योधमुख्यः, वाहिनीपतिः *m.*, चमूपतिः *m.*; 'an able leader in war,' सांयुगीनः. —(Of a religious order or sect) आचार्य्यः, गुरुः *m.*

LEADERSHIP, *s.* नेतृत्वं, नायकत्वं, मुख्यता -त्वं, अधिष्ठातृत्वं, प्रमुखता.

LEADING, *part.* or *a.* (Preceding) अग्रगः -गा -गं, अग्रगामी -मिनी -मि (न्), पुरोगामी &c., प्राग्गामी &c., अग्रसरः -रा -रं, अग्रेसरः -रा -रं, पुरःसरः -रा -रं, पुरोगः -गा -गं, पुरोगमः -मा -मं.—(Chief) मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, अग्रियः -या -यं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः -ग्र्या -ग्र्यं, प्रधान in comp., परमः -मा -मं, परः -रा -रं, उत्तमः -मा -मं.—(Leading to, conducive to) आवहः -हा -हं, सम्पादकः -का -कं; 'leading to happiness,' सुखावहः -हा -हं, सुखोदर्कः -र्का -र्कं; 'road leading to the city,' नगरगामी मार्गः; 'leading note,' वादी *m.* (न्).

LEADING, *s.* (Guidance) नयः -यनं, नायः, नीतिः *f.*, नेतृत्वं, प्रणयनं.

LEADING-STRINGS, *s.* बालकालम्बनसूत्रं -त्राणि *n. pl.*, बालकालम्बः -म्बनं.

LEAD-WORT, *s.* (A plant) पाठी *m.* (न्), चित्रकः, वह्निः *m.*, अग्निः *m.*, अनलः, पावकः, दहनः, कृशानुः *m.*

LEADY, *a.* सीसकवर्णः -र्णा -र्णं, नागपुष्पः -ष्पी -ष्पं, सैसकः -की -कं.

LEAF, *s.* (Of a tree, &c.) पत्रं -त्रकं, पर्णं, दलं -लः, पलाशं, छदः -दनं, अंशुकं, रागं, वातायं.—(Of a book, &c.) पत्रं -त्रकं, पत्रिका, फलकः, पुस्तकपत्रं.—(Of a door, table, &c.) कपाटः -टी -टं; 'the junction of two leaves,' कपाटसन्धिः *m.*—(Gold-leaf) सुवर्णपत्रं, अष्टापदपत्रं; 'fallen leaf of a tree,' प्रपर्णं; 'withered leaf,' शीर्णपर्णं; 'vein of a leaf,' पत्रशिरा, दलस्नसा; 'to strip off the leaves,' निष्पत्र (nom. निष्पत्रयति -यितुं), निष्पत्रीकृ.

To LEAF, *v. n.* सपत्रीभू, सपर्णीभू, स्फुटितपत्रः -त्रा -त्रं भू, प्ररूढपत्रः -त्रा -त्रं भू.

LEAFED, *a.* सपत्रः -त्रा -त्रं, सपर्णः -र्णा -र्णं, पत्रयुक्तः -क्ता -क्तं.

LEAFINESS, *s.* पत्रबाहुल्यं, बहुपर्णत्वं, पर्णबाहुल्यं, पत्रप्राचुर्यं, प्रचुरपत्रत्वं, सपर्णत्वं, सपत्रत्वं, सदलता.

LEAFLESS, *a.* निष्पत्रः -त्रा -त्रं, निष्पर्णः -र्णा -र्णं, अपत्रः -त्रा -त्रं, अपर्णः -र्णा -र्णं, अदलः -ला -लं, पत्रहीनः -ना -नं, पर्णशून्यः -न्या -न्यं, दलशून्यः -न्या -न्यं.

LEAFLESSNESS, *s.* निष्पत्रता, निष्पर्णता, अदलत्वं, पत्रहीनता, पर्णशून्यता.

LEAFLET, *s.* पत्रकं, क्षुद्रपत्रं, सूक्ष्मपत्रं, क्षुद्रपर्णं, सूक्ष्मपर्णं.

LEAF-STALK. *s.* पत्रमञ्जरी, पर्णमञ्जरी, पत्रनाली, पर्णनाली.

LEAFY, *a.* पर्णी -र्णिनी -र्णि (न्), पत्री -त्रिणी -त्रि (न्), पर्णसः -सा -सं, दलसः -सा -सं, बहुपत्रः -त्रा -त्रं, बहुपर्णः -र्णा -र्णं, प्रचुरपर्णः -र्णा -र्णं, सपत्रः -त्रा -त्रं, पर्णमयः -यी -यं, पर्णवान् -वती -वत् (त्); 'leafy hut,' पर्णोटजं.

LEAGUE, *s.* (Alliance, confederacy) सन्धिः *m.*, सन्धानं, साहित्यं, सहायता, सङ्घातः, सम्बन्धः, सङ्घट्टनं, संयोगः, ऐक्यं, संयोजनं, समाहारः, समाहरणं, प्रतीहारः, सङ्गमः, समागमः, संसृष्टिः *f.*, परस्परोपकारप्रतिज्ञा, सार्थं.—(The distance) क्रोशः, क्रोशयुगं, गव्यूतिः *f. m.*, गव्यूतं.

To LEAGUE, *v. n.* सन्धा (c. 3. -धत्ते -धातुं), सन्धिं कृ or विधा, सन्धानं कृ, साहित्यं कृ, सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), संयुज् in pass. (-युज्यते), संहन् in pass. (-हन्यते), संहतः -ता -तं भू, सहितः -ता -तं भू, सम्मिल् (c. 6. -मिलति -मेलितुं).

LEAGUED, *p. p.* or *a.* सन्धितः -ता -तं, कृतसन्धिः -न्धिः -न्धि, कृतसम्बन्धः -न्धा -न्धं, सङ्घातवान् -वती -वत् (त्), सहितः -ता -तं, सङ्गतः -ता -तं, संयुक्तः -क्ता -क्तं, कृतसंसर्गः -र्गा -र्गं, संयोजितः -ता -तं, संहतः -ता -तं, संसृष्टः -ष्टा -ष्टं, मिलितः -ता -तं, सखीकृतः -ता -तं; 'having leagued,' सम्भूय, मिलित्वा.

LEAGUER, *s.* सङ्गी *m.* (न्), संसर्गी *m.* (न्), सम्बन्धी *m.* (न्), सहकारी *m.* (न्), सम्भूयकारी *m.*, परस्परोपकारी *m.*

LEAK, *s.* धारा, नौकातले छिद्रं or रन्ध्रं or सन्धिः *m.*, नौकापार्श्वे दारुभित्तिः *f.* or जलग्राहकच्छिद्रं or जलप्रवेशकच्छिद्रं.—(Oozing) धारा, स्रवः, द्रवः, स्यन्दः.

To LEAK, *v. n.* नौदारुच्छिद्रेण जलं प्रविश् (c. 10. -वेशयति -यितुं) or जलं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or जलम् आदा (c. 3. -ददाति -दातुं), नौकापार्श्वे or नौकातले दारुरन्ध्रेण जलं प्रविश्.—(Ooze) री (c. 4. रीयते -रेतुं), क्षर् (c. 1. क्षरति -रितुं), स्यन्द् (c. 1. स्यन्दते -न्दितुं), स्रु (c. 1. स्रवति, स्रोतुं); 'water leaks from the jar,' जलं घटाद् रीयते.

LEAKAGE, *s.* यत्किञ्चिद् जलादि भाण्डच्छिद्रेण रीयते, द्रवः.

LEAKING, *s.* स्यन्दः -न्दनं, निस्यन्दः, द्रवः -वणं, क्षरणं, स्रावः, रयः, धारा.

LEAKY, *a.* सच्छिद्रः -द्रा -द्रं, छिद्री -द्रिणी -द्रि (न्), जर्जरीकः -का -कं, जर्जरः -रा -रं, सरन्ध्रः -न्ध्रा -न्ध्रं, दारुच्छिद्रेण जलग्राहकः -का -कं or जलादायी -यिनी -यि (न्).

To LEAN, *v. n.* (Incline, bend) नम् (c. 1. नमति, नन्तुं), अवनम्, आनम्, नम्रीभू.—(Bend out of the perpendicular) वहिर्लम्ब् (c. 1. -लम्बते -म्बितुं), वहिःप्रलम्ब्, तिर्यक् प्रलम्ब्, वक्रीभू.—(Lean on, rest on) अवलम्ब्, समालम्ब्, अवलम्बनं कृ, संश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि, निली (c. 4. -लीयते -लेतुं); 'she leans on the arms of Rāma,' एषा रामस्य बाहू संश्रयति or अवलम्बते.

LEAN, *a.* (Thin, meagre) कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, अमांसः -सा -सं, शुष्कमांसः -सा -सं, क्षीणः -णा -णं, अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं, तनुः -नुः -न्वी -नु, प्रतनुः &c., वितनुः &c., क्षामः -मा -मं, शीर्णः -र्णा -र्णं, शातः -ता -तं, शुष्काङ्गः -ङ्गी -ङ्गं.

LEAN, *s.* (That part of the flesh which consists of muscle without the fat) स्नायुः *m.*, स्नसा, मांसस्नायुः, मांसं, मेदोभिन्नः or वसाभिन्नो मांसभागः.

LEAN-FACED, *a.* कृशमुखः -खी -खं, क्षीणमुखः &c., क्षीणवदनः -ना -नं.

LEANING, *part.* or *a.* (Bending, deviating from the straight line) प्रणतः -ता -तं, आनतः -ता -तं, प्रवणः -णा -णं, वहिर्लम्बः -म्बा -म्बं, प्रलम्बः -म्बा -म्बं, नम्रः -म्रा -म्रं, वक्रः -क्रा -क्रं.—(Resting on) अवलम्बी -म्बिनी -म्बि (न्), अवलम्बनः -ना -नं, अवलम्बितः -ता -तं, संश्रितः -ता -तं, समाश्रितः -ता -तं, उपाश्रितः -ता -तं.

LEANNESS, *s.* कृशता -त्वं, कार्श्यं, परिकृशता, कृशाङ्गता, क्षामता, शरीरक्षीणता, मांसक्षीणता, क्षीणता, अमांसत्वं, अपुष्टता, विपुष्टता, तनुता -त्वं, तानवं, शरीरशोषणं, मांसशुष्कता, शुष्काङ्गता.

To LEAP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्, नृत् (c. 4. नृत्यति, नर्तितुं), झम्पं कृ, उत्फालं कृ, विस्फुल् (c. 6. -स्फुलति -लितुं); 'to leap up,' उत्प्लु, समुत्प्लु, उत्पत् (c. 1. -पतति -तितुं), प्रोत्पत्; 'to leap down,' अवप्लु; 'to leap over,' लङ्घ् (c. 10. लङ्घयति -यितुं), विलङ्घ्, उल्लङ्घ्, अभिलङ्घ्; 'to leap forth from,' प्रस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), प्रोत्पत्.

LEAP, *s.* प्लवः -वनं, प्लुतं, वल्गितं, झम्पः -म्पा, लङ्घनं, उत्प्लवनं, उत्प्लुतं, अवस्कन्दः, उत्फालः; 'going by leaps,' प्लुतगतिः -तिः -ति, प्लवगः -गा -गं.

LEAPED, *p. p.* प्लुतः -ता -तं, वल्गितः -ता -तं, लङ्घितः -ता -तं.

LEAPER, *s.* प्लवकः, प्लवः, प्लवनकारी *m.* (न्), झम्पी *m.* (न्), वल्गितकृत्.

LEAPING, *part.* प्लवमानः -ना -नं, प्लवः -वा -वं, वल्गन् -ल्गन्ती -ल्गत् (त्); 'leaping up,' उत्पतिष्णुः -ष्णुः -ष्णु, उत्प्लुत.

LEAPING, *s.* (The act) प्लवनं, प्लुतकरणं, झम्पकरणं; 'leaping up,' उत्प्लवनं, उत्पतनं; 'leaping down,' अवस्कन्दः; 'leaping over,' लङ्घनं, उल्लङ्घनं.

LEAP-YEAR, *s.* चतुर्थः संवत्सरो यस्मिन् अधिकदिवसो निवेश्यते, अधिकदिनवत्सरः, अधिकदिवसवर्षः.

To LEARN, *v. a.* (Acquire knowledge of any thing by study, &c.) शिक्ष् (c. 1. शिक्षते -क्षितुं), उपशिक्ष्, अधी (c. 2. अधीते, अध्येतुं, rt. इ), अधिगम् (c. 1. -गच्छति -गन्तुं), पठ् (c. 1. पठति -ठितुं), अभ्यस् (c. 4. -अस्यति -असितुं), अध्ययनेन or अभ्यासेन विद्यां ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति -आप्तुं) or अवाप्, अभ्यासं कृ, विद्याभ्यासं कृ, विद्यागमं कृ.—(Gain the knowledge of, become informed of) ज्ञा (c. 9. जानाति -नीते ज्ञातुं), परिज्ञा, अवगम्, उपलभ्, विज्ञः -ज्ञा -ज्ञं भू, गृहीतार्थः -र्था -र्थं भू; 'to learn by heart,' अभ्यस्.

To LEARN, *v. n.* शिक्षां कृ, अध्ययनं कृ, अधिगमं कृ, अभ्यासं कृ, विद्याभ्यासं कृ, विद्याप्राप्तिं कृ, विद्याग्रहणं कृ, विद्यालब्धिं कृ, विद्यागमं कृ.

LEARNED, LEARNT, *p. p.* शिक्षितः -ता -तं, अधीतः -ता -तं, अधिगतः -ता -तं, अभ्यस्तः -स्ता -स्तं, पठितः -ता -तं, अवगतः -ता -तं, उपलब्धः -ब्धा -ब्धं; 'learnt by heart,' अभ्यस्तः -स्ता -स्तं, कण्ठस्थः -स्था -स्थं; 'to be learnt,' शिक्षितव्यः -व्या -व्यं, अभ्यस्यः -स्या -स्यं, अभ्यसनीयः -या -यं.

LEARNED, *a.* (Versed in literature and science) विद्वान् -दुषी -द्वत् (स्), पण्डितः -ता -तं, ज्ञानी -निनी -नि (न्), विद्यावान् -वती -वत् (त्), विद्याविशिष्टः -ष्टा -ष्टं, विद्यासम्पन्नः -न्ना -न्नं, कृतविद्यः -द्या -द्यं, विद्यालङ्कृतः -ता -तं, सविद्यः -द्या -द्यं, लब्धविद्यः &c., वैद्यः -द्यी -द्यं, ज्ञानवान् &c., विपश्चित् *m. f. n.*, प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः -ज्ञा -ज्ञं, प्रज्ञावान् &c., व्युत्पन्नः -न्ना -न्नं, कृतधीः -धीः -धि, अधीयानः -ना -नं, अधीती -तिनी &c., बहुश्रुतः -ता -तं, कोविदः -दा -दं, मनीषी -षिणी -षि (न्), बुद्धिमान् &c., धीमान् &c., बुधः -धा -धं, धीरः -रा -रं, संख्यावान् &c., कविः -विः -वी -वि, सूरिः &c., सूरी -रिणी -रि (न्), कृती -तिनी -ति (न्), लब्धवर्णः -र्णा -र्णं, अक्षरसम्पन्नः -न्ना -न्नं, साक्षरः -रा -रं, सारस्वतः -ती -तं, अध्ययनसम्पन्नः &c., विद्यावृद्धः -द्धा -द्धं, सन् सती सत्, तत्त्वदर्शी -र्शिनी -र्शि (न्), दीर्घदर्शी &c., दूरदर्शी &c.; 'a learned man,' विद्वज्जनः, पण्डितः, बुधः, सद्रसः; 'learned in the Vedas,' श्रोत्रियः, वेदविद्, वेदविद्वान् *m.* (स्), अनूचानः, छान्दसः.—(Conversant with, skilled in) अभिज्ञः -ज्ञा -ज्ञं, विज्ञः -ज्ञा -ज्ञं, विशारदः -दा -दं, विचक्षणः -णा -णं, निपुणः -णा -णं, कुशलः -ला -लं, प्रवीणः -णा -णं, चतुरः -रा -रं, वेत्ता -त्त्री -त्तृ (तृ), ज्ञः ज्ञा ज्ञं or विद् in comp.; as, 'learned in the law,' स्मृतिज्ञः &c., धर्म्मविद् *m. f. n.*, 'learned in music,' गान्धर्वतत्त्वज्ञः.

LEARNEDLY, *adv.* पण्डितवत्, सपाण्डित्यं, पाण्डित्येन, प्राज्ञवत्, विद्वज्जनवत्, सविद्यं, वैदुष्येण, सज्ञानं, ज्ञानपूर्वं.

LEARNER, *s.* शिष्यः, विद्यार्थी *m.* (न्), अध्येता *m.* (तृ), अभ्यासी *m.* (न्), शिक्षिताक्षरः, विद्याभ्यासकर्त्ता *m.* (र्तृ), अभ्यासकृत्.

LEARNING, *s.* (Knowledge of literature, erudition) विद्या, पाण्डित्यं, ज्ञानं, विज्ञानं, वैदुष्यं, विद्वत्ता, ज्ञातृत्वं, व्युत्पत्तिः *f.*, प्राज्ञत्वं, पण्डितता -त्वं, वेत्तृत्वं, विद्यासम्पत्तिः *f.*, अक्षरसम्पत्तिः *f.*, साक्षरता, अध्ययनसम्पत्तिः *f.*—(Literature) विद्या, शास्त्रं, अक्षरं, साहित्यं.—(Sacred learning) श्रुतिः *f.*, श्रोत्रियत्वं.—(Act of learning, acquisition of learning) शिक्षा, अध्ययनं, अभ्यासः, विद्याभ्यासः, विद्याप्राप्तिः *f.*, विद्यालब्धिः *f.*, विद्यार्जनं, विद्यागमः; 'cultivation of learning,' विद्यानुसेवनं; 'patronising learning,' विद्यानुग्रहः; 'to affect great learning,' पण्डित (nom. पण्डितायते).

LEASE, *s.* (Of lands, houses, &c.) पट्टः, पट्टोलिका, कुशकीला, निर्दिष्टकालं यावत् नियमितमूल्यम् अपेक्ष्य क्षेत्रगृहादीनां परहस्तसमर्पणं.

To LEASE, *v. a.* पट्टं दा, पट्टोलिकां दा, पट्टेन क्षेत्रगृहादि परप्रयोजनीयं दा, पट्टोलिकापूर्वं नियमितमूल्यम् अपेक्ष्य क्षेत्रगृहादि परप्रयोजनीयं दा or विसृज् (c. 6. -सृजति -स्रष्टुं), आविहितकालाद् निरूपितमूल्यम् अपेक्ष्य क्षेत्रगृहादि परहस्ते समृ in caus. (-अर्पयति -यितुं).

LEASED, *p. p.* पट्टेन or पट्टलिखनपूर्वम् आविहितकालात् परहस्तसमर्पितः -ता -तं.

LEASEHOLD, *a.* पट्टेन or पट्टोलिकालिखनपूर्वम् अध्युषितः -ता -तं.

LEASH, *s.* (Leather thong) चर्म्मबन्धः -न्धनी, चर्म्मरज्जुः *m. f.*, बन्धनरज्जुः.—(Tierce, three) त्रयं, त्रिकं; 'a leash of hares,' शशकत्रयं.

To LEASH, *v. a.* चर्म्मरज्जुना or चर्म्मरज्ज्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं).

LEASING, *s.* असत्यता, अनृतता, अलीकता, कापट्यं, मृषावादः. *See* FALSEHOOD.

LEAST, *a.* (Smallest) अल्पिष्ठः -ष्ठा -ष्ठं, कनिष्ठः -ष्ठा -ष्ठं, क्षुद्रतमः -मा -मं, क्षोदिष्ठः -ष्ठा -ष्ठं, कनीयान् -यसी -यः (स्), तनिष्ठः -ष्ठा -ष्ठं, तनीयान् &c., लघिष्ठः &c., स्तोकतमः -मा -मं, सूक्ष्मतमः -मा -मं, अतिक्षुद्रः -द्रा -द्रं, स्वल्पः -ल्पा -ल्पं, अवरः -रा -रं, अवरतमः -मा -मं, न्यूनः -ना -नं; 'least of all,' सर्व्वकनिष्ठः -ष्ठा -ष्ठं, सर्व्वकनीयान् &c., सर्व्वस्मात् क्षुद्रः -द्रा -द्रं; 'the least particle,' लेशः, लवः, कणः: 'not the least darkness is in that place,' तत्र अन्धकारस्य लेशो ऽपि नास्ति.

LEAST, *adv.* (In the least) मनाक्, किञ्चित्, अल्पिष्ठं, कनिष्ठं, लेशमपि, कियत्, सूक्ष्मं, स्तोकं; 'not in the least,' न मनाक्, न मनागपि, न किञ्चिदपि, न किमपि, न कियदपि, न सूक्ष्ममपि, न स्तोकमपि, न लेशमपि, अलेशं; 'three witnesses at least,' अवराः साक्षिणः; 'at least, at any rate,' तावत्.

LEATHER, *s.* चर्म्म *n.* (न्), दृतिः *m.*, पशुत्वक् *f.* (च्), पशुचर्म्म *n.*, कृत्तिः *f.*, अजिनं, वर्द्धं, शिपिः *f.*; 'a leather thong,' चर्म्मबन्धः -न्धनं, वरत्रा, वर्द्धी; 'covered with leather,' चर्म्मावृतः -ता -तं, चर्म्मावनद्धः -द्धा -द्धं, चर्म्माच्छादितः -ता -तं.

LEATHER, *a.* चर्म्म in comp., चर्म्ममयः -यी -यं; 'a leather shoe,' चर्म्मपादुका; 'a leather band,' चर्म्मबन्धः. *See* LEATHERN.

To LEATHER, *v. a.* चर्म्मदण्डेन तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

-षितुं), प्रच्छद् कृ.—(Cover with straw) तृणावृतं -तां कृ, तृणास्तीर्णं -र्णां कृ, तृणास्तृतं -तां कृ, आस्तृतं -तां कृ, तृणास्तरणं कृ.—(Scatter about confusedly) इतस्ततो विकृ (c. 6. -किरति -करितुं -रीतुं) or व्याकृ or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अस्तव्यस्तीकृ.

LITTERED, *p. p.* (Covered with straw) तृणावृतः -ता -तं, तृणास्तीर्णः -र्णा -र्णं, तृणास्तृतः -ता -तं.—(Scattered about) इतस्ततो विकीर्णः -र्णा -र्णं or व्याकीर्णः -र्णा -र्णं, अस्तव्यस्तः -स्ता -स्तं, बहुधा विक्षिप्तः -प्ता -प्तं, बहुधास्तीर्णः -र्णा -र्णं.

LITTLE, *a.* (Small in size or extent, not great) अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, अल्पकः -का -कं, क्षुद्रकः -का -कं, अल्पपरिमाणः -णा -णं, क्षुद्रपरिमाणः -णा -णं, सूक्ष्मः -क्ष्मा -क्ष्मं, तनुः -नुः -नु, स्तोकः -का -कं, लघुः -घुः -घु, लघुपरिमाणः -णा -णं, ह्रस्वः -स्वा -स्वं, क्षुल्लकः -का -कं, श्लक्ष्णः -क्ष्णा -क्ष्णं, कृशः -शा -शं, दभ्रः -भ्रा -भ्रं, कनीयः -का -कं, अणुकः -का -कं, अणुः -णी -णु, कणः, लेशः, लवः, मात्रा *f.*, त्रुटिः -टी *f.*—(Small in body) अल्पतनुः -नुः -नु, अल्पशरीरः -रा -रं, क्षुद्रतनुः &c., ह्रस्वशरीरः -रा -रं, स्तोककायः -या -यं, अल्पमूर्त्तिः -र्त्तिः -र्त्ति.—(Small in quantity, not much) अल्पः -ल्पा -ल्पं, अल्पमात्रः -त्रा -त्रं, स्तोकः -का -कं, अबहुः -हुः -ह्वी -हु, अबहुलः -ला -लं, अप्रचुरः -रा -रं, ईषत् in comp.—(Very little) अत्यल्पः -ल्पा -ल्पं, अल्पाल्पः -ल्पा -ल्पं, अल्पीयान् -यसी -यः (स्), अल्पिष्ठः -ष्ठा -ष्ठं, कनीयान् &c., अणीयान् &c., क्षोदीयान् &c., क्षोदिष्ठः &c.; 'not a little,' अनल्पः -ल्पा -ल्पं; 'little finger,' कनिष्ठाङ्गुलिः -ली *f.*; 'a little wealth,' अल्पधनं, धनलेशः; 'having little wealth,' अल्पधनः -ना -नं; 'of little merit,' ईषद्गुणः -णा -णं; 'a little hot,' ईषदुष्णः -ष्णा -ष्णं; 'a little animal,' क्षुद्रजन्तुः *m.*; 'of little weight,' अल्पप्रभावः -वा -वं, अल्पप्रमाणः -णा -णं; 'for a little while,' किञ्चित्कालं, कियत्कालं.

LITTLE, *s.* (Small quantity) अल्पभागः, अल्पांशः, किञ्चित्, अल्पं, स्तोकं, ईषत् ind., अल्पिका, अल्पमात्रं, मात्रा, किञ्चिद्भागः, किञ्चन, लवं, अबहुभागः, अबाहुल्यं, अप्राचुर्य्यं; 'little or much,' स्तोकं प्रचुरं वा; 'by little and little,' अल्पाशस्, अल्पाल्पं, स्तोकशस्; 'desiring little,' अल्पाकांक्षी -क्षिणी -क्षि (न्); 'doing little,' ईषत्करः -री -रं.

LITTLE, *adv.* ईषत्, कियत्, स्तोकं, मनाक्, अल्पमात्रं, अबहु, अभृशं, अभूरि, तावत्; 'a little distance, a little way,' कियद्दूरं, ईषद्दूरं, नातिदूरं -रे, कियत्पर्य्यन्तं; 'a little less,' किञ्चिदूनः -ना -नं, ईषदूनः -ना -नं; 'little drunk,' ईषत्पानः -ना -नं, ईषत्पीतः -ता -तं; 'little-minded,' कृपणबुद्धिः -द्धिः -द्धि, कृपणधीः -धीः -धि.

LITTLENESS, *s.* अल्पता -त्वं, क्षुद्रता -त्वं, सूक्ष्मता, सौक्ष्म्यं, तनुता, स्तोकता, लघुता, लाघवं, लघिमा *m.* (न्), ह्रस्वता.—(Of body) अल्पशरीरता, शरीरह्रस्वता, शरीरक्षुद्रता.—(Meanness) कृपणता, कार्पण्यं, तुच्छत्वं, दीनता, कदर्य्यता, अपकृष्टता; 'of mind,' बुद्धिकार्पण्यं.

LITTORAL, *a.* तीरस्थः -स्था -स्थं, तटस्थः -स्था -स्थं, तीरसम्बन्धी -न्धिनी &c.

LITURGICAL, *a.* समाजप्रार्थनापद्धतिसम्बन्धी -न्धिनी -न्धि (न्), प्रार्थनपद्धतिविषयः -या -यं, प्रार्थनाविधिसम्बन्धी &c.

LITURGY, *s.* ख्रीष्टीयसमाजप्रार्थनापद्धतिः *f.*, प्रार्थनापद्धतिः, सामाजिकप्रार्थनापद्धतिः, सामाजिकभक्तिमार्गः, प्रार्थनामार्गः, ख्रीष्टीयप्रार्थनाविधिः *m.*

To LIVE, *v. n.* (Have the vital principle) जीव् (c. 1. जीवति -वितुं), प्राण् (c. 2. प्राणिति -णितुं, rt. अन्), श्वस् (c. 2. श्वसिति -सितुं), प्राणान्धारयते कृ.—(Exist, be in existence) वृत् (c. 1. वर्त्तते -र्त्तितुं), वृत्, विद् in pass. (विद्यते), धृ in pass. (ध्रियते -र्त्तुं); 'as long as you live,' यावद् धरिष्यते, यावत्ते प्राणा धरिष्यन्ति, यावज्जीवं.—

(Pass life or time) जीवनं or कालं वृत् (c. 10. वर्त्तयति -यितुं or वह् (c. 10. वाहयति -यितुं) or निर्वह् or गम् (c. 10. गमयति -यितुं) or नी (c. 1. नयति, नेतुं), कालनिर्वाहं कृ, जीवननिर्वाहं कृ.—(Dwell, remain) वस् (c. 1. वसति, वस्तुं), निवस्, अधिवस्, स्था (c. 1. तिष्ठति, स्थातुं), अधिष्ठा, वृत्, आस् (c. 2. आस्ते -सितुं), वासं कृ.—(Subsist) उपजीव्, उपजीवनं कृ, निर्वह् (c. 1. -वहति -वोढुं), निर्वाहं कृ, शरीरयात्रां कृ, प्राणयात्रां कृ, प्राणधारणं कृ, उदरनिर्वाहं कृ.

LIVE, *a.* जीवी -विनी -वि (न्), जीवत् -वन्ती -वत् (त्). *See* LIVING, *part.*

LIVELIHOOD, *s.* जीविका, उपजीविका, उपजीवनं, उपजीव्यं, आजीव -वनं, प्रजीवनं, जीवनं, जीवनोपायः, उपजीवनोपायः, वृत्तिः *f.*, वर्त्तनं वार्त्ता, वृत्तिता, वृत्त्युपायः, जीवनवृत्तिः *f.*, जीवनसाधनं, जीवसाधनं उपजीवनसाधनं, जीवमार्गः, शरीरयात्रा, प्राणयात्रा; 'bare livelihood,' ग्रासाच्छादनं, अन्नाच्छादनं, अशनाच्छादनं -ने *n. du.*, अन्नोदकं दिननिर्वाहः, दिनचर्य्या; 'obtaining a livelihood,' जीविकाप्राप्तिः -प्राप्तिः

LIVELINESS, *s.* तेजस् *n.*, तेजस्विता, तेजोयुक्तं, उल्लसता, उल्लासः, प्रफुल्लता प्रहृष्टता, प्रहर्षः, सानन्दता, सहर्षं, तीव्रता, सजीवत्वं, लघुता, लाघवं क्षिप्रत्वं; 'of countenance,' वदनप्रफुल्लता, मुखश्रीः *f.*

LIVELONG, *a.* दीर्घकालीनः -ना -नं, दीर्घकालिकः -की -कं, चिरकालीनः &c.

LIVELY, *a.* तेजोवान् -वती -वत् (त्), तेजस्वी -स्विनी -स्वि (न्), उल्लसः -सा -सं, उल्लासी -सिनी &c., प्रफुल्लः -ल्ला -ल्लं, प्रहृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी &c., सानन्दः -न्दा -न्दं, उल्लासवृत्तिः -त्तिः -त्ति, आनन्दवृत्ति &c., उत्साहपूर्णः -र्णा -र्णं, तीव्रः -व्रा -व्रं, तीक्ष्णः -क्ष्णा -क्ष्णं, बहुसत्त्वः -त्त्वा -त्त्वं, ससत्त्वः &c.—(In countenance) प्रफुल्लवदनः -ना -नं, हास्यमुखः -खी -खं, सुहासाननः -ना -नं, हास्यवदनः &c., प्रसन्नमुखः &c.—(Energetic) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), उद्योगशीलः -ला -लं, उत्साहशीलः -ला -लं.

LIVELY, LIVELILY, *adv.* तेजसा, तेजोपूर्व्वं, उल्लासेन, उल्लसवत्, प्रफुल्लवत्

LIVER, *s.* (One who lives) जीवी *m.* (न्), उपजीवी *m.*, जीवकः. *See* LIVING, *part.* (The organ which secretes the bile) यकृत्, कालखण्डं, कालकं, कालिका, कालेयं, कालखञ्जनं, पित्ताशयः, पित्ताधारः; 'enlargement of the liver,' यकृद्गुल्मः.

LIVER-COLOR, *a.* यकृद्वर्णः -र्णा -र्णं, कालेयः -यी -यं, नीलरक्तः -क्ता -क्तं.

LIVERY, *s.* (Particular dress) वेषः, वेशः, कुलवेशः, कुलवेषः, कुलचिह्नं.—(Of a servant) सेवकवेषः, भृत्यवेशः, परिचरवेषः, कुलसेवकवेषः.—(Keeping a horse at a certain rate) निरूपितमूल्यमपेक्ष्य अश्वपोषणं or अश्वपालनं.

LIVERY-MAN, *s.* कुलवेशधारी *m.* (न्), कुलवेशभृत् *m.*—(Freeman) पौरवेशः, पौरलिङ्गी *m.* (न्), पौरलिङ्गधारी *m.* (न्).

LIVERY-STABLE, *s.* अश्वपोषणशाला, अश्वपालनशाला, अश्वशाला.

LIVE-STOCK, *s.* जीवधनं, जीवत् *n.*

LIVID, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, नीलकृष्णः -ष्णा -ष्णं, कृष्णवर्णः -र्णा -र्णं, सीसवर्णः &c., कालः -ला -लं, कालिकः -की -कं.

LIVIDITY, LIVIDNESS, *s.* नीलता, नीलवर्णः, नीलिमा *m.* (न्), कृष्णता, कृष्णिमा *m.*, सीसवर्णः.

LIVING, *part.* or *a.* (Having life) जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (त्), सजीवः -वा -वं, जीवितः -ता -तं, जीवभूतः -ता -तं, जीवकः -की -कं, प्राणी -णिनी -णि (न्), प्राणवान् -वती -वत् (त्), प्राणभृत् *m. f. n.*, प्राणधारी -रिणी &c., प्राणमयः -यी -यं, सप्राणः -णा -णं, चेतनः -ना -नं, चेतनावान् -वती -वत् (त्), सचेष्टः -ष्टा -ष्टं, चेष्टितः -ता -तं; 'a living being,' जन्तुः *m.*, प्राणी *m.* (न्), प्राणभृत् *m.*

जन्मी *m.*, शरीरी *m.*, देही *m.*, चेतनः, भूतं, सत्त्वं; 'living creatures,' प्राणिनः *m. pl.*, जीवनाः *m. pl.*, चेतनाः *m. pl.*; 'the land of the living,' जीवलोकः.—(Existent) वर्त्तमानः -ना -नं, ध्रियमाणः -णा -णं, विद्यमानः -ना -नं, वर्त्तिष्णुः -ष्णुः -ष्णु, वर्त्ती -र्त्तिनी &c.—(Subsisting) उपजीवी -विनी &c., उपजीवकः -का -कं, आजीवी -विनी &c., आजीवः -वा -वं; 'living by agriculture,' कृष्युपजीवी &c.; 'living by learning,' विद्योपजीवी -विनी &c.; 'living by arms,' शस्त्रोपजीवी &c., शस्त्राजीवः -वा -वं; 'living virtuously,' सद्वर्त्ती -र्त्तिनी &c., सद्वृत्तिः -त्तिः -त्ति, सद्वृत्तः -त्ता -त्तं, सद्व्यवहारः -रा -रं; 'living wickedly,' असद्वृत्तिः &c., कुवृत्तिः &c., कुवर्त्ती -र्त्तिनी &c.; 'a living sacrifice,' जीवोपहारः; 'a living death,' जीवितमरणं.

[LIV]ING, *s.* (The act) जीवनं, प्राणधारणं, वर्त्तनं, वृत्तिः *f.*, वासः, निवासः.—(Subsistence, means of subsistence) उपजीविका, जीविका, उपजीवनं, उपजीव्यं, आजीवः -वनं, जीवनोपायः, उपजीवनोपायः, वृत्त्युपायः, वृत्तिः, वर्त्तनं, जीवसाधनं, प्राणयात्रा, यात्रा, शरीरयात्रा, प्राणस्थितिः *f.*, निर्वाहः, जीवनिर्वाहः, प्राणनिर्वाहः, उदरनिर्वाहः; 'living by learning,' विद्योपजीवनं; 'living by husbandry,' कृष्युपजीवनं; 'having a living,' वृत्तिमान् -मती -मत् (त्); 'good living,' सुभोजनं, मिष्टभोजनं, परमान्नभोजनं, उत्तमान्नभोजनं, आप्यायनं; 'poor living,' कुभोजनं, कदन्नभोजनं.—(Benefice) धर्म्मदायः, धर्म्माध्यापकवृत्तिः *f.*, धर्म्मशिक्षकवृत्तिः.

[L]IXIVIAL, LIXIVIOUS, *a.* क्षाराम्बुसंसृष्टः -ष्टा -ष्टं, क्षारव्याप्तः -प्ता -प्तं, क्षारविशिष्टः -ष्टा -ष्टं, क्षाराक्तः -क्ता -क्तं, लवणाक्तः &c.

[L]IXIVIUM, *s.* क्षाराम्बु *n.*, क्षारजलं, क्षारसंसृष्टजलं, क्षारितजलं.

[LIZ]ARD, *s.* सरटः, सरटुः *m.*, सरट् *m.*, कृकलासः, कृकवाकुः *m.*, कृकलासः, कृकलाशः, गोधा -धिका, प्रतिसूर्य्यः -र्य्यकः, पल्लिः -ल्लिका, हुल्लिका, शरटः, बहुरूपः, अण्डजः, क्रकचपाद् *m.*, शुष्काङ्गी, वेदारः, वेदारु *m.*, माञ्जनः, साशयन्दकः, वृक्षशः; 'house-lizard,' गृहगोधा -धिका, गृहगोलिका, गृहालिका, मुसली, मुपली, मुशली, टट्टनी, [ज]्येष्ठा -ष्ठी.

[LO,] *exclam.* पश्य, पश्यत, प्रेक्षस्व.

[LOA]D, *s.* भारः, धुरा, धूः *f.* (धुर्), स्थौरं, पर्य्याहारः; 'a heavy load,' [ग]ुरुभारः, अतिभारः, दुर्भरः, गुरुभारः.—(Encumbrance, any thing grievous) बाधा, पीडा, कष्टं; 'bearing a load,' भारवाहनः -ना -नं, भारवाही -हिनी -हि (न्), भारवाहिकः -की -कं, भारसहः -हा -हं, धुरन्धरः -रा -रं, धुर्वहः -हा -हं, भारहरः -रा -रं, भारहारिकः -की -कं; 'the act of bearing a load,' भारवहनं, भारोद्वहनं, भारोद्धरणं.

[To] LOAD, *v. a.* भारं न्यस् (c. 4. -अस्यति -असितुं) or निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or आरुह् in caus. (-रोपयति -यितुं) or स्था in caus. (स्थापयति -यितुं), भारवन्तं -वतीं -वत् कृ, भाराक्रान्तं -न्तां -न्तं कृ, सभारं -रां कृ, भारेण पीड् (c. 10. पीडयति -यितुं), भारग्रस्तं -स्तां कृ.—(With powder) आग्नेयचूर्णं निविश्, चूर्णगर्भं -र्भां कृ, आग्नेयचूर्णेन पृ (c. 10. पूरयति -यितुं).

[LO]ADED, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), सभारः -रा -रं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, अर्पितभारः -रा -रं, निवेशितभारः -रा -रं, आरोपितभारः -रा -रं, धुरीणः -णा -णं, गर्भः -र्भा -र्भं in comp.; 'loaded with powder,' चूर्णगर्भः -र्भा -र्भं, आग्नेयचूर्णपूरितः -ता -तं, दारुचूर्णपूर्णः -र्णा -र्णं; 'heavily loaded,' कुभरः -रा -रं, सुभारवान् &c., सुभारी &c., अतिभारी &c.

[LO]ADER, *s.* भारकर्त्ता *m.* (र्तृ), भारदाता *m.* (तृ), भारारोपकः.

LOADING, *s.* (The act) भारार्पणं, भारारोपणं.—(Cargo) भारः.

LOADSTONE, *s.* लोहचुम्बकः, चुम्बकः, चुम्बकप्रस्तरः, चुम्बकमणिः *m.*, लोहकान्तः -न्तं, अयस्कान्तः, आकर्षः -र्षकः, आकर्षकप्रस्तरः, महालोहं, कृष्णलोहं, द्रावकः, भ्रामरः, वैक्रान्तं.

LOAF, *s.* अपूपः, पूपः, पिष्टकः, उण्डेरकः, ओकुलः, पोलिका, करम्भः -म्भकः.—(A mass) पिण्डः.

LOAM, *s.* चिक्कणमृत्तिका, स्निग्धमृत्तिका, पङ्कवालुकायुक्तो मृत्तिकाविशेषः, पङ्किलमृत्तिका, पङ्कः, चिकिलः.

LOAMY, *a.* चिक्कणः -णा -णं, चिक्कणमृत्तिकामयः -यी -यं.

LOAN, *s.* (Of money) ऋणं, ऋणदानं, धनप्रयोगः, प्रयोगः, कुसीदं, कलान्तिः *f.* -न्तिका, निरूपितकालपर्य्यन्तं धनप्रयोगः.—(Temporary use of any thing) निरूपितकालपर्य्यन्तं द्रव्यप्रयोजनं or द्रव्यप्रयोगः.—(Something to be given back) प्रतिदेयं.

LOATH, *a.* अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, अनिच्छन् -च्छन्ती -च्छत् (त्), विरक्तः -क्ता -क्तं, विमुखः -खा -खं, पराङ्मुखः -खा -खं, विमतः -ता -तं, असम्मतः -ता -तं, अकामः -मा -मं, निष्कामः -मा -मं, निस्पृहः -हा -हं.

To LOATHE, *v. a.* अत्यन्तं द्विष् (c. 2. द्वेष्टि -ष्टुं) or प्रद्विष्, अतिद्वेषं कृ, गर्ह् (c. 1. गर्हते -र्हितुं), बाध् in des. (बीभत्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं), घृणां कृ, बीभत्सां कृ.

LOATHED, *p. p.* अतिद्विष्टः -ष्टा -ष्टं, गर्हितः -ता -तं, घृणितः -ता -तं.

LOATHFUL, *a.* अतिद्वेषी -षिणी -षि (न्), घृणाकारी -रिणी &c., बीभत्सकारी &c., बीभत्सः -त्सा -त्सं, बीभत्सजनकः -का -कं.

LOATHING, *s.* बीभत्सः -त्सं, घृणा, गर्हा -र्हणं, अतिद्वेषः -षणं, अत्यन्तद्वेषः, विकृतं, वैकृतं -त्यं, कुत्सा, विरक्तिः *f.*, निर्वेदः, न्यक्कारः.

LOATHINGLY, *adv.* सबीभत्सं, बीभत्सपूर्व्वं, अतिद्वेषेण, घृणापूर्व्वं, कुत्सापूर्व्वं.

LOATHSOME, *a.* बीभत्सजनकः -का -कं, घृणाजनकः -का -कं, घृणोत्पादकः -का -कं, अतिगर्हितः -ता -तं, गर्हितः -ता -तं, गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, घृणार्हः -र्हा -र्हं, द्वेष्यः -ष्या -ष्यं, अतिद्वेषणीयः -या -यं, विरक्तिजनकः &c.

LOATHSOMELY, *adv.* गर्हितं, गर्हणीयं, अतिद्वेषणीयं, गर्ह्यप्रकारेण.

LOATHSOMENESS, *s.* गर्ह्यता, गर्हणीयता, कुत्सितत्वं, कौत्सित्यं, घृणाजनकत्वं, घृणार्हता, बीभत्सजनकता, द्वेष्यता.

LOB, LOB-COCK, *s.* स्थूलशरीरः, स्थूलकायः, स्थूलबुद्धिः *m.*, स्थूलजनः.

LOBBY, *s.* सभोपशाला, सभोपगृहं, उपशाला, वाह्यशाला, गमनागमनशाला.

LOBE, *s.* (Of the ear) कर्णलतिका, पालिका, कर्णपालिः *f.* -ली -लिका.—(Of the lungs) फुप्फुसभागः, फुप्फुसलतिका.—(Of the liver) यकृद्भागः, यकृदंशः.—(Part, division) अंशः, भागः.

LOBED, *a.* पालिकाविशिष्टः -ष्टा -ष्टं, भागी गिनी -गि (न्).

LOBSTER, *s.* कर्कटजातीयो दीर्घनखविशिष्टो मत्स्यभेदः.

LOCAL, *a.* दैशिकः -की -कं, देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), देशीयः -या -यं, स्थानिकः -की -कं, स्थानीयः -या -यं, ऐहस्थानिकः -की -कं, ऐहदेशिकः -की -कं, देश or स्थान in comp.; as, 'local usage,' देशव्यवहारः, देशाचारः; 'local law,' देशधर्म्मः.—(Relating to a place) देशसम्बन्धी -न्धिनी &c., स्थानसम्बन्धी -न्धिनी &c.—(Limited to a particular place) एकदेशिकः -का -कं, एकदेशीयः -या -यं, एकदेशी -शिनी &c., एकस्थानिकः -की -कं, विशेषदेशीयः -या -यं, विशेषस्थानिकः -की -कं.

LOCALITY, *s.* स्थानं, देशः, प्रदेशः, स्थलं, आस्पदं, स्थानता, देशता, देशसम्बन्धः, स्थानसम्बन्धः, स्थितिः *f.*

LOCALLY, *adv.* स्थानविषये, स्थानतस्, स्थानमुद्दिश्य, देशमुद्दिश्य, देशे.

To LOCATE, *v. a.* स्था in caus. (स्थापयति -यितुं), अवस्था, प्रतिष्ठा, विन्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), रुह् in caus. (रोपयति -यितुं), स्थापनं कृ.

LOCATED, *p. p.* स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, अवस्थितः -ता -तं, निवेशितः -ता -तं, विनिवेशितः -ता -तं, रोपितः -ता -तं.

LOCATION, *s.* (Act of placing) स्थापनं, प्रतिष्ठापनं, निवेशनं, रोपणं, विन्यासः.—(Situation) स्थानं, अवस्थानं, अवस्थितिः *f.*, प्रतिष्ठा, प्रतिष्ठानं, स्थितिः *f.*, आधिकारण्यं, आधिकरण्यं.—(In grammar) अधिकरणं, आधिकारण्यं.

LOCATIVE, *s.* (Case in grammar) अधिकरणं, सप्तमी विभक्तिः.

LOCH, *s.* *See* LAKE.

LOCK, *s.* (Instrument for fastening doors, &c.) तालयन्त्रं, तालकं, तालः, अर्गलं, वितण्डः, द्वारयन्त्रं, द्वारकीलः.—(Of a gun) चूर्णज्वलनयन्त्रं, अग्निदयन्त्रं, अग्निजनकयन्त्रं.—(Of hair) अलकः, केशपाशः -शी, जटा, शिरोरुहः, काकपक्षः; 'clotted lock of an ascetic,' जटा, सटा, शटा; 'lock left on the crown or sides of the head at tonsure,' चूडा, शिखा, शिखण्डः -ण्डकः, शिखण्डिका, शिखाण्डकः, काकपक्षः, केशपाशी.—(In a river or canal) जलस्तम्भनी, जलप्रतिबन्धकं, जलबन्धनी, जलबन्धनयन्त्रं, महायन्त्रं.—(Hug) आलिङ्गनं, गाढालिङ्गनं, अङ्गसङ्गः.

To LOCK, *v. a.* (Fasten with a lock) तालयन्त्रेण बन्ध् (c. 9. बध्नाति बन्द्धुं), कील् (c. 10. कीलयति -यितुं), तालकेन or अर्गलेन बन्ध्, तालबद्धं -द्धां कृ; 'lock a door,' द्वारं बन्ध् or रुध् (c. 7. रुणद्धि, रोद्धुं), द्वाररोधं कृ.—(Close) पिधा (c. 3. -दधाति -धातुं), अपिधा, बन्ध्.—(Confine) रुध्, निरुध्.—(Embrace closely) गाढम् आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), गाढालिङ्गनं कृ.

To LOCK, *v. n.* (Be fastened) तालकेन बन्ध् in pass. (बध्यते) or बद्धीभू.—(Unite by mutual embrace) परस्पराश्लेषेण or परस्परालिङ्गनेन संलग्नीभू or सम्बद्धीभू, परस्परं संश्लिष्टः -ष्टा -ष्टं भू.

LOCKED, *p. p.* (Fastened by a lock) तालयन्त्रेण बद्धः -द्धा -द्धं, तालकबद्धः -द्धा -द्धं, अर्गलबद्धः &c., कीलितः -ता -तं.—(Confined) रुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं.—(Closely embraced) गाढालिङ्गितः -ता -तं, गाढाश्लिष्टः -ष्टा -ष्टं.

LOCKED-JAW, LOCK-JAW, *s.* हनुस्तम्भः, हनुग्रहः.

LOCKER, *s.* तालकयुक्तं कोष्ठकं, कोष्ठः, सम्पुटः -टकः, भाजनं.

LOCKET, *s.* (Clasp, catch) कुडुपः.—(Ornament) स्मरणकेशाधारः.

LOCKSMITH, *s.* तालककारः, तालककृत् *m.*, तालयन्त्रकारी *m.* (न्).

LOCOMOTION, *s.* (Act of moving from place to place) स्थानान्तरगमनं, स्थलान्तरगमनं, स्थानात् स्थानं गमनं, गमनागमनं, इतस्ततो गमनं or चलनं, स्थानान्तरकरणं, स्थलान्तरकरणं, स्थानान्तरं, स्थलान्तरं, चीङ्खा.—(Power of moving from place to place) स्थानान्तरगमनशक्तिः *f.*, चलनशक्तिः *f.*, गमनागमनशक्तिः *f.*

LOCOMOTIVE, *a.* जङ्गमः -मा -मं, चलः -ला -लं, चलनः -ना -नं, चलनशीलः -ला -लं, चलनधर्म्मकः -का -कं, चलनशक्तिकः -का -कं, चरः -रा -री -रं, चरिष्णुः -ष्णुः -ष्णु, सृत्वरः -रा -रं, गामुकः -का -कं, गतिमान् -मती -मत् (त्), गत्वरः -री -रं, गमनशक्तिविशिष्टः -ष्टा -ष्टं, पादुकः -का -कं.

LOCUM-TENENS, *s.* प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तकः.

LOCUS, *s.* (In astronomy or geometry) निधिः *m.*

LOCUST, *s.* शलभः, शरभः, शकुन्तिका, झिरिः *m.*, पतङ्गः, शूककीटः.

LOCUTION, *s.* उक्तिः *f.*, वाक्यं, उक्तं, वाक् *f.* (च्), वाग्व्यापारः.

LODE, *s.* (Metallic vein) धातुरेखा, धातुपद्धतिः -ती *f.*

LODESTONE, *s.* *See* LOADSTONE.

LODH, *s.* (Tree, the bark of which is used in dyeing) लोध्रः, लोध्रः, पट्टिका, पट्टी, क्रमुकः, लाक्षाप्रसादनः, गालवः, शाबरः, तिरीटः, तिल्वः, मार्ज्जनः.

To LODGE, *v. a.* (Furnish with a temporary habitation) वस् (c. 10. वासयति -यितुं), निवस्, वासस्थानं दा, आश्रयं दा, निरूपितकालपर्य्यन्तं वस्.—(Fix, set, place) स्था in caus. (स्थापयति -यितुं), न्यस् (c. 4. -अस्यति -असितुं), निधा (c. 3. -दधाति -धातुं), प्रणिधा, प्रतिनिधा, निविश् (c. 10. -वेशयति -यितुं), ऋ in caus. (अर्पयति -यितुं), रुह् in caus. (रोपयति -यितुं).

To LODGE, *v. n.* (Reside temporarily) वस् (c. 1. वसति, वस्तुं), निवस्, आवस्, प्रतिवस्, समावस्, सन्निवस्, आश्रि (c. 1. -श्रयति -ते -यितुं), वासं कृ, निवासं कृ, आश्रयं कृ, निरूपितकालपर्य्यन्तं वस्; 'having lodged,' उषित्वा, उष्ट्वा, उष्य; 'having lodged for a night,' रात्रिम् एकाम् उषित्वा.—(Rest, remain) स्था (c. 1. तिष्ठति, स्थातुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), निली (c. 4. -लीयते -लेतुं), संली.—(Become fixed, adhere) अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं or pass. -बध्यते), लग् (c. 1. लगति -गितुं).

LODGE, *s.* उद्यानगृहं, उद्यानस्थगृहं, उपगृहं, उटजः, कुटीरः.

LODGED, *p. p.* वासितः -ता -तं, कृतावासः -सा -सं.—(Placed, fixed, deposited) स्थापितः -[illegible] -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, अर्पितः -[illegible], निवेशितः -ता -तं, निविष्टः -ष्टा -ष्टं, निश्चितः -ता -तं, निरूढः -[illegible]ढं.

LODGER, *s.* (One who lies [illegible]ards in another's house at a settled rate) निरूपितमूल्ये[illegible] निवासी *m.* (न्) or भोजनशयनादिकर्त्री *m.* (न्), निरूपितकालपर्य्यन्तं परगृहे वासी *m.* or वासकृत् *m.*

LODGING, *s.* वासः, निवासः, वासस्थानं, आवासः, आवासस्थानं, वसतिः *f.*, निवसतिः *f.*, निवेशनं, निकेतः -तनं, आयतनं, निलयः -यनं, आलयः, अवस्थानं, आवसथः, आश्रयः, संश्रयः, कृतावासः, वेश्म *n.* (न्); 'he asked a lodging,' आवासं प्रार्थितवान्.

LODGMENT, *s.* (The act) स्थापनं, संस्थापनं -ना, निवेशनं, वासः -सनं.—(The state) स्थितिः *f.*, अवस्थितिः *f.*, संस्थितिः *f.*—(Encampment) निवेशनं, समावासः.

LOFT, *s.* उपरिकोष्ठः, उपरिस्थकोष्ठः, उपरिस्थः प्रकोष्ठः, अट्टः -ट्टालः.

LOFTILY, *adv.* (Haughtily) सदर्पं, सगर्व्वं, साटोपं, सावहेलं, सावलेपं, दर्पेण, गर्व्वे[illegible]तं, औद्धत्येन.—(On high) उच्चैस्, उच्चकैस्, ऊर्द्ध्वं.

LOFTINESS, *s.* (Height) उच्चत्वं -ता, उन्नतिः *f.*, समुन्नतिः *f.*, उत्कर्षः, उत्कृष्टता, तुङ्गता, उत्तुङ्गता, उच्छ्रयः, समुच्छ्रयः, उच्छ्रितिः *f.*, उत्सेधः, समुत्सेधः, उच्चता, ऊर्द्धत्वं -ता, प्रोच्चता, प्रांशुता, औत्कर्ष्यं.—(Haughtiness) उद्धतिः *f.*, औद्धत्यं, चित्तसमुन्नतिः *f.*, चित्तोन्नतिः *f.*, साटोपत्वं, आटोपः, अभिमानं -निता, अवहेला, अवलेपः, अवलिप्तता, सावलेपत्वं, दर्पः, दृप्तता, गर्व्वः, शौटीर्य्यं, शौण्डीर्य्यं, प्रौढता, प्रगल्भता.

LOFTY, *a.* (High) उच्चः -च्चा -च्चं, अत्युच्चः &c., प्रांशुः -शुः -शु, तुङ्गः -ङ्गा -ङ्गं, उत्तुङ्गः -ङ्गा -ङ्गं, उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, अभ्युच्छ्रितः -ता -तं, उदग्रः -ग्रा -ग्रं, उदग्रः -ग्रा -ग्रं, ऊर्द्ध्वः -र्द्ध्वा -र्द्ध्वं, उत्कृष्टः -ष्टा -ष्टं, सोच्छ्रायः -या -यं, उन्नतः -ता -तं, उत्तालः -ला -लं, करालः -ला -लं, विलङ्घिताकाशः -शा -शं.—(Haughty) उद्धतः -ता -तं, समुद्धतः -ता -तं, गर्व्वोद्धतः -ता -तं, दर्पोद्धतः -ता -तं, दृप्तः -प्ता -प्तं, उन्नतचेताः -ताः -तः (स्), उच्चचेताः &c., उत्सिक्तः -क्ता -क्तं, गर्व्वी -र्व्विणी -र्व्वि (न्), गर्व्वितः -ता -तं, साटोपः -पा -पं, अवलिप्तः -प्ता

-मं, सावहेलः -ला -लं, ऊर्द्ध्वदृष्टिः -ष्टिः -ष्टि, मदोद्धतः -ता -तं, मदोदग्रः -ग्रा -ग्रं, शौटीरः -रा -रं, शौण्डीरः -रा -रं, प्रौढः -ढा -ढं.

Log, *s.* (Shapeless or bulky piece of wood) स्थूलकाष्ठं, स्थूलदारु: *m.*, काष्ठखण्डः -ण्डं, वृहत्काष्ठं, दारुखण्डः, वृहद्दारुखण्डः, काष्ठं.—(Machine for measuring the velocity of a ship) नौकागतिमापकयन्त्रं, परिमापककाष्ठं.

Log-book, *s.* नौकागतिक्रियमयकं दैनिकविवरणपुस्तकं.

Logarithm, *s.* घातप्रमापकः, घातप्रमापकसंख्या, लाग्रतमाख्यसंख्या, परिकर्म्म *n.* (न्).

Logarithmic, *a.* घातप्रमापकसम्बन्धी -न्धिनी -न्धि (न्).

Loggerhead, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मूढः, मूर्खः, जडः, जडबुद्धिः *m.*, जडमतिः *m.*, बर्ब्बरः, वटुकः.

Loggerheaded, *a.* स्थूलबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडबुद्धिः.

Logic, *s.* तर्कः, तर्कविद्या, तर्कशास्त्रं, न्यायः, न्यायविद्या, न्यायशास्त्रं, विचार[illegible] व्यूहः, प्रोहः, अभ्यूहः, निरूहः, ऊहः, वैशेषिकं, आन्वीक्षि[illegible]ानोक्तिः *f.*, ध्रुवः. The न्याय school was instituted by [illegible]e Gautama, the branch of it called वैशेषिकं was f[illegible] Kanáda. The following are some of the te[illegible]ogic; 'universal pervadence or extension,' व्याप्ति[illegible]; 'extreme extension or conclusion unwa[illegible]mises,' अतिव्याप्तिः; 'individual or part[illegible]ar extens[illegible]f., अव्याप्यवृत्तिः *f.*; sign of the [illegible]ce of an i[illegible]rty,' व्याप्तिलक्षणं; 'subject [illegible]ference,' [illegible]er terms are उपलप्रक्षेपः, उ[illegible], प्रवृत्तिनिमि[illegible], व्याप्यकोटिः *f.*, सिद्धसाधनदोषः.

Logic[illegible]Pertaining to logic) तार्किकः -की -कं, न्यायी -यिनी -यि (न[illegible]यिकः -की -कं, तर्कसम्बन्धी -न्धिनी &c., तर्कविद्यासम्बन्धी &c., [illegible]विषयः -या -यं, तर्कशास्त्रविषयः &c., प्रोहः -हा -हं, [illegible]यौक्तिकः -की -कं; 'logical conclusion,' विनिगमः, [illegible]ording to the rules of logic) तर्कशास्त्रसिद्धः -द्धा [illegible]द्धः &c., युक्तिसिद्धः &c., तर्कानुसारी -रिणी &c., न्या[illegible]नुस[illegible]&c., न्यायशास्त्रानुसारी &c., तर्कशास्त्रसम्मतः -ता -तं, न्यायशास्त्रसम्मतः -ता -तं, तर्कशास्त्रानुयायी -यिनी &c.

Logically, *adv.* न्यायतस्, यथान्यायं, तर्कानुसारेण, न्यायानुसारेण, तर्कशास्त्रानुसारेण, तर्कशास्त्रानुरूपेण, न्यायशास्त्रवत्.

Logician, *s.* तर्की *m.* (न्), तार्किकः, नैयायिकः, न्यायविद् *m.*, तर्कशास्त्रज्ञः, न्यायशास्त्रज्ञः, न्यायशास्त्रपण्डितः, न्यायशास्त्रवेत्ता *m.* (तृ), तर्कशास्त्री *m.*, (न्), न्यायशास्त्री *m.*, सांवादिकः, ऊही *m.*; 'versed in the system of Gautama,' आक्षपादः, अक्षपादः; 'in that of Kanáda,' वैशेषिकः.

Logomachy, *s.* वाग्युद्धं, वाक्कलहः -हं.—(Dispute about words) शब्दवादः, शब्दविवादः, शब्दयुद्धं.

Logwood, *s.* (A kind of wood used in dyeing) पतङ्गः.

Loin, *s.* श्रोणिः -णी *f.*, कटिः -टी *f.*, कटिदेशः, श्रोणिदेशः, श्रोणिफलकं, श्रोणितटं, कटीतटं, कटितटं, नितम्बः, जघनं, ककुद्मती, कलत्रं, प्रोथः, कटः, कटिशीर्षकं; 'girding the loins,' कटिबन्धनं; 'having the loins girded,' बद्धकटिः -टिः -टि; 'the cavities of the loins,' कुकुन्दरे *n.* du., ककुन्दरे *n.* du., कटीरे *n.* du., कटीरः, कटः; 'girdle worn round the loins,' कटिसूत्रं, कटिशृङ्खला, श्रोणिबिम्बं; 'sprung from one's loins,' अङ्गजः -जा -जं, अङ्गजातः -ता -तं.

To loiter, *v. n.* विलम्ब् (c. 1. -लम्बते -म्बितुं), मन्द (nom. मन्दायते), विलम्बनं कृ, विलम्बं कृ, कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), कालक्षेपं कृ, अवस्था (c. 1. -तिष्ठति -स्थातुं), चिर (nom. चिरयति, चिरायति), चिरं or चिरकालं स्था or अवस्था, मन्दं मन्दं चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं), विलम्बेन गम् (c. 1. गच्छति, गन्तुं).

Loiterer, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.*, विलम्बगतिः *m.*, विलम्बगामी *m.* (न्), मन्दगामी *m.*, मन्दगतिः *m.*, कालक्षेपकः.

Loitering, *part.* मन्दायमानः -ना -नं, मन्दयमानः -ना -नं, विलम्बी -म्बिनी -म्बि (न्), विलम्बगामी -मिनी &c., चिरायमाणः -णा -णं.

Loitering, *s.* विलम्बनं, विलम्बगमनं, मन्दगमनं, कालक्षेपः.

To loll, *v. n.* (Recline lazily) आलस्येन शी (c. 2. शेते, शयितुं) or अवलम्ब् (c. 1. -लम्बते -म्बितुं) or संविश् (c. 6. -विशति -वेष्टुं), सुखेन शी or अवलम्ब्.—(Loll the tongue) जिह्वां लल् or लड् (c. 1. ललति, लडति, c. 10. लालयति, लडयति -यितुं), जिह्वाललनं कृ, जिह्वां वहिष्कृ; 'one who lolls the tongue,' ललजिह्वः -ह्वा -ह्वं.

Lolling, *s.* (Of the tongue) ललनं, जिह्वाललनं.—(Lolling and languishing as indicative of passion) लालित्यं, ललितं, लालनं.

Lone, lonely, *a.* (Solitary, unfrequented) निर्जनः -ना -नं, विजनः -ना -नं, विलोकः -का -कं, निर्मनुजः -जा -जं, निर्मनुष्यः -ष्या -ष्यं, एकान्तः -न्ता -न्तं, विविक्तः -क्ता -क्तं, निभृतः -ता -तं, जनानाकीर्णः -र्णा -र्णं, जनैरनाकीर्णः &c., निःशलाकः -का -कं, निश्शलाकः &c., न्यूनसञ्चारः -रा -रं, हीनसञ्चारः -रा -रं; 'a lonely place,' निर्जनस्थानं.—(Single, standing by itself) एकाकी -किनी -कि (न्), एकः -का -कं, असहायः -या -यं, असङ्गः -ङ्गा -ङ्गं, केवलः -ला -लं, केवली -लिनी &c.—(Fond of solitude) विविक्तप्रियः -या -यं, विविक्तसेवी -विनी &c., एकान्तप्रियः -या -यं, एकान्तसेवी &c.

Loneliness, *s.* (Solitude, retirement) निर्जनता, विजनता, विविक्तता, विविक्तं, निर्मनुष्यता, निभृतता, एकान्तत्वं, निःशलाकता, सञ्चारहीनता, सञ्चारन्यूनता, एकाकिता -त्वं, असहायता, असङ्गता.—(Love of retirement) [illegible] विविक्तप्रीतिः *f.*, विविक्तरुचिः *f.*, एकान्तप्रीतिः *f.*

Lonesome, *a.* निर्जनः -ना -नं, विजनः -ना -नं, दारुणः -णा -णं, निरानन्दः -न्दा -न्दं; 'a lonesome road,' प्रान्तरं.

Lonesomeness, *s.* निर्जनता, विजनता, विविक्तता, निरानन्दता, दारुणता.

Long, *a.* (In time or space) दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), आयतः -ता -तं, आयामी -मिनी -मि (न्), आयामवान् -वती &c., व्यायतः -ता -तं, आयतिमान् -मती &c., लम्बः -म्बा -म्बं, चिर in comp., this last is restricted to time. (Long in extent or size) दीर्घपरिमाणः -णा -णं, दीर्घाकारः -रा -रं, दीर्घाकृतिः -तिः -ति, दीर्घतनुः -नुः -नु.—(Extended) आयतः -ता -तं, समायतः -ता -तं, आयामितः -ता -तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, प्रसृतः -ता -तं.—(Tedious, dilatory) दीर्घसूत्रः -त्रा -त्रं, चिरकारी -रिणी &c., चिरक्रियः -या -यं, विलम्बकारी &c., विलम्बी -म्बिनी &c., दीर्घसूत्री -त्रिणी &c., प्रलम्बः -म्बा -म्बं.—(Continuing for a long time) दीर्घकालीनः -ना -नं, चिरकालीनः -ना -नं, दीर्घकालिकः -की -कं, चिरकालिकः &c., चिरस्थः -स्था -स्थं, चिरस्थायी -यिनी &c., चिरस्थितः -ता -तं, चिरन्तनः -नी -नं, चिरत्नः -त्नी -त्नं, दीर्घकालस्थायी -यिनी &c., चिरकालस्थायी -यिनी &c.—(Long, in the sense of distant) दूरः -रा -रं, विदूरः -रा -रं; 'going a long way,' दूरगः -गा -गं; 'a long way off,' दूरस्थः -स्था -स्थं, दूरस्थायी -यिनी &c.—(Extended to any measure) expressed by परिमाणः -णा -णं or परिमितः -ता -तं or मितः -ता -तं in comp.; as, 'a line an inch long,' अङ्गुलपरिमाणा or अङ्गुलपरिमिता or

अङ्गुलमिता रेखा; 'four fingers long,' चतुरङ्गुलः -ली -लं, चतुरङ्गुलपरिमितः -ता -तं.—(A long period) दीर्घकालः, चिरकालः, बहुकालः, अनेककालः, आयतायतिः f.; 'for a long time,' दीर्घकालं, चिरकालं, बहुकालं -लात्, अनेककालं, चिरं -रेण -रात् -राय, चिरदिवसं, चिररात्रं -त्राय, दीर्घरात्रं; 'long absent,' चिरगतः -ता -तं, चिरप्रवासी -सिनी &c.; 'long ill,' दीर्घरोगी -गिणी &c., दीर्घामयः -या -यं, चिररोगी &c.; 'long sought for,' चिरचेष्टितः -ता -तं; 'cherished for a long time,' चिरकालपालितः -ता -तं, चिरपालितः &c.; 'accumulated after a long time,' चिरकालोपार्जितः -ता -तं, चिरलब्धः -ब्धा -ब्धं; 'living long,' दीर्घजीवी -विनी &c., चिरजीवी &c.; 'a long life,' दीर्घजीवः; 'long since abandoned,' चिरोज्झितः -ता -तं, 'for a short time,' अल्पकालं, अल्पमात्रं, कियत्कालं, 'lasting for a short time,' अल्पस्थायी -यिनी &c., 'the long run,' आयतिः f., 'long-haired,' दीर्घकेशः -शी -शं; 'long-leaved,' दीर्घपत्रः -त्रा -त्रं, दीर्घपर्णः -र्णा -र्णं; 'long-tongued,' दीर्घजिह्वः -ह्वा -ह्वं, दीर्घरसनः -ना -नं, 'having a long line of ancestors,' दीर्घवंशः -शा -शं, 'a long journey,' दीर्घवर्त्म n. (न्), दीर्घाध्व n. (न्), 'a long vowel,' दीर्घस्वरः, 'the long sound of vowels,' प्लवः, प्लुतः -तं, 'long syllable,' दीर्घाक्षरं, हारः.

Long, *adv.* (To a great extent in space) दूरं, विदूरं, दूरतस्, दूरपर्य्यन्तं, दीर्घपर्य्यन्तं, दीर्घपरिमाणं -णेन.—(To a great extent in time, for a long period) दीर्घकालं, चिरकालं -लात्, बहुकालं -लात्, अनेककालं, चिरं -रेण -राय -रात् -रस्य -रे, चिरदिवसं, चिररात्रं -त्राय, दीर्घरात्रं -त्राय, बहुकालपर्य्यन्तं, दीर्घकालपर्य्यन्तं; 'very long,' सुचिरं -रेण -रात्; 'how long?' कियत्कालं, कियन्तं कालं, कियता कालेन, कियत्कालपर्य्यन्तं, कियत्कालं यावत्, कतिकालं; 'how long!' कियच्चिरं -रेण -रात्; 'ere long,' अचिरेण -रात्; 'long ago,' प्रागेव, प्राक्काले, पूर्व्वं, पूर्व्वकाले, अतीतदीर्घकाले, गतदीर्घकाले, व्यवहितपूर्व्वकाले; 'not long ago,' अव्यवहितपूर्व्वकाले; 'as long,' यत्कालं, यावत्कालं, यत्क्षणं; 'so long,' तत्कालं, तावत्कालं, तत्क्षणं.—(Through the whole extent or duration of) पर्य्यन्तं affixed, आ prefixed, यावत्; as, 'the whole year long,' वर्षपर्य्यन्तं, आवर्षान्तात्; 'whole life, as long as one lives,' यावज्जीवं, आमरणात्, मरणं यावत्; 'long-absent, long-ill, long-sought, &c.' *See* under Long, *a.*

To long, *v. n.* (Desire eagerly) अत्यन्तम् अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं) or वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं) or अभिवाञ्छ् or कांक्ष् (c. 1. कांक्षति -क्षितुं) or आकांक्ष् or अभिकांक्ष् or अनुकांक्ष्, अतिशयेन स्पृह् (c. 10. स्पृहयति -यितुं) or इष् (c. 6. इच्छति, एषितुं) or आप् in des. (ईप्सति -प्सितुं) or अभ्याप् or पर्य्याप् or लभ् in des. (लिप्सते -प्सितुं) or अभिलभ् or अभिरुच् (c. 10. -रोचयति -यितुं) or कम् (c. 10. कामयते -यितुं) or ईह् (c. 1. ईहते -हितुं) or समीह्, लुभ् (c. 4. लुभ्यति, लोब्धुं), गृध् (c. 4. गृध्यति, गर्धितुं), भुज् in des. (बुभुक्षति -ते -क्षितुं), तृष् (c. 4. तृष्यति, तर्षितुं), आशंस् (c. 1. -शंसते -सितुं), आशास् (c. 2. -शास्ते, c. 1. -शासते -सितुं), अभिध्यानं कृ.—(As a pregnant woman) दोहदं कृ, दोहदवती भू, दौहदिनी भू.

Longanimity, *s.* सहनशीलता, चिरसहिष्णुता, क्षमा, क्षान्तिः f.

Long-armed, *a.* दीर्घबाहुः -हुः -हु, दीर्घभुजः -जा -जं, लम्बहस्तः -स्ता -स्तं.

Long-bellied, *a.* लम्बोदरः -रा -रं, लम्बजठरः -रा -रं, दीर्घोदरः -रा -रं.

Long-boat, *s.* दीर्घनौका, वृहन्नौका, महानौका, उपनौका.

Long-concealed, *a.* चिरगुप्तः -प्ता -प्तं, चिरकालप्रच्छन्नः -न्ना -न्नं.

Long-continued, *a.* चिरस्थितः -ता -तं, चिरकालस्थायी -यिनी -यि (न्).

Long-eared, *a.* लम्बकर्णः -र्णा -र्णं, दीर्घकर्णः -र्णा -र्णं, आयतकर्णः -र्णा -र्णं.

Long-eyed, *a.* आयताक्षः -क्षी -क्षं, आयतनेत्रः -त्रा -त्रं, दीर्घनयनः -ना -नं.

Long-faced, *a.* दीर्घमुखः -खी -खं, दीर्घवक्त्रः -क्त्रा -क्त्रं, दीर्घाननः -ना -नं.

Long-forgotten, *a.* चिरविस्मृतः -ता -तं, चिरकालविस्मृतः -ता -तं.

Long-headed, *a.* विदग्धमतिः -तिः -ति, अपक्वमतिः &c., निपुणमतिः &c., सूक्ष्मबुद्धिः -द्धिः -द्धि, दीर्घसन्धानी -निनी -नि (न्).

Long-lasting, *a.* चिरस्थायी -यिनी -यि (न्), चिरकालस्थायी &c., चिरस्थः -स्था -स्थं, चिरकालीनः -ना -नं, चिरकालिकः -की -कं, दीर्घकालिकः -की -कं.

Long-legged, *a.* दीर्घजङ्घः -ङ्घा -ङ्घं, दीर्घपादः -दा -दं, आयतजङ्घः &c., ऊर्द्ध्वजानुः -नुः -नु, ऊर्द्ध्वज्ञः -ज्ञा -ज्ञं, ऊर्द्ध्वज्ञुः -ज्ञुः -ज्ञु, दीर्घसक्थः -क्था -क्थं.

Long-lived, *a.* दीर्घजीवी -विनी -वि (न्), चिरजीवी &c., चिरञ्जीवी &c., चिरजीवकः -का -कं, दीर्घायुः -युः -यु or दीर्घायुः -युः -युः (स्), चिरायुः &c., दीर्घायुष्यः -ष्या -ष्यं, चिरायुष्यः &c., आयुषः -षी -षं, जीवथः -था -थं, जैवातृकः -का -कं, आयुष्मान् -ष्मती -ष्मत् (त्); this last is generally used in addressing a king or superior in the voc. c.; as, 'O long-lived one,' आयुष्मन्.

Long-lost, *a.* चिरगतः -ता -तं, चिरभ्रष्टः -ष्टा -ष्टं, चिरकालगतः -ता -तं.

Long-necked, *a.* दीर्घग्रीवः -वा -वं, आयतग्रीवः &c., दीर्घकन्धरः -रा -रं.

Long-pepper, *s.* पिप्पली -लिः f., शौण्डी, कोला, उपणा, कृष्णा, उपकुल्या, मागधी, वैदेही, चपला, कणा, वशिरः, वसिरः, श्रेयसी, करिपिप्पली, कपिवल्ली, कोलवल्ली, चव्यं -व्या, चवी, चविका -कं.—(Its root) पिप्पलीमूलं, ग्रन्थिकं, चटिकाशिरस् n.

Long-sighted, *a.* दीर्घदर्शी -र्शिनी -र्शि (न्), दीर्घदृष्टिः -ष्टिः -ष्टि, दूरदर्शी &c., दूरदृष्टिः -ष्टिः -ष्टि.

Long-sightedness, *s.* दीर्घदृष्टिः f., दीर्घदर्शनं, दूरदृष्टिः f., दूरदर्शनं.

Long-sufferance, long-suffering, *s.* सहनशीलता, सहिष्णुता, चिरसहिष्णुता -त्वं, चिरसहनं, बहुक्षमता, क्षमा, क्षान्तिः f., सहनं, तितिक्षा, अपकारे ऽपि चिरक्रोधानाविकारः.

Long-suffering, *a.* सहनशीलः -ला -लं, सहिष्णुः -ष्णुः -ष्णु, चिरसहिष्णुः -ष्णुः -ष्णु, बहुक्षमः -मा -मं, बहुसहः -हा -हं, सर्व्वंसहः -हा -हं, क्षमावान् -वती -वत् (त्), क्षान्तः -न्ता -न्तं, क्षमी -मिणी -मि (न्), तितिक्षुः -क्षुः -क्षु.

Long-winded, *a.* दीर्घसूत्रः -त्रा -त्रं -त्री -त्रिणी -त्रि (न्), कष्टजनकः -का -कं

Longer, *a.* दीर्घतरः -रा -रं, द्राघीयान् -यसी -यः (स्); 'for a longer period,' दीर्घतरकालं, बहुतरकालं; 'why do you delay any longer?' किम् अतःपरं विलम्बसे.

Longest, *a.* दीर्घतमः -मा -मं, द्राघिष्ठः -ष्ठा -ष्ठं; 'for the longest period,' दीर्घतमकालं, सुदीर्घकालं.

Longeval, longevous, *s.* दीर्घजीवी -विनी -वि (न्), चिरजीवी &c. *See* Long-lived.

Longevity, *s.* दीर्घजीवः, चिरजीवित्वं, दीर्घजीवित्वं, चिरञ्जीवित्वं, दीर्घायुष्यं, चिरायुष्यं, चिरायुस् n., दीर्घायुस् n., आयुस् n.; 'conducive to longevity,' आयुष्यः -ष्या -ष्यं.

Longimanous, *a.* दीर्घहस्तः -स्ता -स्तं, दीर्घपाणिः -णिः -णि, लम्बहस्तः &c.

Longimetry, *s.* दूरत्वमितिः f., दूरत्वमापनं, दैर्घ्यमानं, दैर्घ्यमापनं.

Longing, *s.* अत्यभिलाषः, अतिस्पृहा, अत्यन्तवाञ्छा, अतीच्छा, अतिशयेच्छा, अतिकांक्षा, अत्याकांक्षा, लालसा, उत्कण्ठा, कौतूहलं, औत्सुक्यं, कामः, तृष्णा, अतिलिप्सा, इच्छा, आशा, कांक्षा, अभिकांक्षा, नितान्तस्पृहा; 'longing of a pregnant woman,' दोहदं.

LONGING, *part.* or *a.* (Eagerly desirous) अत्यभिलाषी -षिणी -षि (न्), अत्याकांक्षी -क्षिणी &c., आकांक्षन् -क्षन्ती -क्षत् (त्), अतीच्छः -च्छा -च्छं, अतिलिप्सुः -प्सुः -प्सु, कुतूहली -लिनी &c., उत्सुकः -का -कं, उत्कः -त्का -त्कं, उत्कण्ठितः -ता -तं, कग्रः -ग्रा -ग्रं, लालसी -सिनी &c., स्पृहयालुः -लुः -लु; 'a longing woman,' दोहदवती, दौहृदिनी, दोहदान्विता.

LONGITUDE, *s.* द्राघिमा *m.* (न्), ध्रुवकः.—(Position to east or west) रेखान्तरं, रेखांशः; 'of a country,' देशान्तरं.—(Of the earth) रेखांशः, रेखापरिधिः *m.*, रेखागणः, रेखासमूहः.—(Of any point or object in the heavens) भोगः; 'of the sun,' रविभोगः; 'of a planet reckoned from the vernal equinoctial point,' सायनं.—(Meridian or circle of longitude) याम्योत्तरवृत्तं, रेखावृत्तं, रेखांशवृत्तं.

LONGITUDINAL, *a.* अन्वायतनः -ना -नं, अनुदैर्घ्यः -र्घ्या -र्घ्यं, अनुद्राघिमा -मा -म (न्), आयतः -ता -तं, आयतनानुसारी -रिणी -रि (न्), अन्वायतिः -तिः -ति.

LOOBILY, *adv.* स्थूलजनवत्, असभ्यजनवत्, ग्राम्यजनवत्, वृषलवत्.

LOOBY, *s.* स्थूलजनः, ग्राम्यजनः, असभ्यजनः, स्थूलबुद्धिः *m.*, वृषलः.

To LOOK, *v. a.* (Direct the eye, look at) दृश् (c. 1. पश्यति, द्रष्टुं) अनुदृश्, प्रतिदृश्, अभिदृश्, परिदृश्, सन्दृश्, ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, वीक्ष्, अभिवीक्ष्, प्रेक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, अवेक्ष्, अन्वीक्ष्, निरीक्ष्, उदीक्ष्, आलोक (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक, अवलोक्, विलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), निर्वर्ण् (c. 10. -वर्णयति -यितुं), लक्ष् (c. 10. लक्षयति -ते -यितुं), आलक्ष्, समालक्ष्, उपलक्ष्, संलक्ष्, दृष्टिं कृ, विलोकनं कृ, अवलोकनं कृ.—(Look about) समन्तात् or समन्ततस् or इतस्ततो दृश्.—(Look after, search for) अन्विष् (c. 4. -इष्यति -एषितुं), निरूप्, अवेक्ष्, परीक्ष्.—(Look after, take care of) पाल् (c. 10. पालयति -यितुं), रक्ष् (c. 1. रक्षति -क्षितुं), गुप् (c. 1. गोपायति, गोप्तुं), अवेक्ष्.—(Look at, consider) अवेक्ष्, समीक्ष्, आलोक, आलोच्, आलक्ष्, निरूप्, मन् (c. 4. मन्यते, मन्तुं), अवेक्षां कृ.—(Look down) अवलोक्, अधो दृश्.—(Look down on, despise) अवमन्, उपेक्ष्, उपप्रेक्ष्.—(Look for, expect) प्रतीक्ष्, अपेक्ष्, व्यपेक्ष्, सम्प्रतीक्ष्, उदीक्ष्, निरीक्ष्, प्रतिपाल्, उद्दृश्.—(Look into) निरीक्ष्, परीक्ष्, निरूप्; 'look into affairs,' कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, कार्य्यावेक्षणं कृ.—(Look on, regard) अवेक्ष्, अपेक्ष्, प्रतीक्ष्, आलोक्, निरूप्, मन्, दृश्.—(Look on, be a spectator) प्रेक्ष्, दृश्, मिष् (c. 6. मिषति, मेषितुं), प्रेक्षकः -का -कं भू.—(Look over) परीक्ष्, अनुसन्धा (c. 3. -दधाति -धातुं), निरूप्.—(Look out, be on the watch) अवधा, सावधानः -ना -नं भू, सावहितः -ता -तं भू, अवधानं कृ.—(Look up) उदीक्ष्, उद्वीक्ष्, उद्दृश्, ऊर्द्ध्वं दृश्, उन्मुखीभू; 'to look up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि भू.—(Look up to, esteem) सम्मन्, प्रतिमन्, मन्.—(Seem, appear) प्रतिभा (c. 2. -भाति -तुं), सम्प्रभा, आभा, निर्भा, दृश् in pass. (दृश्यते), लक्ष् in pass. (लक्ष्यते); 'to look well,' शुभ् (c. 1. शोभते -भितुं); 'he looks astonished,' विस्मित इव प्रतिभाति; 'look, look ye!' पश्य, पश्यत.

LOOK, *s.* दृष्टिः *f.*, दर्शनं, ईक्षणं, प्रेक्षणं -णा, प्रेक्षितं, वीक्षणं, वीक्षितं, आलोकनं, अवलोकनं, विलोकनं, दृष्टिपातः, दृष्टिनिपातः; 'a look of displeasure,' अदृष्टिः *f.*; 'side-look,' कटाक्षः, अर्द्धवीक्षणं, अर्द्धदृष्टिः *f.*, अपाङ्गदृष्टिः *f.*, अपाङ्गदर्शनं.—(Air, appearance) रूपं, आकारः, आकृतिः *f.*, दर्शनं, रीतिः *f.*, चर्य्या, प्रतिभा, आभा, छाया.—(Cast of countenance) वदनाकारः, मुखच्छाया, मुखं, वदनं.

LOOKED, *p. p.* दृष्टः -ष्टा -ष्टं, आलोकितः -ता -तं, ईक्षितः -ता -तं, दत्तदृष्टिः -ष्टिः -ष्टि; 'to be looked for,' अपेक्षणीयः -या -यं; 'having looked,' दृष्ट्वा, अवलोक्य, वीक्ष्य, निर्वर्ण्य, निरूप्य.

LOOKER, *s.* द्रष्टा *m.* (ष्टृ), दर्शी *m.* (न्), वीक्षकः, आलोचकः, विलोकनकृत्, अवलोकनकृत्.—(Looker on) प्रेक्षकः, प्रेक्षणिकः, प्रेक्षमाणः.

LOOKING, *part.* पश्यन् -श्यन्ती -श्यत् (त्), ईक्षमाणः -णा -णं, प्रेक्षमाणः -णा -णं, दर्शी -र्शिनी -र्शि (न्), दृष्टि in comp.; as, 'looking in all directions,' इतस्ततो दत्तदृष्टिः -ष्टिः -ष्टि; 'looking up,' ऊर्द्ध्वदृष्टिः -ष्टिः -ष्टि, उन्मुखः -खा -खं; 'looking up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि.—(Looking well, good-looking) सुदर्शनः -ना -नं, शुभदर्शनः -ना -नं, सुदृश्यः -श्या -श्यं, दर्शनीयः -या -यं, दृश्यः -श्या -श्यं, शुभाननः -ना -नी -नं, सुरूपः -पी -पं.

LOOKING, *s.* (Act of directing the eye) दर्शनं, दृष्टिः *f.*, दृष्टिपातः, ईक्षणं, वीक्षणं, प्रेक्षणं -णा, प्रेक्षा, आलोकः -कनं, आलोचनं, विलोकनं, अवलोकनं, सन्दर्शनं, निरूपणं, निर्वर्णनं, निध्यानं.—(Search) अन्वेषणं, संवीक्षणं, अनुसन्धानं.—(Looking for) अपेक्षा, प्रतीक्षा, व्यपेक्षा.

LOOKING-GLASS, *s.* दर्पणः -णं, आदर्शः, दर्शनं, आत्मदर्शः, प्रतिबिम्बाश्रयः, सम्मुखी *m.* (न्), मुकुरः, मकुरः, मकुरः, कर्करः, मण्डलकं; 'surface of a looking-glass,' आदर्शतलं.

LOOKING-GLASS MAKER, *s.* दर्पणकारः, दर्पणकृत्, दर्पणविक्रयी *m.* (न्).

LOOK-OUT, *s.* सुसमीक्षा, इतस्ततः समीक्षा, अवेक्षा, अवधानं, सावधानता.

LOOM, *s.* वेमा *m.* -म *n.* (न्), वेमः, वायदण्डः, वापदण्डः, वाणदण्डः, सूत्रयन्त्रं, आवापनं, तन्त्रं, तन्त्रयन्त्रं, कुविः *m.*

To LOOM, *v. n.* समुद्रमध्ये सुदूरस्थितत्वात् अस्पष्टाकारः -रा -रं or अतिस्थूलाकारः -रा -रं भू or विद् in pass. (विद्यते) or अस्पष्टरूपेण दृश् in pass. (दृश्यते).

LOON, *s.* कापुरुषः, अधमः, धूर्त्तः, लुटकः, कितवः, तुच्छजनः.

LOOP, *s.* (A folding, noose, &c.) शिक्यं -क्या, काचः, पुटः, व्यावर्त्तनं.—(Opening, aperture) छिद्रं, रन्ध्रं; 'suspended in a loop,' काचितः -ता -तं, शिक्यितः -ता -तं.

LOOP-HOLE, *s.* (Small opening in a wall, &c.) गवाक्षः -क्षं, जालं, वातायनं, रन्ध्रं, छिद्रं, प्रच्छदं.—(Means of escape) निर्गमः, निर्गतिः *f.*, निर्गमोपायः, निर्गमद्वारं, पलायनं, अपक्रमः, उद्धरणं, मुक्तिः *f.*, मोक्षः.

To LOOSE, LOOSEN, *v. a.* (Relax) शिथिलीकृ, शिथिल (nom. शिथिलयति -ते -यितुं), श्रथ् (c. 10. श्रथयति -यितुं), श्रथ् (c. 1. श्रथति, c. 10. श्रथयति, श्राथयति -यितुं), श्रन्थ् (c. 9. श्रथ्नाति, श्रन्थितुं), श्लथीकृ, प्रश्लथीकृ, स्रंस् (c. 10. स्रंसयति -यितुं), विस्रंस्, विगल् (c. 10. -गलयति -यितुं), विस्रस्तीकृ.—(Set free) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), अवमुच्, प्रमुच्, विमुच्, प्रविमुच्, निर्मुच्, उन्मुच्; मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्.—(Untie, unbind, unfasten) उद्ग्रन्थ् (c. 9. -ग्रथ्नाति, c. 1. -ग्रन्थति -न्थितुं), समुद्ग्रन्थ्, उन्मुच्, अवमुच्, वियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), विसन्धा (c. 3. -दधाति -धातुं), विसन्धीकृ, विपाश् (nom. -पाशयति -यितुं), ऋजूकृ.

To LOOSE, LOOSEN, *v. n.* (Become loose) शिथिलीभू, शिथिल (nom. शिथिलायते), श्लथ (nom. श्लथायते -ति), श्रथ (nom. श्रथायते), श्रन्थ् (c. 1. श्रन्थते -न्थितुं), श्लथीभू, स्रंस् (c. 1. स्रंसते -सितुं), स्रस्तीभू.—(Loose a ship) नौकां मुच् (c. 6. मुञ्चति, मोक्तुं) or चल् (c. 10. चालयति -यितुं).

LOOSE, *a.* (Not tight, lax) शिथिलः -ला -लं, श्लथः -था -थं, प्रश्लथः -था -थं, स्रस्तः -स्ता -स्तं, विस्रस्तः -स्ता -स्तं, विगलितः -ता -तं, चलितः

-ता -तं, अदृढः -ढा -ढं.—(Untied, unfastened) अबद्धः -द्धा -द्धं, मुक्तः -क्ता -क्तं, प्रमुक्तः &c., उद्ग्रन्थितः -ता -तं, उद्ग्रथितः -ता -तं, असन्धितः -ता -तं, विगलितः -ता -तं, बन्धनरहितः -ता -तं, बन्धनशून्यः -न्या -न्यं, अनिगृहीतः -ता -तं, उच्छ्वसितः -ता -तं, उद्दामः -मा -मं, उल्लूनः -ना -नं, उद्बद्धः -द्धा -द्धं.—(Free) मुक्तः -क्ता -क्तं, विमुक्तः -क्ता -क्तं.—(Not close or compact) विरलः -ला -लं, असंहतः -ता -तं, अदृढसन्धिः -न्धिः -न्धि, शिथिलसन्धिः &c.—(Not concise, rambling) असंक्षिप्तः -प्ता -प्तं, विस्तीर्णः -र्णा -र्णं.—(Indeterminate) अनियतः -ता -तं, अव्यवस्थितः -ता -तं, अनिर्णीतः -ता -तं, अपरिमितः -ता -तं, सन्दिग्धः -ग्धा -ग्धं.—(Unconnected) असम्बद्धः -द्धा -द्धं, निःसम्बन्धः -न्धा -न्धं, अबद्धः &c.—(Not rigid) अनियतः -ता -तं, अस्थिरः -रा -रं, अधीरः -रा -रं, अव्यवस्थितः -ता -तं.—(Dissolute) अनवस्थः -स्था -स्थं, व्यभिचारी -रिणी -रि (न्), दुराचारः -रा -रं, दुर्वृत्तः -त्ता -त्तं, अवशः -शा -शं, व्यसनी -निनी &c.; 'loose conduct,' व्यभिचारः; 'a loose man,' लम्पटः; 'a loose woman,' पुंश्चली, बन्धकी, भ्रष्टा, व्यभिचारिणी. *See* LAX. (To let loose) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. सर्ज्जयति -यितुं), बन्धनाद् मुच्. *See To* LOOSE. (To break loose) बन्धनानि भिद् (c. 7. भिनत्ति, भेत्तुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), मुक्तबन्धनः -ना -नं भू, बन्धनाद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), परिभ्रंश्, विभ्रंश्; 'broken loose,' प्रभ्रष्टः -ष्टा -ष्टं, बन्धनात्प्रभ्रष्टः &c., परिभ्रष्टः &c.

LOOSED, LOOSENED, *p. p.* शिथिलीकृतः -ता -तं, शिथिलितः -ता -तं, श्लथितः -ता -तं, स्रस्तः -स्ता -स्तं, विस्रस्तः &c., विगलितः -ता -तं, मुक्तः -क्ता -क्तं, विमुक्तः -क्ता -क्तं, मोचितः -ता -तं, विमोचितः -ता -तं, मोक्षितः -ता -तं, वीतः -ता -तं, मुक्तबन्धनः -ना -नं, बन्धनमुक्तः -क्ता -क्तं, छिन्नबन्धनः -ना -नं.

LOOSELY, *adv.* (Not firmly) शिथिलं, शैथिल्येन, सशैथिल्यं, अदृढं.—(Not closely) असंहतं, विरलं.—(Unconnectedly) असम्बद्धं, असम्बन्धेन.—(Not rigidly) अनियतं.—(Dissolutely) सव्यभिचारं, लम्पटवत्, दुर्वृत्तवत्.

LOOSENESS, *s.* (State of being loose or not tight) शिथिलता -त्वं, शैथिल्यं, श्लथता, प्रश्लथः, श्लथः, स्रंसः, विस्रंसः, स्रस्तता, विस्रस्तता, अदृढता, अधृतिः.—(Looseness of texture) विरलता, वैरल्यं, असंहतत्वं.—(Of morals or conduct) व्यभिचारः, अनवस्थितिः *f.*, अनवस्थता, व्यसनिता, लम्पटता, लाम्पट्यं, दुर्वृत्तता. *See* LAXITY, (Of bowels) मृदुकोष्ठत्वं, कोष्ठमृदुता, रेकः, रेचना -नं.

LOOSENING, LOOSING, *s.* शिथिलीकरणं, मोचनं, विमोचनं, मोक्षणं, विमोक्षणं, श्लथनं, श्रथनं, मुक्तिः *f.*

To LOP, *v. a.* छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, अपकृत् (c. 6. -कृन्तति -कर्त्तितुं), निकृत्, लू (c. 9. लुनाति, लवितुं), लुप् (c. 6. लुम्पति, लोप्तुं).

LOPPED, *p.p.* अवच्छिन्नः -न्ना -न्नं, लूनः -ना -नं, लुप्तः -प्ता -प्तं, कर्त्तितः -ता -तं.

LOPPER, *s.* छेत्ता *m.* (त्तृ), अवछेत्ता *m.*, छेदकः, छिद् in comp., लोपनकृत्.

LOPSIDED, *a.* एकपार्श्वे पतनशीलः -ला -लं or पतयालुः -लुः -लु.

LOQUACIOUS, *a.* वावदूकः -का -कं, वाचालः -ला -लं, बहुभाषी -षिणी -षि (न्), बहुवादी -दिनी &c., वाग्मी -ग्मिनी &c., जल्पकः -का -कं, जल्पाकः -का -कं, गदयिलुः -लुः -लु, वाचोयुक्तिपटुः -टुः -टु, मुखरः -रा -रं, वक्ता -क्त्री -क्तृ (क्तृ), अतिवक्ता &c.

LOQUACIOUSNESS, LOQUACITY, *s.* वावदूकता, वाचालता, बहुभाषित्वं, अतिभाषणं, अतिशयोक्तिः *f.*, अतिवादः, जल्पः -ल्पकता, जल्पितं, गदयिलुता, वाग्मित्वं, आयालापः, बहुवादित्वं, मुखरता, मौखर्य्यं.

LORD, *s.* ईश्वरः, ईशः, पतिः *m.*, स्वामी *m.* (न्), प्रभुः *m.*, नाथः, राजा *m.* (न्), अधीशः, अधिपतिः *m.*, अधिपः, अधीश्वरः, भर्त्ता *m.* (र्तृ), भगवान् *m.* (त्), इन्द्र in comp.; 'supreme lord,' अधिराजः, सर्व्वेश्वरः, सर्व्वस्वामी *m.*, अधिनाथः; 'lord of men,' नरेश्वरः, नराधिपः, नरेशः, नृपतिः *m.*, नरपतिः, नरेन्द्रः; 'lord of earth,' भूपतिः *m.*, भूमिपतिः *m.*, महीपतिः *m.*, पृथिवीपतिः, क्षितिपतिः; 'lord of heaven,' स्वर्गपतिः *m.*, स्वर्गराजः, स्वर्गभर्त्ता *m.* (र्तृ), नाक-नाथः; 'lord of beasts,' मृगेन्द्रः; 'my lord,' स्वामिन् voc. c.—(Husband) पतिः *m.*, भर्त्ता *m.*, स्वामी *m.*; 'lord of life,' जीवितेशः, प्राणेशः, प्राणनाथः, प्राणाधिनाथः.—(The Supreme Being) परमेश्वरः, परेश्वरः, ईश्वरः, भगवान्, प्रभुः *m.*; 'to be lord of,' ईश् (c. 2. ईष्टे, ईशितुं), प्रभू (c. 1. -भवति -वितुं).

To LORD, *v. n.* दर्पेण or धर्षेण or धर्षपूर्व्वम् आधिपत्यं कृ or ईश् (c. 2. ईष्टे, ईशितुं) or शास् (c. 2. शास्ति -सितुं).

LORDLINESS, *s.* (Imperiousness) धृष्टता, धर्षः, दर्पः, ऐश्वर्य्यदर्पः, अवलिप्तता, उत्सिक्तता, अवहेला, गर्व्वः, प्रगल्भा, प्रागल्भ्यं.

LORDLY, LORDLIKE, *a.* ईश्वरीयः -या -यं, ऐश्वरः -री -रं, ऐशः -शी -शं, ऐशिकः -की -कं, ईश्वरयोग्यः -ग्या -ग्यं, स्वामियोग्यः &c., प्रभुयोग्यः &c., राजकीयः -या -यं, ईश्वरार्हः -र्हा -र्हं, ईश्वरसदृशः -शी -शं, ईश्वरोचितः -ता -तं, ईश्वर in comp.; as, 'lordly nature,' ईश्वरभावः.—(Imperious) धृष्टः -ष्टा -ष्टं, धर्षी -र्षिणी -र्षि (न्), दृप्तः -प्ता -प्तं, गर्व्वितः -ता -तं, उद्धतः -ता -तं, अवलिप्तः -प्ता -प्तं, ऐश्वर्य्यदृप्तः &c.

LORDLY, *adv.* धर्षेण, ऐश्वर्य्यदर्पेण, ऐश्वर्य्यदृप्तवत्, सावहेलं, सधर्षं.

LORDSHIP, *s.* ऐश्वर्य्यं, ईशत्वं, आधिपत्यं, अधिपतित्वं, प्रभुत्वं, स्वामित्वं, पतित्वं, स्वाम्यं, राजत्वं, राज्यं, अधिकारः, अधिकारित्वं.—(Title) भवान् *m.* (त्), अत्रभवान्, तत्रभवान्, भगवान्, स्वामी *m.* (न्), प्रभु

LORD'S SUPPER, *s.* ख्रीष्टमृत्युस्मरणार्थकं भोजनं, ख्रीष्टमरणोद्देशकं भोजनं

LORE, *s.* पाण्डित्यं, विद्या, ज्ञानं, व्युत्पत्तिः *f.*, वैदुष्यं, विद्वत्ता.

LORN, *a.* निःशरणः -णा -णं, अशरणः -णा -णं. *See* FORLORN, *a.*

LORY, *s.* शुकः, कीरः, रक्तपर्णः शुकजातीयः पक्षिभेदः.

To LOSE, *v. a.* (Be separated or parted from a thing) हा in pass. (हीयते), प्रहा, विप्रहा, परिहा, विहा with instr. or sometimes with abl. c., भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), परिभ्रंश्, विभ्रंश्, प्रभ्रंश् with abl. c., च्यु (c. 1. च्यवते, च्योतुं), प्रच्यु, विच्यु with abl. c., वियुज् in pass. (-युज्यते) with instr. c., अपवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. of the person; 'he loses his life,' प्राणैः or प्राणेभ्यो हीयते; 'he loses his kingdom,' राज्याद् भ्रश्यति or च्यवते, तस्मात् राज्यम् अपवर्त्तते; 'he loses his friends,' सुहृज्जनैर् वियुज्यते.—(Let go, drop) हा (c. 3. जहाति, हातुं, or caus. हापयति -यितुं), विहा, अपहा, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हृ (c. 10. हारयति -यितुं), अपहृ; 'he lost his life,' प्राणान् जहौ; 'he loses his son,' पुत्रं जहाति; 'he loses his money,' धनं हारयति.—(Ruin, destroy, waste) नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, क्षि (c. 5. क्षिणोति, क्षेतुं, c. 10. क्षययति, क्षपयति -यितुं), ध्वंस् (c. 10. ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्, व्ययीकृ, अपचि (c. 5. -चिनोति -चेतुं), क्षिप् (c. 6. क्षिपति, क्षेप्तुं); 'he loses his wealth,' अर्थं नाशयति; 'he loses his time,' कालं क्षिपति, कालक्षेपं or कालहरणं करोति.—(Forfeit) दण्ड् in pass. (दण्ड्यते), भ्रंश् or च्यु with abl. c., वध् in pass. (वध्यते) with instr. c.; 'he loses his office,' स्वाधिकाराद् भ्रश्यति; 'he loses his reward,' फलाद् भ्रश्यति

फलेन वध्यते.—(Not to win, be defeated) पराजितः -ता -तं भू, जि in pass. (जीयते), पराजि; 'he loses the battle,' रणे जीयते. —(Lose the game) अक्षपराजयं जि or पराजि in pass., द्यूतक्रीडायां जि in pass., विदिव् (c. 4. -दीव्यति -देवितुं), पराजितः -ता -तं भू.—(Lose the way) पथात् or मार्गात् or पथो भ्रंश् or प्रभ्रंश् or च्यु or विच्यु or विचल् (c. 1. -चलति -लितुं), पथभ्रष्टः -ष्टा -ष्टं भू, वर्त्मवर्जितः -ता -तं भू.—(Lose one's wits) मुह् (c. 4. मुह्यति, मोहितुं), बुद्धिं हा, बुद्धिहीनः -ना -नं भू.—(Lose one's consciousness, lose one's self) चेतनां or चैतन्यं हा, नष्टचेतनः -ना -नं भू, मुर्छ् (c. 1. मूर्छति -र्छितुं), भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), भ्रान्तबुद्धिः -द्धिः -द्धि भू.

To lose, *v. n.* (Be defeated) जि in pass. (जीयते), पराजि, पराजितः -ता -तं भू.—(Decline, fail) क्षि in pass. (क्षीयते), परिक्षि, परिहा in pass. (-हीयते), ध्वंस् (c. 1. ध्वंसते -सितुं).

Loser, *s.* क्षतिप्रापकः, हानिप्रापकः, अपायप्रापकः, अनुभूतक्षयः, प्राप्तापायः, प्राप्तक्षयः, लब्धापायः, लब्धहानिः *m.*, अपायप्राप्तः, पराजितः.

Loss, *s.* क्षयः, हानिः *f.*, अपायः, क्षतिः *f.*, अपचयः, नाशः, अपचितिः *f.*, उपक्षयः, परिक्षयः, संक्षयः, क्षिया, व्ययः, ध्वंसः, प्रध्वंसः, परिध्वंसः, भ्रंशः, अपहारः, हारः, हरणं, अत्ययः, च्युतिः *f.*, त्यागः, परित्यागः, विनाशः, प्रणाशः, भ्रेषः, अलाभः, वियोगः, व्यसनं, दूषणं, प्रहीणः.—(Ruin, destruction) नाशः, विनाशः, क्षयः.—(Defeat) पराजयः, पराभवः, अपजयः, बलव्यसनं, भङ्गः.—(Profit and loss) लाभालाभौ *m.* du., लाभालाभं.—(Loss of caste) जातिभ्रंशः.—(Loss of time) कालक्षेपः, कालहरणं, कालव्ययः; 'without loss of time,' अकालक्षेपं.—(To be at a loss) मुह् (c. 4. मुह्यति, मोहितुं); 'at a loss,' भ्रान्तबुद्धिः -द्धिः -द्धि, मोहितः -ता -तं, विमूढः -ढा -ढं; 'at a loss how to act,' इतिकर्त्तव्यतामूढः -ढा -ढं.

Lost, *p. p.* or *a.* नष्टः -ष्टा -ष्टं, प्रणष्टः -ष्टा -ष्टं, विनष्टः -ष्टा -ष्टं, हारितः -ता -तं, भ्रष्टः -ष्टा -ष्टं, विभ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, परिच्युतः -ता -तं, गतः -ता -तं, विगतः -ता -तं, वीतः -ता -तं, क्षीणः -णा -णं, परिक्षीणः -णा -णं, अपचितः -ता -तं, अन्तरितः -ता -तं, लुप्तः -प्ता -प्तं, विलुप्तः -प्ता -प्तं, हीनः -ना -नं, प्रहीणः -णा -णं, त्यक्तः -क्ता -क्तं, ध्वंसितः -ता -तं, ध्वस्तः -स्ता -स्तं; 'one who has lost his kingdom,' राज्यभ्रष्टः, भ्रष्टराज्यः, राज्यच्युतः, राज्यात्प्रभ्रष्टः; 'one who has lost his office,' च्युताधिकारः; 'one who has lost his wealth,' गतविभवः -वा -वं, नष्टार्थः -र्था -र्थं, अर्थहीनः -ना -नं; 'one who has lost desire,' विगतस्पृहः -हा -हं, वीतकामः -मा -मं; 'one who has lost life,' त्यक्तजीवनः -ना -नं, प्रहीणजीवितः; 'one who has lost the road,' पथभ्रष्टः -ष्टा -ष्टं, मार्गप्रभ्रष्टः -ष्टा -ष्टं, वर्त्मवर्जितः -ता -तं, त्यक्तमार्गः -र्गा -र्गं; 'one who has lost an eye,' एकाक्षिविकलः -ला -लं; 'one who has lost every thing,' हृतसर्वस्वः -स्वा -स्वं, परिच्युतः -ता -तं, परिक्षीणः -णा -णं; 'lost to shame,' लज्जाहीनः -ना -नं, त्यक्तलज्जः -ज्जा -ज्जं, निरस्तलज्जः &c., लज्जोज्झितः -ता -तं, निर्लज्जः -ज्जा -ज्जं; 'lost in thought,' ध्याननिष्ठः -ष्ठा -ष्ठं, चिन्ताकुलः -ला -लं, चिन्तापरः -रा -रं; 'relating to any thing lost,' नाष्टिकः -की -कं; 'it is lost,' हार्य्यते, अपचीयते.—(Bewildered) मोहितः -ता -तं, विमूढः -ढा -ढं, भ्रान्तबुद्धिः -द्धिः -द्धि, भ्रमयुक्तः -क्ता -क्तं.

Lot, *s.* (Destiny, state assigned by fate) भाग्यं, भागधेयं, दैवदशा, दैवस्थितिः *f.*, दैवयोगः, दैवं, दैविकं, दैवगतिः *f.*, भवितव्यता, भोगः, भोग्यं, भोक्तव्यं.—(Share, portion) अंशः, भागः, विभागः, भाज्यं, भाजितं, उद्धारः.—(Die used in determining a person's portion) गुटिका, शकुनः; 'to cast lots,' गुटिकाः पत् (c. 10. पातयति -यितुं); 'casting lots,' गुटिकापातः, पाटः -टकः.

Loth, *a.* अनिच्छुः -च्छुः -च्छु. *See* Loath.

Lotion, *s.* औषधीयजलं, धावनौषधं, प्रक्षालनौषधं, धावनं -नी.

Lottery, *s.* गुटिकापातः, पाटकः, गुटिकापातपूर्व्वो विभागकल्पना.

MAP, s. देशालेख्यपत्रं, भूपृष्ठालेख्यपत्रं, देशालेख्यं, देशसमुद्राद्यालेख्यं, भूगोलस्य देशसमुद्रनगराद्यालेख्यं, देशचित्रं, भूपृष्ठभङ्गिप्रदर्शनपत्रं, भूपृष्ठदेशालेख्यं.

To MAP, v. a. भूपृष्ठदेशान् लिख् (c. 6. लिखति, लेखितुं) or आलिख् or चित्र् (c. 10. चित्रयति -यितुं), देशालेख्यं कृ, भूपृष्ठालेख्यं कृ.

To MAR, v. a. दुष् (c. 10. दूषयति -यितुं), नश् (c. 10. नाशयति -यितुं), हन् (c. 2. हन्ति -न्तुं), व्याहन्, विहन्, क्षतिं कृ.

MARASMUS, s. क्षयः, क्षयरोगः, क्षयथुः m., यक्ष्मा m. (न्), राजयक्ष्मा m., शोषः.

To MARAUD, v. n. युद्धसमये गोधान्यादिग्रहणार्थम् इतस्ततो भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम्, लोप्त्रार्थं परिभ्रम् or उपद्रवं कृ or विप्लवं कृ or उपद्रु (c. 1. -द्रवति -द्रोतुं).

MARAUDER, s. लोप्त्रार्थं परिभ्रमणकारी m. (न्), उपद्रवी m. (न्), विप्लवकारी m., उपद्रवकारी m., उपप्लवकृत्, लुण्टाकः.

MARAUDING, s. युद्धकाले गोधान्याद्यपहरणार्थम् इतस्ततः परिभ्रमणं, विप्लवः, उपप्लवः, उपद्रवः, विप्लवकरणं.

MARBLE, s. मार्बलाख्यो नानावर्णः प्रस्तरः, रुचिरप्रस्तरः, चारुप्रस्तरः, पाषाणः, ग्रावा m. (न्), शिला, उपलः.

MARBLE, a. (Made of marble) पूर्व्वोक्तप्रस्तरमयः -यी -यं, पाषाणनिर्म्मितः -ता -तं.—(Variegated) प्रस्तररेखानुकारेण चित्रितः -ता -तं.

MARBLE-HEARTED, a. पाषाणहृदयः -या -यं, वज्रहृदयः &c., वज्रचित्तः -त्ता -त्तं.

MARCASITE, s. आवर्त्तः, सुवर्णमाक्षिकं, सुवर्णमुखी.

MARCESCENT, a. विशीर्य्यमाणः -णा -णं, क्षीयमाणः -णा -णं, म्लायमानः -ना -नं.

MARCH, s. (The month) फाल्गुनः -निकः, चैत्रः -त्रिकः, फाल्गुनोत्तरार्द्धं, चैत्रपूर्व्वार्द्धं, पूर्व्वचैत्रः, उत्तरफाल्गुनः, तपस्यः, मधुः m., तृतीयमासः.—(Movement of soldiers, &c.) गमनं, यानं, यात्रा, सैनिकगमनं, सैनिकयात्रा, गमः, गतिः f., सैनिकगतिः f., व्रज्या, सरणं, संसरणं.—(Marching onwards, progression) प्रयाणं, प्रस्थानं, प्रस्थितिः f., प्रगमनं,

अग्रगमनं.—(Marching against) अभिषेणनं, अभिनिर्याणं; 'setting out on a march,' यात्राकरणं; 'toilsome march,' दुर्गसञ्चरः, दुर्गसञ्चारः, सञ्चारः.

To MARCH, *v. n.* यात्रां कृ, गमनं कृ, सैनिकवद् गमनं कृ or प्रगम् (c. 1. -गच्छति -गन्तुं) or प्रया (c. 2. -याति -तुं) or प्रस्था (c. 1. -तिष्ठति -ते -स्थातुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं) or चल् (c. 1. चलति -लितुं) or प्रचल्; 'to march against,' अभिनिर्या (c. 2. -याति -तुं), अभिप्रया, प्रतिव्रज्, अभिप्रस्था, प्रत्यभिप्रस्था, अभिगम्, प्रतिगम्; 'one who marches slow,' मन्दगामी *m.* (न्), मन्थरः; 'fast,' अतिजवः, जंघालः, जंघिलः.

To MARCH, *v. a.* अभिषेण (nom. अभिषेणयति -यितुं), सेनां प्रस्था in caus. (-स्थापयति -यितुं) or चल् (c. 10. चलयति -यितुं) or प्रतिगम् (c. 10. -गमयति -यितुं), यात्रां कृ (c. 10. कारयति -यितुं).

MARCHES, *s. pl.* (Confines) देशसीमा, देशसमन्ताः *m. pl.*, देशप्रान्ताः *m. pl.*

MARE, *s.* अश्वा, अश्विनी, वाजिनी, तुरगी, तुरङ्गी, तुरङ्गिणी, वडवा, वडवा, घोटिका, अर्व्वती, वामी, प्रसूः *f.*, प्रसूका.

MARGARITE, *s.* (Pearl) मुक्ता, मुक्तिका, मौक्तिकं, शुक्तिबीजं, शुक्तिजं.

MARGIN, *s.* प्रान्तः, अन्तः -न्तं, सीमा, उपान्तं, पर्य्यन्तं, कच्छः, धारः -रा, तटं, समन्तः, उत्सङ्गः, कोटिः *f.*, परिसरः; 'of a river,' तीरं, कूलं, तटं, कच्छः, कच्छान्तः; 'on the margin,' प्रान्ततस्.—(Of a book) समासः, पुस्तकप्रान्तः.

MARGINAL, *a.* प्रान्तस्थः -स्था -स्थं, समासस्थः &c., समासलिखितः -ता -तं.

MARGINALLY, *adv.* (Along the margin) प्रान्ततस्, प्रान्ते, अनुप्रान्तं.

MARINE, *a.* सामुद्रः -द्री -द्रं, समुद्रीयः -या -यं, समुद्रियः -या -यं, सामुद्रिकः -की -कं, समुद्रसम्बन्धी -न्धिनी -न्धि (न्), समुद्रविषयः -या -यं, सैन्धवः -वी -वं, सिन्धुकः -का -कं, समुद्रजः -जा -जं, समुद्रोद्भवः -वा -वं, जलधिसम्भवः -वा -वं, सागरसम्बन्धी &c.; 'marine engagement,' नौयुद्धं.

MARINE, *s.* (A soldier that serves on board a ship) नौयोद्धा *m.* (द्धृ), नौसैन्यः, नाविकसैन्यः, समुद्रीयसैनिकः.—(Navy) युद्धनौसमूहः.—(Naval affairs) नाविकविषयः, नाविककर्म्म *n.* (न्), नाविकप्रकरणं, जलयानविषयः, जलयानप्रकरणं.

MARINER, *s.* नाविकः, नाविकजनः, समुद्रयायी *m.* (न्), समुद्रगः, समुद्रगामी *m.*, पोतवाहः, निर्यामः, जलपथोपजीवी *m.* (न्), उदधिक्राः *m.* (स्), समुद्रीयजनः.

MARITAL, *a.* भर्तृसम्बन्धी -न्धिनी -न्धि (न्), पतिसम्बन्धी &c., भर्तृविषयः -या -यं, पतिविषयः &c., स्वामिविषयः &c.

MARITIME, *a.* (Relating to the sea) सामुद्रः -द्री -द्रं, समुद्रियः -या -यं, समुद्र in comp. *See* MARINE, *a.* (Naval) नाविकः -की -कं, नाव्यः -व्या -व्यं, नौ in comp.—(Bordering on the sea) समुद्रतटस्थः -स्था -स्थं, समुद्रतीरस्थः -स्था -स्थं.

MARJORAM, *s.* तुलसी, मरुवकः, समीरणः, प्रस्थपुष्पः, फणिज्झकः, पर्णासः, जम्भीरः, कठिञ्जरः, कुठेरकः, अर्ज्जकः.

MARK, *s.* (Sign, token by which a thing is known) चिह्नं, लक्षणं, लाञ्छनं, लिङ्गं, अङ्कः -ङ्कं, अभिज्ञानं, व्यञ्जनं, व्यञ्जकः -कं, लक्ष्यं, लक्ष्म *n.* (न्), लक्ष्मणं, ललामं.—(Spot) कलङ्कः, अङ्कः, चिह्नं, बिन्दुः *m.*, विप्रुद् (ष्), विप्रुट्, गण्डः.—(Mark on the body) सामुद्रं, सामुद्रचिह्नं, सामुद्रिकलक्षणं, तिलः -लकः, तिलकालकः; 'an interpreter of marks on the body,' सामुद्रिकः; 'an auspicious mark,' सुलक्षणं, सुचिह्नं; 'having auspicious marks,' सुलक्षणी -णिनी -णि (न्), सुलक्षणिकः -का -कं; 'having thirty-two auspicious marks,' द्वात्रिंशल्लक्षणोपेतः -ता -तं; 'an inauspicious mark,' कुलक्षणं, अपलक्षणं, दुर्लक्षणं, दुश्चिह्नं; 'having inauspicious marks,' कुलक्षणी -णिनी &c., कुलक्षणः -णा -णं.—(Butt for shooting at) लक्ष्यं, बाणलक्ष्यं, लक्षं, वेध्यं, व्यध्यः, शरव्यं, दृष्टिगुणः, प्रतिकायः; 'hitting the mark,' लक्ष्यभेदः; 'to hit the mark,' लक्ष्यं भिद् (c. 7. भिनत्ति, भेत्तुं) or व्यध् (c. 4. विध्यति, व्यद्धुं), लक्ष्यवेधनं कृ.—(Line) रेखा, लेखा.

To MARK, *v. a.* (Stamp, impress with a mark) चिह्न (nom. चिह्नयति -यितुं), अङ्क् (c. 10. अङ्कयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं), मुद्र् (nom. मुद्रयति -यितुं), लाञ्छ् (c. 1. लाञ्छति -ञ्छितुं), अङ्कं कृ, चिह्नं कृ, लक्षणं कृ, लक्षीकृ.—(Stain) कलङ्क (nom. कलङ्कयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलङ्कीकृ, लाञ्छ्.—(Draw a line) लिख् (c. 6. लिखति, लेखितुं), आलिख्, रेखां कृ.—(Notice, observe) लक्ष्, आलक्ष्, उपलक्ष्, अवेक्ष् (c. 1. -ईक्षते -क्षितुं), निरीक्ष्, वीक्ष्, समीक्ष्, प्रेक्ष्.—(Mark out, define) परिच्छिद् (c. 7. -च्छिनत्ति -च्छेत्तुं), परिच्छेदं कृ, निर्दिश् (c. 6. -दिशति -देष्टुं), लक्ष्, लक्षीकृ.—(Mark out, trace the outline) बाह्यरेखां लिख् or अङ्क् or कृ, बहिर्लेखां कृ.

To MARK, *v. n.* (Note, take notice) आलोच् (c. 10. -लोचयति -यितुं), आलक्ष् (c. 10. -लक्षयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), समीक्ष्, (c. 1. -ईक्षते -क्षितुं), समीक्षां कृ, बुध् (c. 4. बुध्यते, बोद्धुं), विमृश् (c. 6. -मृशति -मर्ष्टुं), परामर्शं कृ, विवेचनं कृ.

MARKED, *p. p.* चिह्नितः -ता -तं, अङ्कितः -ता -तं, लक्षितः -ता -तं, उपलक्षितः -ता -तं, लाञ्छितः -ता -तं, कृतलक्षणः -णा -णं, कृताङ्कः -ङ्का -ङ्कं, कृतलाञ्छनः -ना -नं, मुद्रितः -ता -तं, मुद्राङ्कितः -ता -तं.—(Defined) परिच्छिन्नः -न्ना -न्नं, निर्दिष्टः -ष्टा -ष्टं, लक्षितः -ता -तं.

MARKER, *s.* चिह्नकर्त्ता *m.* (र्तृ), अङ्कनकृत् *m.*, अङ्कयिता *m.* (तृ), लक्षयिता *m.*

MARKET, *s.* पण्यवीथी -थिका, पण्यशाला, विक्रयशाला, विक्रयस्थानं, क्रयविक्रयस्थानं, पण्यस्थानं, आपणः, हट्टः, विपणिः *m.* -णी *f.*, निगमः, अवटङ्कः, क्रयारोहः, पुरगुडी, निपण्या, निघंटं, पण्यग्रन्थिः *m.*, पण्याजीवं -वकं; 'a free market,' कपङ्कनं.—(Sale) विक्रयः, विपणः.

To MARKET, *v. n.* क्रयविक्रयं कृ, पण् (c. 1. पणते -णितुं, पणायति -यितुं), पणायां कृ.

MARKET-DAY, *s.* क्रयविक्रयदिवसः, हट्टदिवसः, हट्टवारः.

MARKET-PLACE, *s.* चत्वरं, चतुष्पथं, क्रयविक्रयचत्वरं, पणायाचत्वरं, पणाया, पणायास्थानं, विपणिः -णी *m. f.* *See* MARKET.

MARKET-RATE, MARKET-PRICE, *s.* आपणिकः, पण्यभावः, पण्यमूल्यं, अर्घबलाबलं.

MARKET-TOWN, *s.* ग्राममुखः, मुख्यग्रामः, नगरमुखः, मुख्यनगरं -री, कर्व्वटः -टं.

MARKETABLE, *a.* विक्रेयः -या -यं, विक्रयणीयः -या -यं, पण्यः -ण्या -ण्यं, पणितव्यः -व्या -व्यं, पण्यार्हः -र्हा -र्हं, क्रेयः -या -यं, क्रयविक्रययोग्यः -ग्या -ग्यं.

MARKING, *s.* अङ्कनं, मुद्राङ्कनं, चिह्नाङ्कनं, चिह्नकरणं, अङ्ककरणं, लिखनं.

MARKING-INK, *s.* दहनमसिः *f.*, दहनमसिका, दहनरसः, वस्त्राङ्कनमसिः.

MARKING-NUT, *s.* दहनं, निर्दहनं, भल्लिका, भल्लातः -तकी, भल्ली.

MARKSMAN, *s.* लक्ष्यवेधी *m.* (न्), लक्ष्यभेदी *m.*, लब्धलक्षः, सुसन्धानी *m.* (न्), सुप्रयोगबाणः, सुप्रयोगविशिखः, शराभ्यासकुशलः, धनुर्विद्, आयुधविद्.

MARL, *s.* मार्लाख्यो मृत्तिकाविशेषः, चिक्कणमृत्तिका, पांशुः *m.*

To MARL, *v. a.* पूर्वोक्तमृत्तिकया लिप् (c. 6. लिम्पति, लेप्तुं).

MARMALADE, *s.* मिष्टफलं, मिष्टान्नं, शर्करादिसंसृष्टा नारङ्गत्वक् *f.* (च्).

MARMOREAN, *a.* चारुप्रस्तरमयः -यी -यं, पाषाणनिर्म्मितः -ता -तं.

MARMOSET, *s.* सूक्ष्मवानरः, सूक्ष्मकीटः, क्षुद्रमर्कटः.

Maroon, *a.* (Dark red) धूम्रलोहितः -ता -तं, धूमाभः -भा -भं, कपिशः -शा -शं.

Marplot, *s.* कार्य्यविघातकः, कार्य्यविनाशकः, कार्य्यबाधकः.

Marquee, *s.* पटमण्डपः, पटवासः, बृहत्पटवेश्म *n.* (न्), वस्त्रगृहं.

Marquess, *s.* उपराजः *m.*, उपनायकः, उपाधिपः, कुलीनपदश्लाघ्य द्वितीयपदस्थः, द्वितीयकुलीनपदभाक् *m.* (ज्).

Marquisate, *s.* पूर्व्वोक्तकुलीनजनस्य अधिकारः, उपाधिपत्यं.

Marred, *p. p.* दूषितः -ता -तं, विहतः -ता -तं, व्याहतः -ता -तं, नाशितः -ता -तं, विनाशितः -ता -तं, क्षतः -ता -तं, विधातः -ता -तं.

Marrer, *s.* दूषकः, दूषयिता *m.* (तृ), नाशकः, विनाशकः, विधातकः.

Marriage, *s.* विवाहः, उद्वाहः -हनं, उद्वहनं, परिणयः -यनं, पाणिग्रहः -हणं, पाणिग्राहः, पाणिपीडनं, हस्तग्रहणं, दारपरिग्रहः, दारसङ्ग्रहः, दारक्रिया, दारकर्म्म *n.* (न्), दाराधिगमनं, उपयमः, उपयामः, लग्नकार्य्यं, मैथुनं, वाधुक्यं, निवेशः; 'marriage-rite,' विवाहविधिः *m.*, विवाहक्रिया, विवाहसंस्कारः; 'giving in marriage,' दारिकादानं, दारिकाप्रदानं; 'marriage-contract,' वाङ्निश्चयः; 'marriage-settlement,' शुल्कः -ल्कं; 'auspicious season for marriage,' लग्नतिथिः *f.*, लग्नमुहूर्त्तः -र्त्तं; 'marriage-string, or ring hung round the neck of the bride, who wears it till she becomes a widow, when it is broken,' मङ्गलसूत्रं, माङ्गल्यतन्तुः *m.*, सौभाग्यतन्तुः *m.*, कौतुकं; 'marriage gifts,' यौतकं, औद्वाहिकं, पारिणाय्यं, हरणं, सुदायः -यं; 'marriage festival,' विवाहोत्सवः, विवाहमहोत्सवः; 'ablution at marriage,' मङ्गलस्नानं; 'compliments at marriage,' वधूलः, वधूलमालिका; 'second marriage,' द्वितीयविवाहः, द्वितीयसम्बन्धः. The following are different forms of marriage, explained in Manu, chap. iii. verses 27 et seq.: आसुरविवाहः, आर्षविवाहः, गान्धर्व्वविवाहः, दैवविवाहः, पैशाचविवाहः, प्राजापत्यविवाहः, ब्राह्मविवाहः, राक्षसविवाहः, प्रीतिविवाहः. The स्वयंवरः is a form of marriage in which a girl chooses her own husband.

Marriageable, *a.* विवाह्यः -ह्या -ह्यं, उद्वाह्यः &c., वोढव्यः -व्या -व्यं, विवाहयोग्यः -ग्या -ग्यं, विवाहोचितः -ता -तं, विवाहोपयुक्तः -क्ता -क्तं, विवाहकालप्राप्तः -प्ता -प्तं, विवाहवयस्कः -स्का -स्कं, परिणेयः -या -यं; 'as a girl,' दृष्टरजाः *f.* (स्), जातार्त्तवा, आगतार्त्तवा, ऋतुयुक्ता, ऋतुमती, अनग्निका, नग्ना, पतीयन्ती.

Married, *p. p.* विवाहितः -ता -तं, उद्वाहितः -ता -तं, ऊढः -ढा -ढं, उपोढः -ढा -ढं, समूढः -ढा -ढं, कृतविवाहः -हा -हं, जातविवाहः -हा -हं, कृतोद्वाहः -हा -हं, कृतदारपरिग्रहः -हा -हं, परिणीतः -ता -तं, कृतोपयमः -मा -मं, जातोपयमः -मा -मं, निर्विष्टः -ष्टा -ष्टं, युक्तः -क्ता -क्तं; 'a married man,' सभार्य्यः, सपत्नीकः, स्त्रीमान् *m.* (त्), कृतदारः, सदारः, कृतदारपरिग्रहः, कुटुम्बी *m.* (न्), सकुटुम्बः, भार्य्यावान्; 'a married woman,' सभर्तृका, सपतिका, पतिवत्नी, सधवा, सुवासिनी; 'newly married woman,' नववधूः *f.*, नवपरिणीता; 'twice-married woman,' पुनर्भूः *f.*, दिधिषूः *f.*, दिधीषूः *f.*, दिधिषुः *f.*; 'one who is married before his elder brother,' परिवेत्ता *m.* (तृ).

Marrow, *s.* मज्जा, वपा, वसा, मेदस् *n.*, मेदः, मज्जा *m.* (न्), मज्जनं, सारः, अस्थिसारः, देहसारः, बीजं, स्निग्धा, वपाकृत् *m.*, अस्थिकृत्, अस्थिजं, अस्थिजः, हव्यं, शुक्रकरः, तेजस् *n.*, मधुरं, जीवनं, अस्थिसम्भवा.—(Pith, essence) सारः, गर्भः, सारता, मेदोजः.

Marrow-bone, *s.* मज्जापूर्णम् अस्थि, मेदोयुक्तम् अस्थि.

Marrowless, *a.* मज्जाहीनः -ना -नं, मेदोहीनः -ना -नं, वपाशून्यः -न्या -न्यं, निःसारः -रा -रं, असारः -रा -रं, निर्मज्जः -ज्जा -ज्जं.

Marrowy, *a.* मज्जावान् -वती -वत् (त्), सारवान् &c., मेदस्वी -स्विनी -स्वि (न्).

To marry, *v. a.* (Unite a man and woman in wedlock) विवाहरीत्या स्त्रीपुरुषौ संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or सम्बन्ध् (c. 9. -बध्नाति -बन्धुं) or विवाहसंयुक्तौ कृ, विवाहसंस्कारं कृ.—(Take for wife) विवह् (c. 1. -वहति -ते -वोढुं), उद्वह्, समुद्वह्, उपावह्, परिणी (c. 1. -णयति -णेतुं), उपयम् (c. 1. -यच्छते -ति -यमितुं -यन्तुं), पाणिं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), कन्यां परिग्रह् or प्रतिग्रह् or सङ्ग्रह्, दारपरिग्रहं कृ, दारसङ्ग्रहं कृ, दाराधिगमनं कृ, कन्यापरिणयं कृ, भार्य्यां विद् (c. 6. विन्दते -ति, वेत्तुं) or अनुविद्; 'he should marry a wife,' कन्यां विवहेत् or उपयच्छेत, कन्यायाः पाणिं गृह्णातु.—(Take for husband) पतिं विद् or वृ (c. 5. वृणोति, वरितुं -रीतुं), भर्त्रा संयुज् in pass. (-युज्यते), पतिवरणं कृ, भर्तृवरणं कृ.—(Dispose of in marriage) विवाहार्थं कन्यां दा or प्रदा.

To marry, *v. n.* भर्त्रा or भार्य्यया संयुज् in pass. (-युज्यते) or युज्, विवाहं कृ, उद्वाहं कृ, परिणयं कृ, पाणिग्रहणं कृ, दारपरिग्रहं कृ, उपयमं कृ.

Mars, *s.* (The planet, fabled as the son of the earth) मङ्गलः, मङ्गलग्रहः; भौमः, अङ्गारकः, कुजः, भूमिजः, भूसुतः, महीसुतः, क्षितिसुतः, आवनेयः, धरात्मजः, धरासुतः, धरापुत्रः, नवार्च्चिः *m.*, आषाढभवः, शिवघर्म्मजः, गगनोल्मुकः, खोल्मुकः, लोहितः -तकः, लोहिताङ्गः, रक्ताङ्गः, रुधिरः, आरः, वक्रः, ऋणान्तकः, चरः, ऋः. (In mythology, the god of war). *See* Kártikeya.

Marsh, *s.* कच्छः, कच्छभूः *f.*, कच्छभूमिः *f.*, अनूपभूः *f.*, अनूपभूमिः *f.*, सजलभूमिः *f.*, जलाढ्यभूः *f.*, आर्द्रभूमिः *f.*, पङ्कः.

To marshal, *v. a.* विन्यस् (c. 4. -अस्यति -असितुं), व्यूह् (c. 1. -ऊहते -हितुं), विरच् (c. 10. -रचयति -यितुं), रच्, क्रमेण स्था in caus. (स्थापयति -यितुं), व्यवस्था, विधा (c. 3. -दधाति -धातुं), संविधा, प्रतिविधा.

Marshal, marshaller, *s.* विधाता *m.* (तृ), संविधाता *m.*, व्यवस्थापकः, विरचकः, व्यूहरचकः, विन्यासकृत् *m.*

Marshy, *a.* अनूपः -पा -पं, आनूपः -पी -पं, कच्छः -च्छा -च्छं, जलाढ्यः -ढ्या -ढ्यं, जलप्रचुरः -रा -रं, जलमयः -यी -यं, सजलः -ला -लं, जलप्रायः -या -यं, आप्यः -प्या -प्यं, आर्द्रः -र्द्रा -र्द्रं.

Mart, *s.* विक्रयस्थानं, क्रयविक्रयस्थानं, पण्यस्थानं, आपणः, विपणिः *m.* -णी *f.*, निगमः, निषद्या, पण्यवीथी -थिका, अवट्टः.

Martial, *a.* (Relating to war) युद्धसम्बन्धी -न्धिनी -न्धि (न्), रणसम्बन्धी &c., युद्धविषयः -या -यं, रणविषयकः -का -कं, साङ्ग्रामिकः -की -कं, सामरिकः -की -कं, साम्परायिकः -की -कं.—(Suited to war) रणयोग्यः -ग्या -ग्यं, युद्धोपयुक्तः -क्ता -क्तं, रणोपयोगी -गिनी &c.—(Given to war) रणप्रियः -या -यं, रणासक्तः -क्ता -क्तं, रणवीरः -रा -रं, रणकामी -मिनी &c.; 'martial music,' रणवाद्यं.

Martinet, *s.* उग्रदण्डः, उग्रशासनः, तीक्ष्णदण्डः, दण्डबुद्धिः *m.*, उग्रदण्डः, तीक्ष्णशासनः, निष्ठुरबुद्धिः *m.*, निष्ठुरः.

Martingal, martingale, *s.* तलिका, तलसारकः, अधोबन्धनं.

Martyr, *s.* साक्षी *m.* (न्), स्वधर्म्मार्थं प्राणत्यागी *m.* (न्) or देहत्यागी *m.* or जीवितत्यागी *m.*, स्वमतार्थं त्यक्तप्राणः or अर्पितप्राणः, स्वधर्म्मप्रमाणार्थं त्यक्तप्राणः or त्यक्तदेहः or त्यक्तजीवितः or जीवोत्सर्गी *m.* or साक्षी *m.*

To martyr, *v. a.* स्वधर्म्मार्थं हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं).

Martyrdom, *s.* स्वधर्म्मार्थं प्राणत्यागः or जीवितत्यागः, स्वमतार्थं जीवोत्सर्गः or प्राणोत्सर्गः, स्वधर्म्मप्रमाणार्थं देहत्यागः or प्राणत्यागः or प्राणार्पणं.

Martyred, *p. p.* स्वधर्म्मार्थं हतः -ता -तं or व्यापादितः -ता -तं, स्वधर्म्मप्रमाणार्थं हतजीवितः -ता -तं or त्यक्तप्राणः -णा -णं.

Martyrology, *s.* साक्षिचरित्रशास्त्रं, स्वधर्म्मार्थं प्राणत्यागिनां चरित्रविवरणं or चरित्रलिखनं.

Marvel, *s.* कौतुकं, अद्भुतं, अद्भुतवस्तु *n.*, आश्चर्य्यवस्तु *n.*, आश्चर्य्यं, चमत्कारः, चित्रवस्तु *n.*, चित्रं, विस्मयजनकवस्तु, उत्पातः, उपसर्गः.

To **marvel**, *v. n.* विस्मितः -ता -तं भू, विस्मयान्वितः -ता -तं भू, सविस्मयः -या -यं भू, विस्मि (c. 1. -स्मयते -स्मेतुं) with instr. loc. or acc. c., साश्चर्य्यः -र्य्या -र्य्यं भू, चमत्कृतः -ता -तं भू, आश्चर्य्यं ज्ञा (c. 9. जानाति, ज्ञातुं) or मन् (c. 4. मन्यते, मन्तुं).

Marvellous, *a.* आश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं, विस्मयजनकः -का -कं, विस्मयोत्पादकः -का -कं, आश्चर्य्यकरः -रा -रं, आश्चर्य्यकारकः -का -कं, आश्चर्य्यजनकः -का -कं, चमत्कारजनकः -का -कं, चित्रः -त्रा -त्रं, विचित्रः -त्रा -त्रं, तातः -ता -तं; 'a marvellous tale,' चित्रोक्तिः *f.*; 'a marvellous action,' अद्भुतकर्म्म *n.* (न्), आश्चर्य्यकर्म्म.

Marvellously, *adv.* अद्भुतं, अद्भुतप्रकारेण, विचित्रं, आश्चर्य्यप्रकारेण, यथा विस्मयो जायते तथा.

Marvellousness, *s.* अद्भुतता -त्वं, आश्चर्य्यत्वं, विचित्रता, साश्चर्य्यत्वं, वैचित्र्यं, विस्मयजनकता, अपूर्व्वत्वं.

Marwar, *s.* (The province) मरुः *m.*, मरुभूः *f.*—(The inhabitants) मरवः *m. pl.*, मरुभुवः *m. pl.*

Masculine, *a.* पौरुषः -षी -षं, पौरुषेयः -यी -यं, पुरुषजातीयः -या -यं, पुंजातीयः -या -यं, पुं in comp., पुरुष in comp., अक्लीवः -वा -वं.—(Having the qualities of a man, resembling a man) पुरुषस्वभावः -वा -वं, पुरुषवृत्तिः -त्तिः -त्ति, पुरुषशीलः -ला -लं, पुरुषधर्म्मकः -का -कं, पुरुषप्रकृतिः -तिः -ति, पुम्प्रकृतिः -तिः -ति; 'the masculine gender,' पुंलिङ्गं, पुमान् *m.* (पुंस्), पुरुषः; 'a masculine woman,' वृषभी.

Masculinely, *adv.* पुरुषवत्, नरवत्, सपौरुषं, पौरुषेण, पुंवत्.

Masculineness, *s.* पुंस्त्वं, पुरुषत्वं -ता, पौरुषं, पौरुषता, पुरुषशीलता, पुरुषस्वभावः, पुरुषप्रकृतिः *f.*

Mash, *s.* उदपेषः -षणं, उदकपेषः, सम्पेषः -षणं, नानाद्रव्यसम्पेषः, नानाद्रव्यमिश्रणं, जलमिश्रितं नानासम्पिष्टद्रव्यं, नानासम्मिश्रद्रव्यपिण्डः.

To **mash**, *v. a.* सम्पिष् (c. 7. -पिनष्टि -पेष्टुं), सम्मृद् (c. 9. -मृद्नाति -मर्द्दितुं), सम्पेषणं कृ, सम्मर्द्दनं कृ, चूर्ण् (c. 10. चूर्णयति -यितुं), सञ्चूर्ण्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), सम्पेषणपूर्व्वं पिण्डीकृ.

Mashed, *p. p.* सम्पिष्टः -ष्टा -ष्टं, सम्मर्द्दितः -ता -तं, सञ्चूर्णितः -ता -तं, क्षुण्णः -ण्णा -ण्णं, सम्पेषणानन्तरं पिण्डीभूतः -ता -तं.

Mask, *s.* (Cover for the face) कृत्रिममुखं, छद्ममुखं, छद्मास्यं, कपटमुखं, उपमुखं.—(Pretext, subterfuge) छद्म *n.* (न्), कपटः -टं, व्यपदेशः, अपदेशः, व्याजः, छलं, कूटं.—(Masquerade) छद्मवेशः, कपटवेशः, कृत्रिमवेशः, छद्मवेशधारणं, विडम्बनं.

To **mask**, *v. a.* (Disguise with a mask) कृत्रिममुखेन छद् (c. 10. छादयति -यितुं) or गुह् (c. 1. गूहति -हितुं), मुखगोपनं कृ.—(Conceal) छद्, आच्छद्, गुप् (c. 1. गोपायति, गोप्तुं), गोपनं कृ, अपवृ (c. 10. -वारयति -यितुं).

To **mask**, *v. n.* विडम्बनं कृ, छद्मवेशी -शिनी -शि भू, कपटवेशी &c. भू.

Masked, *p. p.* (Having the face covered) गुप्तमुखः -खी -खं, छद्ममुखी -खिनी -खि (न्), कृत्रिममुखी &c.—(Disguised) छद्मवेशी -शिनी &c., कपटवेशी &c., छद्मवेशधारी -रिणी &c., कपटवेशः -शा -शं, छद्मवेशः &c., कपटरूपी -पिणी &c., विडम्बितवेशी &c., अलक्षितः -ता -तं.—(Concealed) गुप्तः -प्ता -प्तं, गोपितः -ता -तं, आच्छादितः -ता -तं.

Masker, *s.* छद्मवेशी *m.* (न्), कपटवेशी *m.*, छद्मवेशभृत्, छद्मरूपी *m.*, विडम्बितवेशः, कृत्रिमवेशधारी *m.*, विडम्बनकृत्.

Mason, *s.* लेपकः, लेपी *m.* (न्), लेपकारः, गृहनिर्म्माता *m.* (तृ), सुधाजीवी *m.* (न्), लेपजीवी *m.*, प्रलेपकः, प्रस्तरन्यासकृत्, इष्टकान्यासजीवी *m.*

Masonry, *s.* लेपकर्म्म *n.* (न्), इष्टकान्यासकर्म्म *n.*, सुधाकर्म्म *n.*, गृहनिर्म्माणं, गृहकरणं, गृहनिर्म्माणे प्रस्तरन्यासः or प्रस्तरादिविन्यासः.—(Brickwork, any thing made of stone, brick, &c.) इष्टकाकर्म्म *n.*, प्रस्तरकर्म्म *n.*, प्रस्तरनिर्म्मितं प्राकारादि.

Masquerade, *s.* छद्मवेशधारणं, वेशधारणं, छद्मवेशक्रीडा, छद्मवेशसमारम्भः, छद्मवेशः, कपटवेशिनां यात्रा, विडम्बनं, विडम्बनक्रीडा.

To **masquerade**, *v. n.* छद्मवेशी -शिनी -शि भू, कपटवेशी &c. भू, छद्मवेशं धृ (c. 10. धारयति -यितुं), विडम्ब् (c. 10. -डम्बयति -यितुं), विडम्बनं कृ.

Masquerader, *s.* छद्मवेशी *m.* (न्), वेशधारी *m.*, विडम्बनकर्त्ता *m.* (र्तृ). *See* **Masker**.

Mass, *s.* (Lump) पिण्डः -ण्डं, घनः, ओघः, घनौघः, स्थूलं, गण्डः -ण्डका; 'a mass of iron,' लोहपिण्डः.—(Heap) राशिः *m.*, सञ्चयः, निचयः, प्रचयः, समुच्चयः, चयः, चितिः *f.*, चायः, निकरः, उत्करः, ओघः, पुञ्जः, पूगः, स्तूपः, स्तोमः.—(Collection) समूहः, सङ्घः, सङ्घातः, संहतिः *f.*, समुदायः, वृन्दं, संहारः, समाहारः, सञ्चयः, निवहः; 'in masses,' सङ्घशस्.—(Gross, bulk) साकल्यं, सामग्र्यं, समुदायः; 'in the mass,' साकल्येन.

Massacre, *s.* महामारणं, महाघातः, महावधः, निषूदनं, विशसनं, निहननं, संहारः, विमर्द्दनं, निकृन्तनं, प्रमापणं, निशारणं.

To **massacre**, *v. a.* अतिनैष्ठुर्य्येण हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं) or निहन् or मृ (c. 10. मारयति -यितुं) or सूद् (c. 10. सूदयति -यितुं) or निसूद् or विनिसूद् or विशस् (c. 1. -शसति -सितुं) or निकृत् (c. 6. -कृन्तति -कर्त्तितुं).

Massacred, *p. p.* अतिनैष्ठुर्य्येण हतः -ता -तं or विनिहतः -ता -तं or घातितः -ता -तं or निषूदितः -ता -तं or विशसितः -ता -तं.

Massiveness, **Massiness**, *s.* स्थूलत्वं -त्वं, स्थौल्यं, स्थूलाकारता, बृहत्त्वं, गुरुत्वं -ता, सभारता -त्वं, भारिता -त्वं, भारवत्त्वं, पिण्डाकारता, महत्त्वं, स्थानता.

Massive, **Massy**, *a.* स्थूलः -ला -लं, स्थूलाकारः -रा -रं, स्थूलरूपः -पा -पं, भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), सभारः -रा -रं, गुरुः -र्व्वी -रु, पिण्डितः -ता -तं, पिण्डाकारः -रा -रं, बृहन् -हती -हत् (त्), बृहत्परिमाणः -णा -णं, स्थूलपरिमाणः -णा -णं, स्त्यानः -ना -नं.

Mast, *s.* (Of a ship) कूपकः, कूपः, गुणवृक्षकः, गुणवृक्षः, नौकूपकः.

Mast-head, *s.* गुणवृक्षकाग्रं, गुणवृक्षाग्रं, कूपकाग्रं.

Master, *s.* (One who rules or has servants under him) स्वामी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, ईशः, नाथः, अधिपतिः *m.*, अधिपः, अधिभूः *m.*, ईशिता *m.* (तृ), नायकः, भर्त्ता *m.* (र्तृ), आर्य्यः, भरण्डः, भरण्युः *m.*, मेथ्यः; 'master of a family,' कुलपतिः *m.*, कुटुम्बी *m.* (न्), कौटुम्बिकः; 'serving two masters,' उभयवेतनः -ना -नं, उभयस्वामिकः -का -कं; 'one's own master,' स्वाधीनः -ना -नं, स्वतन्त्रः -न्त्रा -न्त्रं.—(Owner) अधिकारी *m.* (न्), स्वामी *m.*, ईश्वरः, पतिः *m.*, प्रभुः *m.*, परिवृढः.—(Superintendent, director) अध्यक्षः, अधिष्ठाता *m.* (तृ), अधिकृतः, अधिकारी *m.*, अधिपतिः *m.*, अधिपः, अधीशः, नायकः, नेता *m.* (तृ); 'master of the horse,' अश्वाध्यक्षः; 'master of the house,' गृहपतिः, भवनपतिः; 'master of the mint,' टङ्कपतिः *m.*, रूप्याध्यक्षः; 'master of the sports,' केलिसचिवः, नर्म्मसचिवः.—(Chief, head) नायकः, पतिः *m.*, अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अग्रगः, अग्रणीः *m.*, मुखरः, श्रेष्ठः, मुख्य or प्रधान in comp.—(Teacher, director of a school) अध्यापकः,

शिक्षकः, शिक्षागुरुः *m.*, गुरुः *m.*, आचार्य्यः, शिक्षादाता *m.* (तृ), विद्यादाता *m.*, विद्यागुरुः *m.*, आर्य्यः, उपाध्यायः, उपदेशकः, शिक्षाकरः.—(Well skilled in) निपुणः, कुशलः, सम्यक्कः, व्युत्पन्नः, पण्डितः, कृती *m.* (न्), पारगतः.—(Of a ship) नौकाधिपतिः *m.*, नौपतिः *m.*

To MASTER, *v. a.* (Subdue) वशीकृ, स्ववशीकृ, स्वाधीनीकृ, जि (c. 1. जयति -ते, जेतुं), विजि, दम् (c. 10. दमयति -यितुं), आयत्तीकृ, पराभू, अभिभू, प्रभू.—(Make one's self master of a subject) वशीकृ, पारं गम् (c. 1. गच्छति, गन्तुं), सम्यक्तत्त्वानि ज्ञा (c. 9. जानाति, ज्ञातुं); 'you must master the Sanskrit language,' भवद्भिः संस्कृतभाष्याणि वशीकर्त्तव्यानि.

MASTER-BUILDER, *s.* प्रधानस्थपतिः *m.*, मुख्यस्थपतिः *m.*

MASTERED, *p. p.* वशीकृतः -ता -तं, स्ववशीभूतः -ता -तं, स्वहस्तगतः -ता -तं.

MASTER-KEY, *s.* प्रधानोद्घाटकयन्त्रं, अग्रकुञ्चिका, मुख्योद्घाटनं.

MASTERLY, *a.* अत्युत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, अनुपमः -मा -मं, अनुपमेयः -या -यं, निरुपमः -मा -मं, सर्व्वोत्तमः -मा -मं, सर्व्वोत्कृष्टः -ष्टा -ष्टं, सर्व्वजित् *m.f.n.*, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, असामान्यः -न्या -न्यं, अतुलनीयः -या -यं, सुनिपुणः -णा -णं, अतिकुशलः -ला -लं.

MASTERLY, *adv.* परमयुक्त्या, सुनिपुणवत्, अतिकुशलवत्, अत्युत्तमं, अत्युत्कृष्टं.

MASTERPIECE, *s.* अत्युत्तमकर्म्म *n.* (न्), अनुपमकर्म्म *n.*, अत्युत्कृष्टकर्म्म, उत्तमकर्म्म *n.*, परमकर्म्म *n.*, प्रधानकर्म्म *n.*, सर्व्वोत्कृष्टकर्म्म *n.*

MASTERSHIP, *s.* प्रभुत्वं -ता, स्वाम्यं, स्वामित्वं, आधिपत्यं, ऐश्वर्य्यं, अधिकारित्वं, भर्तृत्वं, प्रधानत्वं, प्राधान्यं, श्रेष्ठता, श्रैष्ठ्यं.

MASTER-STROKE, *s.* उत्तमकर्म्म *n.* (न्), परमकर्म्म *n.*, अत्युत्तमक्रिया.

MASTERY, *s.* (Dominion) ऐश्वर्य्यं, आधिपत्यं, प्रभुत्वं, ईशत्वं, स्वामित्वं, स्वाम्यं, अधिकारः, भर्तृता.—(Ownership) स्वाम्यं, अधिकारित्वं -ता, प्रभुता, स्वत्वं.—(Pre-eminence) श्रेष्ठत्वं, श्रैष्ठ्यं, प्रधानत्वं, प्राधान्यं, उत्कर्षः, उत्कृष्टता, मुख्यता, प्रकृष्टता, प्रभुत्वं, आधिक्यं, परमपदं.—(Victory) विजयः.—(Great skill) अतिकौशल्यं, अतिनैपुण्यं, अतिपाटवं, परमयुक्तिः *f.*, परमोत्कर्षः; 'to have the mastery,' प्रभू, अभिभू.

MASTICABLE, *a.* चर्व्यः -र्व्या -र्व्यं, चर्वणीयः -या -यं, चर्वितव्यः -व्या -व्यं.

To MASTICATE, *v. a.* चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), चर्वणं कृ, दन्तैः पिष् (c. 7. पिनष्टि, पेष्टुं), विदंश् (c. 1. -दशति -दंष्टुं).

MASTICATED, *p. p.* चर्वितः -ता -तं, कृतचर्वणः -णा -णं, दन्तपिष्टः -ष्टा -ष्टं.

MASTICATION, *s.* चर्वणं, चर्वणक्रिया, चर्वणकर्म्म *n.* (न्), दन्तपेषणं, पेषणं.

MASTICATORY, *a.* चर्वणसाधकः -का -कं, चर्वणोपयोगी -गिनी -गि (न्).

MASTICATORY, *s.* (Substance to be chewed) चर्वणीयं, चर्व्यद्रव्यं, चर्व्यं.

MASTICH, MASTIC, *s.* मास्तिचाख्यो वृक्षनिर्यासः.—(Cement) लेपविशेषः.

MASTIFF, *s.* वृहत्कुक्कुरः, अतिसाहसशीलः कुक्कुरभेदः.

MASTLESS, *a.* कूपकहीनः -ना -नं, अकूपकः -का -कं, हतकूपकः -का -कं.

MAT, *s.* कटः, किलिञ्जकः, पादपाशी, आस्तरणं, तृणपूली, तलाची, वटरः, वानं, चचा.

To MAT, *v. a.* (Lay with mats) कटैर् आस्तृ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), कटान् विस्तृ, कटास्तरणं कृ.—(Interweave, entangle) संक्षिप् (c. 10. -क्षेपयति -यितुं), आक्षिप्, ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं); 'to mat the hair,' जटिलीकृ.

MATCH, *s.* (One who is equal to another in strength) तुल्यबलः -ला, तुल्यशक्तिः *m.f.*, समानबलः -ला, तुल्यविक्रमः -मा; 'to be a match for,' अलंकृ.—(One that tallies with another) यमः -मा -मं, यमकः -का -कं, यमलः -ला -लं, युग्मकः, समः -मा, समानः -ना, समकक्षः -क्षा, समानकक्षः -क्षा, समतोलः -ला.—(Union by marriage) विवाहसम्बन्धः, सम्बन्धः, विवाहः, प्रेमसम्बन्धः; 'scheming to effect a match,' विवाहघटनं -ना, सन्दर्भः.—(Contest) युद्धं, कलहः, कलिः *m.*; 'a match of cocks, &c.,' प्राणिद्यूतं, समाह्वयः, आह्वयः; 'boxing match,' मल्लयात्रा, मालवी, मल्लयुद्धं.—(For lighting fires) शलाका, ज्वलनशलाका, ज्वलशलाका, ज्वलतृणं, ज्वलनतृणं, अरणिः -णी *m. f.*

To MATCH, *v. a.* (Equal, make equal) समीकृ, समानीकृ, सदृशीकृ, समान (nom. समानयति -यितुं), उपमा (c. 2. -माति -तुं), प्रतिमा, तुल् (c. 10. तुलयति -यितुं), तुल्यीकृ.—(Show an equal) समं or तुल्यं or युग्मकं दृश् (c. 10. दर्शयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं), प्रतिमां or उपमां or उपमानं or प्रतिरूपं दृश्.—(Oppose as equal in contest) प्रतियुध् in caus. (-योधयति -यितुं), तुल्यबलं or तुल्यविक्रमं कञ्चित् पुरस्कृ.—(Adapt) युज् (c. 10. योजयति -यितुं), समायुज्.—(Give in marriage) विवाहार्थं दा or प्रदा.

To MATCH, *v. n.* (Correspond, tally) युज् in pass. (युज्यते), उपयुज्, तुल्यः -ल्या -ल्यं भू, तुल्यीभू, समीभू, समानीभू, सदृशीभू, अनुरूपः -पा -पं भू or अस्, प्रतिरूपीभू, उपमितः -ता -तं भू.—(Be united in marriage) विवाहसम्बन्धं कृ, प्रेमसम्बन्धं कृ.—(Be a match for) अलंकृ, अलम्भू, अलन्तमः -मा -मं भू.

MATCHED, *p. p.* (Equalled, evenly matched) तुल्यः -ल्या -ल्यं, तुल्यीभूतः -ता -तं, तुल्यबलः -ला -लं, तुल्यशक्तिः -क्तिः -क्ति, तुल्यविक्रमः -मा -मं, समतोलः -ला -लं, समानतोलः -ला -लं, समानकक्षः -क्षा -क्षं, सप्रतिमः -मा -मं, सप्रतिरूपः -पा -पं, उपमितः -ता -तं.—(Married) कृतविवाहः -हा -हं, कृतोपयमः -मा -मं.

MATCHLESS, *a.* अतुल्यः -ल्या -ल्यं, अनुपमः -मा -मं, निरुपमः -मा -मं, अप्रतिमः -मा -मं, अतुलनीयः -या -यं, अतुलः -ला -लं, निस्तुलः -ला -लं, अनुपमेयः -या -यं, अप्रतिमेयः -या -यं, अप्रतिरूपः -पा -पं, अगम्यरूपः -पा -पं, अद्वितीयः -या -यं, असदृशः -शी -शं, सर्व्वोत्तमः -मा -मं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, सर्व्वजित् *m. f. n.*, विषमः -मा -मं, अपूर्व्वः -र्व्वा -र्व्वं.

MATCHLESSLY, *adv.* अतुल्यं, अनुपमेयं, अप्रतिमेयं, निरूपमं, सर्व्वश्रेष्ठं.

MATCHLESSNESS, *s.* अतुल्यता, अनुपमेयता, अप्रतिमेयता, अनुपमता, अनौपम्यं.

MATCHLOCK, *s.* अग्निपलेन लोहगुलिकाप्रक्षेपणी सुषिरनाडी.

MATCH-MAKER, *s.* (Maker of matches for burning) शलाकाकारी *m.* (न्), ज्वलशलाकाकृत् *m.*—(Contriver of marriages) घटकः, विवाहघटकः, प्रेमघटकः, प्रेमविषये मध्यस्थः.

MATE, *s.* (Companion, associate) सहायः, सहचरः -री *f.*, सहवर्त्ती *m.* -र्त्तिनी *f.*, सहवासी *m.* -सिनी, सखा *m.* -खी *f.*, सहभावी *m.* -विनी *f.*, सङ्गी *m.* -ङ्गिनी *f.*, मित्रं.—(Husband) भर्त्ता *m.* (र्तृ), स्वामी *m.* (न्), पतिः *m.*—(Wife) स्त्री, वधूः *f.*, पत्नी, भार्य्या, जाया, वल्लभा, प्रिया, दयिता, प्रियतमा.—(The male or female of animals which associate for propagation) सहचरः *m.* -री *f.* In poetry the above words for husband and wife are used in this sense: 'the elephant's mate,' करिणी *f.*, हस्तिनी *f.*—(An assistant) सहकारी *m.* -रिणी *f.* (न्), सहायः; 'in a ship,' नौपतिसहायः.

To MATE, *v. a.* *See To* MATCH, *v. a.*

MATER-FAMILIAS, *s.* कुटुम्बिनी *f.*, गृहिणी, गेहिनी, स्वामिनी, कौटुम्बिकी.

MATERIAL, *a.* (Consisting of matter, not spiritual) भौतिकः -की -कं, आधिभौतिकः -की -कं, भूतात्मकः -का -कं, भूतमयः -यी -यं, पाञ्चभौतिकः -की -कं, पञ्चभूतात्मकः -का -कं, अनात्मीयः -या -यं, अनात्मिकः -की -कं, अपारमार्थिकः -की -कं, मूर्त्तिमान् -मती -मत् (त्), मूर्त्तः -र्त्ता -र्त्तं, द्रव्यमयः -यी -यं, विषयात्मकः -का -कं, प्राकृतिकः -की -कं,

प्राकृतः -ती -तं, घनः -ना -नं; 'the material world,' भूतसृष्टिः *f.*, भूतसर्गः, भूतसंसारः; 'material universe,' ब्रह्माण्डः -ण्डं; 'material body,' स्थूलशरीरं.—(Substantial) वास्तविकः -की -कं, वास्तवः -वी -वं, सारवान् -वती &c., मूर्त्तिमान् &c., घनः -ना -नं.—(Important) गुरुः -र्वी -रु, गुर्वर्थः -र्था -र्थं, गुरुप्रभावः -वा -वं, परमार्थः -र्था -र्थं, अलघुः -घुः -घु, मुख्यः -ख्या -ख्यं, आवश्यकः -की -कं, प्रधान in comp.; 'material cause,' उपादानं, उपादानकारणं, समवायिकारणं.

Material, *s.* साधनं, उपकरणं, द्रव्यं, साधनद्रव्यं, पदार्थः, वस्तु *n.*, मूर्त्तिः *f.*, सारः, घनः, मात्रा; 'materials, collectively,' साधनं -नानि *n. pl.*, सामग्र्यं -ग्री, द्रव्यसामग्र्यं, सम्भारः, द्रव्यसम्भारः, उपकरणसम्भारः, सज्जा, परिच्छदः; 'writing-materials,' लेखसाधनं, लिपिसज्जा; 'the material of cloth,' वस्त्रयोनिः *f.*

Materialism, *s.* देहात्मवादः, अनात्मवादः, अनात्ममतं, लोकायतं, चार्वाकमतं.

Materialist, *s.* देहात्मवादी *m.* (न्), अनात्मवादी *m.*, लौकायतिकः, लोकायतिकः, विषयी *m.* (न्), विषयायी *m.* (न्), चार्वाकमतावलम्बी *m.* (न्), चार्वाकमतधारी *m.*

Materiality, *s.* भौतिकत्वं, आधिभौतिकत्वं, मूर्त्तिमत्त्वं, अनात्मिकत्वं.

Materially, *adv.* वस्तुतस्, अर्थतस्, सारतस्, प्रकृतितस्, पदार्थतस्, तत्त्वतस्, अवश्यं, विशेषतस्.

Materialness, *s.* *See* Materiality. (Importance) गौरवं, गुरुत्वं.

Maternal, *a.* मातृकः -की -कं, मातृसम्बन्धी -न्धिनी -न्धि (न्), मातृयोग्यः -ग्या -ग्यं, मातृधर्म्मिकः -का -कं; 'maternal affection,' अपत्यस्नेहः, वात्सल्यं; 'maternal duty,' मातृधर्म्मः.

Maternity, *s.* मातृत्वं -ता, मातृभावः, मातृकत्वं, मातृधर्म्मः, जननीत्वं.

Mathematic, mathematical, *a.* (Relating to mathematics) गणितसम्बन्धी -न्धिनी -न्धि (न्), गणितविषयः -या -यं, गणितविद्यासम्बन्धी &c., संख्यापरिमाणविद्यासम्बन्धी &c., रेखावीजादिगणितविषयः -या -यं.—(According to the principles of mathematics) गणितशास्त्रानुसारी -रिणी &c., गणितानुरूपः -पा -पं, गणितविद्यानुसारी &c.

Mathematically, *adv.* गणितविद्यानुसारेण, गणितानुरूपेण, गणितशास्त्रवत्.

Mathematician, *s.* गणितविद्याज्ञः, संख्यापरिमाणविद्याज्ञः, रेखावीजादिगणितविद् *m.*, गणितशास्त्रज्ञः, क्षेत्रपरिमापकविद्यावान् *m.* (त्), गणनाविद्याज्ञः, गणितज्ञः.

Mathematics, *s. pl.* गणितं, गणितविद्या, संख्यापरिमाणविद्या, गणनाविद्या, रेखावीजादिगणितं, रेखावीजादिगणितविद्या, पाटीवीजादिगणितविद्या, रेखादिगणितं, वीजादिगणितं, गणितशास्त्रं, वीजादिगणितशास्त्रं, क्षेत्रादिपरिमाणविद्या, मानविद्या.

Matin, *a.* (Relating to the morning) प्रातःकालिकः -की -कं, प्रातःकालीनः -ना -नं, औषसिकः -की -कं, प्रगेतनः -नी -नं, वैयुष्टः -ष्टी -ष्टं.

Matins, *s. pl.* प्रातःकृत्यं, प्रातर्भजनं, प्रातःस्मरणं, प्रातःपूजा.

Matrice, *s.* (Womb) गर्भाशयः, योनिः *m. f.*, गर्भकोशः, जरायुः *m.*—(Of a type) मुद्राक्षरसंस्कारः, मुद्राक्षरगर्भः, मुद्राक्षराकारः.

Matricide, *s.* (The act) मातृहत्या, मातृवधः, मातृघातः, जननीवधः.—(The killer) मातृहन्ता *m.* (तृ), मातृहा *m.* (न्), मातृघातुकः, मातृघातकः, मातृघाती *m.* (न्), मातृघ्नः.

To matriculate, *v. a.* संस्कारपूर्व्वं or नामाभिलिखनपूर्व्वं विद्यालयं प्रविश् (c. 10. -वेशयति -यितुं).

Matriculated, *p. p.* संस्कारपूर्व्वं विद्यालयप्रवेशितः -ता -तं.

Matriculation, *s.* संस्कारपूर्व्वं or नामाभिलेखनपूर्व्वं विद्यालयप्रवेशनं.

Matrimonial, *a.* वैवाहिकः -की -कं, उद्वाहिकः -का -कं, औद्वाहिकः -की -कं, उद्वाही -हिनी -हि (न्), विवाही &c., विवाहसम्बन्धी -न्धिनी &c., पाणिग्रहणिकः -की -कं.

Matrimonially, *adv.* विवाहनियमानुसारेण, विवाहरीत्यनुरूपेण, विवाहविधिवत्.

Matrimony, *s.* विवाहः, उद्वाहः, परिणयः, पाणिग्रहः -हणं, पाणिग्राहः, उपयमः, उपयामः, विवाहावस्था, विवाहितावस्था.

Matrix, *s.* गर्भाशयः, गर्भकोशः, योनिः *m. f.* *See* Matrice.

Matron, *s.* कुटुम्बिनी, गृहिणी, गेहिनी, कौटुम्बिकी, जननी, मध्यमवयस्का, पुत्रवती, प्रजावती, पुत्रिणी, सुतिनी, पतिपुत्रवती, प्रौढा, प्रौढस्त्री, धीरा, पुरन्ध्री -न्ध्रिः *f.*, त्रयी, विजाता.

Matronly, *a.* कुटुम्बिनीयोग्यः -ग्या -ग्यं, पुरन्ध्रियोग्यः &c., गृहिणीयोग्यः &c., पुत्रिणीयोग्यः &c., गम्भीरा, धीरा, मध्यमवयस्का.

Matted, *p. p.* or *a.* (Laid with mats) कटी -टिनी -टि (न्), कटास्तीर्णः -र्णा -र्णं; 'matted hair,' जटा, सटा, जटिः, जुटकं, जूटः; 'having matted hair,' जटी -टिनी &c., जटिलः -ला -लं, जटावान् -वती -वत् (त्).

Matter, *s.* (Body, substance, not spirit, that which is visible) मूर्त्तिः *f.*, वस्तु *n.*, द्रव्यं, अनात्मद्रव्यं, अनात्मा, अनात्मीयवस्तु *n.*, अनात्मिकवस्तु *n.*, भूतात्मकवस्तु *n.*, पाञ्चभौतिकवस्तु *n.*, मूर्त्तिमद्वस्तु *n.*, साकारवस्तु *n.*, घनवस्तु *n.*, घनद्रव्यं, घनः, दृश्यस्पृश्यवस्तु *n.*, सारः, विषयः, शरीरं.—(Cause of the material world or substratum of the universe) प्रकृतिः *f.*, प्रधानं, माया.—(Material cause, materials, that of which any thing is composed) साधनं, साधनवस्तु *n.*, साधनभूतवस्तु, प्रकृतिः *f.*, सारः, उपकरणं, कारणं, उपादानं, उपादानकारणं.—(Thing) द्रव्यं, वस्तु *n.*, अर्थः, पदार्थः.—(Subject) विषयः, प्रकरणं, वस्तु *n.*, अर्थः, पदं, प्रस्तावः, प्रसङ्गः, सारः, वृत्तान्तः, विधिः *m.*, आस्पदं; 'matter in hand,' प्रस्तुतं; 'an important matter,' परमार्थः, गुर्वर्थः; 'an unimportant matter,' लघ्वर्थः, लघुविषयः, अल्पविषयः, अल्पार्थः; 'matter of dispute,' विवादास्पदं, विवादविषयः, वादविषयः; 'what is the matter?' को वृत्तान्तः.—(Cause) प्रयोजनं, हेतुः *m.*, प्रयोगः, कारणं.—(Import, consequence) अर्थः, गौरवं, गुरुत्वं, प्रभावः; 'of no matter,' अनर्थकः -का -कं, निरर्थकः -का -कं, निष्प्रभावः -वा -वं, अगुरुः -र्वी -रु.—(Business, affair) कर्म्म *n.* (न्), कार्य्यं, विषयः, व्यापारः, अर्थः, प्रयोगः.—(Pus, purulent matter) पूयं, पूयरक्तं, पूयशोणितं, दूष्यं, मलजं, क्षतजं, प्रसितं, आस्रदः.

To matter, *v. n.* (Be of importance) expressed by अर्थ in comp. or प्रभाव in comp.; as, 'it matters not,' निरर्थकं or अनर्थकं भवति; 'to matter but little,' लघ्वर्थः -र्था -र्थं or अल्पार्थः -र्था -र्थं or लघुप्रभावः -वा -वं भू; 'to matter greatly,' गुर्वर्थः -र्था -र्थं or गुरुप्रभावः -वा -वं भू, प्रभू.—(Form purulent matter) पूय् (c. 1. पूयते -यितुं), सपूयः -या -यं भू, पूयपूर्णः -र्णा -र्णं भू, पूयगर्भः -र्भा -र्भं भू.

Mattery, *a.* (Purulent) पूययुक्तः -क्ता -क्तं, सपूयः -या -यं, पूयपूर्णः -र्णा -र्णं, पूयगर्भः -र्भा -र्भं, पूयस्रावी -विणी -वि (न्), पूयविशिष्टः -ष्टा -ष्टं.

Mattock, *s.* खनित्रं, खात्रं, शैलभित्तिः *f.*, पाषाणदारणः, टङ्कः, खनहननी.

Mattress, *s.* तूलिका, तूला -ली, आस्तरणं, चोरपट्टी, तूलादिनिर्म्मितम् आस्तरणं, आस्तरः, प्रस्तरः, संस्तरः, स्तरिमा *m.* (न्), शयनीयं.

To maturate, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पाकं कृ or जन् (c. 10. जनयति -यितुं), सपूयं -यां कृ.

To maturate, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वीभू, पूयपूर्णः -र्णा -र्णं भू,

सपूयः -या -यं भू, पूयगर्भः -र्भा -र्भं भू, पूय् (c. 1. पूयते -यितुं).

Maturation, *s.* पाकः, परिपाकः, विपाकः, पचनं, पक्वता, परिपक्वता, पाचा -चिका, पचा, पूयत्वं, सपूयत्वं, पूयपूर्णता, पूयसंस्रावः, पूयस्रावः.

Maturative, *a.* पाकलः -ला -लं, पाचलः -ला -लं, पाचनः -ना -नं, पचिष्णुः -ष्णुः -ष्णु, उत्पचिष्णुः &c., पक्तुः &c., पाककरः -रा -रं, पाकजनकः -का -कं, पूयजनकः -का -कं.

Mature, *a.* पक्वः -क्वा -क्वं, सुपक्वः &c., परिपक्वः &c., पक्त्रिमः -मा -मं, विपक्त्रिमः -मा -मं, पाकिमः -मा -मं, पक्वतापन्नः -न्ना -न्नं, पक्वदशाप्राप्तः -प्ता -प्तं, पक्वदशापन्नः -न्ना -न्नं, परिणतः -ता -तं, पाकोन्मुखः -खा -खं, फलोन्मुखः -खा -खं; 'ready to drop,' विनाशोन्मुखः -खा -खं.—(Brought to perfection, complete) सम्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, सम्पूर्णः -र्णा -र्णं, प्रौढः -ढा -ढं; 'mature deliberation,' सुसमीक्षा -क्षणं, सुविचारः -रणा.

To Mature, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्वं -क्वां कृ, पक्वीकृ, परिपक्वं -क्वां कृ, परिपक्वीकृ, पाकं कृ or जन् (c. 10. जनयति -यितुं), पक्वतां or परिपाकं कृ or जन्, परिणामं कृ or जन्, सिद्धं -द्धां कृ, सिद्धीकृ, साध् (c. 10. साधयति -यितुं), सम्पन्नं -न्नां कृ, सम्पद् (c. 10. -पादयति -यितुं).

To Mature, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, पच् in pass. (पच्यते), परिपच्, पक्वतां or पक्वदशां or परिणामं या (c. 2. याति -तुं) or इ (c. 2. एति -तुं) or गम् (c. 1. गच्छति, गन्तुं), परिणतः -ता -तं भू, पाकोन्मुखः -खा -खं भू, सिद्धः -द्धा -द्धं भू, सम्पन्नः -न्ना -न्नं भू.

Matured, *p. p.* पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, परिणतः -ता -तं, पक्वतापन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, प्रौढः -ढा -ढं, सम्पन्नः -न्ना -न्नं, सम्पूर्णः -र्णा -र्णं.

Maturely, *adv.* सपाकं, सपरिणामं, परिपक्वं, सम्पन्नं, सम्पूर्णं.—(With full deliberation) सुसमीक्ष्य, सुविमृश्य, सुविचार्य्य.

Maturescent, *a.* पाकोन्मुखः -खा -खं, आपक्वः -क्वा -क्वं, परिणामोन्मुखः &c., पचतिकल्पः -ल्पा -ल्पं, पचतिदेशीयः -या -यं, पचतिदेश्यः -श्या -श्यं.

Maturity, matureness, *s.* पाकः, परिपाकः, पक्वता, पक्तिः *f.*, परिपक्वता, विपाकः, सुपक्वता, सुपक्तिः, परिणतिः *f.*, परिणामः, परिणतता -त्वं, पक्वभावः, पक्वदशा, पक्वावस्था, परिणतावस्था, पचा, पाचा -चिका, प्रौढिः *f.*, प्रौढता, सिद्धता, सिद्धिः *f.*, सम्पन्नता, सम्पूर्णता.

Matutinal, matutine, *a.* प्रातःकालीनः -ना -नं, प्रातःकालिकः -की -कं, औषिकः -की -कं, औषसः -सी -सं, उषस्यः -स्या -स्यं, प्रगेतनः -नी -नं, वैयुष्टः -ष्टी -ष्टं, प्राबोधिकः -की -कं, औदयिकः -की -कं, प्रातःकालसम्बन्धी -न्धिनी -न्धि (न्).

Maudlin, *a.* ईषन्मत्तः -त्ता -त्तं, मत्तकल्पः -ल्पा -ल्पं, मत्तदेशीयः -या -यं.

Maul, *s.* बृहन्मुद्गरः, काष्ठमुद्गरः, स्थूलमुद्गरः, घनः.

To Maul, *v. a.* स्थूलवेत्रेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं), वेत्राघातं कृ, वेत्राघातेन क्षतविक्षतीकृ.

Mauled, *p. p.* वेत्रादिप्रहारेण परिक्षतः -ता -तं or क्षतिमुखः -खा -खं.

Mausolean, *a.* चिताचूडकसम्बन्धी -न्धिनी -न्धि (न्), चैत्यसम्बन्धी &c.

Mausoleum, *s.* चिताचूडकं, चैत्यं, चित्यं, चैत्रः, समाधिः *m.*

Mauvaise-honte, *s.* सभाभीतिः *f.*, सभाकम्पः, जनभीतिः, लोकभीतिः, जनलज्जा.

Maw, *s.* पशूनां जठरः or उदरं.—(Of fowls) उपजठरः.

Mawkish, *a.* विरसः -सा -सं, नीरसः -सा -सं, अरसिकः -का -कं.

Mawkishly, *adv.* विरसं, वैरस्येन, सवैरस्यं, रसं विना, अरसिकं.

Mawkishness, *s.* विरसता -त्वं, वैरस्यं, अरसता, अरसिकत्वं, म्लानता.

Maxillar, maxillary, *a.* हनुसम्बन्धी -न्धिनी -न्धि (न्) हनु in comp.

Maxim, *s.* सूत्रं, वचनं, वाक्यं, तत्त्वं, विधिः *m.*, विधानं, नियमः, स्थितिः *f.*

आदेशः, निदेशः, निर्देशः, कल्पः, न्यायः, नीतिः *f.*, क्रमः, चोदना, निगमः, सिद्धान्तः, मतं.

Maximum, *s.* उत्तमसंख्या, परमसंख्या, अधिकसंख्या, उत्तमपरिमाणं.

May, *s.* (The month) वैशाखोत्तरार्द्धं, ज्येष्ठपूर्वार्द्धं, वैशाखः, माधवः, राधः, ज्येष्ठः, शुक्रः, पद्ममासः.

May, *v. auxil.* (Be possible) सम्भू, शक् in pass. (शक्यते), शक्यः -क्या -क्यं भू or expressed by the potential.—(Have liberty, be allowed) expressed by the potential; as, 'he may do that,' स तत् कुर्य्यात्. *See also* Permitted, Allowed, &c. (May be) स्यात्.

May-day, *s.* पूर्वोक्तपञ्चममासस्य प्रथमदिवसः.

May-pole, *s.* क्रीडादण्डविशेषो यत्परितो मण्डलनृत्यं क्रियते.

Mayor, *s.* नगराध्यक्षः, पुराध्यक्षः, नगराधिकारी *m.* (न्).

Mayoralty, *s.* नगराध्यक्षता -त्वं, पुराध्यक्षता, नगराधिकारः -रिता, नगराध्यक्षपदं, नगराध्यक्षाधिकारः.

Mayoress, *s.* नगराधिकारिणी, नगराध्यक्षस्त्री, नगराध्यक्षपत्नी.

Maze, *s.* (Labyrinth) गहनं, सुगहनस्थानं, दुर्निर्गमस्थानं, अशक्यनिर्गमः प्रदेशः, भ्रमजनकः प्रदेशः, दुर्गतिः *f.*—(Intricacy, perplexity) वक्रता, कौटिल्यं, विषमता, वैषम्यं, क्लिष्टता, काठिन्यं, दुःशोध्यता, व्यस्तता.

Mazy, *a.* गहनः -ना -नं, सुगहनः -ना -नं, दुर्निर्गमः -मा -मं, वक्रः -क्रा -क्रं, अतिवक्रः -क्रा -क्रं, भ्रमजनकः -का -कं, भ्रान्तिजनकः -का -कं, दुःशोध्यः -ध्या -ध्यं.

Me, *pron.* acc. c. मां; 'by me,' मया; 'to me,' मह्यं; 'of me,' मम.

Meacock, *s.* गेहशूरः, गेहनर्दी *m.* (न्), कापुरुषः, स्त्रीविधेयः.

Mead, *s.* मधु *n.*, मधुपानीयं, मधुनीरं, मधुपयस् *n.*

Mead, meadow, *s.* क्षेत्रं, केदारः, यवसस्थानं, शाद्वलस्थानं, गोचरः, गोप्रचारः; 'meadow-grass,' यवसः, क्षेत्रियं; 'relating to a meadow,' कैदारः -री -रं, क्षेत्रिकः -की -कं.

Meadowy, *a.* यवसमयः -यी -यं, यवसीयः -या -यं, शाद्वलः -ला -लं.

Meager, meagre, *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणः -णा -णं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, शुष्कमांसः -सा -सं, शुष्काङ्गः &c., क्षामः -मा -मं, क्षामशरीरः &c., अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं, तनुः -नुः -न्वी -नु, वितनुः &c., प्रतनुः &c., शातः -ता -तं.—(Barren as soil) रूक्षः -क्षा -क्षं, वन्ध्यः -न्ध्या -न्ध्यं; 'a barren soil,' मरुस्थलं-ली.—(As style) विरसः-सा-सं, म्लानुः-नुः-नु.

Meagerly, *adv.* परिकृशं, सकार्श्यं, कार्श्येन, क्षीणतया, रूक्षं.

Meagerness, meagreness, *s.* कृशता -त्वं, कार्श्यं, परिकृशता, कृशाङ्गता, क्षीणता, क्षामता, शरीरक्षीणता, मांसक्षीणता, शुष्कता, मांसशुष्कता, अपुष्टता, विपुष्टता, अमांसत्वं -ता, तनुता, शुष्काङ्गता, मांसहीनता, रूक्षता.

Meal, *s.* (Flour) शक्तुः *m.*, क्षोदः, पिष्टं, चूर्णं, गोधूमचूर्णं, गोधूमक्षोदः, अपूप्यः, क्षोदितं, गुण्डिकः -का, समीदः; 'barley-meal,' यवक्षोदः.—(Repast) आहारः, भोजनं, भक्ष्यं, भक्षिका, अशनं, प्राशनं, अभ्याहारः, अन्नं; 'good meal,' सुभोजनं, इष्टाभोजनं; 'poor meal,' कुभोजनं; 'light meal,' लघ्वाहारः, अल्पाहारः, फलाहारः; 'morning meal,' प्रातर्भोजनं, प्रातरशनं, प्रातराशः; 'meal at noon,' माध्याह्निकं; 'at night, रात्रिभोजनं; 'meal supplied by another,' परान्नं; 'row or party at a meal,' पंक्तिः *f.*; 'to make a meal,' आहारं कृ, भोजनं कृ; 'one who has made a meal,' कृताहारः -रा -रं, कृतभोजनः -ना -नं; 'making one's meals at irregular hours,' विषमभोजनं; 'meal-time,' भोजनकालः, अन्नकालः.

MEALINESS, *s.* सचूर्णता -त्वं, क्षोदितत्वं, कोमलता, शक्तुपूर्णता, मृदुता.

MEALMAN, *s.* शक्तुविक्रयी *m.* (न्), चूर्णविक्रेता *m.* (तृ), क्षोदविक्रयोपजीवी *m.*

MEALY, *a.* चूर्णमयः -यी -यं, क्षोदमयः -यी -यं, सचूर्णः -र्णा -र्णं, शक्तुपूर्णः -र्णा -र्णं, कोमलः -ला -लं, मृदुलः -ला -लं, मसृणः -णा -णं.

MEALY-MOUTHED, *a.* मृदुभाषी -षिणी -षि (न्), कोमलमुखः -खी -खं, मृदुमुखः &c.

MEAN, *a.* (Base, low-minded) नीचः -चा -चं, दीनः -ना -नं, कृपणः -णा -णं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं, कुत्सितः -ता -तं, क्षुद्रः -द्रा -द्रं, तुच्छः -च्छा -च्छं, हीनः -ना -नं, कदर्य्यः -र्य्या -र्य्यं, अनार्य्यः &c., जघन्यः -न्या -न्यं, खलः -ला -लं, दुष्टः -ष्टा -ष्टं, अधमः -मा -मं, प्राकृतः -ती -तं, पामरः -री -रं, अधमवृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c., दीनवृत्तिः &c., पामरवृत्तिः &c., हीनवृत्तिः &c., कृपणबुद्धिः -द्धिः -द्धि, कु or का prefixed, as, 'a mean man,' कुपुरुषः, कापुरुषः.—(Low in rank or birth,' हीनजातिः -तिः -ति, अधमजातिः &c., अधमजातीयः -या -यं, अन्त्यजातीयः -या -यं, जघन्यजातिः &c., नीचजातिः &c., अकुलीनः -ना -नं, अकुलः -ला -लं, दुष्कुलीनः -ना -नं, अधमवर्णजातः -ता -तं.—(Contemptible, worthless,) गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, कुत्सितः -ता -तं, तुच्छः -च्छा-च्छं, निर्गुणः -णा -णं, तृणप्रायः -या -यं, क्षुल्लकः -का -कं, लघुः -घुः-घ्वी-घु, लघुप्रभावः-वा-वं.—(Middle, moderate in size) मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यपरिमाणः -णा -णं, मध्यमप्रमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.—(Intermediate, intervening) मध्यः &c., मध्यमः &c., मध्यस्थः -स्था -स्थं, मध्यस्थितः -ता -तं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्गतः -ता -तं, व्यवहितः -ता -तं; 'in the mean time,' अनन्तरं -रे, तदनन्तरं, अत्रान्तरे, इतोमध्ये.—(In geometry or mathematics) मध्यः &c., मध्यमः &c., समः -मा -मं; 'mean anomaly,' मध्यकेन्द्रं; 'mean motion of a planet,' मध्यमगतिः *f.*

MEAN, *s.* (Middle place, middle rate, medium) मध्यता -त्वं, समता, साम्यं, मध्यमपरिमाणं, सामान्यपरिमाणं, समपरिमाणं, सामान्यपक्षः, समपक्षः.—(Intervening time) मध्यकालः, अभ्यन्तरकालः, अन्तरकालः, कालान्तरं, कालाभ्यन्तरं, अन्तरं, अन्तर्गतकालः, मध्यान्तरं, मध्यावसरः, मध्यावधिः *m.*, अवधिः *m.*—(In geometry, &c.) समं, मध्यं.—(Instrument, means or medium through which any thing is done) साधनं, उपायः, कारणं, उपकरणं, करणं, द्वारं, द्वार् *f.*, अभ्युपायः, हेतुः *m.*, विधानं, कर्म्मसाधनं, कार्य्यसाधकं, कार्य्यसाधनं, सम्भवः, अङ्गं, उपचारः, योगः, गतिः *f.*, उपपत्तिः *f.*, साहाय्यं, साधनसामग्री -ग्र्यं, सामग्री, साहित्यं; 'by means of,' उपायेन, द्वारेण, द्वारा, हेतुना, हेतोः, कारणेन; 'by means of a lever,' उत्तोलनदण्डोपायेन or उत्तोलनदण्डद्वारेण -द्वारा; 'by lawful means,' धर्म्मोपायेन, धर्म्मोपायैः or expressed by the indecl. part.; as, 'by means of numerous experiments,' अनेकवारं परीक्ष्य; 'means of subsistence,' जीवनोपायः, जीवनहेतुः *m.*, उपजीवकं -विका, उपजीवनं; 'by all means, in all ways,' सर्व्वथा, सर्व्वथैव, सर्व्वप्रकारेण; 'by all means, certainly,' अवश्यं, अवश्यमेव; 'by any means,' कथमपि, कथञ्चन, कथञ्चित्, यथाकथञ्चित्, कथं कथमपि; 'by no means,' न कथञ्चन, न कथञ्चित्.—(Means, resources, income) विभवः, द्रव्यं, धनं, अर्थः, आयः, आगमः, धनागमः, सम्भवः, शक्तिः *f.*, बलं, सामर्थ्यं; 'according to one's means,' यथाविभवं, यथासम्भवं, यथाशक्ति, यथासामर्थ्यं; 'having small means,' अल्पधनः -ना -नं, अल्पविभवः -वा -वं.

TO MEAN, *v. a.* (Intend) अभिप्रे (c. 2. अभिप्रैति -तुं, rt. इ), अभिप्रायं कृ, उद्दिश् (c. 6. -दिशति -देष्टुं), मनसा उद्दिश्, अभिसन्धा (c. 3. -दधाति -धातुं), इष् (c. 6. इच्छति, एषितुं), उपलक्ष् (c. 10. -लक्षयति -यितुं) or expressed by the des. form of a verb; as, 'to mean to do,' कृ in des. (चिकीर्षति -र्षितुं); 'to mean to go,' गम् in des. (जिगमिषति -षितुं); 'to mean to say,' वच् in des. (विवक्षति -क्षितुं), or by काम with the infin.; as, 'what do you mean to say?' किं वक्तुकामो ऽसि; 'what do you mean to do?' किं कर्त्तुकामो ऽसि; 'where do you mean to go?' कुत्र गन्तुकामो ऽसि.—(Signify, indicate) सूच् (c. 10. सूचयति -यितुं), उद्दिश्, निर्दिश्, बुध् (c. 10. बोधयति -यितुं), उद्बुध्.

TO MEAN, *v. n.* (Have meaning) अर्थवान् -वती -वद् भू, सार्थः -र्था -र्थं भू, वच् in des. (विवक्षति -क्षितुं), अर्थं सूच् (c. 10. सूचयति -यितुं) or expressed by अर्थ *i.e.* signification, meaning) in comp.; as, 'a speech that means to convey censure,' निन्दार्थो वादः.

MEANDER, *s.* वक्रता, वक्रगतिः *f.*, वक्रिमा *m.* (न्), जिह्मता, जैह्म्यं, जिह्मगतिः *f.*, कुटिलता, कौटिल्यं, कुटिलगतिः *f.*, तिर्य्यक्त्वं, तिर्य्यग्गतिः *f.*, असमानगतिः, विसर्पणं, सर्पः -र्पणं, सर्पगतिः *f.*; 'of a river's bank,' रोधोवक्रता.

TO MEANDER, *v. n.* विसृप् (c. 1. -सर्पति -सर्प्तुं), विसर्पणं कृ, वक्रं or जिह्मं गम् (c. 1. गच्छति, गन्तुं), कुटिलं or तिर्य्यग् या (c. 2. याति -तुं), सर्पवद् या.

MEANDERING, *part.* or *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, वक्रगतिः -तिः -ति, वक्रगामी -मिनी -मि (न्), जिह्मः -ह्मा -ह्मं, जिह्मगतिः &c., जिह्मगामी &c., कुटिलः -ला -लं, कुटिलगतिः &c., कुटिलगामी &c., तिर्य्यङ् तिरश्ची तिर्य्यक् (च्), तिर्य्यग्गतिः &c., तिर्य्यग्गामी &c., विसर्पी -र्पिणी &c., सर्पगतिः &c. वक्रतारः -रा -रं, वक्ररोधाः -धाः -धः (स्), असमानगतिः &c., विषमगतिः &c.

MEANING, *s.* (Intention) अभिप्रायः, अभिप्रेतं, आशयः, उद्देशः, आकांक्षा, अर्थः, तात्पर्य्यं, आकूतं, इच्छा, छन्दः, छन्दस् *n.*, सङ्कल्पः, बुद्धिः *f.*, मतिः *f.*, मतं, इङ्गितं, उपलक्षितं, हृदयं, भावः.—(What is intended to be said) विवक्षितं, विवक्षा.—(Sense, signification) अर्थः, अभिप्रायः, विवक्षितं, विवक्षा, आकांक्षा, छन्दस् *n.*, विषयः; 'meaning or force of a word,' पदार्थः, भावार्थः, शक्तिः *f.*, विग्रहः; 'original meaning,' मुख्यार्थः, मुख्यत्वं, मूलार्थः; 'literal meaning,' अन्वयार्थः, पदार्थः; 'metaphorical meaning,' गौणार्थः, गौणत्वं; 'latent or hidden meaning,' मर्म्म *n.* (न्), अन्तर्गर्भः; 'deep in meaning,' गूढार्थः -र्था -र्थं, निगूढार्थः -र्था -र्थं, गुर्व्वर्थगह्वरः -रा -रं; 'having little meaning,' अल्पार्थः -र्था -र्थं, अल्पविषयः -या -यं.

MEANING, *part.* or *a.* अभिप्रेत्य, उद्दिश्य, अभिसन्धाय.—(Significant) अर्थवान् -वती -वत् (त्), सार्थः -र्था -र्थं, पूर्णार्थः -र्था -र्थं, अर्थान्वितः -ता -तं, साकूतः -ता -तं, उद्बोधकः -का -कं, वाचकः -का -कं.

MEANINGLESS, *a.* अर्थहीनः -ना -नं, निरर्थकः -का -कं, अनर्थकः -का -कं.

MEANINGLY, *adv.* सार्थं, साकूतं, अर्थवत्, पूर्णार्थतस्, गुर्व्वर्थतस्.

MEANLY, *adv.* (Poorly, in a low way) कृपणं, कार्पण्येन, सकार्पण्यं, कुत्सितं, दीनं, सदैन्यं, अपकृष्टं, निकृष्टं, कृपणवत्, निकृष्टवत्, खलवत्, अधमवत्, अधमप्रकारेण, जघन्यवत्, तुच्छवत्, कदर्य्यवत्, अनार्य्यवत्; 'meanly born,' हीनजातिः -तिः -ति, अधमजातिः &c.—(Moderately) परिमितं, अभृशं.—(Contemptuously) सावमानं, अनादरेण, सलाघवं, लाघवेन, लघु.

MEANNESS, *s.* (Baseness, lowness) कृपणता -त्वं, कार्पण्यं, दीनता -त्वं,

दैन्यं, अपकृष्टता, निकृष्टता, नीचता, क्षुद्रता, अधमता, हीनता, तुच्छता, कदर्य्यता, अनार्य्यता, जघन्यता, खलता, दुष्टता, पामरता, अधमवृत्तिता, हीनवृत्तित्वं, मनोहीनता, बुद्धिकार्पण्यं, कृपणबुद्धित्वं, अनुदारता; 'of birth,' हीनजातित्वं, अधमजातित्वं, अकुलीनता, दुष्कुलीनता.—(Contemptibleness) गर्ह्यता, तुच्छत्वं, लघुता, लाघवं, कुत्सितत्वं, निर्गुणता.

Mean-spirited, *a.* कृपणबुद्धिः -द्धिः -द्धि, कृपणमतिः &c., दीनबुद्धिः &c.

Means, *s. pl.* (Resources) विभवः.—(Instrument) साधनं, उपायः. *See* Mean, *s.*

Meant, *p. p.* अभिप्रेतः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, विवक्षितः -ता -तं.

Meanwhile, *adv.* अनन्तरं -रे, तदनन्तरं, अत्रान्तरे, इतोमध्ये, अतोमध्ये, मध्यकाले, अभ्यन्तरकाले, यावत्.

Measled, *a.* वसन्तरोगग्रस्तः -स्ता -स्तं, गोवरोपहतः -ता -तं.

Measles, *s. pl.* रक्तस्फोटोत्पविलक्षितो रोगविशेषः. The Mahrattí words गोवरः, and शुभा, may perhaps be used.

Measurable, *a.* मेयः -या -यं, प्रमेयः -या -यं, परिमेयः -या -यं, मापनीयः -या -यं, माप्यः -प्या -प्यं, मातव्यः -व्या -व्यं, परिमाणयोग्यः -ग्या -ग्यं.

METALLIFEROUS, *a.* धातूत्पादकः -का -कं, धातुजनकः -का -कं.

METALLIST, *s.* धातुपरीक्षकः, धातुज्ञः, धातुविद् *m.*, धातुकर्म्मकारी *m.* (न्).

METALLOGRAPHY, *s.* धातुवर्णनं, धातुविवरणं, धातुविवरणविद्या.

METALLURGIST, *s.* धातुकर्म्मकारी *m.* (न्), धातुशोधकः, धातुशोधनकृत् *m.*

METALLURGY, *s.* धातुशोधनं, धातुशोधनविद्या, धातुकर्म्म *n.* (न्).

To METAMORPHOSE, *v. a.* रूपपरिणामं कृ, परिणतरूपं -पां कृ, शरीरपरिणामं कृ, आकारपरिणामं कृ, रूपान्तरं कृ, देहान्तरं कृ, रूपविकारं कृ, रूपभेदं कृ.

METAMORPHOSED, *p. p.* परिणतरूपः -पा -पं, परिणतशरीरः -रा -रं, परिणताकारः -रा -रं, परिणताकृतिः -तिः -ति, रूपान्तरीकृतः -ता -तं, विकृताकारः -रा -रं, परिणतः -ता -तं, विकृतः -ता -तं, भिन्नरूपः -पा -पं.

METAMORPHOSIS, *s.* रूपपरिणामः, रूपान्तरं, देहान्तरं, आकारपरिणामः, रूपविकारः, रूपभेदः, शरीरविकारः, परिणामः, विकारः, विकृतिः *f.*

METAPHOR, *s.* रूपकं, व्यञ्जनं -ना, व्यञ्जकः, लक्षणा, उपलक्षणं, ध्वनिः *m.*, समासोक्तिः *f.*, आरोपः, उपमा, उपमितिः *f.*, दृष्टान्तः, उत्प्रेक्षा, निदर्शनं, अहल्लक्षणा, अहल्लक्षणायी, रूपकालङ्कारः, उपचारः, उपक्षेपः.

METAPHORIC, METAPHORICAL, *a.* लाक्षणिकः -की -कं, उपलक्षितः -ता -तं, सरूपकः -का -कं, सव्यञ्जकः -का -कं, व्यञ्जकः -का -कं, आरोपितः

-ता -तं, ध्वनितः -ता -तं, गौणः -णी -णं, औपचारिकः -की -कं; 'metaphorical sense,' गौणार्थः.

METAPHORICALLY, *adv.* सरूपकं, सव्यञ्जनं, रूपकपूर्व्वं, रूपकक्रमेण, उपलक्षणपूर्व्वं, उपलक्षणतस्, लाक्षणिकं, ध्वनितं.

METAPHRASE, *s.* यथाशब्दं भाषान्तरं, यथाशब्दभाषान्तरं.

METAPHRAST, *s.* यथाशब्दभाषान्तरकर्त्ता *m.* (र्त्तृ).

METAPHYSIC, METAPHYSICAL, *a.* आन्वीक्षिकः -की -कं, आन्वीक्षिकीसम्बन्धी -न्धिनी -न्धि (न्), मानसधर्म्मविषयः -या -यं, आत्मविषयः -या -यं, आन्वीक्षिकीविषयः -या -यं, आत्मज्ञानसम्बन्धी &c., अध्यात्मविद्यासम्बन्धी &c., मानसः -सी -सं, आध्यात्मिकः -की -कं, नैयायिकः -का -कं.

METAPHYSICALLY, *adv.* मानसधर्म्मानुसारेण, आत्मविद्यानुरूपेण.

METAPHYSICIAN, *s.* आन्वीक्षिकीज्ञः, मानसधर्म्मज्ञः, मानसविद्याज्ञः, अध्यात्मविद्याज्ञः, नैयायिकः, अर्थतत्त्ववेत्ता *m.* (त्तृ).

METAPHYSICS, *s.* आन्वीक्षिकी, आन्वीक्षिकी विद्या, मानसधर्म्मविषयका विद्या, मानसधर्म्माः, आत्मविषयकं ज्ञानं, आत्मधर्म्मविषयका विद्या, सूक्ष्मविषयज्ञानं, आत्मविद्या, अध्यात्मविद्या, मानसविद्या, आत्मतत्त्वविद्या, आत्मतत्त्वशास्त्रं, अर्थतत्त्वशास्त्रं, अर्थतत्त्वविद्या, आत्मतत्त्वविचारः.

METASTASIS, *s.* रोगस्थानान्तरं, रोगस्थलान्तरं.

METATARSAL, *a.* प्रपदीनः -ना -नं, प्रपदीयः -या -यं, प्रपदसम्बन्धी &c.

METATARSUS, *s.* प्रपदं, पादस्य मध्यभागः.

METATHESIS, *s.* अक्षरविपर्य्ययः, वर्णव्यत्ययः, अक्षरपरिवर्त्तनं.

To METE, *v. a.* मा (c. 2. माति -तुं, c. 10. मापयति -यितुं), परिमा, मापनं कृ.

METED, *p. p.* मितः -ता -तं, सम्मितः -ता -तं, परिमितः &c., निर्म्मितः &c.

METEMPSYCHOSIS, *s.* प्राणिनां पुनर्जन्म *n.* (न्), अन्यजन्म *n.*, जन्मान्तरं, जन्मजन्मान्तरं, देहान्तरप्राप्तिः *f.*, शरीरान्तरप्राप्तिः *f.*, रूपान्तरग्रहणं, अन्यशरीरग्रहणं.

METEOR, *s.* उल्का, खोल्का -ल्कः, अग्न्युत्पातः, केतुतारा, शिखावज्ज्योतिस् *n.*, अग्निरेखाकारि गगणात्पतज्ज्योतिस्, उपाहितः, उपग्रहः, उत्पातः, दिव्योत्पातः.

METEORIC, *a.* (Pertaining to meteors) उल्कासम्बन्धी &c., उल्काविषयः -या -यं.—(Proceeding from) उल्कोत्पन्नः -न्ना -न्नं, उल्कोद्भवः -वा -वं, उल्काजः -जा -जं.

METEOROLOGIC, METEOROLOGICAL, *a.* विद्युदुल्कादिविषयकः -का -कं, आकाशोद्भववस्तुसम्बन्धी &c., दिव्युद्भवविषयसम्बन्धी &c., आकाशीयः -या -यं.

METEOROLOGY, *s.* विद्युदुल्कादिविद्या, आकाशोद्भववस्तुविद्या, अन्तरीक्षभवविषयविद्या, आकाशविद्या, अन्तरीक्षविद्या, सामान्यवायुविषयका विद्या, वायुचक्रशास्त्रं.

METEOROUS, *a.* उल्कागुणकः -का -कं, उल्काधर्म्मकः -का -कं.

METER, *s.* मापकः, परिमापकः, मापनकर्त्ता *m.* (र्त्तृ), माननिरूपकः.

METHEGLIN, *s.* (Kind of mead) मधु *n.*, मधुपानीयं, मधुनीरं.

METHINKS, *v. impers.* मन्ये, इति मन्ये, इति तर्कयामि.

METHOD, *s.* (Regular arrangement) क्रमः, अनुक्रमः, पर्य्यायः, व्यवस्था, व्यवस्थापनं, क्रमेण स्थापनं, आनुपूर्व्यं -र्व्वी, आनुपूर्वी, परिपाटिः -टी *f.*, पारिपाट्यं, परम्परा, पारम्पर्य्यं, विन्यासः, व्यूहनं, व्यूढिः *f.*, प्रतिविधानं, विधानं, संविधानं, रचना, विरचनं -ना, आवृत् *f.*—(Way, mode, process) रीतिः *f.*, मार्गः, विधिः *m.*, विधानं, विधः, प्रकारः, क्रमः, नियमः, सूत्रं, वृत्तिः *f.*, रूपं, युक्तिः *f.*, पद्धतिः *f.*, न्यायः, मर्य्यादा, वृत्तान्तः, कॢप्तिः *f.*, क्रिया, धारा; 'in this method,' अनेन विधानेन, अनेन प्रकारेण, अनया रीत्या, अनयथा. *See* MANNER.

METHODICAL, *a.* (Said of persons) नियमशीलः -ला -लं, क्रमशीलः -ला -लं, यथाक्रमकारी -रिणी -रि (न्), क्रमानुगतः -ता -तं, क्रमानुकारी &c., क्रमकः -का -कं, क्रमिकः &c.—(Of things) क्रमिकः -का -कं, क्रमकः -का -कं, यथाक्रमः -मा -मं, सक्रमः -मा -मं, यथानुक्रमः -मा -मं, क्रमानुसारी &c., व्यवस्थितः -ता -तं, सूचितः -ता -तं, यथापर्य्यायः -या -यं, अनुपूर्व्वः -र्व्वा -र्व्वं, अनुक्रान्तः -न्ता -न्तं; 'methodical proceeding,' अनुक्रमः -मणं.

METHODICALLY, *adv.* यथाक्रमं, अनुक्रमेण, यथानुक्रमं, सक्रमं, क्रमतस्, क्रमशस्, क्रमेण, क्रमात्, पर्य्यायेण, यथापर्य्यायं, यथानियमं, यथामार्गं, अनुपूर्व्वशस्, यथासूत्रं, विधितस्; 'done methodically,' अनुक्रान्तः -न्ता -न्तं.

METHODICALNESS, *s.* क्रमशीलता, क्रमिकत्वं, व्यवस्थितिः *f.*, सक्रमता.

METHODISM, *s.* नियमनिष्ठा, नियमासक्तिः *f.*, कर्म्मनिष्ठा.

METHODIST, *s.* नियमनिष्ठः, नियमासक्तः, नियमी *m.* (न्), कर्म्मनिष्ठः.

METHODISTICAL, *a.* नियमनिष्ठाशीलः -ला -लं, नियमनिष्ठासम्बन्धी &c.

To METHODIZE, *v. a.* व्यवस्था in caus. (-स्थापयति -यितुं), व्यवस्थापनं कृ, क्रमेण or यथाक्रमं स्था, विरच् (c. 10. -रचयति -यितुं), विधा (c. 3. -दधाति -धातुं), संविधा, प्रतिविधा, विन्यस् (c. 4. -अस्यति -असितुं) व्यूह् (c. 1. -ऊहते -हितुं).

METHODIZED, *p. p.* व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, विन्यस्तः -स्ता -स्तं, प्रतिविहितः -ता -तं, अनुक्रान्तः -न्ता -न्तं, परिपाटीकृतः -ता -तं.

METONYMICAL, *a.* अजहल्लाक्षणिकः -की -कं, अजहत्स्वार्थलाक्षणिकः -की -कं.

METONYMY, *s.* अजहत्स्वार्था, अजहल्लक्षणा, भक्तिः *f.*

METRE, *s.* छन्दस् *n.*, छन्दः, वृत्तं, वर्णवृत्तं, गणवृत्तं, मात्राछन्दस्, पद्यं, वक्त्रं, वेदः; 'violation of metre,' छन्दोभङ्गः. The following are certain forms of metre explained in Wilson's Dictionary: 1. अनुष्टुप् *f.* (भ्) or श्लोकः, of which varieties are चित्रपदा, माणवकः, विद्युन्माला, प्रमाणिका, 2. त्रिष्टुप् *f.*, varieties इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः *f.*, रथोद्धता, 3. जगती, varieties वंशस्थविलं, द्रुतविलम्बितं, भुजङ्गप्रयातं, 4. अतिजगती, varieties मञ्जुभाषिणी, प्रहर्षिणी, पुष्पिताग्रा, 5. शक्करी or शक्वरी, varieties वसन्ततिलकः, अपराजिता, वासन्ती, लोला, नान्दीमुखं, 6. अतिशक्करी or अतिशक्वरी, varieties मालिनी or मानिनी, चित्रा, तूणकं, लीलाखेलः, 7. अष्टी, varieties चकिता, पञ्चचामरं, मदनललितं, वाणिः *f.*, प्रवरललितं, 8. अत्यष्टी, varieties शिखरिणी, मन्दाक्रान्ता, हरिणी, भाराक्रान्ता, पृथ्वीभरः, 9. धृतिः *f.* varieties नाराचः, नन्दनं, शार्दूलललितः, कुसुमितलता, चित्रलेखा, 10. अतिधृतिः *f.* of which varieties are शार्दूलविक्रीडितः, मेघविस्फूर्जितं, सुरसा, फुल्लदाम *n.* (न्), 11. कृतिः *f.*, varieties सुवदना, गीतिका, शोभा, 12. प्रकृतिः, varieties स्रग्धरा, सरसी, 13. आकृतिः *f.*, varieties हंसी, मदिरा, 14. विकृतिः *f.* 15. संकृतिः *f.*, 16. अतिकृतिः *f.*, variety क्रौञ्चपदा, 17. उत्कृतिः *f.* variety भुजङ्गविजृम्भितं, 18. दण्डकः, varieties जीमूतः, लीला, शङ्खः, व्यालः, प्रचितं, 19. प्रतिष्ठा, varieties कन्या, सती, 20. सुप्रतिष्ठा, varieties पंक्तिः *f.*, प्रिया, 21. मध्या or मध्यमा, varieties नारी, मृगी, 22. उक्था, 23. अत्युक्था, 24. बृहती, varieties भुजङ्गशिशुः *m.*, भुजङ्गसङ्गता, मणिमध्यं, 25. पंक्तिः *f.*, varieties रुक्मवती, मनोरमा, त्वरितगतिः *f.*, 26. उष्णिक् *f.* (ह्), varieties मधुमती, कुमारललिता, 27. गायत्री, varieties तनुमध्या, शशिवदना, this and the preceding are found only in the Vedas. There is another class of metres regulated, not by the number of syllables, but by the number of syllabic instants or short syllables, each long syllable being supposed to contain two short. They are called, 1. आर्य्या, varieties पथ्या, विपुला, चपला, मुखचपला, जघनचपला, गीतिः *f.*, उपगीतिः *f.*, उद्गीतिः *f.*, आर्य्यागीतिः *f.*

2. वैतालीयः, varieties औपच्छन्दसिकः, दोहडिका.

METRICAL, *a.* छान्दसः -सी -सं, छन्दोयुक्तः -क्ता -क्तं, छन्दोवान् -वती -वत् (त्), छन्दोबद्धः -द्धा -द्धं, छन्दोरूपः -पा -पं, छन्दोविशिष्टः -ष्टा -ष्टं, पद्यरूपः -पा -पं, पद्यात्मकः -का -कं, स्वरबद्धः &c., तालबद्धः &c.

METRONOME, *s.* तालमापकयन्त्रं, तालमापनी.

METROPOLIS, *s.* राजधानं -नी -नकं -निका, राजनगरी, मुख्यनगरी, पुरोत्तमः, कर्वटः.

METROPOLITAN, *a.* राजधानसम्बन्धी -न्धिनी -न्धि (न्), राजधानीयः -या -यं. —(Archbishop) प्रधानधर्म्माध्यक्षः, मुख्यधर्म्माध्यक्षः, धर्म्माध्यक्षाधिपतिः *m.*

METTLE, *s.* वीर्य्यं, साहसं, सत्त्वं, तेजस् *n.*, प्रभावः, प्रहर्षः, पौरुषं, ओजस्, ऊर्जः, मदः, मादः, मत्तता.

METTLED, METTLESOME, *a.* महासत्त्वः -त्त्वा -त्त्वं, महातेजाः -जाः -जः (स्), तेजोवान् -वती -वत् (त्), ओजस्वी -स्विनी -स्वि (न्), साहसिकः -की -कं, वीर्य्यवान् &c., मदोद्धतः -ता -तं, ऊर्जस्वी &c., मत्तः -त्ता -त्तं, मादवान् &c., प्रचण्डः -ण्डा -ण्डं.

METTLESOMENESS, *s.* मत्तता, मदोद्धतिः *f.*, प्रचण्डता, महासत्त्वता.

MEUM ET TUUM, *s.* स्वपरभेदः, आत्मपरभेदः, स्वपरविचारः.

MEW, *s.* (Cage) पञ्जरं, पिञ्जरं, वीतंसः.—(Sea-fowl) जलकुक्कुटः -टी. —(Cry of a cat) मेनादः, मार्जारनादः.

To MEW, *v. a.* (Shut up) पञ्जरे or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or अवरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं).—(Molt, shed the feathers) पक्षान् or पर्णान् पत् (c. 10. पातयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं) or निर्मुच्, पक्षनिर्मोकं कृ.—(Cry as a cat) मेनादं कृ, मार्जारवद् रु (c. 2. रौति, रवितुं).

To MEWL, *v. n.* शिशुवत् or बालकवत् क्रन्द् (c. 1. क्रन्दति -न्दितुं) or रुद् (c. 2. रोदिति -तुं), शिशुवत् क्रन्दनं कृ or रुदितं कृ or चीत्कारं कृ.

MEWS, *s. pl.* अश्वगोष्ठं, अश्वशाला, राजाश्वस्थानं.

MIASM, MIASMA, *s.* वायुदूषकः पूतिगन्धः or कुत्सितगन्धः, रोगजनकः कुवायुः or पूतिवातः, पूतिवाष्पः, मारकवाष्पः, दूषकवाष्पः.

MICA, *s.* अभ्रं, अभ्रकं, स्वच्छपत्रं, निर्मलं.

MICHAELMAS, *s.* वत्सरस्य तृतीयपादावसाने पर्व्व *n.* (न्), शरत्कालीनपर्व्व *n.*

MICROCOSM, *s.* सूक्ष्मजगत् *n.*, सूक्ष्मलोकः, सूक्ष्मसंसारः, क्षुद्रजगत्.

MICROSCOPE, *s.* सूक्ष्मदर्शकयन्त्रं, सूक्ष्मनिरीक्षणयन्त्रं, सूक्ष्मनिरीक्षणकाचः, सूक्ष्मद्रव्यदर्शनार्थं काचयन्त्रं.

MICROSCOPIC, *a.* पृथ्वीकरणयन्त्रद्वारेण दृष्टः -ष्टा -ष्टं or उपलब्धः -ब्धा -ब्धं.

MICTURITION, *s.* मिमिक्षा, मेहनेच्छा, मूत्रत्यागेच्छा, मूत्रोत्सर्गेच्छा.

MID, *a.* मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यस्थः -स्था -स्थं. *See* MIDDLE.

MID-AGE, *s.* मध्यवयस् *n.*, मध्यमवयस् *n.*, आयुर्मध्यं.

MID-COURSE, *s.* अर्द्धमार्गः, अर्द्धपथः, मार्गार्द्धं, मार्गमध्यं.

MID-DAY, *s.* मध्याह्नः, दिनमध्यं, दिवामध्यं, मध्यन्दिनं, उद्दिनं; 'at mid-day,' दिनमध्ये, मध्याह्ने.

MID-DAY, *a.* माध्याह्निकः -की -कं, माध्यन्दिनः -नी -नं; 'mid-day rites,' माध्याह्निकी क्रिया; 'mid-day meal,' मध्याह्नभोजनं.

MIDDLE, *a.* मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यमीयः -या -यं, मध्यस्थः -स्था -स्थं, मध्यस्थितः -ता -तं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), माध्यः -ध्या -ध्यं, माध्यमः -मी -मं, गर्भस्थः &c., गर्भस्थितः -ता -तं; 'middle state,' मध्यस्थता, माध्यस्थ्यं; 'the middle classes,' मध्यमवर्णाः *m. pl.*, मध्यवर्णजाः *m. pl.*, मध्यजातीयाः *m. pl.*

MIDDLE, *s.* मध्यं, मध्यभागः, मध्यदेशः, मध्यस्थानं, मध्यस्थलं, मध्यमप्रदेशः, अभ्यन्तरं, अन्तरं, गर्भः, हृदयं; 'the middle of the arm,' दोर्मध्यं; 'of the night,' रात्रिमध्यं; 'of a house,' गृहाभ्यन्तरं; 'of a bow,' लस्तकः; 'going in the middle,' मध्यगः -गा -गं, मध्यचारी -रिणी -रि (न्); 'in the middle,' मध्ये, मध्यतस्; 'in the middle of the night,' रात्रिमध्ये, महानिशायां; 'in the middle of the Ganges,' मध्येगङ्गं.

MIDDLE-AGED, *a.* मध्यमवयस्कः -स्का -स्कं, मध्यवयस्कः &c., अर्द्धवयस्कः &c., गतयौवनः -ना -नं, अतिक्रान्तयौवनः -ना -नं, अर्द्धवृद्धः -द्धा -द्धं; 'a middle-aged widow,' कात्यायनी.

MIDDLE-EARTH, *s.* मध्यलोकः, मध्यमलोकः, मध्यभुवनं, पृथिवी.

MIDDLE-FINGER, *s.* मध्यमा, मध्या, कर्णिका, ज्येष्ठः.

MIDDLE-MAN, *s.* मध्यस्थजनः, मध्यवर्त्ती *m.* (न्), मध्यस्थितः.

MIDDLEMOST, *a.* मध्यमः -मा -मं, मध्यमीयः -या -यं, मध्यस्थः -स्था -स्थं.

MIDDLE-SIZED, *a.* मध्यमपरिमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.

MIDDLING, *a.* मध्यमः -मा -मं, मध्यः -ध्या -ध्यं, मध्यमीयः -या -यं, माध्यः -ध्यी -ध्यं, माध्यमः -मी -मं.—(Of middle rank) मध्यमवर्णजः -जा -जं, मध्यमपदस्थः -स्था -स्थं.—(Of middle size) मध्यमपरिमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c., मध्यमः -मा -मं.—(Of middle quality) विगुणः -णा -णं, मध्यमगुणः -णा -णं, सामान्यगुणः &c., सामान्यः -न्या -न्यं, साधारणः -णी -णं.

MIDGE, *s.* सूक्ष्ममशकः, सूक्ष्ममसकः, सूक्ष्ममक्षिका, दंशकः, सूचिवदनः.

MID-HEAVEN, *s.* खमध्यं, गगणमध्यं, अन्तरीक्षमध्यं, दशमलग्नं.

MIDLAND, *a.* मध्यदेशीयः -या -यं, माध्यदेशः -शी -शं, मध्यदेशस्थः -स्था -स्थं, मध्यदेशवर्त्ती -र्त्तिनी -र्त्ति (न्), समुद्रदूरस्थः -स्था -स्थं.

MIDLEG, *s.* जङ्घामध्यं, जङ्घाया मध्यदेशः.

MIDMOST, *a.* मध्यमः -मा -मं. *See* MIDDLEMOST.

MIDNIGHT, *s.* रात्रिमध्यं, मध्यरात्रः, अर्द्धरात्रः, अर्द्धनिशा, महारात्रः, महानिशा, निशीथः, अर्द्धावसरः, निःसम्पातः, निसम्पातः. 'at midnight,' रात्रिमध्ये.

MIDRIFF, *s.* शरीरमध्यं, उदरवक्षःस्थलमध्ये शरीरभागः.

MIDSEA, *s.* समुद्रमध्यं समुद्रगर्भं मध्यसमुद्रः.

MIDSHIPMAN, *s.* नाविककर्म्माभ्यासकृत् *m.*, नाविकशिष्यः.

MIDST, *s.* or *adv.* मध्यं, मध्ये, समरं -रे, 'in the midst,' मध्ये; 'from the midst' मध्यात्; 'to be in the midst of troubles,' दुःखग्रस्तः -स्ता -स्तं भू, दुःखसागरमग्नः -ग्ना -ग्नं भू. Sometimes मध्ये is put first in a compound; as, 'in the midst of the sea,' मध्येसमुद्रं, मध्योदधि.

MIDSTREAM, *s.* प्रवाहमध्यं, सरिन्मध्यं; 'in midstream,' सरिन्मध्ये.

MIDSUMMER, *s.* ग्रीष्मकालमध्यं, निदाघकालमध्यं, उष्णकालमध्यं.

MIDWAY, *s.* अर्द्धमार्गः, अर्द्धपथः, मार्गमध्यं, पथमध्यं, मार्गार्द्धं.

MIDWAY, *adv.* अर्द्धमार्गे, अर्द्धपथे, मार्गमध्ये, पथमध्ये, वर्त्ममध्ये.

MIDWIFE, *s.* सूतिका, प्रसवकारिणी, प्रसवकारयित्री, अपत्यदा, गर्भिण्यवेक्षित्री, धात्री; 'man-midwife,' प्रसवकारी *m.* (न्), प्रसववैद्यः, सूतिवैद्यः, गर्भमोचकवैद्यः.

MIDWIFERY, *s.* प्रसवकर्म्म *n.* (न्), प्रसवकार्य्यं, प्रसवकरणं, प्रसवकारणं, सूतिकर्म्म *n.*, सूतिकरणं, गर्भिण्यवेक्षणं, गर्भमोचनविद्या, बालतन्त्रं, कुमारभृत्या.

MIDWINTER, *s.* शीतकालमध्यं, शिशिरमध्यं, मध्यशिशिरं, हेमन्तमध्यं.

MIEN, *s.* आकारः, वदनाकारः, चर्य्या, गतिः *f.*, रूपं, रीतिः *f.*, चरितं, व्यवहारः, चलनं, वृत्तिः *f.*, चारः, आचारः, आकृतिः *f.*

MIGHT, *s.* बलं, शक्तिः *f.*, सामर्थ्यं, विक्रमः, पराक्रमः, प्रभावः, ऐश्वर्य्यं, प्रतापः, ऊर्जः, अतिशक्तिः *f.*, तेजस्, वीर्य्यं, शौर्य्यं, प्राबल्यं; 'with all one's might,' यथाशक्ति, यथासामर्थ्यं, यथाबलं.

MIGHTILY, *adv.* बलेन, सबलं, ऐश्वर्य्येण, सविक्रमं, सपराक्रमं, प्रभावेण,

प्रतापेन, सवीर्यं, वीर्येण, प्रबलं, बलवत्.—(Greatly) भृशं, अत्यन्तं, अतिमात्रं.

Mightiness, *s.* प्रबलता, प्राबल्यं, सामर्थ्यं, ऐश्वर्यं, सबलत्वं, अतिशक्तिता, प्रतापः, प्रभावः, वीर्य्यं, सारता, सप्रतापता, बलीयस्त्वं.

Mighty, *a.* प्रबलः -ला -लं, महाबलः -ला -लं, बलवान् -वती -वत् (त्), बली -लिनी -लि (न्), शक्तिमान् -मती &c., अतिशक्तिमान् &c., बलीयान् -यसी -यः (स्), बलिष्ठः -ष्ठा -ष्ठं, महाविक्रमः -मा -मं, उरुविक्रमः &c., वाढविक्रमः &c., महाशक्तिः -क्तिः -क्ति, ऊर्जितः -ता -तं, ऊर्जस्वी -स्विनी &c., विक्रान्तः -न्ता -न्तं, पराक्रान्तः &c., पराक्रमी &c., विक्रमी &c.—(Great, majestic) महान् -हती -हत् (त्), ऐश्वर्यवान् &c., प्रतापी &c., प्रतापवान् &c., महातेजाः -जाः -जः (स्), प्रभावी &c., विभूतिमान् &c., तेजोवान् &c., महौजाः &c., महोदारः -रा -रं; 'mighty lord,' परमेश्वरः, महेश्वरः.

To migrate *v. n.* उत्क्रम् (c. 1. -क्रामति -क्रमितुं), देशाद् देशं भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), एकदेशं त्यक्त्वा देशान्तरं गम् (c. 1. गच्छति, गन्तुं) or देशान्तरम् अधिवस्, देशान्तरं or स्थानान्तरं गत्वा वस्, देशभ्रमणं कृ, दिग्भ्रमणं कृ, देशाटनं कृ, विदेशगमनं कृ, देशपरिवर्त्तनं कृ.

Migration *s.* उत्क्रमः, उत्क्रमणं, देशान्तरगमनं, स्थानान्तरगमनं, देशभ्रमणं, दिग्भ्रमणं, देशपरिवर्त्तनं, देशाटनं, विदेशगमनं.

Migratory, *a.* देशभ्रमणशीलः -ला -लं, परिभ्रमणशीलः -ला -लं, पर्यटनशीलः -ला -लं, देशपरिवर्त्तनशीलः -ला -लं.

Milch-cow, *s.* धेनुः *f.*, दोग्ध्री, धेनुका, गोधेनुः *f.*, स्त्रीगवी, पयस्विनी, क्षीरिणी, दुग्धवती, पीनोध्नी, पीवरस्तनी, पीतदुग्धा, नवसूतिका; 'a herd,' धैनुकं.

Mild, *a.* (Soft, not harsh) मृदुः -द्वी -दु, मृदुलः -ला -लं, कोमलः -ला -लं, सौम्यः -म्या -म्यं, स्निग्धः -ग्धा -ग्धं, शान्तः -न्ता -न्तं, अनुग्रः -ग्रा -ग्रं, अपरुषः -षा -षं, अप्रखरः -रा -रं, अकर्कशः -शा -शं, श्लक्ष्णः -क्ष्णा -क्ष्णं, मसृणः -णा -णं, सुकुमारः -रा -रं, अचण्डः -ण्डा -ण्डं, अखरः -रा -रं.—(Tender or gentle in temper) मृदुस्वभावः -वा -वं, मृदुभावः -वा -वं, कोमलस्वभावः &c., सौम्यवृत्तिः -त्तिः -त्ति, कोमलान्तःकरणः -णा -णं, दयार्द्रभावः -वा -वं, दयालुः -लुः -लु, दयावान् -वती -वत् (त्), सदयः -या -यं, सात्त्विकः -का -कं, सात्त्विकप्रकृतिः -तिः -ति, निर्वैरः -रा -रं.—(Lenient) क्षमावान् &c., सामबुद्धिः -द्धिः -द्धि, अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अनिष्ठुरः -रा -रं, अनुग्रदण्डः -ण्डा -ण्डं, सामोपचारी -रिणी &c., सामोपायी &c.; 'mild remedy,' सौम्योपचारः, सामोपचारः, वालोपचारः; 'mild means,' सामोपायः; 'by mild means,' सामोपायेन, साम्ना; 'mild air,' मृदुवातः, मृदुवायुः *m.*; 'mild speech,' सान्त्ववादः.

Mildew, *s.* वृक्षदूषणं, तरुदूषणं, कलङ्कः, शुक्लकलङ्कः, श्वेतकलङ्कः, दूषणवस्तु *n.*, क्लेदजमलं.

To mildew, *v. a.* शुक्लकलङ्केन दुष् (c. 10. दूषयति -यितुं), क्लेदजमलेन दुष् or कलङ्क (nom. कलङ्कयति -यितुं) or लिप् (c. 6. लिम्पति, लेप्तुं).

Mildewed, *p. p.* शुक्लकलङ्कदूषितः -ता -तं, कलङ्कितः -ता -तं.

Mildly, *adv.* मृदु, मृदुलं, कोमलं, सौम्यवत्, अनुग्रं, अपरुषं, अकर्कशं, साम्ना, सामोपायेन, मार्दवेन, समार्दवं, अतीक्ष्णं, अतीव्रं, अचण्डं, अप्रखरं, मन्दं.

Mildness, *s.* (Softness, not harshness) मृदुता -त्वं, मार्दवं, म्रदिमा *m.* (न्), सौम्यता, कोमलता, स्निग्धता, अनुग्रता, अपरुषता, अकार्कश्यं, शान्तता, शान्तिः *f.*—(Of temper) स्वभावमृदुता, प्रकृतिमृदुता, सौम्यवृत्तिता, कोमलस्वभावः, सात्त्विकप्रकृतिः *f.*, दयालुता.—(Leniency) मृदुता, क्षमा, सौम्यता, साम *n.* (न्), सामबुद्धिः *f.*, अतीक्ष्णता, अतैक्ष्ण्यं, अतीव्रता, दण्डानुग्रता, अनुग्रता, अनुग्रदण्डत्वं, कृपा.

Mile, *s.* The measure called क्रोशः, or kos, is about two English miles. One English mile will therefore be expressed by अर्द्धक्रोशः; 'three miles,' सार्द्धक्रोशः; 'four miles,' क्रोशद्वयं; 'five miles,' सार्द्धद्विक्रोशं; 'six miles,' क्रोशत्रयं.

Mile-stone, *s.* अर्द्धक्रोशमापकप्रस्तरः, क्रोशमापनपाषाणः.

Militant, *a.* युद्धोद्युक्तः -क्ता -क्तं, युद्धोद्यतः -ता -तं, युद्धप्रवृत्तः -त्ता -त्तं, युद्धारूढः -ढा -ढं, युध्यमानः -ना -नं, युद्धकारी -रिणी -रि (न्), सङ्ग्रामोद्युक्तः &c.

Military, *a.* (Pertaining to soldiers or arms) युद्धसम्बन्धी -न्धिनी &c., युद्धविषयकः -का -कं, साङ्ग्रामिकः -की -कं, सामरिकः -की -कं, सैनिकः -की -कं, आयुधिकः -की -कं, क्षात्रः -त्री -त्रं, साम्परायिकः -की -कं; 'military duty,' क्षत्रधर्म्मः, क्षात्रधर्म्मः; 'following it,' क्षत्रधर्म्मानुगः -गा -गं; 'military profession,' शस्त्रवृत्तिः *f.*, शस्त्रास्त्रभृत्त्वं.—(Engaged in the profession of arms) युद्धप्रवृत्तः -त्ता -त्तं, योधी -धिनी -धि (न्), शस्त्रजीवी &c., शस्त्राजीवी &c., शस्त्रोपजीवी &c., आयुधजीवी &c., शस्त्रास्त्रभृत्, शस्त्रभृत्.—(Man of the military class) क्षत्रियः, क्षत्रः, क्षत्री *m.* (न्), राजन्यः, विराट् *m.* (ज्), बाहुजः, मूर्द्धाभिषिक्तः; 'a woman of this class,' क्षत्रिया -याणी; 'the duty of this class,' क्षत्रियधर्म्मः; 'the military class,' क्षत्रियजातिः *f.*

Military, *s.* (The body of soldiers) सैनिकवर्गः, सैन्यवर्गः, सैनिकजातिः *f.*, क्षत्रं, क्षत्रियजातिः *f.*, क्षत्रवर्गः.

To militate, *v. n.* विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, विरुद्धः -द्धा -द्धं भू, प्रतिकूल (nom. प्रतिकूलयति -यितुं), विपरीतः -ता -तं भू.

Militia, *s.* देशरक्षकाः *m. pl.*, देशरक्षिणः *m. pl.*, नैमित्तिकसैन्याः *m. pl.*

Milk, *s.* दुग्धं, क्षीरं, पयस् *n.*, स्तन्यं, गोदुग्धं, गोरसः -सं, धेनुकादुग्धं, गव्यं, गव्यपयस् *n.*, अधदोहः, दोहः, ऊधस्यं, ऊधन्यं, दोहजं, दोहापनयः, पायसं, पीयूषं, पेयं, सोमजं; 'made from milk,' पयस्यः -स्या -स्यं; 'the skim of milk,' दुग्धफेनं; 'yielding much milk,' बहुदुग्धा, दोहीयान् -यसी -यः (स्); 'milk diet,' दुग्धाहारः; 'coagulated milk,' दधि *n.*, क्षीरजं; 'inspissated milk,' क्षीरविकृतिः *f.*; 'drinking milk,' क्षीरपः -पा -पं, क्षीरपायी -यिनी &c.; 'giving milk,' क्षीरदः -दा -दं; 'to give milk,' दुह् (c. 4. दुह्यते), क्षीरं दा.

To milk, *v. a.* दुह् (c. 2. दोग्धि, दुग्धे, दोग्धुं), निर्दुह्, दोहनं कृ, दुग्धं स्रु (c. 10. स्रावयति -यितुं), गोस्तनं पीडयित्वा दुग्धं स्रु or मोक्ष् (c. 10. मोक्षयति -यितुं) or मुच् (c. 10. मोचयति -यितुं), दुग्धमोक्षणं कृ.

Milked, *p. p.* दुग्धः -ग्धा -ग्धं, निर्दुग्धः -ग्धा -ग्धं, कृतदोहनः -ना -नं; 'a cow easily milked,' सुखदोह्या, सुखसन्दोह्या, सुव्रता.

Milker, *s.* दोग्धा *m.* (ग्धृ), दोहकः, दोही *m.* (न्), धुक् *m.* (दुह्).

Milkiness, *s.* दुग्धता, दुग्धवत्ता, दुग्धिता, क्षीरिता, पायसता, पयस्यत्वं, सक्षीरता, सदुग्धता, दुग्धसादृश्यं, दुग्धसगुणता.

Milk-livered, *a.* भीरुहृदयः -या -यं, क्लीवहृदयः &c., कातरः -रा -रं.

Milk-maid, *s.* गोदोग्ध्री, गोदोहिनी, गोपी, गोपिनी, गोपिका, आभीरी.

Milk-man, *s.* गोधुक् *m.* (-दुह्), दोग्धा *m.* (ग्धृ), दुग्धविक्रेता *m.* (तृ), क्षीरविक्रयी *m.* (न्), गोपः, आभीरः.

Milk-pail, milk-pan, *s.* दोहनं -नी, गोदोहनी, दुग्धभाण्डं, क्षीरभाण्डं, दुग्धपात्रं, दुग्धभाजनं, दोहनपात्रं, दधिभाण्डं, निपानं, दोहः, पारी.

Milk-porridge, milk-pottage, *s.* क्षैरेयी.

Milk-sop, *s.* क्लीवहृदयः, मृदुहृदयः, कोमलहृदयः, कापुरुषः.

Milk-white, *a.* दुग्धसवर्णः -र्णा -र्णं, क्षीरवच्छुक्लः -क्ला -क्लं, क्षीरवर्णः &c.

Milkwoman, *s.* दुग्धविक्रेत्री, दोहिनी, गोपिनी, गोपा, आभीरी, महाशूद्री.

MILKY, *a.* दुग्धी -ग्धिनी -ग्धि (न्), क्षीरी -रिणी &c., पायसः -सी -सं, पयस्यः -स्या -स्यं, पयस्वी -स्विनी &c., दुग्धमयः -यी -यं, क्षैरः -री -रं.—(Resembling milk) दुग्धसगुणः -णा -णं, क्षीरोपमः -मा -मं, दुग्धसदृशः -शी -शं.—(Yielding milk) क्षीरदः -दा -दं, बहुदुग्धः -ग्धा -ग्धं, दुग्धप्रदः -दा -दं.

MILKY-WAY, *s.* मन्दाकिनी, आकाशगङ्गा, स्वर्गङ्गा, स्वर्नदी, सुरनदी, आकाशनदी, देवनदी, वियद्गङ्गा, नागवीथी, हरिताली.

MILL, *s.* पेषणं, पेषणी -णिः *f.*, पेषणयन्त्रं, पेषणचक्रं, चक्रं.

To MILL, *v. a.* पिष् (c. 7. पिनष्टि, पेष्टुं), चूर्ण् (c. 10. चूर्णयति -यितुं), चूर्णीकृ.—(Beat with the fist) मुष्ट्या तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्तुं).

MILLENARIAN, MILLENARIAL, *a.* सहस्रवर्षीयः -या -यं, सहस्रवर्षीणः -णा -णं, सहस्रवत्सरी -रिणी -रि (न्), सहस्रवार्षिकः -की -कं, साहस्राब्दिकः -की -कं, सहस्री -स्रिणी &c., साहस्रः -स्री -स्रं.

MILLENIUM, MILLENARY, *s.* सहस्रवर्षं, सहस्रवत्सरं, वर्षसहस्रकं, वर्षसाहस्रं, दशशतवर्षं, सहस्रवर्षपर्य्यन्तं साक्षाद्भूतं खृष्टराज्यं.

MILLEPED, *s.* सहस्रपाद *m.*, सहस्रपादविशिष्टः कीटभेदः.

MILLER, *s.* शस्यपेषकः, धान्यपेषणजीवी *m.* (न्), पेषणोपजीवी *m.*

MILLESIMAL, *a.* (Thousandth) सहस्रतमः -मी -मं.—(Consisting of a thousand parts) सहस्रांशरूपः -पा -पं, सहस्रांशात्मकः -का -कं.

MILLET, *s.* (Panicum, a sort of grain) अणुः *m.*, प्रियङ्गुः *m.*; 'field of it,' अणव्यं.

MILLIARY, *a.* अर्द्धक्रोशमापकः -का -कं, क्रोशमापनः -नी -नं.

MILLINER, *s.* स्त्रीपरिच्छदकारिणी, स्त्रीपरिच्छदविक्रेत्री, स्त्रीवस्त्रव्यापारिणी, स्त्रीवस्त्रकरणोपजीविनी, स्त्रीवस्त्रकृत् *f.*

MILLINERY, *s.* स्त्रीपरिच्छदः, स्त्रीवस्त्रसामग्र्यं, स्त्रीवस्त्रशिरस्कादि *n.*, स्त्रीसज्जा, स्त्रीलोकभृतं यत्किञ्चिद् वस्त्रादि.

MILLION, *s.* नियुतः -तं, प्रयुतः -तं, दशलक्षं; 'ten million,' कोटिः *f.*; 'one hundred million,' अर्बुदः; 'one thousand million,' महार्बुदः, महाशङ्कः; 'ten thousand million,' पद्मं; 'one hundred thousand million,' महापद्मं *m.*; 'million million,' खर्व्वं, खर्वं, निखर्वं; 'ten million million,' महाखर्वं. According to Wilson's Dictionary, खर्वं is equivalent to ten million million, according to the Mahratti Dictionary to ten thousand million, and निखर्वं to a hundred thousand million: नियुतः is also used for one hundred thousand, and there seems to be much uncertainty in the use of some others of the above Sanskrit terms. The word कोटिः is used generally for a large number, and hence the expression 'by millions' कोटिशस्.

MILLIONAIRE, *s.* कोटीश्वरः, लक्षाधीशः, दशलक्षसम्पन्नः.

MILLIONARY, *a.* नियुतसम्बन्धी -न्धिनी &c., नियुतीयः -या -यं.

MILLIONTH, *a.* नियुततमः -मी -मं, प्रयुततमः -मी -मं.

MILL-STONE, *s.* पेषणप्रस्तरः, पेषणपाषाणः, पेषणी -णिः *f.*, पेषणं, शिलापट्टः, शिलापुत्रः.

MILT, *s.* (Spleen) प्लीहा *m.* (न्), गुल्मः.—(Roe) मीनाण्डं, मत्स्याण्डं.

MILTER, *s.* पुंमत्स्यः, पुंजातीयो मत्स्यः or मीनः.

MIME, *s.* (Actor, buffoon) नटः, नर्त्तकः, नाटकः, कुशीलवः, चारणः, रङ्गाजीवः, जायाजीवः, भण्डः, विदूषकः, वैहासिकः.

MIMIC, MIMICAL, *a.* उपहासबुद्ध्या परगतिचेष्टिताद्यनुकारी -रिणी -रि (न्) or अनुकरणशीलः -ला -लं, अनुकारी &c., अनुकरणस्वभावः -वा -वं, विडम्बनकारी &c.—(Consisting of imitation) अनुकरणरूपः -पा -पं, अनुकरणात्मकः -का -कं, विडम्बनरूपः -पा -पं; 'mimic art,' नाटकविधिः *m.*

MIMIC, *s.* (Buffoon) भण्डः, भाण्डः, वैहासिकः, परिहासवेदी *m.* (न्), विदूषकः.—(Imitator) अनुकारी *m.* (न्), अनुकर्त्ता *m.* (र्तृ).

To MIMIC, MIMICK, *v. a.* उपहासबुद्ध्या परस्य गतिभाषितचेष्टितादि अनुकृ (c. 8. -करोति -कुरुते -कर्तुं), हास्योत्पादनार्थं परचेष्टितानुकरणं कृ or विडम्बनं कृ.

MIMICKED, *p. p.* उपहासबुद्ध्या or हास्योत्पादनार्थम् अनुकृतः -ता -तं.

MIMICKER, *s.* अनुकर्त्ता *m.* (र्तृ), अनुकारी *m.* (न्), विडम्बनकृत् *m.*

MIMICRY, *s.* उपहासबुद्ध्या गतिभाषितचेष्टिताद्यनुकारः, हास्योत्पादनार्थं चेष्टितानुकरणं, अनुकारः, अनुकरणं, अनुकृतिः *f.*, अनुक्रिया, अनुकर्म्म *n.* (न्), विडम्बनं -ना, व्याजः; 'of a cry or sound,' रुतव्याजः.

MIMOSA, *s.* (Kind of sensitive plant) गण्डकारी, गण्डकाली, समङ्गा, नमस्कारी, खदिरी, रक्तपादी, सुवहा, लज्जालुः *m.*, महाभीता, लज्जकारिका, स्पर्शलज्जा, राखा, युक्तरसा; 'fetid mimosa,' अरिमेदः, विट्खदिरः; 'mimosa albida,' शमी, शमीरः, सक्तुफला, शिवा.

MINACIOUS, MINATORY, *a.* भर्त्सनकारी -रिणी -रि (न्), निर्भर्त्सनकृत् *m.f.n.*, भर्त्सनार्थकः -का -कं, भर्त्सनमयः -यी -यं, भयप्रदर्शकः -का -कं, भयसूचकः -का -कं.

MINARET, *s.* शिखरं, शृङ्गं, प्रासादशिखरं, भवनशिखरं, प्रासादशृङ्गं.

To MINCE, *v. a.* (Cut into small pieces) खण्डं खण्डं कृ, खण्डशः कृ or छिद् (c. 7. छिनत्ति, छेत्तुं), सूक्ष्मखण्डशः कृ or व्यवछिद्, बहुलखण्डशः खण्ड् (c. 10. खण्डयति -यितुं), शकलीकृ, खण्डीकृ.—(Cut off in speaking) अवछिद्, भिन्नस्वरेण वद् (c. 1. वदति -दितुं).

To MINCE, *v. n.* (Walk with short steps or with affected delicacy) भिन्नगत्या or सलालित्यं or सलौल्यं चल् (c. 1. चलति -लितुं), ललितगत्या or विलक्षितगत्या चर् (c. 1. चरति -रितुं), सवैलक्ष्यं चर.—(Speak affectedly) भिन्नस्वरेण वद् (c. 1. वदति -दितुं), ललितस्वरेण वद, विलक्षितस्वरेण वद, सवैलक्ष्यं वद्.

MINCED, *p. p.* व्यवछिन्नः -न्ना -न्नं, सूक्ष्मखण्डीकृतः -ता -तं, सूक्ष्मशकलीकृतः -ता -तं, छिन्नभिन्नः -न्ना -न्नं, छिन्नविच्छिन्नः -न्ना -न्नं, खण्डितः -ता -तं.

MINCE-MEAT, MINCED MEAT, *s.* छिन्नमांसं, खण्डमांसं, खण्डीकृतमांसं, व्यवछिन्नमांसं, व्यञ्जनादिना सह सिद्धं छिन्नमांसं.

MINCE-PIE, MINCED PIE, *s.* छिन्नमांसव्यञ्जनादिगर्भः शष्कुलीविशेषः.

MINCINGLY, *adv.* खण्डशस्, लघुशस्, भिन्नगत्या, भिन्नस्वरेण, सवैलक्ष्यं.

MIND, *s.* (The understanding, intellect) मनस् *n.*, मानसं, मतिः *f.*, बुद्धिः *f.*, धीः *f.*, चित्तं, चेतस् *n.*, मेधा, प्रज्ञा, आत्मा *m.* (न्), चेतना, बोधः, बोधशक्तिः *f.*, चित् *f.*, चिच्छक्तिः *f.*, ज्ञानशक्तिः *f.*, उपलब्धिः *f.*, शेमुषी, तुरगः, निगुः *m.*, अङ्गं; 'application of mind,' मनोयोगः, मनोनिवेशः, मनःप्रवेशः; 'to give the mind,' निविष्टचित्तः -त्ता -त्तं भू, आसक्तचित्तः -त्ता -त्तं भू, मनो निविश् (c. 10. -वेशयति -यितुं); 'exercise of mind,' मनोव्यापारः; 'out of one's mind,' अव्यवस्थितबुद्धिः -द्धिः -द्धि; 'fixed in the mind,' चित्तीकृतः -ता -तं; 'of inferior mind,' अपकृष्टचेतनः -ना -नं.—(Heart or seat of the affections) हृदयं, हृद् *n.*, चित्तं, चेतस्, अन्तःकरणं, अन्तरात्मा *m.* (न्), अन्तःप्रकृतिः *f.*, मनस्, अन्तर्भावः, भावः, अन्तरं, अभ्यन्तरं; 'working of the mind, emotion,' चित्तवृत्तिः *f.*, विकारः, मनोविकारः, मनोविकृतिः *f.*; 'control of the mind,' मनोदण्डः, मनोनिग्रहः; 'peace of mind,' मनःशान्तिः *f.*—(Opinion, thoughts) मतिः *f.*, बुद्धिः *f.*, मतं, मनोगतं, मनस् *n.*, मनोभावः, हृद्गतं; 'of one

mind,' एकचित्तः -त्ता -त्तं; 'to be of one mind,' एकचित्तीभू. 'change of mind,' बुद्धिभेदः.—(Inclination, will, desire) मनोरथः, इच्छा, आकांक्षा, अभिलाषः, वासना, बुद्धिः f., मतिः f., कामः, अभिमतं, ईप्सितं, अभीप्सितं, इष्टं; 'according to one's mind,' यथाभिमतं, यथेष्टं, यथेप्सितं, मनोनुकूलः -ला -लं, 'having a mind to see,' द्रष्टुमनाः -नाः -नः (स्), 'having a mind to go,' गन्तुमनाः &c.—(Design, intention) बुद्धिः f., मतिः f., मनस् n., अभिप्रायः, अभिप्रेतं, चिकीर्षितं, सङ्कल्पः, उद्देशः. To have a mind मतिं कृ. —(Memory, remembrance) स्मरणं, स्मृतिः f., अनुस्मृतिः f., संस्मृतिः f., अनुचिन्ता, अनुबोधः, ध्यानं, आध्यानं; 'to call to mind,' स्मृ (c. 1. स्मरति, स्मर्तुं), अनुस्मृ, संस्मृ, अनुचिन्त् (c. 10. -चिन्तयति -यितुं), समनुचिन्त्, अनुबुध् (c. 4. -बुध्यते -बोद्धुं), 'to put in mind,' स्मृ (c. 10. स्मारयति -यितुं), बुध् (c. 10. बोधयति -यितुं), उद्बुध्; 'flashing across one's mind,' स्फुरणं.

To MIND, *v. a.* (Attend to, heed) अवधा (c. 3. -धत्ते -धातुं), मनो धा, अवधानं कृ, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्; 'mind!' सावधानो भव.—(Regard) मन् (c. 4. मन्यते, मन्तुं), अनुमन्, मननं कृ, अपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवेक्ष्, प्रतीक्ष्, बुध् (c. 1. बोधति, c. 4. बुध्यते, बोद्धुं), आबुध्, आलोक् (c. 10. -लोकयति -यितुं), आलोच् (c. 10. -लोचयति -यितुं), अवेक्षणं कृ.—(Obey) सेव् (c. 1. सेवते -वितुं), श्रु in des. (शुश्रूषते -षितुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुविधा in pass. (-धीयते), अनुवर्त्तनं कृ.—(Take care of, look after) रक्ष् (c. 1. रक्षति -क्षितुं), पाल् (c. 10. पालयति -यितुं), अनुसन्धा; 'mind a family,' तन्त्र् (c. 10. तन्त्रयति -यितुं).

MINDED, *a.* (Disposed) प्रवृत्तः -त्ता -त्तं, प्रवणः -णा -णं, मनाः -नाः -नः or मनस्कः -स्का -स्कं in comp.; as, 'minded to go,' गमनमनाः &c., गन्तुमनाः &c., गमनमनस्कः &c. *See* INCLINED. (In composition) मनाः &c., मनस्कः &c., मतिः &c., बुद्धिः &c.; as, 'high-minded,' महामनाः &c., महामनस्कः &c., महामतिः -तिः -ति &c.

MINDFUL, *a.* (Attentive, heedful) सावधानः -ना -नं, अवहितः -ता -तं, कृतावधानः -ना -नं, अवहितचेताः -ताः -तः (स्), जागरः -रा -रं. —(Regarding with care) मन्यमानः -ना -नं, अनुमन्यमानः -ना -नं, अपेक्षकः -का -कं, अवेक्षकः -का -कं.—(Bearing in mind) स्मरन् -रन्ती -रत् (त्), स्मृतिमान् -मती -मत् (त्), अनुचिन्तयन् -यन्ती -यत् (त्); 'to be mindful,' स्मृ (c. 1. स्मरति, स्मर्तुं).

MINDFULLY, *adv.* सावधानं, अवहितं, अवहितचेतसा, स्मृतिपूर्वं, अवेक्षया.

MINDFULNESS, *s.* अवधानं, सावधानता, अवहितता, अवेक्षा -क्षणं, अपेक्षा.

MINDLESS, *a.* (Heedless) अनवधानः -ना -नं, अनवहितः -ता -तं, प्रमत्तः -त्ता -त्तं, निरपेक्षः -क्षा -क्षं.—(Forgetful) नष्टस्मृतिः -तिः -ति, अपस्मृतिः -तिः -ति.—(Stupid) निर्बुद्धिः -द्धिः -द्धि, बुद्धिहीनः -ना -नं.

MINE, *pron. a* मदीयः -या -यं, अस्मदीयः -या -यं, मम gen. c. (अस्मद्), मामकीनः -ना -नं, आत्मीयः -या -यं, मत् in comp.; as, 'mine own master,' मत्प्रभुः *m.*

MINE, *s.* (Excavation in the earth for any metals, &c.) आकरः, खनिः -नी *f.*, खानिः -नी *m. f.*, खन्याकरः, गञ्जः -ञ्जा -ञ्जं, कुल्या, योनिः *m. f.*—(For gold, &c.) कनकस्थली, कनकस्थानं, काञ्चनकन्दरः, सुवर्णादिधातूत्पत्तिस्थानं, सुवर्णाद्युत्पत्तिस्थानं.—(For precious stones) खनिः -नी *f.*, मणिभूमिः *f.*, रत्नोत्पत्तिस्थानं, मणिस्थली, कुट्टिमः -मं, गञ्जः -ञ्जा -ञ्जं.—(For military purposes) सन्धिः *m.*, सुरङ्गा, खानिकं, कुल्या, रन्ध्रं.—(Metaphorically) as, 'a mine of good qualities,' गुणाकरः, गुणनिधिः *m.*, गुणास्पदं.

To MINE, *v. a.* and *n.* (Excavate) खन् (c. 1. खनति -नितुं), आखन्, निखन्.—(Form a hole or subterraneous passage) सुरङ्गां कृ, विवरं कृ, रन्ध्रं कृ, गूढरन्ध्रं कृ गूढमार्गं कृ or उत्खन्, गूढकुल्यां कृ, गूढकूपं कृ.—(Undermine) अधस्तात् खन् or गूढखातं कृ.

MINER, *s.* (Excavator) खनकः, खनिता *m.* (तृ), आखनिकः, खातकः खनन् *m.* (त्), खनिकरः.—(Military) सुरङ्गाखनकः, सुरङ्गाकृत् *m.* सौरङ्गिकः.

MINERAL, *s.* धातुः *m.*, उपधातुः *m.*, खनिजवस्तु *n.*, आकरजवस्तु *n.*, खनिज शिलाजं, आकरोद्भवद्रव्यं, आकरीयद्रव्यं.

MINERAL, *a.* (Pertaining to minerals) धातु in comp.; as, 'the mineral kingdom,' धातुजातिः *f.*, धातुजातं.—(Produced in a mine) खनिजः -जा -जं, आकरजः -जा -जं, आकरोद्भवः -वा -वं आकरी -रिणी -रि (न्), आकरीयः -या -यं, शिलाजः -जा -जं.—(Consisting of minerals) धातुमयः -यी -यं, धातुरूपः -पा -पं, धातुमय -यी -यं, शिलामयः &c., अश्ममयः &c., दार्षदः -दी -दं.—(Impregnated with minerals) धातुसंसृष्टः -ष्टा -ष्टं, धातुसंसर्गी -र्गिणी &c धातुगुणकः -का -कं, धातुगुणोपेतः -ता -तं, धातुधर्म्मकः -का -कं.

MINERALOGIST, *s.* धातुविद्याज्ञः, खनिजवस्तुपरीक्षकः, आकरीयद्रव्यनिरूपकः धातुवेत्ता *m.* (तृ), धातुगुणवादी *m.* (न्), कारन्धमी *m.* (न्).

MINERALOGY, *s.* धातुविद्या, धातुनिरूपणविद्या, धातुपरिज्ञानं, खनिजवस्तु परिज्ञानं, आकरीयवस्तुपरीक्षा, धातुगुणविषयका विद्या, धातुगुणविचारः पार्थिवांशविषयकं ज्ञानं.

To MINGLE, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, विमिश्र्, मि श्रीकृ, सम्मिश्रीकृ, एकीकृ, संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. योजयति -यितुं), संसृज् (c. 6. -सृजति -स्रष्टुं), संसर्गं कृ, सङ्कॄ (c. 6. -किरति -करितुं -रीतुं), सम्पृच् (c. 7. -पृणक्ति -पर्चितुं), एकत्र कृ, व्यतिकरं कृ

To MINGLE, *v. n.* मिश्रीभू, सम्मिश्रीभू, मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, सङ्कॄ in pass. (-कीर्य्यते), संसृज् in pass. (-सृज्यते), संसृष्टीभू

MINGLED, *p. p.* मिश्रितः -ता -तं, सम्मिश्रः -श्रा -श्रं, मिश्रः -श्रा -श्रं, मि श्रीकृतः -ता -तं, संसृष्टः -ष्टा -ष्टं, मिलितः -ता -तं, सङ्कीर्णः -र्णा -र्णं सम्पृक्तः -क्ता -क्तं, आमिश्रः -श्रा -श्रं.

MINGLEMENT, *s.* मिश्रणं, सम्मिश्रणं, सम्पर्कः, संसर्गः, संयोगः, मिलनं.

MINIATURE, *s.* सूक्ष्माकारचित्रं, लघ्वाकारचित्रं, सूक्ष्मचित्रं.

MINIATURE, *a.* सूक्ष्मपरिमाणः -णा -णं, सूक्ष्माकारः -रा -रं.

MINIKIN, *a.* अतिसूक्ष्मः -क्ष्मा -क्ष्मं, अत्यल्पः -ल्पा -ल्पं, अणुकः -का -कं

MINIM, *a.* (Note in music) दीर्घस्वरः.—(Dwarf) ह्रस्वमूर्त्तिः.

MINIMUM, *s.* कनिष्ठसंख्या, अवरसंख्या, अल्पिष्ठपरिमाणं, अल्पिष्ठांशः.

MINIMUS, *s.* अल्पिष्ठमूर्त्तिः *m.*, कनिष्ठः, ह्रस्वतममूर्त्तिः *m.*

MINING, *s.* खननं, खनिखननं, आकरखननं, खानिखननं, आखननं.

MINION, *s.* वल्लभः, राजवल्लभः, नृपवल्लभः, राजलाली *m.* (न्).

MINISTER, *s.* (Agent, official) कर्म्मकरः, कार्य्यसाधकः, कार्य्यनिर्वाहकः नियोगी *m.* (न्), नियुक्तः, अधिकारी *m.* (न्), आधिकारिकः, अधि कारवान् *m.* (त्), आयुक्तः, कार्य्यप्रवर्त्तकः.—(Of the king or o the government) मन्त्री *m.* (न्), अमात्यः, आमात्यः, सचिवः, राज मन्त्री *m.*, राजसचिवः, राजामात्यः, महामात्रः, प्रकृतिः *f.*, प्रकृतिपुरुषः प्रधानः, धुर्वहः, राज्यधुर्वहः, धुरीणः, धुर्य्यः, धुरीयः, धुरन्धरः, राज्य धुरन्धरः, राजकार्य्यभारी *m.* (न्), राजधर्म्मवित् *m.*, राजकर्म्मकरः, राज भृत्यः, मन्त्रकृत् *m.*, चारेक्षणः; 'prime minister,' प्रधानमन्त्री *m* मुख्यमन्त्री *m.*, महामन्त्री *m.*, प्रधानामात्यः, मुख्यामात्यः, पट्टाधिकारी *m* 'the minister of counsel,' धीसचिवः; 'the minister of ac tion,' कर्म्मसचिवः; 'the minister of the king's amusements

नर्म्मसचिवः.—(Of religion) उपाध्यायः, आचार्य्यः, पुरोहितः, धर्म्माध्यापकः.—(At a foreign court) राजदूतः, राजप्रतिनिधिः m., राजप्रस्थापितः.

To MINISTER, *v. a.* or *n.* (Supply necessary things) सोपकारद्रव्याणि परिक्लृप् (c. 10. -कल्पयति -यितुं) or उपक्लृप् or उपस्था in caus. (-स्थापयति -यितुं) or उपपद् (c. 10. -पादयति -यितुं) or सम्भृ (c. 1. -भरति -भर्तुं) or पुरस्कृ or प्रस्तुतीकृ.—(Serve, attend on) उपचर् (c. 1. -चरति -रितुं), उपाचर्, परिचर्, उपास् (c. 2. -आस्ते -आसितुं), पर्युपास्, समुपास्, सेव् (c. 1. सेवते -ति -वितुं, c. 10. सेवयति -यितुं), उपसेव्, उपस्था (c. 1. -तिष्ठति -स्थातुं), श्रु in des. (शुश्रूषते -षितुं), परिविष् (c. 10. -वेषयति -यितुं), उपचारं कृ, उपासनां कृ.—(Sacerdotally) उपाध्यायधर्म्मं कृ, उपाध्यायवृत्तिम् अनुष्ठा.

MINISTERED, *p. p.* (Supplied) उपक्लृप्तः -प्ता -प्तं, उपस्थापितः -ता -तं. —(Served) उपासितः -ता -तं, कृतोपचारः -रा -रं.

MINISTERIAL, *a.* (Attendant upon) उपकारकः -का -कं, उपकारी रिणी -रि (न्), अनुवर्त्ती -र्त्तिनी &c., वशवर्त्ती &c., वशानुगः -गा -गं, उपासकः -का -कं, उपचारपरः -रा -रं, उपचारकृत्, सेवकः -का -कं. —(Official executive pertaining to an agent) आधिकारिकः -की -कं, नियोगसम्बन्धी &c., कार्य्यसाधकः -का -कं, कार्य्यनिर्वाहकः -का -कं, कार्य्यप्रवर्त्तकः -का -कं, कार्य्यसाधनसम्बन्धी &c.—(Pertaining to a minister of state) मन्त्राधिकारसम्बन्धी &c., मन्त्रधर्म्मकः -का -कं, मन्त्रकर्म्मसम्बन्धी &c.—(Sacerdotal) उपाध्यायधर्म्मसम्बन्धी &c., उपाध्यायधर्म्मकः -का -कं.

MINISTERIALLY, *adv.* मन्त्राधिकारेण, अधिकारतस्, अमात्यवत्, मन्त्रिवत्.

MINISTERSHIP, *s.* *See* MINISTRY.

MINISTRATION, *s.* (Service) उपचारः, उपचारकरणं, उपासनं -ना, पर्युपासनं, सेवा -वनं, उपसेवा -वनं, परिचर्य्या, उपकारः, शुश्रूषा.—(Office of a minister) मन्त्राधिकारः, मन्त्रकर्म्म n. (न्), मन्त्रकरणं. (Sacerdotal) उपाध्यायाधिकारः, उपाध्यायकर्म्म n. (न्), उपाध्यायवृत्तिः f.

MINISTRY, *s.* (Office of minister) मन्त्रित्वं, साचिव्यं, मन्त्राधिकारः -रिता, अमात्यत्वं, अधिकारः -रिता -त्वं; 'office of a prime minister,' मुख्यमन्त्रित्वं, प्रधानमन्त्रित्वं, पट्टाधिकारः.—(Office of an agent) नियोगिता -त्वं, नियोगः, नियोगिपदं, अधिकारः.—(Agency, instrumentality) कारणत्वं, कारकत्वं -ता, साधकत्वं, कर्तृत्वं -ता, कर्तृकत्वं, प्रयोजकत्वं.—(Office of a minister of religion) उपाध्यायत्वं, उपाध्यायपदं, पौरोहित्यं.—(Body of ministers of state) मन्त्रिसमाजः, मन्त्रिगणः, मन्त्रिसमूहः, मन्त्रिणः m. pl., अमात्यगणः, सचिवसमाजः, अमात्याः m. pl., राजधुर्वहाः m. pl.—(Service). *See* MINISTRATION.

MINIUM, *s.* सिन्दूरं -रिका, नागजं, नागरक्तः, रक्तचूर्णं, रक्तवालुकं. *See* LEAD.

MINOR, *a.* (Less) अवरः -रा -रं, अल्पतरः -रा -रं, अल्पीयान् -यसी -यः (स्), कनीयान् &c., लघीयान् &c., न्यूनः -ना -नं.—(Secondary) अप्रधानः -ना -नं, अमुख्यः -ख्या -ख्यं, गौणः -णी -णं; 'minor' in these senses is very commonly expressed by the preposition उप; as, 'a minor member of the body,' उपाङ्गं, प्रत्यङ्गं; 'a minor veda,' उपवेदः; 'minor science,' उपविद्या; 'a minor offence,' उपपातकं; 'minor offender,' उपपातकी m. (न्); 'minor planet,' उपग्रहः; 'minor deity,' उपदेवता; 'minor duty,' उपधर्म्मः; 'minor disease,' क्षुद्ररोगः.—(Inconsiderable) लघुः -घुः -घु, स्वल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं.

MINOR, *s.* (Person under age) अप्राप्तव्यवहारः, अप्राप्तव्यवहारकालः, अजातव्यवहारः, व्यवहारायोग्यः, बालः, शिशुः m., अप्राप्तषोडशवर्षः, किशोरः, अज्ञातव्यवहारः, अप्राप्तकालः.—(Premise, in logic) उत्तरपक्षः, लघ्ववयवः.

MINORITY, *s.* (State of being under age) बाल्यं, बालदशा, बालावस्था, बालत्वं, बाल्यभावः, बाल्यकालः, शैशवं, शिशुभावः, शिशुकालः, अप्राप्तव्यवहारत्वं, अप्राप्तव्यवहारदशा.—(Smaller number, lessness) न्यूनपक्षः, अल्पपक्षः, अवरपक्षः, न्यूनता -त्वं, न्यूनभावः; 'in the minority,' न्यूनपक्षपाती m. (न्), न्यूनपक्षग्राही m. (न्), न्यूनपक्षाश्रितः.

MINOTAUR, *s.* नरवृषभः, नरवृषः, नृवृषभः, कविकल्पितोऽर्द्धेन पुरुषोऽर्द्धेन वृषभो जन्तुविशेषः.

MINSTREL, *s.* मागधः, मगधः, वैतालिकः, वादित्रगायकः, गीतवादनकुशलः, सङ्गीतविद्, सङ्गीतकुशलः, गायकः, वन्दी m. (न्), मधुकः, भाण्डिकः; 'celestial,' गन्धर्वः.

MINSTRELSY, *s.* मागधवृत्तिः f., गन्धर्ववृत्तिः f., गीतवादनं, गीतवादनकर्म्म n. (न्), गान्धर्वं, सङ्गीतव्यापारः, सङ्गीतं, सङ्गीतिः f.

MINT, *s.* (Place where money is coined) टङ्कशाला, टङ्ककशाला, मुद्राङ्किता, मुद्राङ्कनशाला, अक्षाकरः; 'master of it,' टङ्कपतिः m., टङ्ककपतिः, रूप्याध्यक्षः, नैष्किकः.—(Plant) पोदिना, पुदिना.

To MINT, *v. a.* मुद्राङ्कनं कृ, मुद्रादि अङ्क् (c. 10. अङ्कयति -यितुं), मुद्रीकृ, मुद्र् (nom. मुद्रयति -यितुं).

MINTAGE, *s.* मुद्राङ्कनं, अङ्कनं.—(That which is coined) मुद्रा, मुद्रितरूप्यं, मुद्राङ्कितरूप्यं.

MINTER, *s.* मुद्राङ्ककः, टङ्काङ्कयिता m. (तृ), मुद्राकारः -रकः.

MINT-MASTER, *s.* टङ्कपतिः m., टङ्ककपतिः m., रूप्याध्यक्षः, नैष्किकः.

MINUET, *s.* (Kind of dance) पदगतिः f., मन्दनृत्यविशेषः.

MINUS, *s.* (Less) न्यूनः -ना -नं, ऊनः -ना -नं; 'minus something,' किञ्चिन्न्यूनः -ना -नं; 'minus a hand,' हस्तन्यूनः -ना -नं.—(In algebra) ऋणं, क्षयः, 'a thousand minus one,' एकहान्या सहस्रं.

MINUTE, *a.* (Very small) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः -क्ष्मा -क्ष्मं, अत्यल्पः -ल्पा -ल्पं, अल्पिष्ठः -ष्ठा -ष्ठं, अणुकः -का -कं, साणुकः -की -कं, कणीकः -का -कं, कणीयान् -यसी -यः (स्), अणुः -ण्वी -णु, अल्पकः -का -कं, क्षुद्रः -द्रा -द्रं, श्लक्ष्णः -क्ष्णा -क्ष्णं, अल्पाल्पः -ल्पा -ल्पं, क्षोदिष्ठः -ष्ठा -ष्ठं, तनुः -नुः -न्वी -नु, प्रतनुः -नुः -नु, क्षीणः -णा -णं, तनीयान् -यसी &c. तनिष्ठः -ष्ठा -ष्ठं क्षौद्रकः -की -कं, कृशः -शा -शं.—(Attending to small things) सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी &c.; 'minute description,' प्रत्यवयववर्णना.

MINUTE, *s.* (Sixtieth part of an hour) षष्टिप्राणपादाः m. pl., क्षणपादः, क्षणचतुर्थांशः, सार्द्धद्विपलं; 'half a minute,' त्रिंशत्प्राणपादा. According to the Hindu reckoning a दण्डः or hour contains 24 minutes, and a पलं is equal to the 60th part of a दण्डः, therefore 2½ palas are equal to a minute. A क्षणः is equal to 30 कला or 4 minutes. When, however, the word minute is used generally for a small portion of time it may be expressed by क्षणः, पलं, विपलं, त्रुटिः f., निमिषः, निमेषः; as, 'a minute's delay,' क्षणक्षेपः; 'for a minute,' क्षणं -णात् -णेन; 'in a minute,' निमेषमात्रेण; 'a minute afterwards,' क्षणान्तरं -रे.—(In geometry, the sixtieth part of a degree) कला.—(Note, memorandum) स्मरणलेखः, स्मरणार्थलिखितं, लेखः, लिखितं, स्मरणचिह्नं.

To MINUTE, *v. a.* स्मरणार्थं किञ्चिद् लिख् (c. 6. लिखति, लेखितुं), अभिलिख्.

Minutely, *adv.* सूक्ष्मं, सौक्ष्म्येण, ससौक्ष्म्यं, सूक्ष्मत्वेन, सूक्ष्मतया, अतिसूक्ष्मतया, लवशस्, कणशस्.

Minuteness, *s.* (Extreme smallness) अतिसूक्ष्मता, सूक्ष्मता -त्वं, सौक्ष्म्यं, अतिसौक्ष्म्यं, अत्यल्पता, अल्पिष्ठता, क्षुद्रता, क्षोदिमा *m.* (न्), अणिमा *m.* (न्), तनुता, अतितनुता, अतितानवं, तनिष्ठता, क्षीणता. —(Attention to small things) सूक्ष्मदृष्टित्वं, सूक्ष्मदर्शनं, सूक्ष्मदर्शित्वं.

Minutiæ, *s. pl.* सूक्ष्मावयवा: *m. pl.*, सूक्ष्मांशा: *m. pl.*, सूक्ष्मविषया:.

Minx, *s.* अविनीता, दुर्विनीता, धृष्टा, प्रगल्भा, बन्धकी, निर्लज्जा.

Miracle, *s.* आश्चर्य्यकर्म्म *n.* (न्), अद्भुतकर्म्म *n.*, अतिमानुषकर्म्म *n.*, अमानुषकर्म्म, अमानुषीयकर्म्म *n.*, जनातिगकर्म्म *n.*, अद्भुतक्रिया, चमत्कार:, अद्भुतं, देवकर्म्म *n.*, दिव्यकर्म्म *n.*, निसर्गातिगकर्म्म *n.*, प्रकृत्यतीतकर्म्म *n.*, दिव्यशक्तिसाधितकर्म्म *n.*, विभूतिसाधितकर्म्म *n.*

Miraculous, *a.* आश्चर्य्य: -र्य्या -र्य्यं, अद्भुत: -ता -तं, अतिमानुष: -षा -षं, जनातिग: -गा -गं, पुरुषातिग: -गा -गं, अतिमर्त्य: -र्त्या -र्त्यं, अपौरुषेय: -यी -यं, अमानुषशक्तिसाध्य: -ध्या -ध्यं, अपुरुषशक्तिसाधित: -ता -तं, दिव्यशक्तिसाधित: -ता -तं, विभूतिसाधित: -ता -तं, निसर्गातिग: -गा -गं, प्रकृत्यतिग: -गा -गं.—(Having miraculous powers) अद्भुतशक्तिमान् -मती -मत् (त्), अतिमानुषशक्तिक: -का -कं, अद्भुतकारी -रिणी -रि (न्), अमानुषकर्म्मकारी &c., अलौकिकशक्ति: -क्ति: -क्ति.

Miraculously, *adv.* अतिमानुषशक्तिपूर्व्वं, आश्चर्य्यशक्त्या, अद्भुतशक्त्या, अमानुषशक्त्या, दिव्यशक्त्या, जनातिगशक्त्या, अलौकिकशक्त्या.

Mirage, *s.* मृगतृष्णा -ष्णिका, मृगतृषा, मृगतृट् *f.* (ष्), मृगजलं, मरीचिका.

Mire, *s.* पङ्क:, कर्दम:, जम्बाल: -लं, जलकल्क:, कलुषं, मलं.

To **mire**, *v. a.* पङ्केन दुष् (c. 10. दूषयति -यितुं), पङ्कस्थं -स्थां कृ.

Miriness, *s.* सपङ्कता, पङ्किलत्वं, सकर्दमता, कलुषत्वं, कालुष्यं.

Mirror, *s.* दर्पण: -णं, आदर्श:, मुकुर:, मकुर:, मकुर:, आत्मदर्श:, मण्डलकं, प्रतिबिम्बात:, सम्मुखी *m.* (न्), दर्शनं, अदर्श:, कर्कर:; 'the surface of a mirror,' आदर्शतलं; 'mirror-like,' आदर्शतलोपम: -मा -मं. —(Exemplar) आदर्श:, प्रतिमा.

To **mirror**, *v. a.* दर्पणे बिम्ब (nom. बिम्बयति -यितुं), प्रतिबिम्ब.

Mirrored, *p. p.* बिम्बित: -ता -तं, प्रतिबिम्बित: -ता -तं, दर्पणगत: -ता -तं.

Mirth, *s.* हास्यं, हास:, प्रहसनं, परिहास:, परीहास:, हासिका, उल्लास:, उल्लसता, मुदा, कौतुकं, हर्ष:, प्रहर्ष:, हास्यक्रीडा, हास्यविनोद:, मुदितं, प्रमोद:, मुद् *f.*, विस्रम्भणं.

Mirthful, *a.* हासी -सिनी -सि (न्), हास्यवृत्ति: -त्ति: -त्ति, हास्यमुख: -खी -खं, सुहसानन: -ना -नं, उल्लासी -सिनी &c., उल्लस: -सा -सं, उल्लासित: -ता -तं, मुदान्वित: -ता -तं, प्रमोदी -दिनी &c., मुदित: -ता -तं, हृष्टचित्त: -त्ता -त्तं, कौतुकी -किनी &c., आनन्दी &c.

Mirthfully. *adv.* सहासं, सहास्यं, सहसितं, परिहासेन, उल्लासेन.

Miry, *a.* पङ्किल: -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), पङ्कमय: -यी -यं, पङ्कक्लिन्न: -न्ना -न्नं, सपङ्क: -ङ्का -ङ्कं, सकर्दम: -मा -मं, कार्दम: -मी -मं, कर्दमित: -ता -तं, सजम्बाल: -ला -लं, कलुष: -षा -षं, पङ्कदूषित: -ता -तं; 'a miry road,' पङ्कवर्त्म *n.* (न्).

Misacceptation, *s.* विपरीतग्रहणं, अन्यथाग्रहणं, विपरीतार्थग्रहणं.

Misadventure, *s.* अनिष्टपात:, अनिष्टं, विपद् *f.*, विपत्ति: *f.*, आपद् *f.*, दुर्गति:.

Misadventured, *a.* दुर्गत: -ता -तं, दुर्भाग्य: -ग्या -ग्यं, दुर्दशाग्रस्त: &c.

Mis-advised, *a.* कुमन्त्रित: -ता -तं, कूपदिष्ट: -ष्टा -ष्टं, कुपरामृष्ट: -ष्टा -ष्टं.

Mis-affected, *a.* अहित: -ता -तं, विरक्त: -क्ता -क्तं, अननुरक्त: &c.

To **mis-alledge**, *v. a.* अन्यथा वद् (c. 1. वदति -दितुं), मिथ्या वद्.

Mis-allegation, *s.* अन्यथाकथनं, अन्यथावाद:, मिथ्यावाद:, मिथ्याकथनं.

Misanthrope, **misanthropist**, *s.* पुरुषद्वेषी *m.* (न्), पुरुषद्वेष्टा *m.* (ष्टृ), जनद्वेषी &c., लोकद्वेषी, पुरुषशत्रु: *m.*, जनशत्रु:, जनवैरी *m.* (न्), विश्वशत्रु: *m.*, विश्वद्रोही *m.* (न्), सर्व्वाभिसन्धक:, सर्व्वाभिसन्धी *m.* (न्).

Misanthropic, **misanthropical**, *a.* पुरुषद्वेषी -षिणी -षि (न्), जनद्वेषी &c., सर्व्वद्वेषी &c., विश्वद्वेषी &c., जनवैरी -रिणी &c., अपरिचयी -यिणी &c., अपरिचयशील: -ला -लं, अपरिचेय: -या -यं.

Misanthropy, *s.* पुरुषद्वेष:, जनद्वेष:, सर्व्वलोकद्वेष:, जनवैरिता, जनशत्रुता, सर्व्वलोकशत्रुता, लोकवैरस्यं, अपरिचयशीलता, जनद्रोह:, मनुष्यत्रास:, जनापकारबुद्धि: *f.*

Misapplication, *s.* कुप्रयोग:, असत्प्रयोग:, अन्यथाप्रयोग:.—(Of money) असद्व्यय:, कुव्यय:, अन्यथाव्यय:.

To **misapply**, *v. a.* कुप्रयोगं कृ, कुविनियोगं कृ, अन्यथा or मिथ्या प्रयुज् (c. 7. -युनक्ति -युंक्ते, c. 10. -योजयति -यितुं) or विनियुज्.

To **misapprehend**, *v. a.* अन्यथा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or बुध् (c. 1. बोधति -धितुं) or अवगम् (c. 1. -गच्छति -गन्तुं), विपरीतार्थं ग्रह्, विपरीतम् उपलभ् (c. 1. -लभते -लब्धुं), विपरीतार्थग्रहणं कृ.

Misapprehension, *s.* अन्यथाग्रहणं, विपरीतग्रहणं, अन्यथाबोध:, विपरीतबोध:, अन्यथार्थबोध:, अर्थविपर्यासकरणं, विपरीतार्थग्रहणं, विपरीतार्थबोध:, भ्रम:, मिथ्यामति: *f.*

To **misbecome**, *v. a.* न युज् in pass. (युज्यते), न उपपद् (c. 4. -पद्यते)

Misbecoming, *a.* अयोग्य: -ग्या -ग्यं, अयुक्त: -क्ता -क्तं, अनुचित: -ता -तं

Misbegot, **misbegotten**, *a.* विजात: -ता -तं, विजनित: &c., कुजात: &c

To **misbehave**, *v. n.* अयुक्तं or असम्यक् चर् (c. 1. चरति -रितुं) or आचर् or वृत् (c. 1. वर्त्तते -र्त्तितुं), दुराचार: -रा -रं भू, दुराचारं कृ, व्यभिचारं कृ, मर्य्यादातिक्रमं कृ, दुर्वृत्त: -त्ता -त्तं भू.

Misbehaved, *a.* दुर्विनीत: -ता -तं, अविनीत: -ता -तं, दुश्चरित: -ता -तं दुश्चेष्टित: -ता -तं, दुर्वृत्त: -त्ता -त्तं, कुशील: -ला -लं, समुद्धत: -ता -तं *See* Ill-bred.

Misbehaviour, *s.* दुर्विनीतता, अविनय:, कुनीति: *f.*, दुश्चेष्टितं, कुचेष्टितं दुर्वृत्ति: *f.*, कुनीति: *f.*, कुचरितं, कुचर्य्या, व्यभिचार:, दुराचार:, मर्य्यादातिक्रम:

Misbelief, *s.* अन्यथाश्रद्धा, कुप्रत्यय:, कुश्रद्धा, मिथ्याविश्वास:.

To **miscalculate**, *v. a.* अन्यथा or मिथ्या or असम्यग् गण् (c. 10 गणयति -यितुं) or विगण् or संख्या (c. 2. -ख्याति -तुं), मिथ्यागणनां कृ

Miscalculated, *p. p.* मिथ्यागणित: -ता -तं, अन्यथागणित: &c., असम्यग्गणित: &c.

Miscalculation, *s.* मिथ्यागणना -नं, असम्यग्गणना, अन्यथागणना दुर्गणना, कुगणना, कुपरिसंख्या.

To **miscall**, *v. a.* मिथ्याभिधानं कृ or दा, मिथ्या or अन्यथा आख्या (c. 2. -ख्याति -तुं) or अभिधा (c. 3. -दधाति -धातुं), मिथ्यानाम कृ.

Miscalled, *p. p.* मिथ्याभिहित: -ता -तं, मिथ्याख्यात: -ता -तं.

Miscarriage, *s.* (Failure) असिद्धि: *f.*, विपत्ति: *f.*, कार्य्यविपत्ति: *f.*, असम्पत्ति: *f.*, अनुपपत्ति: *f.*, अप्रतिपत्ति: *f.*, भङ्ग:, अकरणि: *f.*, असङ्गति: *f.*, दुर्गति: *f.*, वैफल्यं, असत्फलं, अशुभफलं, अशुभगति: *f.*—(Ill-conduct) कुनीति: *f.*, अनीति: *f.*, अविनय:, दुर्वृत्ति: *f.*, कुचर्य्या, दुराचरणं, कुचेष्टितं. —(Bringing forth before the time) गर्भस्राव:, गर्भपात:, गर्भपतनं, गर्भस्रव:, गर्भप्रस्रवणं, गर्भच्युति: *f.*, गर्भविस्रंसनं, गर्भस्यन्दनं, अप्राप्तकालगर्भनि:सरणं, पिण्डपतनं, स्रव:, स्राव:. When it takes place before the fourth month it is called गर्भस्राव:, after that गर्भपात:; 'to cause miscarriage,' गर्भं पत् (c. 10. पातयति -यितुं), or च्यु (c. 10. च्यावयति -यितुं) or स्रु (c. 10. स्रावयति -यितुं); 'causing it,' गर्भपाती -तिनी &c., गर्भपातक: -का -कं, गर्भस्रावी &c.

To **miscarry**, *v. n.* (Not to succeed) न सिध् (c. 4. सिध्यति, सेद्धुं)

न सम्पद् (c. 4. -पद्यते -पत्तुं), न उपपद्, प्रतिहन् in pass. (-हन्यते), विफलीभू, निष्फलीभू, वृथाभू, मोघीभू, भग्नः -ग्ना -ग्नं भू, सिद्धिं न प्राप् (c. 5. -आप्नोति -आप्तुं), असिद्धः -द्धा -द्धं भू.—(Bring forth before the time) स्रवद्गर्भा भू, पतद्गर्भा भू, अप्राप्तकाले च्युतगर्भा or निःसृतगर्भा भू or गर्भच्युता भू.

MISCELLANEOUS, *a.* नानाजातीयः -या -यं, अनेकजातीयः -या -यं, नानाप्रकारः -रा -रं, भिन्नजातीयः &c., विजातीयः &c., नानाविधः -धा -धं, अनेकविधः -धा -धं, प्रकीर्णः -र्णा -र्णं, सङ्कीर्णः -र्णा -र्णं, सान्निपातिकः -की -कं, नानाविषयकः -का -कं, विविधः -धा -धं, अवर्गीयः -या -यं, सम्पर्की -र्किणी -र्कि (न्), प्रकीर्णजातिः -तिः -ति.

MISCELLANEOUSLY, *adv.* प्रकीर्णं, सङ्कीर्णं, नानाविधं, नानाप्रकारैः, सन्निपाततस्.

MISCELLANEOUSNESS, *s.* प्रकीर्णता, सङ्कीर्णता, जातिप्रकीर्णता, नानाजातित्वं.

MISCELLANY, *s.* नानाद्रव्यसङ्ग्रहः, नानाविषयसङ्ग्रहः, नानावस्तुसमूहः, नानाद्रव्यसन्निपातः, सम्मिश्रद्रव्यसमूहः, प्रकीर्णद्रव्यसङ्ग्रहः, सङ्कीर्णवस्तुसमूहः, प्रकीर्णकं, सन्निपातः.—(Book, pamphlet) नानाविषयग्रन्थः, प्रकीर्णग्रन्थः, प्रकीर्णकं, प्रकीर्णं

MISCHANCE, *s.* विपद् *f.*, विपत्तिः *f.*, आपद् *f.*, दुर्दैवं, दुर्गतिः *f.*, अपायः.

MISCHIEF, *s.* (Injury, harm) हिंसा, अपकारः, अपकृतं -तिः *f.*, अपक्रिया, अपायः, द्रोहः, अभिद्रोहः, घातः, अर्दना, दूषणं, अनिष्टं, अरिष्टं, खलता, खलीकारः.—(Damage) क्षतिः *f.*, क्षतं, परिक्षतिः *f.*, परिक्षतं, अपायः, नाशः, हानिः *f.*, अपकृतं, अपचयः, अपचितिः *f.*, ध्वंसः, बाधः, दुःखं, दोषः, व्यसनं, कष्टं ; 'loving mischief,' अपकारप्रियः -या -यं, कदनप्रियः -या -यं.

MISCHIEF-MAKER, *s.* उपजापकः, कर्णेजपः, भेदकरः, भेदजनकः, सुहृद्भेदकरः, मित्रभेदकः, भेदकः, वैरकरः, कलिकारकः, पिशुनः, दुर्जनः, खलः.

MISCHIEF-MAKING, *s.* उपजापः, कर्णेजापः, सुहृद्भेदनं, मित्रभेदनं, वैरकरणं, पैशुन्यं, दौर्जन्यं, खलता, कलिकरणं.

MISCHIEVOUS, *a.* (Injurious) हिंस्रः -स्रा -स्रं, हिंसकः -का -कं, हिंसात्मकः -का -कं, हिंसालुः -लुः -लु, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, आपकरः -री -रं, हिंसाशीलः -ला -लं, परहिंसाशीलः -ला -लं, हिंसारतः -ता -तं, क्षतिकरः -रा -रं, अनिष्टकरः -री -रं, नृशंसः -सा -सं, नृशंसवृत्तः -त्ता -त्तं, द्रोही -हिणी &c., घातुकः -का -कं, उपघातकः -का -कं, बाधकः -का -कं, अहितकारी &c., शार्वरः -री -रं, मीवरः -री -रं.—(Inclined to do harm) अपकारबुद्धिः -द्धिः -द्धि, क्षतिकरणशीलः -ला -लं, हिंसारुचिः -चिः -चि, बाधनशीलः &c., अपायशीलः &c., दूषणशीलः &c., दुष्टबुद्धिः &c., पापः -पा -पं.—(Noxious) शारुकः -का -कं, शरारुः -रुः -रु, दूषकः -का -कं, सबाधः -धा -धं, अहितः -ता -तं.—(Full of mischievous pranks) छान्दसः -सी -सं, कुचेष्टाप्रियः -या -यं, कुचेष्टितः -ता -तं, दुश्चेष्टितः -ता -तं, कितवः -वा -वं, व्यसनी -निनी &c., दुर्गुणी &c.; 'mischievous tricks,' कुचेष्टा, कुचेष्टितं, छन्दस् *n.*; 'mischievous person,' लोककण्टकः, पंक्तिदूषकः.

MISCHIEVOUSLY, *adv.* हिंसया, सापकारं, अपकारेण, सापायं, क्षतिपूर्व्वं, सक्षतं, अपकारबुद्ध्या, अपकारशीलत्वात्, दुष्टबुद्ध्या, सबाधं.

MISCHIEVOUSNESS, *s.* हिंस्रता, हिंसाशीलता, परहिंसाशीलता, हिंसारुचिता, हिंसालुता, क्षतिकारिता, अपकारशीलता, अपकारः, अपकृतिः *f.*, अपकारिता, बाधकत्वं, द्रोहबुद्धित्वं, दूषकता, कैतवं, कैतवप्रयोगः.

NECESSITOUS, *a.* दरिद्र: -द्रा -द्रं, निर्धन: -ना -नं, दीन: -ना -नं, दुर्गत: -ता -तं.

NECESSITY, *s.* (Necessariness) अवश्यकता -त्वं, आवश्यकता, आवश्यकं, आवश्यं, अवश्यता -त्वं, विवशता, वैवश्यं, भवितव्यता, भाव्यता, अनन्यथासम्भव:, अनन्यगतिकत्वं, नियति: *f.*, नियतत्वं -ता.—(Need, state of being requisite) प्रयोजनं, प्रयोग:, प्रयुक्ति: *f.*, उपयोग:, प्रयोजनीयता, आकांक्षा, अपेक्षा, सर्व्वथा प्रापणीयता.—(Occasion, cause) प्रयोजनं, हेतु: *m.*, निमित्तं, कार्य्यं; 'without any necessity,' प्रयोजनं विना, हेतुना विना; 'what necessity for this investigation?' एतया चर्चया किं प्रयोजनं.—(Indispensableness) कर्त्तव्यता, कार्य्यता, अवश्यकर्त्तव्यता, भवितव्यता, भाव्यता, कार्य्यवश:.—(Fate, fatality) दैवं, विधि: *m.*, दैवाधीनता, दैववशत्वं, दैवायत्तता, अदृष्टाधीनता, भवितव्यता, नियति: *f.*—(Indigence) दरिद्रता, दारिद्र्यं, दीनता, दुर्गति: *f.*

NECK, *s.* ग्रीवा, कन्धरा -र:, शिरोधि: *m. f.*, शिरोधरा, गल:, कण्ठ: -ण्ठा -ण्ठी -ण्ठं, मस्तकमूलकं; 'back of the neck,' अवटु: *m. f.*, घाटा -टी -ट: -टिका, कृकाटिका, कलम्बिका, सीमा *m.* (न्), पश्चाद्ग्रीवा; 'head and neck,' शिरोग्रीवं; 'of a pitcher, or any vessel,' कण्ठ:; 'of the bladder,' वस्तिशिरस् *n.*; 'of a lute,' वीणादण्ड:; 'of a horse,' निगाल:; 'bending back the neck,' उत्कन्धरं; 'belonging to the neck,' ग्रैव: -वी -वं, ग्रैवेय: -यी -यं.

NECK-CLOTH, NECKERCHIEF, *s.* कण्ठवस्त्रं, ग्रीवावस्त्रं, ग्रीवावेष्टनं, ग्रीवावरणं, गलवस्त्रं, गलावेष्टनं, ग्रीवाबन्धनी, ग्रीवाभरणं, ग्रैवेयकं.

NECKED, *a.* ग्रीव: -वा -वं, कण्ठ: -ण्ठा -ण्ठं in comp.; as, 'handsome-necked,' सुग्रीव: -वा -वं; 'long-necked,' दीर्घग्रीव: &c., दीर्घकण्ठ: &c.

NECKLACE, *s.* माला -लिका, हार:, कण्ठमाला, सूत्रं, उर:सूत्रं -त्रिका, ग्रैवं -वेयं -यकं, कण्ठभूषा, कण्ठलता, लम्बनं, प्रालम्बिका, प्रलम्ब:, तरल:,

ललन्तिका ; 'of jewels,' मणिमाला, रत्नावली -लिः f., मणिसरं ; 'of pearls,' मुक्तावली -लिः f., मुक्ताकलापः, मुक्ताप्रलम्बः, मुक्तालता ; 'of gold,' हेमसूत्रकं, कनकसूत्रं ; 'of beads,' अक्षमाला ; 'of one string or row,' कण्ठिका ; 'of a hundred strings,' देवच्छन्दः, शतयष्टिकः ; 'of thirty-two strings,' गुच्छः ; 'of thirty-four,' गुच्छार्द्धः.

NECROLOGY, s. मृतव्यक्तिविवरणं, मृतजनवृत्तान्तः, मृतजनपरिसंख्या.

NECROMANCER, s. श्मशानमन्त्रजापकः, प्रेतसिद्धिकर्त्ता m. (र्तृ). See MAGICIAN.

NECROMANCY, s. श्मशानमन्त्रजपनं, प्रेतसिद्धिः f., भूतविद्या, भौतिकविद्या, पिशाचविद्या, कुविद्या. See MAGIC, s.

NECTAR, s. अमृतं, सुधा, सुधारसः, अमृतरसः, पीयूषं, पेयूषं, देवपेयं, लेह्यं, सोमः, पेत्वं, भक्तजा, कव्यं, तः ; 'of flowers,' मधु n., पुष्पमधु, पुष्परसः, पुष्पनिर्यासः, पुष्पसारः, पुष्पभवः, मकरन्दः, मरन्दः, नलदा.

NECTAREAN, NECTAREOUS, NECTARINE, a. अमृतमयः -यी -यं, सुधामयः &c., अमृततुल्यः -ल्या -ल्यं, अमृतोपमः -मा -मं, अमृतप्रायः -या -यं.

NEED, s. (Want, occasion for something) प्रयोजनं, प्रयोगः, प्रयुक्तिः f., उपयोगः -गिता, कार्य्यं, कारणं, निमित्तं, हेतुः m., आकांक्षा, अपेक्षा ; 'there is need of me,' मया प्रयोजनं ; 'there is need of a straw,' तृणेन कार्य्यं ; 'what need is there of sorrow?' शोकेन किं प्रयोजनं, शोकस्य कः क्रमः or expressed by किं alone, as किं शोकेन; 'according to need,' प्रयोजनवत्, अर्थवत्, यथाप्रयोजनं, यथाकार्य्यं, यथासम्भवं.—(Indigence, distress, difficulty) दारिद्र्यं, दरिद्रता, दीनता, निर्धनता, दुर्गतिः f., दुःखं, अनुपपत्तिः f., सङ्कटं, कष्टं, संकष्टं, कृच्छ्रं, क्लेशः, बाधः.

To NEED, v. a. and n. (Require) आकांक्ष् (c. 1. -कांक्षति -क्षितुं), आकांक्ष्, अभिकांक्ष्, अपेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रार्थ् (c. 10. -अर्थयति -यितुं), अर्ह् (c. 1. अर्हति -र्हितुं), often expressed by प्रयोजनं, उपयोगः or कार्य्यं ; as, 'the healthy need not a physician,' निरामयाणां चिकित्सकेन प्रयोजनं नास्ति ; 'he needs me,' तस्य मया प्रयोजनं. See also To LACK, v. a. (Be necessary). See MUST.

NEEDED, p.p. आकांक्षितः -ता -तं, अपेक्षितः -ता -तं, प्रयोजनीयः -या -यं.

NEEDFUL, a. आकांक्षणीयः -या -यं, प्रयोजनीयः -या -यं, प्रयोजनार्हः -र्हा -र्हं, अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यप्रापणीयः -या -यं, अवश्योपयोगी -गिनी -गि (न्), अपेक्षणीयः -या -यं, प्रार्थनीयः &c., आकांक्षितः -ता -तं, अपेक्षितः -ता -तं; 'needful to be done,' अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यकार्य्यः -र्य्या -र्य्यं, अवश्यकरणीयः -या -यं ; 'the one thing needful,' परमार्थः, परमप्रयोजनीयं.

NEEDINESS, s. दरिद्रता, दारिद्र्यं, निर्धनता, अधनता, दीनता, दैन्यं.

NEEDLE, s. सूचिः -ची f. -चिनी -चिका, सेवनी, कूर्चिका ; 'eye of a needle,' सूचिरन्ध्रं, सूचिच्छिद्रं ; 'point of one,' सूच्यग्रं.—(Magnetic needle) लोहकान्तः, अयस्कान्तमणिः m., अयस्कान्तमणिशलाका.

NEEDLE-CASE, s. सूचिभाजनं, सूचिपात्रं, सूच्याधारः.

NEEDLE-MAKER, s. सूचिकारः -रकः, सूचिकरणोपजीवी m. (न्).

NEEDLE-WOMAN, s. सूचिका -की, सूचीशिल्पोपजीविनी.

NEEDLE-WORK, s. सूचिता, सूचिकर्म्म n. (न्), सूचिशिल्पकर्म्म, सूत्रकर्म्म.

NEEDLESS, a. निष्प्रयोजनः -ना -नं, निष्कारणः -णा -णं, अकारणः &c., अप्रयोजकः -का -कं, अप्रयोजनकः &c., अकारणकः &c., अहेतुकः &c., निरर्थकः &c., अनर्थकः &c., व्यर्थः -र्था -र्थं, किमर्थः -र्था -र्थं.

NEEDLESSLY, adv. प्रयोजनं विना, निष्प्रयोजनं, अकारणं, निष्कारणं, कारणं विना, हेतुना विना, हेतुं विना, अहेतुकं, निरर्थकं, व्यर्थं.

NEEDLESSNESS, s. अहेतुता -त्वं, अकारणत्वं, अकारणं, अप्रयोजकत्वं, अप्रयोजनं, निष्कारणत्वं, प्रयोजनाभावः, कारणाभावः.

NEEDS, adv. (Used with must) अवश्यं, अवश्यमेव. See MUST.

NEEDY, a. दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, अधनः -ना -नं, दीनः -ना -नं, दुर्गतः -ता -तं, अर्थहीनः -ना -नं, वित्तहीनः &c., अर्थी -र्थिनी -र्थि (न्).

NEFARIOUS, a. अतिदुष्टः -ष्टा -ष्टं, पापिष्ठः -ष्ठा -ष्ठं, अतिपापिष्ठः &c., अतिपापी -पिनी -पि (न्), दारुणः -णा -णं, घोरः -रा -रं, अघोरः -रा -रं, गर्ह्यः -र्ह्या -र्ह्यं, दुष्टतमः -मा -मं, अतिपातकी &c., महापातकी &c., अतिपापात्मा -त्मा -त्म (न्).

NEFARIOUSLY, adv. अतिदुष्टं, पापिष्ठं, दारुणं, घोरं, अघोरं, गर्हितं.

NEFARIOUSNESS, s. अतिदुष्टता, पापिष्ठता, दारुणता, घोरता, अतिगर्हता.

NEGATION, s. निह्नवः, अपह्नवः, निह्नुतिः f., अपह्नुतिः f., अपलापः, प्रत्याख्यानं, अपवादः, अस्वीकारः, निषेधः, प्रत्यादेशः.—(In logic) अभावः according to one division it is of two kinds, 'universal negation,' संसर्गाभावः ; 'relative or mutual negation,' अन्योन्याभावः ; according to another division it is of four kinds, viz. 'extinction,' प्रध्वंसाभावः ; 'antecedent non-existence,' प्रागभावः ; 'reciprocal negation,' अन्योन्याभावः ; 'simple non-existence,' अत्यन्ताभावः.

NEGATIVE, a. (Implying denial) अपलापी -पिनी -पि (न्), निह्नवसूचकः -का -कं, निह्नवार्थकः -का -कं, अपवादकः -का -कं, अस्वीकारसूचकः &c., निषेधसूचकः &c., निषेधार्थकः -का -कं.—(Implying absence, privative) अभावसूचकः -का -कं, अभावरूपः -पा -पं, अभावात्मकः -का -कं, अभावदर्शकः -का -कं, अकरणरूपः -पा -पं, अकरणात्मकः -का -कं, अननुष्ठानरूपः -पा -पं.—(Stopping by non-consent) निषेधद्वारा प्रतिबन्धकः -का -कं.

NEGATIVE, s. (Word) अस्वीकारसूचकशब्दः, निषेधसूचकशब्दः, अपलापसूचकशब्दः, निषेधार्थकशब्दः, अस्वीकारशब्दः.—(Proposition by which something is denied) अभावसूचकपक्षः, अभावसूचकवाक्यं, निषेधसूचकपक्षः, नास्तिपक्षः, अभावपक्षः.—(Right of preventing) निषेधाधिकारः, निषेधशक्तिः f., प्रतिबन्धसामर्थ्यं.

To NEGATIVE, v. a. निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्, निषेधद्वारा प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), अपलप् (c. 1. -लपति -पितुं), निरस् (c. 4. -अस्यति -असितुं), निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, निषेधं कृ.—(Disprove). See the word.

NEGATIVED, p. p. निषिद्धः -द्धा -द्धं, निषेधितः -ता -तं, निरस्तः -स्ता -स्तं.

NEGATIVELY, adv. अस्वीकारेण, सनिषेधं, सापलापं, सापवादं, अभावरूपेण.

To NEGLECT, v. a. (Omit) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, अतिचर् (c. 1. -चरति -रितुं), लङ्घ् (c. 10. लङ्घयति -यितुं), विलङ्घ्, उल्लङ्घ्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), हा (c. 3. जहाति, हातुं), अपहा, अपास् (c. 4. -अस्यति -असितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), अतिसृज्, व्यपसृज्.—(Be careless about) प्रमद् (c. 4. -माद्यति -मदितुं), न अवधा (c. 3. -धत्ते -धातुं), अनवधानं कृ, प्रमादात् परित्यज् ; 'he neglects his duty,' स्वधर्म्मात् प्रमाद्यति.—(Not to perform) न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अननुष्ठानं कृ, न कृ.—(Forget to perform) विस्मृ (c. 1. -स्मरति -ते -स्मर्त्तुं), न स्मृ, अपस्मृ, विस्मरणात् परित्यज्.—(Disregard) उपेक्ष् (c. 1. -ईक्षते -क्षितुं), समुपेक्ष्, उपप्रेक्ष्, न सेव् (c. 1. सेवते -वितुं), असेवनं कृ.—(Slight) अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), अवधीर् (c. 10. -धीरयति -यितुं), अवगण् (c. 10. -गणयति -यितुं), अनादरं कृ,

खलीकृ; 'he neglects to honor the honorable,' पूज्यपूजाव्यतिक्रमं करोति.

NEGLECT, *s.* (Omission, forbearing to do any thing) त्यागः, परित्यागः, अननुष्ठानं, उपात्ययः, अतिपातः, पर्य्ययः, अनभ्यासः, अपक्रिया, लोपः, परिलोपः, अपासनं, उत्सर्जनं, अतिसर्जनं, अतिक्रमः, व्यतिक्रमः, अतिवर्त्तनं, लङ्घनं, विलङ्घनं, अतिचारः.—(Carelessness, inattention) प्रमादः, प्रमाद्यं, प्रमत्तता, अनवधानं.—(Forgetfulness) विस्मृतिः *f.*, विस्मरणं.—(Disregard) उपेक्षा, अनपेक्षा, अनवेक्षा, निरपेक्षा, उत्प्रेक्षा, उद्भावनं, अदर्शनं.—(Slighting) अवज्ञा, अपमानं, अनादरः, अमाननं, अवधीरणं, अवपालनं.

NEGLECTED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., लङ्घितः -ता -तं, उल्लङ्घितः -ता -तं, अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, अपासितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, विसर्जितः -ता -तं, अननुष्ठितः -ता -तं, असेवितः -ता -तं, उपेक्षितः -ता -तं, समुपेक्षितः -ता -तं, अनपेक्षितः -ता -तं, अवज्ञातः -ता -तं, अवधीरितः -ता -तं, अपमानितः -ता -तं, अवमतः -ता -तं, अवगणितः -ता -तं, अवपालितः &c., उद्भावितः &c., अरक्षितः, &c., अवसन्नः -न्ना -न्नं, खलीभूतः &c.

NEGLECTFUL, *a.* (Heedless, inattentive) अनवधानः -ना -नं, अनवहितः -ता -तं, असावधानः -ना -नं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), प्रमत्तः -त्ता -त्तं.—(Disregardful) उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, निर्व्यपेक्षः &c., मन्दादरः -रा -रं, अनादरकारी &c.

NEGLECTFULLY, *adv.* अनवधानेन, अनवहितं, प्रमादेन, सप्रमादं, निरपेक्षं, अनपेक्षया, उपेक्षया, अनपेक्ष्य, मन्दादरं, अवमानेन.

NEGLIGENCE, *s.* अनवधानं -नता, प्रमादः, प्रमाद्यं, प्रमत्तता, अनवहितत्वं, उपेक्षा, अनपेक्षा, अनवेक्षा, असमीक्षा, अव्यवसायः, बालिश्यं. *See* NEGLECT.

NEGLIGENT, *a.* अनवधानः -ना -नं, प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अनवहितः -ता -तं, असावधानः -ना -नं, उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, अव्यवसायी &c., मन्दादरः -रा -रं.

NEGLIGENTLY, *adv.* प्रमादात्, प्रमादेन, प्रमादतस्, प्रमत्ततस्, अनवधानात्, अनवधानेन, अवधानं विना, प्रमत्तवत्, असमीक्ष्य. *See* NEGLECTFULLY.

NEGOTIABLE, *a.* पणितव्यः -व्या -व्यं, पणायितव्यः &c., व्यवहर्त्तव्यः &c., व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहारयोग्यः -ग्या -ग्यं, व्यवसाययोग्यः &c.

To NEGOTIATE, *v. a.* पण् (c. 1. पणते -णितुं, पणायति, c. 10. पणायति -यितुं), पणायां कृ, व्यवहृ (c. 1. -हरति -हर्त्तुं), व्यवसायं कृ.

NEGOTIATED, *p. p.* पणितः -ता -तं, पणायितः -ता -तं, व्यवहारितः -ता -तं.

NEGOTIATION, *s.* पणाया, पणनं, व्यवहारः, व्यवसायः, घटना, प्रपञ्चनं.—(Pacification) साम *n.* (न्), सन्धिकरणं, शमनं.

NEGOTIATOR, *s.* पणायाकृत्, पणिकः, आपणिकः, व्यवसायी *m.* (न्), व्यवहर्त्ता *m.* (र्तृ), व्यवहारी *m.* (न्), कर्म्मकारी *m.*—(Pacificator) सामविद् *m.*, सन्धिविद् *m.*, सन्धिविचक्षणः, सन्धिकुशलः, स्थेयः.

NEGRO, *s.* श्यामदेहः, श्यामशरीरः, श्यामाङ्गः, कृष्णदेहः, कृष्णाङ्गः.

To NEIGH, *v. n.* ह्रेष् (c. 1. ह्रेषते -षितुं) or ह्रेष्, हेष् (c. 1. हेषते -षितुं), रेष् (c. 1. रेषते -षितुं), अश्ववद् रु (c. 2. रौति, रवितुं) or नद् (c. 1. नदति -दितुं) or नादं कृ or चित्कारं कृ.

NEIGH, *s.* हेषा, ह्रेषा, ह्रेषितं, रेषणं, रेषितं, ह्रेषा, अश्वनादः.

NEIGHBOR, *s.* प्रतिवासी *m.* (न्), निकटवासी *m.*, निकटवर्त्ती *m.* (न्), समीपवासी *m.*, निकटस्थः, समीपस्थः, समीपस्थायी *m.*, प्रतिवेशवासी *m.*, प्रतिवेशी *m.*, प्रतिवेशिकः, सामन्तवासी *m.*, समीपदेशनिवासी जनः, समीपगृहवासी *m.*, सामन्तः, अधिवासः, संस्थः, संस्थितः; 'a next-door neighbor,' निरन्तरगृहवासी *m.*, प्रातिवेश्यः; 'next but one,' अनुवेश्यः; 'one should love one's neighbor as one's self,' आत्मौपम्येन परस्मिन् दयां कुर्य्यात्.

NEIGHBOR, *a.* प्रतिवासी -सिनी -सि (न्). *See* NEIGHBORING.

To NEIGHBOR, *v. a.* निकटे or समीपे स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं) or वस् (c. 1. वसति, वस्तुं), स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

NEIGHBORHOOD, *s.* (Vicinity, adjoining district) सामन्तदेशः, सामन्तं, समीपदेशः, समीपस्थानं, प्रतिवेशः, सन्निवेशः, अधिवासः, अन्तिकं, उपान्तं, निकर्षणः.—(State of being near, proximity) समीपता, सामीप्यं, निकटता, नैकट्यं, सन्निधानं, सान्निध्यं, सन्निधिः *m.*, सन्निधं, सन्निकर्षः, सन्निकृष्टता, आसन्नता, अन्तिकता, आन्तिकं, उपान्तं -न्त्यं, प्रत्यासन्नता, प्रत्यासत्तिः *f.*, सामन्तत्वं, निकटवर्त्तित्वं, समीपवर्त्तित्वं, संस्थानं, उपस्थानं, अभ्यासत्वं; 'in the neighborhood of the house,' गृहसन्निधाने, गृहोपान्ते.—(Inhabitants of the neighborhood) समीपवासिनः *m. pl.*, निकटवासिनः *m. pl.*, सामन्तवासिनः *m. pl*, प्रतिवासिनः *m. pl.*, समीपलोकाः *m. pl.*, तत्रत्यलोकाः *m. pl.*

NEIGHBORING, *a.* निकटवर्त्ती -र्त्तिनी -र्त्ति (न्), समीपवर्त्ती &c., निकटस्थः -स्था -स्थं, समीपस्थः &c., समीपस्थायी &c., समीपवासी &c., सामन्तवासी &c., प्रतिवासी &c., सामन्तस्थः &c., सामन्तः -न्ती -न्तं, समीपः -पा -पं, आसन्नः -न्ना -न्नं, निकटः -टा -टं, अन्तिकः -का -कं, उपान्तः -न्ता -न्तं, उपान्तिकः -की -कं, सन्निहितः -ता -तं, अभ्यासः -सा -सं, अभ्याशः -शा -शं, अदूरस्थः &c., अदूरीस्थः &c.; 'neighboring district,' 'neighboring people.' *See* NEIGHBORHOOD.

NEIGHBORLINESS, *s.* सामन्तव्यवहारयोग्यता, संस्थव्यवहारयोग्यता, सामन्तजनाचारानुसरणं, उपकारशीलता, मित्रत्वं, हितता.

NEIGHBORLY, *a.* सामन्तव्यवहारयोग्यः -ग्या -ग्यं, संस्थव्यवहारयोग्यः &c., प्रतिवासयोग्यः &c., सामन्ताचारानुसारी -रिणी &c., उपकारशीलः -ला -लं, सुहितः -ता -तं.

NEIGHING, *s.* हेषा, ह्रेषा, ह्रेषितं, ह्रेषा, रेषणं -षितं, ह्रेषितस्वनः, अश्वशब्दः, अश्वनादः, अश्वनिस्वनः.

NEITHER, *pron.* (Not either, not the one or the other) expressed by अन्यतरः -रा -रं or एकतरः -रा -रं or उभौ, or simply by the dual in conjunction with the negative न; as, 'neither of them can break the bow,' धनुर् भंक्तुम् एकतरो न शक्नोति or उभौ न शक्नुतः or simply न शक्नुतः.

NEITHER, *conj.* expressed by the negative न or न च, or by the prohibitive मा. Sometimes in conjunction with वा; as, 'he took neither food nor clothes for his journey,' यात्रार्थं भक्ष्यं वस्त्रं वा न जग्राह; 'take neither food nor clothes,' भक्ष्यं वस्त्रं वा मा गृहाण; 'do not eat the fruit neither touch it,' फलं मा खादत मा स्पृशत; 'he did not touch, neither did he smell,' नास्पृशद् न चाजिघ्रत्.

NEM. CON. सर्व्वसम्मत्या, सर्व्वानुमत्या, सर्व्वस्वीकारेण.

NEOGAMIST, *s.* नवोढः -ढा, नववधूः *f.*, नवभार्य्या *f.*, नवपतिः *m.*

NEOLOGIC, NEOLOGICAL, *a.* (Pertaining to neology) नूतनन्यायसम्बन्धी -न्धिनी &c., नूतनमतसम्बन्धी &c.—(Employing new words, &c.) *See* the next.

NEOLOGIST, *s.* नूतनशब्दसेवी *m.* (न्), नूतनन्यायाश्रयी *m.*, नूतनमताश्रयी *m.*, नूतनन्यायसेवी *m.*

NEOLOGY, *s.* नूतनन्यायः, नूतनमतं, नूतनविद्या.—(Employment of new words, &c.) नूतनशब्दसेवनं, नूतनमताश्रयणं.

NEOPHYTE, *s.* नवछात्रः, नवशिष्यः, प्राथमकल्पिकः, नूतनशिष्यः.

NEOTERIC, *a.* नूतनः -ना -नं, नवः -वा -वं, नवीनः -ना -नं, इदानीन्तनः -नी -नं, आधुनिकः -की -कं, अर्वाचीनः -ना -नं.

NEPAL, *s.* (The country) नेपालः.—(Belonging to it, or produced in it) नैपालिकः -की -कं, नैपालः -ली -लं.

NEPENTHE, *s.* दुःखशमनं, दुःखहारकम् औषधं, उपशमनं.

NEPHEW, *s.* (Brother's son) भ्रातृजः, भ्रात्रीयः, भ्रातृपुत्रः, भ्रातृसुतः, भ्रातृव्यः.—(Sister's son) भागिनेयः, स्वस्रीयः, भगिनीपुत्रः, स्वसृपुत्रः, भगिनीसुतः, स्वसृसुतः.

NEPHRITIC, NEPHRITICAL, *a.* (Relating to the kidneys) मूत्रपिण्डसम्बन्धी -न्धिनी &c., वृक्कसम्बन्धी &c.—(Relieving disease of the kidneys) मूत्रपिण्डरोगहारी -रिणी &c., मूत्ररोगनाशकः -का -कं, वृक्करोगघ्नः -घ्नी -घ्नं.

NEPOTISM, *s.* (Fondness for nephews) भ्रातृव्यभागिनेयस्नेहः.—(Undue attachment for relations) पुत्रपौत्रादिपक्षपातः, कुलपक्षता, अपत्यातिस्नेहः, सन्तानातिस्नेहः, बान्धवातिस्नेहः.

NEREID, *s.* (Sea-nymph) समुद्रीयदेवी, सामुद्रदेवी, जलदेवी.

NERVE, *s.* (Organ of sensation connected with the marrow of the brain and spine) मज्जातन्तुः *m.*, ज्ञानतन्तुः, ज्ञानवाहिनी, चैतन्यवाहिनी, चैतन्यतन्तुः *m.*, शिरा, सिरा.—(Sinew, tendon) स्नायुः *m.*, वसा, शिरा, सिरा, धमनिः -नी *f.*, नाडिः -डी *f.*, वहीरुः *m.*, रसालसा, सन्धिबन्धनं.—(Strength of body) शरीरदृढता, शरीरदार्ढ्यं, गात्रदार्ढ्यं, शरीरबलं, तेजस् *n.*, वीर्य्यं, ओजस् *n.*, ऊर्जः.—(Strength of mind) धैर्य्यं, धीरता -त्वं, धृतिः *f.*, मनःस्थैर्य्यं, बुद्धिवैभवं.

To NERVE, *v. a.* बलं or धैर्य्यं दा or वृध् (c. 10. वर्धयति -यितुं), सबलीकृ.

NERVELESS, *a.* निर्बलः -ला -लं, दुर्बलः -ला -लं, बलहीनः -ना -नं.

NERVOUS, *a.* (Pertaining to the nerves) मज्जातन्तुसम्बन्धी -न्धिनी &c., मज्जातन्तुस्थः -स्था -स्थं, मज्जातन्तुगतः -ता -तं.—(Having the nerves affected, easily agitated) मज्जातन्तुरोगी -गिणी &c., मज्जातन्तुविकारी &c., शिरारोगी &c., धैर्य्यहीनः -ना -नं, कम्पशीलः -ला -लं, वेपनशीलः &c.—(Vigorous) वीर्य्यवान् -वती -वत् (त्), तेजोवान् &c., ओजस्वी &c., ऊर्जस्वान् &c., ऊर्जस्वलः -ला -लं, धीरः -रा -रं, दृढः -ढा -ढं, सुदृढः &c.

NERVOUSLY, *adv.* (With vigor) सवीर्य्यं, सधैर्य्यं, सबलं, धैर्य्येण.—(With weakness) धैर्य्येण विना, धैर्य्यं विना, सकम्पं, सवेपनं, कम्पशीलत्वात्.

NERVOUSNESS, *s.* (Vigor) वीर्य्यं, धैर्य्यं, धीरता -त्वं, तेजस् *n.*, ओजस् *n.*, दार्ढ्यं, दृढता, सुदृढता, ऊर्जः.—(Affection or weakness of the nerves, agitation) मज्जातन्तुरोगः, मज्जातन्तुविकारः -रिता, धैर्य्यहीनता, अधृतिः *f.*, कम्पशीलता, वेपनशीलता.

NESCIENCE, *s.* अज्ञानं -नता, ज्ञानाभावः, ज्ञानहीनता, अबोधः, अज्ञता.

NESS. This termination, denoting state or quality, is expressed in Sanskrit by the affixes ता, त्वं, and यं, the last usually requiring Vriddhi of the first syllable of the noun; as, from 'idle,' अलस; 'idleness,' अलसता, अलसत्वं, आलस्यं.

NEST, *s.* (Of birds) नीडः -डं, कुलायः, पक्षिस्थानं, पक्षिगृहं, खगस्थानं, जालकं, अङ्कुरकः.—(Any abode, receptacle) गृहं, स्थानं, निधिः *m.*, निधानं, आशयः, आश्रयः; 'sitting in a nest,' कुलायनिलायः.

To NESTLE, *v. n.* पक्षिवत् स्वनीडम् आश्रि (c. 1. -श्रयति -यितुं) or समाश्रि or संश्रि, सुखेन or सुखम् आश्रि, यथासुखम् आश्रि or शी (c. 2. शेते, शयितुं) or अधिशी or संविश् (c. 6. -विशति -वेष्टुं) or उपविश् or निली (c. 4. -लीयते -लेतुं).

To NESTLE, *v. a.* (Cherish) पाल् (c. 10. पालयति -यितुं), पुष् (c. 10. पोषयति -यितुं).

NESTLING, *s.* कुलायस्थः or नीडस्थः पक्षिशावकः, कुलायस्थायी *m.* (न्).

NESTOR, *s.* (Sage old man) वृहस्पतिः *m.*

NET, *s.* जालं, जालकं, आनायः, पाशः, पाशबन्धः -न्धं, वागुरा, उन्मायः, कूटः, कूटयन्त्रं, वीतंसः, वितंसः, पक्षिबन्धनं, बन्धनं -नी; 'for deer,' मृगबन्धिनी -नं, पातिली: 'for fish,' मत्स्यधानी, मत्स्यजालं, मत्स्यग्रहणी, मत्स्यग्रहणार्थं जालं, कुपिनी, पञ्जराखेटः; 'maker of nets,' जालकारकः.

NET, *a.* (Clear, free from deductions) अशेषः -षा -षं, निरवशेषः &c., अभग्नः -ग्ना -ग्नं, अखण्डः -ण्डा -ण्डं, अन्यूनः -ना -नं, निरुद्धारः -रा -रं, शुद्धः -द्धा -द्धं.

To NET, *v. a.* (Make clear gain) अन्यूनं फलं लभ् (c. 1. लभते, लब्धुं).

NETHER, *a.* अधरः -रा -रं, अवरः -रा -रं, अधरस्थः -स्था -स्थं, अधःस्थः &c., अधोभवः -वा -वं, अधस्तनः -नी -नं, नीचस्थः &c., अधमः -मा -मं, अवमः &c., जघन्यः -न्या -न्यं; 'nether part,' अधोभागः; 'nether world,' अधोलोकः; 'nether garment,' अधोंशुकं, अन्तरीयं; 'nether sky,' नभस्तलं.

NETHERMOST, *a.* अधरः -रा -रं, अधरतमः -मा -मं, अधरतमः &c., नीचतमः &c.

NETTING, NET-WORK, *s.* जालं -लकं, जालकर्म्म *n.* (न्), जालप्राया.

NETTLE, *s.* (A plant) पीतपर्णी.

To NETTLE, *v. a.* प्रकुप् (c. 10. -कोपयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), सन्तप् (c. 10. -तापयति -यितुं), कोपं जन् (c. 10. जनयति -यितुं).

NETTLED, *p. p.* ईषत्कुपितः -ता -तं, ईषत्सन्तप्तः -प्ता -प्तं, व्यथितः -ता -तं.

NEURALGIA, *s.* मज्जातन्तुवेदना, मज्जातन्तुव्यथा, शिरावेदना.

NEUROLOGY, *s.* मज्जातन्तुवर्णनं -ना, मज्जातन्तुविद्या, शिरावर्णनं.

NEUROTOMY, *s.* मज्जातन्तुच्छेदः -दनं शिराव्यवच्छेदविद्या.

NEUTER, NEUTRAL, *a.* (Not adhering to either party, indifferent) अपक्षपाती -तिनी -ति (न्), विपक्षपातः -ता -तं, उभयपक्षसमानः -ना -नं, उभयपक्षसमः -मा -मं, उभयसामान्यः -न्या -न्यं, उभयसाधारणः -णी -णं, उभयपक्षाश्रितः -ता -तं, उदासीनः -ना -नं, उदासी &c., तटस्थः -स्था -स्थं, मध्यस्थः &c., समदर्शी &c., समदृष्टिः -ष्टिः -ष्टि, समबुद्धिः -द्धिः -द्धि, समभावः -वा -वं, समः -मा -मं.—(Neuter gender) क्लीबः -बं, नपुंसकः -कं, नपुंसकलिङ्गं, तृतीयप्रकृतिः *f.*, तृतीयाप्रकृतिः.

NEUTRALITY, *s.* माध्यस्थं -स्थ्यं, मध्यस्थता -त्वं, ताटस्थ्यं, तटस्थता -त्वं, उभयपक्षसमता, अपक्षपातः -तिता, विपक्षपातत्वं, उदासीनता, औदासीन्यं, औदास्यं, उभयसमता, उभयसाम्यं, उभयसामान्यं, उभयसाधारण्यं, समदृष्टिः *f.*, समता, साम्यं, समानता.

NEUTRALIZATION, *s.* (Act of destroying the peculiar properties of a body) विशेषगुणनाशः -शनं, विशेषधर्म्मनाशः -शनं, गुणविनाशनं, विशेषगुणप्रतीकारः.—(Act of reducing to a state of neutrality) उदासीनीकरणं, समीकरणं, उभयसमीकरणं.—(Rendering inefficient) निर्बलीकरणं, दुर्बलीकरणं.

To NEUTRALIZE, *v. a.* (Destroy the peculiar properties of) विशेषगुणान् नश् (c. 10. नाशयति -यितुं), विशेषगुणनाशनं कृ, विशेषधर्म्मनाशं कृ.—(Render neutral) उदासीनीकरणं, उभयसमीकरणं.—(Render inefficient) निर्बलीकृ, दुर्बलीकृ, बलं नश्.

NEUTRALIZED, *p. p.* नष्टगुणः -णा -णं, नष्टबलः -ला -लं, नष्टशक्तिः -क्तिः -क्ति.

NEUTRALIZER, *s.* विशेषगुणनाशकः, बलनाशकः, शक्तिनाशकः, गुणघ्नः.

NEUTRALLY, *adv.* उदासीनवत्, औदासीन्यपूर्वं, उभयसाम्येन, समदृष्ट्या.

Never, *adv.* न कदाचित्, न कदापि, न कदाचन, न कर्हिचित्, न जातु, न जातुचित्, sometimes expressed by न; as, 'there never has been and never will be any one like him,' अनेन सदृशः कश्चिद् न भूतो न भविष्यति.

Nevertheless, *conj.* तथापि, पुनर्, परन्तु, परं, किन्तु, अपितु, किञ्च.

New, *a.* नवः -वा -वं, नवीनः -ना -नं, नूतनः -ना -नं, नूत्नः -त्ना -त्नं, नव्यः -व्या -व्यं, अभिनवः -वा -वं, प्रतिनवः -वा -वं, प्रत्यग्रः -ग्रा -ग्रं, तरुणः -णा -णं.—(Modern, not ancient) आधुनिकः -की -कं, इदानीन्तनः -नी -नं, अधुनातनः -नी -नं, सद्यस्कालीनः -ना -नं, अप्राचीनः -ना -नं, अपुरातनः -नी -नं.—(Never occurring before) अभूतपूर्व्वः -र्व्वा -र्व्वं, अदृष्टपूर्व्वः &c., अश्रुतपूर्व्वः &c., अपूर्व्वः &c., अयथापूर्व्वः &c.—(Not habituated, not familiar) अनभ्यस्तः -स्ता -स्तं, अपरिचितः -ता -तं.—(Not before used) अप्रयुक्तः -क्ता -क्तं, अनुपभुक्तः &c.; 'new moon.' *See* Moon.

New-born, *a.* सद्योजातः -ता -तं, जातमात्रः -त्री -त्रं, नवोत्पन्नः -न्ना -न्नं.

New-comer, *s.* आगन्तुकः, आगन्तुः *m.*, नवागतः, नवाभ्यागतः.

New-fangled, *a.* नवकल्पितः -ता -तं, नवसृष्टः -ष्टा -ष्टं, नूतनः -ना -नं.

Newly, *adv.* नवं, नूतनं, नवीनं, अभिनवं, प्रतिनवं, प्रत्यग्रं, सद्यस्.

Newness, *s.* नवता -त्वं, नवीनता, नूतनता -त्वं, नव्यता, नाव्यं, अभिनवता, प्रतिनवता, प्रत्यग्रता.—(State of not being known before) अपूर्व्वता -त्वं, अभूतपूर्व्वता.

News, *s.* वार्त्ता, वृत्तान्तः, समाचारः, सन्देशः, सन्दिष्टं, संवादः, वृत्तं, वर्त्तमानं, प्रवृत्तिः *f.*, किंवदन्ती, उदन्तः -न्तकः, लोकवादः, लोकप्रवादः, जनवादः, जनश्रुतिः *f.*, वाचिकं, सूचना; 'What's the news?' का वार्त्ता; 'good news,' सुवार्त्ता, शुभवार्त्ता, शुभवृत्तान्तः; 'bad news,' दुर्वार्त्ता, अनिष्टवार्त्ता, अशुभवार्त्ता.

Newsmonger, *s.* वार्त्तायनः, वार्त्तावृत्तिः *m.*, समाचारवृत्तिः *m.*, वार्त्ताव्यवसायी *m.* (न्), वार्त्तावहनव्यापारी *m.*, वार्त्तिकः, कुशीलवः, समाचारव्यवसायी.

Newspaper, *s.* समाचारपत्रं, वार्त्तापत्रं, वाचिकपत्रं, संवादपत्रं.

News-vender, *s.* समाचारपत्रविक्रेता *m.* (तृ), वार्त्तापत्रविक्रयी *m.*

Newt, *s.* तृणगोधा -धिका, सूक्ष्मगोधा -धिका, क्षुद्रगोधा.

New-testament, *s.* नवीननियमः, नूतननियमः, नवनियमः.

New-year's day, *s.* वर्षप्रतिपद् *f.*, वत्सरप्रतिपद्, संवत्सरप्रतिपद्.

Next, *a.* (In time, &c.) अनन्तरः -रा -रं, निरन्तरः -रा -रं.—(Next in place, having nothing intervening) अव्यवधानः -ना -नं, अव्यवहितः -ता -तं, अनन्तरालः -ला -लं, निरन्तरालः -ला -लं, अपदान्तरः -रा -रं, सन्निहितः -ता -तं, पार्श्वस्थः -स्था -स्थं, अन्तिकः -का -कं, अन्तिमः -मा -मं. Next in time may also be expressed by परः -रा -रं or अनन्तरं; as, 'the next day,' परदिवसः, पराहः, 'the next world,' परलोकः -कं, लोकान्तरं; 'in the next world,' परत्र, प्रेत्य, अमुत्र; 'relating to the next world,' पारत्रिकः -की -कं, आमुत्रः -त्रा -त्रं, आमुष्मिकः -की -कं: 'the next moment,' क्षणान्तरं; 'next born,' अनन्तरजः -जा -जं; 'next of kin,' अनन्तरः -रा -रं; 'next but one,' एकान्तरः -रा -रं; 'next but two,' द्व्यन्तरः -रा -रं, द्व्येकान्तरः -रा -रं.

Next, *adv.* अनन्तरं, तदनन्तरं, प्रसमनन्तरं, परं -रेण, परतस्, पश्चात्, ततः परं, अतः परं, अत ऊर्द्ध्वं; 'next day,' परदिवसे, परेद्युस्; 'next moment,' क्षणान्तरे.

Nib, *s.* (Bill, beak) चञ्चुः *f.*, तुण्डः -ण्डिः *m.*, मुखः.—(Point) अग्रं, [illegible] *m.*, अग्रभागः; 'of a pen,' कलमाग्रं.

Nibbed, *a.* अग्रिमान् -मती -मत् (त्), अग्रवान् -वती &c., साग्रः -ग्रा -ग्रं.

To **nibble**, *v. a.* and *n.* अल्पाल्पशः or अल्पाल्पं चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं) or दंश् (c. 1. दशति, दंष्टुं) or विदंश् or सन्दंश्, सम्मुखदन्तैर् अल्पाल्पं खाद् (c. 1. खादति -दितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), क्रमशः खाद् or भक्ष् (c. 10. भक्षयति -यितुं) or चर्वणं कृ.—(Carp at) दोषं or छिद्रम् अन्विष् (c. 4. -इष्यति -एषितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), छिद्रान्वेषं कृ, असूय (nom. असूयति).

Nibbled, *p. p.* अल्पाल्पशः खादितः -ता -तं or चर्वितः -ता -तं or दष्टः -ष्टा -ष्टं, सम्मुखदन्तैर् जग्धः -ग्धा -ग्धं or छिन्नः -न्ना -न्नं or लूनः -ना -नं.

Nice, *a.* (Delicious, pleasant to the taste) स्वादुः -दुः -द्वी -दु, सुरसः -सा -सं, मिष्टः -ष्टा -ष्टं, सुखास्वादः -दा -दं, रुचिरः -रा -रं, रुचिकः -का -कं, रुच्यः -च्या -च्यं, रुचिकरः -रा -रं.—(Exact, accurate) सूक्ष्मः -क्ष्मा -क्ष्मं, अञ्जसः -सा -सं, समञ्जसः -सा -सं, सम्यङ् -मीची -म्यक् (च्), शुद्धः -द्धा -द्धं.—(Judging with exactness or minuteness) सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी -र्शि (न्), कुशाग्रदृष्टिः &c., कुशाग्रीयमतिः -तिः -ति, कुशाग्रीयबुद्धिः -द्धिः -द्धि, कुशाग्रबुद्धिः &c.—(Over-exact) अतिसूक्ष्मः &c., अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि.—(Delicate, soft) कोमलः -ला -लं, पेलवः -वा -वं, मृदुः -द्वी -दु, सुकुमारः -रा -री -रं.—(Not coarse, fine) अस्थूलः -ला -लं, सूक्ष्मः &c., विरलः &c.—(Pleasing, agreeable) रुचिरः -रा -रं, सुभगः -गा -गं, रम्यः -म्या -म्यं, मनोरमः -मा -मं, सुन्दरः -रा -री -रं.

Nicely, *adv.* (Exactly, accurately) सूक्ष्मं, सौक्ष्म्येण, ससौक्ष्म्यं, सूक्ष्मरूपेण, सूक्ष्मत्वेन, अञ्जसा, समञ्जसं, सम्यक्.—(Well, in a good manner) सु prefixed, सुष्ठु; 'nicely done,' सुकृतः -ता -तं.

Niceness, nicety, *s.* (Delicacy, deliciousness) स्वादुता, सुरसत्वं, सौरस्यं, मिष्टता.—(Pleasantness) रुचिरता, रुच्यता, रम्यता, रमणीयता.—(Exactness) सूक्ष्मता -त्वं, सौक्ष्म्यं, सामञ्जस्यं, सम्यक्त्वं, शुद्धता.—(Over-exactness or scrupulousness) अतिसूक्ष्मता, अतिसौक्ष्म्यं.—(Delicacy of perception or judgment) सूक्ष्मदृष्टिः *f.* -ष्टित्वं, सूक्ष्ममतित्वं, कुशाग्रीयमतित्वं, कुशाग्रबुद्धित्वं.—(Delicacy of management) युक्तिः *f.*, सुयुक्तिः *f.*, लाघवं, सुनीतिः *f.*

Niche, *s.* प्रतिमास्थानं, प्रतिमाधारः, प्रतिमानिकेतः -तनं.

Nick, *s.* (Of time) कालसन्धिः *m.*, कालयोगः, शुभकालः, शुभयोगः, सुयोगः, शुभलग्नं, शुभक्षणः, युक्तसमयः, उपयुक्तसमयः, उपयुक्तकालः, उचितसमयः, अग्निः *m.*—(Notch) छेदः, अवच्छेदः.

To **nick**, *v. a.* (Touch at the right time) शुभलग्ने स्पृश् (c. 6. स्पृशति, स्प्रष्टुं) or आसद् (c. 10. -सादयति -यितुं), सुयुक्तिं कृ.—(Make a notch) अवच्छेदं कृ.

Nickname, *s.* उपाधिः *m.*, उपाधिनाम *n.* (न्), निन्दानाम *n.*, निन्दासूचकं नाम, तिरस्कारसूचकनाम, अपमानार्थकं नाम.

To **nickname**, *v. a.* उपाधिं दा, उपाधिनाम कृ, तिरस्कारार्थं नाम दा.

To **nictate**, *v. n.* निमिष् (c. 6. -मिषति -मेषितुं), पक्षिवद् निमेषं कृ.

Nictation, *s.* निमेषः, निमीलनं, पक्षिनिमेषः, पक्षिवद् निमेषः.

Nictitating membrane, *s.* पक्षिणां चक्षुरावरणं, पक्षिनेत्रपटलं.

Nidification, *s.* नीडकरणं, नीडरचनं, कुलायरचना.

Niece, *s.* (Brother's daughter) भ्रात्रीया, भ्रातृजा, भ्रातृपुत्री, भ्रातृसुता, भ्रातृकन्या.—(Sister's daughter) स्वस्रीया, भागिनेयी, स्वसृपुत्री, भगिनीसुता, भगिनीकन्या, स्वसृजा.

Niggard, *s.* कृपणजनः, अदाता *m.* (तृ), कदर्य्यजनः, गाढमुष्टिः *m.*

Niggard, niggardly, *a.* दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः &c., कृपणः -णा -णं, व्ययशङ्की -ङ्किनी -ङ्कि (न्), व्ययशङ्कितः -ता -तं, अल्पव्ययी &c.,

स्वल्पव्ययी &c., कदर्य्यः -र्य्या -र्य्यं, मत्सरः -रा -रं, तनुत्यागः -गा -गं, त्यागपराङ्मुखः -खा -खं, दानपराङ्मुखः &c., क्षुद्रः -द्रा -द्रं, अर्थपरः -रा -रं. *See* MISER, MISERLY.

NIGGARDLINESS, NIGGARDNESS, *s.* कृपणता, कार्पण्यं, कदर्य्यता -त्वं, व्ययशङ्का, स्वल्पव्ययः, दृढमुष्टित्वं, मात्सर्य्यं, दानपराङ्मुखता.

NIGGARDLY *adv.* सकार्पण्यं, कृपणवत्, स्वल्पव्ययेन, व्ययशङ्कया.

NIGH, NIGHLY, NIGHNESS. *See* NEAR, NEARLY, NEARNESS.

NIGHT, *s.* रात्रिः *f.*, निशा, रजनी, क्षणदा, क्षपा, शर्वरी, निट् *f.* (श्), त्रियामा, यामिनी, तमस्वती, नक्तं indecl. निशीथिनी, तमस्विनी, विभावरी, तमी -मा -मी *f.*, निरातपा, निशीथ्या, निशीथः, शमनी, वासुरा, वाशुरा, श्यामा, शताक्षी, शर्वरी, शय्या, यामिः -मी -मिका *f.*, यामीरा, याम्या, दोषा; 'a dark night,' तमिस्रा, तामसी; 'a moonlight night,' ज्योत्स्नी; 'by night, in the night,' रात्रौ, निशायां, निशि, नक्तं, दोषा; 'a number of nights,' निशागणः, गणरात्रं, निशावृन्दं; 'coming on of night,' रात्रियोगः; 'end of night,' निशान्तः -न्तं, अपररात्रः, रात्रिविगमः; 'beginning of night,' निशादिः *f.*; 'every night,' प्रतिरात्रं, प्रतिनिशं, रात्रौ रात्रौ; 'day and night,' अहोरात्रं, अहर्निशं; 'night and day,' रात्रिन्दिवं, रात्र्यहनी *n. du.*; 'a night and two days,' पक्षिणी; 'a period of five nights,' पञ्चरात्रं; 'sitting up at night,' रात्रिजागरः -रणं; 'resting at night,' निशोपशायः; 'night attack,' सौप्तिकवधः, सौप्तिकं; 'last night,' गतरात्रिः *f.*

NIGHT-BLINDNESS, *s.* निशान्धता; 'affected with it,' निशान्धः -न्धा -न्धं, रात्र्यन्धः &c.

NIGHT-CAP, *s.* रात्रौ भृतं शिरोवेष्टनं or शिरोवस्त्रं, रात्रिशिरस्कं.

NIGHT-DEW, *s.* रात्रिजलं, निशाजलं, रजनीजलं, नैशाम्बु *n.*, निशापुष्पं.

NIGHT-CLOTHES, NIGHT-DRESS, *s.* रात्रिवस्त्रं, रात्रिवसनं, रात्रिवेशः.

NIGHT-FALL, *s.* रजनीमुखं, निशादिः *f.*, रात्र्यारम्भः, रात्रियोगः, सन्ध्याकालः, दिनावसानं, प्रदोषः, प्रदोषकालः.

NIGHT-GOWN, *s.* रात्रिवस्त्रं, रात्रिवसनं, रात्रिवेशः, रात्रौ भृतं वस्त्रं.

NIGHT-HAG, *s.* रात्रिचरी, रात्रिचरा -री, निशाचरा -री, रात्र्यटा.

NIGHTINGALE, *s.* वसन्तदूतः, मदनदूतः, कोकिलः, गातुः *m.*

NIGHTLY, *a.* नैशः -शी -शं, प्रादोषिकः -की -कं, रात्रिकृतः -ता -तं, रात्रिजः -जा -जं, शार्वरः -री -रं, प्रातिरात्रिकः -की -कं.

NIGHTLY, *adv.* (By night) रात्रौ, नक्तं, निशायां, निशि, दोषा.—(Every night) प्रतिरात्रं, प्रतिनिशं, रात्रौ रात्रौ, निशि निशि.

NIGHT-MAN, *s.* मलपूः *m.*, मलपूः *m.*, पुरीषवाहकः, पुरीषापकर्षी *m.*

NIGHTMARE, *s.* कुस्वप्नः, दुःस्वप्नः, अजीर्णप्रयुक्तस्वप्नः, स्वप्नकल्पितो हृदयदेशोपरिस्थो भारः, स्वप्नकल्पिता मिथ्यावासना or अपच्छाया.

NIGHTSHADE, *s.* (Prickly) कण्टकारी -रिका, निदिग्धिका, वृहती, धावनिका, दुःस्पर्शा, स्पृशी, व्याघ्री, कुली, प्रचोदिनी, क्षुद्रा, राष्ट्रिका.

NIGHT-WALKING, NIGHT-WANDERING, *a.* निशाचरः -रा -री -रं, रात्रिचरः &c., रात्रिचरः &c., रजनीचरः &c., निशाचारी -रिणी -रि (न्). नक्तचारी &c., नक्तञ्चरः &c.

NIGHT-WATCH, *s.* यामः, प्रहरः, रात्रियामः, रात्रिप्रहरः.

NIHILITY, *s.* अभावः, अवस्तुत्वं, नास्तित्वं, असत्ता -त्त्वं, शून्यता -त्वं.

NIMBLE, *a.* लघुः -घुः -घ्वी -घु, लघुगतिः -तिः -ति, द्रुतगतिः &c., त्वरितगतिः &c., लघुशरीरः -रा -रं, लघुदेहः -हा -हं, चपलाङ्गः -ङ्गा -ङ्गं, अङ्गचपलः -ला -लं, चपलदेहः -हा -हं, चपलगतिः &c., क्षिप्रगतिः &c., क्षिप्रकारी -रिणी -रि (न्), आशुकारी &c., तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), चपलः -ला -लं, चञ्चलः -ला -लं.

NIMBLE-FOOTED, *a.* लघुपादः -दा -दं, चपलपादः &c., पादचपलः -ला -लं.

NIMBLE-HANDED, *a.* लघुहस्तः -स्ता -स्तं, चपलपाणिः -णिः -णि, पाणिचपलः &c.

NIMBLENESS, *s.* लघुता, लाघवं, शरीरलाघवं, लघुगतित्वं, द्रुतगतित्वं, अङ्गचापल्यं, देहचापल्यं, चापल्यं, द्रुतता, क्षिप्रता, शीघ्रता, चञ्चलता, चाञ्चल्यं.

NIMBLE-WITTED, *a.* चपलबुद्धिः -द्धिः -द्धि, क्षिप्रबुद्धिः &c., शीघ्रबुद्धिः &c.

NIMBLY, *adv.* सलाघवं, लाघवेन, लघु, लघुगत्या, द्रुतं, द्रुतगत्या, त्वरितं, त्वरितगत्या, चापल्येन, चपलं, चपलगत्या, अङ्गचापल्येन, क्षिप्रं, शीघ्रं.

NINE, *a.* नव *m. f. n. pl.* (न्). नवसंख्यकः -का -कं.

NINE-FOLD, *a.* नवगुणः -णा -णं, नवविधः -धा -धं, नवधा indecl.

NINETEEN, *a.* नवदश *m. f. n. pl.* (न्), ऊनविंशतिः *f. sing.*, एकोनविंशतिः *f. sing.*, नवदशसंख्यकः -का -कं.

NINETEENTH, *a.* नवदशः -शी -शं, एकोनविंशः -शी -शं, ऊनविंशः &c., ऊनविंशतितमः -मी -मं, एकोनविंशतितमः &c.

NINETIETH, *a.* नवतः -ती -तं, नवतितमः -मी -मं.

NINETY, *a.* नवतिः *f. sing.*, नवतिसंख्यकः -का -कं; 'ninety-one,' एकनवतिः *f.*; 'ninety-two,' द्वानवतिः *f.*; 'ninety-three,' त्रयोनवतिः; 'ninety-four,' चतुर्णवतिः; 'ninety-five,' पञ्चनवतिः; 'ninety-six,' षण्णवतिः; 'ninety-seven,' सप्तनवतिः; 'ninety-eight,' अष्टानवतिः *f.*; 'ninety-nine,' ऊनशतं, एकोनशतं; 'above ninety years old,' दशमी *m.* (न्), दशमीस्थः, दशमीकृतः.

NINETY-FOLD, *a.* नवतिगुणः -णा -णं, नवतिविधः -धा -धं, नवतिधा indecl.

NINNY, NINNY-HAMMER, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, निर्बुद्धिः.

NINTH, *a.* नवमः -मी -मं, नावमिकः -की -कं.

NINTHLY, *adv.* नवमतस्, नवतस्, नवमस्थाने, नवमपदे.

To NIP, *v. a.* (Cut or pinch off with the ends of the fingers) अङ्गुल्यग्रैः or अङ्गुलिनखैर् अवछिद् (c. 7. -छिनत्ति -छेत्तुं) or अवकृत् (c. 6. -कृन्तति -कर्त्तितुं) or निकृत् or छिद् or पीड्.—(Bite off) दंश् (c. 1. दशति -दंष्टुं), विदंश्, सन्दंश्, अवदंश्.—(Pinch in general) पीड् (c. 10. पीडयति -यितुं), मथ् (c. 1. मथति, c. 9. मथ्नाति -थितुं), आर्द्रं -र्द्रां -र्द्रं कृ, आर्द्रीकृ; as, 'to pinch with cold,' शीतेन पीड्, शीतार्द्रीकृ, हिमार्द्रीकृ.—(Blast, destroy) नश् (c. 10. नाशयति -यितुं), दुष् (c. 10. दूषयति -यितुं), मृ (c. 10. मारयति -यितुं), विशॄ (c. 10. -शारयति -यितुं), ग्लानीकृ.

NIP, NIPPING, *s.* नखैर् अवच्छेदः or अवकृन्तनं or निकृन्तनं or कृन्तनं, हिमार्द्रीकरणं, शीतार्द्रीकरणं, हिमनाशः.

NIPPED, *p. p.* (With cold) हिमपीडितः -ता -तं, हिमार्द्रः -र्द्रा -र्द्रं, शीतार्द्रः &c., हिमदूषितः -ता -तं, हिमनाशितः &c.—(In general) पीडितः -ता -तं, मथितः &c.

NIPPERS, *s. pl.* सन्दंशः -शकं -शका, कङ्कमुखं.

NIPPLE, *s.* स्तनाग्रं, स्तनमुखं -खः, स्तनशिखा, कुचाग्रं, चूचुकः -कं, स्तनवृन्तः -न्तं, पिप्पलकं, नर्म्मठः, वृन्तं; 'the nipples,' पुरञ्छदौ *m. du.*

NIT, *s.* लिक्षा, लिक्षा, रिक्षा, दिङ्कः, यूकाण्डं.

NITRE, *s.* यवक्षारः, यवजः, तर्षः, पाक्यः, तीक्ष्णः, तीक्ष्णरसः, यवलासः, यवाग्रजः.

NITROGEN, *s.* expressed in modern treatises by the word यवक्षारकारः.

NITROUS, NITRY, *a.* यवक्षारीयः -या -यं, यवक्षारमयः -यी -यं, यवक्षारगुणकः -का -कं, यवक्षारोत्पादकः -का -कं.

NITTY, *a.* बहुलिक्षः -क्षा -क्षं, लिक्षापूर्णः -र्णा -र्णं, प्रचुरलिक्षः &c.

NIVEOUS, *a.* हिम्यः -म्या -म्यं, तुषारमयः -यी -यं, हिममयः &c.

NO, *adv.* न, नो, नहि; 'or no,' न वा.

No, *a.* (None) usually expressible by न; as, 'no one,' न कश्चित् *m.*, न काचित् *f.*, न को ऽपि *m.*, न कापि *f.*, न कश्चन *m.*, न काचन *f.*; 'no thing,' न किञ्चित्, न किमपि, न किञ्चन; 'no other,' नान्यः -न्या -न्यत्; 'no where,' न क्वचित्, न क्वापि, न कुत्रचित्, न कुत्रापि; 'no more, not again,' न पुनर्; 'no great distance,' नातिदूरं. When 'no' is privative, it is expressed by निर्, अ, वि &c. prefixed, or by हीन, शून्य, वर्जित, रहित &c. affixed; as, 'having no fruit,' निष्फलः -ला -लं, अफलः &c., विफलः &c., फलहीनः -ना -नं, &c.

Nobility, *s.* (Antiquity of family, elevation of rank) महाकुलता, कुलीनता, महाकुलीनता, सत्कुलीनता, अभिजातता, आभिजात्यं, आभिजनं, कुलोत्कर्षः, कुलोत्कृष्टता, औत्कर्ष्यं, कौलीनं, सद्वंशता, वंशोत्कर्षः.—(Elevation or greatness of mind) माहात्म्यं, महात्मता -त्वं, महिमा *m.* (न्), महत्त्वं, उदारता, औदार्य्यं, चित्तोदारता, महेच्छा, महानुभावः.—(Distinction, eminence) उत्कर्षः, उत्कृष्टता, औत्कर्ष्यं, वैशिष्ट्यं, विशिष्टता, प्रधानता -त्वं, समुन्नतिः *f.*, प्रकर्षः, शिष्टता, श्रेष्ठत्वं, सेव्यता, सुख्यातिः *f.*—(Magnificence) प्रतापः, तेजस् *n.*, श्रीः *f.*—(The nobility, noblemen collectively) कुलीनलोकः, कुलीनजनसमूहः, कुलीनजनाः *m. pl.*, शिष्टजनाः *m. pl.*, कुलीनसमूहः, राजन्यकं.

Noble, *a.* (Of ancient family, or elevated rank) कुलीनः -ना -नं, महाकुलीनः -ना -नं, महाकुलः -ला -लं, सत्कुलीनः -ना -नं, सद्वंशः -शा -शं, अभिजनवान् -वती -वत् (त्), अभिजातः -ता -तं, उत्कृष्टः -ष्टा -ष्टं, उत्कृष्टकुलजातः -ता -तं, महाकुलजः -जा -जं, महाकुलप्रसूतः -ता -तं, सत्कुलजातः -ता -तं, विशुद्धकुलभवः, वंशविशुद्धः -द्धा -द्धं, सद्वंशजातः -ता -तं, प्रधानवंशोद्भवः -वा -वं, महावंशीयः -या -यं, उत्तमवंशजातः -ता -तं, कुलश्रेष्ठी -ष्ठिनी -ष्ठि (न्), श्रेष्ठकुलोद्भूतः -ता -तं, कुलोद्गतः -ता -तं, कुलिकः -का -कं, कौलेयः -यी -यं, प्रतिपत्तिमान् &c.—(Great in mind) उदारः -रा -रं, उदारमनाः -नाः -नः (स्), उदारमतिः -तिः -ति, उदारधीः -धीः -धि, महात्मा -त्मा -त्म (न्), महामनाः &c., महामनस्कः -स्का -स्कं, माहात्मिकः -की -कं, महामतिः -तिः -ति, महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, महाशयः -या -यं, उन्नतमनाः &c.—(Distinguished, eminent, excellent) उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, अत्युत्कृष्टः &c., शिष्टः -ष्टा -ष्टं, विशिष्टः &c., उत्तमः -मा -मं, प्रमुखः -खा -खं, उन्नतः -ता -तं, समुन्नतः -ता -तं, प्रशस्तः -स्ता -स्तं, महान् -हती -हत् (त्), महाभागः -गा -गं, महाभागधेयः -या -यं, सेव्यः -व्या -व्यं.—(Illustrious) ख्यातः -ता -तं, विख्यातः -ता -तं, यशस्वी &c., महायशाः &c., श्रीमान् &c., सुप्रतिष्ठः -ष्ठा -ष्ठं, कीर्त्तिमान् &c.—(Magnificent) महाप्रतापः -पा -पं, महातेजाः &c., विभूतिमान् &c., श्रीमान् &c. 'Noble' may sometimes be expressed by ऋषभः or पुङ्गवः or व्याघ्रः or सिंहः or शार्दूलः or इन्द्रः in comp.; as, 'a noble or eminent man,' पुरुषर्षभः, पुरुषव्याघ्रः, नरपुङ्गवः, नरेन्द्रः &c.; 'a noble elephant,' गजेन्द्रः; 'noble nature,' सत्त्वं; 'noble on both sides,' मातृतः पितृतश्चाभिजनवान् &c.

Noble, nobleman, *s.* कुलीनजनः, कुलीनलोकः, शिष्टजनः, शिष्टलोकः, कुलीनपदस्थः, उच्चपदस्थः, उत्कृष्टपदस्थः, कुलश्रेष्ठी *m.* (न्), सत्कुलीनः, अभिजनवान् *m.* (त्), राजन्यः.

Noble-minded, *a.* उदारमनाः -नाः -नः (स्), उदारधीः -धीः -धि, उदारमनस्कः -स्का -स्कं, उदारचेताः &c., महात्मा -त्मा -त्म (न्), सम्भावितात्मा &c., महेच्छः -च्छा -च्छं.

Nobleness, *s.* महत्त्वं, महिमा *m.* (न्), उत्कर्षः, उत्कृष्टता, श्रेष्ठता, प्रधानता, उदारता, औदार्य्यं, उन्नतिः *f.*, समुन्नतिः. *See* Nobility.

Noblesse, *s.* कौलीन्यं, कौलीनं, कुलीनलोकः, कुलीनसमूहः, कुलीनसभा.

Nobly, *adv.* (With nobleness of birth) कुलीनं, कुलीनवत्, आभिजात्यं; 'nobly-born,' महाकुलप्रसूतः -ता -तं, सत्कुलजातः -ता -तं. *See* Noble, *a.* (With greatness of mind) सौदार्य्यं, औदार्य्येण, उदारवत्, समाहात्म्यं, माहात्म्येन, मनोमहत्त्वात्, महिम्ना, उदारचित्तत्वात्, उदारचेतसा, महेच्छया.—(Magnificently) महाप्रतापेन, महातेजसा, अतितेजसा, सप्रतापं, ऐश्वर्य्येण.

Nobody, *s.* न कश्चित् *m.*, न काचित् *f.*, न को ऽपि *m.*, न कापि *f.*, न कश्चन *m.*, न काचन *f.*

Nocent, *a.* हिंस्रः -स्रा -स्रं, हिंसालुः -लुः -लु, अपकारकः -का -कं.

Noctambulation, *s.* निद्राभ्रमणं, निद्रापरिभ्रमणं, निद्राचारः.

Noctambulist, *s.* निद्राचारी *m.* (न्), निद्राभ्रमणकृत्. *See* Night-walking.

Noctivagant, *a.* निशाचरः -रा -री -रं, नक्तञ्चारी -रिणी &c. *See* Night-walking.

Nocturnal, *a.* नैशः -शी -शं, रात्रिकालिकः -की -कं, रात्रिसम्बन्धी -न्धिनी &c., रात्रिकालसम्बन्धी &c., दोषातनः -नी -नं, प्रादोषिकः -की -कं, शार्वरः -री -रं, रात्रीयः -या -यं, निशासम्बन्धीयः -या -यं.

To nod, *v. a.* or *n.*, (Incline the head) शिरः or मस्तकं नम् (c. 1. नमति, नन्तुं, c. 10. नमयति -यितुं) or प्रणम् or अभिनम् or विनम् or आनम्.—(Make a sign by a motion of the head) मस्तकसङ्केतं कृ, शिरःसङ्केतं कृ, शिरसा सङ्केतं कृ or संज्ञां कृ or इङ्गितं कृ, शिरश् चल् (c. 10. चालयति -यितुं).

Nod, *s.* (Inclination of the head) शिरःप्रणामः, मस्तकप्रणामः, शिरःप्रणतिः *f.*—(Sign made by a movement of the head) मस्तकसङ्केतः, शिरःसङ्केतः, शिरसा सङ्केतः or संज्ञा or इङ्गितं, मस्तकसन्देशः, शिरश्चालनं.

Nodated, *a.* ग्रन्थिमान् -मती -मत् (त्), ग्रन्थिलः -ला -लं.

Noddle, *s.* मस्तकः -कं, शिरस् *n.*, शीर्षकं, मुण्डकं.

Noddy, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, निर्बुद्धिः *m.*

Node, *s.* (In surgery) अस्थिगुल्मः, अध्यस्थि *n.*—(In astronomy) पातः, उपग्रहः; 'ascending node,' राहुः *m.*, स्वर्भानुः *m.*, विधुन्तुदः, सैंहिकेयः, तमस् *n.*; 'descending,' केतुः *m.*

Nodose, *a.* ग्रन्थिलः -ला -लं, ग्रन्थी -न्थिनी -न्थि (न्), बहुग्रन्थिः -न्थिः -न्थि.

Nodosity, *s.* ग्रन्थिलत्वं, ग्रन्थिमत्त्वं, सग्रन्थित्वं, सपर्व्वत्वं, ग्रन्थिपूर्णता.

Nodule, *s.* शर्करा, पिण्डः -ण्डं, घनः, लोष्टः -ष्टं -ष्टुः *m.*

Noise, *s.* शब्दः, महाशब्दः, अतिशब्दः, ध्वनिः *m.*, महाध्वनिः *m.*, स्वनः, महास्वनः, निःस्वनः, घोषः -षणं -षणा, महाघोषः, नादः, महानादः, स्वरः, महास्वरः, उच्चैःस्वरः, उच्चस्वरः, प्रघोषकः, प्रस्वानः, निर्घोषः, निनादः, रणत्कारः, क्वणः, संह्रादः, निह्रादः, रणः, रणत्कारः, रावः, उद्रावः, कोलाहलः, रासः, रावणं, तुमुलं, ध्वनः, वणः, उत्क्रोशः.—(Public talk) जनवादः, जनप्रवादः, जनरवः, जनश्रुतिः *f.*

To noise, *v. a.* (Spread by report) घुष् (c. 10. घोषयति -यितुं), विघुष्, प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, ख्या in caus. (ख्यापयति -यितुं), आख्या, विख्या, प्रचर् (c. 10. -चारयति -यितुं), प्रकटीकृ.

Noised abroad, *p. p.* घोषितः -ता -तं, विघोषितः -ता -तं, प्रचारितः -ता -तं, प्रकाशितः -ता -तं, प्रकटितः &c., प्रकटीकृतः &c., आख्यातः &c.

Noiseful, *a.* शब्दकारी -रिणी &c., ध्वनयन् -यन्ती -यत् (त्). *See* Noisy.

Noiseless, *a.* निःशब्दः -ब्दा -ब्दं, निश्शब्दः &c., अशब्दः &c., अघोषः -षा -षं, नीरवः -वा -वं, अरवः -वा -वं, शब्दहीनः -ना -नं.

Noiselessly, *adv.* शब्देन विना, अशब्देन, निःशब्दं, निश्शब्दं.

Noisily, *adv.* महाशब्देन, अतिशब्देन, महास्वरेण, उच्चैःस्वरेण.

NOISINESS, *s.* महाशब्दकत्वं, महाशब्दः, महाशब्दकारित्वं, महाध्वनिः *m.* -निता, महानादः -दता, शब्दकारिता, शब्दवत्त्वं, सशब्दता, शब्दनत्वं.

NOISOME, *a.* (Noxious, destructive) मारकः -का -कं, मारात्मकः &c., प्राणनाशकः &c., मृत्युजनकः &c., क्षयकरः -रा -रं, विनाशकः &c., प्राणहरः -रा -रं, नृशंसः -सा -सं, शरारुः -रुः -रु, शातकः -का -कं, घातुकः -का -कं, बाधकः &c., अनिष्टजनकः &c., अहितकारी -रिणी &c.—(Offensive to the smell) दुर्गन्धः -न्धा -न्धं, दुर्गन्धी -न्धिनी -न्धि (न्), पूतिगन्धिकः -का -कं, कुत्सितः -ता -तं.

NOISOMENESS, *s.* दुर्गन्धः, -त्वं, दौर्गन्ध्यं *m.*, पूतिगन्धता, कुत्सितगन्धः, उग्रगन्धता, पूतिः *f.*, कुत्सितत्वं, कौत्सित्यं.

NOISY, *a.* शब्दकारः -री -रं, महाशब्दकारः -री -रं, महाशब्दकः -का -कं, महाशब्दी -ब्दिनी -ब्दि (न्), महास्वनः -ना -नं, महाध्वनिकः -का -कं, महाध्वनिकरः -री -रं, महानादी &c., महानादः -दा -दं, महास्वरकः -का -कं, अतिशब्दनः -ना -नं, अतिशब्दवान् -वती -वत् (त्), तुमुलकारी &c., तुमुलः -ला -लं, कोलाहलकारी &c. कोलाहलकृत् *m.f.n.*, घोररवः -वा -वं, मुखरः -रा -रं.—(Clamorous) घोषणः -णा -णं, घोषकरः -री -रं, महाघोषः -षा -षं, बहुघोषः -षा -षं.—(Sounding) शब्दनः -ना -नं, नादी &c., स्वनवान् &c., संह्रादी &c., स्वनन् -नन्ती -नत् (त्), ध्वनयन् &c.

NOMAD, NOMADIC, *a.* प्रचारानुसारवासी -सिनी &c., पशुचारणानुजीवी.

NOMENCLATOR, *s.* नामस्थापकः, नामबोधकः, नामख्यापकः.

NOMENCLATURE, *s.* शब्दसङ्ग्रहः, शब्दजालं, शब्दमाला, निघण्टुः *m.*

NOMINAL, *a.* (Pertaining to a name) नामसम्बन्धी -न्धिनी &c., नामविषयः -या -यं.—(Relating to words) शाब्दः -ब्दी -ब्दं, शाब्दिकः -की -कं, वाचनिकः -की -कं, आभिधानीयकः -की -कं.—(Existing in name only) नामधारी -रिणी &c., नाममात्रधारी &c., नामभृत् *m.f.n.*, शब्दः -ब्दी -ब्दं, शाब्दिकः &c.—(Nominal verb). The grammatical symbol is लिपु.

NOMINALLY, *adv.* नामतस्, नाम्ना, नाममात्रेण, शब्दतस्, शब्दमात्रेण.

To NOMINATE, *v. a.* (Give a name) नाम कृ or दा, संज्ञां कृ or दा.—(Designate by name) नाम निर्दिश् (c. 6. -दिशति -देष्टुं) or प्रदिश्.—(Appoint by name to an office) नाम निर्दिश्य नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or परिकॢप् (c. 10. -कल्पयति -यितुं) or प्रकॢप्.

NOMINATED, *p. p.* नामनिर्देशानन्तरं नियुक्तः -क्ता -क्तं or नियोजितः -ता -तं.

NOMINATION, *s.* (Act) नामनिर्देशानन्तरं नियोगः or नियोजनं.—(Power of nominating or appointing) नियोजनाधिकारः.

NOMINATIVE, *s.* (Case in grammar) कर्त्ता *m.* (र्तृ), कर्तृकारकः, कर्तृवाचकः, प्रथमा, प्रथमा विभक्तिः.

NOMINATOR, *s.* नियोजकः, नामनिर्देशपूर्वं नियोजयिता *m.* (तृ), निर्देशकः.

NOMINEE, *s.* नियोजितः, नियुक्तः, अधिकृतः.

NON. A prefix expressed in Sanskrit by अ or अन्.

NON-ACCEPTANCE, *s.* अपरिग्रहः, अग्रहणं, अप्रतिग्रहः, अस्वीकारः.

NONAGE, *s.* बाल्यं, बालदशा, व्यवहारायोग्यता, अप्राप्तव्यवहारत्वं.

NONAGENARIAN, *a.* दशमी *m.* (न्), दशमीस्थः, दशमीकृतः.

NON-APPEARANCE, *s.* अदर्शनं, अनुपस्थानं, अनुपस्थितिः *f.*, अविद्यमानता.

NON-ARRIVAL, *s.* अनागमः -मनं, अनभिगमनं, अनुपस्थानं.

NON-ATTAINMENT, *s.* अप्राप्तिः *f.*, अलाभः, अलब्धिः *f.*, अनवाप्तिः *f.*

NON-ATTENDANCE, *s.* अदर्शनं, दर्शनाभावः, अनुपस्थानं. *See* NON-APPEARANCE.

NON-ATTENTION, *s.* अनवधानं -नता, अनवहितत्वं, अलक्ष्यं.

NONCE, *s.* प्रयोजनं, अवसरः, वारः, समयः, उपयोगः.

NONCHALANCE, *s.* निरुत्सुकता, उदासीनता, जडता, अनपेक्षा, अनास्था.

NONCHALANT, *a.* निरुत्सुकः -का -कं, उदासीनः -ना -नं, अनपेक्षः -क्षा -क्षं, निरपेक्षः &c., जडः -डा -डं, अनभिलाषः -षा -षं, निःस्पृहः -हा -हं.

NON-COMMENCEMENT, *s.* अनारम्भः, अनारब्धिः *f.*, अनुपक्रमः.

NON-COMMISSIONED, *a.* अनधिकारवान् -वती -वत् (त्), अपदयुक्तः -क्ता -क्तं.

NON-COMPLIANCE, *s.* अननुरोधः -धनं, अस्वीकारः, अननुवृत्तिः *f.*

NON-CONDUCTOR, NON-CONDUCTING, *a.* अवाहकः -का -कं, अप्रापकः -का -कं, अनायकः -का -कं, अनेता -त्री -तृ (तृ).

NON-CONFORMIST, *s.* अननुरोधी *m.* (न्), अननुवर्त्ती *m.*, अननुसारी *m.*, अननुयायी *m.*, अननुकूलः.—(Dissenter from the established church) देशस्थापितधर्म्मविरोधी *m.* (न्), साधारणधर्म्मविरोधी *m.*, देशस्थापितधर्म्मविसम्मतः, मतान्तरावलम्बी *m.*, मतान्तरग्राही *m.*, मतान्तरधारी *m.*

NON-CONFORMITY, *s.* अननुरोधः -धनं, अननुवर्त्तनं, अननुसरणं, अस्वीकारः.—(Dissent) देशस्थापितधर्म्मविरोधः, देशस्थापितधर्म्मासम्मतिः *f.*, मतान्तरावलम्बनं, मतान्तरं.

NON-CONTACT, *s.* अस्पर्शः, असम्पर्कः, अस्पृष्टिः *f.*, असंसर्गः.

NON-DELIVERY, *s.* असमर्पणं, अप्रतिपादनं, अप्रदानं, असम्प्रदानं.

NONDESCRIPT, *a.* अवर्णितः -ता -तं, अवर्णनीयः -या -यं, अलक्षणः -णा -णं.

NONE, *a.* न कश्चित् *m.*, न काचित् *f.*, न किञ्चित् *n.*, न कोऽपि, न कापि *f.*, न किमपि *n.*, न कश्चन *m.*, न काचन *f.*, न किञ्चन *n.*, often expressed by न with another word; as, 'none other,' नान्यः -न्या -न्यत्.—(Not the least portion, not any, none at all) न किञ्चिदपि, न किमपि, न कियदपि, न सूक्ष्ममपि, न स्तोकमपि, न लेशमपि, न मनागपि, अल्पेशं, अलेशमपि, अलवलेशं.

NON-ELECT, *a.* अवृतः -ता -तं, अवृतः -ता -तं, अनुद्धृतः -ता -तं.

NON-ENJOYMENT, *s.* अभोगः, असम्भोगः, अनुपभोगः, अभुक्तिः *f.*

NONENTITY, *s.* (Non-existence) अभावः, असम्भवः, अभवः, असद्भावः, असत्त्वं, असत्ता, नास्तित्वं, नास्ति ind., अजीवः, अजीवित्वं, अजीवनिः *f.*, असत्ता -त्वं, अवर्त्तमानता, अवृत्तिता, अविद्यमानता, शून्यता.—(A nonentity) अपदार्थः, असत्पदार्थः, अलीकपदार्थः, अवस्तु *n.*, असद्वस्तु *n.*, असम्भवं, शून्यं.

NONES, *s. pl.* रोमीयपञ्जिकायां मासस्य पञ्चमो or सप्तमो दिवसः.

NONESSENTIAL, *a.* अनावश्यकः -की -कं, कर्त्तव्याकर्त्तव्यः -व्या -व्यं, कार्य्याकार्य्यः -र्य्या -र्य्यं, कृताकृतः -ता -तं, अनान्तरीयकः -का -कं.

NON-EXISTENCE, *s.* अभावः, असम्भवः, असद्भावः, नास्तित्वं. *See* NONENTITY.

NON-EXISTENT, *a.* अवर्त्तमानः -ना -नं, अविद्यमानः -ना -नं, असन् -सती -सत् (त्), असम्भवः -वा -वं, असम्भूतः -ता -तं, अभूतः -ता -तं, निःसत्त्वः -त्त्वा -त्त्वं, अध्रियमाणः -णा -णं.

NON-OBSERVANCE, *s.* अपालनं, अप्रतिपालनं, अरक्षणं, असेवनं.

NON-PAREIL, *a.* अनुपमः -मा -मं, अप्रतिमः &c., अद्वितीयः -या -यं.

NON-PERFORMANCE, *s.* अननुष्ठानं, अविधानं, अकरणं, अकर्म्म *n.* (न्).

NON-PLUS, *s.* अनुपायः, अगतिः *f.* -तित्वं, निरुपायत्वं, गतिहीनता, निरुत्तरत्वं, अनुत्तरत्वं, मोहः, व्यस्तता, कुण्ठता.

To NON-PLUS, *v. a.* निरुत्तरीकृ, अनुत्तरीकृ, निरुपायीकृ, गतिहीनं -नां कृ, मुह् (c. 10. मोहयति -यितुं), व्याकुलीकृ.

NON-PLUSED, *p. p.* निरुपायः -या -यं, गतिहीनः -ना -नं, उपायहीनः, निरुत्तरः -रा -रं, अनुत्तरः &c., हतोत्तरः &c., कुण्ठितः -ता -तं.

NON-RESIDENCE, *s.* अवसतिः *f.*, अवासः, अनिवसनं, अनिवासः, अनवस्थितिः *f.*

NON-RESIDENT, *a.* अवासी -सिनी -सि (न्), स्वस्थानावासी &c., अनवस्थितः &c.

NON-RESISTANCE, *s.* अप्रतीकारः, अप्रतिक्रिया, अप्रतिरोधः, अनिवारणं.

NON-RESUMPTION, *s.* अपुनरादानं, अपुनर्हरणं, अनपकर्म्म *n.* (न्).

NONSENSE, *s.* अनर्थकं, आनर्थक्यं, अनर्थकवाक्यं, अनर्थकभाषणं, निरर्थकवाक्यं, अबद्धं, असम्बद्धं, अवध्यं, असम्बद्धवाक्यं, अनिबद्धवाक्यं, असम्बद्धकथा, वृथाकथा, मृषार्थकं, अयाथार्थ्यं, जल्पितं, प्रलपितं, प्रलापः, अनर्थः, अर्थहीनवचनं; 'talking nonsense,' असम्बद्धप्रलापी -पिनी -पि (न्), अनिबद्धप्रलापी &c., अनर्थकवक्ता -क्त्री -क्तृ (क्तृ), जल्पकः -का -कं, जल्पाकः -का -कं, वाचालः -ला -लं, वाचाटः -टा -टं, बहुगर्ह्यवाक् *m.f. n.*

NONSENSICAL, *a.* अनर्थकः -का -कं, निरर्थकः -का -कं, अनर्थः -र्था -र्थं, अर्थहीनः -ना -नं, अर्थशून्यः -न्या -न्यं, अर्थरहितः -ता -तं, मृषार्थकः &c., वृथार्थकः &c., असम्बद्धः -द्धा -द्धं, असम्बद्धार्थः -र्था -र्थं, अबद्धः &c., अनिबद्धः &c., असङ्गतः -ता -तं, अयथार्थः -र्था -र्थं, अयुक्तिकः -का -कं, अभिधेयरहितः -ता -तं.

NONSENSICALLY, *adv.* निरर्थकं, आनर्थक्यं, असम्बद्धं, वृथा, मृषा.

NONSENSICALNESS, *s.* अनर्थकता, निरर्थकता, आनर्थक्यं, अर्थहीनता, अर्थाभावः, असङ्गतता, असम्बद्धता, अयाथार्थ्यं, अयुक्तिः *f.*

NON-SOLUTION, *s.* अलापनं, अव्याख्या -ख्यानं, अपरिशोधनं, अलापनिका.

NON-SUITED, *p.p.* अवसन्नः -न्ना -न्नं, अवसादितः -ता -तं, हीनः -ना -नं, अर्थाद्धीनः -ना -नं, हीनवादः -दा -दं, नष्टवादः -दा -दं, हतवादः; 'to be non-suited,' अर्थाद् हा in pass. (हीयते), अवसद् (c. 1. -सीदति -सत्तुं), नष्टवादः -दा -दं भू.

NON-SUPERINTENDENCE, *s.* अनधिष्ठानं, अनधिष्ठितिः *f.*, अनधिष्ठातृत्वं, अनधिकारः.

NOODLE, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, जडधीः *m.*

NOOK, *s.* कोणः, अस्रः, आरं, विविक्तस्थानं, गुप्तस्थानं.

NOON, NOON-DAY, NOON-TIDE, *s.* मध्याह्नः, मध्याह्नकालः, दिनमध्यं, दिवसमध्यं, दिवामध्यं, मध्यन्दिनं, उद्दिनं.

NOON, NOON-DAY, *a.* माध्याह्निकः -की -कं, माध्यन्दिनः -नी -नं.

NOOSE, *s.* पाशः, पाशबन्धः -न्धं -न्धनं, वागुरा, उन्मायः, कूटपाशः; 'for the neck,' गलपाशः; 'number of nooses,' पाश्या.

To NOOSE, *v. a.* पाश (nom. पाशयति -यितुं), पाशीकृ, पाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाशे or उन्माये पत् (c. 10. पातयति -यितुं).

NOOSED, *p.p.* पाशितः -ता -तं, पाशीकृतः &c., पाशबद्धः -द्धा -द्धं.

NOR, *adv.* न, न च, sometimes expressed by the prohibitive मा, or sometimes simply by वा in conjunction with a negative. *See* NEITHER, *conj.*

NORMAL, *a.* (Regular) वैधिकः -की -कं, यथाविधिः -धिः -धि, यथाक्रमः -मा -मं.—(Relating to rudiments, teaching rudiments) मूलविद्यासम्बन्धी -न्धिनी &c., विद्योपक्रमसम्बन्धी &c., विद्यारम्भोपदेशकः -का -कं, मूलविद्याशिक्षकः -का -कं.

NORTH, *s.* उत्तरा, उत्तरदिक् *f.* (श्), उत्तरदिशा, उत्तराशा, उदीची, कौवेरी, सौम्या. Kuvera, according to the Hindús, is the Regent of the North.

NORTH, *a.* उत्तरः -रा -रं, उत्तरस्थः -स्था -स्थं, उदीचीनः -ना -नं, उदङ् -दीची -दक् (च्), कौवेरः -री -रं; 'north-road,' उत्तरापथः; 'north-country,' उदीच्यः.

NORTH-EAST, *s.* प्रागुत्तरा, प्रागुदीची, पूर्वोत्तरं -रा, ऐशानी, अपराजिता; 'north-eastwards,' प्रागुत्तरेण, पूर्वोत्तरेण; 'north-east of the city,' प्रागुत्तरेण नगरात्.

NORTH-EAST, NORTH-EASTERLY, NORTH-EASTERN, *a.* प्रागुत्तरः -रा -रं, पूर्वोत्तरः -रा -रं, प्रागुदङ् -दीची -दक् (च्), प्रागुदीचीनः -ना -नं, प्रागुत्तरस्थः -स्था -स्थं, पूर्वोत्तरस्थः &c.

NORTHERLY, NORTHERN, *a.* उत्तरदिश्यः -श्या -श्यं, उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरसम्बन्धी -न्धिनी -न्धि (न्); 'in a northerly direction,' उत्तरदिशि.

NORTH-POLE, NORTH-STAR, *s.* ध्रुवः, मेरुः *m.*, औत्तानपादिः *m.*

NORTHWARD, *a.* उत्तरदिश्यः -श्या -श्यं, उत्तरदिक्स्थः -स्था -स्थं, उदङ्मुखः -खी -खं, उत्तरस्थः -स्था -स्थं.

NORTHWARDS, *adv.* उत्तरेण -रात्, उत्तरतस्, उत्तरदिशि, उत्तरत्र.

NORTH-WEST, *s.* वायवी, वायुकोणः, वायुदिशा.

Out, *adv.* (Without, not in) बहिस्, निर्, वि, विनिर्, अप prefixed, governing the abl. c.; 'to go out,' बहिर्गम्, निर्गम्, विनिर्गम्, अपगम्; 'to draw out,' निष्कृष्; 'to be out,' बहिर्भू; 'having gone out into the open air,' प्रकाशं निर्गत्य.—(Denoting disclosure or discovery) expressed by the prep. वि, अप, प्र, परि, नि, निर्, अव &c., in combination with various roots; as, 'to give out,' प्रकाश्, विकाश्, निविद्, विघुष्; 'to find out,' परिज्ञा, अभिज्ञा, निरूप्, उपलभ्, निर्णी; 'to be out, be disclosed,' विवृतः -ता -तं भू, प्रकाशितः -ता -तं भू; 'the secret is out,' रहस्यं भिन्नं or विभिन्नं or प्रकाशितं.—(Denoting extinction) expressed by निर्, with the root वा; as, 'to put out,' निर्वा in caus.; 'to go out,' निर्वा, निर्वाणः -णा -णं भू.—(In a state of exhaustion or being empty) क्षीणः -णा -णं, परिक्षीणः -णा -णं, शून्यः -न्या -न्यं, गतः -ता -तं, विगतः -ता -तं.—(Out of employment) क्षीणवृत्तिः -त्तिः -त्ति, निर्व्यापारः -रा -रं, अव्यापारी -रिणी &c., व्यापारशून्यः -न्या -न्यं.—(Out of office) अधिकारभ्रष्टः -ष्टा -ष्टं, भ्रष्टाधिकारः -रा -रं, च्युताधिकारः &c.—(To the end) अवसानपर्य्यन्तं, अन्तं or शेषं यावत्, आद्यन्तं; 'hear me out,' मद्वचनम् अवसानपर्य्यन्तं शृणु.—(Loudly) उच्चैस्, उच्चैःस्वरेण, मुक्तकण्ठं; 'to speak out,' उच्चैःस्वरेण वद्.—(Openly) प्रकाशं, व्यक्तं, प्रकटं.—(In error) अपराद्धः -द्धा -द्धं, भ्रान्तः -न्ता -न्तं, सापराधः -धा -धं.—(Deficient) न्यूनः -ना -नं, क्षीणः -णा -णं.—(Out of, in the sense of from) usually expressed by the abl. c. alone, or in combination with a root and some of the prep. बहिस्, निर्, विनिर्, अप &c. *See* From. (Out of, in the sense of beyond) expressed by अति prefixed; as, 'out of one's power,' अतिशक्ति; 'out of the power of man,' अतिमानुषः -षी -षं; 'to pass out of one's sight,' चक्षुर्विषयम् अतिक्रम्; or by the fut. pass. part.; as, 'out of one's power,' अशक्यः -क्या -क्यं, असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं; 'out of one's reach,' अपारणीयः -या -यं, अपार्य्यः -र्य्या -र्य्यं, अप्राप्यः -प्या -प्यं, अविषयः -या -यं, विषयातिक्रान्तः -न्ता -न्तं; or by अगोचर in comp.; as, 'out of hearing,' कर्णागोचरः -रा -रं.—(Out of, denoting exclusion, cessation, deviation from, omission, absence, dereliction, &c.) variously expressed by अ, निर्, वि, अप, गत, विगत, अतीत, [illegible] विरुद्धः &c., as, 'out of use,' अव्यवहारितः -ता -तं; 'out of tune,' विस्वरः -रा -रं, अस्वरः &c.; 'out of fashion,' [illegible] -द्धा -द्धं, 'out of time,' गतकालिकः -का -कं; 'out of season,' [illegible] -ला -लं, अकालिकः &c.; 'out of the road,' त्यक्तमार्गः -र्गा -र्गं, पथभ्रष्टः &c.; 'out of one's mind,' बुद्धिभ्रष्टः &c., हतबुद्धिः &c., नष्टबुद्धिः &c.; 'out of order,' विधिविरुद्धः &c., विधिघ्नः -घ्नी -घ्नं, अयथाविधिः &c., विसूत्रः -त्रा -त्रं; 'out of place,' अस्थानः -ना -नं; 'out of health,' अस्वस्थः -स्था -स्थं; 'out of hope,' निराशः -शा -शं; 'out of patience,' अक्षमः -मा -मं.—(Out of, denoting in consequence of) expressed by the abl. c., as, 'out of anger,' कोपात्; 'out of unsteadiness of mind,' अस्थिरचित्तत्वात्.—(Out of hand) सद्यस्, तत्काले, तत्क्षणे. *See* Immediately.

Out, *interj.* (Out upon you, out upon it) अपेहि, दूरमपसर, अपेहि, अपसर, धिक्, छी.

To out-act, *v. n.* अतिचर् (c. 1. -चरति -रितुं), कर्म्मणा or कार्य्येण अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अधिकं कृ.

To out-balance, *v. a.* *See* *To* outweigh.

To outbid, *v. a.* अधिकमूल्यं दित्सामीति or दातुमिच्छामीति वद् (c. 1. वदति -दितुं).

Outbidder, *s.* अधिकमूल्यदित्सुः *m.*, अधिकमूल्यं दित्सामीति वादी *m.* (न्).

To outbrave, *v. a.* अधिकं भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), अधिकभर्त्सनेन पराभू.

Outbreak, *s.* उद्भेदः, प्रोद्भेदः, स्फोटः -टनं, सवेगो निर्गमः.

Outcast, *a.* or *s.* (Expelled from society or one's own class or caste) जातिभ्रष्टः -ष्टा -ष्टं, जातिबहिष्कृतः -ता -तं, जातिबाह्यः -ह्या

-र्णं, जातिहीनः -ना -नं, हीनजातिः -तिः -ति, जातिपतितः -ता -तं, वर्णभ्रष्टः &c., वर्णहीनः &c., हीनवर्णः -र्णा -र्णं, वर्णापेतः -ता -तं, पंक्तिबाह्यः &c., अपांक्तः -क्ती -क्तं, अपांक्तेयः -या -यं, पंक्तिदूषकः -का -कं, पतितः -ता -तं, लोकबाह्यः &c., प्रस्खलः -ला -लं, व्रात्यः -त्या, जुङ्गितः -ता.—(Of a degraded or low caste or class) चाण्डालः -ली, चण्डालः -ली, अपसदः, विवर्णः -र्णा -र्णं, नीचः -चा -चं, निहीनः -ना -नं, नीचजातिः -तिः -ति, न्यग्जातिः &c., अन्त्यजातीयः -या -यं, अधमजातीयः &c., अधमवर्णः &c., अधमाचारः -रा -रं, दुराचारः &c., दुर्वृत्तः -त्ता -त्तं, आचारहीनः &c., आचारवर्जितः -ता -तं, पृथग्जनः, पामरः, जाल्मः.

Outburst, *s.* उद्भेदः, प्रोद्भेदः. *See* Outbreak, Eruption.

Outcry, *s.* (Clamor, loud cry) कोलाहलः, उत्क्रोशः, उत्क्रुष्टं, उच्चैःस्वरः, उच्चैर्घुष्टं, संहूतिः *f.*, बहुभिः कृता संहूतिः, चित्कारः, चीत्कारः, कलकलः, तुमुलं; 'popular outcry,' लोकापवादः, जनापवादः, लोकरवः, जनरवः, जनरावः.—(Cry of pain) आर्त्तनादः.

To **outdo**, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -रितुं), अतिशी (c. 2. -शेते -शयितुं), अतिरिच् in pass. (-रिच्यते), अभिभू. *See To* surpass.

Out-door, *a.* द्वारबहिःस्थः -स्था -स्थं, द्वारबहिर्भूतः -ता -तं.

Outer, outermost, *a.* बहिःस्थः -स्था -स्थं, बाह्यः -ह्या -ह्यं, बहिर्भूतः -ता -तं, बहिर्भवः -वा -वं, बहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), बाहीकः -का -कं, बहिर्भागस्थः &c., बहिस् in comp.; as, 'outer part,' बहिर्भागः; 'outer door,' बहिर्द्वारं. *See* Outmost.

Outfit, *s.* (Equipment for a voyage, &c.) सज्जा, सम्भारः, सोपकारद्रव्यसम्भारः, सम्भृतिः *f.*, सामग्री -ग्र्यं, उपकरणसामग्री, परिच्छदः, परिच्छदसामग्री, सन्नाहः.—(Of a ship) नौकासज्जा.

To **outgo**, *v. a.* अतिगम् (c. 1. -गच्छति -गन्तुं), अती (c. 2. अत्येति -तुं, rt. इ), अतिचर् (c. 1. -चरति -रितुं), अतिक्रम (c. 1. -क्रामति -क्रमितुं).

Outgoing, *s.* (Expenditure) व्ययः, अपव्ययः, अपचयः, उपक्षयः, विनियोगः, अपहारः; 'incomings and outgoings,' आयव्ययौ *m.* du.

To **outgrow**, *v. a.* अतिवृध् (c. 1. -वर्धते -र्धितुं), अधिकं वृध्, अतिशयवृद्धिं कृ, अधिकवृद्धिं कृ, अधिकवर्धनं कृ.

Out-house, *s.* बाह्यगृहं, बहिर्गृहं, बहिःस्थगृहं, उपगृहं.

Outlandish, *a.* (Foreign) विदेशीयः -या -यं, वैदेशिकः -की -कं, अन्यदेशीयः &c., विदेशजः -जा -जं, दूरदेशीयः -या -यं, परदेशीयः &c., दूरदेशवासी -सिनी -सि (न्), दूरवासी &c.—(Rustic, barbarous) ग्रामीयः &c., ग्राम्यः -म्या -म्यं, असभ्यः -भ्या -भ्यं, अशिष्टः -ष्टा -ष्टं, असंस्कृतः -ता -तं.

Outlaw, *s.* व्यवहारबाह्यः, न्यायरक्षणबहिःस्थः, राजरक्षणबाह्यः, धर्म्मबहिःस्थः, पाषण्डः.

To **outlaw**, *v. a.* धर्म्मद्वाराद् बहिष्कृ, धर्म्माद् बहिष्कृ, न्यायद्वाराद् बहिष्कृ, व्यवहारबाह्यं -ह्यां कृ, धर्म्मबाह्यं -ह्यां कृ.

Outlawed, *p. p.* धर्म्मद्वारबहिष्कृतः -ता -तं, न्यायरक्षणबहिष्कृतः -ता -तं, व्यवहारबहिर्भूतः -ता -तं, राजरक्षणबहिर्भूतः &c.

Outlawry, *s.* न्यायरक्षणबहिष्करणं, व्यवहारबहिष्करणं, राजरक्षणबहिष्करणं, धर्म्मबहिष्करणं, धर्म्मद्वारबहिष्करणं.

Outlay, *s.* व्ययः, अपव्ययः, धनव्ययः, अपचयः, उत्सर्गः, धनोत्सर्गः, धनत्यागः, क्षयः, उपक्षयः. *See* Expenditure.

Outlet, *s.* द्वारं, निर्गमद्वारं, मुखं, निर्गममार्गः, निर्गमपथः, निर्गमः; 'having a hundred outlets,' शतमुखः -खा -खं.

Outline, *s.* (Exterior line) बाह्यरेखा, बहिर्लेखा.—(Slight sketch of a figure or subject) पाण्डुलेख्यं, पाण्डुरेखा, पाण्डुलेख्यमात्रं, आलेख्यं, लघ्वालेख्यं, वस्तुमात्रं, वस्तु *n.*, आकारः.—(Of a picture) चित्रारम्भः.

To **outline**, *v. a.* बाह्यरेखामात्रं लिख् (c. 6. लिखति, लेखितुं), पाण्डुलेख्यं कृ, पाण्डुरेखाम् अङ्क् (c. 10. अङ्कयति -यितुं).

To **outlive**, *v. a.* अतिजीव् (c. 1. -जीवति -वितुं), अधिककालं जीव्, दीर्घतरकालं जीव्, धृ (c. 6. ध्रियते, धर्त्तुं), ध्रियमाणः -णा -णं भू.

Outlying, *a.* बहिःस्थः -स्था -स्थं, बहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्).

To **outmarch**, *v. a.* अतिया (c. 2. -याति -तुं), अतिव्रज् (c. 1. व्रजति -जितुं), अतिगम् (c. 1. -गच्छति -गन्तुं), शीघ्रतरयात्रां कृ, अग्रे या or यात्रां कृ.

Outmost, *a.* अतिबहिःस्थः -स्था -स्थं, अतिबाह्यः -ह्या -ह्यं, मध्यातिदूरस्थः &c. *See* Outer.

To **outnumber**, *v. a.* अधिकसंख्यकः -का -कं भू or अस्, बहुतरसंख्यः -ख्या -ख्यं भू, अधिकीभू, बहुतरीभू.

Outpost, *s.* उपरक्षणं, बहिःस्थं सैन्यस्थानं or सैनिकस्थानं.

To **outpour**, *v. a.* उत्सिच् (c. 6. -सिञ्चति -सेक्तुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं).

Outpouring, *s.* उत्सेकः, उत्सेचनं, अवसेचनं, उत्सर्गः, मोक्षणं.

To **outrage**, *v. a.* अभिद्रुह् (c. 4. -द्रुह्यति -द्रोहितुं -द्रोग्धुं), द्रुह्, धृष् (c. 10. धर्षयति -यितुं), प्रधृष्, उपद्रवं कृ, उपमर्दनं कृ, साहसं कृ, प्रमथ् (c. 1. -मथति -थितुं, c. 10. -माथयति -यितुं), प्रमाथं कृ, पारुष्यं कृ, उपघातं कृ, बलात्कारं कृ, न्यक्कृ, अवलेपं कृ, अत्याहितं कृ, दुष् (c. 10. दूषयति -यितुं).

Outrage, *s.* साहसं, महासाहसं, अतिसाहसं, अभिद्रोहः, द्रोहः, प्रमाथः, धर्षः -र्षणं, उपमर्दः, अत्याहितं, उपद्रवः, उपघातः, बलात्कारः, अवलेपः, न्यक्कारः, न्यक्करणं, उद्रेकः, उत्सेकः, अत्ययः, अत्याचारः, उत्पातः, अतिक्रमः, मर्य्यादातिक्रमः, अन्यायः.

Outraged, *p. p.* धर्षितः -ता -तं, प्रधर्षितः -ता -तं, अभिद्रुग्धः -ग्धा -ग्धं, प्रमाथितः -ता -तं, कृतसाहसः -सा -सं, उपमर्दितः -ता -तं, कृतोपद्रवः -वा -वं, न्यक्कृतः -ता -तं, अत्ययितः &c.

Outrageous, *a.* अतिसाहसिकः -की -कं, अतिसाहसी -सिनी -सि (न्), अतिसाहसकर्म्मा -र्म्मा -र्म्म (न्), उग्रः -ग्रा -ग्रं, अत्युग्रः &c., उच्चण्डः -ण्डा -ण्डं, अत्याचारी &c., प्रमाथी &c., राक्षसी &c., राक्षसकर्म्मा &c., राक्षसः -सी -सं, राक्षसयोग्यः -ग्या -ग्यं, दारुणः -णा -णं, घोरः -रा -रं, अतिदुष्टः -ष्टा -ष्टं, अतिदुराचारः &c.

Outrageously, *adv.* अतिसाहसपूर्व्वं, अतिसाहसं कृत्वा, अत्युग्रं, उपद्रवपूर्व्वं, सोपद्रवं, दारुणं, अतिदारुणं, घोरं, अतिदुष्टं, अत्याचारपूर्व्वं.

Outrageousness, *s.* अतिसाहसिकत्वं, अत्युग्रता, दारुणता, घोरता, अतिदुष्टता -त्वं, राक्षसयोग्यता, उत्सिक्तता.

Outré, *a.* अतिमर्य्यादः -दा -दं, लोकव्यवहारविरुद्धः -द्धा -द्धं.

To **outreach**, *v. a.* अतिगम् (c. 1. -गच्छति -गन्तुं), अतिक्रम् (c. 1. -क्रामति -क्रमितुं).

Outrider, *s.* अश्वारूढः परिचरः or अनुचरः or परिधिस्थः.

Outright, *adv.* (At once) सद्यस्, तत्काले, तत्क्षणे, सपदि, सम्प्रति, झटिति, अविलम्बितं.—(Completely) सु or अति prefixed, सर्व्वतस्, सम्यक्, अखिलेन, आमूलं, साद्यन्तं.—(Plainly) सुव्यक्तं, सुस्पष्टं, अवक्रं.

To **outroot**, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उत्पट् (c. 10. -पाटयति -यितुं). *See To* eradicate.

To **outrun**, *v. a.* अतिधाव् (c. 1. -धावति -वितुं), पश्चात् त्यक्त्वा पूर्व्वं or अग्रे धाव् or पूर्व्वम् उपस्था (c. 1. -तिष्ठति -स्थातुं).

Outset, *s.* आरम्भः, प्रारम्भः, प्रथमारम्भः, आगमः, उपक्रमः, प्रक्रमः, आदिः *m.*, उपोद्घातः; 'at the very outset,' प्रथमारम्भे, आदौ, आदावेव, प्रथमदर्शनात्; 'the outset and termination,' आगमनिर्गमौ *m.* du., आद्यन्तं.

To OUTSHINE, *v. a.* अतिरुच् (c. 1. -रोचते -ति -चितुं), अधिकं प्रकाश् (c. 1. -काशते -शितुं) or शुभ् (c. 1. शोभते -भितुं), अधिकप्रभां दा, अधिकशोभां दा, अधिकतेजो दा, अधिकप्रकाशं दा; 'the sun outshines the moon,' सूर्य्यश् चन्द्रम् अतिरोचति तेजसा.

OUTSIDE, *s.* (The exterior) वहिर्भागः, वाह्यभागः, उपरिस्थभागः; 'on the outside,' वहिर्भागे, वहिस्.—(Outer side of an enclosure, &c.) वहिःप्रदेशः, वहिर्देशः.—(The utmost limit) परमावधिः *m.*, उत्तमावधिः *m.*

OUTSIDE, *adv.* (On the outside of) वहिस्, वहिर्भागे, अन्तरं -रेण; 'outside the fort,' दुर्गाद् अन्तरं or अन्तरेण.

OUTSIDE, *a.* वहिस् in comp., वाह्यः -ह्या -ह्यं, वहिःस्थः -स्था -स्थं.

OUTSKIRT, *s.* उपान्तः -न्तं, पर्य्यन्तः -न्तं, समन्तः, अन्तः -न्तं, प्रान्तः, सीमा, सीमाप्रदेशः, उत्सङ्गः, परिसरः, धारः; 'of a town,' नगरोपान्तं, नगरप्रान्तः, नगरपरिसरः; 'of a village,' ग्रामान्तः, उपकण्ठं, उपशल्यं; 'of a wood,' वनान्तः, वनधारः.

To OUTSPREAD, *v. a.* विस्तृ (c. 10. -स्तारयति -यितुं), विसृ (c. 10. -सारयति -यितुं), प्रसृ, विततीकृ.

OUTSPREAD, *p.p.* विततः -ता -तं, प्रविततः &c., विस्तारितः -ता -तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, प्रसारितः &c., विसारितः &c.

OUTSTANDING, *a.* अशोधितः -ता -तं, असिद्धः -द्धा -द्धं, असाधितः -ता -तं.

To OUTSTARE, *v. a.* अधिकप्रागल्भ्येन निरीक्ष्य लज्जां गम् (c. 10. गमयति -यितुं), प्रगल्भजनम् अधिकप्रागल्भ्येन निरीक्ष् (c. 1. -ईक्षते -क्षितुं).

To OUTSTRETCH, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), प्रग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

OUTSTRETCHED, *p.p.* प्रसारितः -ता -तं, प्रसृतः -ता -तं, उच्छ्रितः &c., अभ्युच्छ्रितः &c.; 'with outstretched neck,' उद्ग्रीवः -वा -वं; 'arm,' उद्बाहुः -हुः -हु, अभ्युच्छ्रितबाहुः &c.

To OUTSTRIP, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -रितुं), अतिगम् (c. 1. -गच्छति -गन्तुं), अती (c. 2. अत्येति -तुं, rt. इ), लङ्घ् (c. 10. लङ्घयति -यितुं): 'outstripping the wind,' अत्यनिलः -ला -लं.

OUTSTRIPPED, *p.p.* अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, अन्तरितः -ता -तं.

To OUTVIE, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अभिभू, परिभू, अतिभू.

OUTWARD, *a.* (External) वाह्यः -ह्या -ह्यं, वहिःस्थः -स्था -स्थं, वहिःस्थितः -ता -तं, वाहीकः -का -कं, वहिर्भवः -वा -वं, वहिर्भूतः -ता -तं, वहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), वहिस् in comp.—(Visible) दृश्यः -श्या -श्यं, दृष्टः -ष्टा -ष्टं, आविर्भूतः -ता -तं.—(Not real) अवास्तवः -वी -वं.—(Tending out) वहिर्दिश्यः -श्या -श्यं.

OUTWARD, OUTWARDS, *adv.* वहिर्भागं प्रति, वहिस्, वहिर्दिशि, वहिर्देशं प्रति.

OUTWARDLY, *adv.* वाह्यतस्, वहिस्, वहिरङ्गे, वहिरङ्गतस्, वहिर्भागे, वहिर्भागतस्.—(Not really) अवस्तुतस्.

To OUTWEIGH, *v. a.* अधिकभारी -रिणी -रि भू or अस्, अतिभारी &c. भू, गुरुतरभारी &c. भू, गुरुतरः -रा -रं भू, भारेण वृध् (c. 1. वर्धते -र्धितुं).

To OUTWIT, *v. a.* अतिसन्धा (c. 3. -दधाति -धातुं), प्रतॄ (c. 10. -तारयति -यितुं).

OUTWORK, *s.* दुर्गवहिःस्थितं प्राकारप्राचीरादि, वाह्यपरिक्रिया.

OVAL, *a.* अण्डाकारः -रा -रं, अण्डाकृतिः -तिः -ति, अण्डरूपः -पा -पं.

OVAL, *s.* अण्डाकारः, अण्डाकृतिः *f.*, कम्बुः, अधिकवलयितं.

OVARIOUS, *a.* अण्डमयः -यी -यं, अण्डयुक्तः -क्ता -क्तं, अण्डरूपः -पा -पं.

OVARY, *s.* अण्डाशयः, अण्डाधारः, डिम्बाशयः, डिम्बकोषः.

OVATE, OVATED, *a.* अण्डाकृतिः -तिः -ति, अण्डाकारः -रा -रं.

OVEN, *s.* चुल्ली -ल्लिः *f.*, कन्दुः *m.f.*, आपाकः, उखा; 'baked in an oven,' कन्दुपक्वः -क्वा -क्वं, कान्दवः -वी -वं.

OVER, *prep.* (Above in place, position, rank, or value) अधि, उपरि, ऊर्द्ध्व prefixed; as, 'placed over,' अधिकृतः -ता -तं, अधिरोपितः -ता -तं; 'standing over,' अधिष्ठितः -ता -तं, अधिष्ठाता *m.* (तृ), ऊर्द्ध्वस्थितः &c.; 'situated over,' उपरिस्थः -स्था -स्थं; 'heaped over,' उपरिचितः -ता -तं; 'a tooth growing over another,' अधिदन्तः. When उपरि is not compounded with another word it governs the gen. c.; as, 'over all,' उपरि सर्व्वेषां. Sometimes उपरि is repeated; as, उपर्य्युपरि सर्व्वेषां.—(From side to side, across) expressed by various prepositions, such as अति, अधि, उत्, सम्, अभि, वि &c.; as, 'to cross over,' अतितॄ, उत्तॄ, समुत्तॄ, सन्तॄ, अतिक्रम्, समतिक्रम्, व्यतिक्रम्, संक्रम्, अती; 'to leap over,' उल्लङ्घ्, विलङ्घ्, अभिलङ्घ्, उत्प्लु. Sometimes expressed by पारं in comp.; as, 'to cross over a river,' नदीपारं गम्; 'crossing over,' पारगः -गा -गं.—(Denoting superiority) expressed by प्र, अधि, उत्, वि, ऊर्द्ध्व &c. prefixed; as in the following words signifying pre-eminence, or 'advantage over,' प्रधानता, प्रमुखता, अधिकत्वं, आधिक्यं, उत्कर्षः, उन्नतिः *f.*, विशिष्टता, ऊर्द्ध्वस्थितिः *f.*—(Upon the whole surface or through the whole extent) expressed by परि, वि prefixed; as, 'to wander over the earth,' पृथिवीं परिभ्रम् or पर्य्यट् or विभ्रम्.—(Over against) अभि, अभितस्, प्रति, अभिमुखं -खेन, सम्मुखं -खेन, प्रतिमुखं -खेन.

OVER, *adv.* (On the opposite side) पारे -रं; 'the boat is over the river,' पारगता नौका.—(From one to another by passing) expressed by the prepositions प्रति, नि, सम् &c., in combination with roots; as, 'to deliver over,' प्रतिपद्, निक्षिप्, संक्रम्.—(Above the top, running over). *See* OVERFLOWING.—(More than the proper quantity, over and above) अधिकं, अधिकतरं, अतिरिक्तं, परं, भूयस्.—(Beyond) अति prefixed.—(Remaining, left over) उद्वृत्तः -त्ता -त्तं, उद्वर्त्तः -र्त्ता -र्त्तं, शिष्टः -ष्टा -ष्टं, उच्छिष्टः &c., अवशिष्टः &c., अन्तरं, अन्तरितः -ता -तं; 'a part over,' कलान्तरं; 'that which is over,' उद्वृत्तं, शिष्टं, अवशिष्टं, or expressed by परि; as, 'one over,' एकावशिष्टं, एकपरि.—(Throughout) अधि prefixed, आद्यन्तं, आद्यन्तं; 'to read over,' अधिगम्, अधी, or expressed by पार; as, 'one who reads over the Vedas,' वेदपारगः; 'to get over, complete,' पार (nom. पारयति -यितुं), तीर (nom. तीरयति -यितुं), पारं गम्.—(Too much, excessively) अति or अतिशय or एकान्त prefixed, अतिशयेन, अधिकं, अतीव, एकान्ततस्.—(Over again) पुनर्; 'over and over again,' पुनःपुनर्, मुहुर्मुहुस्, वारं वारं.—(To be over). *See To* CEASE, *v. n.*—(To give over). *See To* GIVE, *v. a.*—(To turn over). *See* OVERTURN. For other senses of 'over,' *see* the verbs, &c., which follow.—(Past) वृत्तः -त्ता -त्तं, भूतः -ता -तं, अतीतः -ता -तं, गतः -ता -तं, अतिक्रान्तः -न्ता -न्तं, व्यतीतः -ता -तं.

To OVERABOUND, *v. n.* अतिरिक्तः -क्ता -क्तं भू, अतिबहुलीभू.

To OVERACT, *v. a.* अतिशयेन कृ, अधिकं कृ, अत्याचर् (c. 1. -चरति -रितुं).

To OVERAWE, *v. a.* सम्भ्रमेण उपहन् (c. 2. -हन्ति -न्तुं), त्रासयित्वा निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or निषिध् (c. 1. -षेधति -षेद्धुं), अतिशयेन त्रस् (c. 10. त्रासयति -यितुं), आकुलीकृ, व्याकुलीकृ.

OVERAWED, *a.* सम्भ्रमोपहतः -ता -तं, सम्भ्रमाकुलितः -ता -तं.

To OVERBALANCE, *v. a.* *See To* OUTWEIGH.

OVERBALANCE, *s.* अधिकभारः, अतिभारः, अधिकतरभारः, सुभारः.

To OVERBEAR, *v. a.* (Bear down) निपत् (c. 10. -पातयति -यितुं), दम् (c. 10. दमयति -यितुं), प्रदम्, वशीकृ, धृष् (c. 10. धर्षयति -यितुं).

OVERBEARING, *a.* धृष्टः -ष्टा -ष्टं, धर्षितः -ता -तं, प्रधृष्टः &c., प्रधर्षितः -ता -तं, धर्षी -र्षिणी -र्षि (न्), उद्धतः -ता -तं, अवलिप्तः -प्ता -प्तं, धृष्णुः -ष्णुः -ष्णु; 'to be overbearing,' धृष् (c. 5. धृष्णोति, धर्षितुं).

OVERBOARD, *adv.* नौकावहिम्, नौकोपरिष्टात्, नौपृष्ठतम्, नौपार्श्वात्, नौपार्श्वतस्, नौकातम्, समुद्रमध्ये, मध्येसमुद्रं, मध्येऽर्णवं.

To OVERBURDEN, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं), अतिभारेण पीड् (c. 10. पीडयति -यितुं), अतिभारयुक्तं -क्तां कृ.

OVERBURDENED, *p.p.* अतिभारी -रिणी -रि (न्), अतिभारवान् -वती -वत् (त्), अतिभाराक्रान्तः -न्ता -न्तं, अतिभारयुक्तः -क्ता -क्तं.

To OVERCAST, *v. a.* मेघावृतं -तां कृ, मेघाच्छन्नं -न्नां कृ, मेघैः प्रच्छद् (c. 10. -छादयति-यितुं) or आच्छद्, कलुषीकृ, तिमिरीकृ, साभ्रं-भ्रां कृ, समेघं-घां कृ.

OVERCAST, *a.* मेघावृतः -ता -तं, मेघाच्छन्नः -न्ना -न्नं, मेघाच्छादितः -ता -तं, तमोवृतः -ता -तं, घनोपरुद्धः -द्धा -द्धं, घनारूढः &c., घनावरुद्धः &c.

OVERCAUTIOUS, *a.* अत्यवहितः -ता -तं, एकान्तावहितः &c., स्ववहितः &c.

To OVERCHARGE, *v. a.* (In an account) अतिमूल्यं or अधिकमूल्यं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं). *See To* OVERBURDEN, OVERLOAD.

OVERCHARGE, *s.* (Asking too much) अतिमूल्यप्रार्थनं, अधिकमूल्यप्रार्थनं.

To OVERCLOUD, *v. a.* मेघावृतं -तां कृ. *See To* OVERCAST, *v. a.*

To OVERCOME, *v. a.* (Subdue) जि (c. 1. जयति -ते, जेतुं), पराजि, निर्जि, विजि, सञ्जि, अभिभू, प्रभू, पराभू, वशीकृ, दम् (c. 10. दमयति -यितुं), प्रदम्, धृष् (c. 10. धर्षयति -यितुं), प्रधृष्, हन् (c. 2. हन्ति -न्तुं), पर्यामृश् (c. 6. -मृशति -म्रष्टुं), अलङ्कृ.—(Surmount, get the better of) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अधिक्रम्, अधिरुह् (c. 1. -रोहति -रोढुं), अध्यारुह्, आरुह्, अती (c. 2. अत्येति -तुं, rt. इ), व्यती, अतिशी (c. 2. -शेते -शयितुं), तॄ (c. 1. तरति -रितुं -रीतुं), पार् (c. 10. पारयति -यितुं), अभिभू.— (Exhaust, distress) सद् (c. 10. सादयति -यितुं), अवसद्, खिद् (c. 10. खेदयति -यितुं), व्याकुल् (c. 10. -कुलयति -यितुं).

OVERCOME, *p. p.* (Subdued) जितः -ता -तं, पराजितः -ता -तं, विजितः -ता -तं, अभिभूतः -ता -तं, पराभूतः &c., वशीकृतः &c., वशीभूतः &c., दमितः -ता -तं, दान्तः -न्ता -न्तं.—(Distressed, agitated) आक्रान्तः -न्ता -न्तं, आर्त्तः -र्त्ता -र्त्तं, आतुरः -रा -रं, ग्रस्तः -स्ता -स्तं, आकुलः -ला -लं, व्याकुलः -ला -लं, परिगतः -ता -तं; 'with hunger,' क्षुधाक्रान्तः &c., क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुधातुरः -रा -रं; 'with sorrow,' शोकार्त्तः &c., शोकाकुलः -ला -लं; 'with shame,' ह्रीजितः -ता -तं, लज्जापरिगतः -ता -तं.

OVER-COMPASSIONATE, *a.* एकान्तकरुणः -णा -णं, अतिकारुणिकः -की -कं.

OVER-CONFIDENT, *s.* अतिविश्वासी -सिनी -सि (न्), एकान्तविश्वासी &c.

To OVERDO, *v. a.* अतिशयेन कृ, अधिकं कृ.—(Cook too much) अतिशयेन पच् (c. 1. पचति, पक्तुं), अतिपाकं कृ, अतिपक्वं -क्वां कृ.

OVERDONE, *p. p.* (Cooked too much) अतिपक्वः -क्वा -क्वं.—(Too much wearied) अतिश्रान्तः -न्ता -न्तं, अतिश्रमार्त्तः -र्त्ता -र्त्तं.

To OVER-FAT, *v. a.* अतिभोजनं कृ, अत्यशनं कृ, अतिसौहित्यं कृ.

To OVER-ESTIMATE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं).

OVER-EXCITEMENT, *s.* अत्युत्तापः, अत्युद्योगः, अत्युत्कम्पः.

OVER-FATIGUE, *s.* अतिश्रान्तिः *f.*, अतिश्रमः, अतिक्लेशः, अतिशयखेदः.

To OVER-FLOW, *v. n.* (Run over the brim) उत्सेचनं कृ, उत्सेकं कृ, अतिपूर्णः -र्णा -र्णं भू, अत्यन्तपूर्णः -र्णा -र्णं भू, परिपूर्णः &c. भू, परिपूर्णीभू, जलोत्सेकं कृ, जलोत्सेचनं कृ, जलाप्लावनं कृ, उपचितः -ता -तं भू, उपचितजलः -ला -लं भू, समाप्लुतः -ता -तं भू, सम्प्लुतजलः -ला -लं भू, स्फाय् (c. 1. स्फायते -यितुं), स्फीतः -ता -तं भू, स्फीतजलः -ला -लं भू.—(Be exuberant) अतिबहुलीभू, अतिप्रचुरीभू, अतिरिक्तः -क्ता -क्तं भू, उद्रिक्तः &c. भू, पुष्कलीभू, वृध् (c. 1. वर्धते -र्धितुं), प्रवृद्धः -द्धा -द्धं भू; 'overflows with tears,' बाष्पायते; 'their eyes overflowed with tears,' तेषां नेत्राणि समाप्लुतानि वारिणा.

To OVERFLOW, *v. a.* जलेन प्लु (c. 10. प्लावयति -यितुं) or आप्लु or परिप्लु or संप्लु, जलप्लुतं -तां कृ, जलप्लावितं -तां कृ, जलाप्लावितं -तां कृ, जलव्याप्तं -प्तां कृ, जलाप्लावनं कृ, जलप्लावनं कृ.

OVERFLOW, *s.* उत्सेकः, उत्सेचनं, जलप्लावः -वनं, जलाप्लावनं, जलपरिप्लवः, जलोच्छ्वासः, जलोत्सेकः, जलवृद्धिः *f.*, जलौघः, जलप्रवृद्धिः *f.*, जलागमः.

OVERFLOWED, *p. p.* जलप्लावितः -ता -तं, जलाप्लावितः &c., आप्लावितः &c., जलप्लुतः -ता -तं, जलपरिप्लुतः &c., आप्लुतः &c., परिप्लुतः &c., जलव्याप्तः -प्ता -प्तं, व्याप्तः &c.; 'is overflowed,' प्लाव्यते.

OVERFLOWING, *part.* or *a.* (So full as to run over) उत्सेचनकारी -रिणी -रि (न्), उत्सिच्यमानः -ना -नं, उत्सिक्तः -क्ता -क्तं, अतिपूर्णः -र्णा -र्णं, अत्यन्तपूर्णः &c., परिपूर्णः &c., पर्याकुलः -ला -लं; 'with water,' सम्प्लुतोदकः -का -कं, सम्प्लुतजलः -ला -लं, जलोत्सिच्यमानः &c.—(Exuberant) अतिबहुलः -ला -लं, बहुलः &c., पुष्कलः -ला -लं, प्रचुरः -रा -रं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः &c., उपचितः -ता -तं; 'eyes overflowing with tears,' अश्रुसमाप्लुतानि नेत्राणि; 'having overflowing eyes,' उपप्लुताक्षः -क्षी -क्षं; 'overflowing its bounds,' उद्वेलः -ला -लं.

OVERFLOWING, *s.* उत्सेकः, उत्सेचनं, जलाप्लावनं, जलोत्सेकः, प्रवृद्धिः *f.*, वृद्धिः, अतिरिक्तता, उद्रिक्तता, परिपूर्णता, अतिपूर्णता, उपचयः, आतिशय्यं, आधिक्यं, अतिबाहुल्यं; 'of a river beyond its banks,' विदारः. *See* OVERFLOW. 'To fill to overflowing,' प्लु (c. 10. प्लावयति -यितुं), परिप्लु.

To OVERGROW, *v. a.* or *n.* अतिवृध् (c. 1. -वर्धते -र्धितुं), अधिकं वृध्, अत्यन्तं or अतिमात्रं वृध् or रुह् (c. 1. रोहति, रोढुं) or प्ररुह्.

OVERGROWN, *p.p.* or *a.* अतिवर्धितः -ता -तं, कालप्ररूढः -ढा -ढं, अतिरूढः &c.

OVERGROWTH, *s.* अतिवृद्धिः *f.*, अतिवर्धनं, अधिकवृद्धिः, कालप्ररूढिः *f.*

To OVERHANG, *v. n.* वहिर्लम्ब् (c. 1. -लम्बते -म्बितुं), प्रलम्ब्, अवलम्ब्, वहिःप्रलम्ब्, वहिःस्था (c. 1. -तिष्ठति -स्थातुं).

OVERHASTY, *a.* अतिसाहसी -सिनी -सि (न्), एकान्तसाहसी &c.

To OVERHAUL, *v. a.* इतस्ततः समाकृष्य परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरूप् (c. 10. -रूपयति -यितुं), पुनःपुनः परिवर्त्त्य परीक्ष्, पुनः परीक्ष्.

OVERHEAD, *adv.* मस्तकोपरि, शीर्षोपरि, उपरिष्टात्, उपरिस्थाने, ऊर्द्ध्वस्थाने, ऊर्द्ध्वं, ऊर्द्ध्वं, उच्चं, विहायसा.

To OVERHEAR, *v. a.* प्रच्छन्ने स्थित्वा द्वयोः संलापं श्रु (c. 5. शृणोति, श्रोतुं) or उपश्रु or आकर्ण् (c. 10. -कर्णयति -यितुं), अकस्माद् आकर्ण्.

OVERHEARD, *p.p.* आकर्णितः -ता -तं, अकस्माद् आकर्णितः &c., श्रुतः -ता -तं.

To OVERJOY, *v. a.* अत्यन्तम् आनन्द् (c. 10. -नन्दयति -यितुं) or प्रहृष् (c. 10. -हर्षयति -यितुं), अतिशयेन प्रहृष्.

OVERJOY, *s.* अत्यानन्दः, परमानन्दः, परमहर्षः, परमाह्लादः.

OVERJOYED, *p. p.* परमहृष्टः -ष्टा -ष्टं, परमसंहृष्टः &c., परमानन्दितः -ता -तं, परमाह्लादितः -ता -तं, हर्षाकुलः -ला -लं, हर्षविह्वलः -ला -लं, रोमाञ्चितः -ता -तं, हर्षरोमाञ्चितः -ता -तं, पुलकितः -ता -तं, हर्षपुलकितः -ता -तं, उल्लासितः -ता -तं, उल्लसितः -ता -तं, उल्लासी -सिनी -सि (न्), परमप्रीतः -ता -तं, हृष्टचित्तः -त्ता -त्तं, प्रहृष्टः &c., प्रहृष्टमनाः -नाः -नः

(त्), अतिहर्षयुक्तः -क्ता -क्तं, अतिहृष्टः &c.; 'to be overjoyed,' परमम् आनन्द् (c. 1. -नन्दति -न्दितुं), परमानन्दं कृ.

OVERLAID, *p. p.* आच्छन्नः -न्ना -न्नं, पिहितः -ता -तं, पिनद्धः -द्धा -द्धं; 'with gold,' सुवर्णपत्रपिनद्धः -द्धा -द्धं.

OVERLARGE, *a.* अतिबृहन् -हती -हत् (त्), अतिमहान् -हती &c., अतिस्थूलः -ला -लं, अतिविपुलः &c., एकान्तस्थूलः &c., अतिरिक्तः -क्ता -क्तं.

To OVERLAY, *v. a.* (An infant) शय्यास्तरणभारेण पीडयित्वा शिशुप्राणघातं कृ.—(Cover, spread over) छद् (c. 10. छादयति -यितुं), आच्छद्, पिधा (c. 3. -दधाति -धातुं), अपिधा.—(Oppress with too great a weight) अतिभारेण पीड् (c. 10. पीडयति -यितुं).

To OVERLEAP, *v. a.* लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, लङ्घनं कृ, उत्प्लु (c. 1. -प्लवते -प्लोतुं).

OVERLENIENT, *a.* अतिमृदुः -दुः -द्वी -दु, एकान्तमृदुः &c.

To OVERLOAD, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं) or आरुह् in caus. (-रोपयति -यितुं), अतिभाराक्रान्तं -न्तां कृ, अत्यन्तं or अतिशयेन पॄ (c. 10. पूरयति -यितुं), अतिपूर्णं -र्णां कृ.

OVERLOADED, *p. p.* अतिभाराक्रान्तः -न्ता -न्तं, अतिभारार्त्तः -र्त्ता -र्त्तं, अतिभारी -रिणी -रि (न्), अतिपूर्णः -र्णा -र्णं, अतिपूरितः &c. *See* OVERBURDENED.

OVERLOADING, *s.* अतिभारन्यासः, अतिभारारोपणं, आक्रमः -मणं.

To OVERLOOK, *v. a.* (View from a high place) उन्नतस्थानाद् अवलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं) or निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or अवेक्ष् or अभिवीक्ष्.—(Superintend, preside over) अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), कार्य्यावेक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, कार्य्याणि अवेक्ष्, अध्यक्षः -क्षा -क्षं भू.—(Let pass, excuse) उपेक्ष्, अवसृज् (c. 6. -सृजति -स्रष्टुं), मुच् (c. 6. मुञ्चति, मोक्तुं), क्षम् (c. 1. क्षमते -ति, क्षन्तुं), दोषाच्छादनं कृ, दोषक्षालनं कृ, उपेक्षां कृ, उपेक्षणं कृ.

OVERLOOKED, *p. p.* (Viewed from above) उन्नतस्थानाद् or उन्नतप्रदेशाद् अवलोकितः -ता -तं.—(Superintended) अधिष्ठितः -ता -तं, अवेक्षितः -ता -तं.—(Passed over, excused) उपेक्षितः -ता -तं, अवसृष्टः -ष्टा -ष्टं.

OVERLOOKER, *s.* अवेक्षिता *m.* (तृ), अध्यक्षः, उपद्रष्टा *m.* (ष्टृ), कार्य्यद्रष्टा.

OVERMUCH, *a.* अति or अतिशय prefixed, अधिकः -का -कं, अत्यन्तः -न्ता -न्तं, एकान्तः -न्ता -न्तं, अतिमात्रः -त्रा -त्रं, अतिमर्य्यादः -दा -दं, अतिरिक्तः -क्ता -क्तं.

OVERMUCH, *s.* अतिबाहुल्यं, आधिक्यं, अधिकता, अतिरिक्तता, एकान्तत्वं.

OVERMUCH, *adv.* अति prefixed, अतिशयेन, अत्यन्तं, अतिमर्य्यादं, एकान्ततस्.

OVER-OFFICIOUS, *a.* अत्युपचारी -रिणी -रि (न्), अत्युपकारी &c., अत्युपचारः &c.

To OVERPASS, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -रितुं).

OVERPAST, *p. p.* अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, गतः -ता -तं.

To OVERPAY, *v. a.* अतिमूल्यं or अधिकमूल्यं दा (c. 3. ददाति, दातुं).

OVERPLUS, *s.* उद्वर्त्तः, उद्वृत्तं, अवशिष्टं, उच्छिष्टं, शिष्टं, परभागः.

To OVERPOWER, *v. a.* अभिभू, पराभू, पराजि (c. 1. -जयते -जेतुं), निर्जि, दम् (c. 10. दमयति -यितुं), प्रदम्, आक्रम् (c. 1. -क्रामति -क्रमितुं), पराक्रम्, वशीकृ. *See To* OVERCOME.

OVERPOWERED, *p. p.* पराजितः -ता -तं, आक्रान्तः -न्ता -न्तं. *See* OVERCOME.

To OVERRATE, OVERPRIZE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), अधिकमूल्यं or अतिमूल्यं कृ.

To OVERREACH, *v. a.* अतिसन्धा (c. 3. -दधाति -धातुं), अभिसन्धा, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, प्रतॄ (c. 10. -तारयति -यितुं).

OVERREACHED, *p. p.* अतिसंहितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

OVERREACHING, *s.* अतिसन्धानं, अतिसन्धिः *m.*, प्रलम्भः, प्रतारणं -णा.

OVERRIPE, *a.* अतिपक्वः -क्वा -क्वं, कालप्ररूढः -ढा -ढं, विनाशोन्मुखः &c.

To OVERRULE, *v. a.* अधिकृ, प्रभू, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), विनियम् (c. 1. -यच्छति -यन्तुं), नियम्, सन्नियम्, संयम्, यम्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, अधिकारं कृ.

OVERRULER, *s.* अधिकारी *m.* (न्), अधिष्ठाता *m.* (तृ), प्रभुः *m.*, अनुशास्ता.

To OVERRUN, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), अधिक्रम्, उपद्रु (c. 1. -द्रवति -द्रोतुं), उपद्रवं कृ, उपप्लवं कृ.

OVERRUN, *p. p.* आक्रान्तः -न्ता -न्तं, आक्रमितः -ता -तं, उपद्रुतः -ता -तं, उपप्लुतः &c., आकीर्णः -र्णा -र्णं, आस्तीर्णः &c., व्याप्तः -प्ता -प्तं.

To OVERSEE, *v. a.* उपदृश् (c. 1. -पश्यति -द्रष्टुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), कार्य्यावेक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).

OVERSEER, *s.* अध्यक्षः, उपद्रष्टा *m.* (ष्टृ), अवेक्षिता *m.* (तृ), कार्य्यावेक्षिता *m.*, अधिष्ठाता *m.*, अधिकर्म्मिकः, कार्य्यद्रष्टा *m.*, कार्य्याधीशः, अधिकारी *m.* (न्), अधिकृतः; 'of a village,' आयुक्तः.

To OVERSET, *v. a.* पर्य्यस् (c. 4. -अस्यति -असितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), आक्षिप् (c. 10. -क्षेपयति -यितुं), निपत् (c. 10. -पातयति -यितुं), अधः कृ.

To OVERSET, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं). *See To* UPSET.

To OVERSHADOW, *v. a.* छायया छद् (c. 10. छादयति -यितुं) or प्रच्छद्, छायां कृ, छायावृतं -तां कृ, वितानीकृ.

OVERSHADOWED, *p. p.* छायावृतः -ता -तं, छायाच्छादितः &c., छायाच्छन्नः -न्ना -न्नं.

To OVERSHOOT, *v. a.* लक्ष्यम् अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or लङ्घ् (c. 10. लङ्घयति -यितुं) or उल्लङ्घ्, लक्ष्यातिक्रमं कृ, लक्ष्योल्लङ्घनं कृ, लक्ष्यातिक्षेपं कृ.

OVERSIGHT, *s.* (Error) दृष्टिदोषः, भ्रमः, भ्रान्तिः *f.*, प्रमादः.

To OVERSLEEP, *v. n.* अतिशयेन or अतिदीर्घं or सुदीर्घं स्वप् (c. 2. स्वपिति, स्वप्तुं), अतिनिद्रां कृ, अतिस्वापं कृ.

To OVERSPREAD, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), आच्छद् (c. 10. -छादयति -यितुं), आवृ (c. 5. -वृणोति -वरितुं -रीतुं), समावृ, अवतन् (c. 5. -तनोति -नितुं), वितन्, वितानीकृ, अवकॄ (c. 6. -किरति -करितुं -रीतुं), समवकॄ, आकॄ, पॄ (c. 10. पूरयति -यितुं).

OVERSPREAD, *p. p.* आक्रान्तः -न्ता -न्तं, समाक्रान्तः &c., आच्छादितः -ता -तं, आच्छन्नः -न्ना -न्नं, प्रच्छादितः &c., आवृतः -ता -तं, आकीर्णः -र्णा -र्णं, आस्तीर्णः &c., व्याप्तः -प्ता -प्तं, संवीतः &c., परिवीतः &c., पूरितः &c., गाहितः &c., श्रितः &c., वितानीकृतः &c., पूर्णः -र्णा -र्णं.

To OVERSTATE, *v. a.* अतिशयेन or वागाधिक्येन वद् (c. 1. वदति -दितुं), अत्युक्तिं कृ, अतिशयोक्तिं कृ.

To OVERSTEP, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, अभिलङ्घ्.

OVERSTOCK, *s.* अतिसञ्चयः, अधिकसञ्चयः, अतिसम्भारः, अतिसङ्ग्रहः.

To OVERSTOCK, *v. a.* अतिशयेन सम्भृ (c. 1. -भरति -भर्त्तुं) or उपक्लृप् (c. 10. -कल्पयति -यितुं) or पॄ (c. 10. पूरयति -यितुं), अतिसम्भारं कृ, अतिसञ्चयं कृ, अधिकसम्भारं कृ, अतिपूर्त्तिं कृ, अधिकपूर्त्तिं कृ.

OVERSTOCKED, *p. p.* अतिसम्भृतः -ता -तं, अतिपूरितः -ता -तं, अतिपूर्णः -र्णा -र्णं.

To OVERSTRAIN, *v. n.* अतियत्नं कृ, अतिप्रयत्नं कृ, अतिशयेन यत् (c. 1. यतते -तितुं).

OVERT, *a.* प्रकाशः -शा -शं, स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, विस्पष्टः -ष्टा -ष्टं, अभिव्यक्तः &c., विवृतः -ता -तं, प्रकटः -टा -टं, अगूढः -ढा -ढं, आविर्भूतः &c., प्रत्यक्षः -क्षा -क्षं.

To OVERTAKE, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, धृ (c. 1. धरति, धर्तुं), ग्रस् (c. 1. ग्रसते -सितुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), पश्चाद्धावन् or पश्चाद् अनुधाव्य आक्रम् or आक्रमणं कृ.—(Come upon unexpectedly) अकस्माद् आसद् (c. 10. -सादयति -यितुं) or प्राप्.

OVERTAKEN, *p. p.* प्राप्तः -प्ता -प्तं, सम्प्राप्तः -प्ता -प्तं, ग्रस्तः -स्ता -स्तं, धृतः -ता -तं, गृहीतः -ता -तं, आक्रान्तः -न्ता -न्तं, आक्रमितः -ता -तं.—(Come upon suddenly) अकस्माद् आसादितः -ता -तं.

To OVERTASK, OVERTAX, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं) or ऋ in caus. (अर्पयति -यितुं), अधिकभारं न्यस्.

To OVERTHROW, *v. a.* (Defeat) पराजि (c. 1. -जयते -जेतुं), विजि, निर्जि, जि, पराहन् (c. 2. -हन्ति -न्तुं), अभिभू, पराभू, परास् (c. 4. -अस्यति -असितुं), दम् (c. 10. दमयति -यितुं), प्रदम्, पर्यामृश् (c. 6. -मृशति -म्रष्टुं), वशीकृ.—(Turn upside down, upset, subvert) पर्यस्, पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप् (c. 10. क्षेपयति -यितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं), पत् (c. 10. पातयति -यितुं), निपत्.—(Destroy, &c.). *See* OVERTURN.

OVERTHROW, *s.* (Defeat) पराजयः, अपजयः, जयः, पराभवः, अभिभवः, अभिभूतिः *f.*, परिभवः.—(Ruin, destruction) नाशः, विनाशः, प्रणाशः, क्षयः, ध्वंसः, विध्वंसः, प्रध्वंसः, उच्छेदः, समुच्छेदः, सादः -दनं घातः, विघातः, भङ्गः, भेदः, व्यसनं; 'of an army,' बलव्यसनं.—(Upsetting, subverting) पर्यासः, पर्यसनं, परिवर्त्तनं, पातनं, निपातनं.

OVERTHROWN, *p. p.* पराजितः -ता -तं, जितः &c., पराभूतः &c., अभिभूतः &c., पराहतः &c., परास्तः -स्ता -स्तं, उपास्तः &c., नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः &c., हतः &c., भग्नः -ग्ना -ग्नं, पातितः -ता -तं, निपातितः &c., ध्वंसितः &c., जातव्यसनः -ना -नं.

OVERTLY, *adv.* प्रकाशं, स्पष्टं, विस्पष्टं, व्यक्तं, प्रकटं, आविस्, प्रादुस्, अगूढं, प्रत्यक्षं -क्षेण -क्षतस्.

OVERTURE, *s.* (Opening) विवृतिः *f.*, विवरणं, प्रकाशः -शनं.—(Proposal) उपन्यासः, निवेदनं, प्रसङ्गः, अभिधानं; 'secret overture,' उपजपः -जापः.—(Musical or dramatic prelude) पूर्व्वरङ्गः, प्रस्तावना, प्रकरणं, उपोद्घातः, नान्दी; 'player or speaker of it,' नान्दीवादी, नान्दीकरः.

To OVERTURN, *v. a.* परावृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्, अपवृत्, पर्यस् (c. 4. -अस्यति -असितुं), पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप् (c. 10. -क्षेपयति -यितुं), पत् (c. 10. पातयति -यितुं), निपत्, उत्सद् (c. 10. सादयति -यितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं), अधोमुखीकृ, अधरोत्तरीकृ, अधः कृ, न्युब्जीकृ.—(Destroy, &c.) नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, ध्वंस् (c. 10. ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं), सद्.

OVERTURN, *s.* पर्यासः, पर्यसनं, परिवर्त्तनं, परावर्त्तनं, पातनं, निपातनं, उत्सादनं, क्षोभः, संक्षोभः, ध्वंसः, ध्वंसनं, प्रध्वंसः. *See* OVERTHROW.

OVERTURNED, *p. p.* पर्यस्तः -स्ता -स्तं, पराक्षिप्तः -प्ता -प्तं, परावर्त्तितः -ता -तं, परिवर्त्तितः &c., परावृत्तः -त्ता -त्तं, अपवृत्तः &c., पातितः &c., निपातितः &c., उत्सादितः &c., संक्षोभितः &c., अधःकृतः &c., ध्वंसितः &c. *See* OVERTHROWN.

OVERTURNING, *s.* परावर्त्तनं, परिवर्त्तनं, पर्यसनं, उत्सादनं. *See* OVERTURN.

To OVERVALUE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), अधिकमूल्यं or अतिमूल्यं कृ or स्था in caus. (स्थापयति -यितुं).

OVERWEENING, *a.* अत्यभिमानी -निनी -नि (न्), अतिमानी &c., अत्यहङ्कारी &c., अत्यहंयुः -युः -यु, आत्मश्लाघी &c.

OVERWEENINGLY, *adv.* अत्यभिमानेन, अत्यहङ्कारेण, अत्यभिमानपूर्व्वं.

OVERWEIGHT, *s.* अतिभारः, अधिकभारः, भाराधिक्यं, अतिशयभारः.

To OVERWHELM, *v. a.* (Crush, beat down) अवमृद् (c. 9. -मृद्नाति -मर्दितुं), प्रमृद्, आमृद्, अवपत् (c. 10. -पातयति -यितुं), निपत्, पुथ् (c. 10. पोथयति -यितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), सम्पिष्, विनिष्पिष्.—(Overspread) आछद् (c. 10. छादयति -यितुं), समाछद्, आवृ (c. 5. -वृणोति -वरितुं -रीतुं), समावृ, आक्रम् (c. 1. क्रामति -क्रमितुं), अवकॄ (c. 6. -किरति -करितुं -रीतुं), समवकॄ, अवाकॄ; 'he overwhelms them with arrows,' तान् अवाकिरति शरैः.—(Immerge, submerge) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, अवगाह् (c. 10. -गाहयति -यितुं), समाप्लु (c. 10. -प्लावयति -यितुं, c. 1. -प्लवते), समभिप्लु, अभिप्लु, परिप्लु, अभिपरिप्लु, उपप्लु, विप्लु, समाप्लुतं -तां कृ, परिप्लुतं -तां कृ, समभिप्लुतं &c. कृ, मग्नं -ग्नां कृ.

OVERWHELMED, *p. p.* मर्दितः -ता -तं, अवमर्दितः &c., अवपातितः &c., सम्पिष्टः -ष्टा -ष्टं, आछन्नः -न्ना -न्नं, आच्छादितः -ता -तं, आवृतः -ता -तं, आक्रान्तः -न्ता -न्तं, समाक्रान्तः &c., आकीर्णः -र्णा -र्णं, मग्नः -ग्ना -ग्नं, निमग्नः &c., प्रमग्नः &c., गाहितः &c., अभिप्लुतः &c., अभिपरिप्लुतः &c., समभिप्लुतः &c., उपप्लुतः &c., परिप्लुतः &c., समाप्लुतः &c., सम्प्लुतः &c., उपद्रुतः &c., ग्रस्तः -स्ता -स्तं, परिगतः &c., आकुलः -ला -लं; 'with care,' चिन्तामग्नः &c., चिन्ताकुलः &c.; 'with shame,' ह्रीपरिगतः &c.

OVERWHELMING, *part.* or *a.* अवमर्दी -र्दिनी -र्दि (न्), उपप्लवी &c., विप्लवकारी &c., उपप्लवकारकः -का -कं.

OVERWISE, *a.* अतिप्राज्ञः -ज्ञा -ज्ञं, अतिज्ञानी -निनी -नि (न्), एकान्तप्राज्ञः &c., अतिपण्डितः -ता -तं, पण्डितम्मन्यः -न्या -न्यं.

To OVERWORK, *v. a.* अतिशयेन or एकान्ततः or अधिकम् आयस् (c. 10. -यासयति -यितुं), अत्यायासं or अतिक्लेशं कृ or दा.

OVERWORK, *s.* अत्यायासः, अतिक्लेशः, एकान्तक्लेशः, अतिश्रमः.

OVERWORKED, *p.p.* अत्यायासितः -ता -तं, अतिक्लेशितः &c., अतिक्लिष्टः -ष्टा -ष्टं.

OVERWROUGHT, *a.* अतिसंस्कृतः -ता -तं, अतिपरिष्कृतः &c., अतिसिद्धः -द्धा -द्धं.

OVERZEALOUS, *a.* अत्युत्सुकः -का -कं, अत्यासक्तः -क्ता -क्तं, अतिव्यग्रः -ग्रा -ग्रं, अत्युद्यतः -ता -तं, अतिचण्डः -ण्डा -ण्डं, अत्युत्कण्ठितः &c.

OVIFORM, *a.* अण्डाकारः -रा -रं, अण्डाकृतिः -तिः -ति, अण्डरूपः -पा -पं.

OVIPAROUS, *a.* अण्डजः -जा -जं, अण्डजनकः -का -कं, अण्डप्रजः -जा -जं, अण्डप्रसूः -सूः -सु, अण्डोत्पादकः -का -कं, द्विजः -जा -जं, द्विजन्मा -न्मा -न्म (न्), द्विजातिः -तिः -ति, अयोनिजः &c.; 'any oviparous animal,' द्विजः, द्विजातिः &c.

To OWE, *v. a.* (Owe money) धृ (c. 10. धारयति -यितुं) with acc. and dat.; as, 'he owes a hundred pieces of money to Devadatta,' देवदत्ताय शतं मुद्रा धारयति; 'he repaid me the money which he owed me,' धारयन् मह्यं वसूनि प्रत्यपद्यत.—(Be indebted) ऋणी -णिनी -णि भू, ऋणवान् -वती -वद् भू, ऋणबद्धः -द्धा -द्धं भू, ऋणं कृ.—(Be obliged) अनुगृहीतः -ता -तं भू; 'I owe you many thanks for your advice,' अनुगृहीतोऽस्मि तवोपदेशेन. The sense of 'owe' may be expressed by the fut. pass.

part.; as, 'I owe him money,' मया तस्मै धनं प्रतिदेयं or प्रतिदातव्यं, or by changing the construction of the sentence thus, 'I owe my deliverance to you,' भवान् मम रक्षाकारणम् इति ज्ञातव्यं. *See* the next word.

Owing, *part.* (Due) देयः -या -यं, प्रतिदेयः -या -यं, दातव्यः -व्या -व्यं, प्रतिदातव्यः &c., शोधनीयः -या -यं, शोधनीयः -या -यं.—(Following as effect and cause) प्रयुक्तः -क्ता -क्तं, जनितः -ता -तं, उत्पादितः &c., उद्भवः -वा -वं, प्रभवः &c., कारणभूतः -ता -तं; 'my deliverance is owing to you,' भवान् मम रक्षाकारणं or मम रक्षणं भवत्प्रयुक्तं.—(Imputable) आरोपणीयः -या -यं, अध्यारोपणीयः -या -यं, समन्वयनीयः &c.

Owl, *s.* उलूकः, अलूकः, पेचकः, कौशिकः, वायसारातिः *m.*, दिवान्धः, दिवाभीतः, निशाटः, निशाचरः, नक्तञ्चरः, निशादर्शी *m.* (न्), नक्तचारी *m.* (न्), रजनीचरः, काकभीरुः *m.*, कावहकः, घूकः, वक्रनासिकः, रक्तनासिकः.

Owl-light, *s.* ईषत्प्रकाशः, मन्दप्रकाशः, मन्दप्रभा, निशादिः *m.*

Own, *a.* स्वः स्वा स्वं, आत्म in comp., स्व in comp., स्वकीयः -या -यं, आत्मीयः -या -यं, स्वीयः -या -यं, स्वकः -का -कं, निजः -जा -जं, नैजः -जी -जं प्रातिस्विकः -की -कं, आत्मसम्बन्धी -न्धिनी -न्धि (न्), आत्माधीनः -ना -नं, आत्मभूतः -ता -तं; 'my own,' मदीयः -या -यं; 'thy own,' त्वदीयः -या -यं; 'our own,' अस्मदीयः -या -यं; 'of one's own self or own accord,' स्वयं.—(Belonging to no other) अनन्यसम्बन्धी &c., अनन्यस्वामिकः -का -कं, अनन्याधीनः -ना -नं, अनन्यवशी &c. Compounds with स्व and आत्म, are most frequent to express 'own,' as applicable to the first, second, or third person; thus, 'one's own act,' स्वकर्म्म *n.* (न्), आत्मकर्म्म, स्वयकृतं; 'one's own son,' स्वपुत्रः, आत्मजः, स्वजः; 'own nature,' स्वभावः; 'own fancy,' स्वच्छन्दस् *n.*; 'own duty,' स्वधर्म्मः; 'own country,' स्वदेशः; 'own caste or tribe,' स्वजातिः *f.*; 'own family,' स्वकुलं; own advantage,' स्वार्थः, आत्महितं; 'for one's own sake,' आत्मार्थे -र्थं; 'one's own wife,' स्वकीया, स्वीया, स्वभार्य्या; 'to make one's own,' आत्मसात्कृ.

To own, *v. a.* (Have the legal right to) अधिकारी -रिणी -रि भू or अस्, स्वामी &c. भू, ईश्वरः -रा -री -रं भू; 'to own land,' क्षेत्राधिकारी &c. भू, क्षेत्रस्वामी &c. भू; or expressed by the use of अस् or भू with the gen. c., or with मदीयः -या -यं, स्वात्मीयः -या -यं, स्वकीयः -या -यं, आत्माधीनः -ना -नं, स्वाधीनः &c.; as, 'I own that land,' तत् क्षेत्रं मदीयम् अस्ति or आत्माधीनं or मम भवति; 'the king owns this money,' एतद् धनं राजाधीनम् अस्ति. *See To* belong. (Acknowledge to belong to one's self, claim to one's self) स्वीकृ, आत्मसात्कृ, स्वीयमिति वद् (c. 1. वदति -दितुं), ममेति वद्, स्वत्वम् अभिमन्, स्वत्वं ज्ञा (c. 10. ज्ञापयति -यितुं, c. 9. जानाति) or अभिज्ञा or बुध् (c. 10. बोधयति -यितुं), स्वकीयं -यां कृ, आत्मीयं -यां कृ.—(Confess, acknowledge) स्वीकृ, अङ्गीकृ, उरीकृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह्, अभिमन् (c. 4. -मन्यते -मन्तुं), अभिज्ञा (c. 9. -जानाति -ज्ञातुं), प्रतिज्ञा, प्रत्यभिज्ञा, समभिज्ञा, अनुभाष् (c. 1. -भाषते -षितुं), स्वीकारं कृ.

Owned, *p. p.* (Confessed, acknowledged) स्वीकृतः -ता -तं, अङ्गीकृतः &c., अभिज्ञातः -ता -तं, प्रतिज्ञातः &c.—(The legal right vested in) स्वत्वविशिष्टः -ष्टा -ष्टं; 'owned by me,' मत्स्वत्वविशिष्टः &c.

Owner, *s.* अधिकारी *m.* -रिणी *f.* (न्), स्वामी *m.* -मिनी *f.* (न्), ईश्वरः -रा -री, पतिः *m.*, प्रभुः *m.*, अधिभूः *m.*, अधिपः, ईशिता *m.* (तृ), नेता *m.* (तृ), नायकः, परिवृढः, भरण्डः; 'of cattle,' गवीश्वरः; 'of land,' क्षेत्राधिकारी *m.*

Ownership, *s.* स्वाम्यं, स्वामित्वं, स्वत्वं, अधिकारः -रिता -त्वं, प्रभुत्वं -ता, ऐश्वर्य्यं, नायकत्वं.

Owning, *s.* (Confession) स्वीकारः, स्वीकरणं, अङ्गीकारः, अङ्गीकरणं.

Ox, *s.* (Male of the bovine genus) गौः *m.* (गो), वृषभः, वृषः, ऋषभः, बलीवर्द्दः, उक्षा *m.* (न्), वहतः -तिः -तुः *m.*, ककुद्मान् *m.* (त्), अनड्वान् *m.* (उह्), शाक्करः, शाक्वरः, धाकः, विषाणः; 'stupid as an ox,' गोमूढः; 'relating to an ox,' औक्षः -क्षी -क्षं.—(Draft ox) शाक्करः.

Oxen, *pl.* गावः *m. pl.*; 'herd of oxen,' गोकुलं, गोवृन्दं, औक्षकं, गोसमूहः, पशुगणः, गव्या, गोत्रा, पाशवं, उक्ष्णां संहतिः *f.*, गवां व्रजः; 'yoke of oxen,' गोयुगं, गोगोयुगं; 'property in oxen,' गोधनं; 'carriage drawn by oxen,' गोयानं.

Ox-fly, *s.* गोमक्षिका, गोमशकः.

Oxyd, oxide, *s.* रीतिः *f.*; 'of iron,' सारं; 'of mercury,' रसभस्मन् *n.* (न्).

To oxydate, oxydize, *v. a.* मारणं कृ, साधनं कृ, भस्मीकृ, आतपनं कृ, प्रतीवापं कृ; 'oxydized iron,' मारणं.

Oxydation, *s.* मारणं, साधनं, आतपनं, प्रतीवापः, भस्मीकरणं.

Oxygen, *s.* The word used in modern treatises is अम्लकरः.

Oyez, oyes, शृणुत शृणुत आर्य्याः.

Oyster, *s.* शुक्तिः *f.*, शुक्तिका, तोयशुक्तिका, पटोलकः, पुटिका, मुक्तास्फोटः, मुक्तागारं, मुक्ताप्रसूः *f.*; 'oyster-shell,' शुक्तिपुटं, शुक्तिपेशी.

Oyster-woman, oyster-wench, *s.* शुक्तिविक्रयिणी, शुक्तिविक्रेत्री.

P.

Pabular, pabulous, *a.* पौष्टिकः -की -कं, पोषकः -का -कं, पुष्टिकरः &c.

Pabulum, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, पौष्टिकं. *See* Food.

Pace, *s.* (A step) क्रमणः, पादपातः, पदक्रमः, पदन्यासः, पादन्यासः, पदविक्षेपः, पादविक्षेपः, पदाक्षेपः, पदक्रमः, पदं, क्रमः.—(Gait) गतिः, गमनं, चारः, चरणं, चलनं, अयनं.—(Of horses) धारः -रा, चारः, चारकः पदविक्षेपः, अयनं; 'a horse with a good pace,' सुखायनः, सुखचारः. A horse's paces are, 'walk,' आस्कन्दितं; 'trot,' धौरितकं; 'sidling,' रेचितं; 'gallop,' वल्गितं; 'vaulting,' प्लुतं.—(Of an elephant) गजक्रमः.—(Degree of celerity) क्रमः, पदक्रमः, गतिवेगः; 'a quick pace,' द्रुतपदं; 'at a good pace,' क्षिप्रपदक्रमं; 'going at a quick pace,' द्रुतगामी -मिनी -मि (न्), द्रुतक्रमः -मा -मं, अविलम्बितक्रमः &c.

To pace, *v. n.* क्रम् (c. 1. क्रामति, c. 4. क्राम्यति, क्रमितुं), क्रमे क्रमे चल् (c. 1. चलति -लितुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं) or गम् (c. 1. गच्छति, गन्तुं) or पदन्यासं कृ; 'to pace up and down,' इतस्ततः क्रम् or चल् or भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), परिक्रमं कृ; 'pacing to and fro,' चङ्क्रम्यमाणः -णा -णं.

To pace, *v. a.* पदन्यासेन मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

Paced, *a.* (Having a particular gait) गति in comp., गतिक in comp.; as, 'slow-paced,' मन्दगतिः -तिः -ति, मन्दगतिकः -का -कं.

Pacific, pacificatory, *a.* शमकः -का -कं, शान्तिकः -की -कं, शमी -मिनी -मि (न्), शमकारी &c., शमकारकः -का -कं, उपशमकः &c., प्रशमकः &c., शान्तिकरः -रा -रं, शान्त्यात्मकः &c., सामोपचारकः &c., सामोपायकः &c.

Pacification, *s.* शमनं, प्रशमनं, उपशमनं, शान्तिः *f.*, उपशान्तिः *f.*, प्रशान्तिः *f.*, शान्तिकरणं, सान्त्वनं -ना, साम *n.* (न्), सामोपचारः,

सामोपायः, सामोपायप्रयोगः, कलहशान्तिः *f.*, विग्रहशान्तिः, क्रोधशान्तिः, क्रोधहरणं.—(Making peace) सन्धिकरणं, ऐक्यकरणं.—(Peace made) सन्धिः *m.*

PACIFICATOR, PACIFIER, *s.* सन्धिकर्त्ता *m.* (र्त्तृ), शमकः. *See* PACIFIC.

PACIFIED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, उपशान्तः &c., प्रशान्तः &c., कृतशान्तिः -न्तिः -न्ति, शान्तक्रोधः -धा -धं, गतक्रोधः &c.; 'to be pacified,' शम् (c. 4. शाम्यति, शमितुं), प्रसद् (c. 1. -सीदति -सत्तुं), तुष् (c. 4. तुष्यति, तोष्टुं).

To PACIFY, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, अभिशान्त्व्, परिशान्त्व्, प्रसद् (c. 10. -सादयति -यितुं), अभिप्रसद्, साम् (c. 10. सामयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, परितुष्, सम्परितुष्.

PACK, *s.* (Bundle, bale) भाण्डकं, भाण्डं, भारः, कूर्चः, पोटलिका, पोट्टली, गुच्छः -च्छकः, वासनं. वरण्डः -ण्डकः.—(Of hounds or dogs) श्वगणः, कुक्कुरगणः, श्वसंघः, कुक्कुरसमूहः, शुनीरः; 'one who keeps a pack of hounds,' श्वागणिकः.—(Number of persons) गणः, जनसमूहः, संघः, मण्डलं, सङ्घः.—(Heap) राशिः *m.*, सङ्ग्रहः, सञ्चयः, वृन्दं, समवायः.

To PACK, *v. a.* (Bundle up, press together) पुट् (c. 10. पुटयति -यितुं), पुटीकृ, सम्पुटीकृ, वासनीकृ, भाण्डीकृ, कूर्चीकृ, कूर्चं कृ, गुच्छीकृ, पोटलिकां कृ, कोशीकृ.—(In a box) भाण्डे निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं), कोशे or कोषे निविश् or निधा.—(Put together or unite with fraudulent design) कुकर्म्मसम्पादनार्थं संयुज् (c. 10. -योजयति -यितुं) or सङ्गम् (c. 10. -गमयति -यितुं) or एकीकृ.—(A jury or assembly of any kind) स्वार्थसम्पादनार्थं स्वपक्षपातिनो धर्म्मसभां प्रविश् or स्वपक्षपातिनः सभ्यपदे or सभासदधिकारे नियुज्.—(Pack off, dismiss) प्रस्था in caus. (-स्थापयति -यितुं), अपसृ (c. 10. -सारयति -यितुं).

To PACK, *v. n.* (Be pressed together, or bundled together) पुटीभू, सम्पुटीभू, वासनीभू.—(Be placed in a box) भाण्डस्थः -स्था -स्थं भू, कोषस्थः &c. भू.—(Depart in haste) त्वरितम् अपगम् (c. 1. -गच्छति -गन्तुं).

PACKAGE, *s.* भाण्डकं, भाण्डं, वासनं, वरण्डः -ण्डकः, कूर्चः, पोटलिका.

PACK-CLOTH, *s.* वासनं, वासनपटः, वेष्टनं, वेष्टनपटः.

PACKED, *p. p.* (Bound together in a bundle) पुटीकृतः -ता -तं, सम्पुटीकृतः &c., कूर्चीकृतः &c.—(In a box) भाण्डस्थः -स्था -स्थं, वासनस्थः &c., भाण्डीकृतः &c., वासनीकृतः &c.

PACKET, *s.* (Small package) कूर्चः, पोटलिका, पोट्टली, समुद्गका.—(Ship employed in carrying despatches) पत्रवाहिनी नौः, राजपत्रवाहका नौः, लेखहारिणी नौका, वेगवती नौका; 'steam-packet,' वाष्पीयनौः *f.*

PACK-HORSE, *s.* स्यूरी *m.* (न्), स्योरी *m.*, स्युरी *m.*, स्योरी *m.*, पृष्ठ्यः.

PACK-SADDLE, *s.* पर्य्याणं, पर्य्ययणं, पल्ययनं, पल्यानं.

PACK-THREAD, *s.* शणसूत्रं, सणसूत्रं, सनसूत्रं, शणतन्तुः *f.*, पवित्रकं.

PACT, PACTION, *s.* समयः, नियमः, संविद् *f.*, उपगमः, सङ्केतः.

PACTIONAL, PACTITIOUS, *a.* सामयिकः -की -कं, साङ्केतिकः -की -कं.

PACTOLUS, *s.* (A fabulous river) जम्बुः *m.*, जम्बुनदी.

PAD, *s.* (An easy paced horse) सुखायनः, सुखचारः.—(Foot-pad) सारणिकघ्नः, पादविकघ्नः, परिपन्थी *m.* (न्), पारिपन्थिकः.—(Bolster, cushion) उपधानं -नीयं, पुष्टरः, विस्तरः, बालिशं, आस्तरणं, उपबर्हः, अजिनं, पट्टः, पटः.—(Hair or other soft substance) लोमादि मृदुवस्तु *n.*

To PAD, *v. a.* (Stuff or furnish with hair or other soft substance) लोमादिमृदुवस्तुना आस्तृ (c. 5. -स्तृणोति -स्तरितुं -रीतुं), मृदुलोमादिना पॄ (c. 10. पूरयति -यितुं) or युज् (c. 10. योजयति -यितुं) or समायुज्.

To PAD, *v. n.* (Travel slowly) क्रमे क्रमे or शनैः शनैर् व्रज् (c. 1. व्रजति -जितुं).

PADDED, *p. p.* or *a.* मृदुलोमादिपूरितः -ता -तं, मृदुवस्तुपूरितः -ता -तं.

PADDING, *s.* मृदुलोमादि *n.*, लोमादिमृदुवस्तु *n.*, पूरणं, भरणं.

To PADDLE, *v. n.* (Beat the water with an oar) नौकादण्डेन जलं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or तड् (c. 10. ताडयति -यितुं), जलक्षेपणं कृ.—(Play in the water) जले क्रीड् (c. 1. क्रीडति -डितुं), जलक्रीडां कृ.—(Finger) अङ्गुलिचेष्टां कृ, अङ्गुलिव्यापारं कृ.

To PADDLE, *v. a.* (Propel by a paddle) नौकादण्डेन चल् (c. 10. चालयति -यितुं).

PADDLE, *s.* (Oar) नौकादण्डः, क्षेपणिः -णी *f.*, क्षिपणिः -णी *f.*, अरित्रं, नौचालनी. *See* OAR.—(Blade of the oar) क्षेपणिफलकं.

PADDLE-BOX, *s.* क्षेपणिकोशः, क्षेपणिकोषः, क्षेपण्याधारः.

PADDLE-WHEEL, *s.* क्षेपणिचक्रं, नौचालनचक्रं, नौचालनी.

PADDOCK, *s.* वाटी, वाटिका, वाटः -टं. विवीतः, प्राचीरपरिवृतं क्षेत्रं.

PADLOCK, *s.* तालकं, तालः -ला, तालयन्त्रं, प्रतिताली, द्वारकीलः.—(Clasp) कुडुपः.

To PADLOCK, *v. a.* तालकेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), तालबद्धं -द्धां कृ.

PÆAN, PEAN, *s.* जयगानं, जयशब्दः, जयध्वनिः *m.*, जयगीतं.

PAGAN, *s.* देवतार्चकः, देवतापूजकः, प्रतिमापूजकः, मूर्त्तिपूजकः, देवतासेवी *m.* (न्), असद्धर्म्मसेवी *m.* (न्), असद्धर्म्मावलम्बी *m.* *See* IDOLATER.

PAGAN, *a.* प्रतिमापूजकसम्बन्धी -न्धिनी -न्धि (न्), मूर्त्तिपूजकसम्बन्धी.

PAGANISM, *s.* प्रतिमापूजा, मूर्त्तिपूजा, देवतार्चा, देवतार्चनं -ना, मूर्त्तिसेवा -वनं, असद्धर्म्मावलम्बनं. *See* IDOLATRY, HEATHENISM.

PAGE, *s.* (Of a book) पृष्ठं, फलकः -कं, पत्रं, पत्रिका.—(Boy attendant) पार्श्वानुचरः, पार्श्वपरिचरः, बालसेवकः, बालानुचरः.

To PAGE, *v. a.* पृष्ठाङ्कनं कृ, पत्राङ्कनं कृ, पृष्ठसंख्याङ्कनं कृ.

PAGEANT, *s.* (Statue in show, &c.) शोभामूर्त्तिः *f.*, शोभाप्रतिमा.—(Show, spectacle) कौतुकं, चमत्कारः, चमत्कृतिः *f.*, चमत्करणं, आडम्बरं, प्रेक्षा, प्रेक्षणं, शोभा, यात्रा.

PAGEANT, *a.* कौतुकी -किनी -कि (न्), आडम्बरी &c., चमत्कारकः -का -कं, शोभनः -ना -नं, अतिशोभनः &c., यात्रिकः -की -कं.

PAGEANTRY, *s.* कौतुकं, चमत्कारः, आडम्बरं, शोभा. *See* PAGEANT, *s.*

PAGINAL, *a.* पृष्ठ्यः -ष्ठ्या -ष्ठ्यं, पुस्तकपत्रसम्बन्धी &c.

PAGODA, *s.* देवतामन्दिरं, देवताभवनं, देवतायतनं, देवमन्दिरं.

PAID, *p. p.* शोधितः -ता -तं, परिशोधितः &c., परिशुद्धः -द्धा -द्धं, अपाकृतः -ता -तं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, विगणितः -ता -तं, निस्तारितः -ता -तं, निरादिष्टः -ष्टा -ष्टं, गृहीतवेतनः -ना -नं,

PAIL, *s.* पात्रं, भाजनं, काष्ठपात्रं, जलपात्रं, जलभाजनं; 'for milk,' दोहनं -नी, गोदोहनी, दुग्धभाण्डं. *See* MILK-PAIL.

PAIN, *s.* दुःखं, पीडा, वेदना -नं, व्यथा, आर्त्तिः *f.*, तापः, सन्तापः, परितापः, बाधा, विबाधा, आबाधा, यातना, कृच्छ्रं, कष्टं, क्लेशः, खेदः, उद्वेगः, यन्त्रणं, दुःखं, दुःखितं, असुखं, तोदः -दनं, रायणं, विबाधकं, विराधनं, प्रसूतिजं, आमनस्यं, आमानस्यं, अमानस्यं, आभीलं; 'bodily pain as opposed to mental,' शरीरपीडा, वेदना, कृच्छ्रं, व्याधिः *m.*; 'pain in the head,' शिरोवेदना, शिरःपीडा, शिरोर्त्तिः *f.*; 'in the teeth,' दन्तवेदना; 'sharp pain,' शूलः -लं, तीव्रवेदना; 'creeping or flying pain,' वेगः; 'rheumatic pains in the bones,' अस्थिशूलः -लं; 'in the loins,' कटिवेदना; 'pains of hell,'

यातना, कारणा, याम्ययातना; 'of labor,' प्रसववेदना, गर्भवेदना, प्रसवव्यथा; 'of death,' प्राणान्तवेदना; 'suffering pain,' दुःखभागी -गिनी -गि (न्), दुःखभोगी &c., दुःखी &c.; 'accession of pain,' दुःखसंयोगः; 'causing pain,' पीडाकरः -रा -रं, दुःखकरः &c.; 'act of causing pain,' पीडाकरणं, पीडनं; 'freed from pain,' दुःखातीतः -ता -तं.—(Mental pain, disquietude) मनोदुःखं, मनःपीडा, मनस्तापः, मनोव्यथा, मानसी व्यथा, चित्तवेदना, चित्तोद्वेगः, आधिः *m*.—(Pains, toil, effort) यत्नः, प्रयत्नः, कष्टं, आयासः, प्रयासः, उद्योगः, उत्साहः, व्यवसायः, चेष्टा, उद्यमः, श्रमः, परिश्रमः, क्लेशः, आस्था; 'to take pains,' यत् (c. 1. यतते -तितुं), प्रयत्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, घट् (c. 1. घटते -टितुं), उद्योगं कृ, यत्नं कृ, उत्साहं कृ.—(Penalty) दण्डः, साहसं, शिक्षिः *f*., शिक्षा.

POLITIC, *a.* (Skilful in managing public affairs) नीतिकुशलः -ला -लं, नीतिज्ञः -ज्ञा -ज्ञं, नीतिविद्याज्ञः -ज्ञा -ज्ञं, नीतिविशारदः -दा -दं, नीतिदक्षः -क्षा -क्षं, नीतिमान् -मती -मत् (त्), नीतिविद् *m. f. n.*, नयविद्, नीतिचतुरः -रा -रं.—(Skilful in the management of affairs generally) व्यवहारकुशलः -ला -लं, व्यवहारदक्षः -क्षा -क्षं, कर्म्मनिर्वाहकुशलः -ला -लं, कुशलः -ला -लं, विचक्षणः -णा -णं, निपुणः -णा -णं.—(Wise, well devised, adapted to its end) सुनीतः -ता -तं, सुयुक्तः -क्ता -क्तं, सुप्रयुक्तः &c., सुघटितः &c., सम्यङ्नीतः &c., यौक्तिकः -की -कं, सुसमीक्ष्य or सुविमृश्य or सुसमीक्षापूर्व्वं कृतः -ता -तं, अर्थसम्पादकः -का -कं, अर्थसाधकः -का -कं, कार्य्यसाधकः &c., अर्थकरः -रा -री -रं, हितः -ता -तं.

POLITICAL, *a.* नीतिसम्बन्धी -न्धिनी &c., नीतिविद्यासम्बन्धी &c., राजनीतिसम्बन्धी &c., राज्यनयनसम्बन्धी &c., राज्यव्यवहारसम्बन्धी &c., नीतिविषयकः -का -कं, राजनीतिविषय[illegible] -या -यं, राजकीयः -या -यं, नीति or देश or राष्ट्र or राज्य in comp.; as, 'political lore,' नीतिविद्या, नीतिशास्त्रं; 'political rights,' देशाधिकारः, पौरजनाधिकारः.

POLITICAL ECONOMY, *s.* नीतिविद्या, देशपोषणविद्या, देशपालनविद्या, राष्ट्रपालनविद्या, राष्ट्रपोषणविद्या, राज्यव्यवस्थाविद्या, राज्यनिर्वाहविद्या, राज्यकर्म्मनयः -यनं.

POLITICALLY, *adv.* नीतिमपेक्ष्य, नीतिविद्यामपेक्ष्य, राज्यव्यवस्थामपेक्ष्य.

POLITICIAN, *s.* नीतिज्ञः, नीतिकुशलः, नीतिविद् *m.*, नीतिवेदी *m.* (न्), नीतिविशारदः, नीतिविद्याज्ञः, राजनीतिकुशलः, राजनीतिविशारदः, नयविशारदः.

POLITICS, *s.* (Science of government) नीतिः *f.*, नीतिविद्या, नयः, राजनीतिः *f.*, राजनीतिविद्या, नीतिशास्त्रं, राजनीतिशास्त्रं, राज्यनयनविद्या, राज्यशासनविद्या.—(Political or public affairs) राज्यविषयाः *n. pl.*, राज्यकर्म्माणि *n. pl.*, राज्यकार्य्याणि *n. pl.*, देशव्यवहारः, राष्ट्रव्यवहारः.

POLITY, *s.* (System of government) राज्यनीतिः *f.*, राज्यरीतिः *f.*, राज्यनीतिकल्पं, राज्यव्यवस्था, राज्यस्थितिः *f.*, राज्यनियमः, राज्यविधिः *m.*, राज्यप्रवृत्तिः *f.*, राज्यकरणनियमः, नीतिः *f.*, दण्डनीतिः *f.*

POLL, *s.* (Head) मुण्डः -ण्डं -ण्डकं, शिरस् *n.*, शीर्षं, मस्तकः -कं.—(Entry of the names of electors) नामाभिलेखनं, नामलिखनं, नामलेखनं, नामारोपणं, नामसमारोपणं.—(List of names) नामावलिः -ली *f.*, नामपरिसंख्या.

To POLL, *v. a.* (Cut off the hair) केशान् छिद् or लू or आवप्.—(Enter names of electors, &c., in a list) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. or आरुह् or अभिलिख् or लिख्.

Pollard, *s.* छिन्नाग्रवृक्षः, छिन्नाग्रद्रुमः, लूनाग्रवृक्षः, लूनाग्रतरुः *m.*

Polled, *p. p.* (Lopped) छिन्नः -न्ना -न्नं, लूनः -ना -नं.—(Registered as the names of voters) नामावलिपत्रारोपितः -ता -तं, अभिलिखितः -ता -तं.

Pollen, *s.* (Of a flower) परागः, रजस् *n.*, पुष्परजस् *n.*, पुष्परेणुः *m.*, पांशुः *m.*; 'laden with pollen,' परागवान् -वती -वत् (त्), परागी -गिणी -गि (न्).

To pollute, *v. a.* दुष् (c. 10. दूषयति -यितुं), सन्दुष्, प्रतिदुष्, मलिनीकृ, मलिन (nom. मलिनयति -यितुं), कलुषीकृ, कलुष (nom. कलुषयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, दिह् (c. 2. देग्धि -ग्धुं), मलेन दुष् or लिप् or अञ्ज् (c. 7. अनक्ति, अंक्तुं), कलङ्क (nom. कलङ्कयति -यितुं), समलीकृ, अमेध्येन लिप्, अमेध्यीकृ, मलीमसीकृ, अपवित्रीकृ.—(Taint with guilt) दुष्, भ्रंश् (c. 10. भ्रंशयति -यितुं), भ्रष्टीकृ, भ्रष्टं -ष्टां कृ.—(A virgin) कन्यां दुष् or धृष् (c. 10. धर्षयति -यितुं).

Polluted, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं, मलदूषितः &c., मलिनितः -ता -तं, मललिप्तः -प्ता -प्तं, लिप्तः &c., अमेध्यलिप्तः &c., अमेध्याक्तः -क्ता -क्तं, कलुषितः -ता -तं, कलुषीकृतः &c., मलीमसः -सा -सं, समलः -ला -लं, मलवान् -वती -वत् (त्), कलङ्कितः -ता -तं.—(As a virgin) दूषिता, भ्रष्टा, धर्षिता.

Polluter, *s.* दूषकः, दूषणः, कलुषकारी *m.* (न्), मलावहः, अशौचकृत्.

Pollution, *s.* (The act) दूषणं, मलदूषणं, मललेपनं, मलिनीकरणं, कलुषीकरणं, अमेध्यदूषणं, अमेध्यलेपः, अपवित्रीकरणं.—(The state) मलिनत्वं, मालिन्यं, समलता -त्वं, अमेध्यता -त्वं, मलदूषितत्वं, अमेध्यलिप्तता, अमेध्याक्तत्वं, अशुचित्वं, अशौचं -चत्वं, अपवित्रता -त्वं, दुष्टता -त्वं.—(Nocturnal) स्वप्नदोषः, स्वप्नावस्था, स्वप्नमध्ये शुक्रपातः.

Poltroon, *s.* कापुरुषः, कुपुरुषः, क्लीबः, कातरः, हतकः, कृपणः, भीरुजनः, निर्वीर्यः, धैर्यहीनः, शौर्यहीनः, अधीरः.

Poltroonery, *s.* क्लीबता, कापुरुषत्वं, अपौरुषं, कातरता, भीरुता.

Polyandrous, polyandrist, *s.* बहुभर्तृका, बहुपतिका, अनेकभर्तृका.

Polyandry, *s.* बहुभर्तृत्वं, बहुभर्तृधारणं, अनेकपतिधारणं.

Polychord, *a.* बहुतन्त्री -न्त्रिणी -न्त्रि (न्), बहुतन्तुः -न्तुः -न्तु, अनेकतन्त्री &c.

Polygamist, *s.* (Practiser of polygamy) बहुभार्य्यः, अनेकभार्य्यः, बहुपत्नीकः, दारी *m.* (न्), अनेकस्त्रीकः.—(Defender of it) बहुपत्नीवादी *m.* (न्).

Polygamy, *s.* बहुपत्नीत्वं, बहुभार्य्यत्वं -ता, अनेकभार्य्यता, सापत्न्यं.

Polygenous, *a.* बहुविधः -धा -धं, अनेकविधः &c., बहुप्रकारः -रा -रं.

Polyglot, *a.* बहुभाषः -षा -षं, अनेकभाषः -षा -षं.

Polyglot, *s.* बहुभाषग्रन्थः, अनेकभाषग्रन्थः, बहुभाषपुस्तकं.

Polygon, *s.* बहुकोणः -णं, बहुभुजः, बह्वस्रं -स्री, अनेकास्रं -स्री, बहुकोणाकृतिः *f.*, बह्वस्राकृतिः *f.*, बहुकोणा मूर्त्तिः.

Polygonal, polygonous, *a.* बहुकोणः -णा -णं, बहुभुजः -जा -जं, बह्वस्रः -स्रा -स्रं, अनेकास्रः -स्रा -स्रं.

Polymathy, *s.* बहुविद्याज्ञानं, अनेकविद्याज्ञानं, बहुशास्त्रज्ञानं.

Polypetalous, *a.* बहुदलः -ला -लं, अनेकदलः &c., बहुदली -लिनी &c.

Polyphagous, *a.* बहुभक्षः -क्षा -क्षं, बहुखादकः -का -कं, बह्वाशी -शिनी &c.

Polyphonous, *a.* बहुस्वरः -रा -रं, बहुस्वनः -ना -नं, बहुध्वनिः -निः -नि.

Polypus, *s.* बहुपादः, बहुपाद् *m.*, अनेकपाद्, बहुमूलः, अनेकमूलः.

Polyspermous, *a.* बहुबीजः -जा -जं, प्रचुरबीजः &c., अनेकबीजः &c.

Polysyllabic, *a.* बह्वक्षरः -रा -रं, अनेकाक्षरः &c., बह्वक्षरी -रिणी -रि (न्).

Polysyllabic, *s.* बह्वक्षरं, बह्वक्षरशब्दः, अनेकाक्षरशब्दः.

Polytheism, *s.* बहुदेवमतं, बहुदेववादः, अनेकदेवमतं, अनेकवादः.

Polytheist, *s.* बहुदेवमतावलम्बी *m.* (न्), अनेकदेववादी *m.*, अनेकवादी *m.*

Pomander, *s.* भावितं, वासितं, वासितचूर्णं, सुगन्धिचूर्णं.

Pomatum, pomade, *s.* विलेपनं, सुगन्धिलेपः, गात्रानुलेपनी, वसामर्दनं.

Pomegranate, *s.* (The tree) दाडिमः -मी, दाडिमः, दालिमः, डालिमः, करकः, रक्तबीजः, शुकवल्लभः, फलखाडवः, मणिबीजः, मधुबीजः, कुचफलः, सुनीलः, पिण्डीरः, नीरजः.—(Its fruit) दाडिमं, दालिमं, दाडिमफलं.

Pommel, *s.* (Knob) पिण्डः, गण्डः, गुल्मः, आभोगः.—(Of a saddle) पर्य्याणपिण्डः, पर्य्याणबहिःस्थपिण्डः, पर्य्याणगुल्मः.

To pommel, *v. a.* तड् (c. 10. ताडयति -यितुं), वेत्राघातं कृ, दण्डाघातं कृ.

Pomp, *s.* (Procession) यात्रा, यात्राप्रसङ्गः.—(Show) आडम्बरं, ऐश्वर्य्यं शोभा, प्रतापः, अतिप्रतापः, अतिशोभा, दम्भार्थं शोभा or तेजस् *n.* चमत्कारः, कौतुकं. *See* Parade, pageantry.

Pompous, *a.* (Displaying pomp, showy) महाप्रतापः -पा -पं, अतिप्रतापी -पिनी -पि (न्), अतिशोभनः -ना -नं, आडम्बरी &c., कौतुकं &c.—(Ostentatious) दाम्भिकः -की -कं, दम्भी &c., दम्भार्थकः -का -कं, साटोपः -पा -पं, अतिगर्व्वितः -ता -तं, दर्पाध्मातः &c., गर्व्वितः &c. गर्व्वितवाक्यः -क्या -क्यं, विकत्थनः -ना -नं.

Pompously, *adv.* (Magnificently) अतिप्रतापेन, अतिशोभापूर्व्वं, साडम्बरं —(Ostentatiously) दम्भार्थं, सदम्भं, दम्भपूर्व्वं, सगर्व्वं, गर्व्वितप्रकारेण लोकादर्शनार्थं, विकत्थनपूर्व्वं, साटोपं.

Pompousness, *s.* (Magnificence) ऐश्वर्य्यं, सप्रतापत्वं. *See* Pomp.—(Ostentatiousness) दम्भः, दाम्भिकत्वं, साटोपत्वं, गर्व्वितत्वं, विकत्था दर्पाध्मातता.

Pond, *s.* तडागः, जलाशयः, जलाधारः, सरस् *n.*, ह्रदः, खातं, सरोवरं -रं, क्रीडासरोवरः, वापी -पिः *f.*, कासारः, पुष्करिणी, सरसी, पद्माकरः मीनगोधिका; 'a natural pond,' अखातं, देवखातकं; 'an oblong pond,' दीर्घिका.

To ponder, *v. a.* and *n.* मनसा विचर् (c. 10. -चारयति -यितुं) or विगण् (c. 10. -गणयति -यितुं), चिन्त् (c. 10. चिन्तयति -यितुं), विचिन्त् सञ्चिन्त्, ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, सन्ध्यै, भू (c. 10. भावयति -यितुं), विभू, सम्भू, विमृश् (c. 6. मृशति -ष्टुं), परिमृश् वितर्क् (c. 10. -तर्कयति -यितुं), अनुतर्क्.

Ponderable, *a.* (That may be weighed) तुलायोग्यः -ग्या -ग्यं तुलनीयः -या -यं.—(To be pondered) चिन्त्यः -न्त्या -न्त्यं, चिन्तनीयः -या -यं

Ponderation, *s.* (Act of weighing) तुलाधारणं.—(Act of pondering) सुविचारणं -णा, सुचिन्तनं, विगणनं -ना, सम्भावना.

Pondered, *p. p.* चिन्तितः -ता -तं, सुविचारितः &c., विगणितः &c. सुचिन्तितः &c.

Ponderosity *s.* भारित्वं, सभारत्वं, अतिभारित्वं, गुरुता, अतिगुरुता -त्वं गरिमा *m.* (न्), भारवत्त्वं.

Ponderous, *a.* भारी -रिणी -रि (न्), अतिभारी &c., सभारः -रा -रं भारवान् -वती -वत् (त्), गुरुः -र्व्वी -रु, अतिगुरुः &c.

Ponderously, *adv.* अतिभारेण, सुभारेण, सभारं, सगौरवं, अतिगुरु.

Poniard, *a.* कट्टारः, कृपाणी, शङ्कुः *m.*, छुरिका, असिपुत्रिका, कर्त्तरी.

To poniard, *v. a.* कट्टारेण व्यध् (c. 4. विध्यति, व्यद्धुं), छुर् (c. 6. छुरति -रितुं)

Pontage, *s.* सेतुकरः, सेतुशुल्कः -ल्कं, सेतुदेयं.

Pontiff, *s.* प्रधानधर्म्माध्यक्षः, प्रधानधर्म्माधिकारी *m.* (न्), मुख्यधर्म्माध्यक्षः महाधर्म्माध्यक्षः, महाधर्म्माधिकारी *m.* (न्), प्रधानयाजकः, मुख्यपुरोहितः महायाजकः.

Pontifical, *a.* प्रधानधर्म्माध्यक्षसम्बन्धी -न्धिनी &c., प्रधानयाजकीयः -या -यं

PONTIFICATE, *s.* प्रधानधर्म्माध्यक्षस्य पदं or अधिकारः, धर्म्माध्यक्षता -त्वं.

PONTOON, *s.* सेतुबन्धे प्रयुक्तस् तरालुः or तरान्धुः; 'bridge,' तरालुबद्धसेतुः.

PONY, *s.* क्षुद्रघोटकः, क्षुद्राश्वः, क्षुद्रशरीरी घोटकः or अश्वः.

POOL, *s.* तडागः, जलाशयः, जलाधारः, पल्वलं, कुण्डं, सरस् *n.*, ह्रदः, कासारः, पुष्करिणी, निपानं, परिवापः, कूपं.

POOP, *s.* नावः पश्चिमभागः or पश्चाद्भागः, नौपृष्ठं, नौकापृष्ठं.

POOR, *a.* (Destitute of money or property) दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, अधमः -मा -मं, धनहीनः &c., अल्पधनः &c., निर्धनकः -का -कं, क्षीणधनः -ना -नं, धनशून्यः -न्या -न्यं, दीनः -ना -नं, अर्थहीनः &c., वित्तहीनः &c., द्रव्यहीनः &c., द्रव्यशून्यः &c., विभवहीनः &c., अल्पद्रव्यः -व्या -व्यं, निःस्वः -स्वा -स्वं, गतार्थः -र्था -र्थं, दुर्गतः -ता -तं, अनर्थः -र्था -र्थं, निष्काञ्चनः -ना -नं, निःकाञ्चनः &c., अकाञ्चनः &c., निष्किञ्चनः &c., दारिद्र्यग्रस्तः -स्ता -स्तं, दरिद्रितः -ता -तं, दरिद्रायकः -का -कं, दरिद्रिता -त्री -तृ (तृ), कृपणः -णा -णं, अधन्यः -न्या -न्यं, दुराढ्यः -ढ्या -ढ्यं; किंवान् -वती -वत् (त्); 'to be poor,' दरिद्रा (c. 2. दरिद्राति -द्रितुं), दरिद्रीभू.—(Paltry, mean, inferior) तुच्छः -च्छा -च्छं, कृपणः -णा -णं, कुत्सितः -ता -तं, गर्हितः &c., निर्गुणः -णा -णं, विगुणः &c., क्षुल्लकः -का -कं, अधमः -मा -मं, जघन्यः -न्या -न्यं, खलः -ला -लं, तृणप्रायः -या -यं, अनुत्तमः -मा -मं, or expressed by दुर्, कु, कल्प, पाशं, देशीय in comp.; as 'a poor poet,' कुकविः *m.*, कविकल्पः &c.; 'a poor grammarian,' कुवैयाकरणः, वैयाकरणपाशः; 'poor fare,' कदन्नं.—(Wretched, pitiable) दीनः -ना -नं, कृपणः -णा -णं, दुर्बलः -ला -लं, अनुकम्प्यः -म्प्या -म्प्यं, दुःखी -खिनी &c., दुःखान्वितः &c., वराकः -की -कं; 'poor wretch,' तपस्वी *m.* (न्), कृपणजनः.—(As soil) रूक्षः -क्षा -क्षं, ईरिणः -णा -णं.—(Word of endearment) प्रियः -या, दयितः -ता, वत्सः -त्सा.

POOR-HOUSE, POOR-ASYLUM, *s.* धर्म्मशाला, दरिद्रशाला, दरिद्रालयः यं, दरिद्राश्रयः, दरिद्रगृहं.

POORLY, *a.* (Somewhat indisposed) अस्वस्थः -स्था -स्थं, ईषदस्वस्थः &c., ईषद्रोगी -गिणी -गि (न्), असुस्थः -स्था -स्थं, ईषद्रोगार्त्तः -र्त्ता -र्त्तं.

POORLY, *adv.* (Without wealth, in indigence) दारिद्र्येण, सदारिद्र्यं, दरिद्रवत्, निर्धनवत्, कृपणं, दीनं, सदैन्यं, धनेन विना.—(With little success) असिद्धिपूर्व्वं, असिद्ध्या, सिद्धिं विना, फलं विना, निष्फलं.

POORNESS, *s.* (Want of money or property) दरिद्रता, दारिद्र्यं, दारिद्रं, निर्धनता -त्वं, अधनता, धनहीनता, धनशून्यता, दीनता, दैन्यं, अर्थहीनता, वित्तहीनता. *See* POVERTY.—(Meanness, paltriness) तुच्छता, कृपणता, कार्पण्यं, निर्गुणता, खलता.—(Barrenness, unproductiveness) रूक्षता, शुष्कता -त्वं, निष्फलता, विफलता -त्वं, अफलदत्वं, अफलोत्पादकता.

POOR-SPIRITED, *a.* कृपणबुद्धिः -द्धिः -द्धि, दीनबुद्धिः &c., दीनमनस्कः -स्का -स्कं.

POP, *s.* (Sharp, sudden sound) स्फुत्कारः, स्फुत् indecl., आकस्मिकशब्दः, पट्शब्दः, क्वणितं, आकस्मिकध्वनिः *m.*, अकस्मात्क्वणितं.

To POP, *v. n.* (Enter suddenly) अकस्मात् प्रविश् (c. 6. -विशति -वेष्टुं) or निविश्, आकस्मिकध्वनिपूर्व्वं प्रविश्, आकस्मिकप्रवेशं कृ.—(Pop out) अकस्मात् or आकस्मिकध्वनिपूर्व्वं निर्गम् (c. 1. -गच्छति -गन्तुं) or निर्गतः -ता -तं भू; 'in and out,' गमनागमनं कृ.—(Make a sudden sound) स्फुत् शब्दं कृ, आकस्मिकध्वनिं कृ, अकस्मात् क्वण् (c. 1. क्वणति -णितुं) or ध्वन्, पट् शब्दं कृ.

To POP, *v. a.* (Cause to enter suddenly) अकस्मात् प्रविश् (c. 10. -वेशयति -यितुं) or निविश्, आकस्मिकध्वनिपूर्व्वं प्रविश्.—(Cause to issue suddenly, pop out) अकस्मात् निर्गम् (c. 10. -गमयति -यितुं) or निःसृ (c. 10. -सारयति -यितुं).

POP, *adv.* स्फुत्कारेण, स्फुत् शब्देन, अकस्मात्, आकस्मिकध्वनिपूर्व्वं.

POPE, *s.* रोमीयधर्म्माध्यक्षः, रोमीयधर्म्माधिपतिः *m.*, महाधर्म्माध्यक्षः.

POPINJAY, *s.* शुकः, कीरः. *See* PARROT.

POPISH, *a.* रोमीयधर्म्माध्यक्षसम्बन्धी &c., रोमीयधर्म्मसम्बन्धी &c.

POPLAR, *s.* दीर्घवृक्षः, दीर्घतरुः *m.*, दीर्घपादपः, दीर्घद्रुमः.

POPPY, *s.* खसखसः; 'its juice,' खसखसरसः; 'seed,' खिखा, खिख्या.

POPULACE, *s.* लोकः, प्रजा, सामान्यलोकाः -काः *m. pl.*, साधारणलोकाः -काः *m. pl.*, प्राकृतलोकः, प्राकृतजनाः *m. pl.*, अवरजनाः, अवरलोकाः *m. pl.*, अवरवर्णाः *m. pl.*

POPULAR, *a.* (Pertaining to the common people) लौकिकः -की -कं, साधारणलोकसम्बन्धी &c., सामान्यलोकसम्बन्धी &c., लोक or जन in comp.; 'courting popular favor,' लोकरञ्जनं, जनरञ्जनं, लोकानुरञ्जनं.—(Prevailing among the people, general) लौकिकः -की -कं, सार्व्वलौकिकः &c., लोकसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., लोकरूढः -ढा -ढं, रूढः &c., लोकसम्मतः -ता -तं, लोकमतः &c., लोक or जन in comp.; 'popular usage or custom,' लोकव्यवहारः, जनव्यवहारः, लोकाचारः, जनाचारः, लौकिकाचारः, लोकमर्य्यादा, जनमर्य्यादा, जनरीतिः *f.*, लौकिकरीतिः *f.*, लोकरीतिः *f.*, लोकप्रवाहः; 'popular rumour or report,' लोकप्रवादः, जनप्रवादः, लोकवादः, जनवादः, लोकवार्त्ता, जनवार्त्ता, जनश्रुतिः *f.*, जनरवः, लोकवदन्ती, जनवदन्ती; 'popular story,' लोककथा, जनकथा; 'popular accusation,' जनापवादः; 'odium,' जनविद्वेषः; 'tumult,' प्रकृतिक्षोभः; 'apprehension or acceptation,' लोकग्रहः; 'conforming to popular opinion,' लोकानुसरणं, लौकिकानुसरणं, गतानुगमनं; 'one who does so,' लोकानुसारी *m.* (न्), गतानुगतिकः.—(Suitable to common people) सामान्यलोकयोग्यः -ग्या -ग्यं, सामान्यलोकोपयोगी -गिनी -गि (न्), सर्व्वलोकयोग्यः &c., साधारणः -णी -णं.—(Pleasing to the people, enjoying the favor of people) लोकप्रियः -या -यं, सर्व्वलोकप्रियः &c., जनप्रियः &c., लोकानुकूलः -ला -लं, लोकग्राह्यः -ह्या -ह्यं, सर्व्वप्रियः &c., सकलप्रियः &c.

POPULARITY, *s.* लोकप्रीतिः *f.*, जनप्रीतिः *f.*, लोकप्रियता, सर्व्वलोकप्रीतिः *f.*, लोकानुकूल्यं, लोकानुकूलता, जनानुकूल्यं, जनानुकूलता, जनप्रियता, सर्व्वप्रियता, लोकानुरागः, जनानुरागः, लोकरञ्जनं, लोकसम्मानं, लोकग्राह्यता; 'desire of it,' लोकरञ्जनेच्छा, लोकानुरञ्जनैषा.

POPULARLY, *adv.* लोकतस्, लोकयोग्यं, लौकिकप्रकारेण, लोकरञ्जनार्थं.

To POPULATE, *v. a.* (People) सजनीकृ, सजनं -नां कृ, जनविशिष्टं -ष्टां कृ, वस् in caus.

To POPULATE, *v. n.* प्रजोत्पत्तिं कृ, प्रजोत्पादनं कृ, प्रजावृद्धिं कृ or जन्, प्रजन् (c. 4. -जायते -जनितुं), प्रजाम् उत्पद् (c. 10. -पादयति -यितुं).

POPULATION, *s.* प्रजा, प्रजासंख्या, जनसंख्या, लोकसंख्या, जनाः *m. pl.*, जनता, देशजनता, देशजनाः *m. pl.*, देशप्रजा, लोकः, देशलोकः.

POPULOUS, *a.* बहुप्रजः -जा -जं, बहुजनः -ना -नं, प्रचुरजनः &c., प्रचुरपुरुषः -षा -षं, प्रचुरप्रजः &c., जनसम्बाधः -धा -धं, प्रजाबहुलः -ला -लं, जनपदायुतः -ता -तं, वासितः -ता -तं.

POPULOUSNESS, *s.* बहुप्रजत्वं, प्रजाप्राचुर्य्यं, प्रजाबाहुल्यं, बहुजनत्वं, जनबाहुल्यं, लोकबाहुल्यं, पुरुषप्राचुर्य्यं, पुरुषबाहुल्यं.

PORCELAIN, *s.* कौलालकं, मृण्मयभाण्डानि *n. pl.*, मृद्भाण्डानि *n. pl.*, मार्त्तिकं.

PORCH, *s.* देहली -लिः *f.*, द्वारमण्डपः -पं, वातायनं, द्वारप्रकोष्ठकं, निष्काशः; 'side seat of a portico,' मृगासनं; 'portico before a temple,' सभामण्डपः -पं.

Porcupine, *s.* शल्यकण्टः, शल्यः -ल्यकः, शलाका, शल्ली *m.* (न्), श्वाविद् *m.* (ध्), कण्टकागारः, सेधा; 'his quills,' शललं -ली, शलः -लं.

Pore, *s.* (Of the skin) रोमकूपः, तनुकूपः, रोमरन्ध्रं, लोमरन्ध्रं, लोमकूपः, स्वेदद्वारं, स्वेदमार्गः.—(Small spiracle) सूक्ष्मरन्ध्रं.

To pore, *v. n.* (Read books with fixed application) बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां or अनन्यदृष्ट्या ग्रन्थान् अधी (c. 2. अधीते, अध्येतुं, rt. इ), अत्यभिनिवेशेन or अभिनिविष्टचेतसा or अनन्यमनसा ग्रन्थाध्ययनं कृ, अनन्यदृष्टिर् अध्ययनं कृ.

Pork, *s.* शूकरमांसं, सूकरमांसं, वराहमांसं, वाराहं, शौकरं.

Porker, *s.* शूकरः, वराहः, पचनयोग्यः शूकरशावकः, क्षुद्रशूकरः.

Porous, *a.* (Having interstices in the skin) रोमकूपयुक्तः -क्ता -क्तं, रोमकूपविशिष्टः -ष्टा -ष्टं, रोमकूपमयः -यी -यं, सरोमकूपः -पा -पं.—(Having minute spiracles) सूक्ष्मरन्ध्रयुक्तः -क्ता -क्तं, सूक्ष्मरन्ध्रपूर्णः -र्णा -र्णं, सूक्ष्मरन्ध्रविशिष्टः -ष्टा -ष्टं, सरन्ध्रः -न्ध्रा -न्ध्रं.—(Having interstices for exudation) विरलावयवकः -का -कं, शिथिलावयवकः &c., द्रावकावयवकः &c., स्वेदमार्गविशिष्टः -ष्टा -ष्टं.

Porousness, porosity, *s.* सरोमकूपत्वं, रोमकूपपूर्णता, सूक्ष्मरन्ध्रपूर्णता, बहुरन्ध्रपूर्णता, सूक्ष्मरन्ध्रबाहुल्यं, सरन्ध्रता, विरलावयवत्वं, शिथिलावयवत्वं, द्रावकावयवत्वं.

Porpoise, *s.* शिशुकः, शिशुमारः, उलुपी *m.* (न्), चुलुकी *m.* (न्), अम्बुकूर्म्मः, अम्बुकीशः, सीरकः, वार्किटिः *m.*, जलशूकरः, वारिशूकरः, समुद्रीयशूकरः.

Porridge, *s.* यूषं, यूषः -षं, जुष्कक:, मन्थः, चूर्णधान्यमन्थः.

Porringer, *s.* यूषपात्रं, यूषपात्रं, पात्रं, भाजनं, भाण्डं.

Port, *s.* (Harbour, haven) नौकाश्रयः, नौकाश्रयः, आश्रयः, आश्रयस्थानं, उत्तरणस्थानं, खातं, उत्तरणखातं, नौकोत्तरणयोग्यं खातं, नौबन्धनखातं, नौबन्धनयोग्यं खातं, नौरक्षणस्थानं; 'reaches the desired port,' इष्टस्थानं or इष्टदेशं गच्छति.—(Gate) द्वारं.

Portability, *s.* वाह्यता, सुवाह्यता, सुवहनीयता, हस्तवाह्यत्वं, लघुता.

Portable, *a.* सुवाह्यः -ह्या -ह्यं, वाह्यः &c., वहनीयः -या -यं, सुवहनीयः &c., सुखवाह्यः &c., अनायासवाह्यः &c., सुखवहनीयः &c., हस्तवाह्यः &c., सहजवाह्यः &c., लघुः -घुः -घ्वी -घु.

Portal, *s.* द्वारं, द्वार् *f.*, उपद्वारं, प्रतीहारः, प्रवेशद्वारं, मुखं.

Portcullis, *s.* नगरद्वारोपरिस्थो जङ्गमकपाटः तेन च शत्रोरागमनकाले पातितेन द्वारवर्त्म रुध्यते, द्वारवर्त्मरोधनयन्त्रं.

To portend, *v. a.* अग्रे सूच् (c. 10. सूचयति -यितुं), पूर्व्वं or पूर्व्वं दृश् (c. 10. दर्शयति -यितुं) or प्रदृश्, अनिष्टं सूच् or आविद् (c. 10. वेदयति -यितुं), पूर्व्वचिह्नं or पूर्व्वलक्षणं दा, पूर्व्वलक्षणेन भविष्यत् सूच् or अनिष्टसूचनं कृ or भाविश्यमनसूचनं कृ, भाविक्षयं or उत्पातं or विनिपातं शंस् (c. 1. शंसति -सितुं), कुलक्षणं दा.

Portent, *s.* (Omen) पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, शकुनं, भाविसूचकचिह्नं, भविष्यत्सूचकचिह्नं.—(Omen of ill, prodigy) उत्पातः, उपसर्गः, विनिपातः, व्यतीपातः, अद्भुतं, अरिष्टं, दुर्लक्षणं, अवलक्षणं, दुश्चिह्नं, अवचिह्नं, अपशकुनं, उपप्लवः, उपलिङ्गं, उपद्रवः, अत्याहितं, उपाकृतं, अजन्यं, विनिहतः, अशुभलक्षणं, अनिष्टसूचकचिह्नं, भाविव्यसनसूचकं or भाविक्षयसूचकं चिह्नं, कुलक्षणं; 'ceremonies to avert portents,' अद्भुतशान्तिः *f.*

Portentous, *a.* उत्पातशंसी -सिनी -सि (न्), विनिपातशंसी &c., औत्पातिकः -की -कं, औपसर्गिकः -की -कं, अनिष्टशंसी &c., अनिष्टसूचकः -का -कं, अनिष्टवेदी &c., अशुभशंसी &c., अशुभसूचकः &c., भविष्यसूचकः &c., अभद्रसूचकः &c., अद्भुतशंसी &c., अद्भुतसूचकः &c., अद्भुतः -ता -तं, अत्याहितः &c., शाकुनः -नी -नं, शाकुनिकः -की -कं.

Portentously, *adv.* सोत्पातं, अद्भुतं, उत्पातपूर्व्वं, दुर्लक्षणेन, कुलक्षणेन.

Porter, *s.* (Gate-keeper) द्वारपालः, द्वारी *m.* (न्), द्वाररक्षकः, द्वाःस्थः, द्वारस्थः, द्वाराध्यक्षः, दौवारिकः, द्वारिकः, प्रतिहारः, प्रतीहारः -री *f.*, द्वाःस्थितः, द्वाःस्थितदर्शकः, दर्शकः.—(Carrier of burdens) भारवाहः -हकः, भारवाही *m.* (न्), भारवाहिकः, भारिकः, भारी *m.* (न्), भारहरः, भारहारी *m.*, भारहारकः, वोढा *m.* (ढृ).

Porterage, *s.* (Cost of carriage) वहनमूल्यं, वाहनमूल्यं, भारवाहनमूल्यं.—(Business of a porter) भारवाहनं, भारिककर्म्म *n.* (न्).

Portfolio, *s.* पत्राधारः, पृथुपत्राधारः, महापत्राधारः, बृहत्पत्राधारः.

Porthole, *s.* नौपार्श्वच्छिद्रं, नौपार्श्वमुखं, नौपार्श्ववातायनं.

Portico, *s.* वरण्डः, द्वारप्रकोष्ठकं, बहिर्द्वारप्रकोष्ठकं, द्वारमण्डपः -पं, देहली -लिः *f.*, निष्काशः, वरण्डकः, वातायनं, पिण्डः, द्वारपिण्डः.

Portion, *s.* (Part) अंशः, भागः, विभागः, खण्डः -ण्डकः, अवयवः, अङ्गं, भिन्नं, छेदः, भिन्नं, शकलः -लं.—(Portion allotted, share) विभागः, अंशः, भागः, भाजितं, भाज्यं, वण्टः -ण्टकः, उद्धारः.—(Share of an estate) ऋक्थांशः, ऋक्थभागः, रिक्थभागः, पैतृकरिक्थभागः, दायः, उद्धारः, औद्धारिकं.—(Wife's fortune) स्त्रीधनं, यौतकं, यौतुकं, युतकं, शुल्कः, औद्वाहिकं, अध्यावाहनिकं, कन्याधनं, परिबर्हं.

To portion, *v. a.* (Parcel out) विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, वण्ट् (c. 10. वण्टयति -यितुं), विभागशः or अंशांशि कॢप् or परिकॢप् or विन्यस्, अंश्, व्यंस्.—(Endow) यौतकं or शुल्कं or वृत्तिं दा, प्रतिष्ठां कृ, प्रतिष्ठा.

Portionable, *a.* विभाज्यः -ज्या -ज्यं, भाज्यः &c., वण्टनीयः &c., औद्धारिकः &c.

Portioned, *p. p.* (Divided out) विभक्तः -क्ता -क्तं, प्रविभक्तः &c., संविभक्तः &c., अंशितः -ता -तं, परिकल्पितः &c.—(Endowed) प्रतिष्ठितः -ता -तं, गृहीतशुल्कः -ल्का -ल्कं, गृहीतयौतकः &c.

Portioning, *s.* विभागः, विभाजनं, प्रविभागः, विभागकरणं, भाजनं, अंशनं, उद्धारविभागः, विभागकल्पना, वण्टनं.

Portionless, *a.* अनंशः -शा -शं, अंशहीनः -ना -नं, शुल्कहीनः -ना -नं.

Portliness, *s.* उदरविस्तारः, कायविस्तारः, शरीरगौरवं, शरीरस्थूलता, स्थूलशरीरत्वं, स्थूलकायत्वं, शरीरबृहत्त्वं.

Portly, *a.* (Dignified in mien) गौरवशाली -लिनी -लि (न्), साटोपगामी &c., गौरवगतिः -तिः -ति, गौरववृत्तिः &c.—(Bulky, corpulent) विस्तीर्णोदरः -रा -रं, विस्तीर्णकायः -या -यं, पृथूदरः -रा -रं, स्थूलकायः &c., बृहत्कायः &c., स्थूलशरीरः &c.

Portmanteau, *s.* चर्म्ममयं वस्त्रपात्रं or वस्त्रभाजनं, वस्त्राधारः.

Portrait, *s.* प्रतिमा, प्रतिमानं, उपमा, उपमानं, उपमितिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिकृतिः *f.*, चित्रलेखा, आलेख्यं, चित्राकृतिः *f.*, चित्रं, प्रतिच्छन्दः -न्दकं, प्रतिच्छाया, जीवितव्यक्तिप्रतिमा.

Portrait-painter, *s.* उपमाता *m.* (तृ), चित्रलेखकः, चित्रकारः, चित्रकरः, चित्रलिख् *m.* (ख्), आलेख्यकृत् *m.*, उपमानकृत् *m.*, प्रतिमानकृत् *m.*

Portrait-painting, *s.* चित्रलिखनं, चित्रलेखनं, उपमानकरणं, रूपकरणं.

To portray, *v. a.* (Paint) आलिख्, विलिख्, लिख्, चित्र्, वर्ण्, उपवर्ण्.—(Describe) वर्ण्, अनुवर्ण्, उपवर्ण्, निरूप्.

Portrayed, *p. p.* वर्णितः -ता -तं, आलिखितः &c., चित्रितः &c., चित्रगतः &c.

Portress, porteress, *a.* दौवारिकी, द्वारपालिका, प्रतीहारी, द्वाररक्षकी.

To pose, *v. a.* निरुत्तरीकृ, वाग्रोधं कृ, उत्तररोधं कृ, वाक्यरोधं कृ, प्रतिवाक्यरोधं कृ, वाक्यखण्डनं कृ, उपमर्दं कृ, बाध् (c. 1. बाधते -धितुं), मुह् (c. 10. मोहयति -यितुं), विमुह्, शल्यं कृ.

Posed, *p. p.* निरुत्तरः -रा -रं, निरुत्तरीकृतः -ता -तं, बाधितः -ता -तं,

मोहितः -ता -तं, विमोहितः &c., कुण्ठितः &c., इतिकर्त्तव्यतामूढः -ढा -ढं.

POSER, s. उपमर्दकः, बाधकः, वाग्रोधकः, मोहकः, विमोहकः.

POSITION, s. (Situation) स्थानं, स्थितिः f., अवस्थितिः f., संस्थानं, पदं, आस्पदं, पदविः -वी f.—(Attitude) अङ्गस्थितिः f., शरीरस्थितिः f., आकारः; 'of the feet,' पदन्यासः, पादविन्यासः.—(Principle laid down, proposition advanced) पक्षः, प्रतिज्ञा, फक्किका, प्रमेयं, प्रतिज्ञेयं, प्रतिज्ञातं, भाषा, हेतुः m., पूर्व्वपक्षः, उपन्यासः, अर्थः; 'false position,' हेत्वाभासः, पक्षाभासः, आभासः, मिथ्याहेतुः m.—(State, circumstances) अवस्था, स्थितिः f., दशा, संस्थितिः f., भावः, वृत्तिः f., गतिः f.

POSITIVE, a. (Explicit, express, direct) स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, व्यक्तः -क्ता -क्तं, सुव्यक्तः &c., सुस्पष्टः &c., अवक्रः -क्रा -क्रं, अवक्रार्थः -र्था -र्थं, असन्दिग्धार्थः &c., अगूढः -ढा -ढं, अगर्भितः -ता -तं, प्रत्यक्षः -क्षा -क्षं.—(Peremptory, definite) नियतः -ता -तं, अवश्यकः -का -कं, आवश्यकः -की -कं, सुनियतः -ता -तं, निश्चितः &c., सुनिश्चितः &c., निर्णीतः &c., अवैकल्पिकः -की -कं, अविकल्पकः -का -कं, —(Absolute, real, existing in fact) वास्तवः -वी -वं, वास्तविकः -की -कं, तथ्यः -थ्या -थ्यं, सत्यः -त्या -त्यं, यथार्थः -र्था -र्थं, सन् सती सत् (त्), विद्यमानः -ना -नं, भूतः -ता -तं, तात्त्विकः -की -कं; 'positive charge,' तत्त्वाभियोगः.—(Settled by arbitrary appointment, not inbred) नियोगसिद्धः -द्धा -द्धं, नियोगप्रयुक्तः -क्ता -क्तं, नियोगहेतुकः -का -कं, अभावसिद्धः &c., अस्वाभाविकः -की -कं, अनैसर्गिकः -की -कं, असहजः -जा -जं, वहिर्जातः -ता -तं.—(Confident, sure) दृढनिश्चयः -या -यं, कृतनिश्चयः &c., जातनिश्चयः &c., निश्चितमनाः -नाः -नः (स्), निश्चितमनस्कः -स्का -स्कं, निश्चयी -यिनी -यि (न्), बद्धनिश्चयः -या -यं, दृढमतिः -तिः -ति, निःसंशयः -या -यं, निःसन्देहः -हा -हं.—(Confident in assertion) दार्ढ्येन स्वमतवादी &c. or स्वमताग्रही &c., मताग्रही &c., स्वमताभिमानी &c., मताभिमानी &c., दृढोक्तिः -क्तिः -क्ति, उक्तनिर्वाही &c., प्रोक्तनिर्वाही &c.

POSITIVELY, adv. (Expressly) स्पष्टं, सुस्पष्टं, व्यक्तं, सुव्यक्तं, स्पष्टार्थतस्, अवक्रं, असन्दिग्धं.—(Peremptorily, definitely) नियतं, सुनियतं, अवश्यं, अवश्यमेव, निश्चितं, सुनिश्चितं, विकल्पेन विना.—(Absolutely, really) वस्तुतस्, तत्त्वतस्, यथार्थतस्, तथ्यं, सत्यं, सत्यमेव.—(Confidently, surely) निश्चयेन, दृढनिश्चयेन, दृढनिश्चयपूर्व्वं, सुनिश्चयेन, सुनिश्चयपूर्व्वं, दार्ढ्येन, दृढं, सुदृढं.—(Dogmatically) स्वमताग्रहेण, मताग्रहेण, मताभिमानेन, दृढोक्त्या.

POSITIVENESS, s. (Reality of existence) वास्तविकत्वं, तथ्यता, यथार्थत्वं, सत्ता, सत्त्वं, विद्यमानता, सत्यता -त्वं.—(Peremptoriness) दृढनिश्चयः -यत्वं, सुनिश्चयत्वं, दृढता, सुदृढता, दार्ढ्यं, अवक्रता, सुस्पष्टता, नियतत्वं, सुनियतत्वं, दृढनिर्णयः, सुनिर्णीतत्वं.—(Dogmaticalness) स्वमताग्रहः, मताग्रहः, मताभिमानं, दृढोक्तिः f.

To POSSESS, v. a. (Have, hold) धृ (c. 10. धारयति -यितुं, c. 1. धरति, धर्त्तुं), धा (c. 3. दधाति, धत्ते, धातुं), आधा, विधा, भृ (c. 3. बिभर्त्ति, भर्त्तुं), दध् (c. 1. दधते -धितुं), शील् (c. 10. शीलयति -यितुं), भुज्, आप्, प्राप्.—(Hold in use, enjoy, occupy) भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उपभुज्, परिभुज्, अनुभुज्, अधिभुज्, भोगं कृ, परिभोगं कृ, अधिष्ठा, अध्यास्.—(Gain, obtain information of) आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्, लभ्, उपलभ्, आसद्, अधिगम्, आविश्, समाविश्, आक्रम्, अध्याक्रम्.—(Have power over) अधिकृ, प्रभू, अधिष्ठा, वशीकृ.—(Engross, take up, as a thought, passion, &c.) आविश्, व्याप्, ग्रस्, आक्रम्.—(As an evil spirit, &c.) आविश्, समाविश्.—(Give possession, make possessed of) अधिकारं दा, अधिकृ, युज् in caus. See POSSESSED OF.

POSSESSED, p. p. (Held, occupied, enjoyed) धृतः -ता -तं, धारितः &c., आविष्टः -ष्टा -ष्टं, समाविष्टः &c., आक्रान्तः -न्ता -न्तं, भुक्तः -क्ता -क्तं, परिभुक्तः &c., हस्तगतः -ता -तं, ग्रस्तः -स्ता -स्तं, आस्वादितः &c., अधिष्ठितः &c., अध्यासितः &c., आश्रितः &c., अधीनः -ना -नं.—(Gained) आप्तः -प्ता -प्तं, प्राप्तः &c., लब्धः -ब्धा -ब्धं, आसादितः -ता -तं, अधिगतः &c.—(Engrossed, affected by) आविष्टः &c., समाविष्टः &c., आक्रान्तः -न्ता -न्तं, ग्रस्तः -स्ता -स्तं, उपहतः &c.; as, 'by love,' कामाविष्टः &c.; 'by avarice,' लोभाविष्टः &c.—(Possessed of, endowed with) युक्तः -क्ता -क्तं, अन्वितः -ता -तं, उपेतः -ता -तं, समन्वितः -ता -तं, उपपन्नः -न्ना -न्नं, सम्पन्नः &c., संयुतः -ता -तं, अनपेतः -ता -तं, विशिष्टः -ष्टा -ष्टं, शीलितः &c., सनाथः -था -थं or expressed by the affixes वत्, मत्, and इन्; as, 'possessed of wealth,' धनवान् -वती -वत् (त्), धनी -निनी -नि (न्), धनयुक्तः &c., धनान्वितः &c.; 'possessed of prosperity,' श्रीमान् &c.; 'possessed of learning,' विद्यावान् &c., विद्यासम्पन्नः &c.; 'of a father,' पितृमान्. See POSSESSING.—(By evil spirits) भूताविष्टः &c., भूतसमाविष्टः &c., पिशाचाविष्टः &c., भूतग्रस्तः &c., भूतसञ्चारितः &c., भूतार्त्तः -र्त्ता -र्त्तं, प्रेतवाहितः &c., भूतोपहतः &c.

POSSESSING, part. धारी -रिणी -रि (न्), धारयन् -यन्ती -यत् (त्), दधत् -धती -धत् (त्), दधानः -ना -नं, दधः -धा -धं, शाली &c. See POSSESSED OF.

POSSESSION, s. (Having, holding) धारणं, धरणं.—(Occupancy, ownership) अधिकारः, अधिकृतिः f., आधिकारत्वं, अधिकारिता -त्वं, भोगः, भुक्तिः, परिभोगः, आवेशः, समावेशः, 'taking possession,' आवेशनं, समावेशनं, आक्रमणं, आक्रान्तिः f., अध्याक्रमणं; 'to take possession of,' आविश् (c. 6. -विशति -वेष्टुं), समाविश्, आक्रम् (c. 1. -क्रामति -क्रमितुं), अध्याक्रम्; 'to put in possession,' नियुज् (c. 7. -युनक्ति -युंक्ते, c. 10. -योजयति -यितुं), युज्, अधिकृ, अधिकारं दा; 'come into one's possession,' हस्तगतः -ता -तं, स्वाधीनभूतः -ता -तं, स्वाधीनः -ना -नं.—(State of being possessed of or by) आविष्टता, आवेशः, आक्रान्तता, सम्पन्नता, युक्तता, शालिता, विशिष्टता.—(By evil spirits) भूतावेशः, पिशाचावेशः, आवेशः, समावेशः, भूतसञ्चारः, पिशाचसञ्चारः, भूतग्रस्तता, भूतोपहतत्वं, भूतबाधा, पिशाचबाधा, भूताक्रान्तिः f., भूतक्रान्तिः f., ग्रहामयः, भूतपीडा, पिशाचपीडा, उपद्रवः, उपसर्गः.—(Thing possessed of, property) स्वं, स्वाधीनद्रव्यं, स्वाधीनवस्तु n., द्रव्यं, वस्तु n.—(Goods, possessions) द्रव्यं -व्याणि n. pl., वस्तु -स्तूनि n. pl., वित्तं, विभवः, अर्थः, धनं, द्रविणं, वसु n., रिक्थं, ऋक्थं, पृक्थं, क्षेत्रादि n., भूमिः f.

POSSESSIVE, a. (In grammar) सम्बन्धवाचकः -का -कं, अधिकरणवाचकः &c.; 'possessive case,' सम्बन्धः, षष्ठी, षष्ठी विभक्तिः.

POSSESSOR, s. धारी m. -रिणी f. (न्), धारयन् m. -यन्ती f. (त्), धारयः -या, अधिकारी m. -रिणी f. (न्), भोक्ता m. (तृ), परिभोक्ता m., भोगी m. (न्), परिभोगी m., उपभोक्ता m., शाली m. (न्), स्वामी m. -मिनी f.

POSSIBILITY, s. सम्भवः, सम्भावनं -ना, सम्भाव्यता, सम्भावनीयता, शक्यता, साध्यता, करणीयता, सम्भूतिः f.

POSSIBLE, a. शक्यः -क्या -क्यं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, सम्भावितः -ता -तं, घटनशक्यः &c.; 'possible to be done,' करणीयः -या -यं, साध्यः -ध्या -ध्यं, साधनीयः -या -यं, कर्त्तुं शक्यः &c., उपपाद्यः -द्या -द्यं, सम्पाद्यः &c., सम्पादनीयः -या -यं; 'as much

as possible,' यथाशक्ति, यथाशक्यं; 'to be possible,' शक् in pass. (शक्यते), सम्भू; 'it is not possible,' न शक्यते. The root शक् gives a passive sense to the infin.; as, 'it is not possible to be done,' कर्तुं न शक्यते.

POSSIBLY, *adv.* (By any power). This sense must be rendered by शक्यं, or the root शक् thus, 'all that can possibly be known,' यत् सर्वं ज्ञातुं शक्यते or शक्यं.—(Any how, by any means) कथञ्चित्, यथाकथञ्चित्, कथञ्चन, यथाकथञ्चन.—(Perhaps) किंस्वित्, अपिनाम, किल, स्यात्, कदापि, कदाचित्, नाम.

POST, *s.* (Piece of timber set upright, pillar) स्तम्भः, स्थाणुः *m.*, स्थूणा, अवष्टम्भः, अवस्तम्भः, उपस्तम्भः, दारुः *m.*; 'of a house,' गृहस्तम्भः, गृहदारुः *m.*; 'for securing an elephant,' आलानं, बन्धस्तम्भः.—(Office) अधिकारः, पदं, पदवी -विः *f.*, नियोगः; 'post under government,' अधिकारपदं; 'an honorable post,' श्लाघ्यपदं.—(Station, position) स्थानं, पदं, पदविः -वी *f.*, आस्पदं, स्थितिः *f.*, अवस्थितिः *f.*—(Military station) गुल्मस्थानं, सैन्यस्थानं.—(Post of danger in battle) वीराशंसनं, भयप्रदा युद्धभूमिः.—(For carrying letters) पत्रवाहनं, राजपत्रवाहनं, राजपत्रवाही *m.* (न्), लेख्यवाहनं, राजलेख्यवाहनं -हकः, राजनियोगिभिर् भृतः पत्रकोषः, राजधावकभृतो लेख्यकोषः, राजपत्रवाहकः, राजलेखहारी *m.*

To POST, *v. n.* (Travel with post horses or with speed) जवेन गम् (c. 1. गच्छति, गन्तुं), जवयाहनेन गम्, जवतुरगैः or जवाश्वैः or जवघोटकैर् गम् or व्रज् (c. 1. व्रजति -जितुं).

To POST, *v. a.* (Station) स्था in caus. (स्थापयति -पितुं), अवस्था, प्रतिष्ठा, नियुज् (c. 7. -युनक्ति -युंक्ते, c. 10. -योजयति -यितुं), विनियुज्.—(Fix to a post) स्तम्भे बन्ध्, स्तम्भबद्धं -द्धां कृ.—(Expose to public reproach) नामादि प्रकाशयित्वा परिभवास्पदं कृ or अवमानास्पदं कृ or तिरस्कारास्पदीकृ.—(Place in the post-office) पत्रस्थाने or लेख्यस्थाने निविश् in caus.

POSTAGE, *s.* पत्रवाहनमूल्यं, लेख्यवाहनमूल्यं, वाहनमूल्यं.

POST-BOY, *s.* जवाश्वपः, जवाश्वपालः, जवाश्वारोही *m.* (न्), जवाश्वप्रेरकः.

POST-CHAISE, *s.* जवयाहनं, जवनरथः, पत्रवाहनं, जवाश्वयुक्तं वाहनं.

To POST-DATE, *v. a.* पश्चात् or परस्तात् कालं लिख् (c. 6. लिखति, लेखितुं).

POST-DILUVIAL, POST-DILUVIAN, *a.* प्रलयोत्तरकालीनः -ना -नं, प्रलयानन्तरः -रा -रं.

POSTER, *s.* जवी *m.* (न्), प्रजवी *m.*, जवनः, जवः, जवाश्वः, जवनाश्वः.

POSTERIOR, *a.* पश्चात्कालीनः -ना -नं, पश्चात्कालिकः -की -कं, उत्तरकालीनः -ना -नं, पाश्चात्यः -त्या -त्यं, उत्तरः -रा -रं, अपरः -रा -रं, अवरः &c., परः &c., अवरकालिकः -की -कं, अपरकालिकः -की -कं.

POSTERIORITY, *s.* पश्चात्कालीनता, पश्चात्कालिकत्वं, अपरता -त्वं, अवरता -त्वं, परता, उत्तरता -त्वं, अपरकालिकत्वं, अवरकालिकत्वं.

POSTERIORLY, *adv.* पश्चात्, अपरतस्, उत्तरतस्, परतस्, अवरतस्, परस्तात्, परं, अपरं, उत्तरं.

POSTERIORS, *s.* नितम्बः, गुह्यप्रदेशः, गुददेशः, परिधायः, कटिकं, पश्चाद्देशः, पश्चाद्भागः.

POSTERITY, *s.* (Descendants, offspring) सन्तानं -नः, सन्ततिः *f.*, अपत्यं, वंशः, कुलसन्ततिः *f.*, कुलं.—(Succeeding generations in a general sense) पुत्रपौत्राः *m. pl.*, पुत्रपौत्रादि *n.*, पुत्रपौत्रादिसन्तानं.

POSTERN, *s.* पक्षद्वारं, प्रच्छन्नद्वारं, पक्षकः, क्षुद्रद्वारं, उपद्वारं, खडक्किका.

POST-HASTE, *adv.* जवेन, सजवं, सवेगं, जवाश्ववत्, जवनाश्ववत्.

POST-HORSE, *s.* जवाश्वः, जवनाश्वः, जवतुरगः, जवघोटकः.

POSTHUMOUS, *a.* (Born after the death of the father) पितृमरणोत्तरजः -जा -जं, जनकमृत्यूत्तरजः &c., पितृमरणोत्तरकः -का -कं.—(Published after the death of the author) कर्तृमृत्यूत्तरकः -का -कं, कर्तृमरणोत्तरकः -का -कं, कर्तृगतयूत्तरकः &c.

POSTILLION, *s.* जवाश्वारोही *m.* (न्), रथवाहकः, सारथिः *m.*, सूतः.

POSTMAN, *s.* पत्रवाहकः, पत्रवाहः, पत्रवाही *m.* (न्), लेख्यवाहकः, लेखवाहकः, लेखहारः -रकः, लेखहारी *m.*, लेखनिकः.

POSTMASTER, *s.* पत्रवाहकाध्यक्षः, लेखहारकाध्यक्षः, पत्रवाहनादिकर्माध्यक्षः, पत्रप्रेरणादिकर्माधिकारी *m.* (न्).

POSTMERIDIAN, *a.* आपराह्णिकः -की -कं, अपराह्णकालिकः -की -कं, पराह्णकालिकः -की -कं.

POSTMORTEM, *a.* मरणोत्तरः -रा -रं, मृत्यूत्तरः &c., मरणानन्तरः -रा -रं.

POSTNATE, *a.* उत्तरः -रा -रं, उत्तरजः -जा -जं, अवरजः &c., परः -रा -रं.

POST-OFFICE, *s.* पत्रस्थानं, लेखस्थानं, लेख्यस्थानं, पत्रगृहं, पत्रागारं, लेख्यागारं, लेखगृहं, लेख्यकुटी, लेख्यगृहं.

To POSTPONE, *v. a.* आकालान्तरात् or परकालं यावत् त्यज् (c. 1. त्यजति, त्यक्तुं) or परित्यज्, उत्तरकालं यावद् विसृज् (c. 6. -सृजति -स्रष्टुं) or अवसृज् or या in caus. (यापयति -यितुं), विलम्ब् (c. 1. -लम्बते -म्बितुं, c. 10. -लम्बयति -यितुं), विलम्बनं कृ, शिथिल (nom. शिथिलयति -यितुं).

POSTPONED, *p. p.* आकालान्तरात् or परकालं यावत् त्यक्तः -क्ता -क्तं or परित्यक्तः &c. or विसर्जितः -ता -तं or विसृष्टः -ष्टा -ष्टं or यापितः -ता -तं, विलम्बितः -ता -तं, शिथिलितः &c.

POSTPONEMENT, *s.* आकालान्तरात् or परकालं यावत् त्यागः or परित्यागः or विसर्जनं or यापनं, कालयापः -पनं, विलम्बः -म्बनं.

POSTSCRIPT, *s.* पश्चाल्लेखः, पश्चाल्लिखितं, पश्चाल्लिपिः *f.*, अनुलिखितं.

POSTULATE, *s.* अनुमानमूलं, स्वीकृतपक्षः, देयं, सिद्धवद् गृहीतपदं.

POSTURE, *s.* अङ्गस्थितिः *f.*, अङ्गसंस्थितिः *f.*, अङ्गविन्यासः, शरीरस्थितिः *f.*, शरीरविन्यासः, शरीरसंस्था, स्थितिः *f.*, भूमिः *f.*, भूमिका.—(A posture in religious meditation as practised by devotees, &c.) आसनं, ध्यानयोगासनं. Eighty-four kinds of these postures are enumerated, of which some are the following: पद्मासनं, ब्रह्मासनं, भद्रासनं, कूर्म्मासनं, मयूरासनं, प्रेतासनं, कुक्कुटासनं, गोमुखासनं, गोरक्षासनं, वीरासनं, दण्डासनं, वासनं, मुद्रा.—(Position, condition) स्थितिः *f.*, अवस्था, संस्थितिः *f.*, दशा.

POSTURE-MASTER, *s.* अङ्गविन्यासशिक्षकः, शरीरविन्यासशिक्षकः, अङ्गविक्षेपशिक्षकः, अङ्गविन्यासदेशिकः.

POSY, *s.* (Motto on a ring, &c.) अङ्गुरीयकलेखः, मुद्रास्थवाक्यं.—(Nosegay) पुष्पगुच्छः -स्तबकः, पुष्पस्तबकः.

POT, *s.* (For culinary or domestic purposes) भाण्डं, पात्रं, भाजनं, स्थाली -लिः, पिठरः -रं, उखा, पिष्टपचनं, पाकनं, पाकिनी, कुण्डं, उषा; 'interior of a pot,' स्थालीबिलं.—(Water pot) घटः, कुम्भः -म्भी, कुण्डी, कलशः, कलसः -सी, उदकपात्रं, उदकुम्भः, कमण्डलुः *m.*, निपः, करुः; 'iron pot,' अयस्कुम्भः; 'boiled in a pot,' स्थालीपक्कः -क्का -क्कं; 'fit to be boiled in a pot,' स्थालीबिलीयः -या -यं, स्थालीबिल्यः -ल्या -ल्यं.

To POT, *v. a.* भाण्डे निविश् in caus. or निधा or रक्ष्, भाण्डीकृ, उपस्कृ.

POTABLE, *a.* पेयः -या -यं, पानीयः &c., पानयोग्यः -ग्या -ग्यं, पानार्हः -र्हा -र्हं.

POTASH, *s.* क्षारः, यवक्षारः, सर्जिकाक्षारः, सर्जिः *f.*, सर्जिका.

POTATION, *s.* पानं, पानोत्सवः, सम्पीतिः *f.*, सपीतिः *f.*, पानकलारम्भः.

Potato, *s.* आलुः *m.*, आलुकं.—(Sweet potato) मध्वालुकं, मधुमूलं, लवङ्कालुः -लुकं, लवङ्कर्णः.

Pot-bellied, *a.* लम्बोदरः -रा -रं, लम्बजठरः -रा -रं, वृहत्कुक्षिः -क्षिः -क्षि, वृहन्नाभिः -भिः -भि, तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, तुन्दिलः -ला -लं, तुन्दितः -ता -तं, तुन्दिभः -भा -भं, तुन्दिकरः -रा -रं, तुन्दवान् -वती -वत् (त्), तुण्डिलः -ला -लं, तुण्डिभः &c., पिचिण्डिलः -ला -लं, पिचिण्डवान् &c.

Pot-belly, *s.* लम्बोदरं, लम्बजठरं, वृहत्कुक्षिः *m.*, पिचिण्डः.

Pot-boy, *s.* मद्यसुरादिविक्रयगृहे भाण्डवाहकः or भाण्डवाही *m.*

Pot-companion, *s.* सहपायी *m.* (न्), पानसहायः, पानसुहृद् *m.*

Potency, *s.* प्रभावः -वत्वं, प्राबल्यं, बलं, शक्तिः *f.*, वीर्य्यं, तेजस् *n.*, सत्त्वं, प्रतापः, ओजस् *n.*, पराक्रमः, प्रभविष्णुता.

Potent, *a.* प्रबलः -ला -लं, महाबलः &c., महाबलवान् -वती -वत् (त्), सप्रभावः -वा -वं, शक्तिमान् &c., महाशक्तिमान् &c., प्रभविष्णुः -ष्णुः -ष्णु, प्रतापी -पिनी -पि (न्), तेजोवान् &c., महौजाः -जाः -जः (स्), सतेजाः &c., बलाढ्यः -ढ्या -ढ्यं, प्रतापवान् &c., वीर्य्यवान् &c., पराक्रमी &c., महोदारः -रा -रं.

Potentate, *s.* अधिपतिः *m.*, महीपतिः *m.*, नरेश्वरः, नरपतिः *m.* *See* King.

Potential, *a.* (Existing in possibility) सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, भाविसम्भाव्यः &c.—(Potential mood) सम्भावनं, विधिलिङ्.

Potentiality, *s.* सम्भाव्यता -त्वं, सम्भावनीयता -त्वं, सम्भावनं -ना.

Potently, *adv.* प्रबलं, सबलं, प्राबल्येन, सप्रभावं, सप्रतापं, महाबलेन.

Pother, *s.* क्लेशः, तुमुलं, व्यग्रता, व्यस्तता, वैक्लव्यं, सम्भ्रमः बाधा.

Potherb, *s.* शाकः -कं, हरितकं, शिग्रुः *m.*, मिग्रुः *m.*; 'its stalk,' कडम्बः, कलम्बः. The following are various sorts of potherbs: विशल्या, अग्निशिखा, अनन्ता, फलिनी, शक्रपुष्पी, ऋष्यगन्धा, छगलान्त्री, छगलांघ्री, आवेगी, वृद्धदारकः, जुङ्गः -ङ्गा, चितुन्नं, सुनिषण्णकं, शूरणं.

Pothouse, *s.* शुण्डागृहं, शुण्डापानं, शुण्डा, मद्यसुरागृहं, पानगोष्ठिका.

Potion, *s.* पेयौषधं, पानीयौषधं, औषधीयपेयं, औषधं.

Potsherd, *s.* भिन्नभाण्डं, भिन्नपात्रं, भग्नभाण्डं, भग्नभाण्डशकलं, कपालिका, शर्करा, भग्नमृन्मयभाजनशकलं.

Pottage, *s.* सूपं, सूपः -पं, जुष्कः, शृतमांसपेयं.

Potter, *s.* कुम्भकारः -रकः, कुलालः, घटीकारः, घटकारः -रकः, घटिन्धमः, मृत्करः, चक्रजीवकः, चक्री *m.* (न्), भटः; 'potter's wheel,' कुलालचक्रं.

Pottery, *s.* (Place where earthen vessels are made) कुम्भशाला, घटशाला, घटनिर्म्माणस्थानं.—(Earthenware) कौलालकं, मृण्मयं, मृन्मयभाण्डानि *n. pl.*, मार्त्तिकं, कुलालकर्म्म *n.* (न्).

Pottle, *s.* क्षुद्रपरिमाणो जलधारणयोग्यः दीर्घकरण्डः.

Potulent, *a.* ईषन्मत्तः -त्ता -त्तं.—(Fit to drink) पानयोग्यः -ग्या -ग्यं.

Pouch, *s.* (Bag) कोषः, कोशः, पेशी.—(Of an animal) पेशिः -शी *f.* —(Of a bird, &c.) पूर्व्वजठरः, उपजठरः, पूर्व्वोदरं.—(A protuberant belly) लम्बोदरं, लम्बजठरः.

To pouch, *v. a.* कोषे निविश् (c. 10. -वेशयति -यितुं), कोषस्थं -स्थां कृ.

Pouched, *p. p.* (Pocketed) कोषनिवेशितः -ता -तं, कोषस्थः -स्था -स्थं. —(Having a pouch) पेशीविशिष्टः -ष्टा -ष्टं, कोषविशिष्टः &c.

Poulterer, *s.* खाद्यपक्षिविक्रेता *m.* (तृ), खाद्यपक्षिविक्रयी *m.* (न्), गृहपक्षिविक्रेता *m.* (तृ), ग्राम्यपक्षिविक्रयी, कुक्कुटादिविक्रेता *m.*, वैतंसिकः, शौनिकः.

Poultice, *s.* उत्कारिका, लेपः, प्रलेपः, उपनाहः, पाकजनकपिष्टप्रलेपः.

To poultice, *v. a.* उपनाहेन or उत्कारिकया लिप् (c. 6. लिम्पति, लेप्तुं).

Poultry, *s.* गृहपक्षिणः *m. pl.*, ग्राम्यपक्षिणः *m. pl.*, कुक्कुटादिग्राम्यपक्षिणः *m. pl.*, कुक्कुटादिखाद्यपक्षिणः *m. pl.*

Poultry-yard, *s.* ग्राम्यपक्षिपोषणयोग्या वाटिका, कुक्कुटादिस्थानं.

Pounce, *s.* (Powder to prevent ink from spreading) मसीशोषणचूर्णं, मसिशोषकचूर्णं.—(Talon, claw) नखः, नखरः.

To pounce, *v. n.* (Fall upon suddenly and seize) अकस्मात् पतित्वा नखैर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं), ग्रहणार्थम् अकस्माद् आपत् (c. 1. -पतति -तितुं) or आक्रम् (c. 1. -क्रामति -क्रमितुं).

Pounce-box, pouncet-box, *s.* शोषकचूर्णाधारः, शोषणचूर्णपात्रं.

Pound, *s.* (Weight or measure) प्रस्थः.—(Fence for stray cattle, &c.) यूथभ्रष्टपशुरोधकं, यूथभ्रष्टपशुवाटी -टी, भ्रष्टपशुरक्षणस्थानं, भ्रष्टपशुरोधनस्थानं, अवरोधः -धकं, अवरोधस्थानं.—(Gold coin) स्वर्णमुद्रा.

To pound, *v. a.* (Confine in a pound) यूथभ्रष्टपश्वादि अवरोधस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं) or रक्ष्.—(Comminute) पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, सम्पिष्, विनिष्पिष्, प्रतिपिष्, उत्पिष्, चूर्ण्, प्रचूर्ण्, विचूर्ण्, सञ्चूर्ण्, चूर्णीकृ, मृद्, अवमृद्, विमृद्, प्रमृद्, अभिमृद्, खण्ड्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), प्रक्षुद्, संक्षुद्, क्षोदीकृ, पुथ् (c. 10. पोथयति -यितुं), विपुथ्, मथ् or मन्थ् (c. 1. मथति, मन्थति, c. 9. मथ्नाति, मथितुं), कुट्ट् (c. 10. कुट्टयति -यितुं), प्रकुट्ट्, गुण्ड् (c. 10. गुण्डयति -यितुं), [illegible] कृ, खण्डीकृ.—(Beat) तड्, वितड्, तुद्, आतुद्.

Poundage, *s.* (Fee, due) शुल्कः -ल्कं, देयं, करः, राजग्राह्यं.

Pounded, *p. p.* (Comminuted) चूर्णितः -ता -तं, सञ्चूर्णितः &c., चूर्णीकृतः &c., चूर्णीभूतः &c., पिष्टः -ष्टा -ष्टं, सम्पिष्टः &c., निष्पिष्टः &c., मर्दितः -ता -तं, क्षोदितः &c., क्षुण्णः -ण्णा -ण्णं, क्षोदीकृतः &c., खण्डितः &c., गुण्डितः &c., गुण्ठितः &c., रूषितः -ता -तं; 'finely pounded,' क्षोदिष्टः -ष्टा -ष्टं; 'pounded coarsely,' अर्द्धचूर्णितः -ता -तं, अपध्वस्तः -स्ता -स्तं, अवध्वस्तः &c.

Pounder, *s.* पेष्टा *m.* (ष्टृ), सम्पेष्टा *m.*, पेषणः, पेषणिः -णी *f.*, पेषकः, मर्द्दनकृत्, कुट्टकः.—(Pestle) मुसलं, मुषलं -लः, मुसरः.

Pounding, *s.* चूर्णनं, सञ्चूर्णनं, चूर्णीकरणं, पेषणं, सम्पेषणं, मर्द्दनं, विमर्द्दनं, सम्मर्द्दः, खण्डनं, क्षोदीकरणं, मथनं, मन्थनं, कुट्टनं, अवहननं.

To pour, *v. a.* (Cause to flow in a stream) स्रु (c. 10. स्रावयति -यितुं), प्रस्रु, सिच् (c. 6. सिञ्चति, सेक्तुं), निषिच्, अवसिच्.—(Pour out) पत् (c. 10. पातयति -यितुं), उत्सिच्, अवतॄ (c. 10. -तारयति -यितुं), प्रस्रु, उत्सृज्, प्रमुच्, स्कन्द्.—(Emit) उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, सृज्, मुच्, प्रमुच्, स्कन्द्, निरस्, निःसृ in caus., उत्क्षिप्, क्षिप्, उद्गॄ, उदीर्, उद्वम्.—(Scatter or pour forth in profusion) कॄ (c. 6. किरति, करितुं -रीतुं), प्रकॄ, विकॄ, बहुशः क्षिप्, वृष् (c. 1. वर्षति -र्षितुं), प्रवृष्; 'the clouds poured forth blood,' मेघाः शोणितं ववृषुः; 'he poured forth arrows,' शरान् ववर्ष.

To pour, *v. n.* (Flow in a stream) स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु, बहुशः or बाहुल्येन स्रु or प्रस्रु or परिस्रु, स्यन्द्, प्रस्यन्द्, क्षर्, री, गल्, च्युत् or श्च्युत्, जलं or तोयं स्रु, जलं प्रवह्.—(As rain) वृष् (c. 1. वर्षति -र्षितुं), प्रवृष्, अभिवृष्, अभिप्रवृष्, अत्यन्तं or अतिशयेन वृष्.—(Issue forth) निःस्रु, प्रस्रु, निःसृ, विनिःसृ, निर्गम्.—(Rush in a crowd) बहुशो निर्पत् or प्रपत्.

Poured, *p. p.* स्रावितः -ता -तं, प्रस्रावितः &c., सिक्तः -क्ता -क्तं, अवसिक्तः &c., उत्सिक्तः &c., पातितः -ता -तं, स्कन्दितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं.

Pourer, *s.* सेक्ता *m.* (क्तृ), सेचकः, निषेक्ता *m.*, स्रावकः, स्रावयिता *m.* (तृ).

POURING, *s.* सेचनं सेकः, निषेकः, निषेचनं, स्रावणं, प्रस्रावणं, स्रवः -वणं, च्योतः, श्च्योतः, प्रधारः.

POURING, *part.* बहुशः स्रुतः -ता -तं or प्रस्रुतः &c., स्रवन् -वन्ती -वत् (त्) or स्यन्दी -न्दिनी -न्दि (न्), वर्षन् &c., अतिवर्षन् &c., बहुवर्षकारी &c., बहुजलस्रावी &c.

To POUT, *v. n.* अन्तःक्रोधात् ओष्ठौ प्रसृ (c. 10. -सारयति -यितुं), ओष्ठप्रसारणं कृ, ओष्ठौ or ओष्ठाधरौ प्रसार्य्य अन्तःकोपं दृश् (c. 10. दर्शयति -यितुं) or सूच्, अन्तःकोपात् प्रसारितोष्ठः -ष्ठा or प्रसारितौष्ठः -ष्ठा स्था (c. 1. तिष्ठति, स्थातुं) or वृत्, अन्तःक्रोधेन ओष्ठौ प्रसार्य्य उदासीनः -ना स्था or वृत्.—(Be prominent) उन्नतः -ता -तं भू, उन्नतीभू, प्ररूढः -ढा -ढं भू.

POUT, *s.* (Fish) स्थूलशिरस्कः समुद्रीयमत्स्यभेदः.—(Fit of sullenness) अन्तःक्रोधावेशः, अन्तःकोपावेशः, वैरस्यावेशः.

POUTING, *s.* अन्तःक्रोधात् or अन्तःकोपात् ओष्ठप्रसारणं, अन्तःकोपसूचनार्थम् ओष्ठाधरप्रसारणं, अन्तःकोपजा उदासीनता.

POVERTY, *s.* दरिद्रता, दारिद्र्यं, दारिद्रं, निर्धनता -त्वं, धनहीनता, अल्पधनता, अधनता -त्वं, दरिद्रदशा, दरिद्रावस्था, धनाभावः, अर्थहीनता, अर्थाभावः, द्रव्यहीनता, द्रव्याभावः, निर्द्रव्यता, दीनता, दैन्यं, निष्किञ्चनत्वं -ता, निष्काञ्चनत्वं, अनिर्वृतिः *f.*, दुर्गतिः *f.*; 'reduced to poverty,' गतधनः -ना -नं, विगतधनः &c., गतविभवः -वा -वं, नष्टधनः &c., नष्टार्थः -र्था -र्थं, धनच्युतः -ता -तं, गतार्थः &c., विगतश्रीकः -का -कं, गतश्रीकः &c., दरिद्रितः -ता -तं.

POVERTY-STRICKEN, *a.* दारिद्र्यग्रस्तः -स्ता -स्तं, दारिद्र्योपहतः -ता -तं.

POWDER, *s.* चूर्णं, पिष्टं, क्षोदः, क्षोदितं, पिष्टातः, पटवासः -सकः, रेणुः *m.*, पांशुः *m.*, वासयोगः, गुण्डकः -गुण्डकः -का.—(Gunpowder) आग्नेयचूर्णं, शीघ्रदाह्यचूर्णं; 'to reduce to powder,' चूर्णीकृ, क्षोदीकृ, रेणुशः कृ.

To POWDER, *v. a.* (Pulverize) चूर्ण् (c. 10. चूर्णयति -यितुं), चूर्णीकृ, क्षोदीकृ, पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), गुण्ड्, कुट्ट्, रेणुशः कृ.—(Cover with powder) चूर्णावृतं -तां कृ, चूर्णाकीर्णं -र्णां कृ, सचूर्णीकृ.

POWDER-BOX, *s.* चूर्णाधारः, चूर्णपात्रं, केशचूर्णाधारः.

POWDERED, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः &c., सञ्चूर्णितः &c., पिष्टः -ष्टा -ष्टं, क्षोदितः -ता -तं, क्षोदीकृतः &c., गुण्डितः &c.; 'finely powdered,' क्षोदिष्टः -ष्टा -ष्टं; 'coarsely,' अवचूर्णितः &c.

POWDER-MAGAZINE, *s.* आग्नेयचूर्णागारं, दाह्यचूर्णागारं.

POWDERY, *a.* (Friable) सुचूर्णनीयः -या -यं, चूर्णयोग्यः -ग्या -ग्यं.—(Made of powder, resembling it) चूर्णी -र्णिनी -र्णि (न्), चूर्णमयः -यी -यं, चूर्णवान् -वती -वत् (त्), क्षोदवान् &c., सचूर्णः -र्णा -र्णं, सक्षोदः -दा -दं, पांशुलः -ला -लं.

POWER, *s.* (Force, strength) शक्तिः *f.*, बलं, सामर्थ्यं, समर्थता, वीर्य्यं, ऊर्जः, प्रभावः, पराक्रमः, प्राणः, सहः -हं, सहस् *n.*, द्रविणं.—(Ability, faculty) शक्तिः *f.*, आशक्तिः *f.*, शक्तता, बलं, सामर्थ्यं, क्षमता, कर्तृत्वं, विभवः; 'according to one's power, to the utmost of one's power,' यथाशक्ति, यथाबलं, यथासामर्थ्यं, यावच्छक्यं, शक्तितस्; 'power of utterance,' वाक्शक्तिः *f.*, वाग्विभवः.—(Power of the mind) मनःशक्तिः *f.*, धीशक्तिः *f.*—(Energy, might) वीर्य्यं, तेजस्, प्रतापः, पराक्रमः, विक्रमः, ऊर्जः, शौर्य्यं, शूरता, स्थाम *n.* (न्), शुष्म *n.* (न्), शुष्मं.—(Momentum) वेगः, आपातः, तरस् *n.*—(Efficacy, influence) प्रभावः, प्रभवः, प्राबल्यं, प्रभुता, प्रभविष्णुता, प्राभवत्यं, अधिकारः, शक्तिः *f.*, बलं, गौरवं, भारः, प्रतापः, वशः.—(Command, subjection, authority) वशं, अधिकारः -रित्वं, आधिपत्यं, ऐश्वर्य्यं, प्रभुत्वं -ता, ईशत्वं, अधीनत्वं; 'to bring under one's power,' वशीकृ, आत्मवशीकृ, आत्मवशं नी, आत्माधीनं -नां कृ, स्वाधीनं -नां कृ, स्ववशीकृ, आत्मायत्तं -त्तां कृ; 'in the power or under the power of,' वशः -शा -शं, अधीनः -ना -नं, आयत्तः -त्ता -त्तं in comp.; as, 'in the power of the king,' राजवशः -शा -शं, राजाधीनः -ना -नं.—(Possession, occupancy) अधिकारः, आधिकारत्वं, हस्तः; 'fallen into one's power,' हस्तगतः -ता -तं.—(Legal authority) अधिकारः.—(Superhuman power) विभूतिः, भूतिः *f.*, प्रभावः.—(Sovereign, one invested with power) अधिपतिः *m.*, अधिकारी *m.* (न्), प्रभुः *m.*, अधीशः.—(Force, army) बलं, सैन्यं, सेना, सैन्यभारः.—(In algebra and arithmetic) कुट्टकः घातः; 'to have power over,' प्रभू (c. 1. -भवति -वितुं), ईश् (c. 2. ईष्टे, ईशितुं).

POWERFUL, *a.* (Having great strength or force) बलवान् -वती -वत् (त्), बली -लिनी -लि (न्), प्रबलः -ला -लं, सबलः -ला -लं, महाबलः &c., शक्तिमान् &c., महाशक्तिः -क्तिः -क्ति, शक्तः -क्ता -क्तं, बलिष्ठः -ष्ठा -ष्ठं, बलाढ्यः -ढ्या -ढ्यं, समर्थः -र्था -र्थं, क्षमः -मा -मं, ऊर्जस्वलः -ला -लं, ऊर्जस्वी &c., ऊर्जस्वान् -स्वती &c., ऊर्जितः -ता -तं, बलोर्जितः &c., प्रभावी &c., सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, अलम्मः -मा -मं, कुण्डीरः -रा -रं.—(Mighty, puissant, potent) महाविक्रमः -मा -मं, उरुविक्रमः &c., पराक्रान्तः -न्ता -न्तं, पराक्रमी &c., विक्रमी &c., ऐश्वर्य्यवान् &c., प्रतापवान् &c., प्रतापी &c., वीर्य्यवान् &c., महान् -हती -हत् (त्), महातेजाः -जाः -जः (स्), महौजाः &c., विभूतिमान् &c., महोदारः -रा -रं.—(Efficacious) सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, सतेजाः &c., तेजस्वी &c., अमोघः -घा -घं, क्षमः -मा -मं.—(Forcible to persuade) सुनिश्चायकः -का -कं, सुनिश्चयजनकः -का -कं, प्रबलः &c., सबलः &c., सुदृढः -ढा -ढं.

POWERFULLY, *adv.* बलवत्, सबलं, प्रबलं, प्राबल्येन, महाबलेन, सप्रभावं, प्रभावेण, महाशक्त्या, महाशक्तिपूर्व्वं.

POWERFULNESS, *s.* सबलता, महाबलता, प्रबलता, प्राबल्यं, बलवत्त्वं, शक्तता, शक्तिमत्त्वं, सप्रभावत्वं, वीर्य्यवत्त्वं.

POWERLESS, *a.* निर्बलः -ला -लं, अबलः &c., बलहीनः -ना -नं, शक्तिहीनः &c., अशक्तः -क्ता -क्तं, असमर्थः -र्था -र्थं, निःशक्तिः &c., शक्तिशून्यः -न्या -न्यं, निष्पराक्रमः -मा -मं, निष्प्रभावः -वा -वं, सामर्थ्यहीनः &c., वीर्य्यहीनः &c., विवशः -शा -शं, अवशः &c.

POWERLESSNESS, *s.* अशक्तिः *f.*, निर्बलता, बलहीनता, असामर्थ्यं, शक्तिहीनता, शक्तिशून्यता, बलाभावः, प्रभावाभावः, निष्प्रभावत्वं.

POX, *s.* (Small pox) रक्तवटी, रक्तवरटी, विस्फोटः, रक्तस्फोटः, शीतला. *See* the word.—(Cow pox) गोस्तनशीतला.—(Venereal disease) उपदंशः, वृषणकच्छूः *f.*; 'afflicted with it,' उपदंशी -शिनी &c.

PRACTICABILITY, PRACTICABLENESS, *s.* साध्यता -त्वं, करणीयता, सुसाध्यता, शक्यता -त्वं, करणशक्यता, सम्भाव्यता -त्वं, सुगमत्वं.

PRACTICABLE, *a.* साध्यः -ध्या -ध्यं, करणीयः -या -यं, करणशक्यः -क्या -क्यं, शक्यः &c., कर्तुं शक्यः &c., कृत्यः -त्या -त्यं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, उपपाद्यः -द्या -द्यं, सुकरः -रा -रं, सुगमः -मा -मं, सुसाध्यः &c., सुखसाध्यः &c., अदुष्करः -रा -रं.

PRACTICAL, *a.* (Pertaining to practice or action) आभ्यासिकः -की -कं, अभ्याससम्बन्धी -न्धिनी -न्धि (न्), क्रियासम्बन्धी &c., कार्मिकः -की -कं, कार्य्यिकः &c.—(Capable of practice) अभ्यासी &c., व्यवसायी &c., अभ्यासात्मकः -का -कं, क्रियावान् -वती -वत् (त्), अभ्यासक्षमः -मा -मं.—(That may be used in practice) व्यवहार्य

-र्य्यो -र्य्यं, व्यवहारयोग्यः -ग्या -ग्यं, अभ्यासयोग्यः &c., व्यवहारोचितः -ता -तं, व्यवहारोपयोगी &c.—(Derived from practice) अभ्याससिद्धः -द्धा -द्धं, क्रियासिद्धः &c., अभ्यासजनितः -ता -तं, अभ्यासप्राप्तः -प्ता -प्तं.—(Having practical knowledge) कर्म्मदृष्टः -ष्टा -ष्टं, कर्म्मज्ञः -ज्ञा -ज्ञं, दृष्टकर्म्मा -र्म्मा -र्म्म (न्), कर्म्मज्ञानी &c., बहुदृष्टः -ष्टा -ष्टं, व्यवहारज्ञः -ज्ञा -ज्ञं, व्यवहारपुष्टः -ष्टा -ष्टं.

Practically, *adv.* अभ्यासतः, अभ्यासेन, कर्म्मतस्, कार्य्यतस्, व्यवहारतस्, व्यवसायतस्, अभ्यासपूर्व्वं, व्यवहारमपेक्ष्य.

Practice, *s.* (Frequent or habitual doing) अभ्यासः, अभ्यसनं, निरन्तराभ्यासः, नित्याभ्यासः, नित्यकृत्यं, नित्यकर्म्म *n.* (न्), निरन्तरकर्म्म *n.*, नित्यक्रिया, निरन्तरप्रवृत्तिः *f.*, नित्यवृत्तिः *f.*, नित्यप्रवृत्तिः *f.*, नित्यचर्य्या, आवर्त्तनं, आवृत्तिः *f.*, वृत्तिः.—(Actual doing or performance) करणं, आचरणं, विधानं, अनुष्ठानं, अनुष्ठा, क्रिया, कृतिः *f.*, प्रवृत्तिः *f.*, निर्वर्त्तनं, प्रवर्त्तनं, चर्य्या, चरितं, वृत्तं, व्यापारः, व्यवसायः.—(Course of procedure, custom) आचारः, व्यवहारः, व्यवहृतिः *f.*, समाचारः, प्रचारः, रीतिः *f.*, सम्प्रदायः, मार्गः, क्रियामार्गः, कर्म्मविधिः *m.*, क्रमः, पद्धतिः *f.*, नियमः, अनुसारः; 'according to usual practice,' यथाव्यवहारं, यथारीति; 'ancient practice,' वृद्धाचारः, वृद्धपरम्परा; 'noble practice,' शिष्टाचारः; 'family practice,' कुलाचारः, कुलधर्म्मः; 'local,' देशाचारः, देशरीतिः *f.*; 'popular or general practice,' लोकाचारः, लोकरीतिः *f.*, जनव्यवहारः; 'good practice,' सदाचारः: 'following good practices,' सदाचारी -रिणी -रि (न्), सद्वृत्तिः -त्तिः -त्ति, सद्वृत्तः -त्ता -त्तं; 'bad practice,' दुराचारः, असदाचारः, दुर्वृत्तिः *f.*; 'following bad practices,' दुराचारः -रा -रं, दुराचारी &c., कदाचारः &c., असदाचारी &c., दुर्वृत्तः -त्ता -त्तं, दुर्वृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c.—(Exercise of a profession) सेवनं, निषेवनं, अनुसेवनं, आचरणं, करणं, अनुष्ठानं.—(Of medicine) उपचारः, वैद्योपचारः, उपचर्य्या, उपचार्य्यः, उपक्रमः, वैद्योपक्रमः, औषधप्रयोगः, वैद्यक्रिया, चिकित्सा, रुक्प्रतिक्रिया.—(Of arms) शस्त्राभ्यासः, शस्त्रभृत्त्वं.—(Of the law courts) व्यवहारः, व्यवहारविधिः *m.*

To PROCURE, v. a. (Obtain) आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्, सम्प्राप्, लभ् (c. 1. लभते, लब्धुं), उपलभ्, अर्ज्, उपार्ज्, आसद्, समासद्, अधिगम्, विद् (c. 6. विन्दति, वेदितुं, वेत्तुं), अभिविद्, प्रतिविद्, उपकॢप् (c. 10. -कल्पयति -यितुं), प्रतिपद्, आपद्, आविश्.—(Bring about, effect) सम्पद् (c. 10. -पादयति -यितुं), उपपद्, उत्पद्, साध्, घट्, प्रवृत् in caus.

PROCURED, p. p. प्राप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, उपलब्धः &c., अर्जितः -ता -तं, उपार्जितः &c. See OBTAINED; 'is procured,' लभ्यते, उत्पद्यते.

PROCUREMENT, s. प्राप्तिः f., प्रापणं, लब्धिः f., लाभः, उपार्जनं, सम्पादनं.—(Panderism) कौट्टिन्यं.

PROCURER, s. प्रापकः, उपार्जकः, लब्धा m. (ब्धृ), सम्पादकः, प्रवर्त्तकः, प्रयोजकः.—(Pimp) रतसम्पादकः, रतप्रवर्त्तकः. See PIMP, PANDER.

PROCURESS, s. कुट्टिनी, कुट्टनी, दूती, दूतिका, सञ्चारिका, कुटी, चुन्दी, वेश्याचार्य्या, शम्भली, सम्भली, रतताली f., सुरतताली, रतोपकारिणी, रतसम्पादिका, कौट्टिन्यकर्त्री, लाम्पट्यप्रयोजिका.

PRODIGAL, a. अतिव्ययी -यिनी -यि (न्), बहुव्ययी &c., अपरिमितव्ययी &c., अपरिमितव्ययः -या -यं, अपव्ययी &c., अतिव्ययशीलः -ला -लं, व्ययशीलः &c., अपचेता -त्री -तृ (तृ), उत्सर्गी -र्गिणी &c., अत्युत्सर्गी &c., अतित्यागी &c., अतिदाता -त्री -तृ (तृ), बहुदः -दा -दं, बहुप्रदः &c., महाव्ययकारी &c., अतिमोक्षणशीलः &c., मुक्तहस्तः -स्ता -स्तं, धनोत्सर्गी &c., अर्थोत्सर्गी &c., धनत्यागी &c.

PRODIGAL, s. अतिव्ययी m. (न्), बहुव्ययी m. See the last.

PRODIGALITY, s. अतिव्ययः, बहुव्ययः, अपव्ययः, महान् व्ययः, महाव्ययः, अपरिमितव्ययः, अतित्यागः, अत्युत्सर्गः, अतिमोक्षणं, अतिसर्जनं, अर्थोत्सर्गः, धनोत्सर्गः, धनत्यागः, अर्थत्यागः, बहुप्रदत्वं, बहुदत्वं, मुक्तहस्तता.

PRODIGALLY, adv. अतिव्ययेन, बहुव्ययेन, महाव्ययेन, अपरिमितव्ययेन, अत्युत्सर्गेण, अतित्यागपूर्व्वं, महाव्ययपूर्व्वं, साপव्ययं, मुक्तहस्तेन.

PRODIGIOUS, a. (Very great, huge) अतिमहान् -हती -हत् (त्), अतिबृहन् -हती &c., अद्भुतशरीरः -रा -रं, अद्भुतकायः -या -यं, अद्भुतपरिमाणः -णा -णं, बृहत्परिमाणः &c., विकटशरीरः &c., राक्षसशरीरः &c.—(Wonderful) अद्भुतः -ता -तं, महाद्भुतः -ता -तं, अद्भुततमः -मा -मं, आश्चर्य्यः -र्य्या -र्य्यं, सुचित्रः -त्रा -त्रं, विलक्षणः -णा -णं, अपूर्व्वदृष्टः -ष्टा -ष्टं, सृष्टिमार्गबाध्यः -ध्या -ध्यं, प्रकृतिक्रमबाध्यः &c.

PRODIGIOUSLY, adv. अद्भुतं, महाद्भुतं, आश्चर्य्यं, अतिशयेन, अत्यन्तं.

PRODIGIOUSNESS, s. अद्भुतत्वं -ता, अतिमहत्त्वं, अतिबृहत्त्वं.

PRODIGY, s. अद्भुतं, उत्पातः, उपसर्गः, महाद्भुतं, अद्भुतविषयः, अद्भुतवस्तु n., अपूर्व्वविषयः, अपूर्व्ववस्तु n., महदाश्चर्य्यं.

PRODITION, s. विश्वासघातः, विश्वासभङ्गः, शत्रुहस्तार्पणं, शत्रुसमर्पणं.

To PRODUCE, v. a. (Bring forward, offer to view or notice) प्रणी (c. 1. -णयति -णेतुं), अभिप्रणी, आनी, उपनी, अग्रे नी, समानी, दृश् (c. 10. दर्शयति -यितुं), प्रदृश्, प्रसृ (c. 10. -सारयति -यितुं), प्रत्यक्षीकृ, प्रादुष्कृ, आविष्कृ, पुरस्कृ, अग्रे स्था in caus.—(Bring forth, generate) उत्पद् (c. 10. -पादयति -यितुं), जन् (c. 10. जनयति -यितुं), संजन्, प्रजन् (c. 10. or c. 4. -जायते -जनितुं), उपजन्, प्रसू, सु.—(Effect, bring into existence) उत्पद्, समुत्पद्, उपपद्, सम्पद्, जन्, संजन्, कृ, साध्, संसाध्, भू in caus., उद्भू, सृज् (c. 6. सृजति, स्रष्टुं), तन्, सिद्धीकृ.—(Make) कृ, कॢप्, विधा, घट्.—(Yield) दा, प्रद

Produce, *s.* (That which is produced or yielded) उत्पन्नं, निष्पन्नं, फलं, लाभः, उत्पत्तिः *f.*, उद्भूतं, प्रसवः, प्रसूतिः *f.*; 'of agriculture,' कृषिफलं, क्षेत्रफलं; 'of a tree,' वृक्षफलं, वृक्षोत्पन्नं; 'of labour,' कर्म्मफलं.

Produced, *p. p.* (Brought into view) उपनीतः -ता -तं, प्रणीतः &c., अग्रे आनीतः &c., दर्शितः &c., प्रदर्शितः &c., प्रसारितः &c., प्रादुष्कृतः &c.—(Brought into life or being) उत्पन्नः -न्ना -न्नं, उत्पादितः -ता -तं, समुत्पादितः &c., जातः -ता -तं, जनितः &c., उपजातः &c., सञ्जातः &c., प्रसूतः &c., प्ररूढः -ढा -ढं, प्रभवः -वा -वं, उद्भवः &c., उद्भूतः -ता -तं, उत्थितः -ता -तं; 'produced in water,' जलोद्भवः -वा -वं.—(Effected, resulting from) उत्पादितः &c., सम्पादितः &c., निष्पादितः &c., निष्पन्नः &c., जनितः &c., जातः &c., जन्यः -न्या -न्यं, प्रयुक्तः -क्ता -क्तं, प्रवृत्तः -त्ता -त्तं, हेतुकः -का -कं, कर्तृकः &c.; 'misery produced by crime,' पापप्रयुक्तं दुःखं; 'fever produced by fasting,' उपवासजन्यो ज्वरः.

Producer, producing, *s.* or *part.* उत्पादकः -का -कं, जनकः -का -कं, भावकः -विका -कं, प्रसवन् -वन्ती -वत् (त्), प्रसवी -विनी -वि (न्), प्रदः -दा -दं, दायी -यिनी &c., दः -दा -दं in comp., आवहः -हा -हं, कारी &c., करः -रा -रं, निष्पादकः &c.; 'producing fruit,' फलदः -दा -दं, फलप्रदः &c., फलदायी &c., फलोत्पादकः &c., फलनिष्पादकः &c.; 'producing pain,' दुःखकरः -रा -रं, दुःखकारी &c., दुःखजनकः &c., दुःखावहः -हा -हं; 'a lake producing lotuses,' पद्मोत्पादकसरस्, अम्भोजप्रसवि सरस्.

Producible, *a.* जन्यः -न्या -न्यं, उत्पादनीयः -या -यं, जननीयः &c.

Product, *s.* (That which is produced, &c.) उत्पन्नं, निष्पन्नं, फलं. *See* Produce.—(Effect, result) फलं, परिणामः, प्रयुक्तिः *f.*, उत्तरं, सिद्धिः *f.*, फलोदयः.—(In arithmetic) घातः, वधः, गुणाकारः, फलिताङ्कः, फलं, उत्पन्नं, प्रत्युत्पन्नं.

Production, *s.* (Act or process of producing, generation) उत्पादनं, उत्पत्तिः *f.*, जननं, प्रजननं, जन्म *n.* (न्), जनिः -नी *f.*, उद्भवः, सम्भवः, प्रभवः, सम्भूतिः *f.*, प्रसूतिः *f.*, प्रसवः, जनुस् *n.*, रूढिः *f.*, प्ररूढिः *f.*—(Act of effecting or forming) निष्पादनं, निष्पत्तिः *f.*, सम्पादनं, उपपत्तिः *f.*, उद्भावनं, करणं, निर्म्माणं, निर्म्मितिः *f.*, कल्पनं -ना, सर्जनं, सृष्टिः *f.*, घटनं, विधानं; 'law of reciprocal production and reproduction,' बीजाङ्कुरन्यायः.—(Thing produced) उत्पन्नं, समुत्पन्नं, फलं. *See* Produce.—(Of art, manufacture, &c.) निर्म्मितवस्तु *n.*, निर्म्मितद्रव्यं, निर्म्मितपदार्थः, शिल्पनिर्म्मितद्रव्यं, शिल्पिकवस्तु *n.*, वस्तु *n.*

Productive, *a.* (Fruitful) फलदः -दा -दं, फलप्रदः -दा -दं, फलदायी -यिनी -यि (न्), फलदायकः -का -कं, फलोत्पादकः -का -कं, फलवान् -वती -वत् (त्), बहुफलः -ला -लं, सफलः &c., अवन्ध्यः -न्ध्या -न्ध्यं, बहुप्रसवः -वा -वं, सावकः &c. *See* Fruitful, Producing.—(Causing, effective of) उत्पादकः -का -कं, जनकः &c., कारकः &c., करः -रा -री -रं, कारी -रिणी &c., निष्पादकः &c., सम्पादकः &c., प्रतिपादकः &c., साधकः -का -कं, आवहः -हा -हं; 'productive of wealth,' अर्थोत्पादकः &c., अर्थावहः -हा -हं; 'of satisfaction,' तृप्तिजनकः -का -कं.—(Lucrative) लाभदः -दा -दं, लाभकरः -रा -रं, फलावहः &c.

Productiveness, *s.* साफल्यं, सफलता, फलदत्वं, फलवत्त्वं, फलोत्पादकत्वं, फलजनकता, बहुफलत्वं, बहुप्रसवत्वं.

Proem, *s.* वाङ्मुखं, आरम्भवाक्यं, परिभाषा, आभाषः. *See* Preface.

Profanation, *s.* अतिक्रमः -मणं, व्यतिक्रमः -मणं, समतिक्रमः, दूषणं, लोपः -पनं, अपवित्रीकरणं, भ्रष्टीकरणं, भ्रष्टकरणं.

Profane, *a.* (Irreverent, impious) धर्म्मनिन्दकः -का -कं, धर्म्मद्वेषी -षिणी -षि (न्), देवनिन्दकः &c., ईश्वरनिन्दकः &c., धर्म्मापवादकः &c., धर्म्मनिन्दात्मकः &c., धर्म्मनिन्दारूपः -पा -पं.—(Not pure) अपुण्यः -ण्या -ण्यं, अपवित्रः -त्रा -त्रं, अशुद्धः -द्धा -द्धं, भ्रष्टः -ष्टा -ष्टं.—(Not sacred, not consecrated) अप्रतिष्ठितः -ता -तं, अप्रणीतः -ता -तं, असंस्कृतः &c., प्रतिष्ठाहीनः -ना -नं, संस्कारहीनः &c., व्रात्यः -त्या -त्यं.—(Secular) लौकिकः -की -कं, व्यावहारिकः -की -कं, सांसारिकः &c., प्रापञ्चिकः &c., धर्म्मप्रकरणव्यतिरिक्तः -क्ता -क्तं.

To profane, *v. a.* (Violate) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, समतिक्रम्, लुप्, लंघ्.—(Pollute, render impure) अपवित्रीकृ, भ्रष्टीकृ, अशुद्धीकृ, दुष् (c. 10. दूषयति -यितुं), दुष्टीकृ.—(Dishonour) अवमन्, अपमन्, अवज्ञा, अवधीर्, लघूकृ, अपमानं कृ, अनादरं कृ, निन्दां कृ.

Profaned, *p. p.* दूषितः -ता -तं, अतिक्रान्तः -न्ता -न्तं, भ्रष्टीकृतः &c., अवमानितः &c., अपमानितः &c., अनादृतः &c., कृतावज्ञः -ज्ञा -ज्ञं, अवधीरितः &c.

Profanely, *adv.* धर्म्मनिन्दया, धर्म्मनिन्दापूर्व्वं, देवनिन्दापूर्व्वं, धर्म्मनिन्दकवत्, सधर्म्मनिन्दनं, अपुण्यवत्, धर्म्मद्वेषकवत्.

Profaneness, profanity, *s.* धर्म्मनिन्दा -न्दनं, देवनिन्दा -न्दनं, ईश्वरनिन्दा, धर्म्मापवादः, धर्म्मलोपः, धर्म्मातिक्रमः, ईश्वरावमानं, ईश्वरावज्ञा, धर्म्मावज्ञा.

Profaner, *s.* धर्म्मनिन्दकः, धर्म्मापवादकः, धर्म्मपरिभाषकः, धर्म्मपरिभाषी *m.* (न्), ईश्वरनिन्दकः, दूषकः, अपमानकः, अवज्ञाता *m.* (तृ).

To profess, *v. a.* (Avow, declare openly) प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), अङ्गीकृ, स्वीकृ, उरीकृ, ऊरीकृ, अनुभाष्, प्रकाशं ख्या in caus., प्रकाशं or स्पष्टं वद, प्रतिज्ञापूर्व्वं वद् or कथ्, अङ्गीकारपूर्व्वं वद, प्रतिज्ञां कृ, प्रकाश्.—(Make a show of, profess one's self) छद्म कृ, वेशं धृ, आत्मानं दृश्. *See To* pretend.—(Profess an art, business, &c.) वृत्तिं कृ, प्रवृत्तिं कृ, व्यवसायं कृ, व्यापारं कृ; 'to profess the science of medicine,' चिकित्साप्रवृत्तिं कृ, चिकित्सावृत्तिं कृ, चिकित्साव्यवसायं कृ, चिकित्सां कृ.

Professed, profest, *a.* स्वप्रतिज्ञातः -ता -तं, प्रतिज्ञापूर्व्वः -र्व्वा -र्व्वं, प्रतिज्ञापुरःसरः -रा -रं, स्वीकृतः &c., अङ्गीकृतः &c., प्रकाशः -शा -शं, प्रकाशादितः &c., व्यक्तोदितः &c., प्रकाशकथितः &c., प्रकाशितः -ता -तं, ख्यापितः &c.; 'professed religion,' स्वीकृतधर्म्मः.

Professedly, *adv.* प्रतिज्ञापूर्व्वं, सप्रतिज्ञं, साङ्गीकारं, स्वीकारपूर्व्वं.

Profession, *s.* (Avowal, open declaration) अङ्गीकारः, स्वीकारः, उरीकारः, ऊरीकारः, ख्यापनं, प्रकाशख्यापनं, प्रतिज्ञा, प्रकाशप्रतिज्ञा, प्रकाशवचनं, प्रकाशवादः, प्रकाशकथनं, प्रकाशकीर्त्तनं, स्वमतप्रकाशनं, प्रकाशनं, साक्ष्यं; 'empty profession,' निरर्थकप्रतिज्ञा; 'of religion,' धर्म्मस्वीकारः. *See* Pretender.—(Calling, business) वृत्तिः *f.*, व्यापारः, व्यवसायः, वर्त्तनं, प्रवृत्तिः *f.*, वृत्तं, वृत्तिता, जीविका, उपजीविका, जीवनवृत्तिः *f.*, जीवनोपायः, उपजीवनं, आजीवः, आजीवनार्थं, उद्योगः, वार्त्ता, व्यवहारः; 'military,' शस्त्रवृत्तिः *f.*, शस्त्राश्रभृत्त्वं; 'medical,' चिकित्सावृत्तिः *f.*

Professional, *a.* (Pertaining to a profession) वृत्तिसम्बन्धी -न्धिनी &c., वृत्तिविषयकः -का -कं.—(Engaged in a profession) वृत्तिमान् -मती -मत् (त्), व्यापारी -रिणी -रि (न्), व्यवसायी &c.

Professionally, *adv.* वृत्तितस्, व्यापारतस्, व्यवहारतस्, व्यापारेण.

PROFESSOR, *s.* (One who makes open declaration) ख्यापकः, प्रकाशख्यापकः, व्यक्तख्यापकः, प्रतिज्ञाता *m.* (तृ), प्रतिज्ञाकारी *m.* (न्), अङ्गीकर्त्ता *m.* (र्तृ), स्वीकर्त्ता *m.*, स्वीकारकृत्; 'of the Christian religion,' ख्रीष्टीयधर्म्मस्वीकर्त्ता -र्त्री -र्तृ (र्तृ), ख्रीष्टीयमतस्वीकारी *m.* (न्), ख्रीष्टीयधर्म्मध्वजी *m.* (न्), ख्रीष्टीयवेशधारी *m.*, ख्रीष्टीयधर्म्मी *m.* (न्), ख्रीष्टीयमतावलम्बी *m.*—(Public teacher) प्रकाशपाठकः, प्रकाशाध्यापकः, प्रकाशोपदेशकः, विद्यालये छात्रपाठकः or पाठकः.

PROFESSORSHIP, *s.* प्रकाशपाठकपदं, विद्यालये पाठकस्य पदं.

PROFFER, *To* PROFFER. *See* OFFER, *To* OFFER, &c.

PROFICIENCY, PROFICIENCE, *s.* व्युत्पत्तिः *f.*, व्युत्पन्नता, सम्पन्नता, प्रवीणता, प्रावीण्यं, नैपुण्यं, निपुणता, निवेशः, प्रवेशः, सन्निवेशः, अभिनिवेशः, निविष्टता, अभिज्ञता, परत्वं.

PROFICIENT, *a.* व्युत्पन्नः -न्ना -न्नं, सम्पन्नः &c., प्रवीणः -णा -णं, निपुणः &c., निविष्टः -ष्टा -ष्टं, अभिनिविष्टः &c., सन्निविष्टः &c., अभिज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं, विज्ञः &c., वैज्ञानिकः -की -कं, पटुः -टुः -टु, निष्णातः -ता -तं, कृतागमः -मा -मं.

PROFILE, *s.* अर्द्धमुखं, अर्द्धाननं, अर्द्धमुखाकारः, अर्द्धमुखालेख्यं, मुखपार्श्वः, मुखपार्श्वालेख्यं.

PROFIT, *s.* लाभः, लब्धिः *f.*, प्राप्तिः *f.*, फलं, फलोदयः, लभ्यं, लभ्यांशः, आयः, उदयः, उत्पन्नं, पणाया, पण्यफलत्वं, वृद्धिः *f.*, विवृद्धिः *f.*, प्रतिपत्तिः *f.*, योगक्षेमः, प्रयोगः, कलान्तरं, उपस्वत्वं, अर्जनं, उपार्जनं; 'profit and loss,' लाभालाभौ; 'non-enjoyment of profit,' फलाभोगः; 'with profit,' सलाभः -भा -भं, सफलः -ला -लं, सोदयः -या -यं.—(Benefit, advantage) हितं, लाभः, अर्थः.

To PROFIT, *v. a.* (Cause benefit or advantage) हितं कृ, लाभं or फलं कृ or दा, अर्थं कृ, उपकृ, उपकारं कृ, हितावहः -हा -हं भू, हिताय भू, उपयोगी -गिनी -गि भू.—(Profit one's self). *See* the next.

To PROFIT, *v. n.* (Gain advantage) फलं or हितं प्राप् or लभ्, लाभं प्राप्, उपकारं प्राप्.—(Improve, grow, better or wiser) वृध् (c. 1. वर्धते -र्धितुं), वृद्धिं गम्, भद्रतरः -रा -रं भू, श्रेयान् -यसी -यो भू, आगमं कृ, ज्ञानं प्राप् or लभ्, ज्ञानागमं कृ, विद्यागमं कृ, विद्याप्राप्तिं कृ.—(Be of use or advantage) हिताय भू, फलाय भू, हितावहः -हा -हं भू, उपयोगी -गिनी -गि भू, उपकृ.

PROFITABLE, *a.* (Gainful, lucrative) लाभकरः -रा -रं, लाभदः -दा -दं, फलदः -दा -दं, सफलः -ला -लं, फलदायकः -का -कं, फलजनकः &c., लाभजनकः &c., फलावहः -हा -हं, लाभावहः &c., लाभोत्पादकः &c., फली -लिनी -लि (न्), प्राप्तिजनकः &c.—(Useful, advantageous) हितकरः -रा -रं, हितकारकः -का -कं, हितजनकः &c., हितावहः -हा -हं, हितः -ता -तं, अर्थकरः &c., अर्थकारकः &c., अर्थवान् -वती -वत् (त्), अर्थदः -दा -दं, अर्थप्रदः &c., सार्थकः -का -कं, सोपकारः -रा -रं, उपकारी &c., उपकारकः &c., उपयोगी &c., उपयुक्तः -क्ता -क्तं, हितप्रदः &c., हितदायकः &c., सफल्गुः -ल्गुः -ल्गु.

PROFITABLENESS, *s.* साफल्यं, सफलता -त्वं, फलजनकता, लाभजनकता, हितकारकत्वं, अर्थकारकत्वं, हितजनकता, सार्थकत्वं, सलाभत्वं, फलदत्वं, उपकारकता, उपकारित्वं, उपयोगिता, सफल्गुता.

PROFITABLY, *adv.* सफलं, साफल्येन, सलाभं, सार्थं, सोपकारं, सहितं, हिताय, फलाय, यथा हितं or फलं प्राप्यते तथा, अवृथा, अमुधा.

PROFITED, *p. p.* उपकृतः -ता -तं, कृतलाभः -भा -भं, प्राप्तफलः -ला -लं, प्राप्तोपकारः -रा -रं, कृतागमः -मा -मं, वर्धितः -ता -तं.

PROFITLESS, *a.* निष्फलः -ला -लं, अफलः &c., फलहीनः -ना -नं, लाभहीनः &c., निर्लाभः -भा -भं, अहितः -ता -तं, व्यर्थः -र्था -र्थं, निरर्थकः -का -कं, असार्थकः &c., अनुपयोगी &c., अनाप्तिमः -मा -मं, निरायः -या -यं.

PROFLIGACY, *s.* व्यसनिता, दुष्टता, दुर्वृत्तिः *f.*, दुर्वृत्तता, भ्रष्टता, नष्टता, भ्रष्टाचारत्वं, दुष्टाचारता, भोगासक्तिः *f.*, विषयासक्तता, अनवस्थितिः *f.*, लम्पटत्वं, लाम्पट्यं, अशिष्टाचारत्वं, धूर्त्तता, कुपथं.

PROFLIGATE, *a.* व्यसनी -निनी -नि (न्), अतिव्यसनी &c., व्यसनीयः -या -यं, दुष्टाचारः -रा -रं, दुर्वृत्तः -त्ता -त्तं, दुश्चरित्रः -त्रा -त्रं, दुष्टः -ष्टा -ष्टं, पापीयान् -यसी -यः (स्), दुराचारी &c., भ्रष्टाचारी &c., भ्रष्टः -ष्टा -ष्टं, अशिष्टाचारः -रा -रं, भोगासक्तः -क्ता -क्तं, विषयासक्तः &c., निकृतः -ता -तं, असम्यक्कारी &c., धूर्त्तः -र्त्ता -र्त्तं.

PROFLIGATE, *s.* व्यसनी *m.* (न्), व्यसनीयः, लम्पटः, कामुकः. *See* the last.

PROFLIGATELY, *adv.* सव्यसनं, लम्पटवत्, दुष्टवत्, धूर्त्तवत्, सलाम्पट्यं.

PROFOUND, *a.* (Deep) गम्भीरः -रा -रं, गभीरः -रा -रं, अगाधः -धा -धं, गाढः -ढा -ढं, अवगाढः &c., गहनः -ना -नं, निम्नः -म्ना -म्नं, घनः -ना -नं.—(Abstruse, not obvious) गूढार्थः -र्था -र्थं, निगूढार्थः &c., निगूढः -ढा -ढं, गूढः &c., गम्भीरार्थः -र्था -र्थं, गहनः -ना -नं, गहनार्थः &c., सुगहनः &c., परमगहनः &c., दुर्ज्ञेयः -या -यं, बोधागम्यः -म्या -म्यं.—(One who has penetrated deeply into any science &c.) अभिनिविष्टः -ष्टा -ष्टं, निविष्टः &c., व्युत्पन्नः -न्ना -न्नं, पारगः -गा -गं, पारगतः -ता -तं, निष्णातः -ता -तं, गम्भीरार्थावधारणक्षमः -मा -मं, गूढार्थोपलब्धिक्षमः &c., गूढतत्त्वज्ञः -ज्ञा -ज्ञं, गूढार्थज्ञः -ज्ञा -ज्ञं, गम्भीरार्थज्ञः &c., निगूढार्थविद्, पारदर्शी -र्शिनी &c.—(Excessive) गाढः -ढा -ढं, अत्यन्तः -न्ता -न्तं, घनः -ना -नं, अति or सु prefixed; 'profound sorrow,' गाढशोकः; 'profound sleep,' सुषुप्तिः *f.*, अघोरनिद्रा; 'profound secret,' सुरहस्यं, सुगोपनीयं; 'profound secrecy,' गाढसंवृतिः *f.*, घनसंवृतिः *f.*, सुगुप्तिः *f.*

PROFOUNDLY, *adv.* गम्भीरं, गाढं, प्रगाढं, अत्यन्तं, निर्भरं, भृशं, अभिनिविष्टं, अभिनिवेशेन, अति or सु prefixed; 'profoundly skilled,' सुनिपुणः -णा -णं, अतिनिपुणः &c.; 'profoundly wise' विद्याभिनिविष्टः -ष्टा -ष्टं, विद्यापारदृक् *m.* (श्), सुपण्डितः &c. *See* DEEPLY.

PROFOUNDNESS, PROFUNDITY, *s.* (Depth) गम्भीरता, गभीरता, गाम्भीर्यं, अगाधता, गाढता, घनता, निम्नता.—(Of meaning) गूढता, निगूढता, गूढार्थता -त्वं.—(Of knowledge) अभिनिवेशः, निवेशः, व्युत्पन्नता, व्युत्पत्तिः *f.*, गूढार्थज्ञता.

PROFUSE, *a.* (Lavish) अतिव्ययी -यिनी -यि (न्), मुक्तहस्तः -स्ता -स्तं. *See* PRODIGAL, LAVISH.—(Extravagant, exceeding bounds) अपरिमितः -ता -तं, अत्यन्तः -न्ता -न्तं, अतिरिक्तः -क्ता -क्तं, अति prefixed; 'profuse expenditure,' अतिव्ययः, अपरिमितव्ययः.—(Exuberant, copious) समृद्धः -द्धा -द्धं, अतिबहुलः -ला -लं, अतिरिक्तः -क्ता -क्तं, अधिकः -का -कं, उद्रिक्तः &c., अतिशय in comp., भृश in comp., अति or सु prefixed; 'profuse perspiration,' अतिस्वेदः, भृशस्वेदः.

PROFUSELY, *adv.* (Lavishly) अतिव्ययेन, अपरिमितं. *See* the word.—(Copiously) बाहुल्येन, अतिबहुलं, प्राचुर्येण, अतिप्रचुरं, अतिरिक्तं, भूरि, भूरिशस्, अत्यन्तं, भृशं, अति prefixed; 'perspiring profusely,' अतिस्विद् *m. f. n.*, भृशस्विद्.

PROFUSENESS, *s.* (Lavishness) अतिव्ययः, मुक्तहस्तत्वं -ता. *See* LAVISHNESS, PRODIGALITY.—(Great abundance). *See* the next.

PROFUSION, *s.* समृद्धिः *f.*, सामृद्ध्यं, अतिबाहुल्यं, बाहुल्यं, अतिबहुत्वं, अति-

प्राचुर्य्यं, अतिप्रचुरत्वं, विपुलता, वैपुल्यं, अतिवैपुल्यं, पुष्कलता, उद्रेकः, अतिरिक्तता, अतिरेकः, वृद्धिः *f.*, उत्सेकः.

Prog, *s.* अन्नं, खाद्यं, भोजनं, भक्ष्यं.—(Got by begging) भिक्षान्नं.

Progenitor, *s.* पूर्व्वजः, पितामहः, कुलपुरुषः, पूर्व्वपुरुषः, पूर्व्वजनकः, पूर्व्वजनिता *m.* (तृ), पूर्व्वजननः, अग्रजननः, जनयिता *m.* (तृ), प्रजननः, प्रजनः, जन्मदः, बीजप्रदः, बीजी *m.* (न्), वप्ता *m.* (प्तृ).

Progeny, *s.* सन्तानं -नः, सन्ततिः *f.*, अपत्यं, प्रजा. *See* Offspring.

Prognosis, *s.* (In medicine) परिभाषा, परिभाषणं.

Prognostic, *s.* पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वरूपं, पूर्व्वलिङ्गं, पूर्व्वसूचकचिह्नं, लक्षणं, चिह्नं, निमित्तं, अजन्यं, शकुनं -नः, भाविसूचकचिह्नं, भविष्यत्सूचकचिह्नं, अनिष्टसूचकचिह्नं, भविष्यदुद्बोधकचिह्नं.

Prognostic, *a.* पूर्व्वसूचकः -का -कं, अग्रसूचकः &c., भविष्यसूचकः &c., भविष्यत्सूचकः &c., भाविसूचकः &c., उद्बोधकः &c., भविष्यदुद्बोधकः &c.

To prognosticate, *v. a.* पूर्व्वं or अग्रे सूच् (c. 10. सूचयति -यितुं), पूर्व्वं or अग्रतो दृश् (c. 10. दर्शयति -यितुं) or प्रदृश् or भविष्यत् सूच्, पूर्व्वलक्षणेन भविष्यत् सूच् or दृश्, पूर्व्वलक्षणं दा, पूर्व्वचिह्नं दा.—(Foretell from signs) पूर्व्वलक्षणदर्शनाद् भविष्यद् वद् or ज्ञा or अनागतं ज्ञा in caus. or अनुमा.

Prognostication, *s.* पूर्व्वसूचनं -ना, अग्रसूचनं, पूर्व्वलक्षणेन भविष्यत्सूचनं or भाविसूचनं or पूर्व्वलक्षणदर्शनाद् भविष्यज्ज्ञानं or अनागतज्ञानं or भविष्यदनुमानं.

Prognosticator, *s.* पूर्व्वसूचकः, अग्रसूचकः, पूर्व्वलक्षणेन भविष्यत्सूचकः or भाविसूचकः or भाविदर्शकः or अनागतदर्शकः, पूर्व्वलक्षणज्ञः, पूर्व्वचिह्नज्ञः.

Programme, *s.* पूर्व्वलेख्यं, पूर्व्वलेखः, पूर्व्वलिखितं, परिसंख्यापत्रं, वस्तुपरिसंख्या, परिगणनापत्रं, सूचिपत्रं.

Progress, *s.* (Moving or proceeding on) गमनं, प्रगमनं, गतिः *f.*, प्रयाणं, अग्रगमनं, अग्रसरणं, अग्रगतिः *f.*, प्रसरणं, प्रसरः, यात्रा, प्रक्रमः, क्रमः -मणं, क्रान्तिः *f.*, अनुक्रमणं, प्रस्थानं, प्रवाहः, चारः, अयनं in comp.; 'difficult progress,' संक्रमः, संक्रामः, सञ्चारः, सञ्चरः, दुर्गसञ्चरः. —(Increase) वृद्धिः *f.*, प्रवृद्धिः *f.*, वर्धनं, क्रमशो वृद्धिः *f.*, प्ररूढिः *f.*, उत्क्रमः.—(Improvement) वृद्धिः *f.*, प्राप्तिः *f.*, आगमः, संवृद्धिः *f.*—(In learning) विद्यागमः, विद्याप्राप्तिः *f.*, वृद्धिः *f.*, अभ्यासः, निवेशः.

To progress, *v. n.* (Proceed) प्रगम्, अग्रे गम्, प्रया, अग्रे या, प्रसृ, अग्रे सृ, प्रवृत्, प्रस्था, क्रम्.—(Improve) वृध्, प्रवृध्, वृद्धिं गम् or प्राप्, आगमं कृ.

Progression, *s.* (Moving forward). *See* Progress.—(Arithmetical) श्रेढी, अनुपातः, चयः.—(Geometrical) गुणोत्तरं, चयः; 'common difference in progression,' उत्तरं; 'last term in progression,' अन्त्यपदं, अन्त्यधनं.

Progressive, *a.* क्रमकः -का -कं, क्रमिकः -का -कं, आनुक्रमिकः &c., क्रममाणः -णा -णं, प्रक्रममाणः &c., क्रमशो वर्धमानः -ना -नं, उत्तरोत्तरं or अधिकाधिकं वर्धमानः &c., प्रसरः -रा -रं, उत्तरोत्तरः -रा -रं, अधिकाधिकः -का -कं, वर्धिष्णुः -ष्णुः -ष्णु.

Progressively, *adv.* क्रमशस्, क्रमतस्, क्रमे क्रमे, उत्तरोत्तरं, अधिकाधिकं.

Progressiveness, *s.* क्रमकगतिः *f.*, अनुक्रमणं, क्रमशो वृद्धिः *f.*, क्रमकता.

To prohibit, *v. a.* (Forbid, interdict, hinder) निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्, प्रत्याख्या, अन्तःख्या, वृ in caus., निवृ, निरुध्, प्रतिरुध्, अवरुध्, उपरुध्, बाध्, प्रतिबन्ध्, निषेधं कृ, प्रतिषेधं कृ, वारणं कृ, निवारणं कृ; 'is prohibited,' निवार्य्यते. *See To* forbid.

Prohibited, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः &c., वारितः -ता -तं, निवारितः &c., प्रत्याख्यातः &c., अन्तःख्यातः &c., बाधितः &c.

Prohibition, *s.* निषेधः, प्रतिषेधः -धनं, वारणं, निवारणं, प्रत्याख्यानं, प्रतिषेधोक्तिः *f.*, निषेधोक्तिः *f.*, अन्तःख्यानं, बाधः -धा -धनं, रोधः, निरोधः, पर्य्युदासः, आसेधः, वर्जः; 'written prohibition,' निवारणपत्रं, निषेधपत्रं.

Prohibitor, *s.* प्रतिषेद्धा *m.* (द्धृ), प्रतिषेधकः, निषेद्धा *m.*, निवारकः.

Prohibitory, *a.* निषेधकः -का -कं, प्रतिषेधकः -का -कं, वारकः &c., निवारकः &c., माङर्थकः -की -कं, निषेधार्थकः &c., निषेधकरः -रा -रं.

Project, *s.* कल्पना, सङ्कल्पः, कल्पितं, परिकल्पना, परिकल्पितं, युक्तिः *f.*, प्रयुक्तिः, प्रयोगः, उपायः, उपायकल्पना, अनुसन्धानं, व्यवसायः, अभिप्रायः, आशयः, उद्देशः.

To project, *v. a.* (Cast forward) प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), क्षिप्, अस्, प्रास्, प्रमुच्, पत् in caus.—(In the mind) मनसा कॢप् (c. 10. कल्पयति -यितुं) or परिकॢप्, उपायं कॢप् or अनुसन्धा, अग्रे or पूर्व्वं चिन्त् or प्रचिन्त् or परिचिन्त्, अग्रे निरूप्, घट्, व्यवसो, आलोच्, अग्रकल्पनां कृ. *See To* plain, contrive.

To project, *v. n.* (Jut out, be prominent) बहिःस्था (c. 1. -तिष्ठति -स्थातुं), बहिर्वृत्, बहिर्भू, बहिर्लम्ब्, बहिःप्रलम्ब्, प्रसृ (c. 1. -सरति -सर्तुं), प्रसरः -रा -रं भू, अतिवृत्, अतिक्रम्, उदग्रः -ग्रा -ग्रं भू, प्ररूढः -ढा -ढं भू, प्ररुह् (c. 1. -रोहति -रोढुं), उन्नतः -ता -तं भू or अस्; 'projecting beyond,' अतिक्रम्य, क्रान्त्वा.

Projected, *p. p.* (Cast forward) प्रक्षिप्तः -प्ता -प्तं, क्षिप्तः &c., पातितः -ता -तं.—(Planned) मनसा कल्पितः &c. or परिकल्पितः &c., घटितः &c.

Projectile, *a.* दूरवेधी -धिनी -धि (न्); 'weapon,' दूरवेधि शस्त्रं, अस्त्रं.

Projecting, *part.* (Jutting out) बहिःस्थः -स्था -स्थं, बहिर्वर्त्ती -र्त्तिनी &c., बहिर्लम्बः -म्बा -म्बं, प्रलम्बः &c., बहिःप्रलम्बः &c., उदग्रः -ग्रा -ग्रं, प्रसरः -रा -रं, अतिक्रमी &c., अतिवर्त्ती &c., उन्नतः -ता -तं, प्ररूढः -ढा -ढं, प्ररूढः &c.; 'having a projecting nose,' प्रलम्बघोणः -णा -णं, उन्नसः -सा -सं; 'having projecting teeth,' उदग्रदन् -दती -दत् (त्), उद्दन्तुरः -रा -रं, करालः -ला -लं, करालदन्तः -न्ता -न्तं, दंष्ट्री &c., दंष्ट्राकरालवदनः -ना -नं, 'having a projecting breast,' स्तनाभोगविशिष्टः -ष्टा -ष्टं.

Projection, *s.* (Jutting out) बहिर्वर्त्तनं, बहिर्लम्बत्वं, प्रलम्बता, उदग्रता, आभोगः, प्रसरः -रणं.—(Part jutting out) बहिर्लम्बभागः, बहिःस्थभागः, उदग्रभागः, उन्नतभागः, प्ररूढभागः, आभोगः, प्रसरः, निर्यूहः, दन्तकः.—(In astronomy) भक्तिः *f.*, छेद्यकं, 'projection of an eclipse,' परिलेखः.—(The act of scheming) उपायकल्पना. *See* Project.

Projector, *s.* उपायकल्पकः, परिकल्पकः, उपायचिन्तकः, अग्रचिन्तकः.

Prolapse, prolapsus, *s.* (As of an intestine) भ्रंशः; 'prolapsus ani,' गुदभ्रंशः; 'uteri,' गर्भाशयभ्रंशः, योन्यर्शस् *n.*

To prolapse, *v. n.* भ्रंश् (c. 4. भ्रश्यति, c. 1. भ्रंशते -शितुं), प्रभ्रंश्, परिभ्रंश्.

Prolated, *p. p.* दीर्घोच्चारितः -ता -तं.—(Vowel) प्लुतः -तं.

Prolation, *s.* (Drawling utterance) दीर्घोच्चारणं, द्राघिष्ठप्राणायामः.

Prolegomena, *s.* परिभाषा, आभाषः, आरम्भोक्तिः *f.*, आरम्भवाक्यं, पूर्व्ववाक्यं.

Prolepsis, *s.* पूर्व्वग्रहणं, अग्रग्रहणं, अप्राप्तकालग्रहणं, पूर्व्वोदाहरणं.

Prolific, *a.* बहुप्रजः -जा -जं, बहुप्रसवः -वा -वं, बहुप्रजावान् -वती -वत् (त्), प्रजावान् &c., प्रसवशीलः -ला -लं, प्रचुरप्रजः &c., बहुपत्यः -त्या -त्यं, बहुसुती -तिनी -ति (न्), सुती &c., प्रजनिष्णुः -ष्णुः -ष्णु, बहुजन्यः -न्या -न्यं, गर्भधारणशीलः -ला -लं, बहुसन्तानः -ना -नं.—(Productive) बहुफलदः -दा -दं, बहुफलः -ला -लं, बहुफलोत्पादकः -का -कं. *See* the word.

Prolix, *a.* दीर्घसूत्रः -त्रा -त्रं, दीर्घसूत्री -त्रिणी -त्रि (न्), अतिविस्तीर्णः

-र्णा -र्णं, अतिविस्तृतः -ता -तं, अतिदीर्घः -र्घा -र्घं, प्रपञ्चितः -ता -तं, आयायतः -ता -तं, अतिक्रान्तः -न्ता -न्तं, विस्तीर्णः &c., आयतः &c.

Prolixity, prolixness, *s.* दीर्घसूत्रता -त्वं, अतिविस्तीर्णता, अतिविस्तरः, अतिदीर्घता, अतिप्रपञ्चः, विस्तीर्णता, विस्तारः, विस्तरः, वाक्यविस्तारः, वाग्विस्तारः, प्रपञ्चः -ञ्चनं, अतिप्रसङ्गः, अतिबाहुल्यं.

Prolixly, *adv.* अतिविस्तरेण, सुविस्तरेण, वाग्विस्तारेण, विस्तरशस्.

Prologue, *s.* प्रस्तावना -नं, नान्दी, प्रवेशकः, पूर्व्वरङ्गः, आमुखं, प्रकरणं, आरम्भः, आरम्भवाक्यं; 'speaker of it,' नान्दीवादी *m.* (न्), नान्दीकरः.

To prolong, prolongate, *v. a.* (Lengthen) दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं), वितन्, प्रतन्, विततीकृ, विस्तृ, विस्तीर्णीकृ, प्रपञ्च्, आयम्, आयतीकृ, विसृ, प्रसृ.

Prolongation, *s.* दीर्घीकरणं, द्राघिमा *m.* (न्), विस्तारः, विस्तरः, विस्तृतिः *f.*, विततिः *f.*, विततीकरणं, आयतिः *f.*, आयतीकरणं, प्रपञ्चः -ञ्चनं.

Prolonged, *p. p.* दीर्घीकृतः -ता -तं, आयतीकृतः &c., विततीकृतः &c., विस्तृतः &c., आयामितः &c.; 'prolonged note,' लयः.

Prolusion, *s.* पूर्व्वरङ्गः, पूर्व्वपरीक्षा. *See* Prelude.

Promenade, *s.* (Walk for amusement) विहारः, विहरणं, परिक्रमः. —(Place for walking) विहारस्थानं, विहरणस्थानं.

To promenade, *v. n.* विहृ (c. 1. -हरति -ते -हर्त्तुं), विहारं कृ, परिक्रमं कृ.

Prominence, prominency, *s.* (A standing out) उन्नतिः *f.*, समुन्नतिः *f.*, उदग्रता, प्रलम्बता, उत्तुङ्गता, सुरूढता, प्ररूढता, आभोगः; 'of the breast,' स्तनाभोगः. —(Conspicuousness) प्रधानता, प्राधान्यं, प्रमुखत्वं, विशिष्टता, वैशिष्ट्यं, उत्कृष्टता, उत्कर्षः, समुन्नतिः *f.*, श्रेष्ठता, परमपदं, मुख्यस्थानं, मुख्यता.

Prominent, *a.* (Standing out) उन्नतः -ता -तं, समुन्नतः &c., उदग्रः -ग्रा -ग्रं, उत्तुङ्गः -ङ्गा -ङ्गं, सुरूढः -ढा -ढं, प्रलम्बः -म्बा -म्बं, आभोगवान् -वती -वत् (त्), साभोगः -गा -गं, उद् or उत् prefixed; 'having prominent teeth,' उद्दन्तुरः -रा -रं, उदग्रदन् &c. *See* Projecting; 'having a prominent nose,' उन्नसः -सा -सं, प्रलम्बघोणः -णा -णं; 'having prominent breasts,' स्तनाभोगः -गा -गं, स्तनाभोगविशिष्टः -ष्टा -ष्टं, उन्नतस्तन: &c.—(Conspicuous) सुदृश्यः -श्या -श्यं, सुदर्शनीयः -या -यं, सुव्यक्तः -क्ता -क्तं, सुप्रकाशः -शा -शं, प्रथमदृग्विषयः -या -यं, प्रथमदृग्गोचरः -रा -रं.—(Eminent, principle) प्रमुखः -खा -खं, मुख्यः -ख्या -ख्यं, प्रधानः -ना -नं, उत्कृष्टः -ष्टा -ष्टं, प्रकृष्टः &c., विशिष्टः -ष्टा -ष्टं, परमः -मा -मं.

Prominently, *adv.* उन्नतं, सुव्यक्तं, सुप्रकाशं, प्रधानतस्, प्राधान्यतस्.

Promiscuous *a.* प्रकीर्णः -र्णा -र्णं, सङ्कीर्णः &c., सङ्कुलः -ला -लं, सान्निपातिकः -की -कं, अविविक्तः -क्ता -क्तं, निर्विशेषः -षा -षं, अपरिच्छिन्नः -न्ना -न्नं, अपरिच्छेदः -दा -दं, अभेदः -दा -दं, मिश्रितः -ता -तं, क्रमविचारहीनः -ना -नं, भेदविचारहीनः &c., अवर्गीयः -या -यं; 'promiscuous intercourse,' सङ्करः, साङ्कर्य्यं.

Promiscuously, *adv.* अविविक्तं, अविशेषेण, निर्विशेषं -षेण, अविशेषतस्, अभेदेन, सङ्कीर्णं, प्रकीर्णं, अक्रमेण, अपरिच्छेदेन; 'going about promiscuously,' सङ्कीर्णचारी -रिणी &c.

Promiscuousness, *s.* सङ्कीर्णता, प्रकीर्णता, सङ्कुलत्वं, अविविक्तता, निर्विशेषत्वं, परिच्छेदहीनता, भेदहीनता, क्रमविचारहीनता, भेदविचारराहित्यं. अवर्गीयता.

Promise, *s.* प्रतिज्ञा, प्रतिज्ञानं, प्रतिज्ञातं, वचनं, अभ्युपायः, अङ्गीकारः, स्वीकारः, उरीकारः, ऊरीकारः, उररीकारः, संश्रवः, प्रतिश्रवः, उपश्रुतिः *f.*, संविद् *f.*, नियमः, प्रत्ययः, उपगमः, अभ्युपगमः, परिपणनं; 'hollow or empty promise,' निरर्थकप्रतिज्ञा, असत्यप्रतिज्ञा, रिक्तभाषणं, रिक्तवचनं, शब्दपाण्डित्यं; 'to keep or fulfil a promise,' प्रतिज्ञां पाल् or शुध् or तॄ or अपवृज् or सत्याकृ or सत्यीकृ, उक्तं निर्वह् (c. 10. -वाहयति -यितुं), वचनोद्धारं कृ; 'one who keeps a promise,' कृतप्रतिज्ञः -ज्ञा -ज्ञं, सत्यसन्धः -न्धा -न्धं; 'to break a promise,' प्रतिज्ञाभङ्गं कृ, वचनभङ्गं कृ, संविद्व्यतिक्रमं कृ, प्रतिज्ञाव्यतिक्रमं कृ, प्रतिज्ञालंघनं कृ, विसंवद् (c. 1. -वदति -दितुं), विसंवादं कृ, विप्रलम्भं कृ, प्रतिज्ञासन्न्यासं कृ; 'slow in performing a promise,' प्रतिज्ञामन्थरः -रा -रं; 'to confirm a promise by touching water,' उदकस्पर्शं कृ; 'a sure, unfailing promise,' सत्यप्रतिज्ञा, सत्यवचनं, भीष्मप्रतिज्ञा, रामप्रतिज्ञा, रामवचनं.

To promise, *v. a.* and *n.* प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), सम्प्रतिज्ञा with dat. or gen. of the person and acc. of the thing; प्रतिज्ञां कृ, अङ्गीकृ, उरीकृ, ऊरीकृ, उररीकृ, प्रतिश्रु (c. 5. -शृणोति -श्रोतुं), संश्रु, उपश्रु, उपगम् (c. 1. -गच्छति -गन्तुं), उपगमं कृ, अभ्युपे (c. 2. अभ्युपैति -तुं, rt. इ), पणं कृ, परिपणनं कृ, संगॄ (c. 6. -गिरते -गरितुं -रीतुं) पण् (c. 1. पणते -णितुं), परिपण्, वाग्दानं कृ; 'I promise this to thee,' तुभ्यम् इदं ददानि or दास्यामि इति प्रतिज्ञापूर्व्वं वद्; 'he promises a cow to the Brahmin,' विप्राय गां प्रतिशृणोति; 'to promise marriage,' विवाहप्रतिज्ञां कृ, वाग्दानं कृ, वाचादानं कृ, वाग्निश्चयं कृ.

Promise-breach, *s.* प्रतिज्ञाभङ्गः, वचनभङ्गः, प्रतिज्ञाव्यतिक्रमः.

Promise-breaker, *s.* प्रतिज्ञाभञ्जकः, प्रतिज्ञालंघी *m.* (न्), प्रतिज्ञाव्यतिक्रमी *m.*, वचनघाती *m.*, संविद्व्यतिक्रमी *m.*, संविद्व्यतिक्रमकारी *m.*, विसंवादी *m.*

Promised, *p. p.* प्रतिज्ञातः -ता -तं, कृतप्रतिज्ञः -ज्ञा -ज्ञं, अङ्गीकृतः -ता -तं, उरीकृतः &c., ऊरीकृतः &c., उररीकृतः &c., प्रतिश्रुतः -ता -तं, संश्रुतः &c., उपश्रुतः &c., आश्रुतः &c., स्वीकृतः &c., उपगतः &c., अभ्युपगतः &c., अभ्युपेतः &c., परिपणितः &c., संविदितः &c., सन्दिष्टः -ष्टा -ष्टं, वाग्दत्तः -त्ता -त्तं, वाचादत्तः &c., वचनदत्तः &c., सङ्गीर्णः -र्णा -र्णं, समाहितः -ता -तं.

Promise-keeper, *s.* प्रतिज्ञापालकः, सत्यप्रतिज्ञः, सत्यसन्धः, कृतप्रतिज्ञः, वचननिर्वाहकः, उक्तिनिर्वाहकः.

Promiser, *s.* प्रतिज्ञाकारी *m.* (न्), प्रतिज्ञाकृत् *m.*, प्रतिज्ञाता *m.* (तृ).

Promising, *part.* or *a.* आशाजनकः -का -कं, आशाजननः -ना -नं, आशाकारी &c.

Promissory, *a.* सप्रतिज्ञः -ज्ञा -ज्ञं, प्रतिज्ञायुक्तः -क्ता -क्तं, प्रतिज्ञाविशिष्टः &c

Promontory, *s.* भूनासिका, भूमिनासिका, भूशलाका, अन्तरीपः -पं, समुद्रमध्ये महाद्वीपबहिःस्थो भूमिभागः, महाद्वीपनासिका, उदग्रभूमिः *f.*, उदग्रभूः *f.*, समुद्रविच्छिन्नभूमिः *f.*, स्थलोच्चयः.

To promote, *v. a.* (Further) उपकृ, पुरस्कृ, साहाय्यं कृ, उपकारं कृ, प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), सिद्धिसाधनं कृ.—(Excite, incite) उत्सिच्, समुत्सिज्, उद्युज्, प्रणुद्, प्रचुद्, प्रकृष्, प्रवृत्.—(Exalt, prefer) पदं वृध् (c. 10. वर्धयति -यितुं) or संवृध् or प्रवृध्, श्रेष्ठपदे or उत्कृष्टपदे नियुज् or प्रतिपद्, पदवृद्धिं कृ, पदवर्धनं कृ, प्रतिपत्तिं दा, पुरस्कृ.

Promoted, *p. p.* (Furthered) प्रवर्त्तितः -ता -तं, उपकृतः -ता -तं, कृतोपकारः -रा -रं, कृतसाहाय्यः -य्या -य्यं.—(Exalted, preferred) संवर्धितः -ता -तं, प्रवर्धितः &c., श्रेष्ठपदनियुक्तः -क्ता -क्तं.

Promoter, *s.* प्रवर्त्तकः, प्रयोजकः, प्रयोजककर्त्ता *m.* (र्तृ), उत्तेजकः.

Promotion, *s.* (Furtherance) उपकारः, सहायता, साहाय्यं, प्रवर्त्तनं, पुरस्कारः. संवर्धनं -ना.—(Preferment, exaltation) पदवृद्धिः *f.*, पदवर्धनं, संवर्धना -नं, प्रवर्धनं, वर्धनं, प्रतिपत्तिः *f.*, श्रेष्ठपदनियोजनं, श्रेष्ठपदप्राप्तिः *f.*

ROMOTIVE, *a.* संवर्धक: -का -कं, वर्धक: &c., प्रवर्त्तक: -का -कं, साधक: &c., सिद्धिसाधक: &c., संवर्धनकारी -रिणी -रि (न्).

ROMPT, *a.* उद्युक्त: -क्ता -क्तं, उद्यत: -ता -तं, अविलम्ब: -म्बा -म्बं, अविलम्बी -म्बिनी -म्बि (न्), अविलम्बित: -ता -तं, प्रत्युत्पन्न: -न्ना -न्नं, प्रत्युत्पन्नमति: -ति: -ति, आशुकारी -रिणी &c., सुप्रस्तुत: -ता -तं, प्रस्तुत: -ता -तं, उद्योगी &c., उद्यमी &c., प्रतिभानवान् -वती -वत् (त्), प्रतिभावान् &c., सप्रतिभ: -भा -भं, प्रगल्भ: -ल्भा -ल्भं, पटु: -टु: -ट्वी -टु, अदीर्घसूत्र: -त्रा -त्रं, अविचार: -रा -रं, क्षिप्र: -प्रा -प्रं, सत्वर: -रा -रं.

TO PROMPT, *v. a.* (Incite) उद्युज् (c. 10. -योजयति -यितुं), प्रयुज्, नियुज्, प्रेर्, प्रवृत्, प्रोत्सह्, उत्सह्, प्रचुद्, प्रणुद्, उत्तिज्, प्रवर्त्तनं कृ, प्रोत्साहनं कृ.—(Suggest something forgotten) विस्मृतबोधनं कृ, विस्मृतसूचनं कृ, उत्तरसाधनं कृ, सूचनां कृ.

PROMPTED, *p. p.* प्रेरित: -ता -तं, प्रोत्साहित: &c., प्रवर्त्तित: &c., नियोजित: &c., प्रयोजित: &c., उद्युक्त: -क्ता -क्तं, उत्तेजित: -ता -तं, सूचित: &c.

PROMPTER, *s.* (Inciter) प्रेरक:, प्रवर्त्तक:, प्रोत्साहक:, प्रयोजक:.—(One who suggests something forgotten) विस्मृतबोधक:, विस्मृतसूचक:, अपस्मृतसूचक:, उत्तरसाधक:, सूचनाकारी *m.* (न्), सूचक:.—(At a theatre) सूचक:, सूत्रधार:.

PROMPTING, *s.* (Act of inciting) प्रेरणं, प्रवर्त्तनं, प्रोत्साहनं, प्ररोचनं, उत्तेजनं.—(Suggesting something forgotten) विस्मृतसूचनं -ना, अपस्मृतसूचनं, सूचना.

PROMPTITUDE, PROMPTNESS, *s.* अविलम्ब:, प्रत्युत्पन्नता, उद्यम:, उद्युक्तता, उद्योग:, क्षिप्रता -त्वं, सत्वरता, पटुता, प्रस्तुतता, सुप्रस्तुतता, आशुकारित्वं, प्रतिभा, अविचार:.

PROMPTLY, *adv.* अविलम्बेन, अविलम्बितं, सद्यस्, सत्वरं, क्षिप्रं, आशु, अचिरेण, अचिरात्, अविचारेण, सोद्योगं, सोद्यमं, सप्रतिभं.

TO PROMULGATE, *v. a.* (Publish, proclaim) प्रकाश्, विकाश्, ख्या in caus., प्रख्या, प्रचर् in caus., प्रकटीकृ, कृत्, उत्कृत्, प्रकृत्, घुष् &c.

PROMULGATED, *p. p.* प्रकाशित: -ता -तं, प्रकीर्त्तित: &c., उत्कीर्त्तित: &c., प्रचारित: &c., प्रकटीकृत: &c., प्रकाशम् अभिहित: -ता -तं. *See* PUBLISHED, PROCLAIMED.

PROMULGATION, *s.* प्रकाशनं, प्रचारणं, प्रकीर्त्तनं, उत्कीर्त्तनं, विघोषणं.

PROMULGATOR, *s.* प्रकाशक:, प्रचारक:, ख्यापक:, विघोषक:, घोषक:.

PRONE, *a.* (Bending forward, not erect, looking down) प्रणत: -ता -तं, नत: &c., नम्र: -म्रा -म्रं, प्रणतशिरस्क: -स्का -स्कं, अधोमुख: -खा -खी -खं, अधोवदन: -ना -नं.—(Lying with the face downwards) अधोमुख: &c., अधोवदन: &c., अधोमुखशय: -या -यं.—(Inclined, disposed) प्रवण: -णा -णं, उन्मुख: -खा -खं, प्रवर्त्तित: -ता -तं, शील in comp. *See* INCLINED.—(Disposed to fall) पातुक: -की -कं, पतयालु: -लु: -लु.

PRONENESS, *s.* (State of bending downwards) प्रणतत्वं -ता, नम्रता, अधोमुखता.—(Inclination, disposition) प्रवणता, प्रावण्यं, मन:प्रावण्यं, उन्मुखता, प्रवृत्ति: *f.*, प्रवाह:, शीलता; 'proneness to fall,' पातुकता -त्वं, पतयालुता, पतनशीलता.

PRONG, *s.* शूल: -लं, शिखा, अग्रं, कण्टक:; 'having two prongs,' द्विशिख: -खा -खं, द्व्यग्र: -ग्रा -ग्रं; 'having three prongs,' त्रिशिख: &c., त्र्यग्र: &c.

PRONOMINAL, *a.* सर्वनामसम्बन्धी -न्धिनी -न्धि (न्), सर्वनामविषयक: -का -कं.

PRONOUN, *s.* (In grammar) सर्वनाम *n.* (न्), सामान्यसंज्ञा.

TO PRONOUNCE, *v. a.* (Utter articulately) उच्चर् (c. 10. -चारयति -यितुं), उदाहृ (c. 1. -हरति -हर्त्तुं), व्याहृ, समुदाहृ, गद् (c. 1. गदति -दितुं), उदीर्, समुदीर्.—(Speak) वद् (c. 1. वदति -दितुं), प्रवद्, वच्, प्रवच्, गद्, निगद्.—(Affirm confidently) निश्चयपूर्व्वं वद्, दृढनिश्चयेन वद्, निर्णयपूर्व्वं वद्.—(Declare) प्रख्या, कृत्, प्रकृत्.—(Pronounce sentence) निर्णयं कृ, निर्णयपत्रं कृ.

PRONOUNCEABLE, *a.* उच्चारणीय: -या -यं, उच्चार्य्य: -र्य्या -र्य्यं, उदाहरणीय: &c.; 'easily pronounceable,' सुखोच्चार्य्य: &c., सुखोद्य: -द्या -द्यं.

PRONOUNCED, *p. p.* (Uttered) उच्चारित: -ता -तं, उदाहृत: &c., समुदाहृत: &c., व्याहृत: &c., अभिव्याहृत: &c., उदीरित: &c., समुदीरित: &c.; 'pronounced imperfectly,' ग्रस्त: -स्ता -स्तं, लुप्तवर्णपद: -दा -दं.—(Spoken) उक्त: -क्ता -क्तं, गदित: -ता -तं, निगदित: &c.—(Declared) ख्यापित: -ता -तं, कीर्त्तित: &c., प्रकीर्त्तित: &c.

PRONUNCIATION, *s.* उच्चारणं, उच्चार:, उल्लेख:, उल्लेखनं, उदाहरणं, उदाहार:, व्याहार:, व्याहरणं, उदीरणं; 'of letters,' वर्णोच्चार: -रणं, वर्णोदाहार:, अक्षरव्याहार:; 'easy of pronunciation,' सुखोच्चार्य्य: -र्य्या -र्य्यं, सुखोद्य: -द्या -द्यं; 'difficult,' दु:खोच्चार्य्य: &c., दुरुदाहर: -रा -रं, दुर्वच: -चा -चं; 'science of pronunciation,' शिक्षा.

PROOF, *s.* (Evidence, demonstration) प्रमाणं, प्रामाण्यं, साधनं, उपपादनं, उपपत्ति: *f.*, प्रतिपत्ति: *f.*, प्रतिपादनं, सिद्धि: *f.*, सिद्धान्त:, निर्देश:, निर्णय:, निर्णीतत्वं, प्रमाता *m.* (तृ), प्रमातृत्वं, क्रियानिर्देश:; 'written proof,' लेखप्रमाणं, साधनपत्रं; 'ocular,' प्रत्यक्षप्रमाणं; 'production of proof,' साधननिर्देश:; 'having proof,' सप्रमाण: -णा -णं; 'absence of proof,' अप्रामाण्यं, प्रमाणाभाव:; 'according to proof,' प्रमाणतस्, प्रामाण्यतस्; 'party on whom rests the onus of proof,' साध्यवान् *m.* (त्); 'admitted as proof,' प्रमाणीभूत: -ता -तं.—(In arithmetic) उपपत्ति: *f.*; 'by algebra,' अव्यक्तक्रियया उपपत्ति:.—(Evident or sure sign) लक्षणं, सनिश्चयलक्षणं.—(Trial, test) परीक्षा, उपधा, प्रतीति: *f.*, कष्टि: *f.*; 'to put to the proof,' परीक्ष् (c. 1. -ईक्षते -क्षितुं). *See* TO PROVE; 'this may be put to the proof,' इदम् प्रतीतिर् उत्पाद्या.—(Rough impression, first impression) स्थूलमुद्रा, प्रथममुद्रा, पूर्व्वमुद्रा.—(Impenetrability) अभेद्यता, अभेदनीयता, अतिदृढता, सुदृढता, अविकार्य्यता; 'proof against,' अभेद्य: -द्या -द्यं, अविकार्य्य: -र्य्या -र्य्यं, असहार्य्य: &c., अबाध्य: &c.; 'proof against temptation,' अलोभनीय: -या -यं, अप्रलोभनीय. &c.

PROOFLESS, *a.* निष्प्रमाण: -णा -णं, अप्रमाण: &c., प्रमाणरहित: -ता -तं.

To PROP, *v. a.* (Support) आलम्ब् (c. 1. -लम्बते -म्बितुं, c. 10. -लम्बयति -यितुं), अवलम्ब्, समवलम्ब्, उपस्तम्भ्, विष्टम्भ्, संस्तम्भ्, धृ in caus., सन्धृ, अभिधृ.

PROP, *s.* आधार:, उपस्तम्भ:, अवष्टम्भ:, अवलम्बनं, आलम्ब: -म्बनं, धारणं, उपघ्न:, आश्रय:, उपलम्भ:; 'as a tree of a creeper,' वल्लिकाश्रय:.

To PROPAGATE, *v. a.* (Multiply the kind by successive production) उत्पत्तिपारम्पर्य्येण or परम्परप्रसवेन जातिं वृध् (c. 10. वर्धयति -यितुं), आनुक्रमिकप्रसवेन सन्तानं or वंशं वृध्, क्रमिकजननेन प्रजावृद्धिं कृ or सन्तानवृद्धिं कृ.—(Generate successively) पारम्पर्य्येण उत्पद् (c. 10. -पादयति -यितुं), क्रमे क्रमे जन् (c. 10. जनयति -यितुं) or प्रजन् or सु or प्रसु.—(Increase, extend) वृध् (c. 10. वर्धयति -यितुं), प्रवृध्, परिवृध्, बहुतरीकृ, अधिकतरीकृ, विस्तृ in caus., वितन्, सन्तन्, प्रसृ in caus., विसृ, प्रथ्.—(Disseminate doctrines, &c.) प्रचर् (c. 10. -चारयति -यितुं), प्रचरीकृ, प्रचलीकृ.

To PROPAGATE, *v. n.* (Have young) शावकान् प्रसू (c. 2. -सूते, c. 4. -सूयते -सोतुं) or जन् (c. 10. जनयति -यितुं) or उत्पद् (c. 4. -पद्-

यति -यितुं), प्रसवं कृ. प्रसूतिं कृ.

PROPAGATED, *p. p.* परम्परप्रसवेन or आनुक्रमिकप्रसवेन वर्धितः -ता -तं or वर्धितजातिः -तिः -ति or वर्धितवंशः -शा -शं or वर्धितप्रजः -जा -जं, क्रमे क्रमे or अनुक्रमं or पारम्पर्येण प्रसूतः -ता -तं or जातः -ता -तं or उपजातः &c. or उत्पादितः -ता -तं.—(Increased, extended) वर्धितः- ता -तं, प्रवृद्धः -द्धा -द्धं, सम्नतः -ता -तं, प्रसारितः &c., विस्तीर्णः -र्णा-र्णं, प्रथितः &c.—(Disseminated) प्रचारितः-ता-तं, प्रचलीकृतः &c.

PROPAGATION, *s.* (Multiplication of the kind by successive production) उत्पत्तिपारम्पर्येण प्रजावृद्धिः *f.*, परम्परप्रसवेन सन्तानवृद्धिः *f.*, आनुक्रमिकप्रसवेन जातिवर्धनं.—(Successive generation) पारम्पर्योत्पत्तिः *f.*, उत्पत्तिपारम्पर्यं, परम्परोत्पत्तिः *f.*, परम्परप्रसूतिः *f.*, प्रसूतिपारम्पर्यं, क्रमिकोत्पत्तिः *f.*, अनुक्रमोत्पत्तिः *f.*, प्रत्युत्पत्तिः *f.*—(Extension, spreading) वर्धनं, प्रवर्धनं, विस्तारः, प्रसारणं, विततिः *f.*, सन्ततिः *f.*, प्रथनं.—(Dissemination) प्रचारणं, प्रचलीकरणं, व्यापनं, व्याप्तिः *f.*

PROPAGATOR, *s.* क्रमिकोत्पादकः, उत्पत्तिपारम्पर्येण प्रजावर्धकः or वंशवर्धकः or सन्तानवर्धकः, प्रचारकः, विस्तारकः.

To PROPEL, *v. a.* प्रेर् (c. 10. प्रेरयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं), चल् (c. 10. चालयति -यितुं), सञ्चल्, सृ (c. 10. सारयति -यितुं), सञ्चर् (c. 10. -चारयति -यितुं), कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्.

PROPELLED, *p. p.* प्रेरितः -ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, चालितः -ता -तं, सञ्चालितः &c., सञ्चारितः &c., सारितः &c.

PROPENSE, *a.* प्रवणः -णा -णं, उन्मुखः -खा -खं. *See* PRONE.

PROPENSION, PROPENSITY, *s.* प्रवणता -त्वं, प्रावण्यं, मनःप्रावण्यं, चित्तप्रावण्यं, उन्मुखता, प्रवृत्तिः *f.*, प्रवाहः, शीलता -त्वं in comp., आलुता affixed; 'propensity to fall,' पतनशीलता, पतयालुता, पतनोन्मुखता; 'good propensity,' सुशीलता, साधुशीलत्वं; 'having good propensities,' सुशीलः -ला -लं; 'evil propensity,' दुर्व्यसनं, व्यसनं, दुःशीलता, दुर्गुणः; 'having evil propensities,' दुर्व्यसनी -निनी -नि (न्), दुःशीलः -ला -लं.

PROPER, *a.* (Peculiar) स्व in comp., स्वकीयः -या -यं, स्वीयः -या -यं, स्वकः -का -कं, आत्म in comp., आत्मीयः -या -यं, आत्मकीयः &c., निज in comp., निजः -जा -जं, अव्यापी -पिनी &c., असाधारणः -णा -णी -णं; 'proper nature,' स्वभावः, स्वभावः; 'proper duty,' स्वधर्मः.—(Fit, suitable) योग्यः -ग्या -ग्यं, यथायोग्यः &c., युक्तः -क्ता -क्तं, उपयुक्तः &c., उपयोगी -गिनी &c., उचितः -ता -तं, यथोचितः &c., समुचितः &c., औपयिकः -की -कं, समञ्जसः -सा -सं, सङ्गतः -ता -तं, सङ्गतार्थः -र्था -र्थं, उपपन्नः -न्ना -न्नं, पर्याप्तः -प्ता -प्तं, न्याय्यः -य्या -य्यं, अर्हः -र्हा -र्हं, यथार्हः &c., पथ्यः -थ्या -थ्यं, अभिनीतः -ता -तं, प्रशस्तः -स्ता -स्तं, क्षमः -मा -मं. Sometimes expressible by the fut. pass. part.; as, 'proper to be done,' कर्त्तव्यः -व्या -व्यं, करणीयः -या -यं, कार्य्यः -र्य्या -र्य्यं: 'a proper course,' कर्त्तव्यता; 'proper to be eaten,' खाद्यः -द्या -द्यं; 'proper for diet,' पथ्यः &c.; 'eating what is proper,' पथ्याशी &c.; 'to be proper,' युज् in pass. (युज्यते), अर्ह् (c. 1. अर्हति -र्हितुं), उपपद् in pass. (-पद्यते). *See* OUGHT.—(Proper noun) नामवाचकः.

PROPERLY, *adv.* यथायोग्यं, यथोचितं, युक्तं, योग्यं, उचितं, यथायुक्तं, यथार्हं -र्हतस्, सम्यक्, उपयुक्तं, योगतस्, यथार्थं, यथायथं, यथातथं, समञ्जसं, न्यायतस्, धर्मतस्, साम्प्रतं, स्थाने.—(Strictly) तत्त्वतस्, वस्तुतस्.

PROPERTY, *s.* (Quality, inherent or natural characteristic) गुणः, धर्मः, स्वभावः, स्वधर्मः, विशेषः -षणं, विशेषलक्षणं, लक्षणं, सहजगुणः, सहजभावः, प्रकृतिभावः, प्रकृतिगुणः, रूपं, स्वरूपं, वस्तु वस्तुस्वभावः, वस्तुशक्तिः *f.*, निसर्गभावः, अपच्छेदः -दकः; 'spec property,' जातिस्वभावः, जातित्वं; 'properties, a collectio them,' गुणसमूहः, गुणजातं; 'the three properties of natu गुणत्रयं; *see* NATURE; 'possession of properties,' गुण -त्वं, गुणता, गुणिता; 'possessed of them,' गुणान्वितः -ता गुणवान् &c.; 'a general or common property' साधारण साधारणधर्मः; 'latent property,' धर्मी *n.* (न्), गूढधर्मः; 'so properties belong to all numbers,' कतिचिद् धर्माः सर्वसं विषयका भवन्ति.—(Right of possessing) स्वत्वं, अधिकारः, स्व कारित्वं -ता, स्वाम्यं, स्वामित्वं, प्रभुत्वं.—(Thing owned, o possession) स्वं, स्वधनं, स्वविषं, स्वद्रव्यं, आत्मधनं.—(Possessi in general, money, estates, &c.) धनं, वित्तं, वसु *n.*, विभ द्रव्यं, द्रविणं, अर्थः, रिक्थं, ऋक्थं, दायः, राः *m.* (रै), भूमिः *f.*, धा मात्रत्वं, योगक्षेमः; 'fixed property,' स्थावरं, स्थावरधनं, निव 'moveable property,' अस्थावरं, अस्थावरधनं; 'landed p perty,' भूमिधनं, भूमिः *f.*, क्षेत्रं, पांशुः *m.*, स्थावरं; 'property cattle,' गोधनं, गोवृन्दं; 'public or common property,' गणद्र गणधनं; 'possessing property,' धनी -निनी &c., धनवान् & रिक्थी &c.; 'accession of property,' धनागमः; 'accumu tion of it,' धनसम्पत्तिः *f.*, धनोपचयः; 'heir to it,' धनाधिकारी (न्), ऋक्थभागी *m.*, रिक्थहारी *m.*, धनहारी *m.*, धनहरः, धनया 'receiving or inheriting it,' ऋक्थग्रहणं, धनग्रहणं, धनादा 'division of it,' ऋक्थभागः, दायभागः, दायविभागः; 'forfeitu of it,' दायापवर्त्तनं; 'acquisition of it,' धनार्जनं.

PROPHECY, *s.* (Act of prediction) भविष्यत्कथनं, भविष्यकथनं, भा कथनं, भाविविषयकथनं, भविष्यत्प्रदर्शनं, भविष्यद्दर्शनं, प्रदर्शनं, भा विषयप्रदर्शनं, भाविप्रदर्शनं, भविष्यत्सूचनं, आविनिरूपणं, अग्रनिरूप सिद्धादेशः. *See* PREDICTION.—(The prediction itself, matter predicted) भविष्यद्वाक्यं, भविष्यद्वचनं, भविष्यद्वादः, भवि द्वाक् *f.* (च्), भविष्यार्थः, भविष्यत् *n.*, भवितव्यं.

PROPHESIED, *p. p.* प्रदर्शितः -ता -तं, पूर्वकथितः &c., प्राक्सम्भवादर्शितः &

To PROPHESY, *v. a.* भविष्यत् कथ् (c. 10. कथयति -यितुं) or प्रदृ (c. 10. -दर्शयति -यितुं) or दृश्, भविष्यत् सूच्, भाविकथनं कृ, भा विषयं प्रदृश् or कथ्, भाविविषयं or भविष्यार्थं पूर्वं दृश् or अग्रे नि or निरूप्, भाविप्रदर्शनं कृ, अनागतं दृश् or ज्ञा in caus. *See* PREDICT, FORETELL.

PROPHET, *s.* भविष्यद्वक्ता *m.* (क्तृ), भविष्यद्वादी *m.* (न्), भाविवक्ता *m* भविष्यत्कथकः, भाविकथकः, प्रदर्शकः, भविष्यत्प्रदर्शकः, भाविप्रदर्शक भाविदर्शकः, भविष्यद्दर्शकः, भाविसूचकः, भविष्यत्सूचकः, अनागतदर्शक अनागतवक्ता *m.*, अग्रनिरूपकः, पूर्वनिरूपकः, भाविनिरूपकः, अना तज्ञापकः, भाविज्ञापकः, पुराविद् *m.*, दूरदर्शी *m.* (न्), भाविदर्शी *m.*, दैवज्ञ

PROPHETESS, *s.* भविष्यद्वक्त्री, भविष्यद्वादिनी, अनागतदर्शिनी, दैवज्ञा.

PROPHETIC, PROPHETICAL, *a.* भविष्यत्सूचकः -का -कं, भाविसूचकः & भविष्यद्दर्शकः &c., भाविदर्शकः &c., भाविप्रदर्शकः &c., प्रदर्शकः & भविष्यत्कथनविषयः -या -यं, भाविकथनसम्बन्धी &c., आर्षः -र्षी -र्षं.

PROPHETICALLY, *adv.* भविष्यत्कथनपूर्वं, भाविसूचनपूर्वं, भाविकथनक्रमे

PROPHYLACTIC, PROPHYLACTICAL, *a.* रोगनिवारकः -का -कं, रोगवारकः &

PROPINQUITY, *s.* समीपता, सामीप्यं, सन्निधिः *m.*, सन्निधानं, सन्निक प्रत्यासत्तिः *f.*, प्रत्यासन्नता, आसन्नता; 'close propinquity,' आनन्त अनन्तरं. *See* NEARNESS.

ROPITIABLE, *a.* आराधनीयः -या -यं, आराध्यः -ध्या -ध्यं, प्रसादनीयः &c.

To PROPITIATE, *v. a.* आराध् (c. 10. -राधयति -यितुं), अभिराध्, प्रसद् (c. 10. -सादयति -यितुं), सम्प्रसद्, अभिप्रसद्, अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), शम् (c. 10. शमयति -यितुं), प्रसाध् (c. 10. -साधयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, परितुष्, सम्परितुष्, अनुनी (c. 1. -नयति -नेतुं), अभिप्रणी, प्रसन्नीकृ.

ROPITIATED, *p. p.* आराधितः -ता -तं, प्रसादितः &c., प्रसन्नः -न्ना -न्नं, अनुरञ्जितः &c., अभिराद्धः -द्धा -द्धं, शमितः -ता -तं, शान्तः -न्ता -न्तं, प्रशमितः &c., अनुनीतः &c., अभिप्रणीतः &c.

ROPITIATION, *s.* आराधनं -ना, प्रसादनं, सान्त्वनं -ना, सान्त्वः -न्त्वं, शान्त्वः -न्त्वं, शान्त्वनं, अनुरञ्जनं, शमनं, शान्तिः *f.*, प्रशान्तिः *f.*, उपशान्तिः *f.*, शान्तिकर्म्म *n.* (न्), प्रशमनं, उपशमनं, अनुनयः, अभिप्रणयः, सन्तोषणं, साम *n.* (न्); 'for sin,' प्रायश्चित्तं.

ROPITIATOR, *s.* आराधकः, शान्तिकर्त्ता *m.* (र्तृ), सान्त्वनकृत्, अनुरञ्जकः.

ROPITIATORY, *a.* शान्तिकः -की -कं, शमकः -का -कं, शान्तिकरः -रा -रं, सान्त्वकरः &c., शमकारकः -का -कं, उपशमकः &c., आराधकः &c., प्रसन्नकारकः &c.; 'propitiatory ceremonies,' शान्तिकं, शान्तिकपौष्टिकं; 'course of such ceremonies,' अनुष्ठानं; 'water used at them,' शान्त्युदं -दकं.

ROPITIOUS, *a.* (Favorable) प्रसन्नः -न्ना -न्नं, सुप्रसन्नः &c., अनुकूलः -ला -लं, सुमनस्कः -स्का -स्कं, अनुग्राही -हिणी -हि (न्), आनुग्राहकः -की -कं, हितकामः -मा -मं, हितबुद्धिः -द्धिः -द्धि, सुहितः -ता -तं, उपकारशीलः -ला -लं, अभिमुखः -खा -खं.—(As a god granting boons) वरदः -दा -दं, वरप्रदः -दा -दं.—(Auspicious) शुभः -भा -भं, कल्याणः -णी -णं, शुभङ्करः -रा -रं, शुभदः -दा -दं, माङ्गलिकः -की -कं, मङ्गल्यः -ल्या -ल्यं, मङ्गलकरः &c., क्षेमकरः &c., क्षेमङ्करः &c., भद्रङ्करः &c., धृतिङ्करः &c., क्षेमकारः -री -रं, शर्म्मदः -दा -दं, शङ्करः &c., शर्म्मवान् -वती -वत् (त्), इष्टः -ष्टा -ष्टं, अभीष्टः &c.

ROPITIOUSLY, *adv.* प्रसन्नं, प्रसादेन, सप्रसादं, अनुकूलं, सानुकूल्यं, सानुग्रहं, कल्याणं, समाङ्गल्यं, क्षेमेण. *See* AUSPICIOUSLY.

ROPITIOUSNESS, *s.* प्रसन्नता, प्रसादः, अनुकूलता, आनुकूल्यं, सुप्रसन्नता, अभिमुखता, आभिमुख्यं, माङ्गल्यं, मङ्गलता, कल्याणं -णता, शुभता.

ROPONENT, *s.* पूर्व्ववादी *m.* (न्), अग्रवादी *m.*, पूर्व्वपक्षी *m.*, प्रतिज्ञावादी *m.*

ROPORTION, *s.* (Comparative relation or adaptation of one thing to another) प्रमाणं, परिमाणं, सम्मितिः *f.*, प्रमितिः *f.*, परस्परप्रमाणं, परस्परानुगुण्यं, अनुगुणता, आनुगुण्यं, परस्परानुरूप्यं, परस्परानुरूपता, परस्परसादृश्यं, अन्योन्यसादृश्यं, अन्योन्यसमता, परस्परानुषङ्गः, मिथःसादृश्यं, परस्परसम्बन्धः, अन्योन्यसम्बन्धः, मिथःसम्बन्धः, परस्परान्वयः, व्यतिषङ्गः. *See* PROPORTIONATENESS; 'in proportion to,' अनुगुणः -णा -णं, अनुरूपः -पा -पं, अनुसारी -रिणी &c., सदृशः -शी -शं, समः -मा -मं, सादृश्येन, यथाप्रमाणं, प्रमाणतस्, अनुरूपेण, अनुसारेण, सदृशं, or expressed by अनु or यथा prefixed or तस् affixed; as, 'in proportion to one's strength,' यथाशक्ति, शक्तितस्, आत्मशक्तिसादृश्येन, स्वशक्तितस्, आत्मशक्तिसमं.—(Relation in general) अन्वयः, समन्वयः, अनुषङ्गः, सम्बन्धः, सम्पर्कः.—(In arithmetic) अनुपातः; 'the four numbers are in proportion,' चतस्रः संख्या अनुपातस्थाः सन्ति; 'dependence of larger numbers on smaller in a progressive series,' तारतम्यं.—(Symmetry, adaptation) सम्मितिः *f.*, सम्मितता, सम्थानं, अनुसन्धानं, संयोगः, अन्वयः; 'of parts or form,' अङ्गसंयोगः, अङ्गसन्धानं, अवयवसंयोगः, आकारशुद्धता, आकारशुद्धिः *f.*; 'of just proportions,' आकारशुद्धः -द्धा -द्धं.—(Just share) अंशः, भागः, विभागः, उद्धारः.

To PROPORTION, PROPORTIONATE, *v. a.* परस्परं or अन्योन्यं सदृशीकृ or अनुरूपीकृ or अनुगुणीकृ or समीकृ, परस्परानुगुण्यं कृ, परस्परानुरूप्यं कृ, परस्परसादृश्यं कृ, मिथःसादृश्यं कृ, सम्मितं -तां कृ, प्रमाणं कृ, समप्रमाणीकृ. *See To* ADJUST.

PROPORTIONATE, PROPORTIONABLE, PROPORTIONAL, *a.* समप्रमाणः -णा -णं, समपरिमाणः -णा -णं, समप्रमाणकः -का -कं, सम्मितः -ता -तं, प्रमितः -ता -तं, परिमितः -ता -तं, अनुगुणः -णा -णं, सदृशः -शी -शं, समः -मा -मं, तुल्यः -ल्या -ल्यं, अनुरूपः -पा -पं, अनुसारी &c., आनुपङ्गिकः -की -कं, अनुपङ्गिकः &c., अनुपङ्गी &c., परस्परानुगुणः &c., परस्परानुरूपः -पा -पं, परस्परसदृशः &c., परस्परानुषङ्गिकः -की -कं, समतोलः -ला -लं; 'proportionate to one's strength,' आत्मशक्तिसदृशः &c., आत्मशक्तिसमः &c.

PROPORTIONATENESS, PROPORTIONABLENESS, *s.* प्रमाणसमता, परिमाणसमता, समप्रमाणकता, सम्मितिः *f.*, अनुगुणता, आनुगुण्यं, सदृशता, सादृश्यं, समता, तुल्यता, अनुरूपता, आनुरूप्यं, परस्परानुगुण्यं. *See* PROPORTION.

PROPORTIONABLY, *adv.* अनुरूपतस्, अनुरूपं, अनुसारेण -रतस्, सादृश्येन, सदृशं, प्रमाणतस्, यथाप्रमाणं, यथापरिमाणं, प्रमाणानुसारात् -रेण, यथांशतस्, विभागशस्; 'to one's strength,' *see* under PROPORTION.

PROPORTIONED, *p. p.* यथाप्रमाणं परिकल्पितः -ता -तं, प्रमाणानुसारात् कल्पितः &c. or विहितः &c. *See* PROPORTIONATE.

PROPOSAL, *s.* उपन्यासः, कर्त्तव्योपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, कर्त्तव्यसूचना -नं, कर्त्तव्यप्रतिज्ञा, कर्त्तव्यनिर्देशः, अभिधानं, अभिहितं, उक्तं, वाक्यं.—(Of marriage), *see* the next.

To PROPOSE, *v. a.* उपन्यस् (c. 4. -अस्यति -असितुं), उपन्यासं कृ, उपन्यासीकृ, कर्त्तव्योपन्यासं कृ, कर्त्तव्यसूचनं कृ, प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), प्रतिज्ञां कृ, कर्त्तव्यप्रतिज्ञां कृ, निविद् (c. 10. -वेदयति -यितुं), निवेदनं कृ, अभिधा (c. 3. -दधाति -धातुं), कर्त्तव्यं or यथाकर्त्तव्यं निर्दिश् (c. 6. -दिशति -देष्टुं) or सूच् (c. 10. सूचयति -यितुं), कर्त्तव्यनिर्देशं कृ.—(Intend), *see* the word.—(Make an offer of marriage) विवाहप्रतिज्ञां कृ, प्रेमनिवेदनं कृ.

PROPOSED, *p. p.* उपन्यस्तः -स्ता -स्तं, उपन्यासीकृतः -ता -तं, प्रतिज्ञातः &c., निवेदितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, अभिहितः &c.

PROPOSITION, *s.* उपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, वाक्यं, उक्तं, वचनं.—(In logic, geometry, &c.) प्रतिज्ञा, प्रतिज्ञेयं, फक्किका, प्रमेयं, पूर्व्वपक्षः, प्रतिज्ञातार्थः; 'abandonment of the original proposition,' प्रतिज्ञासन्न्यासः, प्रतिज्ञाहानिः *f.*; 'denial of a proposition,' प्रतिज्ञाविरोधः; 'completing it,' आकांक्षापूरणं; 'subsequent proposition,' प्रतिज्ञान्तरं.

To PROPOUND, *v. a.* (Propose) उपन्यस्, प्रतिज्ञा, निर्दिश्, अभिधा, सूच् (c. 10. सूचयति -यितुं), निविद्, प्रतिपद् (c. 10. -पादयति -यितुं).

PROPOUNDED, *p.p.* उपन्यस्तः -स्ता -स्तं, प्रतिज्ञातः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

PROPRIETARY, *a.* स्वामिसम्बन्धी -न्धिनी -न्धि (न्), स्वाम्यधीनः -ना -नं; 'proprietary right,' स्वत्वं, अधिकारः -रिता, स्वामित्वं, स्वाम्यं, प्रभुत्वं -ता.

PROPRIETOR, *s.* स्वामी *m.* (न्), अधिकारी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, स्वत्ववान् *m.* (त्), अधिकारवान् *m.*, स्वत्वाधिकारी *m.*; 'without title,' अनपसरः.

PROPRIETORSHIP, *s.* स्वामित्वं, स्वाम्यं, स्वत्वं, अधिकारिता -त्वं, प्रभुत्वं.

PROPRIETRESS, *s.* स्वामिनी *f.*, अधिकारिणी *f.*, स्वत्वाधिकारिणी *f.*

PROPRIETY, *s.* यथायोग्यता, युक्तता, योग्यता, यथायुक्तता, युक्तिः *f.*, उपयुक्तता, उपयोगिता -त्वं, उचितत्वं, औचित्यं, यथोचितत्वं, उपपत्तिः *f.*, सामञ्जस्यं, समञ्जसं, सम्भावना, न्यायः -यता, सङ्गतत्वं, साङ्गत्यं, याथार्थ्यं, यथार्हता, याथातथ्यं, अभेदः, पर्य्याप्तिः, पात्रं -त्रता; 'of conduct,' मर्य्यादा, मर्य्यादानतिक्रमः, विनयः, विनीतता, सुचर्य्या, सुचरितं, स्थितिः *f.*, संस्था, अनतिक्रमः, सव्यभिचारः, कर्त्तव्यता, इतिकर्त्तव्यता; 'pattern of propriety,' न्यायाधारः.

PROROGATION, *s.* चिरकालपर्य्यन्तं महासभाविसर्जनं or कार्य्यनिवृत्तिः *f.* or कार्य्यत्यागः.—(Prolongation) दीर्घीकरणं.

To PROROGUE, *v. a.* (Adjourn to a distant period) चिरकालपर्य्यन्तं महासभां विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं) or कार्य्यनिवृत्तिं कृ or कार्य्यत्यागं कृ.—(Prolong) द्राघ (nom. द्राघयति -यितुं), दीर्घीकृ, दीर्घकालस्थं -स्थां कृ, चिरकालस्थं -स्थां कृ.

PROROGUED, *p. p.* चिरकालपर्य्यन्तं विसर्जितः -ता -तं or विसृष्टः -ष्टा -ष्टं.

PROSAIC, *a.* गद्यरूपः -पा -पं, गद्यमयः -यी -यं, गद्यात्मकः -का -कं, छन्दोहीनः -ना -नं, छन्दोरहितः -ता -तं.—(Dull) विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु, रसहीनः -ना -नं, तेजोहीनः &c., लवणहीनः &c.

To PROSCRIBE, *v. a.* (Doom to destruction) घोषणापूर्व्वं वधदण्डार्हं ख्या in caus. (ख्यापयति -यितुं), प्रकाशलेखेन वधार्हं ज्ञा in caus., or वधदण्डार्हं निर्दिश् or वध्यं निर्दिश् or घातव्यं निर्दिश्, अमुकजनो वध्यो ऽस्ति इति सूचनार्थं प्रकटनपत्रे नाम लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्, मृत्युपात्रं निर्दिश्.—(Denounce and expel) प्रकटनपत्रेण बहिष्कृ or निरस् or प्रत्यादिश्.—(Interdict) प्रकाशनपत्रेण निषिध् or प्रतिषिध्, प्रकटनलेखेन निवृ or बाध्.

PROSCRIBED, *p. p.* वध्यनामावलिपत्राभिलिखितः -ता -तं, वधदण्डार्हः -र्हा -र्हं, प्रकाशपत्रेण निषिद्धः -द्धा -द्धं or प्रतिषिद्धः &c. or निवारितः -ता -तं.

PROSCRIPTION, *s.* प्रकाशनपत्रेण वध्यजननिर्देशः or वध्यनामावलिनिर्देशः, घोषणापूर्व्वं वधदण्डार्हख्यापनं, प्रकटनपत्रेण वधार्हज्ञापनं.

PROSE, *s.* गद्यं, हारकः, छन्दोरहितवाक्यं; 'prose and verse,' गद्यपद्यं; 'alternate prose and verse,' चम्पूः *m.*

To PROSE, *v. n.* दीर्घोच्चारणेन विरसवाक्यानि or विरसकथाः वद् (c. 1. वदति -दितुं), दीर्घसूत्रतया or दीर्घसूत्रवद् विरसकथोपाख्यानं कृ.

To PROSECUTE, *v. a.* (Pursue, follow up, carry on continuously) अनवरतम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अविरतम् अनुसेव् (c. 1. -सेवते -वितुं) or उपसेव् or सेव्, नित्यं प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), अविरतप्रवृत्तिं कृ, निर्वह् (c. 10. -वाहयति -यितुं); 'to prosecute one's efforts,' अविरतयत्नं कृ, अनवरतप्रयत्नं कृ, नित्योत्साहं कृ; 'one's undertakings,' प्रारब्धानि सम्पद् (c. 10. -पादयति -यितुं); 'one's studies,' नित्याध्ययनं कृ, अविरताध्ययनं कृ, विद्यानुसेवनं कृ.—(In law) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभियोगं कृ, अभिशंस् (c. 1. -शंसति -सितुं), अभिशंसनं कृ, व्यवहाराभियोगं कृ, व्यवहाराभिशंसनं कृ.

PROSECUTED, *p. p.* (Carried on continuously) अविरतम् अनुष्ठितः -ता -तं or अनुसेवितः &c. or सेवितः &c., निर्वाहितः &c.—(In law) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं, व्यवहाराभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं.

PROSECUTION, *s.* (Carrying on continuously) अविरतानुष्ठानं, नित्यानुष्ठानं, नित्यानुसेवनं, नित्यसेवनं, नित्यप्रवृत्तिः *f.*, अविरतप्रवृत्तिः *f.*, नित्यप्रवर्त्तनं, निर्वाहनं; 'of efforts,' अविरतयत्नकरणं, नित्योद्योगः; 'of study,' नित्याध्ययनं, अविरताध्ययनं, विद्यानुसेवनं, विद्यानुपालनं, प्रवृत्तिः *f.*—(In law) अभियोगः, अभिशंसनं, व्यवहाराभियोगः, व्यवहाराभिशंसनं, अभियुक्तता.

PROSECUTOR, *s.* (One who carries on continuously) अविरतानुष्ठायी *m.* (न्), अविरतानुसेवी *m.*, निर्वाहकः.—(In law) अभियोगी *m.* (न्), अभियोक्ता *m.* (तृ), अभिशंसकः, व्यवहाराभियोगकृत्, व्यवहाराभिशंसनकृत् *m.*, अभियोगकारी *m.* (न्), विवादार्थी *m.*, अर्थी *m.*

PROSELYTE, *s.* धर्म्मपरिवर्त्तकः, धर्म्मान्तरग्राही *m.* (न्), मतान्तरग्राही *m.*, धर्म्मान्तरावलम्बी *m.*, स्वधर्म्मग्राही *m.*, स्वधर्म्मावलम्बी *m.*, अन्यधर्म्मग्राही *m.*, अन्यधर्म्मावलम्बी *m.*, स्वधर्म्मी *m.*, धर्म्मान्तरप्राप्तः, परधर्म्माश्रितः, स्वधर्म्मत्यागी *m.*, स्वधर्म्मत्यागपूर्व्वं धर्म्मान्तरग्राही *m.*; 'to Judaism,' यिहुदीयधर्म्मग्राही *m.*; 'to Christianity,' ख्रीष्टीयधर्म्मग्राही *m.*, ख्रीष्टीयमतग्राही *m.*

To PROSELYTE, PROSELYTIZE, *v. a.* धर्म्मान्तरं or स्वधर्म्मं ग्रह् in caus., मतान्तरं or स्वमतं ग्रह्, धर्म्मपरिवर्त्तकं कृ; 'to Judaism,' यिहुदीयमतं ग्रह् in caus.

PROSELYTISM, *s.* धर्म्मपरिवर्त्तनं, धर्म्मान्तरग्रहणं, धर्म्मान्तरप्रापणं.

PROSER, *s.* दीर्घोच्चारणेन विरसकथाख्यायकः, दीर्घसूत्री *m.* (न्).

PROSING, *s.* दीर्घोच्चारणेन विरसकथोपाख्यानं, दीर्घसूत्रता -त्वं.

PROSODIAL, PROSODICAL, *a.* छान्दसः -सी -सं, छन्दःशास्त्रसम्बन्धी &c., छन्दःशास्त्रविषयकः -का -कं, छन्दोविषयकः &c., छन्दःसम्बन्धी &c.

PROSODIAN, *s.* छन्दःशास्त्रज्ञः, छन्दःशास्त्रविद् *m.*, छन्दःशास्त्रव्युत्पन्नः.

PROSODY, *s.* छन्दस् *n.*, छन्दःशास्त्रं, छन्दोविद्या, छन्दोज्ञानं.

PROSOPOPŒIA, *s.* *See* PERSONIFICATION.

PROSPECT, *s.* (View) दृष्टिः *f.*, दर्शनं, दृष्टिपातः, दृक्पातः.—(View of future events, expectation) भाविदर्शनं, भविष्यद्दर्शनं, भाविघटनादर्शनं, अनागतदर्शनं, मानसिकदृष्टिः *f.*, अपेक्षा, उदीक्षणं, आशा, प्रत्याशा.—(That which is presented to the view) दृक्पातविषयः, दृष्टिपातविषयः, दृष्टिगतदेशः, दृक्पातान्तर्गतदेशः, दृष्टिपातगतप्रदेशः, दृष्टिगोचरदेशः, दृग्गोचरप्रदेशः.

PROSPECTIVE, *a.* भाविकालापेक्षकः -का -कं, उत्तरकालापेक्षकः &c., भाविकालसापेक्षः -क्षा -क्षं, भविष्यदपेक्षकः &c., आगामिकालसापेक्षः &c., भाविस्पृक् *m.f.n.* (श्).

PROSPECTIVELY, *adv.* भाविकालापेक्षया, उत्तरकालापेक्षया, भविष्यदपेक्षया, भाविकालसापेक्षं, आगामिकालसापेक्षं, भाविकालमपेक्ष्य, उत्तरकालमपेक्ष्य.

PROSPECTIVENESS, *s.* भाविकालापेक्षा, उत्तरकालापेक्षा -क्षकता -त्वं.

PROSPECTUS, *s.* कर्त्तव्यसूचनपत्रं, कर्त्तव्यार्थसूचनपत्रं, कर्त्तव्यार्थबोधनपत्रं.

To PROSPER, *v. a.* (Render successful, favor) सफलीकृ, सिद्धिं or सिद्धतां कृ or नी (c. 1. नयति, नेतुं) or साध् (c. 10. साधयति -यितुं), सिद्धीकृ, सिद्धिमन्तं -मतीं -मत् कृ, वृध् (c. 10. वर्धयति -यितुं), संवृध्, ऋध् (c. 10. ऋधयति -यितुं), समृद्धीकृ, उपकृ, अनुग्रह्, उपग्रह्, प्रतिपाल्, अनुपाल्.

To PROSPER, *v. n.* (Thrive) ऋध् (c. 4. ऋध्यति, c. 5. ऋध्नोति, अर्धितुं), समृध्, समृद्धीभू, समृद्धः -द्धा -द्धं भू, वृध् (c. 1. वर्धते -र्धितुं), संवृध्, विवृध्, स्फ्ध् (c. 1. स्फ्धते -धितुं), समेध्, सम्पत्तिं गम्, समृद्धिम् इ or गम्, सश्रीकः -का -कं भू, श्रीमान् -मती &c. भू or अस्.—(Be successful) सिध् (c. 4. सिध्यति, सेद्धुं), सिद्धिं गम् or इ, कृतार्थीभू, प्राप्तार्थीभू, सिद्धार्थीभू, सम्पद् (c. 4. -पद्यते -पत्तुं), सम्पदं or सम्पत्तिं गम्, सफलीभू, सफलः -ला -लं भू.

PROSPERITY, *s.* समृद्धिः *f.*, सामृद्ध्यं, ऋद्धिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, सुसम्पद् *f.*, वृद्धिः *f.*, संवृद्धिः *f.*, उदयः, पुण्योदयः, अभ्युदयः, श्रीः *f.*, लक्ष्मीः *f.*, सौभाग्यं, भाग्यं, भूतिः *f.*, क्षेमः -मं, स्वस्ति, कुशलं -लता, कौशल्यं, शर्म्म *n.*

(त्), कल्याणं, मङ्गलं, माङ्गल्यं, भद्रं, शुभं, शिवं, भूतिः *f.*, रिष्टं, उपचयः; 'season of prosperity,' समृद्धिसमयः, समृद्धिकालः, उदयकालः.—(Success) सिद्धिः *f.*, साध्यसिद्धिः *f.*, अर्थसिद्धिः *f.*, कृतार्थता, सफलता, साफल्यं; 'national,' योगक्षेमः.

PROSPEROUS, *a.* (Thriving) समृद्धः -द्धा -द्धं, वर्धमानः -ना -नं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती -मत् (त्), लक्ष्मीवान् &c., क्षेमवान् &c., वृद्धिमान् &c., समृद्धिमान् &c., उदयी -यिनी -यि (न्), शर्म्मवान् &c., विपद्रहितः -ता -तं, निरापद् *m. f. n.*, सुस्थः -स्था -स्थं, एधमानः -ना -नं, समेधमानः &c., श्रीलः -ला -लं, सश्रीकः -का -कं, लक्षण्यः -ण्या -ण्यं, श्रीयुक्तः -क्ता -क्तं, अधिकर्द्धिः -र्द्धिः -र्द्धि.—(Successful) सफलः -ला -लं, सिद्धिमान् &c., सिद्धः -द्धा -द्धं, सिद्धार्थः -र्था -र्थं, कृतार्थः &c.—(Fortunate, favorable, auspicious) कल्याणः -णा -णं, कल्याणी &c., मङ्गलः -ला -लं, माङ्गलिकः -की -कं, शुभः -भा -भं, शिवः -वा -वं, शुभान्वितः -ता -तं, सौभाग्यवान् &c., भाग्यवान् &c., धन्यः -न्या -न्यं, कुशलः -ला -लं, क्षेमः -मा -मं, क्षेम्यः -म्या -म्यं, भद्रः -द्रा -द्रं, प्रसन्नः -न्ना -न्नं, शङ्करः -रा -रं, शिवङ्करः &c., श्रीकरः &c.

PROSPEROUSLY, *adv.* समृद्ध्या, सम्पदा, सुसम्पदा, श्रिया, सक्षेमं, सौभाग्येन, कौशल्येन, सकल्याणं, कल्याणं, कुशलं, शुभं, अभ्युदयेन, सफलं, अवृथा.

PROSPICIENCE, *s.* प्रदर्शनं. *See* FORESIGHT.

PROSTITUTE, *s.* वेश्या, गणिका, पण्यस्त्री, वारस्त्री, साधारणस्त्री, वाराङ्गना, भोग्या, पण्याङ्गना, सामान्या स्त्री, बन्धुरा. *See* HARLOT.

To PROSTITUTE, *v. a.* गर्ह्यकर्म्मार्थं or कुत्सितकर्म्मार्थं प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or उपयुज् or विनियुज्, गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि नियुज्, पण्यं -ण्यां कृ, साधारणीकृ, सर्व्वोपभोग्यं -ग्यां कृ.

PROSTITUTION, *s.* वेश्यात्वं, वेश्यावृत्तिः *f.*, पौंश्चल्यं, वारसेवा, भगवृत्तिः *f.*, भगव्यापारः, भगजीविका, वेश्याजीविका. *See* HARLOTRY.—(Devoting to infamous purposes) गर्ह्यकर्म्मार्थं प्रयोगः, कुत्सितकर्म्मार्थं विनियोगः, गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि नियोजनं, पण्यकरणं, सर्व्वोपभोग्यकरणं; 'wages of prostitution,' पण्यस्त्रिया भृतिः *f.* or भाटकं, वेशः.

PROSTRATE, *a.* (Lying at length) अवमूर्द्धशयः -या -यं, क्षिप्तदेहः -हा -हं, भूमिशायी -यिनी -यि (न्), भूमिङ्गतः -ता -तं, अवनिङ्गतः &c.—(In supplication, adoration, &c.) साष्टाङ्गपतितः -ता -तं, साष्टाङ्गप्रणतः &c., साष्टाङ्गनमस्कारं प्रणिपतितः &c., चरणागतः -ता -तं, चरणपतितः -ता -तं, पादपतितः &c., दण्डवत् पतितः &c., पादप्रणतः &c., प्रणिपतितः &c., प्रपतितः &c., उपनतः &c., प्रणतः &c., नतः &c.

To PROSTRATE, *v. a.* (Throw down) पत् (c. 10. पातयति -यितुं), निपत्, अधःपत्, ध्वंस् (c. 10. ध्वंसयति -यितुं), प्रध्वंस्, नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, अधरोत्तरीकृ, भूमिं गम् in caus.—(One's self in reverence, &c.) प्रणिपत् (c. 1. -पतति -तितुं), साष्टाङ्गं or साष्टाङ्गपातं प्रणिपत् or पत्, प्रणिपतनं कृ, प्रणम् (c. 1. -णमति -णन्तुं), कार्यं प्रणम्, साष्टाङ्गप्रणामं कृ, साष्टाङ्गनमस्कारं कृ, अष्टाङ्गपातं कृ, अष्टाङ्गप्रणामं कृ, प्रणिपातं कृ, पादप्रणामं कृ, चरणप्रणामं कृ, दण्डवत् पत् or भू or पतनं कृ, चरणपतनं कृ, पादपतनं कृ, दण्डवत् प्रणामं कृ.—(The strength) सर्व्वशक्तिं हृ (c. 1. हरति, हर्त्तुं), शक्तिपातं कृ, शक्तिनाशं कृ, क्षीणशक्तिं कृ.

PROSTRATED, *p. p.* पातितः -ता -तं, निपातितः &c., अधःपातितः &c., दण्डवत् पातितः &c., प्रणिपातितः &c., प्रणिपतितः &c., भूमिं गमितः &c.—(As strength) हृतशक्तिः -क्तिः -क्ति, नष्टशक्तिः &c., क्षीणशक्तिः &c., गतशक्तिः &c., हृतौजाः -जाः -जः (स्), गतौजाः &c., नष्टौजाः &c.

PROSTRATION, *s.* (Of the body in reverence, &c.) प्रणिपातः, प्रणिपतनं, अष्टाङ्गपातः, अष्टाङ्गप्रणिपातः, साष्टाङ्गप्रणामः, साष्टाङ्गपातः, साष्टाङ्गनमस्कारः, दण्डवत् पतनं or पातः, दण्डवत् प्रणामः, चरणपतनं, पादपतनं, पादप्रणामः, देहपातनं, शरीरपातनं, प्रपतनं.—(Of strength) शक्तिपातः, शक्तिहानिः *f.*, सत्त्वहानिः *f.*, शक्तिक्षयः, विस्रंसः -सा, ग्लानिः *f.*—(Of spirits) अवसादः, अवसन्नता, विषादः, विषण्णता, ग्लानिः *f.*

PROSY, *s.* विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु. *See* PROSER.

To PROTECT, *v. a.* (Guard) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, गुप् (c. 1. गोपायति, c. 10. गोपयति -यितुं), अनुगुप्, निर्गुप्, अभिगुप्, प्रगुप्, संगुप्, अभिसंगुप्, पाल्, परिपाल्, अनुपाल्, प्रतिपाल्, अभिपाल्, सम्पाल्, उपपाल्, पा, परिपा, त्रै, परित्रै, संत्रै, तॄ in caus., अव्, पुष्, गुप्तिं कृ, गोपनं कृ, संगोपनं कृ, रक्षणं कृ, संरक्षणं कृ, पालनं कृ, परिपालनं कृ, पोषणं कृ.

PROTECTED, *p.p.* रक्षितः -ता -तं, संरक्षितः &c., अभिरक्षितः &c., परिरक्षितः &c., सुरक्षितः &c., गुप्तः -प्ता -प्तं, गोपितः -ता -तं, गोपायितः &c., सङ्गोपितः &c., पालितः &c., उपपालितः &c., अनुपालितः &c., प्रतिपालितः &c., त्रातः &c., त्राणः -णा -णं, अवितः -ता -तं, तारितः &c., अभ्युपपन्नः -न्ना -न्नं, आश्रितः &c., समाश्रितः &c.

PROTECTION, *s.* (The act) रक्षा, रक्षणं, संरक्षणं, अभिरक्षा -क्षणं, परिरक्षणं, प्रतिरक्षणं, गुप्तिः *f.*, गोपनं, सङ्गोपनं, पालनं, परिपालनं, प्रतिपालनं, अनुपालनं, अभिपालनं, त्राणं, परित्राणं, अवनं, क्षेमकरणं, क्षेमः, अभ्युपपत्तिः *f.*—(That which protects or shelters) आश्रयः, संश्रयः, समाश्रयः, अयनं, आश्रयणं, शरणं, शरण्यता, शरण्यं; 'to seek the protection of, go for protection,' आश्रि (c. 1. -श्रयति -यितुं), संश्रि, समाश्रि, शरणार्थं गम्.—(Favor, countenance) प्रसादः, अनुग्रहः, सङ्ग्रहः, अनुपालनं, आश्रयः.—(Writing that protects) अभयपत्रं.

PROTECTIVE, *a.* रक्षकः -का -कं, संरक्षकः &c., पालकः -का -कं, प्रतिपालकः &c., गोपकः &c., रक्षाकारी -रिणी -रि (न्), पोषकः -की -कं.

PROTECTOR, *s.* रक्षकः, रक्षी *m.* (न्), रक्षिता *m.* (तृ), गोप्ता *m.* (प्तृ), गोपकः, गोपायकः, गोपी *m.* (न्), गोपः, संरक्षकः, पालकः, प्रतिपालकः, पालयिता *m.* (तृ), पालः, पः in comp., त्राता *m.* (तृ), भयत्राता *m.*, शरणं, शरण्यं, आश्रयः, आश्रयभूतः, शरणभूतः, आश्रयदाता *m.* (तृ).

PROTECTRESS, *s.* रक्षिका, रक्षिणी, रक्षित्री, पालिका, पालयित्री, रक्षाकारिणी, गोपिनी, गोपिका, गोपी, त्रायन्ती, आश्रयदात्री.

PROTEGÉ, *s.* आश्रितः, संश्रितः, रक्षणीयः, पालनीयः, पोष्यः, शरणागतः.

To PROTEND, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ. *See To* EXTEND.

To PROTEST, *v. n.* (Declare solemnly) दृढनिश्चयपूर्व्वं or दृढप्रतिज्ञापूर्व्वं वद्, दृढोक्त्या वद्, दार्ढ्येन वद्, दृढं वद्, दृढोक्तिपूर्व्वं ख्या or आख्या or प्रख्या, दृढोक्तिं कृ.—(Make a solemn declaration expressive of dissent or opposition) अस्वीकारसूचकं दृढवाक्यं वद् or दृढवादं कृ or दृढनिषेधं कृ, असम्मतिसूचकां दृढोक्तिं कृ, विरोधसूचकां दृढप्रतिज्ञां कृ, दृढोक्तिपूर्व्वम् अस्वीकारं ख्या in caus. or ज्ञा in caus., दृढनिश्चयपूर्व्वं or दृढप्रतिज्ञापूर्व्वम् असम्मतिं ज्ञा in caus. or प्रकाश् (c. 10. -काशयति -यितुं), दृढोक्तिपूर्व्वं निषेधं कृ, दृढवाक्यपूर्व्वं न सम्मन्ये or न स्वीकरोमि इति वद्, दृढोक्तिपूर्व्वं मतान्तरं ख्या or प्रकाश्, दृढप्रतिज्ञापूर्व्वं न सम्मन् or विपरीतं मन् or अन्यथा मन्.—(In writing) असम्मतिलेखं प्रकाश्, अस्वीकारपत्रं प्रकाश्.

PROTEST, *s.* अस्वीकारसूचकं दृढनिषेधवाक्यं, असम्मतिसूचकं दृढविरोधवाक्यं, अस्वीकारवादः, दृढोक्तिपूर्व्वो निषेधः, दृढप्रतिज्ञापूर्व्वो निषेधः, दृढनि-

निश्चयपूर्व्वम् अस्वीकारप्रकाशनं, दृढप्रतिज्ञापूर्व्वम् असम्मतिप्रकाशनं, दृढोक्तिपूर्व्वं मतामतख्यापनं or असम्मतिख्यापनं or विपरीतमतख्यापनं, दृढनिश्चयपूर्व्वम् अस्वीकारवाक्यं or असम्मतिवाक्यं or अनङ्गीकारवाक्यं.—(In writing) दृढनिषेधसूचकं or दृढविरोधार्थकम्, अस्वीकारपत्रं or असम्मतिपत्रं or अनङ्गीकारपत्रं.

PROTESTANT, *s.* असम्मतः, अस्वीकारवादी *m.* (न्), अस्वीकर्त्ता *m.* (र्त्तृ), रोमीयमतविरोधी *m.* (न्), रोमीयमतविरुद्धः, रोमीयधर्म्मासम्मतः.

PROTESTATION, *s.* (Solemn declaration) दृढोक्तिः *f.*, दृढवाक्यं, दृढवादः, दृढप्रतिज्ञापूर्व्वो वादः, दृढभाषणं, दृढप्रतिज्ञापूर्व्वं भाषणं. *See* PROTEST.

PROTEUS, *s.* (Taking any shape at will) कामरूपी *m.* (न्), कामरूपः, बहुरूपी *m.*, बहुरूपः, द्रुः *m.*

PROTOTYPE, *s.* मूलरूपं, मूलप्रतिमा, मूलमूर्त्तिः *f.*, आदर्शः, मूलादर्शः, मूलं, प्रतिरूपं, प्रतिकृतिः *f.*, प्रत्युपमा -मानं, प्रतिमूर्त्तिः *f.*

To PROTRACT, *v. a.* (Lengthen) दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं). *See To* PROLONG, LENGTHEN.—(Delay) विलम्ब्. *See* the word.

PROTRACTED, *p. p.* दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), विलम्बितः -ता -तं, चिरायितः &c., चिरस्थः -स्था -स्थं, चिरस्थितः -ता -तं; 'sound,' प्लुतः -तं.

PROTRACTION, *s.* दीर्घीकरणं, द्राघिमा *m.* (न्), दीर्घता, विलम्बः -म्बनं.

To PROTRUDE, *v. a.* (Thrust forward) प्रसृ (c. 10. -सारयति -यितुं), बहिःसृ, बहिर् निःसृ, बहिर् गम् (c. 10. गमयति -यितुं), प्रसारणं कृ.

To PROTRUDE, *v. n.* बहिः सृ (c. 1. सरति, सर्त्तुं), प्रसृ, बहिर् निःसृ, बहिर् गम् (c. 1. गच्छति, गन्तुं), बहिर् भू, बहिःस्था, बहिर् वृत्, अतिवृत्, अतिक्रम्, उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, उद्भेदं कृ, प्रलम्ब्, बहिर् लम्ब्. *See To* PROJECT, *v. n.*

PROTRUDED, *p. p.* बहिर्गतः -ता -तं बहिःसृतः &c., बहिर्भूतः -ता -तं, बहिःस्थितः &c., बहिर्वर्त्तितः &c., निःसारितः &c., बहिःसारितः &c., बहिर् निःसारितः &c., प्रसृतः &c., प्रसारितः &c., उद्भिन्नः -न्ना -न्नं, प्रोद्भिन्नः &c.

PROTRUDING, *part.* बहिःस्थः -स्था -स्थं, बहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), बहिर्गतः -ता -तं, बहिर्लम्बः &c. *See* PROJECTING.

PROTRUSION, *s.* बहिर्वर्त्तनं, बहिःसरणं, उद्भेदः, प्रोद्भेदः. *See* PROJECTION.

PROTUBERANCE, *s.* (Tumour, prominence) स्फोटः, विस्फोटः, गुल्मः, गण्डः -ण्डका, शोथः, आभोगः, उन्नतिः *f.*, प्रलम्बता. *See* PROJECTION.

PROTUBERANT, *a.* उन्नतः -ता -तं, प्रलम्बः -म्बा -म्बं, बहिर्लम्बः &c., गुल्मी -ल्मिनी -ल्मि (न्), आभोगी &c., बृहन्निवेशः -शा -शं. *See* PROJECTING.

To PROTUBERATE, *v. n.* उन्नतः -ता -तं भू, प्रलम्ब्, बहिर्लम्ब्. *See To* PROJECT, *v. n.*

PROUD, *a.* गर्व्वितः -ता -तं, गर्व्वी -र्व्विणी -र्व्वि (न्), सगर्व्वः -र्व्वा -र्व्वं, गर्व्वरः -रा -रं, गर्व्ववान् -वती -वत् (त्), गर्व्वितचित्तः -त्ता -त्तं, दृप्तः -प्ता -प्तं, सदर्पः -र्पा -र्पं, दर्पवान् &c., दृप्तः -प्ता -प्तं, दर्पी &c., मानी &c., मानवान् &c., अभिमानी &c., अभिमानवान् &c., साभिमानः -ना -नं, अहङ्कारी &c., अहङ्कारवान् &c., अहंयुः -युः -यु, साहङ्कारः -रा -रं, अहम्मानी &c., प्रगल्भः -ल्भा -ल्भं, उद्धतः -ता -तं, उद्धतचित्तः -त्ता -त्तं, उद्धतमनाः -नाः -नः (स्), समुद्धतः &c., प्रौढः -ढा -ढं, उन्नद्धः -द्धा -द्धं, उन्नद्धचेताः &c., समुन्नद्धः &c., साटोपः -पा -पं, आटोपी &c., उत्सिक्तः -क्ता -क्तं, उन्नतशिरस्कः -स्का -स्कं, उन्नतमनस्कः &c., समुन्नतचित्तः &c., ऊर्द्ध्वदृष्टिः -ष्टिः -ष्टि, अवलिप्तः -प्ता -प्तं, दर्पाध्मातः &c., सावहेलः -ला -लं, प्रधृष्टः -ष्टा -ष्टं; 'proud of one's beauty,' रूपगर्व्वितः -ता -तं, रूपाभिमानी &c.; 'of one's birth,' कुलाभिमानी &c.; 'of one's learning,' पाण्डित्याभिमानी &c., पण्डितम्मन्यः -न्या -न्यं; 'of th[e] body,' देहमानी &c.; 'to be proud,' गर्व्व् (c. 1. गर्व्वति -र्व्वि[तुं], c. 10. गर्व्वयते -यितुं), गर्व्वितः &c. भू, सगर्व्वीभू, दृप् (c. 4. दृप्यति, दर्प्तुं, द्रप्तुं), मन् (c. 4. मानयते -यितुं), प्रगल्भ् (c. 1. -गल्भते -ल्भितुं), 'to render proud,' दृप् (c. 10. दर्पयति -यितुं), गर्व्वितं -तां कृ.

PROUDLY, *adv.* सगर्व्वं, सदर्पं, समानं, साभिमानं, साहङ्कारं, साटो[पं], सोन्मादं, गर्व्वितं, उन्नतचेतसा, सावहेलं, सावलेपं, गर्व्वितवत्, दृप्तव[त्], प्रगल्भवत्.

PROVABLE, *a.* प्रमेयः -या -यं, साधनीयः &c., साध्यः -ध्या -ध्यं, उपपादनीयः &c., उपपाद्यः -द्या -द्यं, प्रतिपाद्यः &c., प्रतिपादनीयः &c., समर्पणीयः &c., सूच्यः -च्या -च्यं.

To PROVE, *v. a.* (Establish as truth) साध् (c. 10. साधयति -यितुं), सिद्धीकृ, प्रमाण (nom. प्रमाणयति -यितुं), प्रमाणीकृ, सप्रमाणं -णां कृ, उपपद् (c. 10. -पादयति -यितुं), प्रतिपद्, विभू (c. 10. -भावयति -यितुं), भू, निर्णी (c. 1. -णयति -णेतुं), सत्याकृ, सत्यीकृ; 'by testimo[ny] or other evidence,' साक्षिणा or साक्ष्येण or प्रमाणेन साध् or ... or उपपद्.—(Evince, demonstrate) सूच् (c. 10. सूचयति -यितुं), दृश् (c. 10. दर्शयति -यितुं), अभिदृश्, अनुदृश्, निर्दिश् (c. 6. -दिशति -देष्टुं), विनिर्दिश्, प्रदिश्, निर्णी, समर्प् (c. 10. -अर्पयति -यितुं), प्रकाश्.—(Try, ascertain, bring to the test) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ, निरूप्, ज्ञा in des., निर्णी, निश्चि, अनुभू, प्रतीतिं कृ.—(Experience) अनुभू, अनुभवं कृ, अनुभूतिं कृ.

To PROVE, *v. n.* (Be found, turn out) सम्भू (c. 1. -भवति -वि[तुं]), सम्पद् (c. 4. -पद्यते -पत्तुं), उत्पद्, उपपद्, विद् in pass. (विद्यते), सिध् (c. 4. सिध्यति -ते), आपत् (c. 1. -पतति -तितुं), संवृत्, वृत्.—(Be ascertained or shown to be true) निर्णी in pass. (-णीयते), निश्चि in pass. (-चीयते), सूच् in pass. (सूच्यते), अनुभू in pass. (-भूयते), विभू, प्रमाणीभू, प्रती in pass. (-ईयते).

PROVED, *p. p.* (Established as true) सिद्धः -द्धा -द्धं, साधितः -ता -तं, उपपादितः &c., उपपन्नः -न्ना -न्नं, प्रमाणितः -ता -तं, प्रमाणीकृतः &c., भावितः &c., विभावितः &c., प्रतिपादितः &c., प्रमितः -ता -तं.—(Evinced, demonstrated) सूचितः -ता -तं, दर्शितः &c., निर्दिष्टः -ष्टा -ष्टं, निर्णीतः -ता -तं, समर्पितः &c.—(Tested, ascertained) परीक्षितः -ता -तं, निरूपितः -ता -तं, निश्चितः &c., निर्णीतः &c., अनुभूतः &c., प्रतीतः -ता -तं; 'thing to be proved,' साध्यं, प्रमेयं; 'proved by evidence,' साक्षिभावितः &c., साक्ष्यसिद्धः &c.

PROVENDER, *s.* पाथेयं, यात्रिकं, शम्बलं, सम्बलः -लं, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पश्वादिखाद्यद्रव्यं, शुष्कतृणादि *n.*, शुष्कघासादि, माषादि, इत्यादि.

PROVER, *s.* उपपादकः, सिद्धिकर्त्ता *m.* (र्त्तृ), साधकः, प्रमाता *m.* (तृ), प्रतिपादकः, उपपत्तिकारी *m.* (न्), प्रतिपत्तिकारकः, निर्णेता *m.*, विभावकः.

PROVERB, *s.* लोकवाक्यं, लोकोक्तिः *f.*, प्राचीनवाक्यं, पुराणवाक्यं, लो[क...], प्रचलितवाक्यं, वाक्यं, वचनं, वाक् *f.* (च्), सूत्रं, प्राचीनसूत्रं, पुराणसू[त्रं], उपमानं, उपदेशवाक्यं, उपदेशसूत्रं, न्यायः, न्यायवाक्यं.

PROVERBIAL, *a.* (Mentioned in a proverb) प्राचीनसूत्रप्रोक्तः -क्ता -[क्तं], पुराणसूत्रप्रोक्तः &c., लोकप्रोक्तः &c., लोकोक्तः &c.—(Comprised [in] a proverb, current as one) प्राचीनसूत्ररूपः -पा -पं, पुराणसूत्र[रूपः] &c., लोकप्रसिद्धः -द्धा -द्धं, लोकप्रचलितः -ता -तं, लोकप्रचलः -ला -[लं], न्यायरूपः &c., न्यायप्रसिद्धः &c.

PROVERBIALLY, *adv.* लोकप्रसिद्धं, जनप्रसिद्धं, प्राचीनसूत्रानुसारेण.

To PROVIDE, *v. a.* (Procure or prepare beforehand) अग्रे or ... कॢप् (c. 10. कल्पयति -यितुं) or उपकॢप् or परिकॢप् or सम्प्रकॢप्

सोपकारद्रव्याणि क्लृप् or विधा or उपस्था in caus. or उपपद् in caus. or सम्भृ or पुरस्कृ or प्रस्तुतीकृ or निर्मा, अग्रे द्रव्यपरिकल्पनं कृ or द्रव्यसम्भारं कृ or उपकरणसम्भारं कृ or द्रव्यसामग्र्यं परिक्लृप्. *See To* PREPARE.—(Make a previous stipulation) पूर्व्वनियमं कृ, पूर्व्वपणं कृ, पूर्व्वसन्धिं कृ, पूर्व्वसङ्केतं कृ, पूर्व्वप्रतिज्ञां कृ.—(Provide against or for) expressed by some of the above roots in conjunction with अर्थं or अर्थे in comp.; 'to provide necessaries against a time of want,' आपदर्थं द्रव्याणि सम्भृ or आपदर्थं द्रव्यसम्भारं कृ; 'to provide thick clothing against the cold,' शीतनिवारणार्थं स्थूलवस्त्राणि क्लृप्; 'to provide for another,' परार्थं प्रयोजनीयद्रव्याणि परिक्लृप् or परं प्रयोजनीयद्रव्ययुक्तं कृ; 'to provide for another comfortably,' परस्वास्थ्यं कृ or जन्, परसुस्थतां कृ, परं सुस्थं कृ; 'to provide for, take measures against,' पूर्व्वोपायं कृ, अग्रे उपायं कृ, पूर्व्वोपायं प्रयुज्, उपायप्रयोगं कृ.

PROVIDED, *p. p.* (Furnished or prepared beforehand) अग्रे परिकल्पितः -ता -तं or परिक्लृप्तः -प्ता -प्तं or उपक्लृप्तः -प्ता -प्तं or सम्यक्क्लृप्तः &c. or कल्पितः -ता -तं, पूर्व्वं सम्भृतः -ता -तं or युक्तः -क्ता -क्तं or समायुक्तः &c. or संयुक्तः &c. or अन्वितः -ता -तं or समन्वितः &c. or उपेतः &c. or संहितः &c. or निर्म्मितः -ता -तं; 'provided for,' प्रयोजनीयद्रव्ययुक्तः -क्ता -क्तं, सर्व्वसोपकारद्रव्ययुक्तः &c., जातस्वास्थ्यः -स्थ्या -स्थ्यं, अन्नवस्त्रयुक्तः &c.—(Stipulated previously) पूर्व्वनियमितः -ता -तं, पूर्व्वपणितः &c., पूर्व्वसङ्केतितः &c.; 'provided that, with this condition,' पूर्व्वनियमे कृते, पूर्व्वसङ्केते कृते, एतेन सन्धिना.

PROVIDENCE, *s.* (Fore-sight, fore-thought) पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, दीर्घदर्शनं, पूर्व्वचिन्ता, अग्रचिन्ता, पूर्व्वविवेचनं, पूर्व्वविचारः -रणं -णा, अग्रविचारः, भविष्यद्दर्शनं, भविष्यच्चिन्ता, भाविचिन्ता, भाविकालावलोकनं, पूर्व्वविमर्शः, प्रसमीक्षा.—(The providence of God) ईश्वरानुसन्धानं, ईश्वरविधिः *m.*, ईश्वरविधानं.—(Divine Providence himself) विधाता *m.* (तृ), धाता *m.*, अनागतविधाता *m.*, भविष्यद्विधाता *m.*, विधिः *m.*, ईश्वरः, परमेश्वरः.

PROVIDENT, *a.* दीर्घदर्शी -र्शिनी -र्शि (न्), दूरदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, दूरदृष्टिः &c., परिणामदर्शी &c., अग्रदर्शी &c., भविष्यद्दर्शी &c., अनागतदर्शी &c., भविष्यच्चिन्तकः -का -कं, भाविचिन्तकः &c., पूर्व्वविचारी &c., पूर्व्वविवेकी &c., अन्तरज्ञः -ज्ञा -ज्ञं.

PROVIDENTIAL, *a.* ईश्वरकृतः -ता -तं, ईश्वरविहितः &c., ईश्वरानुसन्धानप्रयुक्तः -क्ता -क्तं, ईश्वरविधानप्रयुक्तः &c., विधातृकृतः -ता -तं, विधातृसिद्धः -द्धा -द्धं, ईश्वरसिद्धः &c.

PROVIDENTIALLY, *adv.* ईश्वरविधानेन, ईश्वरविधिना, ईश्वरानुसन्धानात्, दिष्ट्या.

PROVIDENTLY, *adv.* दीर्घदृष्ट्या, अग्रदर्शनात्, परिणामदर्शनात्, भविष्यद्दर्शनात्, चिन्तापूर्व्वं, विवेचनापूर्व्वं, पूर्व्वविचारेण, पूर्व्वविचारं कृत्वा, पूर्व्वविवेचनं कृत्वा, प्रसमीक्ष्य, प्रविमृश्य.

PROVIDER, *s.* परिकल्पकः, उपकल्पकः. *See* PROCURER, &c.

PROVINCE, *s.* (Division of a kingdom) मण्डलं, चक्रं, देशः, प्रदेशः, विषयः, राष्ट्रं, निर्गः, ग्रामशतं; 'governor of a province,' मण्डलेश्वरः, मण्डलपतिः *m.*, मण्डलाध्यक्षः, मण्डलाधिपतिः *m.*, माण्डलिकः.—(Peculiar office or business) स्वधर्म्मः, स्वकर्म्म *n.* (न्), कर्म्म *n.*, कार्य्यं, अधिकारः, प्रकरणं, क्रिया, नियोगः, निबन्धनं; 'woman's province,' स्त्रीधर्म्मः, स्त्रीनिबन्धनं.—(Department of science, &c.) प्रकरणं, देशः, अङ्गं, विषयः.

PROVINCIAL, *a.* दैशिकः -की -कं, देशीयः -या -यं, प्रदेशीयः &c., देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), माण्डलिकः -की -कं, मण्डलसम्बन्धी &c., राष्ट्रिकः -की -कं, राष्ट्रीयः -या -यं, देश in comp., ग्रामीयः -या -यं, ग्राम्यः -म्या -म्यं, जानपदः -दी -दं.

PROVINCIAL, *s.* देशस्थः, देशजः, देशवासी *m.* (न्), ग्रामस्थः, ग्राम्यजनः.

PROVINCIALISM, *s.* देशभाषा, प्रादेशिकभाषा, ग्रामीयभाषा, ग्रामिकभाषा.

PROVISION, *s.* (Act of providing) उपकल्पनं, परिकल्पनं, कल्पनं, सम्भारः, विधानं, उपस्थापनं, उपपादनं, प्रस्तुतीकरणं.—(Measures taken beforehand) पूर्व्वोपायः, अग्रोपायः, उपायः, पूर्व्वकल्पना, पूर्व्वविधानं; *see* PREPARATION.—(Store or stock collected) सम्भारः, संग्रहः, सञ्चयः, सञ्चितं, सामग्री -ग्र्यं, साहित्यं; 'provision of victuals,' अन्नसम्भारः, अन्नसंग्रहः, खाद्यद्रव्यसामग्री; 'of materials,' द्रव्यसामग्री, उपकरणसामग्री, उपकरणसम्भारः.—(Victuals, provisions) अन्नं, भोजनं, भोज्यं, भक्ष्यं, आहारः, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पाथेयं, यात्रिकं, निर्वाहः, शम्बलं, सम्बलः -लं; 'furnished with provisions,' खाद्यद्रव्ययुक्तः -क्ता -क्तं, पाथेयवान् -वती -वत् (त्).—(Previous stipulation) पूर्व्वनियमः, पूर्व्वसन्धिः *m.*, पूर्व्वसङ्केतः, पूर्व्वप्रतिज्ञा, पूर्व्वपणः, पूर्व्वसमयः, *See* PROVISO.

To PROVISION, *v. a.* (Furnish with provisions) खाद्यद्रव्ययुक्तं -क्तां कृ, खाद्यद्रव्याणि सम्भृ or उपक्लृप्, खाद्यद्रव्यसम्भारं कृ, अन्नसम्भारं कृ, खाद्यद्रव्यसम्भृतं -तां कृ.

PROVISIONAL, *a.* आपाततः स्थापितः -ता -तं, आपाततो नियोजितः -ता -तं, सामयिकः -की -कं, प्रासङ्गिकः &c., समयोपयोगी -गिनी -गि (न्), समयानुरूपः -पा -पं, अल्पकालीनः -ना -नं.

PROVISIONALLY, *adv.* आपाततस्, यथासमयं, यथाप्रयोजनं, अल्पकालमात्रं.

PROVISIONARY, PROVISORY, *a.* *See* PROVISIONAL.

PROVISO, *s.* उपनियमः, प्रकरणं, नियमप्रकरणं, सङ्केतः, उपसङ्केतः, प्रतिबन्धः, अनुबन्धः, नियमानुबन्धः, नियमपत्रानुबन्धः, नियमपत्राङ्गं, नियमपत्रखण्डः, नियमपत्रावयवः, नियमोपदेशः; 'to annex one,' अर्थान्तरोपन्यासं कृ.

PROVISORY, *a.* (Conditional) साङ्केतिकः -की -कं, सप्रतिबन्धः -न्धा -न्धं.

PROVOCATION, *s.* (Act of exciting anger) प्रकोपः -पनं, क्रोधकरणं, कोपकरणं, क्रोधोत्पादनं, कोपोत्पादनं, क्रोधोद्दीपनं, क्रोधोत्तेजनं.—(Cause of anger) कोपकारणं, क्रोधकारणं, कोपहेतुः *m.*—(Act of exciting) उत्तेजनं, उद्दीपनं, उद्बोधनं, प्रवर्त्तनं.

PROVOCATIVE, *a.* उद्दीपकः -का -कं, अग्निवर्धकः &c., क्षुधाजनकः &c.

PROVOCATIVE, *s.* अग्निवर्धनं, रोचकः -कं, रुचकं, प्ररोचनं, रसिका.

To PROVOKE, *v. a.* (Excite to anger) प्रकुप् (c. 10. -कोपयति -यितुं), कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), कोपं or क्रोधं जन् or उत्तिज् or उद्दीप् or उत्पद् (c. 10. -पादयति -यितुं), कोपोत्पादनं कृ, क्रोधोत्तेजनं कृ, क्रोधोद्दीपनं कृ.—(Excite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् in caus., प्रवृत् in caus., प्ररुच् in caus.—(Challenge) आह्वे, समाह्वे, उपाह्वे.

PROVOKED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः &c., कुपितः &c., कोपितः &c., उपजातकोपः -पा -पं, जातकोपः &c., इद्धमन्युः -न्युः -न्यु, इद्धक्रोधः -धा -धं, उद्दीप्तमन्युः &c., कोपदीप्तः -प्ता -प्तं, उत्पन्नमन्युः &c., उत्तेजितः -ता -तं, उद्दीपितः &c., उत्तापितः &c., उत्तप्तः -प्ता -प्तं, सन्तप्तः &c., सन्तापितः &c.

PROVOKING, *part.* or *a.* प्रकोपजनकः -का -कं, कोपजनकः &c., क्रोधजनकः &c., प्रकोपकः -का -कं, क्रोधोत्पादकः &c., क्रोधोद्दीपकः &c., कोपोद्दीपकः &c., क्रोधोत्तेजकः &c., उत्तेजकः &c., उद्दीपकः &c., उद्बोधकः &c.

Provokingly, *adv.* यथा कोपो जायते तथा, यथा क्रोध उद्दीप्यते तथा.

Provost, *s.* अध्यक्षः, अधीशः, अधिकारी *m.* (न्), अधिपतिः, श्रेष्ठी *m.*

Prow, *s.* नौकाग्रं, नौकाग्रभागः, नौपूर्व्वभागः, नौकोदग्रभागः.

Prowess, *s.* पराक्रमः, विक्रमः, सुविक्रमः, शौर्य्यं, वीर्य्यं, सुवीर्य्यं, रणशौर्य्यं, रणोत्साहः, पौरुषं, कृतपौरुषं, अतिशक्तिता, जनौजस् *n.*, प्रौढिः *f.*, कर्म्मोदारं; 'personal prowess,' बाहुवीर्य्यं; 'gained by one's own prowess,' स्वहस्तार्जितः -ता -तं, स्वभुजोपार्जितः &c.; 'man of great prowess,' सुपराक्रमी *m.* (न्), सुविक्रमी *m.*, पराक्रान्तः, अतिशक्तिमान् *m.* (त्); 'to show prowess,' पराक्रम् (c. 1. -क्रामति -क्रमति -मितुं), विक्रम्.

To **prowl**, *v. n.* मांसार्थं or आमिषार्थं भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम्, मांसान्वेषणार्थं भ्रम् or पर्य्यट् (c. 1. -अटति -टितुं).

Prowler, *s.* मांसार्थं भ्रमणकारी *m.* (न्) or परिभ्रमणकारी *m.*, परिभ्रमी *m.*

Prowling, *s.* मांसार्थं or मांसान्वेषणार्थं भ्रमणं or परिभ्रमणं or पर्य्यटनं.

Proximate, *a.* समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निरन्तरः -रा -रं, सन्निहितः -ता -तं, निरन्तरालः -ला -लं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), आसन्नः -न्ना -न्नं, अन्तिकः -का -कं, उपश्लिष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, सन्निकृष्टः -ष्टा -ष्टं, समीपगः &c. *See* Near, Next; 'proximate cause,' उपादानकारणं, उपादानं.

Proximately, *adv.* समीपतस्, सन्निहितं, सन्निकृष्टं, निरन्तरालं, अनन्तरालं.

Proximity, *s.* समीपता, सामीप्यं, सन्निकर्षः, सन्निकृष्टता, सन्निधिः *m.*, सान्निध्यं, सन्निधानं, सन्निधं, अन्तिकं -कता, उपस्थानं, उपस्थितिः *f.*, नैकट्यं, प्रत्यासत्तिः *f.*, प्रत्यासन्नता, संसक्तिः *f.*, संसर्गः, उपश्लेषः, आनन्तर्य्यं, तादर्थ्यं. *See* Nearness.

Proxy, *s.* (Agency of another who acts as substitute) प्रतिनिधित्वं -ता.—(Person who acts) प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तः -स्तकः; 'by proxy,' प्रतिनिधिद्वारा, प्रतिनिधिद्वारेण; 'one who signs a paper by proxy,' लेखनिकः.

Prude, *s.* मिथ्याविनीता, अत्यन्तविनयनिष्ठा, विनयाभिमानिनी, अतिविनीताम्मन्या, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारिणी, अत्याचारसेविनी, सुव्रीडिताम्मन्या, अतिविनयसेविनी, अत्यन्तविनीता.

Prudence, *s.* पूर्व्वविचारः -रणा, परिणामदृष्टिः *f.*, पूर्व्वसमीक्षा, प्रसमीक्षा, समीक्षा -क्षणं, समीक्ष्यकारिता -त्वं, विमृश्यकारिता, परिणामदर्शनं, दीर्घदृष्टिः, सदसद्दर्शनं, सदसद्विवेकः, विनयः, विनीतता, नीतिः *f.*, नीतिज्ञता, प्राज्ञता, प्रज्ञता, विज्ञता, विवेकः, मनस्विता, विचारशीलता, पूर्व्वापरविचारः, मतिमत्त्वं, बुद्धिः *f.*, मनीषा, हिताहितविवेकः, पूर्व्वचिन्ता, चिन्ता, कार्य्यचिन्ता, परिवेदना, सावधानता, पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, विमर्शः, विवेचना, पूर्व्वविवेचना.

Prudent, *a.* परिणामदर्शी -र्शिनी -र्शि (न्), पूर्व्वविचारशीलः -ला -लं, दीर्घदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, समीक्ष्यकारी -रिणी &c., विमृश्यकारी &c., समीक्षाकारी &c., प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., विज्ञः &c., मनस्वी -स्विनी &c., मतिमान् -मती -मत् (त्), बुद्धिमान् &c., प्रज्ञावान् &c., मनीषी -षिणी &c., परिवेदी -दिनी &c., परिवेदकः -का -कं, बुधः -धा -धं, सुबोधः -धा -धं, विनीतः &c., विनयवान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, पूर्व्वापरविचारी &c., विचारशीलः -ला -लं, सदसद्दर्शी &c., सदसद्विवेकी &c., दूरदर्शी &c., हिताहितविवेकी &c., पूर्व्वचिन्तकः -का -कं, पूर्व्वचिन्ताशीलः &c., कार्य्यचिन्तकः &c., धीरः -रा -रं, सावधानः -ना -नं, कृतावधानः -ना -नं, कृतधीः -धीः -धि, प्रयतः -ता -तं.

Prudential, *a.* पूर्व्वविचारप्रयुक्तः -क्ता -क्तं, पूर्व्वसमीक्षाप्रयुक्तः &c., प्रसमीक्षाप्रयुक्तः &c., सविचारः -रा -रं, सविवेकः -का -कं.

Prudently, *adv.* सविचारं, समीक्षापूर्व्वं, प्रसमीक्ष्य, सुसमीक्ष्य, सुविमृश्य, परिणामदर्शनात्, परिणामदृष्ट्या, पूर्व्वविचारेण, सावधानं, सपरिवेदनं, प्राज्ञवत्, विज्ञवत्.

Prudery, *s.* मिथ्याविनयः, मिथ्यालज्जा, एकान्तविनयः, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारनिष्ठा, विनयाभिमानं, अतिसूक्ष्मशीलता, अतिसूक्ष्मता, अतिविनीतता.

Prudish, *a.* मिथ्याविनीतः -ता -तं, एकान्तविनीतः &c., अत्यन्तविनीत &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, विनयाभिमानी -निनी &c. *See* Prude, Precise, *a.*

To **prune**, *v. a.* क्षुद्रपल्लवान् or निरर्थकविटपान् अपछिद् (c. 7. -छिनत्ति -छेत्तुं) or अवकृत् (c. 6. -कृन्तति -कर्त्तितुं) or लू (c. 9. लुनाति लवितुं) or लुप् (c. 6. लुम्पति, लोप्तुं).

Pruned, *p. p.* छिन्नपल्लवः -वा -वं, छिन्नविटपः -पा -पं, लूनविटपः &c.

Pruner, *s.* विटपछिद् *m.*, पल्लवछिद् *m.*, निरर्थकविटपछेत्ता *m.* (तृ).

Pruning, *s.* पल्लवापच्छेदः, विटपापच्छेदः, निरर्थकविटपावकर्त्तनं.

Pruning-hook, pruning-knife, *s.* पल्लवछेदनी, विटपछेदनी, पल्लवकर्त्तनी.

Prurience, pruriency, *s.* कण्डूतिः *f.*, कण्डूः *f.*, कण्डुः *f.*, कण्डूया, कण्डूयनं.—(Longing desire for any thing) अतिस्पृहा, अत्यन्तस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

Prurient, *a.* कण्डूलः -ला -लं, कण्डूतिमान् -मती -मत् (त्), सकण्डूतिः -तिः -ति.

Prurigo, *s.* कण्डूः *f.*, कण्डुः *f.*, खर्ज्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*

To **pry**, *v. a.* सूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं), सूक्ष्मं निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or दृश् (c. 1. पश्यति, द्रष्टुं), सूक्ष्मदर्शनं कृ, सूक्ष्मम् अन्विष् (c. 4. -इष्यति -एषितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), सूक्ष्मान्वेषणं कृ, सूक्ष्मानुसन्धानं कृ, सूक्ष्मं चर्च् (c. 1. चर्चति -र्चितुं), सूक्ष्मचर्चां कृ, चर्चां कृ, अनधिकारचर्चां कृ, मर्म्मान्वेषणं कृ, सूक्ष्मगवेषणं कृ, मर्म्मगवेषणं कृ.

Prying, *s.* सूक्ष्मनिरूपणं, सूक्ष्मनिरीक्षणं, सूक्ष्मदर्शनं, सूक्ष्मदृष्टिः *f.*, सूक्ष्मान्वेषणं, सूक्ष्मानुसन्धानं, सूक्ष्मचर्चा, अनधिकारचर्चा, चर्चा, मर्म्मान्वेषणं.

Psalm, *s.* गीतं, स्तुतिगीतं, गानं, स्तुतिगानं, स्तोत्रं, सङ्गीतं, सङ्गीतं ईश्वरस्तुतिगीतं, भक्तिगीतं, भक्तिगानं, धर्म्मगीतं.

Psalmist, *s.* गीतरचकः, स्तुतिगीतरचकः, स्तोत्ररचकः, गीतकारः, गीतकविः *m.*

Psalmody, *s.* स्तुतिगानं, स्तोत्रगानं, स्तोत्रगीतिः *f.*, ईश्वरस्तुतिगानं.

Psalmography, *s.* गीतरचनं, स्तुतिगीतरचनं, स्तोत्ररचनं, गीतकरणं.

Psalter, *s.* गीतपुस्तकं, गीतसंहिता, गीतसंहारः, स्तोत्रपुस्तकं, खिलं.

Pseudo. A prefix expressed in Sanskrit by मिथ्या, मृषा, कृत्रिम, कु &c. prefixed, or कल्प, देशीय &c. affixed; as, 'a pseudo poet,' मिथ्याकविः *m.*, कुकविः, कविकल्पः, कविदेशीयः; pseudology मिथ्यावादः, मृषावादः; 'pseudo-morphous,' कृत्रिमरूपः -पा -पं; 'pseudonymous,' कृत्रिमनामा &c.

Pshaw, *exclam.* धिक्, धै, अवे, अरे, रै, कित्, हुम्, अपेहि.

Psychological, *a.* आत्मतत्त्वविषयः -या -यं, अध्यात्मविषयकः -का -कं.

Psychology, *s.* आत्मतत्त्वविद्या, अध्यात्मविद्या, अध्यात्मशास्त्रं.

Puberty, pubescence, *s.* यौवनं, यौवनावस्था, तारुण्यं, तारुण्यावस्था, तरुणत्वं, युवत्वं, यौवनकालः, प्रौढता, प्रौढिः *f.*, प्रौढदशा; 'attained to puberty,' प्राप्तयौवनः -ना -नं, प्राप्तयौवनकालः -ला -लं; 'not attained to it,' अप्राप्तयौवनः &c.

Pubescent, *a.* प्राप्तयौवनः -ना -नं, अङ्कुरितयौवनः &c., प्राप्ततारुण्यः -ण्या -ण्यं.

PUBLIC, *a.* (Pertaining to the community) सर्व्वसम्बन्धी -न्धिनी -न्धि (न्), सर्व्वलोकसम्बन्धी &c., प्रजासम्बन्धी &c., लोक in comp., प्रजा in comp. (General, common to many,) साधारणः -णा -णं, सामान्यः -न्या -न्यं, सर्व्वसाधारणः &c., सर्व्वसामान्यः &c., सार्व्वलौकिकः -की -कं, लौकिकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, सर्व्वजनीयः -या -यं, विश्वजनीनः &c., विश्वजनीयः -या -यं, सर्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सर्व्वीयः -या -यं, लोक or जन in comp., (Commonly known or current) प्रसिद्धः -द्धा, लोकप्रसिद्धः &c., सर्व्वप्रसिद्धः &c., जनप्रसिद्धः &c., सर्व्वजनप्रसिद्धः &c., सर्व्वलोकप्रसिद्धः &c., जगत्प्रसिद्धः &c., देशप्रसिद्धः &c., लोकविश्रुतः -ता -तं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं, लोक or जन in comp., *see* POPULAR.—(Open to all) प्रकाशः -शा -शं, सर्व्वप्रकाशः &c., सर्व्वलोकप्रकाशः &c., प्रकटः -टा -टं, सर्व्वप्रकटः &c., लोकप्रकाशः &c., अविविक्तः -क्ता -क्तं; 'public sale,' प्रकाशविक्रयः प्रकाशक्रयः; 'public benefit,' लोकोपकारः; 'public business,' लोकव्यवहारः व्यवहारः; 'public odium,' जनविद्वेषः; 'public property,' गणद्रव्यं; 'public feeling,' लोकचित्तं, प्रकृतिचित्तं.

PUBLIC, *s.* लोकः, सर्व्वलोकः, सर्व्वजनाः *m. pl.*, प्रजा, प्रजालोकः; 'for the benefit of the public,' प्रजार्थं, लोकार्थं, लोकोपकारार्थं; 'in public,' प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, सर्व्वप्रकाशं, लोकसाक्षात्, लोकसम्मुखं; 'in public and in private,' प्रकाशं विविक्ते च, प्रकाशम् एकान्ततश्च; 'regard for the public or public opinion,' लोकलज्जा, जनलज्जा.

PUBLICAN, *s.* (Collector of tribute or toll) करग्रहः, करग्राही *m.* (न्), करसंग्राही *m.*, शुल्कग्राही *m.*—(Retailer of beer and spirits) शौण्डिकः, शुण्डी *m.* (न्), यवसुरादिविक्रयी *m.* (न्) शुण्डादिविक्रेता *m.* (तृ) सुराविक्रयी *m.*

PUBLICATION, *s.* (The act) प्रकाशनं, प्रकटनं, प्रकटीकरणं, प्रसिद्धीकरणं, प्रकाशीकरणं.—(A published book) प्रकाशितपुस्तकं, प्रसिद्धपुस्तकं.

PUBLIC-HOUSE, *s.* शुण्डास्थानं, मदस्थानं, पानगोष्ठिका, शुण्डापानं, शुण्डा, मदिरागृहं, मदिराशाला, आपानं, यवसुरादिविक्रयस्थानं, शुण्डादिविक्रयस्थानं, सुराविक्रयस्थानं.

PUBLICITY, *s.* प्रकाशता, लोकप्रकाशता, लोकप्रकाशः, जनप्रकाशः, प्रकाशः, प्राकट्यं, लोकप्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, प्रसिद्धता, लोकप्रसिद्धता -त्वं, लोकविश्रुतिः *f.*, विश्रुतिः, जनप्रसिद्धिः *f.*, प्रख्यातिः *f.*, विख्यातिः *f.*, ख्यातिः *f.*, लौकिकता -त्वं, स्फुटता, व्यक्तता, स्पष्टता.

PUBLICLY, *adv.* (Openly, before the world) प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, लोकप्रकाशं, सर्व्वप्रकाशं, प्रसिद्धं, अविविक्तं; 'publicly and privately,' *see* PUBLIC, *s.*—(Without concealment) व्यक्तं, सुव्यक्तं, स्पष्टं, स्फुटं, साक्षात्, प्रादुस्, आविस्, साविष्कारं, अगूढं.

PUBLIC-SPIRITED, PUBLIC-MINDED, *a.* लोकोपकारशीलः -ला -लं, लोकोपकारबुद्धिः -द्धिः -द्धि, लोकार्थबुद्धिः &c., जनार्थबुद्धिः &c., लोकार्थी -र्थिनी -र्थि (न्), जनार्थी &c., लोकहितेच्छुः -च्छुः -च्छु, लोकहितः -ता -तं, सर्व्वजनहितैषी &c., साधारणमङ्गलेच्छुः &c.

PUBLIC-SPIRITEDNESS, *s.* लोकोपकारशीलता, लोकोपकारबुद्धिः *f.*, लोकहितेच्छा.

To PUBLISH, *v. a.* (Make generally known) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), प्रसिद्धीकृ, ख्या in caus. (ख्यापयति -यितुं), प्रख्या, विख्या, आख्या, घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, प्रचर् (c. 10. -चारयति -यितुं), विज्ञा in caus. (-ज्ञापयति -ज्ञपयति -यितुं), बुध् (c. 10. बोधयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), विद्, आविष्कृ, प्रादुष्कृ.—(Publish a book) पुस्तकं प्रकाश् or प्रसिद्धीकृ.—(Put into circulation) प्रचलीकृ, प्रचल् (c. 10. -चलयति -यितुं), प्रचर्.

PUBLISHED, *p.p.* प्रकाशितः -ता -तं, प्रकटीकृतः -ता -तं, प्रकटितः -ता -तं, प्रसिद्धीकृतः &c., ख्यापितः -ता -तं, घोषितः &c., विघोषितः &c., आघोषितः &c., विज्ञापितः &c., प्रख्यातः -ता -तं, प्रचलीकृतः &c., प्रचारितः &c., आविष्कृतः &c., प्रादुष्कृतः &c., प्रथितः &c.

PUBLISHER, *s.* प्रकाशकः, प्रकाशयिता *m.* (तृ), ख्यापकः, विज्ञापकः, प्रसिद्धकर्त्ता *m.* (र्त्तृ), आविष्कर्त्ता *m.*, प्रादुष्कर्त्ता *m.*

To PUCKER, *v. a.* संकुच् (c. 1. -कोचति -चितुं), कुञ्च् (c. 1. कुञ्चति -ञ्चितुं), आकुञ्च्, संहृ (c. 1. -हरति -हर्त्तुं), पुटीकृ, सम्पुटीकृ, सङ्कोचं कृ.

PUCKER, PUCKERING, *s.* पुटः, पुटीकरणं, सङ्कोचः -चनं, कुञ्चनं, आकुञ्चनं.

PUDDER, *s.* तुमुलं, कोलाहलः, सम्भ्रमः, विभ्रमः, व्यग्रता, व्यस्तता.

PUDDING, *s.* पोलिका, पोलिका; 'plum-pudding,' *see* the word.

PUDDLE, *s.* वर्त्तकः, पङ्कजलौघः, कर्दमजलौघः, सपङ्कजलौघः, पङ्कजलगुल्मः, मलिनजलौघः, समलजलौघः, पङ्कगुल्मः.

To PUDDLE, *v. a.* समलीकृ, पङ्किलीकृ, कलुषीकृ, आविलीकृ. *See* MUDDLE.

PUDENCY, PUDICITY, *s.*, *see* MODESTY.

PUDENDUM, PUDENDA, *s.* (Of a woman) भगं, योनिः *f.*, अधोङ्गं, अधोपरं, अधोवशः, अधम्, अधस्तात्, उपस्थः, गुह्याङ्गं, रतिकुहरं, रतिमन्दिरं, रतिगृहं. *See* PRIVITY.

PUERILE, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं, शिशुयोग्यः &c., बालधर्म्मकः -का -कं, बालबुद्धिः -द्धिः -द्धि.

PUERILITY, *s.* बालिश्यं, बालेयत्वं -ता, बालकीयता, बालयोग्यता.

PUERPERAL, *a.* प्रासूतिकः -की -कं, प्रसवसम्बन्धी -न्धिनी -न्धि (न्).

PUERPEROUS, *a.* बालप्रसविनी, बालप्रसवकर्त्री, प्रसूतिका, सूतिका.

PUFF, *s.* (Breath from the mouth) श्वासः, श्वसितं, मुखमरुतः, वदनमरुतः.—(A puff or sudden wind) [illegible] फुत्कारः, फूत्कृतं, फूत्कारः फूत indecl.—(Blast, gust) ध्मानं, आध्मानं, ध्मातं, वातः, वातरूपः, वात्या, निर्घातः, प्रभञ्जनः.—(Kind of cake) पिष्टकं, आपूपिकं.—(Tumid commendation) अतिशयप्रशंसा, अत्युक्तिरूपा प्रशंसा, अधिकप्रशंसा, अतिशयोक्तिः *f.*

To PUFF, *v. n.* (Breathe) श्वस् (c. 2. श्वसिति -तुं), श्वासं कृ, प्रश्वासं कृ.—(Pant) कृच्छ्रेण श्वस, कृच्छ्रेण श्वासप्रश्वासं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), उद्धमं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.—(Blow) वा, प्रवा.—(Eject air from the mouth suddenly) अकस्मात् वदनमरुतं or मुखमरुतं निरस् (c. 4. -अस्यति -असितुं) or निःसृ in caus.—(Blow upon with a puffing noise) फुत्कृ, फूत्कृ, फुत्कारं कृ, फूत्कारं कृ, फुत्कारेण or फुत्शब्देन प्रश्वस्.—(Swell or be inflated with air) ध्मा in pass. (ध्मायते), आध्मा, वातेन पृ in pass. (पूर्य्यते).

To PUFF, *v. a.* (Inflate, dilate with air) ध्मा (c. 1. धमति, ध्मातुं), आध्मा, समाध्मा, प्रध्मा, उपध्मा, वातेन पृ (c. 10. पूरयति -यितुं), श्वासेन पृ, वायुपूरितं -तां कृ.—(Blow away) अपध्मा, विध्मा.—(Puff up with pride, &c.) दर्पाध्मातं -तां कृ, गर्व्वाध्मातं -तां कृ, उद्धतीकृ, उन्मत्तीकृ.—(Praise with exaggeration) अत्युक्त्या or अतिशयोक्त्या प्रशंस्, अतिशयप्रशंसां कृ.

PUFFED, *p.p.* (Inflated) ध्मातः -ता -तं, आध्मातः &c., समाध्मातः &c., प्रध्मातः &c., वातपूरितः -ता -तं, वायुपूर्णः -र्णा -र्णं, श्वासपूरितः &c.—(Puffed up with pride, &c.) दर्पाध्मातः -ता -तं, गर्व्वाध्मातः &c., उद्धतः &c., दर्पोद्धतः &c., मदोद्धतः &c.

PUFFY, *a.* आध्मातः -ता -तं, वातमयः -यी -यं, शब्दमात्रः -त्रा -त्रं.
PUG-DOG, *s.* मर्कटमुखः क्षुद्रकुक्कुरभेदः.
PUG-FACED, *a.* वानरमुखः -खी -खं, मर्कटवदनः -ना -नं, कपिमुखः &c.
PUG-NOSE, *s.* चिपिटः, चिपिटकः, चिपुटः, चिकिनः, अवभटः.
PUGILISM, *s.* मुष्टियुद्धं, मुष्टियोधनं, मुष्टिपातः, मल्लयुद्धं, मुष्टीमुष्टि, बाहुयुद्धं.
PUGILIST, *s.* मुष्टियोद्धा *m.* (द्धृ), मुष्टियोधः, मुष्टियोधी *m.* (न्), बाहुयोधी *m.*
PUGILISTIC, *a.* मुष्टियुद्धसम्बन्धी -न्धिनी -न्धि (न्), बाहुयुद्धसम्बन्धी &c.
PUGNACIOUS, *a.* युयुत्सुः -त्सुः -त्सु, कलहप्रियः -या -यं, युद्धप्रियः &c., रणप्रियः &c., युद्धेच्छुः -च्छुः -च्छु, युद्धकारी -रिणी -रि (न्), कलहकारी &c., रणकामी -मिनी &c., युद्धकामी &c.
PUGNACITY, *s.* युयुत्सा, युद्धेच्छा, युद्धप्रियता, कलहप्रियता, कलहेच्छा.
PUISNE, *a.* अवरः -रा -रं, अवरपदस्थः -स्था -स्थं, अवरजः -जा -जं.
PUISSANCE, *s.* पराक्रमः, विक्रमः, प्रभावः, ऐश्वर्य्यं, तेजस् *n.*, प्राबल्यं.
PUISSANT, *a.* पराक्रमी -मिणी -मि (न्), विक्रमी &c., पराक्रान्तः -न्ता -न्तं, विक्रान्तः &c., महाबलः -ला -लं, बलवान् -वती -वत् (त्), महाशक्तिः -क्तिः -क्ति, महाविक्रमः -मा -मं.
To PUKE, *v. n.* वम् (c. 1. वमति -मितुं), वमनं कृ, छर्द् (c. 10. छर्दयति -यितुं).
PUKE, *s.* वान्तिकारकम् औषधं, वान्तिकृत्, छर्दनकृत्.
PUKING, *s.* वान्तिः *f.*, वमनं, छर्दनं; *part.*, वमी -मिनी -मि (न्).
PULCHRITUDE, *s.* *See* BEAUTY.
To PULE, *v. n.* (Like a child) बालकवत् रु (c. 2. रौति, रवितुं), शिशुवत् रुद् (c. 2. रोदिति -तुं); 'like a chicken,' पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं).
To PULL, *v. a.* or *n.* (Draw, drag) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, संकृष्, कर्षणं कृ.—(Pull forcibly) हृ (c. 1. हरति, हर्तुं), हरणं कृ.—(Pluck, gather by plucking) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आदा (c. 3. -ददाति -दत्ते -दातुं), अङ्गुलिभिर् ग्रह् or आदा or चि or अवचि; 'to pull the hair,' केशग्रहं कृ, केशग्रहणं कृ, केशान् ग्रह्.—(Pull down) अपकृष्, अवकृष्, व्यपकृष्, पत् in caus., अधःपत्.—(Pull off) अपकृष्, अवकृष्, व्यपकृष्, उत्कृष्, अपहृ, व्यपहृ, अपनी, अवतॄ in caus. (-तारयति -यितुं); 'he pulls off his clothes,' वस्त्रम् अवतारयति.—(Pull out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं), निर्णी in caus., उत्पाटनं कृ; 'the hair,' लुञ्च् (c. 1. लुञ्चति -ञ्चितुं), उल्लुञ्च्, अवलुञ्च्, विलुञ्च्, उत्पट्, केशोल्लुञ्चनं कृ, केशोत्पाटनं कृ.—(Pull towards) आकृष्, समाकृष्, प्रतिकृष्.—(Pull in pieces, pull in two) विदॄ (c. 10. -दारयति -यितुं), अवदॄ, विभिद्, विदलीकृ, खण्डशः कृ, खण्डं खण्डं कृ.—(Pull up) उत्पट्, उद्धृ, समुद्धृ, उच्छिद्, उत्खन्; 'by the roots,' उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, समूलं or आमूलम् उद्धृ.
PULL, *s.* कर्षणं, कृष्टिः *f.*, कर्षः, आकर्षः -र्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षणं.
PULLED, *p. p.* कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकर्षितः &c., आकृष्टः &c., अवकृष्टः &c., विकर्षितः &c., विकृष्टः &c., हृतः -ता -तं, गृहीतः -ता -तं; 'pulled by the hair,' केशगृहीतः &c., केशेषु गृहीतः; &c.; 'pulled off, as clothes, &c.,' अवतारितः -ता -तं; pulled out,' उत्कृष्टः -ष्टा -ष्टं, निष्कर्षितः &c., उद्धृतः &c., उत्पाटितः &c.; 'as the hair,' उल्लुञ्चितः &c.; 'pulled up,' उन्मूलितः -ता -तं, उत्पाटितः &c., उत्खातः &c., व्यपरोपितः &c.
PULLET, *s.* कुक्कुटीशावकः, कुक्कुटशावकः, पक्षिशावकः, पक्षिणीशावकः.
PULLEY, *s.* काष्ठान्तर्गतं क्षुद्रचक्रं, काष्ठान्तःस्थं सूक्ष्मचक्रं तत्र रज्जुसङ्गं भूत्वा कीलकोपरि परिवर्त्तते, कीलकोपरि परिवर्त्तमानं क्षुद्रचक्रं.

PULLING, *s.* कर्षणं, कृष्टिः *f.*, आकर्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षः -र्षणं उत्कर्षः, हरणं, ग्रहणं, अङ्गुलिग्रहणं; 'pulling the hair,' केशग्रह -हणं; 'mutual pulling of the hair,' केशाकेशि indec.; 'pulling up the hair,' केशलुञ्चनं, केशोल्लुञ्चनं.
To PULLULATE, *v. n.* (Germinate) स्फुट्, फुल्ल्, अङ्कुर्, विकस्.
PULLULATION, *s.* स्फुटनं, फुल्लतिः *f.*, फुल्लिः *f.*, उद्भेदः, विकसनं.
PULMONARY, PULMONIC, *a.* फुप्फुससम्बन्धी -न्धिनी -न्धि (न्), फुप्फुसनिष्ठ -ष्ठा -ष्ठं, फुप्फुसस्थः -स्था -स्थं, फुप्फुसीयः -या -यं.
PULP, *s.* मज्जा, मज्जा *m.* (न्), मज्जनं, सारः, गर्भः.—(Of fruit) फलसारः, फलगर्भः, फलस्य कोमलभागः or मृदुभागः.
PULPINESS, *s.* समज्जता, मज्जावत्त्वं, मज्जागुणकत्वं, कोमलता, मृदुता.
PULPIT, *s.* उपदेशासनं, उपदेशपीठं, धर्म्मोपदेशपीठं, पीठं, पुरोहितासनं धर्म्मोपदेशकासनं, धर्म्माध्यापकासनं, धर्म्माध्यापकपीठं.
PULPOUS, PULPY, *a.* मज्जागुणकः -का -कं, मज्जोपमः -मा -मं, मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं, मांसलः -ला -लं, मांसगुणकः -का -कं कोमलः -ला -लं, आर्द्रमृदुः -द्वी -दु, मृदुः &c.
To PULSATE, *v. n.* (Palpitate) स्पन्द्, स्फुर्, कम्प्, वेप्.
PULSATION, *s.* स्पन्दनं, प्रतिस्पन्दनं, स्पन्दितं, कम्पः -म्पनं, स्फुरणं, विष्पन्दः चलत्वं; 'of the heart,' हृदयस्पन्दनं, हृत्कम्पः; 'of an artery नाडिस्फुरणं, नाड्याघातः.
PULSE, *s.* (Of the blood or an artery) नाडिः -डी *f.*, नाली -लिः *f.* नाडीस्फुरणं, नालीस्फुरणं, नाडीस्पन्दनं, नाड्याघातः; 'feeling the pulse,' नाडीपरीक्षा; 'to feel the pulse,' नाडीपरीक्षां कृ.—(Leguminous plant) कलायः, सतीनः -नकः, सतीलः -ला -लकः सितीलकः, सातीलकः, सातिलकः, द्विदलं, त्रिपुटः, खण्डिकः, हरेणुः *m.* शमीधान्यं, वनसङ्कटः, धान्यवीरः, मुद्गः, वर्त्तुलः; 'pulse ground and fried,' वडा, वटकः,
PULVERABLE, *a.* क्षोदनीयः -या -यं, चूर्णनीयः &c., चूर्णीकरणयोग्यः &c
PULVERIZATION, *s.* चूर्णीकरणं, क्षोदीकरणं, चूर्णनं, सञ्चूर्णनं, क्षोदनं.
To PULVERIZE, *v. a.* चूर्ण् (c. 10. चूर्णयति -यितुं), संचूर्ण्, प्रचूर्ण्, विचूर्ण् चूर्णीकृ, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), प्रक्षुद्, संक्षुद्, क्षोदीकृ, पिष्, गुण्ठ &c. *See To* POUND, POWDER.
PULVERIZED, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, संचूर्णितः &c. चूर्णीभूतः -ता -तं, क्षोदितः -ता -तं, क्षोदीकृतः &c., पिष्टः -ष्टा -ष्टं, गुण्ठित -ता -तं, गुण्ठितः -ता -तं.
PULVERULENT, *a.* चूर्णमयः -यी -यं, पांशुलः -ला -लं. *See* POWDERY
PUMMEL, *s.* (Of a saddle) वल्गा.
PUMP, *s.* जलोत्तोलनयन्त्रं, जलोत्तोलननाडिः -डी *f.*, जलोत्क्षेपणयन्त्रं, जलोत्क्षेपकयन्त्रं, जलोत्क्षेपकनाडी, जलोत्तोलनी, जलोत्क्षेपणी, जलनाडी, जलनाली; 'place where water is distributed,' प्रपा.
To PUMP, *v. a.* or *n.* नाडीद्वारेण जलम् उत्तुल् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or जलोत्तोलनं कृ or जलोत्क्षेपणं कृ, जलनाडीं सञ्चल् (c. 10. -चालयति -यितुं), जलोत्तोलनयन्त्रं सञ्चल्.—(Interrogate artfully) सव्याजं प्रच्छ् or अनुप्रच्छ् or परिप्रच्छ्, प्रश्नेन परीक्ष् or अनुसन्धा.
PUMPKIN, *s.* कुष्माण्डः -ण्डा -ण्डी, कुष्माण्डकः, कूष्माण्डः -ण्डी -ण्डकः, अलाबूः *f.*, अलाबुः *f.*, आलाबुः *f.*, तुम्बी, कर्कारुः *m.*
PUN, *s.* श्लेषः, श्लेषोक्तिः *f.*, श्लेषवाक्यं, श्लेषालङ्कारः, द्व्यर्थवाक्यं, अर्थापत्तिः *f.*
To PUN, *v. n.* श्लेषोक्तिं कृ, श्लेषवाक्यं वद् (c. 1. वदति -दितुं)
PUNCH, *s.* (Instrument for perforating) वेधनी, वेधनिका.—(Thrust, blow) आघातः, अभिघातः, प्रहारः; 'with the elbow,' कीलः

-ला, कीलाघातः, अरत्निप्रहारः.—(Kind of drink) शर्करादिमिश्रितं मद्यजलक्षीरादिरसमयं पानीयं.—(In a puppet show) पुत्तलिकाक्रीडायां वैहासिकः or विदूषकः.

To Punch. *v. a.* (Pierce with a punch) सूक्ष्मकीलकयन्त्रेण व्यध्.—(With the elbow) अरत्निना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्तुं), अरत्निं प्रसार्य्य तड्, कीलाघातं कृ.

Puncheon, *s.* (Instrument), *see* Punch.—(A measure), *see* Cask.

Punchy, *a.* ह्रस्वस्थूलः -ला -लं स्थूलह्रस्वः -स्वा -स्वं, घनह्रस्वः &c.

Punctilio, *s.* सूक्ष्मविषयः, सूक्ष्मविधिः *m.*, सूक्ष्मनियमः, सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं, शिष्टाचारसौक्ष्म्यं, सभ्याचारसूक्ष्मता.

Punctilious, *a.* अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि, अतिसूक्ष्मदर्शी -र्शिनी -र्शि (न्), अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मोपचारदर्शी, सूक्ष्माचारनिष्ठः -ष्ठा -ष्ठं, अतिसूक्ष्माचारी &c., सूक्ष्मनियमनिष्ठः &c., सूक्ष्मोपचारनिष्ठः &c., सूक्ष्मोपचारशीलः -ला -लं, सूक्ष्मादरनिष्ठः &c., सूक्ष्मनियमी &c., नियमनिष्ठः &c., अत्याचारी &c.

Punctiliousness, *s.* अतिसूक्ष्मदर्शनं, अतिसूक्ष्मदृष्टिः *f.*, सूक्ष्मोपचारनिष्ठा, सूक्ष्मनियमनिष्ठा, सूक्ष्मादरनिष्ठा, सूक्ष्मसत्कारनिष्ठा, सूक्ष्मादरशीलता, अत्याचारः.

Punctual, *a.* समयपालकः -का -कं, समयरक्षकः -का -कं, समयनिष्ठः -ष्ठा -ष्ठं, समयसेवी -विनी -वि (न्), कालरक्षकः -का -कं, कालनिष्ठः -ष्ठा -ष्ठं, कालपालकः -का -कं, कालसेवी &c., सामयिकः -की -कं, सङ्केतपालकः -का -कं, सङ्केतनिष्ठः &c., नियमपालकः &c., नियमनिष्ठः &c., वचननिष्ठः &c., प्रतिज्ञानिष्ठः &c., प्रतिज्ञापालकः &c., दृढनियमी &c.

Punctuality, punctualness, *s.* समयपालनं, समयनिष्ठा, समयसेवनं, कालनिष्ठा, कालसेवनं, कालपालनं, समयरक्षणं, कालरक्षणं, सङ्केतपालनं, सङ्केतनिष्ठा, नियमनिष्ठा, नियमपालनं, वचननिष्ठा, प्रतिज्ञानिष्ठा.

Punctually, *adv.* यथासमयं, समयतस्, यथाकालं, कालतस्, नियमतस्, यथानियमं, यथासङ्केतं, समयनिष्ठापूर्व्वं, कालनिष्ठापूर्व्वं.

To punctuate, *v. a.* विरामचिह्नैर् अङ्क् (c. 10. अङ्कयति -यितुं) विरामचिह्नानि लिख् (c. 6. लिखति, लेखितुं) or कृ, विरामचिह्नाङ्कनं कृ, विरामचिह्नाङ्कितं -तां कृ.

Punctuated, *p. p.* विरामचिह्नाङ्कितः -ता -तं, अवसानचिह्नाङ्कितः -ता -तं.

Punctuation, *s.* विरामचिह्नाङ्कनं, अवसानचिह्नाङ्कनं, विरामचिह्नलिखनं.

To puncture, *v. a.* सूक्ष्मकीलकाग्रेण व्यध् (c. 4. विध्यति, व्यद्धुं). *See* *To* prick.

Puncture, *s* वेधः -धनं, सूक्ष्मकीलकवेधः, व्यधः -धनं. *See* Prick.

Punctured, *p.p.* वेधितः -ता -तं, कीलकवेधितः &c., कीलकविद्धः -द्धा -द्धं,

Pundit, *s.* पण्डितः, विद्वान् *m.* (स्), प्राज्ञः, बहुश्रुतः, अधीयानः, श्रोत्रियः, वेदविद् *m.*, वेदविद्वान् *m.*, अनूचानः. *See* Learned.

Pungency, *s.* कटुता -त्वं, उग्रता -त्वं, तीव्रता, तिग्मता -त्वं, खरता, प्रखरता, प्राखर्य्यं, तैग्म्यं, तीक्ष्णता, तैक्ष्ण्यं, अरुन्तुदत्वं, चण्डता -त्वं, उष्णता -त्वं, चौपर्ण्यं, ओषणः, दाहः, विदाहः.

Pungent, *a.* कटुः -टुः -ट्वी -टु, उग्रः -ग्रा -ग्रं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं, खरः -रा -रं, प्रखरः रा -रं, अरुन्तुदः दा -दं, चण्डः -ण्डा -ण्डं, उष्णः -ष्णा -ष्णं, तिक्तः -क्ता -क्तं, विदाही -हिनी -हि (न्), दाही &c.

Puniness, *s.* अल्पता, क्षुद्रता -त्वं, शरीरक्षुद्रता, अल्पशरीरता, तनुता.

To punish, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं), शास् (c. 2. शास्ति, -सितुं, c. 10. शासयति -यितुं), अनुशास्, तड् (c. 10. ताडयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), दम् (c. 10. दमयति -यितुं) वियत् (c. 10. -यातयति -यितुं) बन्ध् (c. 9. बध्नाति बन्द्धुं), दण्डं प्रणी. *See*

To inflict.—(Pain) पीड्, व्यथ्, तप्, सन्तप्.

Punishable, *a.* दण्डनीयः -या -यं, दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डार्हः -र्हा -र्हं, दण्डनार्हः &c., ताडनीयः -या -यं, ताड्यः -ड्या -ड्यं, शासनीयः -या -यं, शास्यः -स्या -स्यं, शासनार्हः -र्हा -र्हं, दमनीयः -या -यं, दण्डयोग्यः -ग्या -ग्यं, शिक्षणीयः &c., शिक्ष्यः -क्ष्या -क्ष्यं, शिक्षार्हः &c., विनेयः -या -यं.

Punished, *p. p.* दण्डितः -ता -तं, शासितः -ता -तं, शिष्टः -ष्टा -ष्टं, ताडितः -ता -तं, निगृहीतः &c., पीडितः &c., विनीतः &c., शिक्षितः &c.

Punisher, *s.* दण्डयिता *m.* (तृ), शासिता *m.*, शास्ता *m.*, शासकः, ताडयिता *m.*, ताडकः, दण्डप्रणेता *m.*, शिक्षकः.

To read, *v. a.* (Peruse) पठ् (c. 1. पठति -ठितुं), सम्पठ्, अधी (c. 2. अधीते, अध्येतुं, rt. इ), अधिगम् (c. 1. -गच्छति -गन्तुं), अधिगा used only in the 3d pret. átm. (अध्यगीष्ट), अध्ययनं कृ, पठनं कृ.—(Read out or aloud) वच् in caus. (वाचयति -यितुं), अनुवच्, श्रु in caus. (श्रावयति -यितुं), पठ्, सम्पठ्; 'he reads the letter,' पत्रं वाचयति.—(Read to one's self) स्वाध्यायं कृ.—(Read through) पारम् अधी or अधिगम्, पारायणं कृ, साद्यन्तं पठनं कृ or अध्ययनं कृ; 'one who reads through,' पारायणिकः, पारायणी *m.* (न्); 'one who has read through the Vedas,' वेदपारगतः; 'easy to be read,' सुपठनीयः -या -यं, सुपाठ्यः -ठ्या -ठ्यं.

To read, *v. n.* (Be studious, practise reading) अध्ययनं कृ, पठनं कृ, अभ्यस् (c. 4. -अस्यति -सितुं), अभ्यासं कृ, विद्याभ्यासं कृ.

Read, *p. p.* or *a.* अधीतः -ता -तं, पठितः -ता -तं, निपठितः &c., अधिगतः &c., आगमितः &c.; 'one who has read the Vedas,' अधीतवेदः.—(Read out) श्रावितः -ता -तं, वाचितः &c., अनुवाचितः &c.—(Studied) अभ्यस्तः -स्ता -स्तं.—(Well-read) स्वधीतः -ता -तं, स्वधीती -तिनी -ति (न्), कृताध्ययनः -ना -नं, विद्यासम्पन्नः -न्ना -न्नं, अभ्यस्तविद्यः &c.

Readable, *a.* पठनीयः -या -यं, अध्ययनीयः -या -यं, अध्येतव्यः -व्या -व्यं, पाठ्यः -ठ्या -ठ्यं, अधिगम्यः -म्या -म्यं, अधिगमनीयः &c., श्राव्यः &c.

Reader, *s.* अध्येता *m.* (तृ), अध्ययनी *m.* (न्), अध्यायी *m.*, पठिता *m.* (तृ), पाठकः, अध्ययनकारी *m.* (न्), अध्ययनकृत् *m.*, पठनकारी *m.*, अधीयानः; 'one who has read through,' पारायणिकः, पारायणी *m.*; 'public reader,' पाठकः.

Readily, *adv.* (Willingly) कामं, कामतस्, प्रकामं, इच्छातस्, पर्य्याप्तं.—(Quickly, promptly) शीघ्रं, आशु, त्वरितं, अविलम्बेन, झटिति, अचिरेण, अचिरात्.—(Easily) सुखेन, सुखं, अनायासेन, अल्पायासेन, निरायासं, सुकरं, अयत्नेन, अयत्नतस्, अदुःखेन, अकष्टेन, अक्लेशेन, सु or सुख prefixed, *see* Easily.—(Without being asked) अयाचितं.

Readiness, *s.* (Promptness, quickness) प्रत्युत्पन्नता, उद्युक्तता -त्वं, शीघ्रता, अविलम्बः, अविलम्बत्वं; 'of mind or wit,' प्रत्युत्पन्नमतित्वं.—(Willingness) सकामता -त्वं, कामनत्वं, इच्छुता, इच्छुकत्वं, पर्य्याप्तिः *f.*, पर्य्याप्तता.—(State of preparation) सिद्धता, सिद्धिः *f.*, प्रस्तुतत्वं, उद्यतत्वं.

Reading, *s.* (Act of reading, perusal) अध्ययनं, पठनं, पाठः -ठनं, अधीतिः *f.*, अध्यायः, अध्ययः, प्राध्ययनं, निपाठः, निपठः, पठिः *f.*, निपठितिः *f.*, अधिगमः -मनं; 'reading through,' पारायणं, पारगमनं; 'reading to one's self,' स्वाध्यायः, स्वाध्ययनं; 'ignorant of reading and writing,' अलिपिज्ञः.—(Reading out, causing to be heard) वाचनं, अनुवाचनं, श्रावणं.—(Committing to memory upon reading) पाठः, अभ्यासः.—(Suspension of reading) अनध्यायः; 'day on which it is suspended,' अनध्यायदिवसः.—(Matter read) अध्ययनं, पाठः.—(Variation in reading, in a copy or edition) पाठान्तरं, पाठभेदः, द्विरूपपाठः, द्विरूपः, पाठः; 'false reading,' अपपाठः.

Reading-desk, *s.* अध्ययनमञ्चः, मञ्चः, मञ्चकः अध्ययनफलकः -कं.

Reading-room, *s.* पाठशाला, पठनशाला, अध्ययनशाला.

To re-admit, *v. a.* पुनः प्रविश् (c. 10. -वेशयति -यितुं), पुनर् ग्रह्.

Ready, *a.* (Prepared, said of things) सज्जः -ज्जा -ज्जं, प्रस्तुतः -ता -तं, सुप्रस्तुतः &c., सज्जितः &c., सज्जीभूतः -ता -तं, सज्जीकृतः &c., उपकल्पितः &c., परिकल्पितः &c., कल्पितः &c., उपक्लृप्तः -प्ता -प्तं, सिद्धः -द्धा -द्धं, संस्कृतः &c., आयोजितः &c., आयुक्तः -क्ता -क्तं, उपस्थितः -ता -तं; 'to be ready,' सज्जीभू, सज्ज् in pass. (सज्यते), प्रस्तुतीभू, सिद्धीभू; 'to make ready,' *see To* prepare; 'go and make ready,' गत्वा सज्जीकुरु.—(Prepared, said of persons) उद्यतः -ता -तं, समुद्यतः &c., अभ्युद्यतः &c., उद्युक्तः -क्ता -क्तं, आयुक्तः &c., उन्मुखः -खा -खं, अभिमुखः &c., कल्पः -ल्पा -ल्पं; 'ready to go,' गन्तुम् उद्यतः -ता -तं, गमनोद्यतः &c., गमनोन्मुखः &c.; 'ready to burst forth,' भेदोन्मुखः &c. or expressed by the desiderative, see *on the point of*, under Point, *s.*—(Prompt) प्रत्युत्पन्नः -न्ना -न्नं, प्रगल्भः -ल्भा -ल्भं; 'ready wit,' प्रत्युत्पन्नमतित्वं; 'having it,' प्रत्युत्पन्नमतिः -तिः -ति.—(Quick) शीघ्रः -घ्रा -घ्रं, त्वरितः -ता -तं, द्रुतः &c., क्षिप्रः -प्रा -प्रं, अविलम्बी &c., अविलम्बितः -ता -तं.—(Easy) सुखः -खा -खं, सुकरः -रा -रं, सुगमः -मा -मं, लघुः -घुः -घ्वी -घु, अनायासी &c.—(Opportune) उपयुक्तः -क्ता -क्तं, समयोपयुक्तः &c., अनुकूलः -ला -लं.—(Expert) कुशलः -ला -लं, दक्षः -क्षा -क्षं, निपुणः -णा -णं, पटुः &c.—(At hand, in hand, present) उपस्थितः -ता -तं, निकटः -टा -टं, हस्तगतः -ता -तं, हस्तस्थः -स्था -स्थं, विद्यमानः -ना -नं, वर्त्तमानः &c.; 'ready money,' उपस्थितमुद्रा; 'buying with ready money,' रोकः.—(Willing) सकामः -मा -मं, इच्छुः -च्छुः -च्छु, इच्छुकः -का -कं, पर्य्याप्तः -प्ता -प्तं.

Ready, *adv.* प्रस्तुतं, सुप्रस्तुतं, उद्यतं, समुद्यतं, पर्य्याप्तं.

Ready-made, *a.* प्रस्तुतः -ता -तं, उपस्थितः &c., सिद्धः -द्धा -द्धं.

Ready-witted, *a.* प्रत्युत्पन्नमतिः -तिः -ति, विदग्धः -ग्धा -ग्धं, विदग्धमतिः &c.

Real, *a.* सत्यः -त्या -त्यं, वास्तविकः -की -कं, वास्तवः -वी -वं, तथ्यः -थ्या -थ्यं, यथार्थः -र्था -र्थं, प्रकृतः -ता -तं, सन् -सती -सत् (त्), सात्त्विकः -की -कं, तात्त्विकः -की -कं, अवितथः -था -थं, अकृत्रिमः -मा -मं, अकल्पितः -ता -तं, सत्यकः -का -कं, ऋतः -ता -तं, याथातथ्यः &c., यथातथः &c., विद्यमानः -ना -नं, परमार्थः -र्था -र्थं, पारमार्थिकः -की -कं, गतालीकः -का -कं, निर्मायिकः -की -कं, अकपटः -टा -टं, निष्कपटः &c., निष्कपटी &c., अन्वर्थः &c.—(In law) स्थावरः -रा -रं, जङ्गमेतरः -रा -रं; 'real property,' स्थावरं, स्थावरधनं.

Reality, *s.* सत्यता -त्वं, सत्यं, वास्तविकत्वं, वास्तवत्वं, तथ्यता -त्वं, यथार्थता, याथार्थ्यं, तत्त्वं, तत्त्वार्थः, सत्त्वं, सत्ता, अस्तित्वं, प्रकृतता -त्वं, प्रकृतिभावः, विद्यमानता, अकृत्रिमता, अकल्पितत्वं, याथातथ्यं; 'a reality,' सत्त्वं, तत्त्वं, सत्यं, सत्यविषयः, वस्तु *n.*, अस्ति indec.; 'in reality,' वस्तुतस्, तत्त्वतस्.

Realization, *s.* सिद्धिः *f.*, साधनं, सिद्धीकरणं, सत्यीकरणं, स्वीकरणं, आत्मीयकरणं, आत्मसात्करणं; 'of an object,' अर्थसिद्धिः *f.*, फलसिद्धिः *f.*

To realize, *v. a.* साध् (c. 10. साधयति -यितुं), सिद्धीकृ, सिद्धिं कृ, सिद्धतां कृ or जन्, सत्यीकृ, स्वीकृ, आत्मीयं -यां कृ, आत्मसात्कृ; 'to realize any object,' अर्थसिद्धिं कृ, फलसिद्धिं कृ.

Realized, *p. p.* सिद्धः -द्धा -द्धं, सिद्धीकृतः -ता -तं, सिद्धार्थः -र्था -र्थं.

Really, *adv.* वस्तुतस्, अर्थतस्, तत्त्वतस्, परमार्थतस्, यथार्थं, यथार्थतस्, सत्यं, तथ्यं, याथातथ्यं; 'the star appears higher than it really is,' नक्षत्रं वास्तवस्थानाद् उच्चदेशे दृश्यते.

Realm, *s.* राष्ट्रं, राज्यं, विषयः, लोकः. *See* Kingdom.

Ream, *s.* दीनाख्यो लेखनपत्राणां मुद्राङ्कनपत्राणां वा महाभारः.

To re-animate, *v. a.* पुनर् आश्वस् (c. 10. -श्वासयति -यितुं), प्रत्याश्वस्, पुनर् जीव् (c. 10. जीवयति -यितुं) or संजीव्, पुनर्जीवनं दा, पुनर्जीवितं -तां कृ.

Reanimated, *p. p.* पुनराश्वासितः -ता -तं, आश्वासितः &c., प्रत्याश्वासितः &c., प्रत्याश्वस्तः -स्ता -स्तं, पुनर्जीवितः &c., संजीवितः &c.

Reanimation, *s.* पुनराश्वासनं, प्रत्याश्वासनं, पुनर्जीवनदानं, संजीवनं.

To reap, *v. a.* (Cut with a sickle) लू (c. 9. लुनाति, लवितुं), लवित्रेण छिद् (c. 7. छिनत्ति, छेत्तुं) or अवछिद् or कृत् (c. 6. कृन्तति, कर्त्तितुं) or अवकृत् or दो or दा (c. 4. द्यति c. 2. दाति -तुं) or निर्दो or छो (c. 4. छ्यति, छातुं) or अवछो, लवनं कृ.—(Gather) संग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), चि (c. 5. -चिनोति, चेतुं), अवचि, संचि; 'to reap corn,' शस्यसंग्रहं कृ; 'to reap the fruits of any thing,' फलसिद्धिं कृ, फलप्राप्तिं कृ, फलं भुज् or अनुभू or प्राप्, फलभोजी -जिनी &c., भू; 'of an action,' कर्म्मफलं भुज् or प्राप्.

Reaped, *p. p.* लूनः -ना -नं, लवित्रच्छिन्नः -न्ना -न्नं, कर्त्तितः -ता -तं, छातः &c., अवछातः &c., छितः &c., दातः &c., निर्दातः &c., दितः -ता -तं, संगृहीतः &c., सञ्चितः -ता -तं.

Reaper, *s.* लवकः, लविता *m.* (तृ), शस्यलवकः, छेदकः, छेत्ता *m.* (तृ), शस्यछेदकः, शस्यछिद् *m.*, शस्यछेत्ता *m.* (तृ), निर्दाता *m.*, शस्यसंग्रही *m.* (न्), शस्यसंग्राहकः, शस्यसञ्चयी *m.*, लवनकारी *m.*, कार्त्तकः.

Reaping, *s.* लवनं, लावः, अभिलावः, शस्यलावः, लवः, शस्यछेदः -दनं, छेदनं, शस्यसंग्रहः, शस्यकर्त्तनं, दातिः *f.*, दानं.

Reaping-hook, *s.* लवित्रं, लवाणकं, लवाकः, शस्यकर्त्तनी, शस्यछेदनी.

Rear, *s.* (That which is behind) पश्चाद्भागः, पाश्चात्यभागः, पश्चिमभागः, पार्ष्णिः *m.*, पृष्ठं; 'in the rear,' पश्चात्, पृष्ठतस्, पश्चाद्भागे; 'in our rear,' अस्मत्पश्चात्.—(Rear of an army) पार्ष्णिः *m.f.*, व्यूहपार्ष्णिः *m.*, प्रत्यासारः, प्रत्यासरः, प्रतिसरः, सव्ययः, सव्ज्ञनं; 'a body of forces in the rear,' पार्ष्णित्रं; 'an enemy in the rear,' पार्ष्णिग्राहः; 'bringing up the rear,' प्रतिगृह्य.

To rear, *v. a.* (Raise to maturity, bring up) पुष् (c. 10. पोषयति -यितुं), परिपुष्, पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, भृ (c. 3. बिभर्त्ति, c. 1. भरति, भर्त्तुं), सम्भृ, संवृध् (c. 10. -वर्धयति -यितुं), वृध्, परिवृध्, विनी (c. 1. -नयति -नेतुं), अनुनी, पोषणं कृ, पालनं कृ, पालनपोषणं कृ.—(Raise, lift) उत्था in caus. (-थापयति -यितुं, rt. स्था), उन्नम् (c. 10. -नमयति -यितुं), उच्छ्रि (c. 1. -श्रयति -यितुं, rt. श्रि), उन्नुल्, उन्नी, उद्यम्, उद्धृ, उद्वह्, उच्चीकृ, ऊर्द्ध्वीकृ.

To Rear, *v. n.* (As a horse) अश्ववत् पुरूपकं कृ.

Reared, *p. p.* (Brought up) पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, पालितः -ता -तं, प्रतिपालितः &c., भृतः &c., सम्भृतः &c., संवर्धितः -ता -तं, परिवर्धितः &c., वर्धितः &c.—(Raised, elevated) उत्थापितः -ता -तं, उच्छ्रितः &c., अभ्युच्छ्रितः &c., उद्यतः &c.

Rear-guard, *s.* पार्ष्णित्रं, व्यूहपार्ष्णित्रं, सैन्यपार्ष्णित्रं.

Rearing, *s.* (Educating) पोषणं, पोषः, पालनं, भरणं, संवर्धनं, परिवर्धनं, वर्धनं.—(Elevating) उत्थापनं, उन्नयनं, उन्नमनं, उच्छ्रितिः *f.* —(Of a horse) पुरूपकं.

Rear-ward, *s.* See Rear, Rear-guard.

Reason, *s.* (Reasoning faculty, understanding) बुद्धिः *f.*, धीः *f.*, मनस् *n.*, मतिः *f.*, चित्तं, चेतस् *n.*, ज्ञानं, चिच्छक्तिः *f.*, चेतना, चित् *f.*, तर्कशक्तिः *f.*, अनुमानशक्तिः *f.*, आकलनशक्तिः *f.*, मानसं, प्रज्ञा, उपलब्धिः *f.*, शेमुषी, मनीषा, स्वान्तं.—(Right, justice) युक्तता, युक्तिः *f.*, उपपत्तिः *f.*, उपपन्नता, योग्यता, यथायोग्यता, यथार्थता, याथार्थ्यं, न्यायः, न्याय्यता, सामञ्जस्यं, सम्यक्त्वं; 'with reason,' युक्तं, यथायुक्तं, यथायोग्यं, न्यायतस्, सम्यक्.—(Cause, ground) हेतुः *m.* कारणं, निमित्तं -त्तकं, निदानं, निबन्धनं, प्रयोजनं; 'by reason of,' हेतोः हेतौ, निमित्ते, कृते, अर्थं, कारणात्, or expressed simply by the abl. c.; as 'by reason of anger,' कोपात्; 'for this reason,' अनेन हेतुना, अतःकारणात्, तस्य हेतोः तदर्थं; 'for some reason,' केनापि कारणेन; 'for what reason,' केन हेतुना, कस्य हेतोः, किमर्थं; 'without reason,' कारणेन विना हेतुना विना, अकस्मात्; 'He assigns a reason,' स हेतुम् आह; 'the reason of their barrenness is the absence of seed' तेषां वन्ध्यत्वे बीजाभावः कारणं; 'the reason of the indistinctness is as follows,' अथ अस्पष्टत्वे हेतुर् उच्यते.

To reason, *v. n.* (Deduce inferences, exercise the faculty of reason) तर्क् (c. 10. तर्कयति -यितुं) वितर्क्, अनुतर्क्, अनुमा (c. 2. -माति -तुं), ऊह् (c. 1. ऊहते -हितुं), अपोह्, प्रोह्, वितर्कं कृ, वितर्कं कृ, ऊहं कृ, ऊहापोहं कृ, अर्थापत्तिं कृ, सिद्धासिद्धविचारं कृ.—(Argue, debate) विवद्, विसंवद्, विचर्, वितर्क्, वादानुवादं कृ.

Reasonable, *a.* (Having the faculty of reason), see Rationa[l] —(Conformable to reason, just, right) युक्तः -क्ता -क्तं, उपयु[क्तः] &c., योग्यः -ग्या -ग्यं, यथायुक्तः &c., यथायोग्यः &c., यथोचितः -[ता] -तं, युक्तिमान् -मती -मत् (त्), सयुक्तिकः -का -कं, उपपन्नः -न्ना -[न्नं], उपपत्तिमान् -मती &c., यथार्थः -र्था -र्थं, न्याय्यः -य्या -य्यं, न्यायानु[]सारी -रिणी -रि (न्), न्यायानुरूपः -पा -पं, न्यायसिद्धः -द्धा -द्धं, युक्ति[]सिद्धः &c., यथान्यायः -या -यं, तात्त्विकः -की -कं.—(Moderate) परिमितः -ता -तं, मितः &c., सपरिमाणः -णा -णं, नियतः -ता -[तं], समः -मा -मं.—(Acting or thinking rationally), समदर्शी &c. न्यायकारी &c., न्यायवृत्तिः -त्तिः -त्ति, समवृत्तिः &c.

Reasonableness, *s.* (Faculty of reason) ज्ञानशक्तिः *f.*, चिच्छक्तिः, तर्कशक्तिः.—(Conformity to reason), युक्तता, उपयुक्तता, योग्यता, यथायोग्यता, युक्तिः *f.*, उपपत्तिः *f.*, उपपन्नता, यथार्थता, याथार्थ्यं, न्याय्यता -त्वं, न्यायसिद्धता, युक्तिसिद्धता, औचित्यं, सम्भवः, सम्भूतिः *f.*, सम्भावना.—(Moderation) परिमितता, समता, अनतिक्रमः, मर्य्यादानतिक्रमः.

Reasonably, *adv.* (Conformably with reason) युक्तं, यथायोग्यं, उपपन्नं, न्यायतस्, न्यायानुसारेण, न्यायानुरूपेण, यथान्यायं, यथार्थं, यथोचितं, युक्तितस्.—(Moderately) परिमितं, नियतं, समं.

Reasoner, *s.* तर्की *m.* (न्), तार्किकः, वितर्की *m.*, ऊही *m.* (न्), प्रोही *m.* प्रोहः, विचारकः, तर्ककारी *m.*, वितर्ककारी, नैयायिकः, न्यायविद् *m.* प्रतिपादकः. See Logician.

Reasoning, *s.* तर्कः, वितर्कः -र्कणं, विचारः, ऊहः -हनं, प्रोहः, सम्प्र[] ऊहापोहः, अपोहः -हनं, व्यूहः, निरूहः, न्यायः, अनुमानं, अध्याहा[रः], अर्थापत्तिः *f.*, अनुमानोक्तिः *f.*; 'art or science of reasoning,' तर्कविद्या, तर्कशास्त्रं, तर्कज्ञानं, विचारविद्या; 'chain of reasoning,' तर्कप्रबन्धः, अनुमानप्रबन्धः; 'skill in it,' तार्किक्यं.

Reasonless, *a.* (Destitute of reason) बुद्धिहीनः -ना -नं, निर्बु[द्धिः] -द्धिः -द्धि, ज्ञानहीनः &c.—(Without a reason) अहेतुकः -का -[कं], निर्हेतुकः &c., निष्कारणः -णा -णं.

To re-assume *v. a.* प्रत्यादा, पुनर् आदा or ग्रह् or प्रतिग्रह्.

Re-assurance, *s.* पुनराश्वासनं, पुनराशा, प्रत्याशा, आश्वासनं.

To re-assure, *v. a.* पुनर् आश्वस् (c. 10. -श्वासयति -यितुं), प्रत्याश्व[स्].

Re-assured, *p. p.* पुनराश्वासितः -ता -तं, पुनराश्वस्तः -स्ता -स्तं, प्रत्याश्वासितः &[c.]

R**E-ASSURING**, *part.* or *a.* पुनराश्वासकः -का -कं, प्रत्याश्वासकः &c., आश्वासकः &c.

R**EBEL**, *s.* राजद्रोही *m.* (न्), राजाभिद्रोही *m.*, राजयुध्वा *m.* (न्), राजप्रतिरोधी *m.*, स्वामिद्रोही *m.*, राजशासनत्यागी *m.*, राजप्रतीपः, राजप्रतीपकारी *m.*, राजविपरीतकारी *m.*, राजविरोधी *m.*, राजविरुद्धाचारी *m.*, कलहकारी *m.*, [illegible]शः, प्रतीपः, विपरीतकारी *m.*

T**o REBEL**, *v. n.* राजद्रोहं कृ, राजानम् अभिद्रुह् (c. 4. -द्रुह्यति -द्रोहितुं -द्रोग्धुं) राजाभिद्रोहं कृ, स्वामिद्रोहं कृ, राजशासनत्यागं कृ, राजशासनलंघनं कृ, राजानं प्रतियुध् (c. 4. -युध्यते -योद्धुं), प्रकृतिक्षोभं कृ, प्रकृतिकलहं कृ.

R**EBELLION**, *s.* राजद्रोहः, राजाभिद्रोहः, राजयुद्धं, राजशासनत्यागः, स्वामिद्रोहः, प्रकृतिक्षोभः, प्रकृतिकलहः, राजशासनलंघनं, राजोपद्रवः, उपद्रवः, प्रकोपः, कोपः, खण्डनं.

R**EBELLIOUS**, *a.* राजद्रोही -हिणी -हि (न्), राजाभिद्रोही &c., राजध्रुक् *m.f.n.* (द्रुह्), राजध्रुक्, द्रोही &c., ध्रुक् *m.f.n.*, राजप्रतीपः -पा -पं, राजप्रतीपकारी &c., प्रतीपः -पा -पं, राजविपरीतकारी &c., विपरीतकारी &c., उपद्रवी &c., राजोपद्रवी &c., राजशासनलंघी &c., राजशासनत्यागी &c., लंघितशासनः -ना -नं, उल्लंघितशासनः &c., राजावशः -शा -शं. *See* REBEL, *s.*

T**o REBOUND** *v. n.* उत्पत् (c. 1. -पतति -तितुं), परापत्, उत्प्लु (c. 1. -प्लवते -प्लोतुं), प्रतिहन् in pass. (-हन्यते).

R**EBOUND**, *s.* उत्पतनं, परापतनं, प्रतिघातः, प्रतिहतिः *f.*, प्रतिहननं, उत्प्लुतं.

R**EBUFF**, *s.* (Repercussion) प्रतिघातः, प्रतिहतिः *f.*, प्रतिहननं, पराहननं.—(Check, defeat) पराभवः, पराजयः, अपजयः.—(Refusal) प्रत्यादेशः, अवधीरणा.

T**o REBUFF**, *v. a.* प्रतिहन् (c. 2. -हन्ति -न्तुं), पराहन्, प्रत्यादिश्, अवधीर्, पराजि.

T**o REBUILD** *v. a.* पुनर् निर्मा or विनिर्मा (c. 2. -माति -तुं), पुनर्निर्माणं कृ.

R**EBUILT**, *p.p.* पुनर्निर्म्मितः -ता -तं, पुनर्विनिर्म्मितः &c., पुनर्निर्म्मितः &c.

R**EBUKABLE**, *a.* निन्दनीयः -या -यं, निन्द्यः -न्द्या -न्द्यं, निन्दार्हः -र्हा -र्हं.

T**o REBUKE**, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, विनिन्द्, उपालभ् (c. 1. -लभते -लब्धुं), भर्त्स् (c. 10. भर्त्सयते -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), गर्ह् c. 1. गर्हते -र्हितुं), विगर्ह्, गुप् in des., (जुगुप्सते -प्सितुं), आक्रुश् c. 1. -क्रोशति -क्रोष्टुं), क्षिप् (c. 6. क्षिपति क्षेप्तुं), तर्ज् (c. 10. तर्जयति -यितुं).

R**EBUKE**, *s.* निन्दा-न्दनं, परीवादः, परिवादः, भर्त्सनं, भर्त्सनवाक्यं, परिभाषणं, उपालम्भः, प्रत्यादेशः, आक्रोशः, उपक्रोशः, जुगुप्सा, वाग्दण्डः, शब्ददण्डः.

R**EBUKER**, *s.* निन्दकः, परिवादकः, प्रत्यादेशकः, भर्त्सनकारी *m.* (न्).

R**EBUS**, *s.* प्रवह्लिः *f.*, -ह्लिका. *See* RIDDLE.

T**o REBUT**, *v. a.* निरस् (c. 4. -अस्यति -असितुं), उपमर्दं कृ, खण्ड्. *See* REPEL.

T**o RECALL**, *v. a.* (Call back, take back, bring back) पुनर् आदा (c. 3. -ददाति -दातुं) प्रत्यादा, पुनर् आनी (c. 1. -नयति -नेतुं), प्रत्यानी, प्रत्यानयनं कृ, प्रत्यावर्त्तनं कृ, प्रतिनिवर्त्तनं कृ, निवर्त्तनं कृ, निवृत् or प्रतिनिवृत् or प्रत्यावृत् in caus.—(Revoke, annul) निवृत् (c. 10. वर्त्तयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), खण्ड् (c. 10. खण्डयति -यितुं), निवर्त्तनं कृ, खण्डनं कृ, लोपं कृ.—(Call to mind) स्मृ (c. 1. स्मरति, स्मर्त्तुं), अनुस्मृ, अनुचिन्त्, अनुबुध्.

R**ECALL**, *s.* प्रत्यानयनं, पुनरानयनं, प्रत्यावर्त्तनं, प्रत्यादानं, पुनरादानं.

R**ECALLED**, *p. p.* (Called back, brought back) प्रत्यानीतः -ता -तं, पुनरानीतः &c., प्रत्यावर्त्तितः &c., प्रतिनिवर्त्तितः &c., निवर्त्तितः &c., —(Revoked, annulled) निवर्त्तितः -ता -तं, खण्डितः &c. प्रत्यादिष्टः -ष्टा -ष्टं, लुप्तः -प्ता -प्तं.—(Called to mind) स्मृतः -ता -तं, उद्बुद्धः -द्धा -द्धं, उद्ग्राहितः -ता तं.

To R**ECANT**, *v. a.* पूर्व्वोक्तविपरीतं वद् (c. 1. वदति -दितुं), पूर्व्वोदितविपरीतं वद्, पूर्व्वोक्तखण्डनं कृ, पूर्व्वोक्तलोपं कृ, अनुशयं कृ, विप्रतिपत्तिं कृ.

R**ECANTATION**, *s.* पूर्व्वोक्तविपरीतवादः, पूर्व्वोदितविपरीतवादः, पूर्व्वोक्तखण्डनवादः, पूर्व्वोक्तखण्डनं, पूर्व्वोक्तलोपः, अनुशयः, विप्रतिपत्तिः *f.*

To R**ECAPITULATE** *v. a.* संक्षेपतः पुनः कथ् (c. 10. कथयति -यितुं), वाक्यसारम् अनुवद् (c. 1. -वदति -दितुं) or अनुवच् (c. 2. -वक्ति -क्तुं), संक्षेपेण वाक्यं पुनर् वद्, सारविषयान् पुनर् वद् or अनुवद्, सारप्रकरणानि पुनर्वद् or पुनर्वच्.

R**ECAPITULATED**, *p. p.* संक्षेपतः पुनरुक्तः -क्ता -क्तं or पुनःकथितः -ता -तं.

R**ECAPITULATION**, *s.* संक्षेपतः पुनःकथनं or पुनरुक्तिः *f.* or पुनर्वचनं or अनुवादः, संक्षेपेणानुवादः, पूर्व्वकथितानुवादः, संक्षेपतः पुनर्व्याख्या.

To R**ECEDE**, *v. a.* अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, अपसृ (c. 1. -सरति -सर्त्तुं), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), परावृत्, अपावृत्, प्रतिनिवृत्, अवस्था (c. 1. -तिष्ठते -स्थातुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, अपसृप् (c. 1. -सर्पति -सप्तुं), अपगम् (c. 1. -गच्छति -गन्तुं), अपया (c. 2. -याति -तुं), अपे (c. 2. अपैति -तुं, rt. इ).

R**ECEIPT**, *s.* (Act of receiving) आदानं, ग्रहणं, प्रतिग्रहणं, प्राप्तिः *f.*, अवाप्तिः *f.*, प्रापणं, लब्धिः *f.*, उपलब्धिः *f.*—(Income) आयः, आगमः, उदयः, आदायः, उत्पन्नं, प्राप्तिः *f.*, लाभः, लब्धिः *f.*, फलं; 'of money or property,' धनागमः, धनोदयः, अर्थागमः, फलोदयः; 'receipts of trade,' पण्याया. 'receipt and expenditure,' आयव्ययौ *m. du.*—(Note of ackowledgment) मुक्तिपत्रं, विज्ञानपत्रं, प्रत्ययकारिपत्रं, प्रत्ययकारी लेखः, प्रत्ययकारिणी, स्वीकारपत्रं, स्वीकरणपत्रं, स्वीकारलेखः, स्वीकारलेख्यं(?), आदानपत्रं, आगमपत्रं, आगमलेख्यं.—(Recipe, prescription of ingredients) साधनलेखः, योगलेखः, संयोगलेखः, लेखः, लेख्यं.

R**ECEIVABLE**, *a.* आदेयः -या -यं, उपादेयः &c., ग्राह्यः -ह्या -ह्यं, ग्रहणीयः -या -यं, ग्रहीतव्यः -व्या -व्यं, प्रतिग्राह्यः &c., प्रापणीयः -या -यं, प्राप्यः -प्या -प्यं, लभ्यः -भ्या -भ्यं, उपलभ्यः &c., स्वीकरणीयः &c.

To R**ECEIVE**, *v. a.* (Take, get, obtain) आदा (c. 3. -ददाति -दत्ते -दातुं), उपादा, ग्रह (c. 9. गृह्णाति, गृह्णीते, ग्रहीतुं), प्रतिग्रह, अभिग्रह, सम्प्रग्रह, संग्रह, आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्, लभ् (c. 1. लभते, लब्धुं), उपलभ्, प्रतीष् (c. 6. -इच्छति -एषितुं), प्रतिपद् (c. 4. -पद्यते -पत्तुं), आपद्, अभिपद्, समापद्.—(Allow) स्वीकृ, अङ्गीकृ, ग्रह, अनुग्रह.—(Admit) प्रविश् in caus., आविश्, ग्रह.—(Hold, contain) धा, आधा, आदा.—(Entertain a guest) सत्कृ, आतिथ्यं कृ, सत्कारं कृ, सम्भू (c. 10. -भावयति -यितुं), सम्भावनं कृ, आदरं कृ, स्वागतं कृ or वद्.

R**ECEIVED**, *p. p.* or *a.* (Taken, accepted, obtained) आदत्तः -त्ता -त्तं, आत्तः &c., उपादत्तः &c., उपात्तः &c., गृहीतः -ता -तं, प्रतिगृहीतः &c., प्राप्तः -प्ता -प्तं, आप्तः &c., अवाप्तः &c., लब्धः -ब्धा -ब्धं, उपलब्धः &c.; 'received as wages,' भृतिरूपेण लब्धः &c.—(Generally admitted) लोकप्रसिद्धः -द्धा -द्धं, सर्व्वत्र प्रचलः -ला -लं; 'received practice,' लोकव्यवहारः; 'received doctrine,' आम्नायः; 'received expression,' आप्तवचनं, आप्तोक्तिः *f.*

R**ECEIVER**, *s.* ग्राही *m.* (न्), ग्राहकः, ग्रहीता *m.* (तृ), प्रतिग्रहीता *m.*, प्रतिग्राहकः, आदाता *m.* (तृ), आदायी *m.* (न्), उपादाता *m.*, उपादायी *m.*,

प्रतिग्रहकृत् *m.*, आप्ता *m.* (प्), प्रापकः, लब्धा *m.* (ब्ध्), उपलब्धा *m.*, प्रतीच्छकः.—(Vessel for receiving) आधारः, द्रवाधारः, आधानं, भाजनं, पात्रं, द्रवाशयः, आशयः.

Recency, *s.* नवता -त्वं, नूतनत्वं, अभिनवता, प्रत्यग्रता. *See* Newness.

Recent, *a.* नूतनः -ना -नी -नं, नवः -वा -वं, अभिनवः &c., नवीनः -ना -नं, प्रतिनवः &c., नूत्नः -त्ना -त्नं, प्रत्यग्रः -ग्रा -ग्रं, इदानीन्तनः -नी -नं, अधुनातनः &c., अर्वाचीनः -ना -नं, अप्राचीनः &c., सद्यस्कः -स्का -स्कं, सद्यस्कालीनः -ना -नं, आधुनिकः -की -कं, अचिरः -रा -रं, अव्यवहितदीर्घकालः -ला -लं.

Recently, *adv.* नूतनकाले, नूतनं, अव्यवहितदीर्घकाले. *See* Lately.

Receptacle, *s.* आधारः, पात्रं, भाजनं, आशयः, निधानं, निधिः *m.*, आधानं, आश्रयः, अधिश्रयः, अधिकरणं, गर्भः, आस्पदं, विन्यासः, योजं. The word आशयः is especially used in composition thus, 'the receptacle of the blood,' रक्ताशयः; 'of the food,' अन्नाशयः, आमाशयः; 'of bile,' पित्ताशयः.

Reception, *s.* (Receiving) आदानं, उपादानं, ग्रहणं, प्रतिग्रहः -हणं, आधानं.—(Admission) स्वीकारः, स्वीकरणं, अङ्गीकारः, अङ्गीकरणं, ग्रहणं.—(Entrance) प्रवेशनं, प्रवेशः.—(Entertainment) सत्कारः, सत्क्रिया, संग्रहः, सम्भावनं -ना; 'of friends,' मित्रसंग्रहः.

Recess, *s.* (In a wall, &c., secret or retired spot) गर्भः, कोणः, विविक्तस्थानं, गूढस्थानं, निभृतस्थानं, गुप्तस्थानं.—(Place of retirement) परावर्त्तनस्थानं, अपावर्त्तनस्थानं, अपक्रमणस्थानं.—(Remission of business) विरामः, विरतिः *f.*, विश्रामः, निवृत्तिः *f.*, कार्य्यनिवृत्तिः *f.*, कार्य्यत्यागः, विरामकालः, विश्रामकालः.

Recession, *s.* अपक्रमणं, अपावर्त्तनं, परावर्त्तनं, परावृत्तिः *f.*, अपसरणं.

Recipe, *s.* *See* under Receipt, Prescription.

Recipient, *s.* (Person) ग्राही *m.* (न्), आदाता *m.* (तृ), ग्राहकः, आश्रयिता *m.* *See* Receiver.—(Thing) आधारः, आशयः, पात्रं. *See* Receiver.

Reciprocal, *a.* परस्परः -रा -रं, अन्योन्यः -न्या -न्यं, इतरेतरः -रा -रं, व्यतिकरः -रा -रं, इतरेतराश्रयः -या -यं, मिथस् in comp. The sense of "reciprocal" is often expressed by the prepositions वि, आ, अव, अति, प्रति, प्र in combination. *See* Mutual.—(Alternate, in reciprocal succession) परस्परानुगामी -मिनी -मि (न्), परस्परानुवर्त्ती &c., अन्योन्यानुगामी &c., अन्योन्यानुवर्त्ती &c.

Reciprocally, *adv.* परस्परं -रां, अन्योन्यं, इतरेतरं, मिथस्, उभयतस्, परस्पर in comp.; 'mutually connected,' व्यतिषक्तः -क्ता -क्तं, मिथःसम्बद्धः -द्धा -द्धं, *see* Mutually.

To reciprocate, *v. a.* परस्परं परिवृत् (c. 10. -वर्त्तयति -यितुं), परस्परपरिवर्त्तनं कृ, अन्योन्यं परिवृत्, व्यतिकरं कृ, व्यतिहृ, व्यतिहारं कृ; 'to reciprocate gifts,' परस्परं दानप्रतिदानं कृ; 'to reciprocate assistance,' प्रत्युपकारं कृ; 'civilities,' प्रतिपूजनं कृ, *see* *To* interchange.

Reciprocation, *s.* परिवर्त्तनं, विनिमयः, व्यतिकरः, व्यतिहारः. *See* Interchange.

Reciprocity, reciprocalness, *s.* परस्परता, अन्योन्यता -त्वं, व्यतिकरः, व्यतिहारः, व्यतीहारः, परस्परयोगः, इतरेतरयोगः, परस्परभावः, व्यतिषङ्गः. *See* Mutuality.

Recital, recitation, *s.* (Repetition, reading out in a loud voice) पठनं, पाठः, अनुवादः, श्रावणं, वाचनं, अनुवाचनं, उल्लेखः -खनं, उच्चारणं, उद्घोषः -षणं, उद्गारः.—(Narration) कथनं, आख्यानं, उपकथनं, ख्यापनं, वर्णनं.

Recitative, *s.* (Cadence introductory to a song) तेनः.

To recite, *v. a.* (Repeat, read out) पठ् (c. 1. पठति -ठितुं), सम्पठ्, अनुवद् (c. 1. -वदति -दितुं), श्रु (c. 10. श्रावयति -यितुं), आश्रु, संश्रु, वच् (c. 10. वाचयति -यितुं), अनुवच्, उच्चर् (c. 10. -चारयति -यितुं), उद्घुष् (c. 10. -घोषयति -यितुं), पठ्.—(Narrate) कथ् (c. 10. कथयति -यितुं), आख्या (c. 2. -ख्याति -तुं), ख्या in caus., वर्ण्, अनुवर्ण्, व्याहृ, उदाहृ, निरूप्, विवरणं कृ, वृत् in caus.

Recited, *p. p.* (Repeated, read out) पठितः -ता -तं, श्रावितः &c.; 'being recited,' पठ्यमानः -ना -नं.—(Narrated) कथितः -ता -तं, आख्यातः &c., वर्णितः &c.

Reciter, *s.* पठकः, पठिता *m.* (तृ), पठनकारी *m.* (न्), श्रावकः, श्रावयिता *m.* (तृ), अनुवादकः, उच्चारकः, उच्चारणकारी *m.*, कथकः, उपकथकः, आख्यायकः.

To reck, *v. a.* and *n.* अवेक्ष्, अवधा, मन्, प्रतिमन्. *See* *To* care.

Reckless, *a.* अनवधानः -ना -नं, असावधानः &c., अनवहितः -ता -तं, प्रमत्तः -त्ता -त्तं, साहसिकः -की -कं, साहसी -सिनी -सि (न्), निरपेक्षः -क्षा -क्षं, निश्शङ्कः -ङ्का -ङ्कं.

Recklessly, *adv.* अनवहितं, साहसेन -सात्, साहसबुद्ध्या, प्रमत्तं.

Recklessness, *s.* साहसं, साहसशीलता, साहसबुद्धिः *f.*, अनवधानं -नता, असावधानता, प्रमादः, प्रमत्तता.

To reckon, *v. a.* (Count, number) गण् (c. 10. गणयति -यितुं), विगण्, परिगण्, प्रगण्, संख्या (c. 2. -ख्याति -तुं), परिसंख्या, सम्परिख्या, कल् (c. 10. कलयति -यितुं), गणनां कृ.—(Esteem, account) मन्, सम्मन्, प्रतिमन्, गण्, विगण्.

To reckon, *v. n.* (Reason with one's self, conclude) वितर्क् (c. 10. -तर्कयति -यितुं), तर्क्, अनुमा, ऊह्, अवगम्.—(Consider, think) मन् (c. 4. मन्यते, मन्तुं), तर्क्, वितर्क्, बुध्.—(Reckon on, count upon) अवलम्ब्, समालम्ब्, संश्रि, समाश्रि, उपाश्रि, विश्वस्.—(Reckon with, settle accounts) विगणनं कृ, सिद्धिं कृ, ऋणसिद्धिं कृ.

Reckoned, *p. p.* गणितः -ता -तं, विगणितः &c., परिगणितः &c., मतः &c., संख्यातः &c.

Reckoner, *s.* गणकः, विगणकः, गणयिता *m.* (तृ), गुणकः, गुणकारः.

Reckoning, *s.* (The act) गणनं -ना, विगणनं -ना, संख्यानं, परिसंख्यानं, गुणनं.—(Statement of account with another) विगणनपत्रं, विगणनापत्रं, गणनपत्रं, विगणनलेखः, संख्यापत्रं.—(Statement of expense) व्ययपत्रं, व्ययलेखः.—(Esteem, estimation) मानं, सम्मानं, मतिः *f.*

To reclaim, *v. a.* (Demand to have restored, take back) मत्तम् एतत् प्रतिदातव्यम् इति ज्ञापयित्वा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), मत्तम् एतत् प्रत्यर्पणीयम् इत्युक्त्वा ग्रह्, पुनर् लभ्, प्रतिलभ्, पुनर् ग्रह्, पुनः प्राप्, पुनः स्वीकृ.—(Call back from error, vice, &c.) पापात् or दुष्कर्म्मणो निवृत् (c. 10. -वर्त्तयति -यितुं) or विनिवृत् or परावृत् or विरम् (c. 10. -रमयति -यितुं), अधर्म्मात् निवर्त्तयित्वा धर्म्मे प्रवृत् in caus. or प्रयुज् in caus. or नियुज् in caus., पापाद् विप्रतिसृ in caus. (-सारयति -यितुं), विप्रतिसारं जन्.—(Make fit for cultivation) कृषियोग्यं -ग्यां कृ.

Reclaimable, *a.* (From vice) पापनिवर्त्तयितव्यः -व्या -व्यं, पापनिवर्त्तनीयः -या -यं, दुष्कर्म्मपरावर्त्तनीयः &c., कुकर्म्मनिवर्त्तनीयः, शक्यविप्रतिसारः -रा -रं, उपदेशग्राह्यः -ह्या -ह्यं.—(That may be taken again) प्रतिलभ्यः -भ्या -भ्यं, पुनर् लभ्यः &c. or ग्रहणीयः -या -यं.

RECLAIMED, *p. p.* (Taken again) पुनर् गृहीतः -ता -तं, पुनः प्राप्तः -प्ता -प्तं, प्रतिलब्धः -ब्धा -ब्धं, पुनर् लब्धः &c.—(From vice) पापनिवर्त्तितः -ता -तं, निवृत्तपापः -पा -पं, जातविप्रतिसारः -रा -रं.

RECLAMATION, *s.* (Taking again) पुनर्ग्रहणं, पुनर्लब्धिः *f.*, पुनरुपलब्धिः *f.*, प्रतिलब्धिः, पुनःप्राप्तिः *f.*, प्रत्युद्धरणं.—(From vice, &c.) पापनिवर्त्तनं, दुष्कर्म्मनिवर्त्तनं, दुष्कर्म्मपरावर्त्तनं.

To RECLINE, *v. n.* (Lean) अवलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, संश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि, निली (c. 4. -लीयते -लेतुं), अवलम्बनं कृ.—(Lie) शी (c. 2. शेते, शयितुं), अधिशी, संविश् (c. 6. -विशति -वेष्टुं), उपविश्, निषद् (c. 6. -षीदति -षत्तुं), पत् (c. 1. पतति -तितुं). *See To* LIE, *v. n.*

RECLINING, *part.* (Leaning) अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, संश्रितः -ता -तं, समाश्रितः &c., उपाश्रितः &c., निलीनः -ना -नं, निलीयमानः -ना -नं.—(Lying) शयानः -ना -नं, शयः -या -यं, शयितः -ता -तं, संविष्टः -ष्टा -ष्टं, उपविष्टः &c., निषण्णः -ण्णा -ण्णं, निषीदन् -दन्ती -दत् (त्), पतितः -ता -तं; 'on a bed,' शयने संविष्टः &c.

RECLUSE, *s.* विविक्तवासी *m.* (न्), विविक्तसेवी *m.*, एकान्तवासी *m.*, एकान्तसेवी *m.*, विजनवासी *m.*, एकाकी *m.*, अरण्यवासी *m.*, वनवासी *m.*, वनस्थः, वानप्रस्थः.

RECLUSENESS, *s.* विविक्तता, विविक्तवासित्वं, विविक्तसेवा, वानप्रस्थत्वं.

RECOGNITION, *s.* प्रत्यभिज्ञानं, प्रत्यभिज्ञा, अभिज्ञानं, अनुज्ञानं, स्वीकारः, स्वीकरणं, अङ्गीकारः, अङ्गीकरणं, स्मरणं, स्मृतिः *f.*, अनुस्मृतिः *f.*, संविज्ञिः *f.*

RECOGNIZANCE, *s.* प्रतिज्ञापत्रं -त्रकं, प्रतिभूः *m.*, प्रातिभाव्यं, दर्शनप्रतिभूः *m.*, दर्शनप्रातिभाव्यं, पारिभाव्यं, लग्नकः, प्रात्ययिकपत्रं -त्रकं, अङ्गीकारपत्रं.

To RECOGNIZE, *v. a.* (Recover the knowledge of, recollect) प्रत्यभिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), अभिज्ञा, समभिज्ञा, अनुज्ञा, अनुस्मृ (c. 1. -स्मरति -स्मर्त्तुं), प्रतिस्मृ, स्मृ, परिचि (c. 5. -चिनोति -चेतुं), निश्चि, प्रत्यभिज्ञानं कृ.—(Admit, acknowledge) स्वीकृ, अङ्गीकृ, अङ्गीकारं कृ, अनुग्रह्, ग्रह्.

RECOGNIZED, *p. p.* प्रत्यभिज्ञातः -ता -तं, अभिज्ञातः &c., अनुज्ञातः &c., अनुस्मृतः &c., परिचितः &c., अङ्गीकृतः &c., स्वीकृतः &c.—(Generally acknowledged) लोकसिद्धः -द्धा -द्धं, प्रसिद्धः &c.

To RECOIL, *v. n.* परापत् (c. 1. -पतति -तितुं), विवृत् (c. 1. -वर्त्तते -र्त्तितुं), परावृत्, अकस्मात् परावृत्, पश्चात् स्रु or पत् or गम्.

RECOIL, *s.* अकस्माद् विवर्त्तः -र्त्तनं or परावर्त्तः -र्त्तनं, परापतनं.

RECOILING, *part.* अकस्माद् विवर्त्तमानः -ना -नं or परापतन् -तन्ती -तत् (त्).

To RECOLLECT, *v. a.* स्मृ (c. 1. स्मरति, स्मर्त्तुं), अनुस्मृ, प्रतिस्मृ, संस्मृ, अनुसंस्मृ, अभिसंस्मृ, अनुचिन्त् (c. 10. -चिन्तयति -यितुं), समनुचिन्त्, अनुबुध् (c. 4. -बुध्यते -बोद्धुं), अनुध्यै (c. 1. -ध्यायति -ध्यातुं), उपध्यै.—(Recognise) प्रत्यभिज्ञा, अभिज्ञा.—(Try to recollect) स्मृ in des. (सुस्मूर्षते -र्षितुं); 'trying to recollect,' सुस्मूर्षमाणः -णा -णं.—(Recollect one's self) धैर्य्यं कृ, धैर्य्यावलम्बनं कृ.

RECOLLECTED, *p. p.* स्मृतः -ता -तं, अनुस्मृतः &c., अनुचिन्तितः &c., प्रत्यभिज्ञातः &c.

RECOLLECTION, *s.* स्मृतिः *f.*, स्मरणं, संस्मृतिः *f.*, संस्मरणं, अनुस्मृतिः *f.*, स्मरः, स्मर्त्तृत्वं, स्मरत्वं, अनुचिन्ता, अनुबोधः, आध्यानं, आध्या, ध्यानं, संस्कारः, चिन्ता; 'of a former birth,' जातिस्मरत्वं; 'proximate cause of recollection,' स्मृतिहेतुः *m.*

To RECOMMEND, *v. a.* (Commend to another's kind treatment by favourable representations) गुणवर्णनेन or यशोवर्णनेन अमुकजनम् आदरणीयमिति or अनुग्रहार्हमिति or सत्कारार्हमिति बुध् (c. 10. बोधयति -यितुं) or उद्दिश् (c. 6. -दिशति -देष्टुं), गुणप्रशंसापूर्व्वम् अमुकजनं सत्कारार्हम् इति बोधयित्वा परस्मिन् सम् in caus. (-अर्पयति -यितुं), सद्गुणशालित्वात् अमुकः सत्करणीय इति or अनुग्रहणीय इति ज्ञापयित्वा परस्मिन् सम्, गुणवर्णनेन परार्थम् अनुग्रहं प्रार्थ्.—(Commend, praise) प्रशंस् (c. 1. -शंसति -सितुं), अभिप्रशंस्, श्लाघ्, श्लाघ्, अनुकृत्, वर्ण्, गुणवर्णनं कृ.—(Advise) उपदिश्, आदिश्.—(Commit) सम् or न्यस् in caus., *see* COMMIT.

RECOMMENDATION, *s.* (Favourable mention) गुणप्रशंसा -सनं, गुणव्याख्या, गुणवर्णनं, गुणवादः, यशोवर्णनं, गुणकीर्त्तनं, गुणवर्णनेन परार्थम् अनुग्रहप्रार्थनं.—(Letter of recommendation) गुणवर्णनपत्रं, गुणव्याख्यापत्रं, गुणप्रशंसापत्रं, वर्णनपत्रं, यशोवर्णनपत्रं, प्रशंसापत्रं, साहित्यपत्रं.—(That which recommends) प्रसादकारणं, अनुग्रहकारणं, अनुरागकारणं, प्रसादहेतुः *m.*, कृपाकारणं, कृपाहेतुः *m.*—(Advice) उपदेशः, आदेशः, प्रेरणा.

RECOMMENDATORY, *a.* गुणप्रशंसकः -का -कं, गुणवर्णकः &c., गुणप्रकाशकः &c.

RECOMMENDED, *p. p.* प्रशंसितः -ता -तं, प्रशस्तः -स्ता -स्तं, श्लाघितः -ता -तं.

To RECOMPENSE, *v. a.* (Reward) परितुष् (c. 10. -तोषयति -यितुं), सन्तुष्, पारितोषिकं दा, सम्भू in caus.—(Make a return or requital) प्रतिफलं दा, निष्कृतिं दा, प्रतिदानं कृ, प्रतिकृतिं or प्रतिक्रियां कृ, शोधनं कृ, शुद्धिं कृ, परिशोधनं कृ, निस्तारं कृ, निष्कृ, प्रतिकृ, प्रत्युपकृ, अपाकृ, शुध् in caus.—(Make amends for a loss) क्षतिनिष्कृतिं कृ, हानिनिष्कृतिं कृ, क्षतिपूरणं कृ, हानिपूरणं कृ.

RECOMPENSE, *s.* (Reward) पारितोषिकं, फलं, परिफलं.—(Return, requital) प्रतिफलं, निष्कृतिः *f.*, प्रतिकृतिः *f.*, प्रतिक्रिया, प्रतीकारः, निस्तारः, निर्यातनं, शुद्धिः *f.*, शोधनं, परिशुद्धिः *f.*, परिशोधनं, अपाकरमोक्षः, प्रत्युपकारः, सुकृत.—(Amends for a loss) क्षतिपूरणं, हानिपूरणं, क्षतिनिष्कृतिः *f.*, हानिनिष्कृतिः *f.*, हानिमूल्यं.

RECOMPENSED, *p. p.* परितोषितः -ता -तं, सन्तोषितः &c., सम्भावितः &c., प्रतिफलितः &c., प्रतिकृतः &c., प्रत्युपकृतः &c., गृहीतफलः -ला -लं.

RECOMPENSING, *part.* पारितोषिकः -की -कं, तुष्टिकरः -रा -रं, निष्कारकः &c.

RECONCILABLE, *a.* सन्धेयः -या -यं, सन्धातव्यः -व्या -व्यं, समाधेयः -या -यं.

To RECONCILE, *v. a.* (Restore to friendship or union) सन्धा (c. 3. -दधाति -धत्ते -धातुं), समाधा, सन्धिं कृ, सन्धानं कृ, समाधानं कृ, समाधिं कृ, अन्योन्यवैरित्वं or अन्योन्यद्वेषं शम् (c. 10. शमयति -यितुं), वैरशान्तिं कृ, वैरशमनं कृ, विवादशान्तिं कृ, पुनःसख्यं कृ, पुनर्मैत्र्यं कृ, पुनःसौहृद्यं कृ, पुनःप्रीतिं कृ, पुनरैक्यं कृ, एकीकृ, मिल् in caus. (मेलयति -यितुं), सम्मिल्, सह मिल्, मेलनं कृ.—(Bring to acquiescence, content, or submission) सान्त्व् (c. 10. सान्त्वयति -यितुं), साम् (c. 10. सामयति -यितुं), अनुनी (c. 1. -नयति -नेतुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, परितुष्, सम्परितुष्, तुष्टिं नी.—(Make consistent) सदृशीकृ, सङ्गतं -तां कृ, सम्मतीकृ, एकवाक्यतां कृ, अनुवादित्वं कृ.

RECONCILED, *p. p.* सन्धितः -ता -तं, समाहितः -ता -तं, कृतसन्धिः -न्धिः -न्धि, शान्तवैरः -रा -रं, शान्तद्वेषः -षा -षं, शान्तविवादः -दा -दं, एकीकृतः -ता -तं; 'to be reconciled,' सन्धा (c. 3. -दधाति -धत्ते -धातुं or pass. -धीयते), सह मिल् (c. 6. मिलति, मेलितुं), पुनर्मैत्र्यं गम् or इ, पुनःसख्यं गम्, एकीभू, तुष्टिं गम् or इ, परितोषं गम्; 'to be reconciled to one's enemy,' शत्रुणा or शत्रुणा सह सन्धा; 'to one's brother,' भ्रात्रा सह मिल्.

Reconciler, *s.* सन्धाता *m.* (तृ), समाधाता *m.*, सन्धानकर्त्ता *m.* (र्त्तृ), सन्धिकृत् *m.*

Reconciliation, reconcilement, *s.* (The act) सन्धानं, समाधानं, सन्धानकरणं, सन्धिकरणं, वैरशमनं, मेलनं, सम्मेलनं, एकीकरणं, सान्त्वनं, साम *n.* (न्), शाम *n.*, शामनं.—(The state) सन्धिः *m.*, समाधिः *m.*, वैरशान्तिः *f.*, साम *n.* (न्), पुनःसख्यं, पुनर्मैत्र्यं, पुनर्मैत्री, पुनःप्रीतिः *f.*, पुनःस्नेहः, संवित्तिः *f.*, ऐक्यं, एकता.

Recondite, *a.* गूढः -ढा -ढं, निगूढः &c., निगूढार्थः -र्था -र्थं, गहनः -ना -नं, परमगहनः &c., गहनार्थः &c., गुप्तार्थः &c., गुह्यार्थः &c., गम्भीरार्थः &c., दुर्ज्ञेयः -या -यं, दुर्गम्यः -म्या -म्यं, अगम्यः &c., दुर्बोधः -धा -धं, दुरवबोधः &c., गम्भीरः -रा -रं, रहस्यः -स्या -स्यं.

To reconduct, *v. a.* पुनर् नी (c. 1. नयति, नेतुं), प्रतिनी, प्रत्यानी.

To reconnoitre, reconnoiter, *v. a.* कियद्दूरात् or नातिदूराद् अवेक्ष् (c. 1. -ईक्षते -क्षितुं) or निरीक्ष् or वीक्ष् or परीक्ष् or दृश् or अनुदृश् or आलोक् or अवलोक् or आलोच् or अनुसन्धा or निरूप्.

Reconnoitred, *p. p.* कियद्दूराद् अवेक्षितः -ता -तं or निरूपितः &c.

To reconquer, *v. a.* पुनर् जि or पराजि or विजि, पुनर् वशीकृ.

To reconsider, *v. a.* पुनर् विचर् or विगण् or चिन्त्, प्रतिचिन्त्, पुनर् निरूप् or अनुसन्धा or परीक्ष्, पुनर् वितर्क्, पुनर्विचारं कृ.

Reconsidered, *p. p.* पुनर्विचारितः -ता -तं, पुनर्निरूपितः &c., प्रतिचिन्तितः &c.

To record, *v. a.* पत्रे or लेख्ये or लेख्यपत्रे आरुह् in caus. (-रोपयति -यितुं) or समारुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्, लेख्यपत्रे समृ in caus. (-अर्पयति -यितुं) or न्यृ in caus. or निविश् (c. 10. -वेशयति -यितुं) or न्यस्, लेख्यारूढं -ढां कृ, पत्रारूढं -ढां कृ, पट्टारूढं -ढां कृ.

Record, *s.* लेख्यं, लेखः, लेख्यप्रसङ्गः, लेख्यपत्रं, लेखप्रमाणं, लेख्यप्रमाणं, लिखितं, लिखनं, पत्रं -त्री -त्रिका, पत्रकं, पटः, पट्टः, आगमः, आम्नायः, आख्यं.

Recorded, *p. p.* लेख्यारूढः -ढा -ढं, लेख्यारोपितः -ता -तं, लेख्यपत्रारूढः &c., लेख्यसमर्पितः -ता -तं, पट्टारूढः &c., पटारूढः &c., अभिलिखितः -ता -तं, लिखितः &c., पत्रलिखितः &c., आम्नातः &c.

Recorder, *s.* कायस्थः, लेखकः, लिपिकरः, लिपिकारः, अभिलेखकः, अभिलेखनकृत्.—(Officer) नगरव्यवहारदर्शी *m.* (न्), प्रधानविचारकः.

To recount, *v. a.* कथ् (c. 10. कथयति -यितुं), आख्या (c. 2. -ख्याति -तुं or caus. ख्यापयति -यितुं), ख्या, श्रु (c. 10. श्रावयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं), आचक्ष्, निविद् in caus.

Recounted, *p. p.* कथितः -ता -तं, आख्यातः &c., समाख्यातः &c., निवेदितः &c.

Recourse, *s.* आश्रयः -यणं, समाश्रयः -यणं, उपाश्रयः -यणं, संश्रयः -यणं, आशयः, अवलम्बनं, उपस्थितिः *f.*, उपगमनं, प्रत्यागमनं; 'to have recourse,' आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, उपाश्रि, समुपाश्रि, संश्रि, अभिश्रि, अवलम्ब् (c. 1. -लम्बते -म्बितुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), आस्था, उपगम्; 'having recourse,' आश्रित्य, आश्रितः -ता -तं, आस्थाय, उपस्थाय.

To recover, *v. a.* (Regain) प्रतिलभ् (c. 1. -लभते -लब्धुं), प्रत्युपलभ्, पुनर् लभ्, पुनर् उपलभ्, अनुप्राप् (c. 5. -आप्नोति -आप्तुं), प्रत्यवाप्, पुनः प्राप्, पुनर् अवाप्, प्रत्यादा (c. 3. -ददाति -दत्ते -दातुं), पुनर् आदा, पुनर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रतिग्रह्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), पुनर् आपद्, प्रत्याहृ (c. 1. -हरति -ते -हर्त्तुं), प्रत्युद्धृ, उद्धृ; 'to recover one's consciousness,' संज्ञां लभ्, चैतन्यं लभ्, स्वप्रकृतिम् आपद् or प्रतिपद्; 'one who has done so,' लब्धसंज्ञः, स्वप्रकृतिमापन्नः; 'to recover recollection,' स्मृतिं लभ्.—(Restore from sickness, &c.) स्वस्थं -स्थां कृ, रोगं शम् in caus., रोगाद् विमुच् or मुच्, रोगं निवृत् in caus., रोगं नश् in caus. or निरस्, समुत्था in caus., प्रतिकृ, समाधा, प्रतिसमाधा, *see To* cure.

To recover, *v. n.* (Regain health, be restored from sickness) रोगात् समुत्था (c. 1. -तिष्ठति -थातुं, rt. स्था) or उत्था or मुच् in pass. (मुच्यते) or विमुच्, रोगमुक्तः -क्ता -क्तं भू, शान्तरोगः -गा -गं भू, निवृत्तरोगः &c. भू, पुनः स्वस्थः -स्था -स्थं भू, पुनः सुस्थः -स्था -स्थं भू, पुनर् निरामयः -या -यं भू, पुनर् आरोग्यं or स्वास्थ्यं गम् or इ.—(From loss of consciousness or fainting) प्रत्याश्वस् (c. 2. -श्वसिति -तुं), संज्ञां लभ् (c. 1. लभते, लब्धुं), चैतन्यं लभ्, चेतनां प्राप्, स्वप्रकृतिम् आपद् (c. 4. -पद्यते -पत्तुं) or प्रतिपद्, प्रकृतिमापन्नः -न्ना -न्नं भू.—(Regain one's former state, come right) पूर्व्ववद् भू, यथास्थितः -ता -तं भू, स्वस्थः -स्था -स्थं भू, पूर्व्वावस्थां or पूर्व्वस्थितिं or पूर्व्ववृत्तिम् आपद् or प्रतिपद् or गम्.

Recoverable *a.* प्रतिलभ्यः -भ्या -भ्यं, पुनर्लभ्यः &c., पुनःप्राप्यः -प्या -प्यं.

Recovered, *p. p.* (Regained) प्रतिलब्धः -ब्धा -ब्धं, प्रत्युपलब्धः &c., पुनर्लब्धः &c., पुनरुपलब्धः &c., पुनः प्राप्तः -प्ता -प्तं, अनुप्राप्तः &c., पुनरवाप्तः &c., प्रत्यवाप्तः &c., पुनर्गृहीतः -ता -तं, प्रत्युद्धृतः &c., प्रत्याहृतः &c., आपन्नः -न्ना -न्नं, प्रतिपन्नः &c., प्रतिकृतः &c.—(From sickness) रोगसमुत्थितः -ता -तं, समुत्थितः &c., रोगोत्थितः &c., रोगमुक्तः -क्ता -क्तं, मुक्तरोगः -गा -गं, निवृत्तरोगः &c., गतरोगः &c., विगतरोगः &c., नष्टरोगः &c., निरस्तरोगः &c., शान्तरोगः &c., स्वस्थः -स्था -स्थं, निरामयः -या -यं; 'from a fever,' गतज्वरः -रा -रं, ज्वरमुक्तः &c.—(From unconsciousness or fainting) लब्धसंज्ञः -ज्ञा -ज्ञं, लब्धचैतन्यः -न्या -न्यं, लब्धचेताः -ताः -तः (स्), स्वप्रकृतिमापन्नः -न्ना -न्नं.—(One who has recovered his recollection) लब्धस्मृतिः -तिः -ति.

Recovery, *s.* (Regaining) पुनर्लब्धिः *f.*, पुनर्लाभः, पुनरुपलब्धिः *f.*, प्रत्युपलब्धिः *f.*, प्रतिलब्धिः *f.*, प्रतिलम्भः, पुनःप्राप्तिः *f.*, पुनःप्रापणं, पुनरवाप्तिः *f.*, प्रत्यवाप्तिः *f.*, अनुप्राप्तिः *f.*, अवाप्तिः *f.*, पुनरादानं, पुनर्ग्रहणं, प्रतिग्रहणं, प्रत्युद्धरणं, प्रत्युद्धारः, अवहारः, प्रत्यानयनं, आनयनं, प्रतीकारः.—(From sickness) रोगसमुत्थानं, समुत्थानं, रोगोत्थानं, रोगमुक्तिः *f.*, रोगमुक्तता, रोगनिवृत्तिः *f.*, स्वास्थ्यं, स्वस्थता, आरोग्यं, निरामयता -त्वं, निरामयं, कल्यता -त्वं.

Recreant, *a.* (Cowardly) कातरः -रा -रं, क्लीवः -वा -वं, भीरुः -रुः -रु.—(Apostate) धर्म्मभ्रष्टः -ष्टा -ष्टं, सङ्कल्पभ्रष्टः &c., त्यक्तसङ्कल्पः -ल्पा -ल्पं, उल्लङ्घितधर्म्मः -र्म्मा -र्म्मं.

To recreate, *v. a.* (Divert, gratify) विनुद् (c. 10. -नोदयति -यितुं), आनन्द् in caus., रम् in caus., सुख्, सन्तुष्, परितुष्, प्री, तृप्, ह्लाद्, सुखं कृ, प्रीतिं दा.—(Refresh) आश्वस् (c. 10. -श्वासयति -यितुं), प्रत्याश्वस्, समाश्वस्, सुख् (c. 10. सुखयति -यितुं).

Recreated, *p. p.* विनोदितः -ता -तं, आश्वासितः &c., परितोषितः -ता -तं.

Recreation, *s.* विनोदः -दनं, विश्रामः, विश्रान्तिः *f.*, विहारः, विहरणं, क्रीडा, मनोविनोदः, मनोरञ्जनं, विलासः, खेला, रमणं, कौतुकं; 'to take recreation,' विहृ (c. 1. -हरति -हर्त्तुं), मनो विनुद् (c. 10. -नोदयति -यितुं), रम्, क्रीड्, विश्रम्.

Recreative, *a.* विनोदकः -का -कं, मनोरञ्जकः &c. *See* Refreshing, *a.*

To recriminate, *s.* प्रत्यभियोगं कृ, प्रत्यपवादं कृ, प्रत्यारोपं कृ, प्रत्यारोपणं कृ; 'to criminate and recriminate,' अभियोगप्रत्यभियोगं कृ, वादानुवादं कृ.

RECRIMINATION, *s.* प्रत्यभियोगः, प्रत्यपवादः, प्रत्यारोपः -पणं ; 'crimination and recrimination,' अभियोगप्रत्यभियोगौ *m. du.*, अन्योन्यदोषारोपः -पणं, परस्परदोषारोपः, वादानुवादः.

RECRIMINATORY, RECRIMINATIVE, *a.* प्रत्यारोपकः -का -कं, प्रत्यपवादकः &c., प्रत्यभियोगी -गिनी -गि (न्), प्रत्यारोपकारी &c.

To RECRUIT, *v. a.* (R[illegible]) प्रतिकृ, प्रतिसंकृ, स्वस्थं -स्थां कृ, सुस्थं -स्थां कृ, सुस्थ (nom. सुस्थयति -यितुं), पूर्ववत् -वतीं -वत् कृ, समाधा, प्रतिसमाधा.—(Restore exhausted strength) क्षीणबलं वृध् (c. 10. वर्धयति -यितुं), क्षीणसत्त्वं वृध्, तेजो or सत्त्वं वृध्, आप्यस् in caus., आप्यै in caus.—(Supply with new soldiers) नवसैन्ययुक्तं -क्तां कृ.

To RECRUIT, *v. n.* (Recover energy or strength) बलं or सत्त्वं लभ् (c. 1. लभते, लब्धुं), स्वसत्त्वं लभ् or प्राप्, स्वतेजो लभ्, स्ववीर्यं प्राप्, स्वप्रकृतिं लभ्, पुनः स्वास्थ्यं गम् or इ, पुनः स्वस्थः -स्था -स्थं भू, पुनः सुस्थः &c. भू.—(Raise new soldiers) नवसैन्यसंग्रहं कृ, नूतनसैन्यसंग्रहं कृ, बलाधिक्यं कृ.

RECRUIT, *s.* नवसैन्यः, नूतनसैन्यः, नवसैनिकः, नवीनसैन्यः, शस्त्राभ्यासी *m.* (न्), अस्त्रशिक्षाकारी *m.*, नूतनाभ्यासी *m.*, नवाभ्यासी *m.*

RECRUITED, *p. p.* (In strength) लब्धबलः -ला -लं, लब्धसत्त्वः -त्त्वा -त्त्वं, प्राप्तबलः &c., वर्धितबलः &c., पुनः स्वस्थभूतः -ता -तं, आप्यायितः &c., प्रत्याश्वस्तः -स्ता -स्तं.—(As an army) नवसैन्ययुक्तः -क्ता -क्तं, नूतनसैन्ययुक्तः &c.

RECTANGLE, *s.* समकोणाकृतिः *f.*, समकोणः, समास्रं, आयतसमकोणः, आयतसमास्रं, आयतसमलम्बः, समचतुष्कोणः, समचतुरस्रं, समकोणमूर्त्तिः *f.*, जात्यः.

RECTANGULAR, *a.* समचतुष्कोणः -णा -णं, समचतुरस्रः -स्रा -स्रं, समकोणः -णा -णं, समकोणाकृतिः -तिः -ति, जात्यः -त्या -त्यं.

RECTIFIABLE, *a.* शोधनीयः -या -यं, संशोधनीयः &c., शोध्यः -ध्या -ध्यं.

RECTIFICATION, *s.* शोधनं, संशोधनं, शुद्धिः *f.*, विशुद्धिः *f.*, प्रतिसमाधानं.

RECTIFIED, *p. p.* शोधितः -ता -तं, विशोधितः &c., प्रतिसमाहितः &c.

To RECTIFY, *v. a.* शुध् (c. 10. शोधयति -यितुं), विशुध्, संशुध्, शुद्धीकृ, समाधा (c. 3. -दधाति -धत्ते -धातुं), प्रतिसमाधा, शोधनं कृ, यथार्थं -र्थां कृ, तथ्यं -थ्यां कृ, समञ्जसं -सां कृ, सम्यक् कृ.

RECTILINEAR, RECTILINEAL, *a.* सरलरेखः -खा -खं, सरलरेखाविशिष्टः -ष्टा -ष्टं, सरलरेखामयः -यी -यं.

RECTITUDE, *s.* सारल्यं, सरलता -त्वं, ऋजुता, आर्जवं, मर्य्यादा, अवक्रता, अजिह्मता, शुद्धता, शुचिता, मतिशुद्धता, साधुता, दाक्षिण्यं, सत्यशीलता, विमलता, न्यायिता, अशठता, सच्चरितं, संस्था, स्थितिः *f.*, अवस्थितिः *f.*, सम्यग्वृत्तित्वं, अव्यभिचारः, यथोचितं, याथातथ्यं ; 'law of rectitude,' नीतिः *f.* ; 'path of rectitude,' सत्पथः, सन्मार्गः ; 'deviation from the path of rectitude,' सत्पथभ्रंशः, सत्पथत्यागः, सन्मार्गभ्रंशः, विमार्गगमनं, उन्मार्गगमनं, उत्पथगमनं, कुपथगमनं, यथोचिताद्भ्रंशः, मर्य्यादात्यागः, मर्य्यादालंघनं.

RECTOR, *s.* ग्रामपुरोहितः, ग्रामगुरुः *m.*, ग्रामाचार्य्यः, ग्रामधर्म्माध्यक्षः.

RECTORY, *s.* ग्रामपुरोहितवसतिः *f.*, ग्रामाचार्य्यगृहं, ग्रामगुरुनिकेतनं.

RECTUM, *s.* अधःस्थो मलाशयः, जघन्यस्थो मलाशयः, पश्चिमनाडी.

RECUMBENCE, RECUMBENCY, *s.* शयनं, पतनं, कुक्षिशयनं, कुक्षिशय्या.

RECUMBENT, *a.* शयानः -ना -नं, शयः -या -यं, शायी -यिनी -यि (न्), शयितः -ता -तं, कुक्षिशयः -या -यं, कुक्षिशायी &c., संविष्टः -ष्टा -ष्टं. *See* RECLINING, LYING DOWN.

To RECUR, *v. n.* (Happen again) पुनर् उपस्था (c. 1. -तिष्ठति -स्थातुं), पुनः सम्भू, पुनः संवृत् or वृत्, पुनर् आगम् or उपागम्, पुनः सम्पद्, पुनर् आपत् or निपत्, पुनर् घट् ; 'from time to time,' वारं वारं or पुनः पुनर् or अनुवारम् उपस्था.—(To the mind or thought) स्फुर् (c. 6. स्फुरति -रितुं), मनसि स्फुर्, पुनः स्मृ, पुनःस्मृतः -ता -तं भू.

RECURRENCE, RECURRENCY, *s.* पुनरुपस्थितिः *f.*, पुनरुपस्थानं, पुनरागमनं, पुनर्वर्त्तनं, पुनरुपागमः, पुनःसम्भवः, पुनःसम्भूतिः *f.*, पुनरुत्पत्तिः *f.*, पुनर्घटना.—(To the mind) स्मरणं, स्मृतिः *f.*, पुनःस्मरणं, स्फुरणं.

RECURRENT, RECURRING, *a.* अनुवारमागामी -मिनी -मि (न्), वारं वारम् उपस्थायी &c., पुनःपुनरागामी &c., पुनःपुनर्वर्त्ती &c.

RECUSANT, RECUSANCY, *s.* *See* NON-CONFORMIST, NON-CONFORMITY.

RED, *a.* रक्तः -क्ता -क्तं, लोहितः -ता -हिनी -तं, रक्तवर्णः -र्णा -र्णं, लोहितवर्णः &c., रोहितः -ता -हिणी -तं, शोणितः -ता -तं, शोणः -णा -णी -णं, सिन्दूरवर्णः &c., कषायः -या -यं, मञ्जिष्ठः -ष्ठी -ष्ठं ; 'dark red,' अरुणः -णा -णं, घनारुणः &c. ; 'pale red,' श्वेतरक्तः -क्ता -क्तं, पाटलः -ला -लं.

RED, *s.* रक्तः, लोहितः, रोहितः, शोणितः, रक्तवर्णः, अरुणः.

To REDDEN, *v. a.* रक्तीकृ, लोहितीकृ, अरुणीकृ, शोणितीकृ, रक्तवर्णीकृ.

To REDDEN, *v. n.* अरुणीभू, रक्तीभू, लोहित (nom. लोहितायति -ते), लोहितीभू.

REDDENED, *p. p.* रक्तीकृतः -ता -तं, अरुणीकृतः &c., अरुणितः &c., लोहितीकृतः -ता -तं, पाटलितः &c., पाटलीकृतः &c., सिन्दूरितः &c.

REDDISH, *a.* ईषद्रक्तः -क्ता -क्तं, आरक्तः &c., आलोहितः -ता -तं.

REDDISHNESS, *s.* ईषद्रक्तता, आरक्तता, आलोहितता, ईषल्लोहितता.

To REDEEM, *v. a.* (Ransom, purchase back) परिक्री (c. 9. -क्रीणीते -क्रेतुं), परिक्रयं कृ, परिक्रयणं कृ, अवहृ, अवहरणं कृ.—(Save, deliver) त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), परिमुच्, उद्धृ (c. 1. -हरति -हर्तुं), समुद्धृ, मोक्ष् (c. 10. मोक्षयति -यितुं), निस्तॄ (c. 10. -तारयति -यितुं), सन्तॄ, उत्तॄ, तॄ, उद्धारं कृ.—(Compensate, make amends for) निष्कृतिं कृ, हानिनिष्कृतिं कृ, क्षतिनिष्कृतिं कृ, हानिपूरणं कृ.

REDEEMABLE, *a.* परिक्रेयः -या -यं, परिक्रेतव्यः -व्या -व्यं, अवहार्य्यः -र्य्या -र्य्यं.

REDEEMED, *p. p.* परिक्रीतः -ता -तं, त्रातः &c., परित्रातः &c., मुक्तः -क्ता -क्तं, परिमुक्तः &c., उद्धृतः -ता -तं, निस्तारितः &c.

REDEEMER, *s.* (Ransomer) परिक्रेता *m.* (तृ), परिक्रयकृत्.—(Saviour) त्राता *m.* (तृ), उद्धर्त्ता *m.*, समुद्धर्त्ता *m.*, उद्धारकः, मोचकः, परिमोचकः, निस्तारकः, तारकः ; 'of the world,' जगत्त्राता *m.*, जगदुद्धारकः.

RE-DELIVERY, *s.* प्रत्यर्पणं, प्रतिसमर्पणं, पुनःसमर्पणं, अवहारः.

REDEMPTION, *s.* (Ransom) परिक्रयः -यणं, अवहरणं.—(Rescue, salvation) त्राणं, परित्राणं, उद्धारः, समुद्धारः, उद्धरणं, मुक्तिः *f.*, मोक्षः -क्षणं, परिमोक्षणं, परिमुक्तिः *f.*, निस्तारः, निस्तरणं, तारणं, निष्कृतिः *f.*

RED-HAIRED, *a.* रक्तकेशः -शा -शं, रक्तकेशी -शिनी -शि (न्).

RED-HOT, *a.* अग्निवर्णः -र्णा -र्णं, तापरक्तः -क्ता -क्तं, तप्तः -प्ता -प्तं, उपतप्तः &c., सन्तप्तः &c., अभितप्तः &c., रक्ततप्तः &c., उष्णरक्तः -क्ता -क्तं.

RED-LEAD, *s.* सिन्दूरं -रिका, रक्तचूर्णं. *See* MINIUM.

RED-LEGGED, *a.* रक्तपादः -दा -दं, लोहितपादः &c., रक्तजंघः -घा -घं.

REDNESS, *s.* रक्तत्वं -ता, रक्तिमा *m.* (न्), लौहित्यं, लोहितत्वं -ता, अरुणिमा *m.* (न्), शोणिमा *m.* (न्), शोणितत्वं -ता.

REDOLENCE, REDOLENCY, *s.* सुगन्धः, आमोदः, सुवासः. *See* FRAGRANCE.

REDOLENT, *a.* सुरभिः -भिः -भि, सुगन्धिकः -का -कं, सुगन्धिः -न्धिः -न्धि, सुवासिकः -की -कं, परिमलयुक्तः -क्ता -क्तं, तिक्तः &c. *See* FRAGRANT.

To REDOUBLE, *v. a.* (Repeat often) पुनःपुनः कृ, मुहुर्मुहुः कृ, असकृत् कृ, अभीक्ष्णं कृ.—(Increase by repeated efforts) अनेकयत्नान्

कृत्वा or पुनःपुनर् यत्नं कृत्वा वृध् (c. 10. वर्धयति -यितुं) or प्रवृध् or अधिकीकृ or अधिकतरीकृ or अधिकतरं -रां कृ; 'to redouble one's efforts,' पुनः पुनर् यत्नं कृ, मुहुर्मुहुर् उद्योगं कृ.

REDOUBLED, *p. p.* पुनःपुनः कृतः -ता -तं, मुहुर्मुहुः कृतः &c., असकृत्कृतः &c., पौनःपुनिकः -की -कं, वर्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, अधिकीकृतः &c.

REDOUBT, *s.* दुर्गबहिःस्थितं प्राकारप्राचीरादि, दुर्गप्राकारः, प्राचीरं.

REDOUBTABLE, *a.* भीमः -मा -मं, महावीर्य्यः -र्य्या -र्य्यं, महाप्रतापः -पा -पं.

To REDOUND, *v. n.* (Conduce, bring about) नी (c. 1. नयति, नेतुं), आनी, आवह् (c. 1. -वहति -वोढुं), साध् (c. 10. साधयति -यितुं), सम्पद् (c. 10. -पादयति -यितुं), जन् (c. 10. जनयति -यितुं), संजन्.—(Result) अवसो (c. 4. -स्यति -सातुं), पर्य्यवसो, परिणामः -मा -मं भू in comp., सपरिणामः -मा -मं भू.

To REDRESS, *v. a.* प्रतिकृ, समाधा (c. 3. -दधाति -धातुं), प्रतिसमाधा, सन्धा, साध् (c. 10. साधयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), उपायं कॢप् (c. 10. कल्पयति -यितुं), प्रतिसमाधानं कृ, प्रतीकारं कृ, उद्धारं कृ, दुःखाद् or क्लेशाद् मुच्, क्लेशमुक्तिं कृ.

REDRESS, *s.* प्रतिकारः, प्रतीकारः, प्रतिक्रिया, समाधानं, प्रतिसमाधानं, उपायः, उद्धारः, उद्धरणं, परिच्छेदः, क्लेशमुक्तिः *f.*, दुःखमुक्तिः *f.*

REDRESSED, *p. p.* प्रतिकृतः -ता -तं, समाहितः &c., परिच्छिन्नः -न्ना -न्नं.

To REDUCE, *v. a.* (Bring to a former state) पूर्व्ववत् कृ, पूर्व्वावस्थां or पूर्व्वस्थितिं नी (c. 1. नयति, नेतुं) or आनी or गम् in caus.—(Bring to any state) नी, आनी, गम् in caus. (गमयति -यितुं), कृ in comp.; 'to reduce to proverty,' दारिद्र्यं गम्, दरिद्रीकृ; 'to subjection,' वशीकृ; 'to one's own power,' स्ववशीकृ, आत्मसात्कृ; 'to ashes,' भस्मसात्कृ, भस्मीकृ; 'to a heap of ashes,' भस्मराशीकृ; 'to nothing,' निष्किञ्चनीकृ. Or expressed by आपन्न or सम्पन्न in comp.; as, 'to reduce to poverty,' दारिद्र्यापन्नं -न्नां कृ.—(Diminish, lower) न्यूनीकृ, अल्पीकृ, लघूकृ, ऊनीकृ, न्यून् (c. 10. न्यूनयति -यितुं), ऊन्, ह्रस् (c. 10. ह्रासयति -यितुं), लघ (nom. लघयति -यितुं), कन् (c. 10. कनयति -यितुं), शिथिलीकृ; 'to reduce one's strength,' बलं or वीर्य्यं शिथिलीकृ.—(Make thin) कृशीकृ, क्षीणीकृ, मांसक्षयं कृ, क्षि in caus. (क्षपयति -यितुं), शुष्कीकृ.—(Subdue) वशीकृ, पराजि, विजि, जि, खण्ड्.—(In arithmetic) रूपान्तरं कृ, रूपं दा or कृ.—(Reduce to order), *see To* METHODIZE, ARRANGE.

REDUCED, *p. p.* (Brought to a former state) पूर्व्ववत्कृतः -ता -तं, पूर्व्ववदृतः &c., पूर्व्वावस्थाङ्गतः &c., पूर्व्वदशाङ्गमितः &c., पूर्व्वस्थितिङ्गतः &c.—(Brought to any state) गमितः -ता -तं, परिगमितः &c., गतः -ता -तं, कृतः &c. in comp. भूतः &c. in comp.; 'reduced to poverty,' दारिद्र्यगतः -ता -तं, दारिद्र्यङ्गतः &c., दरिद्रीकृतः &c., दरिद्रीभूतः &c., गतधनः -ना -नं, गतविभवः -वा -वं, प्रचलितविभवः &c., शिथिलवसुः -सुः -सु, *see* POVERTY; 'reduced to misery,' कृच्छ्रगतः -ता -तं, कृच्छ्रङ्गमितः &c.; 'reduced to ashes,' भस्मीकृतः &c., भस्मीभूतः &c., भस्मसात्कृतः &c.; 'to powder,' चूर्णीकृतः &c.; 'to nothing,' निष्किञ्चनः -ना -नं.—(Brought into subjection) वशीकृतः -ता -तं, वशीभूतः &c.—(Diminished, lowered) न्यूनीकृतः -ता -तं, न्यूनीभूतः &c., अल्पीकृतः &c., लघूकृतः &c., शिथिलीकृतः &c., शिथिलितः &c.; 'in strength of body,' शिथिलबलः -ला -लं, क्षीणबलः &c., विकलबलः &c., क्षीणः &c., कृशः -शा -शं.

REDUCIBLE, *a.* आनेयः -या -यं, आनेतव्यः -व्या -व्यं, करणीय in comp.; as, 'reducible to a former state,' पूर्व्ववत्करणीयः &c.; 'to ashes,' भस्मसात्करणीयः &c., भस्मीकरणीयः &c.

REDUCTION, *s.* (Bringing to any state) करणं in comp.; as, 'reduction to ashes,' भस्मीकरणं; 'to powder,' चूर्णीकरणं.—(Diminution, impairment) न्यूनीकरणं, न्यूनता -त्वं, अल्पीकरणं, लघूकरणं, ऊनीकरणं, ह्रासः, वैकल्यं, विकलीकरणं, शिथिलीकरणं, शैथिल्यं.—(Subjugation) वशीकरणं, [illegible], खण्डनं.—(In arithmetic) रूपान्तरं, रूपान्तरकरणं.

REDUNDANCE, REDUNDANCY, *s.* आधिक्यं, अधिकता -त्वं, अतिरेकः, उद्रेकः, आतिरेक्यं, अतिरिक्तता, आतिशय्यं, उत्सेकः, उद्वर्त्तः, गाढता. *See* EXCESS, EXUBERANCE.

REDUNDANT, *a.* अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., समतिरिक्तः &c., अतिशय in comp., अतिशयितः -ता -तं, अतिशयी -यिनी &c., अतिशायनः -ना -नं, अत्यनः -ना -नं, व्यर्थः -र्था -र्थं, उत्सिक्तः &c., उद्वर्त्तः -र्त्ता -र्त्तं, गाढः -ढा -ढं. *See* EXCESSIVE, EXUBERANT.

REDUNDANTLY, *adv.* अतिरिक्तं, उद्रिक्तं, अतिशयेन, सातिशयं, व्यर्थं.

To REDUPLICATE, *v. a.* (Double) द्विगुणीकृ.—(A syllable or letter) आम्रेड् (c. 10. -म्रेडयति -यितुं), अक्षराम्रेडनं कृ, अक्षराभ्यासं कृ, अक्षरद्वित्वं कृ, द्विरुक्तिं कृ.

REDUPLICATED, *p. p.* आम्रेडितः -ता -तं, अभ्यस्तः -स्ता -स्तं, द्विरुक्तः -क्ता -क्तं.

To SCAMPER, *v. n.* सत्वरं or त्वरितं धाव् (c. 1. धावति -वितुं) or द्रु or चल्.

To SCAN, *v. a.* (Scrutinize) सूक्ष्मं निरीक्ष् or परीक्ष् or वीक्ष्, सूक्ष्मं दृश् or निरूप्, सूक्ष्मं ज्ञा in des.—(Count the feet of verse) छन्दोमात्रां गण् (c. 10. गणयति -यितुं), छन्दोमात्रागणनं कृ.

SCANDAL, *s.* (Reproachful aspersion or calumny) अपवादः, परिवादः, पिशुनवाक्यं, पिशुनवचनं, पिशुनकथा, पैशुन्यं, असूया, अभ्यसूया, असूयककथा, अभ्यसूयककथा, विगर्हणकथा, विगानं, वाग्दोषः.—(Gossiping rumor) जनरवः, लोकप्रवादः, लोकरवः, लोकवादः.—(Cause of reproach, disgrace) कलङ्कः, कलङ्ककारणं, अकीर्त्तिकारणं, अपमानकारणं, अपमानहेतुः *m.*, वचनीयता.—(Cause of stumbling, impediment) स्खलनहेतुः *m.*, स्खलितकारणं, बाधा, विघ्नः, व्याघातः.

To SCANDALIZE, *v. a.* बीभत्सं or अरुचिं or असन्तोषं जन् or कृ, वैकृत्यं जन्, गर्हां जन्, कुत्सां जन्, व्यथ् (c. 10. व्यथयति -यितुं), व्यथां जन् or कृ, क्लेशं दा, बाधां कृ, बाध्, विप्रियं कृ, व्यलीकं कृ.

SCANDALIZED, *p. p.* जातबीभत्सः -त्सा -त्सं, जातबाधः -धा -धं, व्यथितः &c.

SCANDALOUS, *a.* (Disgraceful) कलङ्ककरः -री -रं, अकीर्त्तिकरः &c., कुकीर्त्तिकरः &c., कुख्यातिजनकः &c., लज्जाकरः &c., गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, गर्हितः -ता -तं, अपयशस्करः &c., अपयशोजनकः &c., यशोनाशकः &c., यशोघ्नः -घ्नी -घ्नं, अपमानजनकः &c.—(Offensive, causing disgust, &c.) बीभत्सजनकः -का -कं, बीभत्सकरः -री -रं, घृणोत्पादकः &c., कुत्सितः -ता -तं.—(Defamatory) अपवादकः -का -कं, असूयकः &c., असूकः &c., अभ्यसूयकः &c.

SCANDALOUSLY, *adv.* गर्हणीयं, गर्ह्यं, कुत्सितं, गर्ह्यप्रकारेण, कुत्सितप्रकारेण, यथा बीभत्सो जायते तथाप्रकारेण.

SCANDALOUSNESS, *s.* गर्ह्यता, गर्हणीयता, बीभत्सजनकता, घृणाजनकता.

SCANNED, *p. p.* सूक्ष्मं निरूपितः -ता -तं or निरीक्षितः &c. or परीक्षितः &c.

SCANSION, *s.* छन्दोमात्रागणनं, श्लोकमात्रागणनं, छन्दोमात्रापरीक्षा.

SCANT, *To* SCANT, *see* SCANTY, *To* STINT, LIMIT.

SCANTILY, *adv.* अविस्तीर्णं, अविस्तारेण, अबाहुल्येन, अविपुलं, अप्रचुरं, अप्राचुर्येण, अपर्याप्तं, विकलं, अबहु, अल्पमात्रं, स्वल्पं.

SCANTINESS, *s.* अविस्तीर्णता, अविस्तृतिः *f.*, अबाहुल्यं, अविपुलता, अवैपुल्यं, अप्रचुरता, अप्राचुर्यं, अबहुत्वं, अल्पता, स्वल्पता, क्षुद्रता, अपृथुता, असाधकता, न्यूनता.

SCANTY, *a.* (Narrow) अविस्तीर्णः -र्णा -र्णं, अविस्तृतः -ता -तं, सङ्कटः -टा -टं, सम्बाध in comp., अपृथुः &c., तनुः &c.—(Small, not full) अल्पः -ल्पा -ल्पं, स्वल्पः &c., क्षुद्रः -द्रा -द्रं, अविपुलः -ला -लं, अबहुलः &c., अप्रचुरः -रा -रं, असम्पूर्णः -र्णा -र्णं, विकलः -ला -लं, न्यूनः -ना -नं, अपर्याप्तः -प्ता -प्तं, लुप्तः -प्ता -प्तं.—(Niggardly) कृपणः -णा -णं.

SCAPULA, *s.* स्कन्धः, भुजशिरस् *n.*, अंसः, [illegible], बाहुमूलं, फलकः.

SCAPULAR, *a.* स्कन्धसम्बन्धी -न्धिनी -न्धि (न्), स्कन्धविषयकः -का -कं.

SCAR, *s.* (Mark of a wound) क्षतचिह्नं, व्रणचिह्नं, व्रणः -णं, शुष्कव्रणं, शुष्कक्षतं, क्षतं, किणः -णं, क्षारी, क्षताङ्कः, व्रणाङ्कः.—(Any mark) चिह्नं, अङ्कः.

To SCAR, *v. a.* क्षतेन or व्रणेन चिह्न् (c. 10. चिह्नयति -यितुं), क्षतचिह्नितं -तां कृ.

SCARAMOUCH, *s.* भण्डः, वैहासिकः. *See* BUFFOON.

SCARCE, *a.* (Rare) विरलः -ला -लं, विरलागतः -ता -तं, दुर्लभः -भा -भं, दुर्लभ्यः -भ्या -भ्यं, दुष्प्रापः -पा -पं, दुष्प्राप्यः -प्या -प्यं, अप्राप्यः &c., असाधारणः -णा -णी -णं, *see* RARE.—(Small in quantity, deficient) अबहुलः -ला -लं, अप्रचुरः -रा -रं, अपुष्कलः -ला -लं, अविपुलः &c., अल्पः -ल्पा -ल्पं, स्वल्पः &c.

SCARCELY, SCARCE, *adv.* कष्टेन, कृच्छ्रेण, सकृच्छ्रं, दुःखेन, सदुःखं, कष्टं, सकष्टं, आयासेन, कठिनं, काठिन्येन, सकाठिन्यं, दुर् or दुःख prefixed; 'scarcely to be found,' दुर्लभ्यः &c., दुःखप्राप्यः &c.

SCARCITY, SCARCENESS, *s.* (Rareness) विरलता -त्वं, वैरल्यं, दुर्लभता, दौर्लभ्यं, दुर्लभ्यता, दुष्प्रापत्वं, दुष्प्राप्यता, अप्रसिद्धता, असाधारणता, असाधारण्यं, क्वाचित्कता.—(Smallness of quantity, deficiency) अबाहुल्यं, अबहुत्वं, अप्राचुर्यं, अप्रचुरता, अपुष्कलता, अविपुलता, अल्पता -त्वं, स्वल्पता, न्यूनता.—(Time of scarcity) दुर्भिक्षं, दुष्कालः, अनाकालं, प्रयामः, नीवाकः, महार्घता.

To SCARE, *v. a.* त्रस् (c. 10. त्रासयति -यितुं), संत्रस्, वित्रस्, भी in caus. (भाययति -यितुं, भीषयति -यितुं), उद्विज् (c. 10. -वेजयति -यितुं), त्रासं कृ, भयहेतुदर्शनेन विद्रु (c. 10. -द्रावयति -यितुं), भयप्रदर्शनेन द्रु.

SCARE-CROW, *s.* काकत्रासकमूर्त्तिः *f.*, काकादित्रासकवस्तु *n.*, काकादित्रासनार्थं क्षेत्रस्थापितं भयानकवस्तु or भयङ्करवस्तु *n.*, पक्षित्रासकमूर्त्तिः *f.*, भयहेतुः *m.*, भयप्रदर्शनं.

SCARED, *p. p.* त्रासितः -ता -तं, वित्रस्तः -स्ता -स्तं, त्रस्तः &c., भीतः -ता -तं.

SCARF, *s.* चैलं, अङ्कवस्त्रं, उपवस्त्रं, उत्तरीयं, सिचयः, अधिकाङ्गं.

SCARF-SKIN, *s.* वाह्यत्वक् *f.* (च्), बहिस्त्वक् *f.*, वाह्यचर्म्म *n.* (न्), अवभासिनी.

SCARIFICATION, *s.* त्वक्छेदः -दनं, त्वग्लिखनं, त्वगुल्लिखनं, लिखनं, उल्लिखनं, प्रोल्लेखनं, रक्तमोक्षणार्थं त्वक्छेदनं or चर्म्मछेदनं.

SCARIFICATOR, SCARIFIER, *s.* त्वक्छेदकः, त्वगुल्लेखकः, त्वक्छेदनयन्त्रं.

SCARIFIED, *p. p.* लिखितः -ता -तं, उल्लिखितः &c., छिन्नत्वक् *m. f. n.*, उल्लिखितत्वक्.

To SCARIFY, *v. a.* त्वचं or चर्म्म लिख् (c. 6. लिखति, लेखितुं) or उल्लिख् or प्रोल्लिख् or प्रलिख् or विलिख्, त्वचं छिद् (c. 7. छिनत्ति, छेत्तुं) or विछिद्.

SCARLESS, *a.* निर्व्रणः -णा -णं, निर्व्रणः &c., व्रणहीनः -ना -नं, अव्रणः &c.

SCARLET, *a.* सुरक्तः -क्ता -क्तं, रक्तः &c., शोणितः &c., सिन्दूरवर्णः &c.

SCARLET-FEVER, SCARLATINA, *s.* उदर्दः, उदर्धः.

SCATE, *s.* (Fish) शकुचिः *m.* -ची *f.*, शाकुचिः -ची, शकुः *m.*, शकुलः, सङ्कोचः.

To SCATH, *v. a.* क्षतं कृ, क्षतिं कृ, क्षण्, अर्द्, हिंस्. *See To* HURT, DAMAGE.

Scathed, *p. p.* क्षतः -ता -तं, परिक्षतः &c., विक्षतः &c. अर्द्दितः &c.

Scathless, *a.* अक्षतः -ता -तं, अपरिक्षतः &c., क्षतहीनः -ना -नं, अविक्षतः &c., अक्षितः &c., अहिंसितः &c., अजातक्षतः -ता -तं, अजातापकारः -रा -रं.

To scatter, *v. a.* कॄ (c. 6. किरति, करितुं -रीतुं), विकॄ, प्रकॄ, आकॄ, अवकॄ, इतस्ततो or बहुधा विकॄ or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), बहुधा क्षिप् or व्यस् (c. 4. -अस्यति -सितुं), विनिर्धू (c. 5. -धूनोति -धवितुं), विधू, विद्रु (c. 10. -द्रावयति -यितुं), विध्मा. *See To* disperse, dissipate.

To scatter, *v. n.* विकॄ in pass. (-कीर्य्यते), कॄ in pass., बहुधा गम् (c. 1. गच्छति गन्तुं) or विगम्, विक्षिप् in pass. (-क्षिप्यते).

Scattered, *a.* विकीर्णः -र्णा -र्णं, आकीर्णः &c., अवकीर्णः &c., प्रकीर्णः &c., कीर्णः &c., विक्षिप्तः -प्ता -प्तं, व्यस्तः -स्ता -स्तं, सुव्यस्तः &c., उदस्तः &c., बहुधा क्षिप्तः &c., बहुधागतः -ता -तं, प्रसृतः &c., प्रसारितः &c., विधूतः -ता -तं, विनिर्धूतः &c., खण्डितः &c., असंहतः -ता -तं; 'having scattered,' विकीर्य्य; 'being scattered,' कीर्य्यमाणः -णा -णं. अवकीर्य्यमाणः &c., विकीर्य्यमाणः &c.

Scattering, *s.* किरणं, विकिरणं. अवकिरणं, कीर्णिः *f.*, विकीर्णिः *f.*, विकिरः, विक्षेपः -पणं, विसारणं, बहुधा क्षेपः, बहुधागमनं.

Scattering, *part.* विकिरन् -रन्ती -रत् (त्), विकिरणकारी -रिणी -रि (न्).

Scavenger, *s.* अवस्करकः, मलापकर्षी *m.*, मलाकर्षी *m.* (न्), खलपूः *m.*, मार्गशोधकः, मार्गसम्मार्जकः.

Scene, *s.* (Stage) रङ्गः, रङ्गभूमिः *f.*, रङ्गशाला; 'back of the scenes,' नेपथ्यं; 'behind the scenes,' नेपथ्ये.—(Curtain or hanging of a theatre) जपटी.—(Division of an act) प्रवेशः, पात्रप्रवेशः, अङ्कपरिच्छेदः; 'introductory scene,' प्रवेशकः.—(Place represented) भूमिः *f.*, स्थलं -ली, स्थानाकारः, स्थानप्रतिरूपं, भूमिप्रतिरूपं.—(Place where any thing is represented) रङ्गः, भूमिः *f.*—(Painting representing scenery) चित्रगता गृहवृक्षादिरचना, वर्णगता दृक्पातविषयरचना.—(Assemblage of objects seen at one view) दृक्पातविषयः, दृक्पथगोचरविषयाः *m. pl.*, दृष्टिपातविषयः.

Scenery, *s.* (Appearance of various natural objects as seen together) जलतृणवृक्षादिसंस्था, पर्व्वतवृक्षादिसंस्था, जलपर्व्वतवृक्षादिरचना, दृष्टिपातविषयरचना. दृक्पातविषयसंस्था, दृक्पथगोचरजलपर्व्वतवृक्षादि.—(Of a theatre) रङ्गभूमौ or रङ्गशालायां गृहवृक्षादिरचना, चित्रगता or वर्णगता गृहवृक्षादिरचना.

Scenic, scenical, *a.* नाटकीयः -या -यं, अभिनयविषयकः -का -कं.

Scent, *s.* (Odor, smell) गन्धः, वासः; 'sweet scent,' सुगन्धः, सुवासः, आमोदः, मोदः, वासः, परिमलः, धूपः, सौरभ्यं, सुरभिगन्धः, 'a scent spreading far,' समाकर्षी *m.* (न्), निर्हारी *m.*; 'made up scent,' कृत्रिमधूपः -पकः, वृकधूपः, वकधूपः.—(Power of smelling) घ्राणशक्तिः *f.*, घ्राणेन्द्रियं, घ्राणं; 'having a quick scent,' शीघ्रघ्राणः -णा -णं, तीक्ष्णघ्राणः &c., शीघ्रचेतनः -ना -नं.

To scent, *v. a.* (Smell) घ्रा, आघ्रा, उपघ्रा, उपाघ्रा.—(Perfume) वास् (c. 10. वासयति -यितुं), सुरभीकृ, भू in caus., धूप्, सुगन्धीकृ, *see To* perfume.

Scented, *p. p.* (Smelt) घ्रातः -ता -तं, आघ्रातः &c., घ्राणः -णा -णं. (Perfumed) वासितः -ता -तं, सुवासितः &c., अनुवासितः &c., सुरभितः -ता -तं, सुरभीकृतः &c., सुरभिः -भिः -भि, सुरभिगन्धिः -न्धिः -न्धि, सुगन्धी -न्धिनी -न्धि (न्), गन्धी &c., सुगन्धवान् -वती -वत् (त्), गन्धवान् &c., आमोदितः -ता -तं, भावितः &c., परिमलितः &c., *see* Perfumed.

Scentless, *a.* निर्गन्धः -न्धा -न्धं, अगन्धः &c., गन्धहीनः -ना -नं.

Sceptic, *s.* अविश्वासी *m.* (न्), हैतुकः, सन्दिग्धमतिः *m.*, संशयात्मा *m.* (न्), चार्वाकः, अप्रत्ययी *m.*, संशयकारी *m.*, युक्तिबलेन सर्व्वत्र संशयकारी *m.*

Sceptical, *a.* अविश्वासी -सिनी -सि (न्), अप्रत्ययी &c., संशयालुः -लुः -लु, संशयात्मा -त्मा -त्म (न्), सन्दिग्धमतिः -तिः -ति, सन्दिग्धमानसः -सा -सं, संशयानः -ना -नं, संशयापन्नः -न्ना -न्नं, संशयापन्नमानसः -सा -सं. *See* Infidel.

Scepticism, *s.* अविश्वासः, संशयः, सन्दिग्धमतित्वं, *see* Infidelity.

Sceptre, scepter, *s.* राजदण्डः -ण्डं, राजवेत्रं, राजयष्टिः *m.*, शास्तिः *f.*—(Royal authority or office) राजाधिकारः, छत्रसिंहासनं.

Sceptred, sceptered, *a.* राजदण्डधारी -रिणी -रि (न्), दण्डी -ण्डिनी &c.

Schedule, *s.* (Paper, document) पत्रं, लेखः, लेख्यं.—(Paper annexed to a larger document) पत्रानुबन्धः, लेख्यानुबन्धः.—(List), *see* List, Inventory.

Scheme, *s.* कल्पना, उपायः, सङ्कल्पः, परिकल्पना, परिकल्पितं, व्यवसायः, अनुसन्धानं, अनुसन्धा, युक्तिः *f.*, प्रयुक्तिः *f.*, प्रयोगः, कल्पितं, उपायकल्पना.

To scheme, *v. a.* मनसा कॢप् or परिकॢप्, उपायं कॢप्. *See To* plan.

Schemer, *s.* उपायकल्पकः, परिकल्पकः, कल्पनाकारी *m.* (न्), उपायी *m.*

Scheming, *part.* or *a.* युक्तिमान् -मती -मत् (त्), अनुसन्धानी -निनी -नि (न्), अनुसन्धायी &c., उपायी &c., उपायचिन्तकः -का -कं, विदग्धः -ग्धा -ग्धं; 'a scheming woman,' खोटिः *f.*, खोटिः *f.*, विदग्धा स्त्री.

Schirrhus, *s.* *See* Scirrhus.

Schism, *s.* शाखा, शाखाभेदः, धर्म्मभेदः, मतभेदः, मार्गभेदः, सम्प्रदायः, धर्म्मविभेदः, मतविभेदः, धर्म्मविच्छेदः.

Schismatic, schismatical, *a.* धर्म्मभेदकः -का -कं, मतभेदकः &c., मार्गभेदकः &c., शाखाभेदसम्बन्धी -न्धिनी -न्धि (न्), मार्गभेदसम्बन्धी &c., मार्गभेदविषयकः -का -कं.

Scholar, *s.* (Learner, pupil) शिष्यः, विद्यार्थी *m.* (न्), अन्तेवासी *m.*, छात्रः, अन्तेवासिजनः, अध्यायी *m.*, अध्येता *m.* (तृ), विद्याभ्यासी *m.* (न्), शिक्षिताक्षरः, अधीती *m.*, विद्याभ्यासकृत् *m.*, अक्षरमुखः, पाठार्थी *m.*; 'head scholar,' पट्टशिष्यः; 'scholar of a scholar,' प्रशिष्यः.—(Learned man) पण्डितः, पण्डितजनः, विद्वान् *m.* (स्), विद्वज्जनः, कृतविद्यः, सर्व्वरसः, रमकः, तान्त्रिकः, *see* Learned.

Scholar-like, scholarly, *a.* पण्डितयोग्यः -ग्या -ग्यं, छात्रयोग्यः &c.

Scholarship, *s.* पाण्डित्यं, पण्डितत्वं, विद्या, वैदुष्यं, *see* Learning.

Scholastic, scholastical, *a.* पाठशालासम्बन्धी -न्धिनी -न्धि (न्), शालासम्बन्धी &c., पण्डितसभासम्बन्धी &c., पाण्डित्यविषयकः -का -कं.

Scholiast, *s.* भाष्यकारः, टीकाकारः, टीकालेखकः, *see* Commentator.

Scholium, *s.* टीका, भाष्यं, टीकाग्रन्थः, आदर्शः, *see* Commentary.

School, *s.*, (Place of instruction) पाठशाला, विद्यालयः -यं, विद्यावेश्म *n.* (न्), विद्यागृहं, शिक्षालयः -यं, शिक्षागृहं, विद्याभ्यासगृहं, विद्याभ्यासशाला, अध्ययनशाला, अध्ययनगृहं, मठः, आश्रमः, अवसथः, आवसथ्यः, शाला.—(Body of scholars) शिष्यसमूहः, विद्यार्थिसमूहः, छात्रसमूहः, पाठशाला, शाला.—(Sect of philosophers) शाखा, पण्डितशाखा, शिक्षासम्प्रदायः, शालासम्प्रदायः; 'difference of school,' शाखाभेदः; 'of the same school,' एकशाखः -खा -खं; 'of a good school,' शालाशुद्धः -द्धा -द्धं.—(School or system of philosophy) दर्शनः, तीर्थः. There are six schools or systems of philosophy recognised by the Hindús, viz. 1. Púrva Mí-

mánsá, पूर्वमीमांसा, founded by Jaimini, for the purpose of illustrating and explaining the karmakánda, or ritual part of the Vedas. It gives the rationale or meaning of the ritual enjoined in those sacred books, as distinct from the theological or spiritual part of them, and acknowledges the principle of एकत्वं, or oneness, which it was the object of the Vedánta system more fully to investigate. 2. Sánkhya, सांख्यः, ascribed to the Muni Kapila. This system is an attempt to account for the existence of the universe without the Deity, by asserting the principle of द्वैतं or duality, or, in other words, the co-existence of Spirit and matter. 3. Vedánta, वेदान्तः, or Uttara Mímánsá, उत्तरमीमांसा, said to have been founded by Vyása, and subsequently fully developed by its most celebrated teacher शङ्करः or शङ्कराचार्यः. This system is wholly concerned with the theological and philosophical part of the Vedas, or that part contained in the chapters called Upanishads, and its teaching is intended to oppose the duality of the Sánkhya system by shewing that the end or aim of the Vedas is एकत्वं, or the oneness of Spirit. It denies the co-existence of matter with Spirit, and hence the conclusion arrived at is the non-existence of any thing but God. 4. Nyáya, न्यायः, founded by the inspired sage Gautama, and the most popular of all the systems. It is neither so mystical as the Vedánta, nor so fanciful as the Sánkhya. Its title signifies 'the fitness of things,' and it may be described as an attempt to treat of almost all subjects, according to a philosophical method and logical arrangement. 5. Vaiseshika, वैशेषिकं, a branch of the Nyáya, founded by the sage कणादः, to supply what was incomplete in the aphorisms of Gautama. 6. Yoga, योगः or Pátanjala, पातञ्जलं, founded by the sage पतञ्जलिः *m.* Its object is to shew that, even in the body, there may be, to a great extent, union with the Supreme Being. These philosophical systems are contained in sacred writings called Shástras. *See* the word.

To SCHOOL, *v. a.* शिक्ष्, अनुशिक्ष्, उपदिश्, शास्. *See To* TEACH, INSTRUCT.

SCHOOL-BOY, *s.* बालशिष्यः, बालछात्रः, बालाध्यायी *m.* (न्), विद्याभ्यासार्थं पाठशालाम् अभिगच्छति यः कुमारः or बालः or बालकः.

SCHOOL-FELLOW, *s.* सहाध्यायी *m.* (न्), सहपाठकः, समाध्यायी *m.*, एकपाठशालाभिगामी *m.*, एकगुरुः *m.*, एकोपाध्यायः.

SCHOOL-HOUSE, *s.* पाठशाला, पाठगृहं, शिक्षागृहं, शिक्षाशाला, शाला.

SCHOOLING, *s.* शिक्षा -क्षणं, अध्यापनं, उपदेशः, पाठः, विद्यादानं.—(Compensation for instruction) शिक्षावेतनं, शिक्षामूल्यं.

SCHOOLMAN, *s.* तार्किकः, नैयायिकः, न्यायविद् *m.*, तर्कशास्त्रज्ञः.

SCHOOLMASTER, *s.* बालाध्यापकः, बालोपदेशी *m.* (न्), बालोपदेशकः, बालशिक्षकः, अर्भकाध्यापकः, उपाध्यायः, शिक्षागुरुः *m.*, शिक्षयिता *m.* (तृ), विद्यादाता *m.*, पाठशालानायकः, पाठशालाध्यक्षः, आचार्यः, गुरुः *m.*, उपाध्यायः, अध्यापकः.

SCHOOLMISTRESS, *s.* बालाध्यापिका, बालोपदेशिनी, उपाध्याया, आचार्या, शिक्षादात्री, विद्यादात्री, पाठशालाध्यक्षा, पाठशालानायिका.

SCHOOL-ROOM, *s.* पाठशाला, शिक्षाशाला. *See* SCHOOL-HOUSE.

SCHOONER, *s.* कूपकद्वयविशिष्टा नौका, द्विकूपकनौः *f.*, द्विकूपकः.

SCIATICA, *s.* कटिशिरावेदना, कटिस्नायुवेदना, श्रोणिशिरावेदना.

SCIATICAL, *a.* कटिसम्बन्धी -न्धिनी -न्धि (न्), श्रोणिसम्बन्धी &c.

SCIENCE, *s.* विद्या, विज्ञानं, ज्ञानं, शास्त्रं, श्रुतिः *f.*, *see* KNOWLEDGE; 'study of science,' विद्याभ्यासः; 'a science,' विद्या; 'book of science,' शास्त्रं, *see* SHÁSTRA; 'sacred science,' श्रुतं, ज्ञानं; 'profane,' विज्ञानं, उपविद्या; 'skilled in sacred science,' शास्त्रविद्, आगमवेदी -दिनी -दि.

SCIENTIFIC, SCIENTIFICAL, *a.* (According to the principles of science) विद्यासूत्रानुसारी -रिणी -रि (न्), विद्यातत्त्वानुसारी &c., विद्याक्रमानुसारी &c., विद्यासूत्रानुयायी &c., शास्त्रानुसारी &c.—(Well versed in science) विद्यावान् -वती -वत् (त्), ज्ञानी &c., विद्वान् -दुषी -द्वत् (स्), ज्ञानवान् &c., कृतविद्यः -द्या -द्यं, कोविदः -दा -दं, ज्ञातसिद्धान्तः, तात्त्विकः.

SCIENTIFICALLY, *adv.* विद्यासूत्रानुसारेण, विद्यातत्त्वानुसारात्, विद्याक्रमेण.

SCIMITAR, *s.* खड्गः, वक्रखड्गः, न्युब्जखड्गः, असिः *m.*, निस्त्रिंशः, वक्रनिस्त्रिंशः, चक्रकृपाणः, चन्द्रहासः, मण्डलाग्रः, असिरिष्टिः *m.*, धाराविषः, विषुपञ्जरः, करपालः, करवालः, कौक्षेयकः.

To SCINTILLATE, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), अग्निकणान् or अग्निस्फुलिङ्गान् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), ज्वलनकणान् मुच् or निःसृ in caus.

SCINTILLATION, *s.* स्फुरणं, अग्निकणस्फुरणं, स्फुलिङ्गस्फुरणं, स्फुलिङ्गज्वलनं, अग्निकणज्वलनं, स्फुलिङ्गोत्क्षेपः, कणोत्क्षेपः.

SCIOLISM, *s.* खण्डपाण्डित्यं, खण्डज्ञानं, खण्डितज्ञानं, पाण्डित्याभासः, अर्द्धपाण्डित्यं, किञ्चिज्ज्ञानं, अल्पज्ञानं, बुधकता -त्वं.

SCIOLIST, *s.* खण्डपण्डितः, खण्डज्ञानी *m.* (न्), अल्पविद्यः, अल्पज्ञः, किञ्चिज्ज्ञः, अल्पविद्यावान् *m.* (त्), बुधकः.

SCION, *s.* अङ्कुरः, पल्लवः, नवपल्लवः, किसलयः, प्ररोहः, प्रवालः.

SCIRRHOUS, *a.* ग्रन्थिमान् -मती -मत् (त्), ग्रन्थिलः -ला -लं, घनीभूतः &c.

SCIRRHUS, SCIRRHOSITY, *s.* मांसग्रन्थिः *m.*, मांसकाठिन्यं, मांसघनता.

SCISSIBLE, SCISSILE. *a.* छेदनीयः -या -यं, छेद्यः -द्या -द्यं, कर्त्तनीयः -या -यं.

SCISSORS, *s. pl.* कर्त्तरी, कर्त्तनी, कृपाणी, कर्त्री, छेदनी, खड्गधारा, शरारीमुखी.

To SCOFF, *v. n.* अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), क्षिप्, अवज्ञा, तिरस्कृ, मुखरीकृ, अवहस्, उपहस्, अपहस्, विहस्, प्रहस्, अवहासभूमिं कृ, उपहासास्पदं कृ, अपहासास्पदं कृ, गर्ह्, अवगर्ह्, अवगुर्, अवमन्, आक्षर्, भर्त्स्, परिभू, निन्द्, तुच्छीकृ, अवज्ञां कृ. *See To* JEER, MOCK.

SCOFF, *s.* अवक्षेपः, क्षेपः, अवहासः, उपहासः, उपहासोक्तिः *f.*, अवज्ञा, अवज्ञावाक्यं, अवमानोक्तिः *f.*, अवमानं, अवहेला, तिरस्कारोक्तिः *f.*, निन्दोक्तिः *f.*

SCOFFER, *s.* उपहासकः, अवहासकः, अवक्षेपकः, क्षेपकः. *See* MOCKER.

SCOFFING, *s.* अवहासः, उपहासः, तिरस्कारः, तिरस्क्रिया, अवक्षेपणं.

SCOFFINGLY, *adv.* सावक्षेपं, सावहासं, सतिरस्कारं, उपहासेन, सावहेलं.

To SCOLD, *v. a.* or *n.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, विनिन्द्, उपालभ् (c. 1. -लभते -लब्धुं), भर्त्स् (c. 10. भर्त्सयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), तर्ज् (c. 10. तर्जयति -यितुं), आक्रुश्, गर्ह्, विगर्ह्, गुप् in des., क्षिप्, अवक्षिप्, अधिक्षिप्, वाग्दण्डं कृ, तिरस्कृ, परिवद्, परिभाष्. *See To* CHIDE, REPROVE.

SCOLD, *s.* (Foul-mouthed scolding woman) दुर्मुखी, वाग्दुष्टा, कर्कशा,

पूतना, कैकेयी, दुर्गा, कृत्या, महामाया, सदाचारा, यज्ञशीला, अवीरा.

SCOLDED, *p.p.* निन्दितः -ता -तं, उपालब्धः -ब्धा -ब्धं, प्रत्यादिष्टः -ष्टा -ष्टं, तर्जितः -ता -तं, भर्त्सितः &c., तिरस्कृतः &c., अधिक्षिप्तः -प्ता -प्तं.

SCOLDER, *s.* निन्दकः, उपालम्भकारी *m.* (न्), प्रत्यादेशकः, उपक्रोष्टा *m.* (ष्टृ).

SCOLDING, *s.* निन्दा -न्दनं, उपालम्भः, तर्जनं, भर्त्सनं, निर्भर्त्सनं, वाग्दण्डः, वाक्पारुष्यं, परिवादः, परिभाषणं, धिक्कारः, धिक्क्रिया, तिरस्कारः, तिरस्क्रिया.

SCOLLOP, *To* SCOLLOP, *see* SCALLOP, *To* SCALLOP.

SCONCE, *s.* (Holder of the end of a candle) दीपाधाराधारः, वर्त्याधारः, दीपाधारयोग्या लोहनलिका.—(Mulct) दण्डः, दण्डलेशः.

To SCONCE, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं). *See To* MULCT, FINE.

SCOOP, *s.* (Kind of ladle) दर्वी, दर्विका, दार्वी, कविः *f.*, कवी, खजिका; 'batter-scoop,' कुम्भलिका.—(Instrument for excavating) खनित्रं, उत्खनित्रं, खात्रं.

To SCOOP, *v. a.* (Lade out), *see To* LADLE.—(Make hollow, excavate) खन् (c. 1. खनति -नितुं), उत्खन्, निखन्, प्रोत्खन्, खनित्रेण शून्यीकृ or शुषिरीकृ or पुट् or पुटीकृ.

SCOOPED, *p. p.* उत्खातः -ता -तं, उत्खनितः -ता -तं, शुषिरीकृतः &c.

SCOPE, *s.* (End, aim) अभिप्रायः, अभिप्रेतं, तात्पर्य्यं, आशयः, अर्थः, उद्देशः, आकूतं, अभिसन्धिः *m.*, अभिसन्धानं, तात्पर्य्यार्थः, आकांक्षा, विवक्षितं, *see* MEANING.—(Limit, compass) अन्तः, पर्य्यन्तः -न्तं, परिमाणं, विषयः.—(Room, space) अवकाशः, प्रसरः, अवसरः.

SCORBUTIC, SCORBUTICAL, *a.* नासिकारक्तपित्तसम्बन्धी -न्धिनी -न्धि (न्), नासिकारक्तपित्तरोगी -गिणी &c.; 'scorbutic affection of the gums,' शीताद:; 'diseased with it,' शीतादरोगी &c.

To SCORCH, *v. a.* बाह्यतस् or बहिस् or बहिर्भागे दह् (c. 1. दहति, दग्धुं) or निदह् or परिदह् or तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं).

To SCORCH, *v. n.* बाह्यतस् or बहिर्भागे दह् in pass. or तप् in pass.

SCORCHED, *p. p.* बाह्यतस् or बहिर्भागे दग्धः -ग्धा -ग्धं or परिदग्धः &c. or तप्तः -प्ता -प्तं or सन्तप्तः &c. or अभितप्तः &c. or उत्तप्तः &c., भर्जितः -ता -तं, भृष्टः -ष्टा -ष्टं.

SCORCHING, *part.* or *a.* दाहकः -का -कं, तापकः &c., उष्णः -ष्णा -ष्णं, अत्युष्णः &c., प्रचण्डः -ण्डा -ण्डं, चण्डः &c., नैदाघः -घी -घं.

SCORCHING, *s.* बहिर्दाहः, बहिर्दहनं, बहिर्भागे दाहः, बाह्यतस्तापः.

SCORE, *s.* (Twenty) विंशकं, विंशी *m.* (न्), विंशतिः *f.*—(Notch) छेदः, अवच्छेदः, विच्छेदः.—(Line) रेखा, अङ्कः, वर्त्तिः *f.*—(Account, reckoning) गणना, विगणना, विगणनपत्रं, विगणनलेखः, विगणनापत्रं.—(Reason) हेतुः *m.*, कारणं, निमित्तं; 'on the score of,' हेतोः, हेतौ, कारणात्, कृते, निमित्ते or expressed by the abl. c., or by the affix तस्; 'on the score of relationship,' ज्ञातिसम्बन्धहेतोः, ज्ञातित्वात्, ज्ञातिभावतस्.

To SCORE, *v. a.* (Notch) छिद्, अवछिद्, छेदं कृ.—(Mark with lines) रेखाङ्कितं -तां कृ, रेखाभिर् अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न्, अङ्कं कृ, अङ्कनं कृ.—(Set down a debt) ऋणं लिख् or अभिलिख्, ऋणाभिलेखनं कृ, ऋणं लेख्ये आरुह् in caus.—(Set down, take an account of) लिख् (c. 6. लिखति, लेखितुं), अभिलिख्, अङ्क्.

SCORED, *p. p.* अङ्कितः -ता -तं, रेखाङ्कितः &c., लिखितः &c., अभिलिखितः &c.

SCORIA, *s.* रीतिः *f.*, रीतिका, किट्टं, किट्टालः, लोहकिट्टं. *See* DROSS.

SCORN, *s.* अवज्ञा, अवज्ञानं, अवमानं, अवमतिः *f.*, अपमानं, अवहेला -लं -लनं, परिभवः, परिभावः, परिभूतिः *f.*, तिरस्कारः, तिरस्क्रिया, अवलेपः, घृणा, उन्मादः, *see* CONTEMPT; 'object of scorn,' तिरस्कारविषयः, तिरस्कारास्पदं, तिरस्कारपात्रं, परिभवास्पदं, परिभवपदं.

To SCORN, *v. a.* अवज्ञा (c. 9. -जानाति -जानीते -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), तृणाय मन्, अवधीर्, तिरस्कृ, परिभू, गर्ह्, विगर्ह्, तुच्छीकृ, न्यक्कृ, कुत्स्, उपेक्ष्, कदर्थीकृ, बाध् in des., अपध्यै, निन्द्, धिक्कृ. *See To* CONTEMN, DESPISE.

SCORNED, *p.p.* अवज्ञातः -ता -तं, अवमतः &c., अवमानितः &c., अवधीरितः &c., विमानितः &c., तिरस्कृतः -ता -तं, गर्हितः -ता -तं, विगर्हितः &c., परिभूतः &c., अतिनिन्दितः &c., निन्दितः &c.

SCORNER, *s.* अवज्ञाता *m.* (तृ), निन्दकः, अवमन्ता *m.* (न्तृ), अवमानकृत्, अवहेलकृत्, अवज्ञाकारी *m.* (न्), तिरस्कारी *m.*, तिरस्कर्त्ता *m.*, (र्त्तृ), घृणाकरः.

SCORNFUL, *a.* अवज्ञाकारी -रिणी -रि (न्), अवज्ञानी &c., अवमानी &c., सावहेलः -ला -लं, सावज्ञः -ज्ञा -ज्ञं, परिभवी &c., परिभावी &c., परिभावुकः -का -कं, अवमन्ता -न्त्री -न्तृ (न्तृ), सावलेपः -पा -पं, सोन्मादः -दा -दं, अवलिप्तः -प्ता -प्तं, दृप्तः -प्ता -प्तं, तिरस्कारी &c., अवहेलात्मकः -का -कं, निन्दात्मकः &c., अवज्ञारूपः -पा -पं, अवमानार्थकः &c.

SCORNFULLY, *adv.* सावज्ञानं, सावहेलं, सावमानं, सपरिभावं, परिभवेण, सावलेपं, सोन्मादं, सतिरस्कारं, दृप्तवत्, निन्दापूर्व्वं, निन्दकवत्.

SCORNFULNESS, *s.* अवज्ञाशीलता, सावहेलत्वं, अवलिप्तता, सोन्मादत्वं.

SCORPIO, *s.* (The sign) वृश्चिकः, कौर्प्यः, अलिः *m.*

SCORPION, *s.* वृश्चिकः, अलिः *m.*, अली *m.* (न्), आलिः *m.*, आरी *m.* (न्), द्रुणः, द्रोणः, द्रूणः, अलिपकः, अवशीनः, लूमविषः, पस्करादिका; 'its tail or sting,' लूमं -मः.

SCOT, *s.* (Portion of money assessed) करः, देयभागः, देयांशः, देयं.

To SCOTCH, *v. a.* छेदं कृ, छेदैर् अङ्क्, अवच्छेदं कृ, ईषद् क्षण् or छिद्.

SCOT-FREE, *a.* अदण्डितः -ता -तं, अक्षतः -ता -तं, निर्व्रणः -णा -णं.

SCOUNDREL, *s.* धूर्त्तः, दुर्जनः, दुरात्मा *m.* (न्), दुर्वृत्तः, खलः, कुपापकर्म्मी *m.* (न्), अधमवृत्तिः *m.*, दुष्टात्मा, अधमप्रवृत्तिः *m.*, अविहितवृत्तः. *See* RASCAL.

To SCOUR, *v. a.* (Scrub, cleanse by friction) मृज् (c. 1. मार्जति -र्जितुं, c. 2. मार्ष्टि -र्ष्टुं), सम्मृज्, प्रक्षल् (c. 10. -क्षालयति -यितुं), निर्णिज् (c. 3. -णेनेक्ति -णेक्तुं), धाव् (c. 10. धावयति -यितुं), घर्षणेन शुध् (c. 10. शोधयति -यितुं), निर्घर्षणेन शुध् or परिष्कृ.—(Purge), *see* the word.—(Pass swiftly over) शीघ्रं or त्वरितं तॄ or अतितॄ or अतिक्रम्.—(Run swiftly) शीघ्रं धाव्.

SCOURED, *p. p.* मार्जितः -ता -तं, सम्मार्जितः &c., मृष्टः -ष्टा -ष्टं, सम्मृष्टः &c., प्रक्षालितः -ता -तं, निर्णिक्तः -क्ता -क्तं, घर्षणेन धावितः -ता -तं or धौतः -ता -तं or शोधितः &c., निर्धौतः &c., परिष्कृतः &c.

SCOURER, *s.* वस्त्रनिर्णेजकः, वस्त्रसम्मार्जकः, वस्त्रप्रक्षालकः, वस्त्रधावकः, वस्त्रशोधकः, चैलमार्जकः, चैलधावः -वकः, निर्णेजकः, नेजकः.

SCOURGE, *s.* कशा, कषा, प्रतिष्कशः, प्रतिष्कषः, चलिसकः, चर्म्मदण्डः, रज्जुः *m.f.*, चर्म्मरज्जुः *m.f.*, ताडनी, प्रतोदः.

To SCOURGE, *v. a.* कशया तड् (c. 10. ताडयति -यितुं), रज्जुना or रज्ज्वा or चर्म्मरज्ज्वा तड् or प्रहृ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं), कशाघातं कृ, कशाताडनं कृ.

SCOURGED, *p. p.* कशाहतः -ता -तं, कशाताडितः &c. रज्जुताडितः -ता -तं

SCOURGING, *s.* कशाघातः, कशाताडनं, रज्ज्वाघातः, कशाप्रहारः; 'worthy of scourging,' कशार्हः -र्हा -र्हं, कश्यः -श्या -श्यं.

SCOURING, *s.* मार्जनं, सम्मार्जनं, मार्ष्टिः *f.*, परिमार्जनं, प्रक्षालनं, निर्णेकः, निर्णेजनं, धावनं, परिष्कारः, वस्त्रमार्जनं, मलापकर्षणं.

SCOUT, *s.* चारः, चरः, गुप्तचरः, गुप्तदूतः, गूढचारः -री *m.* (न्), गुप्तगतिः *m.*

गूढदूतः, गूढनिरूपकः, शत्रुचेष्टानिरूपकः, प्रणिधिः *m.* *See* SPY.

To SCOUT, *v. n.* (Act as scout) गूढचारवत् शत्रुचेष्टानिरूपणं कृ.

To SCOUT, *v. a.* गर्ह् (c. 1. गर्हते -र्हितुं), सवीभत्सं निराकृ or निरस्.

SCOWL, *s.* भ्रूभङ्गः, भ्रूकुटिः *f.*, भ्रूक्षेपः, भ्रूसङ्कोचः, कटाक्षः, अप्रसन्नदृष्टिः *f.*, अप्रसादसूचिका कुदृष्टिः *f.*, मुखमालिन्यं.

To SCOWL, *v. n.* भ्रूभङ्गं कृ, भ्रूकुटिं कृ, कटाक्षेण or भ्रूभङ्गेन दृश् (c. 1. पश्यति, द्रष्टुं), भ्रुवौ संकुच् (c. 1. -कोचति -चितुं), भ्रूसंकोचं कृ.

SCOWLING, *part.* सभ्रूभङ्गमुखः -खी -खं, मलिनमुखः &c. *See* FROWNING.

SCOWLINGLY, *adv.* सभ्रूभङ्गं, सकटाक्षं, भ्रूभङ्गेन, सभ्रूक्षेपं, भ्रूसङ्कोचपूर्व्वं.

SCRAGGINESS, *s.* कृशता, परिकृशता, कृशाङ्गता, क्षामता, क्षीणता, कार्श्यं.

SCRAGGY, SCRAGGED, *a.* (Lean) कृशः -शा -शं, परिकृशः &c., कृशाङ्गः -ङ्गी -ङ्गं, क्षामः -मा -मं, शिरालः -ला -लं.—(Rough) रूक्षः -क्षा -क्षं, रूक्षः &c., *see* RUGGED.

To SCRAMBLE, *v. n.*, (Climb by seizing with the hands) हस्ताभ्यां धृत्वा or हस्ताभ्याम् अवलम्ब्य आरुह् or अभिरुह्.—(Catch with haste, preventive of another) परनिवारणपूर्व्वं or परनिरसनपूर्व्वं सहसा धृ (c. 1. धरति, धर्त्तुं) or हृ (c. 1. हरति, हर्त्तुं) or झटिति ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

SCRAMBLE, SCRAMBLING, *s.* (Seizing with haste, &c.) इष्टद्रव्यग्रहणार्थं परनिवारणपूर्व्वं सहसा हरणं or हरणेच्छा.—(Climbing with the hands) हस्ताभ्याम् अवलम्ब्य आरोहणं.

SCRAP, *s.* खण्डः -खण्डकः, लवः, अंशः, भागः, शकलः -लं; 'of food,' पिण्डः, पिण्डोलिः *f.*, फेलकः, फेला, लवः. *See* CRUM.

SCRAP-BOOK, *s.* खण्डकाव्यादिरक्षणपुस्तकं, खण्डकवितादिरक्षणग्रन्थः, खण्डकविताग्रन्थः, श्लोकमुद्रादिरक्षणार्थं पुस्तकं.

To SCRAPE, *v. a.* (Rub the surface with something sharp) लिख् (c. 6. लिखति, लेखितुं), उल्लिख्, विलिख्, प्रलिख्, निर्लिख्, प्रोल्लिख्, तक्ष् (c. 1. तक्षति -क्षितुं), त्वक्ष्, खन् (c. 1. खनति -नितुं), क्षुर् (c. 6. क्षुरति, क्षोरितुं), क्षुर् (c. 6. क्षुरति, क्षोरितुं), उल्लेखनं कृ, तक्षणं कृ.—(Rub with a grating noise) घृष् (c. 1. घर्षति -र्षितुं), घर्षणं कृ, *see To* RUB.—(Clean by scraping) घर्षणेन मृज् or प्रक्षल् or निर्णिज्.—(Remove by scraping, scrape off) घर्षणेन अपनी or विनी or मृज् or अपमृज् or अवमृज् or परिमृज् or शुध् in caus., निर्घर्षणं कृ.—(Scrape together) संचि (c. 5. -चिनोति -चेतुं), समाचि, एकीकृ, एकत्र कृ.—(Scrape the feet) पादघर्षणं कृ.

To SCRAPE, *v. n.* (Make a harsh noise) परस्परसंघर्षजं कर्कशशब्दं कृ, परस्परघर्षणं कृ.—(Make an awkward bow) कुप्रणामं कृ.—(Scrape acquaintance) मैत्र्यं कृ, अन्यस्य मैत्र्यम् उपगम्, अन्यस्मिन् प्रीतिं कृ.

SCRAPE, *s.* (Rubbing) घर्षणं, निर्घर्षणं, तक्षणं, क्षुरणं.—(Bow) कुप्रणामः.—(Difficulty) दुर्गं, दुर्गतिः *f.*, दुर्दशा, दुरवस्था, दुःस्थितिः *f.*, दुःखं, कष्टं, आधिः *m.*

SCRAPED, *p. p.* उल्लिखितः -ता -तं, प्रोल्लिखितः &c., घर्षितः &c., *see* RUBBED.

SCRAPER, *s.* (Instrument for scraping) उल्लेखनी -निका, निर्लेखनं -नी, लेखनी, घर्षणी, निर्घर्षणी, निर्घर्षणकः, घर्षणयन्त्रं.—(For the feet) पादोल्लेखनी, पादनिर्लेखनी, पादघर्षणी, पादनिर्घर्षणकः.—(For the tongue) जिह्वोल्लेखनी -निका, जिह्वानिर्लेखनं -नी.—(Kind of shovel) खनिः *f.*, खनी, काष्ठकुद्दालः.

SCRAPING, *s.* (The act) उल्लेखनं, प्रोल्लेखनं, निर्लेखनं, लेखनं, घर्षणं, निर्घर्षणं, क्षुरणं, क्षुरणं, तक्षणं, खननं; 'the tongue,' जिह्वोल्लेखनं,

जिह्वानिर्लेखनं.—(That which is scraped off, scrapings) अवस्करः, अपस्करः, अवकरः, मलं, उच्छिष्टं, कल्कं, विदलं.

To SCRATCH, *v. n.* (Tear or lacerate the skin or surface) त्वचम् उल्लिख् (c. 6. -लिखति -लेखितुं) or प्रोल्लिख् or विलिख् or निर्लिख् or प्रलिख् or लिख्, त्वचं दृ (c. 10. दारयति -यितुं) or विदृ or अवदृ, त्वचं छिद् (c. 7. छिनत्ति, छेत्तुं) or भिद् or निर्भिद्, त्वचं कृत् or निकृत् or क्षुर् (c. 6. क्षुरति, क्षोरितुं) or क्षुर्, त्वक्छेदं कृ.—(With the nail) नखेन त्वचं दृ or विदृ, नखेन त्वचं लिख् or उल्लिख् or प्रलिख्, नखेन अङ्क् (c. 10. अङ्कयति -यितुं), नखेन त्वक्छेदं कृ or त्वग्भेदं कृ.—(Allay itching by scratching) कण्डू (nom. कण्डूयति -ते), कण्डूयनं कृ, कण्डूयां कृ, कण्डूतिं कृ, नखेन त्वचं घृष् (c. 1. घर्षति -र्षितुं) or विघृष्, त्वग्घर्षणं कृ, त्वग्विघर्षणं कृ, गात्रघर्षणं कृ, गात्रविघर्षणं कृ, 'he scratches his head with his nails,' नखैः or अंगुल्यग्रैर् आत्मनः शिरः or आत्मनः शिरोरुहान् कण्डूयति.—(Scratch the ground, excavate with the claws, as birds, &c.) विष्कृ (c. 6. -किरते -करितुं -रीतुं), अपस्कृ, भूमिम् आलिख्य विक्षिप्.—(Wound slightly) त्वचं क्षण्, ईषत् क्षण् or परिक्षण्, त्वग्व्रणं कृ, त्वक्क्षतं कृ, ईषद्व्रणं कृ.—(Write roughly), *see To* SCRAWL.—(Scratch out), *see To* ERASE.

SCRATCH, *s.* (Laceration of the skin or surface) त्वक्छेदः, त्वग्भेदः, त्वगुल्लेखनं, त्वग्लेखनं, त्वग्विलेखः, त्वग्दारणं, त्वग्विदारणं, त्वग्विभेदः, त्वक्क्षतं, त्वक्क्षतिः *f.*, त्वक्परिक्षतिः *f.*, परिक्षतिः *f.*—(With the nail) नखलेखा, नखविलेखः, नखच्छेदः, नखव्रणः -णं, नखक्षतं, नखाङ्कः, नखचिह्नं, नखपदं, नखक्षतिः *f.*, नखपरिक्षतिः *f.*, व्याघ्रनखं -खकं, मुमुलं, शशप्लुतकं.—(With a thorn) कण्टकक्षतं, कण्टकव्रणः.—(Slight wound) त्वग्भेदः, त्वक्क्षतं, त्वग्व्रणः, ईषत्क्षतं, ईषत्त्वग्भेदः, ईषत्त्वक्छेदः.—(Rudely drawn figure), *see* SCRAWL.

SCRATCHED, *p. p.* (Lacerated on the surface) लिखितः -ता -तं, उल्लिखितः &c., प्रोल्लिखितः &c., विदारितः &c., दारितः &c., छिन्नत्वक् *m. f. n.* (च्), भिन्नत्वक् *m. f. n.*, क्षतत्वक् *m. f. n.*, परिक्षतत्वक्, क्षतः -ता -तं, परिक्षतः &c.—(With the nail) नखलिखितः -ता -तं, नखोल्लिखितः &c., नखदारितः &c., नखविदारितः &c., नखछिन्नः -न्ना -न्नं, नखक्षतः -ता -तं, नखपरिक्षतः &c., नखाङ्कितः &c.—(With a thorn) कण्टकक्षतः -ता -तं, कण्टकछिन्नः -न्ना -न्नं.—(Rubbed with the nail) घर्षितः -ता -तं, विघर्षितः &c., नखघर्षितः &c., घृष्टः -ष्टा -ष्टं.

SCRATCHER, *s.* (One who scratches) त्वग्भेदकः, त्वक्छेदकः, त्वगुल्लेखकः, त्वग्लेखकः त्वग्दारकः, त्वग्विदारकः, उल्लेखकः, कण्डूयनकः, कण्डूतिकारी *m.* (न्), कण्डूयाकृत् *m.*—(Bird that scratches for food) विष्किरः, नखविष्किरः, अपस्करकारी *m.*

SCRATCHING, *s.* (The act of lacerating the surface) उल्लेखनं, प्रोल्लेखनं, विदारणं, त्वगुल्लेखनं, त्वग्लेखनं, त्वग्दारणं, त्वग्विदारणं, त्वक्छेदनं, त्वग्भेदनं, *see* SCRATCH, *s.*—(Scratching to allay itching) कण्डूयनं, कण्डूया, कण्डूतिः *f.*, कण्डूः *f.*

SCRATCHING, *part.* (Lacerating the surface) लिखन् -खन्ती -खत् (त्), उल्लिखन् &c.—(To allay itching) कण्डूयन् -यन्ती -यत् (त्), कण्डूयमानः -ना -नं.

To SCRAWL, *v. a.* अस्पष्टं or अस्पष्टाक्षरैः or अस्पष्टक्रमेण लिख् (c. 6. लिखति, लेखितुं) or अङ्क् (c. 10. अङ्कयति -यितुं), अनवधानेन or प्रमादेन लिख्, स्थूलाक्षरैः or कदक्षरैः or अव्यक्ताक्षरैर् लिख्, स्थूलवर्णैः or स्थूलक्रमेण लिख् or आलिख्, अतिशीघ्रं लिख्, अतिक्षिप्रं लिख्.

SCRAWL, SCRAWLING, *s.* अस्पष्टलेखः, अस्पष्टलिखनं, स्थूललेखः, स्थूल-

लेख्यं, स्थूलालेख्यं, अस्पष्टाक्षरलिखनं, स्थूलाक्षरलिखनं, कदक्षरलिखनं.

SCRAWLED, *p.p.* अस्पष्टाक्षरैः or स्थूलाक्षरैर् लिखितः -ता -तं or अङ्कितः &c.

To SCREAM, *v. n.* विक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), क्रुश्, रु (c. 2. रौति, रवितुं), चिट्, नद् (c. 1. नदति -दितुं), रस् (c. 1. रसति -सितुं), वाश् (c. 1. वाशते -शितुं), उच्चैः or उच्चैःस्वरेण क्रुश्, चीत्कारं कृ, चित्कारं कृ, चीत् शब्दं कृ, चीत्कृ, उच्चनादं कृ, महानादं कृ, उच्चस्वरं कृ, नादं कृ; 'with pain,' आर्त्तनादं कृ, आर्त्तस्वरं कृ.

SCREAM, SCREAMING, *s.* विक्रुष्टं, विक्रोशनं, चीत्कारः, चित्कारः, नादः, उच्चनादः, महानादः, रावः, रुतं, क्रुष्टं, उत्क्रोशः, उत्क्रुष्टं, रासः, स्वरः, उच्चस्वरः, कोलाहलः, चटुः -टु *m. n.*; 'of pain,' आर्त्तनादः, आर्त्तस्वरः, आर्त्तरवः.

To SCREECH, SCREECH, SCREACHING, *see To* SCREAM, SCREAMING.

SCREECH-OWL, *s.* नक्तरावी कालपेचकः, कर्कशरावी पेचकभेदः.

SCREEN, *s.* (Partition) व्यवधानं, व्यवधा, तिरस्करिणी, तिरोधानं, अन्तर्धानं, अन्तर्धा, जवनिका, यवनिका, पटः -टं, कटः, प्रतिसीरा, छाया. —(Coarse sieve) स्थूलचालनी.

To SCREEN, *v. a.* (Shelter, protect) छद् (c. 10. छादयति -यितुं), प्रछद्, आछद्, समाछद्, संछद्, गुप् (c. 1. गोपायति, गोप्तुं), अभिगुप्, संगुप्, व्यवधा (c. 3. -दधाति -धातुं), तिरोधा, अन्तर्धा, पिधा, अपिधा, वृ (c. 5. वृणोति -वरितुं -रीतुं, c. 10. वारयति -यितुं), संवृ, आवृ, अपवृ, निवृ, व्यवधानेन रक्ष् or संरक्ष्, गोपनं कृ, संगोपनं कृ, गुप्तिं कृ.—(Sift) शुध्, गालनं कृ, निर्गलनं कृ.

SCREENED, *p.p.* (Protected) छादितः -ता -तं, छन्नः -न्ना -न्नं, प्रच्छादितः &c., आच्छादितः &c., गुप्तः -प्ता -प्तं, गोपितः -ता -तं, संगोपितः &c., गोपायितः &c., व्यवहितः &c., आवृतः &c., संवृतः &c., व्यावृतः &c., अन्तरितः -ता -तं, अन्तर्हितः &c., तिरोहितः &c., व्यवधानरक्षितः &c., व्यवधानगुप्तः -प्ता -प्तं.—(Sifted) शोधितः -ता -तं, निर्गलितः &c.

SCREENING, *part.* व्यवधायकः -का -कं, व्यवधायी -यिनी &c., अन्तर्धायकः &c.

SCREW, *s.* (Spiral bolt or cylinder) व्यावर्त्तनकीलः -लकः, आवर्त्तनकीलः -लकः, परिवर्त्तनकीलः, सावर्त्तनकीलः, विपर्त्तनकीलः, कीलः -लकः, मलसूत्रं; 'male screw,' नरः; 'female,' नारी.—(Stingy person) कृपणः, दृढमुष्टिः *m.*, गाढमुष्टिः *m.*

To SCREW, *v. a.* (Fasten with screws) आवर्त्तनकीलकैः or व्यावर्त्तनकीलकैर् बन्ध् (c. 9. बध्नाति, बन्द्धुं), कीलकैर् बन्ध्, मलसूत्रेण बन्ध्. —(Twist) व्यावृत् (c. 10. -वर्त्तयति -यितुं), आवृत्, परिवृत्.—(Press), *see* the word.—(Oppress) पीड्, बाध्, *see* OPPRESS.—(Drive a screw) कीलं व्यावर्त्य प्रविश् in caus., कीलं परिवर्त्य प्रविश्.

SCREWED, *p. p.* सावर्त्तनकीलबद्धः -द्धा -द्धं, परिवर्त्तनकीलबद्धः &c., बाधितः &c.

To SCRIBBLE, SCRIBBLED, SCRIBBLING, *see To* SCRAWL, SCRAWLED, &c.

SCRIBBLER, *s.* कुलेखकः, कदक्षरलेखकः, कुग्रन्थकारः, अस्पष्टलेखकः.

SCRIBE, *s.* लेखकः, लिपिकरः, लिपिकारः, लिपिजीवी *m.* (न्), कायस्थः, अक्षरजीवकः, अक्षरजीवी *m.* (न्), अक्षरचनः, अक्षरचणः, अक्षरचञ्चुः, अक्षरचुञ्चुः *m.*, मसिपण्यः, मसिजीवी *m.*, वर्णिकः, वार्णिकः, वर्णी *m.* (न्), चित्रकः, लिपिकरः, लिपिविज्ञः, करणः.

SCRIP, *s.* (Small bag) क्षुद्रकोषः, वस्त्रसम्पुटकः.—(Writing, certificate) लेखः, लेख्यं, पत्रिका, पत्रं, प्रमाणपत्रं.

SCRIPTURAL, *a.* शास्त्रीयः -या -यं, शास्त्रानुसारी -रिणी -रि (न्), यथाशास्त्रः -स्त्रा -स्त्रं, शास्त्रसिद्धः -द्धा -द्धं, श्रुतिसिद्धः &c., शास्त्रोक्तः -क्ता -क्तं, शास्त्रप्रोक्तः &c., वेदोक्तः &c., वेदोदितः -ता -तं, वैदिकः -की -कं, श्रुत्युक्तः &c., श्रुतिविहितः -ता -तं, श्रुतिकथितः &c., श्रुत्युदितः &c., यथाश्रुतिः -तिः -ति, औपनिषदः -दी -दं, शास्त्रानुयायी &c., धर्म्मग्रन्थानुसारी &c., धर्म्मग्रन्थप्रोक्तः &c.

SCRIPTURALLY, *adv.* शास्त्रतस्, यथाशास्त्रं, शास्त्रानुसारेण, शास्त्रवत्.

SCRIPTURE, *s.* (Writing) लेखः -खनं, लिपिः *f.*, लिखनं, लेखनं, लिखितं, अक्षरविन्यासः, अक्षरसंस्थानं.—(Sacred writing) श्रुतिः *f.*, श्रुतं, शास्त्रं, ब्रह्म *n.* (न्), कल्पः, आगमः, आम्नायः, प्रमाणं.—(The Bible) धर्म्मग्रन्थः, धर्म्मपुस्तकं. The sacred writings of the Hindús may be arranged under seven heads, viz. 1. Vedas, 2. Upanishads, 3. Vedángas, 4. Upavedas, 5. Shástras, 6. Puránas and 7. Upapuránas. The Student is referred to each separate head for a fuller explanation than is here given of the subdivisions comprised under the several titles. 1. The Vedas are four in number, viz. ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः. 2. The Upanishads, are the theological and philosophical chapters of the Vedas, either detached from, or comprehended in, the principal work, and collectively called वेदान्तः. 3. The Vedángas are six sacred sciences subordinate to the Vedas, viz. Pronunciation, शिक्षा, Description of religious ceremonies, कल्पः, Grammar, व्याकरणं, Prosody, छन्दस्, Astromony, ज्योतिषं, Explanation of difficult and obscure phrases, निरुक्तं -क्तिः. 4. The Upavedas, or Minor vedas, are four, viz. Medicine, आयुर्वेदः, Archery and military art, धनुर्वेदः, Music, गान्धर्ववेदः or गन्धर्ववेदः, Mechanics and the use of tools, &c., शिल्पिशास्त्रं or शस्त्रशास्त्रं. 5. Shástra is a title of very general application, but it is properly restricted to six sacred and philosophical treatises, viz. मीमांसाशास्त्रं, सांख्यशास्त्रं, वेदान्तशास्त्रं, न्यायशास्त्रं containing the branch called वैशेषिकं, योगशास्त्रं and धर्म्मशास्त्रं. The last contains the body of Hindú law, the others are the text-books of the six Hindú schools of philosophy, *see* SCHOOL. 6. The Puránas are eighteen mythological poems, *see* PURÁNA. 7. The Upapuránas, or inferior Puránas, are also eighteen, *see* under PURÁNA.—(One who is conversant with scripture) वेदवित्, वेदज्ञः, शास्त्रवित्, शास्त्रज्ञः, शास्त्रदर्शी *m.* (न्), बहुवेदार्थदर्शी *m.*, शास्त्राभिज्ञः, शास्त्री *m.*, शास्त्राचरणः, शास्त्रसम्पन्नः, ब्रह्मज्ञः, ब्रह्मवित्, ब्रह्मवेदी *m.*, ब्रह्मवेत्ता *m.* (तृ), वैदिकः, श्रुतिधरः, श्रुतिज्ञः, श्रोत्रियः, छान्दसः, स्थूललक्षः; 'conversancy with it,' ब्रह्मज्ञानं, वेदव्युत्पत्तिः *f.*, शास्त्रव्युत्पत्तिः *f.*, शास्त्रज्ञानं, ब्रह्मवेदः, ब्रह्मविद्या; 'study of scripture,' ब्रह्माभ्यासः, ब्रह्माधिगमः -मनं, वेदाधिगमः -मनं, ब्रह्मसत्रं, वेदाध्ययनं, शास्त्राध्ययनं; 'relating to the study of it,' ब्रह्माधिगमिकः -की -कं; 'teaching it,' वेदाध्यापनं, ब्रह्मोपदेशः; 'teacher of it,' आचार्य्यः, उपाध्यायः, वेदाध्यापकः, ब्रह्मोपदेशकः; 'reading it aloud,' ब्रह्मघोषः; 'holiness derived from reading it,' ब्रह्मवर्चसं; 'savour or excellency of it,' ब्रह्मरसः; 'relating to scripture,' श्रौतः -ती -तं, वैदिकः -की -कं, शास्त्रीयः -या -यं; 'authority of it,' श्रुतिप्रामाण्यं, आगमप्रामाण्यं.

SCRIVENER, *s.* नियमपत्रलेखकः, पत्रलेखकः, लेखकः, लिपिकरः.

SCROFULA, *s.* गण्डमाला, कण्ठमाला, अपची, कण्ठगण्डः, गलगण्डः.

SCROFULOUS, *a.* गण्डमाली -लिनी -लि (न्), कण्ठमाली &c., गण्डमालारोगी &c.

SCROLL, *s.* लेख्यपत्रं -त्रकं, दीर्घपत्रं -त्रकं, पटः, दीर्घपटः, पट्टः, चर्म्मपुस्तकं.

Scrotum, *s.* अण्डकोशः, अण्डकोषः, मुष्कः, मुष्ककोषः, फलकोशः, फलकोषकः, वृषणः, वृषणकोषः, कोषः -षकः, कोशः, सीमा *m.* (न्), सीमा, अण्डं -ण्डकः, तीक्ष्णं -क्ष्णकः; 'enlargement of it,' कोषवृद्धिः *f.*, वृद्धिः *f.*; 'septum of it,' महावीर्यं, विटपः.

To scrub, *v. a.* अतिशयेन or अयत्नं मृज् (c. 1. मार्जति -र्जितुं, c. 2. मार्ष्टि -ष्टुं), अतिघर्षणेन मृज्, बलवत् or बलेन मृज्, अतिमार्जनं कृ, अयत्नं प्रक्षल् (c. 10. -क्षालयति -यितुं) or निर्णिज् (c. 3. -णेनेक्ति -णेक्तुं) or धाव् or घृष्. *See To* rub.

Scrub, *s.* हीनवृत्तिः *m.*, अधमवृत्तिः *m.*, जघन्यवृत्तिः *m.*, नीचकर्म्मकारी *m.* (न्), नीचकर्म्मा *m.* (न्), कुत्सितकर्म्मा *m.*, अपकर्म्मकृत्, अधमकर्म्मा *m.*, पामरः, ग्रामीनः.

Scrubbed, *p. p.* अतिघर्षणपूर्व्वं or अतिघर्षणेन मार्जितः -ता -तं or निर्णिक्तः -क्ता -क्तं, अतिनिर्णिक्तः &c., सुनिर्णिक्तः &c., सुप्रक्षालितः &c., सुमृष्टः &c., सुघर्षितः &c.

Scrubby, *a.* क्षुद्रः -द्रा -द्रं, नीचः -चा -चं, तुच्छः -च्छा -च्छं. *See* Mean.

Scruple, *s.* (Hesitation) शङ्का, आशङ्का, विकल्पः, संशयः. *See* Doubt.

To scruple, *v. n.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, अभिशङ्क्, विशङ्क्, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), त्रस् (c. 4. त्रस्यति -सितुं), विलम्ब्. *See To* hesitate.

Scrupulous, *a.* (Hesitating) शङ्की -ङ्किनी -ङ्कि (न्), आशङ्की &c., शङ्कान्वितः -ता -तं, आशङ्कान्वितः &c., सशङ्कः -ङ्का -ङ्कं, संशयी &c., सन्देही &c., शङ्काशीलः -ला -लं, आशङ्काशीलः &c.—(Exact, nice, precise) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c., सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी &c., सूक्ष्माचारी &c., अतिसूक्ष्माचारी &c., यथाचारः -री -रं, यथाचारी &c.

Scrupulousness, *s.* शङ्काशीलता, सशङ्कता, सूक्ष्मता, अतिसूक्ष्मता, सूक्ष्मदृष्टिः *f.*

Scrutineer, *s.* सूक्ष्मपरीक्षकः, सूक्ष्मनिरूपकः, निरूपकः. *See* Scrutinizer.

To scrutinize, *v. a.* सूक्ष्मं or अतिसूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं) or परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरीक्ष् or दृश् (c. 1. पश्यति, द्रष्टुं) or अनुसन्धा (c. 3. -दधाति -धातुं) or ज्ञा in des. (जिज्ञासते -सितुं) or अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or मार्ग् (c. 10. मार्गयति -यितुं), परिमार्ग्.

Scrutinized, *p. p.* अतिसूक्ष्मं निरूपितः -ता -तं or परीक्षितः &c. or निरीक्षितः &c.

Scrutinizer, *s.* सूक्ष्मनिरूपकः, सूक्ष्मपरीक्षकः, सूक्ष्मदर्शी *m.* (न्), सूक्ष्मानुसन्धायी *m.*, सूक्ष्मानुसन्धानी *m.*, सूक्ष्मजिज्ञासाकृत् *m.*, निरूपकः, परीक्षकः &c.

Scrutiny, *s.* सूक्ष्मपरीक्षा, सूक्ष्मनिरूपणं, सूक्ष्मानुसन्धानं, सूक्ष्मदर्शनं, सूक्ष्मनिरीक्षा -क्षणं, सूक्ष्मजिज्ञासा, परीक्षा -क्षणं, निरूपणं, अनुसन्धानं, निरीक्षणं, संवीक्षणं, जिज्ञासा, अनुयोगः.

To scud, *v. n.* अतिवेगेन गम् (c. 1. गच्छति, गन्तुं) or चल् (c. 1. चलति -लितुं), सहसा चल्; 'before the wind or a tempest,' अतिवेगेन अनुवातं चल्, वात्यावेगेन अतिशीघ्रं चल् or वह् in pass. (उह्यते), अतिवेगेन वात्याप्रेरितः -ता -तं भू.

Scud, *s.* वातप्रेरितशीकरः, वातप्रेरितमेघः, वातप्रेरितकुज्झटिका.

Scuffle, *s.* विग्रहः, तुमुलं, बाहूबाहवि युद्धं, बाहूबाहवि कलहः, हस्ताहस्ति युद्धं, नियुद्धं, सङ्कुलयुद्धं, रणसङ्कुलं, शरीरसम्बन्धः.

To scuffle, *v. n.* बाहूबाहवि युध् (c. 4. युध्यते, योद्धुं) or नियुद्धं कृ.

To skulk, *v. n.* निभृते स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), निभृतस्थाने or गूढस्थाने वृत्, गुप्तः -प्ता -प्तं भू or वृत्, अन्तरितः -ता -तं भू, गुप् in pass. (गुप्यते); 'to skulk off,' अपसृप् (c. 1. -सर्पति -सर्प्तुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्.

Sculker, *s.* निभृतवर्त्ती *m.* (न्), निभृतस्थायी *m.* (न्), गुप्तवर्त्ती *m.*

Sculking, *s.* निभृतवर्त्तनं, निभृतस्थाने or गूढस्थाने वर्त्तनं, अपसर्पणं.

Scull, *s.* (Bone that surrounds the brain) कपालः -लं, कर्परः, शिरोस्थि *n.*, मस्तकः -कं, [illegible], करोटः -टिः -टी *f.*, मुण्डः -ण्डं, भगालः; 'a chaplet or necklace of sculls,' कपालस्रक् *f.* (ज्), कापाली स्रक्, [illegible]माला, कापाली [illegible]; 'pertaining to the scull,' कापालः -ली -लं, कापालिकः -की -कं.—(Short oar) क्षुद्रक्षेपणिः, क्षुद्रदण्डः, ह्रस्वदण्डः.

To scull, *v. a.* क्षुद्रदण्डेन नौकां चल् (c. 10. चालयति -यितुं).

Scull-cap, *s.* शिरोवेष्टः -ष्टनं, शिरस्कं, शिरोवस्त्रं, मस्तकावरणं -णी.

Sculler, *s.* क्षुद्रदण्डेन नौकाचालकः, क्षुद्रक्षेपणिचालकः. *See* Rower.

Scullery, *s.* पिठरागारं -रः, भाण्डागारं -रः, पात्रागारं, स्थाल्यागारं, कटाहागारं, कुण्डागारं, पिठरं.

Scullion, *s.* पिठरादिप्रक्षालकः -का, भाण्डादिमार्जकः -का, कटाहादिशोधकः -का, कुण्डकटाहादिपरिष्कारकः -का.

Sculptor, *s.* तक्षकः, तष्टा *m.* (ष्), तक्षा *m.* (न्), त्वष्टा *m.*, मूर्त्तिकारः -रकः, प्रतिमाकारः -रकः, मूर्त्तितक्षकः, प्रतिमातक्षकः, उपमाता *m.* (तृ), उपमाकारः.

Sculpture, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्), त्वक्षणं, मूर्त्तितक्षणं, प्रतिमातक्षणं, मूर्त्तिकरणं, प्रतिमाकरणं, उपमाकरणं, उपमातक्षणं.

To sculpture, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं, c. 5. तक्ष्णोति), त्वक्ष् (c. 1. त्वक्षति -क्षितुं), प्रतिमातक्षणं कृ, मूर्त्तितक्षणं कृ, प्रतिमां कृ, मूर्त्तिं कृ.

Sculptured, *p. p.* तष्टः -ष्टा -ष्टं, तक्षितः -ता -तं, त्वष्टः -ष्टा -ष्टं.

Scum, *s.* (Impure matter or froth which rises to the surface of liquors) मण्डः -ण्डं, मृद्वीरसः, रसाग्रं, फेनः, पराञ्जः, कारुजः, उत्पीडः, उत्तररसः, उपरिस्थरसः; 'of boiled rice,' निस्रावः, विस्रावः, मासरः, आचामः.—(Refuse, dirt) मलं, अवस्करः, अपस्करः, उच्छिष्टं, अवशिष्टं, कल्कं, उद्वर्त्तः, शुष्टं, असारद्रव्यं.

To scum, *v. a.* मण्डम् अपहृ (c. 1. -हरति -हर्त्तुं) or अपनी, निर्मण्डीकृ.

Scurf, *s.* त्वक्क्लेदः, चर्म्मक्लेदः, शिरश्चर्म्ममध्ये पिण्डितक्लेदः, मस्तकत्वक्क्लेदः, शिरोमज्जा, मस्तकमज्जा, मज्जा, शिरोमलं, चर्म्ममलं.

Scurfy, *a.* त्वक्क्लेदवान् -वती -वत् (त्), चर्म्ममलवान् &c., मलावृतः -ता -तं.

Scurrility, *s.* मौखर्य्यं, मुखरत्वं, दुर्मुखता, वाग्दुष्टता, वाक्पारुष्यं, पारुष्यं, परुषवचनं, परुषोक्तिः *f.*, दुर्वचनं, दुरुक्तिः *f.*, दुरुक्तं, दुर्भाषणं, अपभाषणं, दुर्वचस् *n.*, खलोक्तिः *f.*, परोद्वेगकभाषणं, अपशब्दः, न्यक्कं.

Scurrilous, *a.* (Using abusive language) मुखरः -रा -रं, दुर्मुखः -खी -खं, वाग्दुष्टः -ष्टा -ष्टं, परुषवाक् *m. f. n.* (च्) परुषोक्तिकः -का -कं, परुषभाषी -षिणी -षि (न्), कटुभाषी &c., मुखशापः -पा -पं, मुखशीलः -ला -लं, अबद्धमुखः &c., परोद्वेगकरभाषी &c., क्षेपकः -का -कं.—(Containing low abuse) परुषः -षा -षं, परुषोक्तिमयः -यी -यं, दुरुक्तः -क्ता -क्तं, दुर्वाच्यः -च्या -च्यं.

Scurvily, *adv.* कुत्सितं, सकार्पण्यं, तुच्छप्रकारेण, अविनयेन, परुषं.

Scurviness, *s.* कुत्सितत्वं, तुच्छता, कार्पण्यं, पामरता, जघन्यता, खलता.

Scurvy, *s.* (The disease) शीतादः, नाविकरक्तपित्तः -त्तं.

Scurvy, *a.* कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, पामरः -रा -रं, *see* Mean.

Scutcheon, *s.* कुलचिह्नपत्रं, कुलमर्य्यादालक्षणपत्रं, कुलीनलक्षणपत्रं.

Scuttle, *s.* (Broad basket) विशालपेटकः, पृथुकरण्डः.—(Hole in the side of a ship) नौपार्श्वच्छिद्रं.

To scuttle, *v. a.* नौकापार्श्वे or नौकातले छिद्राणि कृ, नौपार्श्वं सच्छिद्रं कृ.

To scuttle, *v. n.* (Run off affectedly) वैलक्ष्येण अपधाव्.

SCYTHE, *s.* सङ्गीकः, लवित्रं, लवाणकं, शस्यछेदनी, शस्यकर्त्तनी.

SEA, *s.* समुद्रः, अर्णवः, सागरः, जलधिः *m.*, उदधिः *m.*, अब्धिः *m.*, जलनिधिः *m.*, महोदधिः *m.*, वारिधिः *m.*, वारिनिधिः, नीमालयः, *see* OCEAN; 'a rough sea,' क्षुब्धार्णवः, क्षुब्धसमुद्रः, वार्न; 'a sea of trouble,' दुःखसागरः; 'ablution or bathing in the sea,' समुद्रस्नानं; 'the seven seas,' सप्तसमुद्राः *m. pl.*, *see* under OCEAN.

SEA-BATHING, *s.* समुद्रस्नानं, समुद्रजलस्नानं.

SEA-BEAT, *a.* तरङ्गाहतः -ता -तं, कल्लोलाहतः &c., उत्तरङ्गः -ङ्गा -ङ्गं.

SEA-COAST, *s.* समुद्रतटं, समुद्रतीरं, जलधितीरं, अब्धितीरं, अब्धितटं.

SEA-FARING, *a.* समुद्रयायी -यिनी -यि (न्), समुद्रगामी &c., समुद्रगः -गा -गं, समुद्रमार्गेण or समुद्रपथेन गमनागमनकारी &c., नौकाजीवी &c., सांयात्रिकः -की -कं.

SEA-FIGHT, *s.* समुद्रयुद्धं, अब्धियुद्धं, नौकायुद्धं, नौयुद्धं.

SEA-GIRT, SEA-ENCIRCLED, *a.* समुद्रमेखलः -ला -लं, अर्णवमेखलः &c., अब्धिमेखलः &c., समुद्ररसनः -ना -नं, जलधिरसनः &c., समुद्रवेष्टितः -ता -तं, समुद्रवलयाङ्कितः &c., समुद्रान्तः -न्ता -न्तं, सागरान्तः &c.

SEA-GREEN, *a.* समुद्रवर्णः -र्णा -र्णं, अब्धिवर्णः &c., श्यामहरित् *m. f. n.*

SEA-GULL, *s.* समुद्रकुक्कुटः -टी, समुद्रचरटः, जलकुक्कुटः -टी, चिञ्चका, गङ्गाचिल्ली, देवट्टी, समुद्रप्लवः.

SEA-MAN, *s.* समुद्रयायी *m.* (न्), समुद्रगः, नाविकः. *See* SAILOR.

SEAMANSHIP, *s.* नाविकविद्या, नौचालनविद्या, नौकानयनविद्या.

SEA-PORT, *s.* नौकाश्रयः, नौकाश्रयः, समुद्रतीरस्थनगरी.

SEA-SALT, *s.* समुद्रलवणं, सामुद्रं, अक्षीवं, अब्धिजं, वशिरं, वशिरं.

SEA-SHORE, *s.* समुद्रतीरं, समुद्रतटं, समुद्रवेला, वेला, समुद्रान्तः -न्तं, सिन्धुतटं, जलधिरोधस् *n.*, वेलामूलं; 'on the sea-shore,' वेलायां, समुद्रतीरे.

SEA-SICK, *a.* समुद्रामयग्रस्तः -स्ता -स्तं, समुद्ररोगपीडितः -ता -तं.

SEA-SICKNESS, *s.* समुद्रामयः, समुद्ररोगः, अब्धिप्रलोठनजा वमनेच्छा.

SEA-SIDE, *s.* समुद्रतीरं, समुद्रवेला, समुद्रसमीपभूमिः *f.*

SEA-WATER, *s.* समुद्रजलं, समुद्राम्बु *n.*, सागराम्बु *n.*, समुद्रवारि *n.*, समुद्रोदकं.

SEA-WEED, *s.* समुद्रशाकः, समुद्रतृणं, समुद्ररोही शाकविशेषः.

SEA-WORTHY, *a.* समुद्रगमनयोग्यः -ग्या -ग्यं, समुद्रयानयोग्यः &c., समुद्रतरणयोग्यः &c.

SEAL, *s.* (Stamp) मुद्रा.—(Signet) मुद्रा, प्रत्ययकारिणी, दीनारः.—(Finger-ring seal) अङ्गुलिमुद्रा.—(Seal or tie with a seal for fastening a letter) तालिकः.—(Impression of a seal) मुद्रा.—(Sea-calf) समुद्रवत्सः, मकरः.

To SEAL, *v. a.* मुद्र् (nom. मुद्रयति -यितुं), मुद्रीकृ, समुद्रीकृ, मुद्रितं -तां कृ.—(Mark with a seal) मुद्राङ्कितं -तां कृ, मुद्राचिह्नितं -तां कृ, मुद्रया अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न् (c. 10. चिह्नयति -यितुं), मुद्रालाञ्छितं -तां कृ.—(Fasten with a seal) मुद्रया बन्ध् (c. 9. बध्नाति, बन्धुं).

SEALED, *p.p.* मुद्रितः -ता -तं, मुद्रीकृतः &c., समुद्रः -द्रा -द्रं, समुद्रीकृतः &c.—(Marked with a seal) मुद्राङ्कितः -ता -तं, मुद्राचिह्नितः &c., मुद्रालाञ्छितः &c., अङ्कितः &c., चिह्नितः &c.—(Fastened with a seal) मुद्राबद्धः -द्धा -द्धं, तालिकबद्धः &c.; 'sealed papers,' मुद्रिका.

SEALING, *s.* मुद्रीकरणं, समुद्रीकरणं, मुद्राङ्कनं, मुद्राबन्धनं, अङ्कनं.

SEALING-WAX, *s.* लाक्षा, अलक्तः, अलक्तकं, लक्तकं, राक्षा.

SEAM, *s.* (Suture, joining) सन्धिः *m.*, सीवनं, सेवनी.—(Formed by sewing) सूचिसेवनं, सीवनं.—(Of planks) फलकसन्धिः *m.*, काष्ठसन्धिः *m.*—(Cicatrix) शुष्कव्रणः, रूढव्रणं.

SEAMLESS, *a.* सन्धिहीनः -ना -नं, सन्धिरहितः -ता -तं, निःसन्धिः -न्धिः -न्धि.

SEAMSTRESS, *s.* सूचिका, सूचिकर्म्मोपजीविनी, सूचीशिल्पोपजीविनी.

To SEAR, *v. a.* बहिर्भागं दह् (c. 1. दहति, दग्धुं, c. 10. दाहयति -यितुं), बहिर्भागं दह्, दाहेन or दहनेन बहिर्भागं दृढीकृ or घनीकृ or कठिनीकृ or शुष्कीकृ.

SEAR, *a.* शुष्कः -ष्का -ष्कं, शीर्णः -र्णा -र्णं, विशीर्णः &c., म्लानः -ना -नं.

To SEARCH, *v. a.* अन्विष् (c. 4. -इष्यति, c. 6. -इच्छति -एषितुं -एष्टुं), अन्वेष् (c. 1. -एषते -षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं), अवेक्ष्, निरीक्ष्, संवीक्ष्, मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं), मृग् (c. 10. मृगयते -ति -यितुं), विचि (c. 5. -चिनोति -चेतुं), ज्ञा in des. (जिज्ञासते -सितुं), चर्च् (c. 1. चर्चति -र्चितुं).

SEARCH, SEARCHING, *s.* अन्वेषणं -णा, पर्य्येषणं -णा, अनुसन्धानं, जिज्ञासा, अन्विष्टिः *f.*, परीष्टिः *f.*, निरूपणं, परीक्षा -क्षणं, संवीक्षणं, निरीक्षा -क्षणं, समीक्षणं, अनुसरणं, मार्गः -र्गणं, शोधनं, अनुयोगः, विचयः, चर्चा, उद्देशः, तर्कं; 'for wealth,' अर्थान्वेषणं, अर्थेहा.

SEARCHED, *p.p.* अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं, निरूपितः -ता -तं.

SEARCHER, *s.* अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), अन्वेषकः, निरूपकः, निरूपयिता *m.* (तृ), परीक्षकः, निरीक्षकः, अनुसन्धाता, अनुसन्धायी *m.*, जिज्ञासाकृत्; 'of the heart,' अन्तर्यामी *m.*

SEARED, *p.p.* तप्तलोहदग्धः -ग्धा -ग्धं, दाहेन कठिनीकृतः -ता -तं.

